| पुरुषवेदस्य बन्धोच्छेदः स्त्रीवेदस्य चोदयसत्त्वयोर्व्यवच्छेदः .... .... | ४१५ |
| स्त्रीवेदोदयारूढस्य सप्तनोकषायाणां क्षपणा | ४१५ |
| नपुंसकवेदोदयारूढस्य तद्वेदप्रथमस्थितिः | ४१६ |
| नपुंसकवेदोदयारूढस्य स्त्रीवेद-नपुंसकवेदयोः क्षपणा .... .... | ४१६ |
| नपुंसकवेदस्यागालविच्छेदः .... | ४१६ |
| नपुंसकवेदस्य जघन्यस्थित्युदीरणा जघन्यानुभागोदीरणोत्कृष्टा च प्रदेशोदीरणा .... | ४१६ |
| नपुंसकवेदस्य जघन्यस्थितिसंक्रमो जघन्यानुभागसंक्रमश्च .... .... | ४१७ |
| नपुंसकवेदस्य जघन्यानुभागोदयादिकम् | ४१७ |
| स्त्रीवेदनपुंसकवेदयोः सर्वथा क्षपणा | ४१७ |
| पुरुषवेदस्य बन्धव्यवच्छेदो नपुंसकवेदस्य चोदयसत्त्वयोर्व्यवच्छेदः .... .... | ४१७ |
| नपुंसकवेदोदयारूढस्य सप्तनोकषायक्षपणा | ४१८ |
| पुरुषवेदभिन्नवेदोदयारूढानां पुरुषवेदस्य जघन्यस्थितिबन्धादीनां प्रतिषेधः .... | ४१८ |


Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

विषयः पृष्ठाङ्कः

७ अपगतकषायाद्धाधिकारः ४१९–४४३

क्षीणकषायगुणस्थानकप्राप्तिरीर्यापथिककर्मबन्धश्च .... .... ४१९
ईर्यापथिककर्मणो विशेषव्याख्यानम् .... ४२०-४२१
क्षीणकषायगुणस्थानके स्थितिघात-रसघात-गुणश्रेणयः .... .... ४२२
ध्यानस्य कर्मक्षयकारणता .... ४२३
क्षीणकषाये चरमस्थितिखण्डस्य व्याख्यानम् ४२३
कर्मक्षयकारणध्यानं द्विविधम .... ४२४
धर्मध्यानस्य चत्वारो भेदाः .... ४२४
आज्ञाविचयाख्यधर्मध्यानस्य स्वरूपम् ४२४
अपायविचयाख्यधर्मध्यानस्य स्वरूपम् ४२५
विपाकविचयाभिधधर्मध्यानस्य स्वरूपम् ४२७
संस्थानविचयाभिधधर्मध्यानस्य स्वरूपम् ४२७
धर्मध्यानस्य ध्यातारः .... .... ४२९
ध्यायकस्य भावनादयः .... .... ४२९
धर्मध्यानध्यायिनो लिङ्गम् .... ४३०
शुक्लध्यानस्य चत्वारो भेदाः .... ४३१
पृथक्त्ववितर्कसविचाराख्यप्रथमशुक्लध्यानम् ४३१
एकत्ववितर्काविचाराभिधद्वितीयशुक्लध्यानम् ४३२
शुक्लध्यानध्यायिनो लिङ्गानि .... ४३४
चरमस्थितिखण्डे घातिते घातित्रयस्य स्थितिसत्त्वम् .... .... ४३४
घातित्रयस्य स्थितिघातव्यवच्छेदः .... ४३४
घातित्रयस्य जघन्यस्थित्युदीरणा मतिज्ञानावरणादीनां चतुर्दशप्रकृतीनां जघन्यानुभागोदीरणोत्कृष्टप्रदेशोदीरणा जघन्यस्थितिसंक्रमो जघन्याऽनुभागसंक्रमश्च .... .... ४३५
घातित्रयस्योदीरणाव्यवच्छेदः .... ४३६
क्षीणकषायगुणस्थानकद्विचरमसमये निद्राद्विकस्योदयसत्त्वयोर्व्यवच्छेदः .... ४३६
मतान्तरेण निद्राद्विकस्य सत्त्वमेव व्यवच्छिद्यते, उदयस्तु क्षपकश्रेणौ मूलत एव न भवति ४३६
मतान्तरेण द्विचरमसमये देवगत्यादीनामपि सत्ताया उच्छेदः .... .... ४३७
चरमसमये मतिज्ञानावरणादीनां जघन्याऽनुभागोदय उत्कृष्टप्रदेशोदयश्च .... ४३८
चरमसमये मतिज्ञानावरणादीनां चतुर्दशप्रकृतीनां जघन्यस्थित्युदयः .... ४३८
मतान्तरेण तु मतिज्ञानावरणादीनां जघन्यस्थित्युदय आवलिकां यावद् भवति .... ४३९
मोहनीयस्य नामगोत्रयोश्च जघन्यस्थित्युदयस्य मतद्वयेन भावना .... .... ४३९
चतुर्दशप्रकृतीमुदयसत्त्वयोर्व्यवच्छेदः ४३९
अघातिकर्मणां व्यवच्छेद आक्षेपपरिहारौ ४३९
व्यवहारनयाभिप्रायेणाऽऽवरणस्य क्षीयमाणताऽनन्तरसमये केवलज्ञानोत्पत्तिप्रतिपादनार्थं पूर्वपक्ष उत्तरपक्षश्च .... ४४०-४४१
क्षीयमाणं क्षीणमिति निश्चयनयेन क्षीयमाणतासमय एव केवलज्ञानोत्पत्तिप्रतिपादनार्थं पूर्वपक्ष उत्तरपक्षश्च .... ४४१-४४२
उभयोर्नययोः समन्वयः .... ४४३
क्षीणकषायचरमसमयमाश्रित्य यन्त्रकम् ४४३

८ सयोगिकेवलिगुणस्थानकाधिकारः ४४४-४९३

सयोगिकेवलिप्रथमसमयेऽनन्तकेवलज्ञानादीनां प्राप्तिः .... .... ४४४
सयोगिकेवलिगुणस्थानक उपयोगपरावृत्तिः ४४५
केवलज्ञानस्य निरूपणम् .... ४४५
तीर्थकृन्नामकर्मण उत्कृष्टस्थित्युदय उत्कृष्टस्थित्युदीरणा च .... .... ४४६
सयोगिकेवलिगुणस्थानस्य जघन्यत उत्कृष्टतश्च कालः .... .... ४४७
सयोगिकेवलिगुणस्थानके गुणश्रेणिः ४४७
आयोजिकाकरणस्य निरूपणम् .... ४४८
आवश्यककरणस्य प्रतिपादनम् .... ४४८
अवश्यकरणस्य विवेचनम् .... ४४८
आवर्जितकरणस्य व्याख्यानम् .... ४४९
आवर्जीकरणस्य व्युत्पत्तिः .... ४४९
सयोगिकेवलिनां विशुद्धितारतम्यहेतुतया शुभयोगव्यापारविशेषस्य प्रतिपादनम् .... ४५०


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठाङ्कः |
|---|---|
| आवर्जीकरणस्य कर्तव्यत्वेऽपि समुद्घातस्याऽवश्यंकर्तव्यता .... .... | ४५१ |
| आवर्जीकरणस्य कालः .... .... | ४५१ |
| आवर्जीकरणमावर्जितकरणमित्यादिशब्दभेदेऽप्यर्थभेदाभावः .... .... | ४५१ |
| आवर्जीकरणकालेऽयोगिकेवलिगुणश्रेणिकरणम् .... .... | ४५१ |
| समुद्घातशब्दार्थः .... | ४५२-४५४ |
| समुद्घातं कः करोति ? .... | ४५२ |
| उत्कृष्टतः षण्मासप्रमाण आयुषि शेषे केवलिसमुद्घातं करोतीति वदतां खण्डनम् | ४५४ |
| समुद्घातकरणे कृतनाशादिदोषप्रसक्तिस्तद्वारणं च .... .... | ४५४ |
| वेदनीयादित आयुष्कस्य प्रभूतत्व आक्षेपपरिहारौ | ४५५ |
| समुद्घातारम्भे सयोगिकेवलिनां कृतकृत्यत्वव्याघातप्रसक्तिस्तत्परिहारश्च .... | ४५६ |
| वेदनीयस्योदीरणाऽभावेऽपि समुद्घातोपपत्तिः .... .... | ४५६ |
| केवलिसमुद्घातकरणप्रथमसमये दण्डादिकरणम् .... .... | ४५७ |
| प्रथमसमये दण्डं कुर्वतो जीवप्रदेशानां विस्तरणम् .... .... | ४५८ |
| दण्डं कुर्वतः स्थितिघातः .... | ४५८ |
| दण्डं कुर्वतो रसघातः .... | ४५९ |
| **आवश्यकचूर्णिकारादीनामभिप्रायेण** प्रशस्तप्रकृतीनामप्यनुभागघातः .... | ४५९ |
| **आवश्यकचूर्णिकारादीनां** मतेनाऽऽतपोद्योतयोर्ग्रहणम् .... .... | ४५९ |
| अप्रशस्तविहायोगत्यपर्याप्तनामकर्मणोर्ग्रहणं कार्मग्रन्थिकाऽभिप्रायकम् .... | ४५९ |
| द्वितीयसमये कपाटं कुर्वत आत्मप्रदेशानां विस्तरणम् .... .... | ४६० |
| असंख्येयगुणहीनाः प्रदेशा असंख्येयगुणं क्षेत्रं कथं व्याप्नुवन्तीत्याशङ्का तत्समाधानं च | ४६० |
| कपाटकारिणः स्थितिघातोऽनुभागघातश्च | ४६१ |
| तृतीयसमये प्रतरं कुर्वत आत्मप्रदेशानां विस्तरणम् | ४६२ |

| विषयः | पृष्ठाङ्कः |
|---|---|
| मन्थानप्रतरयोर्मिथः शब्दभेदेऽप्यर्थभेदाभावसिद्धिः .... .... | ४६२ |
| मन्थानशब्देन स्थितिरसह्रासस्य प्रतिपादनम् | ४६३ |
| प्रतरकारिणः स्थित्यनुभागयोर्घातः.... | ४६३ |
| चतुर्थसमये लोकपूरकस्य जीवप्रदेशानां विस्तरणम् .... .... | ४६४ |
| चतुर्थसमये स्थितिरसयोर्विघातः .... | ४६४ |
| लोकपूरणाऽवस्थायां वेदनीयादीनां स्थितिसत्त्वम् .... .... | ४६५ |
| लोकपूरणादीनां संहरणम् .... | ४६५ |
| पञ्चमसमये प्रतरस्थस्य स्थितिघातो रसघातश्च | ४६६ |
| **षष्ठसमये प्रतरं संहृत्य कपाटे तिष्ठतः** स्थितिघातकालो रसघातकालश्चाऽऽन्तर्मौहूर्तिकः | ४६७ |
| **कषायप्राभृतचूर्णिकाराभिप्रायेण** तु पञ्चमसमयात्प्रभृति स्थितिघातकालो रसघातकालश्चाऽऽन्तर्मौहूर्तिकः .... .... | ४६७ |
| समुद्घातस्य सप्तमसमयोऽष्टमसमयश्च | ४६८ |
| सयोगिकेवलिचरमसमयं यावत् संख्येयानि स्थितिखण्डानि .... .... | ४६८ |
| ग्रन्थान्तरे सयोगिकेवलिचरमसमयं यावदसंख्येयानि स्थितिखण्डानीत्यशुद्धेर्युक्त्या प्रदर्शनम् | ४६८ |
| केवलिसमुद्घातावस्थायां योगस्य प्रतिपादनम् | ४६९ |
| समाप्तसमुद्घातसयोगिकेवलिनो योगत्रयम् | ४६९ |
| योगनिरोधे हेतुः .... .... | ४७० |
| योगनिरोधस्य संक्षिप्तव्याख्यानम् .... | ४७० |
| योगनिरोधस्य विस्तृतव्याख्याने मतद्वयम् | ४७१ |
| मतद्वयस्याऽपि प्रामाण्यसाधनाय युक्तिः | ४७१ |
| **आवश्यकचूर्णिकारादीनां** मतेन बादरकाययोगबलेन बादरवाङ्मनउच्छ्वासकाययोगनिरोधः | ४७२ |
| **शतकचूर्णिकृदाद्यभिप्रायेण** सूक्ष्मकाययोगोपष्टम्भाद् बादरकाययोगनिरोधः .... | ४७३ |
| योगस्य पूर्वापूर्वस्पर्धकानि किट्टयश्च | ४७३ |
| सूक्ष्मवचनयोग-सूक्ष्ममनोयोगयोर्निरोधः | ४७३ |
| योगनिरोधप्रतिपादकान्यावश्यकचूर्ण्यक्षराणि .... ... | ४७३-४७६ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठाङ्कः |
|---|---|
| टिप्पण्यामाकर्षणशब्दार्थः .... | ४७४ |
| सूक्ष्मकाययोगनिरोधः ... .... | ४७६ |
| सूक्ष्मक्रियाऽप्रतिपातिध्यानबलेन वदनोदरादिविवरपूरणम् .... .... | ४७६ |
| गुणस्थानकक्रमारोहग्रन्थप्रतिपादितो योगनिरोधः ... .... | ४७६ |
| असत्यपि प्रवर्तमानयोगे तन्निरोधोपपादनम् | ४७७ |
| कषायप्राभृतचूर्णिकारादीनां मतेन बादरमनोयोगवाग्योगोच्छ्वासकाययोगनिरोधः | ४७७ |
| कषायप्राभृतचूर्णिकारादीनामभिप्रायेण सूक्ष्ममनोयोगादीनां निरोधः ... ... | ४७८ |
| सूक्ष्मकाययोगं निरुन्धानेन योगस्याऽपूर्वस्पर्धकानां निर्वृत्तिः .... .... | ४७८ |
| पूर्वापूर्वस्पर्धकवर्गणासु जीवप्रदेशप्रक्षेपः | ४७९ |
| प्रथमसमयेऽपूर्वस्पर्धकानां प्रमाणम् .... | ४७९ |
| अपूर्वस्पर्धककरणाद्धा तस्यां चाऽपूर्वस्पर्धकानां प्रमाणम् .... .... | ४८० |
| योगकिट्टिशब्दार्थस्तन्निर्वृत्तिश्च .... | ४८१ |
| योगकिट्टिषु जीवप्रदेशानां प्रक्षेपः .... | ४८२ |
| प्रतिसमयमपूर्वकिट्टीनां निर्वृत्तिः .... | ४८२ |
| द्वितीयादिसमयेषु योगकिट्टिषु जीवप्रदेशनिक्षेपविधिः .... .... | ४८३ |
| किट्टिगुणकार इत्यस्य विकल्पत्रयम् .... | ४८३ |
| किट्टिकरणाद्धायां निर्वर्तितकिट्टीनां प्रमाणम् | ४८४ |
| द्विचरमसमयं यावत् किट्टीनां विनाशः | ४८४ |
| सूक्ष्मकाययोगं निरुन्धानस्य ध्यानम् | ४८५ |
| सूक्ष्मक्रियाऽप्रतिपातिध्यानस्वरूपम् | ४८५-४८६ |
| चरमसमये सर्वासां योगकिट्टीनां विनाशः | ४८७ |
| वेदनीयादीनामयोगिकेवलिकालतुल्यस्थितिकरणम् .... .... | ४८७ |
| चतुर्नवतिप्रकृतीनां (९४) जघन्यस्थितिसंक्रमः | ४८८ |
| द्वाषष्टिप्रकृतीनां (६२) जघन्यस्थित्युदीरणा | ४८८ |
| चरमसमये सुस्वरदुःस्वरोच्छ्वासानां जघन्यस्थित्युदीरणायां विरोधोद्भावनं तत्समाधानञ्च | ४८९ |
| तैजससप्तकादिपञ्चविंशतिप्रकृतीनामुत्कृष्टानुभागोदीरणा .... .... | ४९० |
| कृष्णनीलादिनवप्रकृतीनां जघन्यानुभागोदीरणा | ४९० |
| औदारिकसप्तकादिद्विपञ्चाशत्प्रकृतीनां (५२) जघन्यस्थित्युदय उत्कृष्टप्रदेशोदयश्च | ४९० |
| तैजससप्तकादिपञ्चविंशतिप्रकृतीनामुत्कृष्टानुभागोदयः .... | ४९० |
| कृष्णनीलादिनवप्रकृतीनां जघन्यानुभागोदयः | ४९० |
| सयोगिकेवलिचरमसमये उदयविच्छेदः | ४९१ |
| आवश्यकचूर्णिकाराद्यभिप्रायेण चरमसमये उच्छ्वासनिरोधः .... .... | ४९२ |
| सूक्ष्मक्रियाऽप्रतिपातिध्यानसामर्थ्येनाऽवगाहनायास्त्रिभागहीनत्वम् .... .... | ४९२ |
| सप्तपदार्थानां व्यवच्छित्तिः .... | ४९२ |
| सयोगिकेवलिचरमसमयापेक्षया यन्त्रकम् | ४९३ |
| **९ अयोगिगुणस्थानकाधिकारः** | **४९४** |
| अयोगिगुणस्थानशब्दार्थः .... | ४९४ |
| व्यवच्छिन्नक्रियाऽप्रतिपातिध्यानस्य स्वरूपम् | ४९४ |
| शैलेशीनिरूपणम् .... .... | ४९६ |
| अयोगिकेवलिनः प्रदेशानां निर्जरणम् | ४९७ |
| द्विचरमसमये द्व्यशीतिप्रकृतीनां (८२) सत्ताविच्छेदः ... .... | ४९८ |
| त्रसादिद्वादशप्रकृतीनां जघन्यस्थित्युदयो मनुष्यायुर्वर्जानां चैकादशानामुत्कृष्टप्रदेशोदयः | ४९९ |
| चरमसमये मनुष्यगत्यादित्रयोदशप्रकृतीनां सत्ताविच्छेदः .... .... | ४९९ |
| चरमसमये मनुष्यगत्यादिद्वादशप्रकृतीनां सत्ताविच्छेदः .... .... | ५०० |
| मतान्तरेण मनुष्यानुपूर्व्याः सत्ताविच्छेदो द्विचरमसमये भवति .... .... | ५०० |
| अस्पृशद्गतिः .... .... | ५०१ |
| निश्चयव्यवहारनयाभ्यां कर्मक्षय-देहवियोगादि | ५०१ |
| सिद्धगतो गतौ चतस्रो युक्तयः .... | ५०२ |
| अयोगिकेवलिगुणस्थानके प्रतिपादितानां पदार्थानां यन्त्रकम् .... .... | ५०४ |
| गुणस्थानकेष्वष्टपञ्चाशदधिकशतप्रकृतीनां क्षपणायाः संक्षेपतः प्रतिपादनम् .... | ५०५ |
| अष्टकर्मणां क्षयादष्टानां गुणानां प्रादुर्भावः | ५०५ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठाङ्कः |
|---|---|
| नामगोत्रकर्मक्षयजन्येऽमूर्ताऽनन्तावगाहनाख्य एकगुण आक्षेप-परिहारौ .... | ५०६ |
| सिद्धशिलाया वर्णनम् .... | ५०७ |
| **मोक्षस्वरूपविचारः** | ५०७-५५४ |
| **नैयायिकवैशेषिकाणां पूर्वपक्षः** | ५०७-५१२ |
| नवानामात्मविशेषगुणानां बुद्ध्यादीनामत्यन्तोच्छेदो मोक्षः .... .... | ५०७ |
| सन्तानत्वहेतुत आत्मविशेषगुणोच्छेदसिद्धिः | ५०८ |
| आत्मविशेषगुणोच्छेदो मोक्ष इत्यस्य संवादक आगमः .... ... | ५०८ |
| तत्त्वज्ञानस्य मोक्षहेतुता .... | ५०९ |
| सञ्चितयोर्धर्माधर्मयोरुपभोगात् प्रक्षयः | ५०९ |
| उपभोगात् प्रक्षय आक्षेपः .... | ५१० |
| समाधिबलादुत्पन्नतत्त्वज्ञानस्य कायव्यूहद्वारोपभोगतः क्षयोपपत्तिः .... .... | ५१० |
| तत्त्वज्ञानिन उपभोगाभिलाषविरहाद् न कायव्यूहद्वारोपभोगः .... .... | ५१० |
| अभिलाषाभावेऽप्युपभोगोपपत्तिः .... | ५१० |
| सञ्चितकर्मक्षये तत्त्वज्ञानस्य कायव्यूहद्वारा हेतुता .... .... | ५१० |
| मोक्षावस्थायां विद्यमानान्यपि कर्माणि न जन्मान्तरशरीराणि प्रारभन्त इति केषाञ्चिन्मतस्य स्थापनम् .... .... | ५१० |
| अनन्तरोक्तमतस्य प्रतिक्षेपः .... | ५११ |
| विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्त्यभ्युपगमे मुक्तेरनित्यत्वे आक्षेपस्तत्परिहारश्च | ५११ |
| **उत्तरपक्षः** | ५१२-५२० |
| आत्मतोऽत्यन्तभिन्नानां बुद्ध्यादीनां स्वीकारे सन्तानत्वहेतोराश्रयसिद्धता .... | ५१२ |
| बुद्ध्यादीनामात्मतोऽभिन्नत्वस्य स्वीकारे दोषः | ५१२ |
| बुद्ध्यादीनामात्मतः कथञ्चिद्भिन्नाभिन्नत्वस्वीकारे स्याद्वादनयमताङ्गीकारप्रसङ्गः .... | ५१२ |
| सन्तानत्वहेतोः सामान्यरूपत्वे स्वरूपासिद्धिः | ५१२ |
| सन्तानत्वहेतोः सत्तारूपपरसामान्यत्वव्याख्यानेन स्वरूपासिद्धेरुद्धारस्तत्प्रतिविधानञ्च | ५१२ |
| सन्तानत्वहेतोरपरसामान्यत्वे दोषः .... | ५१२ |
| सन्तानत्वहेतोर्विशेषरूपत्वे विकल्पचतुष्कस्यावतारस्तत्प्रत्यवस्थानञ्च .... .... | ५१३ |
| सन्तानत्वहेतोर्विरुद्धत्वम् .... | ५१३ |
| प्रदीपवदिति दृष्टान्तस्य साध्यविकलता | ५१३ |
| प्रदीपादीनामुत्तरपरिणामस्याऽप्रत्यक्षत्वेन तन्निश्चयाभाव आक्षेप-परिहारौ .... | ५१३ |
| ध्वस्तप्रदीपस्य विकारान्तरेणावस्थाने दोषस्तत्परिहारश्च .... .... | ५१३ |
| प्रदीपस्य पूर्वापरस्वभावपरिहार-स्वीकार-स्थितिलक्षणपरिणामस्याऽनुमानप्रयोगेण सिद्धिः | ५१४ |
| सन्तानचरमक्षणस्य क्षणान्तराऽजनकत्वे प्रदीपबुद्ध्यादीनामसत्त्वोपपादनम् .... | ५१४ |
| सन्तानत्वहेतोः सत्प्रतिपक्षता .... | ५१४ |
| सन्तानत्वहेतोः कालात्ययापदिष्टत्वम् | ५१४ |
| आत्मविशेषगुणसन्तानोच्छेदसाधकाऽनुमाने किं साध्यतयेन्द्रियजानां बुद्ध्यादीनामुच्छेदः, उताऽतीन्द्रियाणाम् ? .... .... | ५१४ |
| प्रथमपक्षे सिद्धसाधनम् .... | ५१४ |
| द्वितीयपक्षे दोषोद्भावनम् .... | ५१४ |
| नैयायिकवैशेषिकाणामुपहासः .... | ५१४ |
| 'न ह वै सशरीरस्य' इत्याद्यागमस्याऽन्यथा व्याख्यानम् .... .... | ५१५ |
| किं मुक्तौ बुद्ध्यादिगुणानामभावः कारणाभावात् उत विरुद्धत्वात् ? .... .... | ५१५ |
| प्रथमपक्षे ज्ञानादिविशेषगुणत्वावच्छिन्नं प्रति शरीरादेर्निमित्तकारणत्वं प्रत्यवस्थाप्येन्द्रियजबुद्ध्यादिगुणत्वावच्छिन्नं प्रति शरीरादेर्निमित्तकारणत्वस्य मोक्षावस्थायां ज्ञानसुखादिकं च प्रत्यन्येषां कारणतायाः प्रतिपादनम् .... | ५१५ |
| मुक्तौ बुद्ध्यादिगुणानां जन्यत्वेन तेषां ध्वंसापत्तिस्ततश्च न तेषामनन्तत्वम् .... | ५१५ |
| तत्खण्डनायाऽभाववद् भावस्याऽप्यविनाशित्वप्रतिपादनम् . .... .... | ५१६ |
| विनाश-जन्यभावयोः कार्यकारणभावो नास्तीति-प्रतिपादनम् .... .... | ५१६ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयः पृष्ठाङ्कः

विनाश-जन्यभावयोः कार्यकारणभावस्वीकारेऽपि न मोक्षे ज्ञानसुखादीनां सर्वथोच्छेदः .... ५१६
अनन्तज्ञानेऽनुमानम् .... ५१६
विरुद्धत्वाद् ज्ञानादीनामभाव इति द्वितीयपक्षस्य प्रत्यवस्थानम् .... ५१७
ज्ञानादीनामत्यन्तोच्छेदे सौगततः को विशेषो नैयायिकादीनाम् ? .... .... ५१७
ज्ञानादीनामभावस्य साधने न प्रत्यक्षप्रमाणम्, नाऽप्यनुमानम .... .... ५१७
तत्त्वज्ञानस्य मोक्षहेतुतास्वीकारो ज्ञानादिगुणाभावस्य चास्वीकारः .... .... ५१७
उपभोगत एव कर्मप्रक्षयेऽनुपपत्तिः ५१७
उपभोगतः कर्मप्रक्षय इत्यस्ताऽनुमानस्य निरासः .... .... ५१७
कायव्यूहद्वारा फलोपभोगतः कर्मक्षयाभ्युपगमे नृपतिवत् प्रचुरकर्मोत्पादः .... ५१८
आतुरस्याऽपि नीरुग्भावाऽभिलाषेणैवौषधाद्याचरणे प्रवर्तनम् .... .... ५१८
सञ्चित कर्मक्षये कायव्यूहद्वारा तत्त्वज्ञानस्य हेतुतायाः प्रत्यवस्थानम् .... .... ५१८
प्रारब्धकर्मणः फलोपभोगतः क्षयः, सञ्चितकर्मणस्तु पापक्रियानिवृत्तिलक्षणचारित्रोपबृंहिततत्त्वज्ञानतः प्रणाशः .... .... ५१८
तादृशतत्त्वज्ञानस्य सञ्चितकर्मक्षय-भाविकर्मानुत्पादहेतुतायामुष्णस्पर्शदृष्टान्तः .... ५१८
परिणामिजीवादिपदार्थविषयकज्ञानस्यैव तत्त्वज्ञानत्वम्, न तु तदितरस्य .... ५१९
तत्त्वज्ञानिनां नित्यनैमित्तिकानुष्ठानस्वीकारः ५१९
शैलेशीकरणावस्थायां सकलप्रवृत्त्यभावः ५१९
विशिष्टगुणोच्छेदविशिष्टात्मस्वरूपमुक्तेरस्वीकार आत्मन एकान्तनित्यत्वाभावो बुद्ध्यादिभिश्च सहात्मनः कथञ्चित् तादात्म्यम् ५१९
बुद्ध्यादिगुणानामुच्छेदो मोक्ष इत्यस्वीकारे मोक्षेऽपि धर्मादीनामनुवृत्त्या संसारमोक्षयोरविशेष इत्याशङ्का .... .... ५१९
उक्ताशङ्कायाः समाधानम् .... ५२०

विषयः पृष्ठाङ्कः

समानकालीनसमानाधिकरणदुःखप्रागभावासमानदेशो दुःखध्वंसो मोक्ष इति केषाञ्चिन्मोक्षलक्षणम् .... .... ५२०
समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसो मोक्ष इति लक्षणं तत्पदकृत्यञ्च .... ५२०
दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वादिति प्राचामनुमानं तत्प्रतिविधानञ्च .... ५२१
आत्मकाला-ऽन्यवृत्तिध्वंसप्रतियोग्यवृत्तिदुःखत्वं दुःखप्रागभावानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति, सत्कार्यमात्रवृत्तित्वात् प्रदीपत्ववदिति श्रीवर्धमानादीनां सर्वमुक्तिसाधकमनुमानम् ५२१
पक्षस्य विचारस्तत्पदकृत्यं च .... ५२१
साध्यस्य विचारः .... .... ५२१
साध्यस्य पदकृत्यम् .... .... ५२२
हेतोः पदकृत्यम् .... .... ५२३
चैत्रादिमुक्तिसिद्धयेऽनुमानम् .... ५२३
श्रीवर्धमानप्रभृत्युक्तानुमानस्य प्रतिविधानम् ५२३
आत्यन्तिकदुःखप्रागभावो मोक्ष इति प्राभाकराणां मतं तत्खण्डनञ्च .... .... ५२४
दुःखाऽत्यन्ताभावो मोक्ष इति केषाञ्चिन्मतं तत्प्रत्यवस्थानं च .... .... ५२५
विशिष्टदुःखसाधनध्वंसो मोक्ष इति मतं तत्खण्डनं च .... .... ५२५
दुःखध्वंसस्तोमो मोक्ष इति केषाञ्चिन्मतं तत्प्रत्यवस्थानञ्च .... .... ५२५
नित्यनिरतिशयसुखाभिव्यक्तिर्मोक्ष इति तौतातितानां पूर्वपक्षः .... ५२६-५२७
अविद्यायां निवृत्तौ परमानन्दस्वभावताया अभिव्यक्तिः .... .... ५२६
"आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते" इत्यस्यां श्रुतौ षष्ठ्याऽभेदः सूचितः .... ५२६
नित्यसुखस्वीकारे सर्वदा सुखानुभवप्रसङ्ग इत्याशङ्का तत्समाधानं च .... ५२६
आत्मा सुखस्वभावः, अत्यन्तप्रियबुद्धिविषयत्वाद् अनन्यपरतयोपादीयमानत्वाच्च, वैषयिकसुखवदित्यनुमानम् .... .... ५२६

| विषयः | पृष्ठाङ्कः |
|---|---|
| आत्मा सुखस्वभावः, मुख्यप्रेयोबुद्धिविषयत्वाद् निरुपचरितप्रेयःशब्दवाच्यत्वाद्वा .... | ५२७ |
| मुमुक्षुप्रवृत्तिरिष्टार्थप्राप्त्यर्था प्रेक्षापूर्वकारिप्रवृत्तित्वात् .... .... | ५२७ |
| शास्त्रीय उपदेश इष्टार्थप्राप्त्यर्थः,उपदेशत्वात् | ५२७ |
| सुखस्य निरतिशयत्वेऽनुमानम् | ५२७ |
| उत्तरपक्षः .... .... | ५२७-५३७ |
| किं सुखं नित्यम्, उताऽनित्यम्? .... | ५२७ |
| प्रथमपक्षे दोषोद्भावनम् .... | ५२७ |
| द्वितीयपक्षे विकल्पद्वयम्-किं नित्यसुखं स्वप्रकाशकम्, उत तद्भिन्नप्रमाणान्तरप्रमेयम्? | ५२७ |
| प्रथमविकल्पे मुक्तसंसारिणोरविशेषप्रसङ्गः | ५२७ |
| उक्तप्रसङ्गवारणप्रयासस्तत्खण्डनं च .... | ५२७ |
| द्वितीयविकल्पे दोषोद्भावनम् .... | ५२८ |
| "विज्ञानमानन्दं ब्रह्म" इत्यस्यागमस्यैवाऽप्रामाण्यम् .... .... | ५२८ |
| उक्तस्यागमस्य प्रामाण्यस्वीकारेऽपि तत्प्रतिपादितसुखस्य दुःखाभावत्वेन व्याख्यानाद् न दोषः | ५२८ |
| द्रव्यतो नित्यं सुखं पर्यायतश्चानित्यमिति स्याद्वादिमतम् .... .... | ५२९ |
| मोक्षावस्थायां सुखाभ्युपगमे तद्रागेण तत्र प्रवृत्तौ मोक्षाभावः स्यादित्याशङ्का .... | ५२९ |
| उक्ताशङ्कायाः समाधानम् .... .... | ५२९ |
| न्यायमते दुःखनिवृत्त्यात्मकमोक्षस्वीकारे दुःखद्वेषेण तत्र प्रवृत्तौ मोक्षाभावप्रसङ्गः ... | ५३० |
| न्यायमतेन तद्वारणम् .... .... | ५३० |
| तुल्यन्यायेन सुखात्मकमोक्षस्वीकारेऽपि मोक्षाभावप्रसङ्गवारणम् .... ... | ५३० |
| "दुःखसंस्पर्शशून्यशाश्वतिकसुखसंभोगाऽसम्भवात्" इति नैयायिकोक्तस्य खण्डनम् .... | ५३० |
| सुखदुःखयोरेकभाजनपतितविषमधुनोर्मधूत्पन्नसुखकणिकापेक्षविषप्रयोज्यतीव्रतरमरणादिदुःखजनकयोरिव विवेकहानस्य दुःशक्यत्वाद् उभेऽपि सुखदुःखे त्यज्येतामिति नैयायिकाभिप्रायस्य खण्डनम् .... .... | ५३० |
| दुःखहानिरिष्टा सुखहानिस्त्वनिष्टेति प्रतिपादनेन नैयायिकाभिप्रायस्य खण्डनम् | ५३० |
| सुखहानेरनिष्टत्वं विरागिभिर्न वेद्यत इति नैयायिककथनं तत्खण्डनञ्च .... | ५३१ |
| दुःखाभाव एव सुखमिति नैयायिकाभिप्रायस्तत्खण्डनं च .... .... | ५३१ |
| अभिलाषनिवृत्तिः सुखं तदात्मकश्च मोक्ष इति मतं तत्खण्डनं च .... .... | ५३१ |
| विषयोपभोगस्याऽभिलाषाऽनिवर्त्तकत्वम् | ५३१ |
| विषयेषु दोषदर्शनादभिलाषनिवृत्तिः .... | ५३२ |
| अभिलाषनिवृत्तिः सुखमित्यभ्युपगमे विषयोपभोगेन जायमानाऽभिलाषनिवृत्त्यात्मकसुखतो विषयदोषदर्शनेन जायमानाऽभिलाषनिवृत्त्यात्मकसुखस्य विशिष्टतरत्वं न स्यात् ... | ५३२ |
| अभिलाषातिरेकात् तन्निवृत्त्या सुखातिरेकाभिमान इति कथनं तत्खण्डनं च .... | ५३२ |
| नैयायिकमतेन दुःखेन निर्विण्णस्य मुमुक्षोरिच्छाविच्छेदाद् वैराग्यस्याप्युपपत्तिः, ततश्च तेषां मोक्षः, न तु परमानन्दाकाङ्क्षिणाम् ... | ५३३ |
| द्वेषराहित्यलक्षणप्रशान्तत्वविरहात् कथं नैयायिकानां मोक्षः? ... .... .... | ५३३ |
| नेच्छाविच्छेदसामान्यं वैराग्यपदार्थः, किन्तु विषयेच्छाविच्छेदः ... .... | ५३३ |
| नित्यसुखस्य संवेदनं किं नित्यम्, उताऽनित्यम्? इति नैयायिकाशङ्का .... .... | ५३३ |
| नित्यसंवेदनपक्षे दोषाः .... ... | ५३३ |
| नित्यसंवेदनस्य प्रतिबन्धाभ्युपगमे केन प्रतिबन्धः (१) किं शरीरादिना, (२) अथवा वैषयिकसुखेन, (३) उताऽविद्यया, (४) उतस्विद् बाह्यव्यासङ्गेन? .... .... .... | ५३४ |
| उक्तविकल्पचतुष्कस्य खण्डनम् .... | ५३४ |
| नित्यसुखसंवेदनस्याऽनित्यत्वपक्षे दोषाः | ५३४ |
| ५३३ पृष्ठे उत्थापितशङ्कायाः समाधानम् | ५३५ |
| संग्रहनयेन आवरणच्छित्त्याऽभिव्यङ्ग्यः सुखज्ञानादिस्वभावो मोक्षः .... .... | ५३५ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठाङ्कः |
|---|---|
| ऋजुसूत्रादिनयमतेन प्रतिसमयमुत्पद्यमानं सुखज्ञानादिकं मोक्षः .... ... | ५३५ |
| व्यवहारनयानुसारेण कृत्स्नकर्मक्षयो मोक्षः | ५३६ |
| "विज्ञानमानन्दं ब्रह्म" इति श्रुतिर्न विरुध्यते स्याद्वादमते .... .... | ५३६ |
| मुमुक्षुप्रयत्नेन तु यदाऽनाद्यविद्या निवर्तते, तदाऽऽनन्दस्वरूपप्रतिपत्तिर्भवति, सैव मोक्ष इत्यस्य स्वीकारः, किन्त्वविद्यात्वेन कर्म ग्राह्यम् | ५३६ |
| आत्मा सुखस्वभावः, अत्यन्तप्रियबुद्धिविषयत्वाद् अनन्यपरतयोदीयमानत्वाच्चेत्यस्यानुमानस्य खण्डनम् .... .... | ५३६ |
| आत्मा सुखस्वभावः, मुख्यप्रेयोबुद्धिविषयत्वाद् निरुपचरितप्रेयःशब्दवाच्यत्वादित्यस्य खण्डनम् .... .... | ५३६ |
| ५२७ पृष्ठे प्रोक्तशेषाऽनुमानानां नित्यसुखसाधनत्वेन खण्डनम् .... .... | ५३७ |
| अविद्यायां निवृत्तायां विज्ञानसुखात्मकः केवल आत्मा मोक्ष इति वेदान्तिनां मतं तत्खडनं च | ५३७ |
| आनन्दमयपरमात्मनि जीवात्मलयो मोक्ष इति त्रिदण्डिनां मतं तत्खण्डनं च .... | ५३८ |
| सौगतानां पूर्वपक्षः ... | ५३८–५४१ |
| निरुपप्लवा चित्सन्ततिर्मोक्ष इति मतम् | ५३८ |
| ज्ञानक्षणव्यतिरिक्तात्मनोऽसम्भवः .... | ५३८ |
| आत्मदर्शिनां मुक्त्यभावः, .... | ५३८ |
| नैरात्म्यभावनातो मोक्षः .... | ५३९ |
| मुक्तावस्थायां शरीराद्यभावात् कुतश्चित्सन्ततिसंभवः ? .... .... | ५३९ |
| ज्ञानं प्रति शरीरादीनां न कारणत्वम्, किन्तु पूर्वपूर्वविज्ञानक्षणानाम् .... | ५३९ |
| सुषुप्तौ ज्ञानाभावादुत्तरज्ञानक्षणोत्पत्त्यभाव इत्याक्षेपस्तत्प्रतिक्षेपश्च .... | ५३९ |
| अभिभूतज्ञानक्षणतोऽनभिभूतज्ञानस्य रागद्वेषकलुषितज्ञानक्षणतश्च रागद्वेषविनिर्मुक्तज्ञानस्य कथमुत्पत्तिः ? इत्याशङ्का .... | ५३९ |
| उक्ताशङ्कायाः समाधानम् .... | ५३९ |
| निरन्वयविनश्वरचित्सन्ततौ बद्धोऽहं मोक्ष्यामीत्युद्दिश्य यत्नो न स्यात् ? इत्याशङ्का .... | ५४० |
| उक्ताशङ्कायाः समाधानम् .... | ५४० |
| मिथ्यारोपव्यवच्छेदार्थमसत्यपि मोक्तर्यात्मनि नैरात्म्याभ्यासरूपो यत्नः कर्तव्यः .... | ५४० |
| उक्तभावनाविरहे त्विन्द्रियादिषूपभोगाश्रयत्वेन गृहीतेष्वात्मबुद्धेर्निवारणाऽसम्भवेन स्नेहसद्भावाद् न वैराग्यस्य संभवस्ततश्च कथं मोक्षः ? | ५४० |
| 'नोपभोगाश्रयत्वबुद्धिनिबन्धनस्वत्वबुद्धित आत्मीयस्नेहः, किन्तु गुणदर्शनतः' इति पक्षस्तत्खण्डनं च .... .... | ५४० |
| नैरात्म्यभावनाविरहेऽपि कायक्लेशलक्षणतपसः सकलकर्मप्रक्षयाद् मोक्षः स्यादिति मतं तत्खण्डनं च .... .... | ५४० |
| विचित्रशक्तिकं कर्म कथमेकरूपात् कायक्लेशात् क्षीयते ? .... .... | ५४० |
| कर्मशक्तीनां संकरेण क्षयकरणशीलं तप इत्येकरूपादपि कर्मक्षय इति पक्षस्तत्खण्डनं च | ५४१ |
| उत्तरपक्षः .... | ५४१–५४६ |
| ज्ञानक्षणप्रवाहव्यतिरिक्तस्यात्मनोऽसम्भवस्य खण्डनम् .... .... | ५४१ |
| मौक्तिककणनिकरानुस्यूतैकसूत्रकल्पात्मनोऽस्वीकारे कृतनाशाऽकृतागम-संसारभङ्ग-मोक्षभङ्गाः स्मृत्यनुपपत्तिश्च .... | ५४१ |
| स्मरणोपपत्तये प्रयासस्तत्प्रतिविधानं च | ५४२ |
| यथा रक्तकपासबीज उप्ते फलं रक्तवर्णं लभ्यते, तथैव यस्मिन् सन्ताने वासनाऽधिवसति तत्र स्मृतिरिति दृष्टान्तेन स्मृत्यनुभवयोरैकाधिकरण्योपपत्तये प्रयासस्तत्खण्डनं च .... | ५४२ |
| एकसन्तानत्वस्य खण्डनम् ... | ५४३ |
| स्मृत्यभावे निहितप्रत्युन्मार्गण प्रत्यर्पणादिव्यवहारलोपप्रसङ्गः ... ... | ५४३ |
| मुक्तिस्त्वात्मदर्शिनो न भवत्येवेत्यस्य खण्डनम् | ५४३ |
| पूर्वपूर्वविज्ञानक्षणानामेवोत्तरोत्तरविज्ञानक्षणं प्रति कारणत्वमित्येतद् अन्वयिद्रव्यस्वीकार एवोपपन्नम्, नाऽन्यथा ... .... | ५४३ |
| 'पूर्वपूर्वज्ञानक्षणानां तत्तदतिशयवत्त्वेन' इत्यादि कथनमप्यन्वयिद्रव्यस्वीकार एवोपपन्नम् | ५४३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठाङ्कः |
|---|---|
| निरन्वयचित्तसन्तत्यामुत्तरोत्तरक्षणानामत्यन्तनानात्वेऽपि दृढतरैकत्वाध्यारोपेणात्माभिसन्धानाद् मिथ्याध्यारोपस्य व्यवच्छेदार्थं नैरात्म्याभ्यासभावनारूपयत्नः कर्तव्य इत्यस्य बौद्धमतस्य खण्डनम् ... ... | ५४४ |
| ऐकाधिकरण्ये सत्येव बन्धमोक्षव्यवस्थोपपत्तिः, बौद्धमते तु तद्विरहाद् न बन्धमोक्षव्यवस्थोपपत्तिः ... ... | ५४४ |
| 'किञ्चिदिदमतो मम स्यादि' त्यनुसन्धानेनैव प्रेक्षावत्प्रवृत्तिः, बौद्धमते तु कोऽनुसन्धाता ? किं क्षणः सन्तानो वा ? ... ... | ५४४ |
| प्रथमपक्षस्य प्रतिविधानम् ... | ५४४ |
| द्वितीयपक्षस्य प्रत्यवस्थानम् ... | ५४५ |
| एकान्तानित्यत्वेऽर्थक्रियाकारित्वविरहेण नैरात्म्यभावनाया मिथ्यारूपत्वात् कथं तस्या मोक्षहेतुत्वम् ? .... .... | ५४५ |
| निरन्वयविनश्वरत्वाऽभ्युपगमे मोक्षार्थस्य प्रयासस्य वैयर्थ्यापत्तिः ... | ५४५ |
| 'उपभोगाश्रयत्वेन गृहीतेष्विन्द्रियादिषु' इत्यादिबौद्धप्रतिपादनस्य खण्डनम् .... | ५४५ |
| विवेकज्ञा उपभोगाश्रयमात्यन्तिकसुखसाधनं मन्यन्ते, न तु तादात्विकसुखसाधनं स्त्र्यादिकम् | ५४५ |
| इन्द्रियादिषु लेशतोऽपि सुखहेतुत्वस्य सम्भवात् तत्रात्मबुद्धिं न परित्यजतीत्याक्षेपस्तत्परिहारश्च .... .... | ५४५ |
| उपभोगाश्रयेन्द्रियादिषु तादात्विकगुणदर्शनात् तन्निबन्धनस्नेहो मोक्षप्रतिबन्धकः, विवेकिनां तु तादृशगुणदर्शनं नास्ति, अपि तु तत्र दोषदर्शनमस्ति, तच्च कुतः स्नेहव्यावर्तकं न भवेत् ? | ५४६ |
| दोषदर्शनेन विरक्तस्तत्काले निवर्तते, पुनः सुखलेशदर्शनतः पुनस्तत्र रागी स्यादिति बौद्धविधानं तत्प्रतिविधानञ्च .... ... | ५४६ |
| उपभोगाश्रयेषु दुःखहेतुत्वं पश्यन् विरज्यते, तर्ह्यात्मन्यपि तस्य विरागः स्यादित्याशङ्का तत्समाधानं च .... ... | ५४६ |
| व्रतोपबृंहककायक्लेशस्य तपस्त्वेन प्रतिपादनम् | ५४६ |
| 'कायक्लेशस्य कर्मफलत्वेन' इत्यादि सौगतकथनस्य खण्डनम् ... ... | ५४६ |
| स्वल्पेनैवैकोपवासादिना प्रदर्शितसर्वकर्मक्षयापत्तेरिष्टापत्तित्वेन स्वीकारः ... | ५४६ |
| प्रदीपनिर्वाणवत् सर्वथा ज्ञानसन्तानोच्छेदो मोक्ष इति केषाञ्चिन्मतम् ... ... | ५४७ |
| उक्तमतस्य खण्डनम् .... ... | ५४७ |
| खड्गिनो निराश्रयं चित्तं नोपादेयक्षणमारभते सहकारिविरहादित्यनुमाने दोषोद्भावनम् | ५४७ |
| अन्त्यचित्क्षणस्यार्थक्रियाकारित्वविरहे तस्याऽवस्तुत्वापत्तिः, तत्र चाऽऽक्षेपप्रतिक्षेपौ | ५४७ |
| स्वातन्त्र्यं मोक्ष इति केषाञ्चिन्मतं तत्खण्डनं च | ५४८ |
| आत्महानं मोक्ष इति चार्वाकमतं तत्खण्डनञ्च | ५४८ |
| साङ्ख्यानां पूर्वपक्षः .... .... | ५४८-५५० |
| विवेकख्यातिबलेनोपरतायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानं मोक्ष इति मतम् .... | ५४८ |
| प्रकृतेर्बुद्धेश्च प्रतिपादनम् .... | ५४८ |
| शेषाणां त्रयोविंशतितत्त्वानां निरूपणम् | ५४९ |
| प्रकृति-पुरुषयोरन्धपङ्गुवत् संयोगः .... | ५४९ |
| पुरुषस्य चैतन्यशक्तिर्विषयपरिच्छेदशून्या | ५४९ |
| बुद्धेर्विषयपरिच्छेदस्योपपत्तिः .... | ५४९ |
| अचेतनाऽपि बुद्धिश्चिच्छक्तिसान्निध्याच्चैतन्यवतीव प्रतिभासते .... ... | ५४९ |
| अचेतना ज्ञानादय उत्पत्तिमत्त्वादित्यनुमानम् | ५४९ |
| विवेकख्यातितः प्रकृतिनिवृत्तिः .... | ५५० |
| नर्तकीकल्पा प्रकृतिः .... .... | ५५० |
| प्रकृतेरेव बन्धसंसारमोक्षाः पुरुषस्य त्वौपचारिकाः | ५५० |
| उत्तरपक्षः .... | ५५०–५५५ |
| प्रकृति–पुरुषयोः संयोगस्त्वन्धपङ्गुवदित्यस्य प्रतिविधानम् .... .... | ५५० |
| दिदृक्षायाः खण्डनम् .... .... | ५५०-५५१ |
| संयोगस्यानुपपत्तेर्वियोगस्य दुर्घटत्वम् | ५५२ |
| पुरुषस्य चैतन्यशक्तिर्विषयपरिच्छेदशून्येत्यस्य प्रतिविधानम् .... .... | ५५२ |
| कर्तृत्वभोक्तृत्वादिधर्मविरहे सुखदुःखभोगाश्रयत्वाऽनुपपत्तिः .... ... | ५५२ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | पृष्ठाङ्कः |
|---|---|
| अचेतनाऽपि बुद्धिश्चिच्छक्तिसान्निध्याच्चैतन्यवतीव प्रतिभासत इत्यस्य प्रतिविधानम् | ५५२ |
| शरीरादेश्चेतनत्वापत्तिः .... | ५५२ |
| 'अचेतनाऽपि' इत्यादिकथन आरोपो ऽन्यत्र आरोपश्चाऽनुपपन्नः .... .... | ५५२ |
| 'अचेतना ज्ञानादय उत्पत्तिमत्त्वादित्यनुमानस्य खण्डनम् .... | ५५३ |
| संज्ञान्तरेण कर्मणः स्वीकारः .... | ५५३ |
| बुद्धेः कार्योऽहङ्कार इत्यस्य खण्डनम् .... | ५५३ |
| पञ्चकर्मेन्द्रियाणां खण्डनम् .... | ५५३ |
| व्योमादीनां शब्दतन्मात्रजत्वनिराकरणम् | ५५४ |
| विवेकख्यातेः खण्डनम् .... | ५५४ |
| नर्तकीदृष्टान्तस्य साङ्ख्यमतव्याघातकारित्वम् | ५५४ |
| कुलवधूदृष्टान्तेन प्रकृतेर्निवृत्त्युपपादनम् | ५५४ |
| प्रकृतेः परिणामिनित्यत्वम् .... | ५५४ |
| पुरुषस्याऽपि परिणामिनित्यत्वसंभवः | ५५४ |
| पुरुषस्यैव बन्धमोक्षौ .... | ५५५ |
| श्रेणिप्रतिपत्तौ मतद्वयम् .... | ५५५ |
| अन्तिममङ्गलम् .... | ५५६ |
| श्रीचरमतीर्थपतिस्तुतिः .... | ५५६ |
| ग्रन्थकृत उपकारिणां गुरूणां स्तुतिः | ५५७ |
| पदार्थसंग्रहकाराः .... | ५५७ |
| क्षपकश्रेणिग्रन्थस्य रचयिता .... | ५५८ |
| स्खलितविशोधने प्रार्थना .... | ५५८ |
| वृत्तिकृतः प्रशस्तिः .... | ५५९-५६४ |
| श्रीवीरजिनादीनां स्तुतिः .... | ५५९ |
| श्रीमुनिचन्द्रसूरीश्वरादीनां स्तुतिः .... | ५६० |
| पूज्यगुरूणां स्तुतिः संशोधकादयश्च .... | ५६१ |
| मुद्रणे द्रव्यसहायौ .... .... | ५६२-५६४ |
| ग्रन्थाग्रादि .... .... | ५६४ |


# परिशिष्टानां सूचिः


(१) मूलगाथाः ... .... ५६५-५७३

(२) अकारादिक्रमेण मूलगाथानामाद्यांशाः ५७४-५७७

(३) मूलगाथानां छन्दसूचिः .... ५७७-५७८

(४) क्षपकश्रेणिटीकान्तः प्रमाणतयोद्धृतानां ग्रन्थानां सूचिः ... ५७८-५८०

(५) क्षपकश्रेणिटीकान्तर्गतानां ग्रन्थकृन्नाम्नां सूचिः .... ५८०-५८१

(६) क्षपकश्रेणिटीकान्तर्गतानि व्याकरणसूत्राणि ५८१-५८२

(७) क्षपकश्रेणिटीकान्तर्गता न्यायाः ५८२

(८) क्षपकश्रेणिटीकान्तर्गतानि गणितसूत्राणि ५८२

(९) एकाशीतितमगाथाप्रभृतिप्रतिपादितपदार्थस्य संवादकं श्रीमन्मुनिचन्द्रसूरीश्वरविरचितशतकटिप्पनम् .... ५८३-५८४


# चित्रसूचिः


| | |
|---|---|
| अपूर्वकरणे प्रवर्तमानस्य स्थितिघातस्य चित्रम् | २७ |
| अपूर्वकरणे प्रवर्तमानस्य स्थितिबन्धस्य चित्रम् | २९ |
| अपूर्वकरणप्रथमसमय उदयवतीनां प्रकृतीनां गुणश्रेणेश्चित्रम् .... .... | ३० |
| अपूर्वकरणद्वितीयसमय उदयवतीनां प्रकृतीनां गुणश्रेणेश्चित्रम् .... .... | ३० |
| अपूर्वकरणप्रथमसमयेऽनुदयवतीनां प्रकृतीनां गुणश्रेणेश्चित्रम् .... .... | ३० |
| अपूर्वकरणद्वितीयसमयेऽनुदयवतीनां प्रकृतीनां गुणश्रेणेश्चित्रम् .... .... | ३० |
| अन्तरकरणं कुर्वतः प्रथमस्थितेश्चित्रम्, तथाऽन्तरकरणं कुर्वतोत्कीर्यमाणदलं यासु स्थितिषु प्रक्षिप्यते, तासां चित्रम् .... | ६१ |
| अन्तरकरणे कृत उदयवतीनां प्रकृतीनां प्रथमस्थितेर्द्वितीयस्थितेश्च चित्रम् .... | ६१ |
| अन्तरकरणे कृतेऽनुदयवतीनां प्रकृतीनां प्रथमस्थितेर्द्वितीयस्थितेश्च चित्रम् .... | ६१ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठाङ्कः

अश्वकर्णकरणाद्धायाश्चित्रम् ... ९४
आदोलकरणाद्धायाश्चित्रम् ... ९४
असत्कल्पनया पूर्वस्पर्धकरचनामाश्रित्य चित्रम् १११
अश्वकर्णकरणाद्धाप्रथमसमये पूर्वापूर्वस्पर्धकेषु दीयमानं दृश्यमानं च दलमाश्रित्य चित्रम् ... १३७
किट्टिकरणाद्धामाश्रित्य चित्रम् १४६
किट्टिकरणाद्धाप्रथमसमयकिट्टिप्ररूपणामाश्रित्य चित्रम् ... .... १९१
किट्टिकरणाद्धाद्वितीयसमयदीयमानदलस्योष्ट्रकूटप्ररूपणामाश्रित्य चित्रम् ... ... २०७
किट्टिकरणाद्धाद्वितीयसमये दीयमानदलप्ररूपणामाश्रित्य चित्रम् .... .... २१७
किट्टिकरणाद्धाचरमसमयमाश्रित्य चित्रम् २३६
किट्टिवेदनाद्धाप्रथमसमयमाश्रित्य चित्रम् २४४
गोमूत्रिकासदृशक्रमेण बन्धोदयान्तरकिट्टीनामुत्कृष्टरसमाश्रित्य चित्रम् ... २४७
गोमूत्रिकासदृशक्रमेण बन्धोदयान्तरकिट्टीनां जघन्यरसमाश्रित्य चित्रम् .... २४८
द्वादशसंग्रहकिट्टीनां संक्रम्यमाणप्रदेशानाश्रित्य चित्रम् .... ... २५४
लोभसंग्रहकिट्टित्रयपरस्थानगोपुच्छाकाररचनाप्रदर्शनार्थं चित्रम् .... ... २५६
किट्टिवेदनाद्धायां सङ्क्रमदलतो बन्धदलतश्चपूर्वापूर्वान्तरकिट्टिषु दलिकप्रक्षेपः .... २६१
किट्टिवेदनाद्धाप्रथमसमये गणितप्रक्रियया पूर्वापूर्वान्तरकिट्टिषु दलिकप्रक्षेपमाश्रित्य चित्रम् २८४
समयप्रबद्धशेषकप्ररूपणाश्रित्य चित्रम् २६४
समयप्रबद्धानां यवमध्यस्य चित्रम् ... २६४

पृष्ठाङ्कः

निरन्तरासामान्यस्थितीनां यवमध्यस्य चित्रम् २९८
क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाद्विचरमसमयं यावत् क्रोधसंग्रहकिट्टीनां दलिकापेक्षयाऽवस्थानस्य चित्रम् ... ... ३२१
क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये क्रोधप्रथमसंग्रहकिट्टयाः सङ्क्रमणे जाते क्रोधस्य द्वयोः संग्रहकिट्टयोर्दलिकापेक्षयाऽवस्थानस्य चित्रम् ... ... ३२३
सूक्ष्मकिट्टिषु संक्रम्यमाणदलस्य निरूपणमाश्रित्य चित्रम् .... ... ३६४
सूक्ष्मकिट्टीनां प्रमाणं दर्शयच्चित्रम् .... ३६६
सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये बादरकिट्टिपरस्थानगोपुच्छाकाररचनाप्रदर्शनार्थं चित्रम् ३७१
सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये सूक्ष्मकिट्टिषु बादरकिट्टिषु च दलनिक्षेपमाश्रित्य चित्रम् ३८०
सूक्ष्मकिट्टिकरणाद्धाद्वितीयसमये दलनिक्षेपविधिमाश्रित्य चित्रम् .... ३८५
सूक्ष्मसम्परायाद्धाप्रथमसमये दीयमानदलप्ररूपणां दृश्यमानदलप्ररूपणां सूक्ष्मसम्परायाद्धादीनाञ्चाऽल्पबहुत्वं समाश्रित्य चित्रम् ... ३९४
सूक्ष्मसम्परायाद्धायां द्वितीयादिस्थितिघातावसरे दृश्यमानदलप्ररूपणामाश्रित्य चित्रम् ....३९७
सूक्ष्मसम्परायाद्धासंख्येयतमभागे शेषे मोहनीयचरमस्थितिघाताद्धाद्विचरमसमयं यावद् दीयमानदलप्ररूपणामाश्रित्य चित्रम् ... ४०१
भिन्नभिन्नकषायोदयेन भिन्नभिन्नवेदोदयेन च क्षपकश्रेणिं प्रतिपन्नानां कर्मक्षपणायाश्चित्रम् ४१८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वोपज्ञवृत्तिविभूषिता

# खवग-सेढी

(क्षपकश्रेणिः)

[ यन्त्र-चित्र-परिशिष्ट–मूलगाथागौर्जरभावानुवादसंशोभिता ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ॐ ह्रीं अर्हं नमः ॥

॥ श्रीशङ्खेश्वरपार्श्वनाथो विजयतेतमाम् ॥

## सकलागमरहस्यवेदि-श्रीमद्विजयदानसूरीश्वरेभ्यो नमो नमः ।

### सिद्धान्तमहोदधि-श्रीमद्विजयप्रेमसूरीश्वरेभ्यो नमः ।

श्रीमत्तपोगच्छगगनाङ्गणदिनमणि-सुविहितगच्छाधिपति-सिद्धान्तमहोदधि-सच्चारित्रचूडामणि-कर्मशास्त्र-निष्णात-प्रातःस्मरणीयाचार्यशिरोमणि-श्रीमद्विजयप्रेमसूरीश्वरान्तेवासि-स्याद्वादनयप्रमाण-विशारद-पन्न्यासप्रवरश्रीमद्-भानुविजयगणिवर्यशिष्यप्रशिष्य-श्रीमद्गच्छनायकप्राध्यापित-वाचंयममतल्लिका-जयघोषविजय-धर्मानन्दविजय-हेमचन्द्रविजय-गुणरत्नविजय-संगृहीतकर्मक्षपणापदार्थका मुनिपुङ्गवजितेन्द्रविजयचरणारविन्दचञ्चरीकायमाणाऽन्तिषदा मुनि-गुणरत्नविजयेन विरचिता स्वोपज्ञवृत्तिविभूषिता

# खवगसेढी

[ क्षपक-श्रेणिः ]

श्रीवीरं तं प्रवन्दे निजजननमहे यः सुरेशाभिषिक्तः,
दत्तं दानं च वर्षं सकलहितकरं भव्यवर्गाय येन ।
प्राव्राजीद्यः स्वकीयं विततभवविपत्कर्मशत्रुं निहन्तुं,
येन ध्यानाग्निशक्त्या खलु झटिति कृतो घातिकाष्ठप्रणाशः ॥ १ ॥ (स्रग्धरा)
❀ हरिणाङ्कितनुरर्जुनरुचिरमृतकरः कलाश्रयो वीरः ।
जनतापापहरः श्रीभाक् सकले विष्टपे जयति ॥ २ ॥ (पथ्यार्या)

---

❀ (१) हरिणा=सिंहेन "सिंहः कण्ठीरवो हरिः" इति हैमवचनात्, अङ्किता=लाञ्छिता तनुः=शरीरापरपर्याया यस्य, स तथा, श्रीमतो हि भगवतो वर्धमानस्वामिनो लाञ्छनं हरिः, तच्च भगवतः सव्येतरजङ्घारूपे शरीरे भवतीत्यागमः । अर्जुनवत्=चामीकरवत् "तपनीय-चामीकर-चन्द्रभर्माऽर्जुन-निष्क-कार्तस्वर-कर्बुराणि" (श्लोकाङ्कः १०४४) इत्यभिधानचिन्तामणिकोशे सुवर्णवाचकत्वादर्जुनशब्दस्य, रुचिः=छविर्यस्य, स तथा, अमृतं करोतीत्यमृतकरः, शिवकर इत्यर्थः, अमृतशब्दो हि शिववाचकः, यदुक्तमभिधानचिन्तामणिकोशे-"महानन्दोऽमृतं सिद्धिः कैवल्यमपुनर्भवः । शिवं ...." (श्लो० ७४) इति । कलानां=सर्वकलानाम् आश्रयः=आस्पदं कलाश्रयः, सर्वकलानिपुणत्वाद् भगवतः । हरतीति हरः "अच्" (सिद्धहेम० ५-१-४९) इत्यनेन सूत्रेण कर्तर्यच्प्रत्ययः । जनानां समूहो जनता, तस्याः पापानि=दुरितानि जनतापापानि, तेषां हरो जनतापापहरः, सकलजनदुरितविनाशीत्यर्थः, श्रियं=केवलज्ञानरूपामष्टमहाप्रातिहार्यलक्षणां वा भजतीति श्रीभाक् वीरः=अपश्चिमजिनपतिः, सकले=निखिले विष्टपे=विश्वे जयति=इन्द्रिय-विषय-कषाय-परिषहोपसर्ग-घातिकर्मादिशत्रुगणपरिजयात् सर्वानप्यतिशेते । इति प्रथमोऽर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्येयास्ते सर्वसिद्धा विमलशिवगतौ संस्थिताः कर्ममुक्ता
★लोकन्ते लोकभावान् समभुवनविदो योगिनः सिद्धिवध्वाः ।
卐यद्ध्यानाऽगं श्रयन्ते शिवगतिफलकं स्वीयकर्माऽऽतपघ्नं
संसारस्फारसत्रे जनिमरणजरातापसंतप्तभव्याः ॥ ३ ॥ (स्रग्धरा)

---

(२) यद्वा हरिणा=अश्वेन, यदुक्तमभिधानचिन्तामणिकोशे–गन्धर्वोऽर्वा सप्तिर्वीती वाहो वाजी हयो हरिः····· (श्लो० १२३३)इति, अङ्किततनुः, श्रीमान् संभवनाथस्तृतीयजिनेश्वर इत्यर्थः,तस्य लाञ्छनमागमेऽश्वो निरूप्यते। वीरशब्दश्चात्र यौगिको व्याख्येयः। तथाहि–वि=विशिष्टा सकलभुवनाद्भुता स्वर्गापवर्गादिका ईः= लक्ष्मीः, सा वीः, तां राति=भव्येभ्यो यच्छति 'रांक् दाने' इति वचनाद् इति वीरः, "आतो डोऽह्वावामः" (सिद्धहेम०५-१-७६) इत्यनेन डप्रत्ययः। ददाति च भगवान् सर्वभाषापरिणतया स्ववाण्या निःश्रेयसाभ्युदय-साधनोपायोपदेशेन भव्येभ्यो भुवनाद्भुतां श्रियम्। शेषं पूर्ववद् व्याख्येयम्। इति द्वितीयोऽर्थः।

(३) यद्वा हरिशब्दः कपिवाचको ज्ञेयः, यदुक्तमभिधानचिन्तामणिकोशे–"प्लवङ्गः प्लवगः शाखा-मृगो हरिर्बलीमुखः॥"(श्लो० १२९२) इति। ततश्चायमर्थः–हरिणा=कपिना अङ्किततनुः,अभिनन्दनस्वामीत्यर्थः, निरूप्यते चागमे चतुर्थस्य भगवतो लाञ्छनं कपिरिति। शेषं पूर्ववद् वर्णनीयम्। इति तृतीयोऽर्थः।

(४) यद्वा हरिणेति पदं तृतीयान्तं न व्याख्येयम्, किन्तु समासस्थो हरिणशब्दोऽयम्, स च मृगवाचकः। ततश्चायमर्थः–हरिणेन=मृगेण अङ्किता तनुर्यस्य, स हरिणाङ्किततनुः, षोडशः श्रीशान्तिनाथो भगवानित्यर्थः, तस्य भगवतो लाञ्छनं मृग इत्यागमे प्रतिपाद्यते, शेषं पूर्ववद् वर्णनीयम्। इति चतुर्थोऽर्थः।

(५) यद्वाऽयं श्लोकः श्रीचन्द्रप्रभप्रभुमधिकृत्य व्याख्येयः। तथाहि-हरिशब्दोऽत्र चन्द्रवाचको ज्ञातव्यः। यदुक्तममरकोशे"·····यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु॥ शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु....॥ (३-३-१७५) इति, ततश्चायमर्थो भवति–हरिणा=चन्द्रेण अङ्किततनुः, श्रीचन्द्रप्रभोऽष्टमस्तीर्थंकर इत्यर्थः, तस्य भगवतो लाञ्छनं चन्द्र इति सिद्धान्त उपदिश्यते। अर्जुनशब्दश्चात्रः श्वेतवाचको ग्राह्यः। यदुक्तमभिधान-चिन्तामणौ"·····श्वेतः श्येतः सितः शुक्लो हरिणो विशदः शुचिः।१।" अवदातगौरशुभ्रवलक्षधवलार्जुनाः ...."( श्लो० १३९३ )इति। अर्जुना=श्वेता रुचिः=छविर्यस्य,सोऽर्जुनरुचिः,श्वेतकायो हि भगवांश्चन्द्रप्रभः। यदुक्तम्"शुक्लौ च चन्द्रप्रभपुष्पदन्तौ"। इति। शेषं तु पूर्ववद्योज्यम्। इति पञ्चमोऽर्थः।

(६) अथवाऽयं श्लोकः श्रीपार्श्वनाथमधिकृत्य वर्णनीयः। तद्यथा– हरिशब्दोऽत्र सर्पवाचको बोद्धव्यः। यदुक्तं विश्वकोशे-"हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु। सिंहाश्वकपिभेकाहिशुकलोकान्तरेषु च।" इति, ततश्चायमर्थः–हरिणा=सर्पेण अङ्किततनुः, श्रीपार्श्वनाथ इत्यर्थः, तस्य हि भगवतो लाञ्छनं सर्प इति सिद्धान्ते प्रतिपाद्यते, अर्जुनशब्दश्चात्र मयूरार्थको व्याख्येयः। यदुक्तं मेदिनीकोशे–"अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः...॥" इति, अर्जुनवद्=मयूरवत्=मयूरनीलवर्णवद् रुचिः=द्युतिर्यस्य सोऽर्जुनरुचिः, नीलविग्रहो हि भगवान् श्रीपार्श्वनाथः। उक्तं चाऽभिधानचिन्तामणिकोशे–"कृष्णौ पुनर्नेमिमुनी, विनीलौ श्रीमल्लिपार्श्वौ कनकत्विषोऽन्ये॥" इति। शेषं पूर्ववद् निरूपणीयम्। इति षष्ठोऽर्थः।

(७) प्रस्तुतव्याख्यानषट्कं प्रतिपाद्य सम्प्रत्यस्य श्लोकस्याऽप्रस्तुतव्याख्यानं दर्श्यते। तथाहि–अर्जुना= श्वेता रुचिः=छविर्यस्य सोऽर्जुनरुचिः,चन्द्रस्य विशेषणमिदम् ,एवमग्रेऽपि। अमृतं कराः=द्युतयो यस्य चन्द्रस्य स तथा,कलानां=षोडशभागानाम् आश्रयः=निलयः कलाश्रयः। विशेषेण ईरयति=प्रेरयतीति वीरः,कामादिविष-याणां हि प्रेरकश्चन्द्रः। जनानां=लोकानां तापः=जनतापः,तमपहरतीति जनतापापहरः,शीतलत्वाच्चन्द्रस्य, हरि-णेन=मृगेण अङ्किता=लाञ्छिता तनुर्यस्य,स हरिणाङ्किततनुः,चन्द्र इत्यर्थः,सकले विष्टपे जयति,सर्वत्र सदा-लोकत्वात्। इति सप्तमोऽर्थः। ★लोकन्ते=पश्यन्ति। समभुवनविदः–सकललोकविज्ञाः। 卐 अगः=वृक्षः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वन्दे तं **गौतमाख्यं** प्रथमगणधरं वीरविभ्वाद्यशिष्यं
प्राप्तो योऽष्टापदाद्रिं निजक-बलभराद् निर्वृतेर्निर्णयाय ।
दीक्षव्याजाज्जनेभ्यो य इह खलु ददौ केवलज्ञानदीप्तिं
प्राप्ते श्रीवर्धमानेऽचलमरुजशिवं केवलं येन लब्धम् ॥४॥ (स्रग्धरा)

मिथ्यामोहतमोयुतेऽतुलबलप्रद्युम्नभिल्लाकुले,
★नानाकर्मलताऽऽस्पदे खलु युते 卐 दुर्भेदकर्माद्रिभिः ।
दुर्बोधोघवचःकुशादिगहने शोकानलस्याश्रये,
स्तूयन्ते हितकारिणो भववने **दानान्विताः** सूरयः ॥५॥ (शार्दूलविक्रीडितम्)

वैराग्यामृतपानपुष्टहृदयो यो यश्च गच्छाधिपः,
स्वाध्याये चरणे तथा सुकरणे नित्यं च यत्प्रेरणा ।
दाक्षिण्यैकनिधिस्तथा मधुरगीर्वह्वागमज्ञश्च यः,
सत्सिद्धान्तमहोदधिर्विजयते **स प्रेमसूरीश्वरः** ॥ ६ ॥ (शार्दूलविक्रीडितम्)

यः स्याद्वादनयप्रमाणविदुरो वैराग्यवारान्निधि-
र्मोहग्रीष्मसुतप्तभव्यभुवने यद्गीः पयोदायते ।
यो नित्यं तपते तपः कृशतनुः संसारसंतापहं
स श्रीमान् खलु पातु **भानुविजयः** पन्न्यासपादो गुरुः ॥७॥ (शार्दूलविक्रीडितम्)

भवाब्धेर्निस्तारे प्रवहणसमः क्षान्तिसदन-
स्तपोवह्निव्रातैर्दुरितदलिकं * ज्वालयति यः ।
तथा यः संपूज्यश्चरणकुशलः सोदरचरो
**जितेन्द्रः** स्तात् सिद्ध्यै स विजयपदान्तो मम गुरुः ॥८॥ (शिखरिणी)

पापानि विलयं यान्ति, यन्नामस्मृतिमात्रतः ।
ते सर्वे मुनयः सन्तु, श्रेयसे भूयसे मम ॥ ९ ॥ (अनुष्टुप्)

※रचिता क्षपकश्रेणिः स्वपरेषां हिताय या ।
तत्स्वाध्यायसुयोगेन भूयान्नः कर्मसंक्षयः ॥१०॥ (अनुष्टुप्)

**श्रुतदेवीं** हृदि स्मृत्वा पूज्यानां च प्रसादतः ।
स्वोपज्ञां क्षपकश्रेणिं विवृणोमि यथागमम् ॥११॥ (अनुष्टुप्)

इह खलु बहुभवोपार्जितशुभाशुभकर्मकलापजनितसंयोगवियोगसंकल्पविकल्पादिमच्छकच्छ-पादिजलजन्तुसंव्याप्ते दुःसहकामवाडवाग्निप्रजाज्वल्यमाने क्रोधादिकषायावर्तपरिपूरिते विषयगिरि-

★कर्माणि व्यापाराः प्रवृत्तय इति पर्यायाः । 卐कर्माणि=ज्ञानावरणादिलक्षणानि । * दलिकं=काष्ठम् ।
※ प्राकृतभाषायां निबद्धा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कूटसंभूतेऽनाद्यनन्तसंसारपारावारे निमज्जता भव्यजन्तुनाऽनेकभवदुष्प्रापां प्रशस्तमानुषजन्मादि-सामग्रीं कथमपि संप्राप्य भवाब्धिसमुत्तरणैकप्रवहणममे सकललोकालोकविलोकनैककुशलविमल-केवलालोकललितलक्ष्मीविलासितीर्थंकरप्ररूपिते धर्मे यत्नः कर्तव्यः । यदुक्तम्—

**"भवकोटीदुष्प्रापामवाप्य नृभवादिसकलसामग्रीम् ।**
**भवजलधियानपात्रे धर्मे यत्नः सदा कार्यः ॥१॥"** इति ।

तत्राऽपि विशेषतः परोपकारकरणे प्रवर्तितव्यम्, तस्याऽन्वय-व्यतिरेकाभ्यामपि पुण्यबन्ध-कर्मनिर्जरादिनिबन्धनत्वात् । स चोपकारो द्विविधो द्रव्यभावभेदात् । तत्र द्रव्योपकारो भोजन-शयनादिप्रदानादिस्वरूपः, स चाऽल्पीयान् अनात्यन्तिक ऐहिकदुःखोच्छेदेऽप्यसमर्थः, भावो-पकारस्तु गरीयान् आत्यन्तिक ऐहिकामुष्मिकसर्वदुःखोच्छेदक्षमो जैनेन्द्रप्रवचनोपदेशादिलक्षणः । यन्न्यगादि—

**"नोपकारो जगत्यस्मिंस्तादृशो विद्यते क्वचित् ।**
**यादृशी दुःखोच्छेदाद् देहिनां धर्मदेशना ॥ १ ॥"** इति ।

स चोपदेशो यद्यप्युपदेष्टव्यभेदादनेकविधः,तथापि क्षपकश्रेणिविषयः कर्मक्षपणाविधिः प्रथमत उपदेष्टव्यः,तदुपदेशेन ह्यवबुद्धकर्मक्षपणाप्रक्रियाः प्राणिनः कर्मोच्छेदोपायानुपादाय कर्मोच्छेदं विधाय परमानन्दपदमासादयिष्यन्तीत्यवगत्य बहुविस्तराऽतिगम्भीर-**कर्मप्रकृति-शतक-सप्ततिका-कषायप्राभृतादितच्चूर्णिवृत्त्यादि**प्रतिपादितक्षपणाप्रक्रियास्वरूपसुबोधार्थं च तत्तद्ग्रन्थोक्तकर्म-क्षपणापदार्थान् सङ्गृह्य **क्षपकश्रेणि**नामकं ग्रन्थं प्रारिप्सुरादौ तावत् समस्तप्रत्यूहव्यूहविध्वंसाय शिष्टसमयपरिपालनाय च मङ्गलगर्भां प्रेक्षावत्प्रवृत्त्यर्थं चाऽभिधेयादिगर्भां प्रथमगाथां प्राह—

## पणमिअ सिरिपासजिणं सुरअसुरणरिंदवंदिअं णाहं ।
## वुच्छामि खवगसेढिं सपरहिअट्ठं गुरुपसाया ॥१॥

प्रणम्य श्रीपार्श्वजिनं सुरासुरनरेन्द्रवन्दितं नाथम् ।
वक्ष्यामि क्षपकश्रेणिं स्वपरहितार्थं गुरुप्रसादात् ॥१॥ इति पदसंस्कारः ।

**'पणमिअ'** इत्यादि, 'प्रणम्य' अत्र प्रशब्दः प्रकर्षार्थकः, ततो मनसा प्रणिधाय वचनेन स्तुत्वा कायेन नत्वा चेत्यर्थः, इत्थं प्रकर्षार्थकप्रशब्देन केवलद्रव्यनमस्कारोऽपाक्रियते, अन्यथा वीरकादिन-मनवद् द्रव्यनमस्कारस्याकिञ्चित्करत्वेन फलाभावः स्यात् । तथा प्रकर्षार्थकप्रशब्द उपहासनमस्कारमपि निराकरोति,अन्यथा**"नमस्यं तत्सखि प्रेम घण्टारसितसोदरम् । क्रमकृशिमनिस्सारमा-रम्भगुरुडम्बरम् ॥"** इत्यादिवदुपहासनमस्कारभ्रमोऽपि स्यादिति । कं प्रणम्य ? इत्याह **'सिरि-पासजिणं'** ति 'श्रीपार्श्वजिनम्' तत्र स्पृशति ज्ञानेन सर्वभावानिति पार्श्वः, यद्वा भगवति गर्भस्थे जनन्या निशि शयनीयस्थयाऽन्धकारे सर्पो दृष्ट इति गर्भानुभावोऽयमिति मत्वा पश्यतीति निरुक्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्पार्श्वः, अथवा पार्श्वः=पार्श्वनामा यक्षो भगवतो वैयावृत्यकरः, तस्य नाथः पार्श्वनाथः, ततः **"ते लुग् वा"** (सिद्धहेम०३-२-१०८) इत्यनेन सूत्रेण नाथशब्दस्य लोपः, तेन पार्श्वः, जयति रागद्वेषमोहानिति जिनः, पार्श्वश्चासौ जिनश्च पार्श्वजिनः, उपान्त्यजिनपतिरित्यर्थः, श्रीः=केवलज्ञानलक्ष्मीलक्षणा-ऽष्टमहाप्रातिहार्यस्वरूपा वा, तया युक्तः पार्श्वजिनः श्रीपार्श्वजिनः, तम् । किंविशिष्टं श्रीपार्श्वनाथम् ? इत्याह-**'णाहं'** ति'नाथम्'**"नाथृङ् उपतापैश्वर्याशीःषु च"**नाथति=इष्टे=ईश्वरो भवतीति नाथः, नाथ्धातोः **"अच्"** (सिद्धहेम० ५-१-४९) इत्यनेन सूत्रेण कर्तरि अच्प्रत्ययः, घनघातिकर्मपटलक्षयेण परप्रवादिचेतश्चमत्कार्यष्टमहाप्रातिहार्यैश्वर्येयुक्तत्वात्तस्यैव परमार्थतो नाथत्वं घटते, न त्वैहिकभूपत्यादीनाम् । यद्वा धातूनामनेकार्थत्वात् नाथति=योगक्षेमौ करोतीति नाथः,पूर्ववद् अच्प्रत्ययः । तत्राप्राप्तानां सम्यक्त्वादीनां प्राप्तिर्योगः, प्राप्तानां सम्यक्त्वादीनां संरक्षणं क्षेमः । तीर्थकृतामचिन्त्यमाहात्म्यादेव भव्याः प्रागप्राप्तसम्यक्त्वादीनश्नुवत इति योगकरत्वं तीर्थकृताम् । प्राप्तसम्यक्त्वाद्या भव्यास्तीर्थकृन्माहात्म्यात् तत्तद्रागाद्युपद्रवाद्यभावेन सम्यक्त्वादिषु स्थिरीभवन्तीति क्षेमकृत्त्वं तीर्थकृताम् । अतो युक्तियुक्तमेतद्-भव्यानां योगक्षेमकरो भगवानिति, तम् । पुनः किंविशिष्टम् ? इत्याह–**'सुरअसुरणरिंदवंदिअं'** ति 'सुरासुरनरेन्द्रवन्दितम्' **"सुरत् ऐश्वर्यदीप्त्योः"** सुरन्ति=विशिष्टैश्वर्यमनुभवन्ति, यद्वा दिव्याभरणकान्त्या सहजशरीरकान्त्या च दीप्यन्त इति सुराः **"नाम्युपान्त्य०"** ( सिद्धहेम०-५-१-५४ ) इत्यनेन सूत्रेण कर्तरि कप्रत्ययः, यदि वा **"राजृ दीप्तौ"**सुष्ठु राजन्त इति सुराः, **"क्वचित्"** (सिद्धहेम० ५-१-१७१) इत्यनेन सूत्रेण डप्रत्ययः, अथवा सुन्वन्तीति सुराः, यद्वा सुरा एषामस्तीति सुराः **"अभ्रादिभ्यः"** (सिद्धहेम०७-२-४६) इत्यनेन अप्रत्ययः,यतोऽब्धिजा सुरा तैः पीतेति प्रसिद्धम् , देवा इत्यर्थः । **"असूच् क्षेपणे"** अस्यन्ति=क्षिपन्ति देवानित्यसुराः **"वाश्यसि०"** (सिद्धहेम० उणादि ४२३) इत्यनेन सूत्रेण उरप्रत्ययः,सुरविरुद्धत्वाद्वा न सुरा असुराः, अनर्थवद् नञ् समासः, दानवा इत्यर्थः । **"नृश् नये"** नृणन्तीति नराः **"अच्"** (सिद्धहेम० ५-१-४९) इत्यनेन सूत्रेण कर्तरि अच्प्रत्ययः, मनुष्या इत्यर्थः, सुराश्चाऽसुराश्च नराश्च सुरासुरनराः, **"इदु परमैश्वर्ये"** इन्दन्तीति इन्द्राः **"ऋज्रेन्द्राग्र०"** (सिद्धहेम० उणादि–३८७) इत्यनेन सूत्रेण रप्रत्ययः, स्वामिन इत्यर्थः सुरासुरनराणामिन्द्राः सुरासुरनरेन्द्राः, तैः सुरासुरनरेन्द्रैः, इन्द्रशब्दोऽत्र प्रत्येकमभिसम्बध्यते, **"द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते"**इति न्यायोपलम्भात् । ततश्चायमर्थः-सुरेन्द्रैश्चासुरेन्द्रैश्च नरेन्द्रैश्च वन्दितं=स्तुतिगोचरीकृतम् अभिवादनविषयीकृतं वा,एतेन सकललोकालोकप्रकाशककेवलादर्शसङ्क्रान्तसमस्तभावानामुन्मूलितापारसंसारकाननपरिभ्रमणैककारणमोहनीयकर्मणां सकलसत्त्वहितकरपञ्चत्रिंशद्गुणसमन्वितवाचां निजकमलकोमलक्रमकान्त्योद्द्योतितभक्तिभरभृतहृत्सुरासुरनरनायकनमन्मौलिमुकुटमणिप्रभाणां तीर्थकृतां त्रिभुवनपूज्यत्वमावेदितं तथा विघ्नविघाताय शिष्टसमयपरिपालनाय च मङ्गलोपन्यासः कृतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु प्रस्तुतग्रन्थः श्रुतरूपत्वात् श्रुतस्य च ज्ञानपञ्चकान्तःपातित्वेन तस्य भावनन्दित्वात् स्वयमेव मङ्गलम् । यदुक्तम्–"**तं च सुयनाणं मंगलं, कम्हा ? भण्णइ णंदी भावमंगलं ति काउं।**" इति । अपि च क्षपकश्रेणिग्रन्थो निर्जरार्थः, तथा च सति तपोवत् सर्व एव ग्रन्थो मङ्गलम् । इह "**पणमिअ**" इत्यादिमङ्गलोपन्यासात् त्वस्य ग्रन्थस्याऽमङ्गलता प्रसज्यते, अमङ्गले मङ्गलोपादानस्य सार्थक्यात् । यदि पुनर्मङ्गलेऽप्यस्मिन् ग्रन्थेऽन्यन्मङ्गलं क्रियते, तर्ह्यनवस्था । तथाहि–यथा मङ्गलस्याऽप्यस्य ग्रन्थस्य सतोऽन्यद् मङ्गलमुपादीयते, तथा मङ्गलस्याऽपि तद्रूपस्य सतोऽन्यद् मङ्गलमुपादेयम्, तस्याऽप्यन्यद्, अन्यस्याऽप्यपरम्, अपरस्याऽप्यन्यदित्येवमनवस्थाऽऽपततीति चेत्, न, अस्य हि ग्रन्थस्य मङ्गलरूपत्वेऽपि "**पणमिअ**" इत्यादिना कृतस्य मङ्गलस्य न नैरर्थक्यं नवाऽनवस्था । तद्यथा–यतोऽयं क्षपकश्रेणिग्रन्थो मङ्गलम्, तत एवाऽस्यैकदेशोऽभीष्टदेवतास्तुतिरूपको मङ्गलत्वेन ज्ञापितः । न ह्यमङ्गलपदार्थस्या-ऽवयवे कदापि मङ्गलत्वं सम्भवति, कटुनिम्बैकदेशे माधुर्याऽसम्भववत् । यच्चात्र ग्रन्थैकदेशस्य विभज्य मङ्गलत्वेन प्रादुष्करणम्, तद् अस्य ग्रन्थस्याऽपरिकर्मितमतीनां जनानां मङ्गलत्वप्रत्ययनाय, अनास्वादितमोदकानां तन्माधुर्यावबोधाय तत्कणिकासमर्पणवत् ।

किञ्च यद्येतावानप्यस्य ग्रन्थस्याऽवयवः सर्वेष्टार्थसम्पादनक्षमः, तर्हि समस्तो-ऽयं ग्रन्थोऽभ्यस्तोऽस्माकं महते समभ्युदयाय भविष्यतीति विशेषावगमाद् विशेषतः प्रवर्तेरन्निह प्राथमिकाः, तथा शास्त्रकृतामपि सर्वा प्रवृत्तिर्मङ्गलाद्यभिधानपूर्विका भवति । यदुक्तं तैः—

**"प्रेक्षावतां प्रवृत्त्यर्थं फलादित्रितयं बुधैः ।**
**मङ्गलं चैव शास्त्रादौ वाच्यमिष्टार्थसिद्धये ॥"** इति ।

प्रकृते गाथार्धेन तीर्थकृतः सर्वस्वपरसंपत्संहतिसर्वस्वदेश्याश्चत्वारोऽतिशया अपि संसूचिता भवन्ति । तथाहि–श्रीपार्श्वजिनमित्यत्र जयति रागद्वेषमोहानिति जिनः "**जीण्शीदीबुध्यविमीभ्यः कित्**" (उणादि–२६१) सूत्रेण नप्रत्ययः, इति व्याख्यानेनाऽपायापगमातिशयः संज्ञापितः, अत्र च श्रीशब्दस्य केवलज्ञानलक्ष्मीरिति व्यक्तीकरणेन ज्ञानातिशयो बोधितः । सुरासुरनरेन्द्रवन्दितमित्यनेन पूजातिशयः प्रकटितः । नाथमित्यनेन वचनातिशयोऽभिव्यज्यते, तथाहि–नाथो योगक्षेमकरः, प्रागुक्तौ योगक्षेमौ सर्वजगज्जन्तुजातचित्तचमत्कारिसुरनिकररचिताऽष्टमहाप्रातिहार्यकृतपूजस्य लोकालोकप्रकाशककेवलज्ञानयुक्तस्याऽपगतघातिकर्मणस्तीर्थकृतो मुखारविन्दाद् विनिर्गतयैककालानेकजन्तुसंदेहसंदोहापनयनकारिण्या विश्वसत्त्वस्वस्वभाषापरिणामिन्या भारत्याऽपि संभवतः, इत्थं नाथमित्यनेन भगवतो वचनातिशयः संदिष्टः । एते चत्वारोऽपि देहसौगन्ध्यादीनामतिशयानामुपलक्षणम्, तानन्तरेणैषामसंभवात् । तेन चतुरतिशयैश्चतुस्त्रिंशदप्यतिशया गाथायाः पूर्वार्धेन निष्टङ्क्यन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं कृतमङ्गलोपन्यासः शास्त्रकृत् क्त्वाप्रत्ययस्योत्तरक्रियासापेक्षत्वात् तां व्याहरति-**'वुच्छामि'** त्ति 'वक्ष्यामि' भणिष्यामि । काम् ? इत्याह-**'खवगसेढिं'** ति 'क्षपकश्रेणिं' क्षपकस्य=कर्माणि क्षपयतः श्रेणिः=क्रमः क्षपकश्रेणिः, ताम् . क्षपणाक्रमश्चायम्--आदौ मोहनीयम् , ततो घातित्रयम् , ततोऽघातिचतुष्कं विनाशयति । प्रयोजनं ब्रुवन् पुनः प्राह-**'सपरहिअट्ठ'** ति 'स्वपरहितार्थम्',स्वस्य=आत्मनः परेषाम्=अन्येषां च, हितं=मोक्षः, स्वपरहितम् , तदेव अर्थः=प्रयोजनं यत्र तत्तथा, क्रियाविशेषणत्वात् **"क्रियाविशेषणात्"** (सिद्धहेम० २-२-४१) इत्यनेन सूत्रेण द्वितीया विभक्तिः।

साम्प्रतं स्वस्यौद्धत्यं परिहरन् प्राह-**'गुरुपसाय'**त्ति'गुरुप्रसादात्' तत्र गृणन्ति=उपदिशन्ति धर्ममिति गुरवः, अर्थापेक्षया तीर्थङ्कराः, सूत्रापेक्षया तु गणधराः, यत् प्रत्यपादि **"अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं ।"** इति ।

यद्वाऽस्मदादिगुरुपर्यन्ताः सर्वे गुरुपदवाच्याः, तेषामपि सूत्रार्थप्रदानतो धर्मोपदेशकत्वस्याऽक्षतत्वात् । विशेषतस्तु परमगीतार्थानामशेषशेमुषीशालिकुलविद्भूयमानानां सकलागमरहस्यज्ञानां भीमकान्तादिगुणैर्गरिष्ठानां श्रीमद्**विजयदानसूरीश्वराणां** विनेयवृषभा गच्छाधिपतयोऽनेकबाल-युववृद्धमुनिपुङ्गववृन्दैः संसेव्यमानचरणारविन्दाः प्रातःस्मरणीयाः श्रीमद्**विजयप्रेमसूरीश्वरा** गुरुपदेन ग्राह्याः, प्रव्रज्याप्रदान-सम्यग्ज्ञानदानादिना तेषामासन्नोपकारित्वात् । तेषाम्, प्रसादात्=अनुग्रहात् , न तु निजबुद्धिप्रतिभादिबलात् । शक्तिविकला अपि जना गुरुप्रसादाद् दुष्कराणामपि कार्याणां पारं प्रयान्तीति श्रद्धधानोऽहमपि गुरुप्रसादात् क्षपकश्रेणिग्रन्थग्रथने समर्थो भूत्वा तां वक्ष्यामीति भावः ।

**'खवगसेढिं'** इत्यनेन प्रेक्षावत्प्रवृत्त्यर्थमभिधेयनिर्देशः कृतः, एतदुक्तौ हि शास्त्रश्रवणादिप्रवृत्तेः । उक्तं च-

**"श्रुत्वाऽभिधेयशास्त्रादौ पुरुषार्थोपकारकम् ।**
**श्रवणादौ प्रवर्तन्ते तज्जिज्ञासादिनोदिताः ॥१॥"** इति ।

**'सपरहिअट्ठ'** इत्यनेन प्रयोजनं दर्शितम् ,तद्विना कृतिनां प्रवृत्त्यभावात् । न्यगादि च-

**"प्रयोजनमनुद्दिश्य, न मन्दोऽपि प्रवर्तते ।**
**एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत् ॥१॥"** इति ।

तच्च प्रयोजनं शास्त्रकर्तृश्रोत्रोरनन्तरपरम्परभेदाच्चिन्त्यम् । तत्र शास्त्रकर्तुरनन्तरं प्रयोजनं सत्त्वानुग्रहः, बहुविस्तरशास्त्रपठनाद्यसमर्थानां संक्षिप्तरुचिजन्तूनां संक्षिप्तशास्त्रे प्रवृत्तेः। यदुक्तम्-

**"सुयसायरो अपारो आऊ थोवं जिआ य दुम्मेहा ।**
**तं किं पि सिक्खियव्वं जं कज्जकरं च थोवं च ॥१॥"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मनिर्जरा वा ग्रन्थग्रथनलक्षणस्वाध्यायादभ्यन्तरतपसो बहुतरनिर्जरासंभवात् । स्वदृढस्मृतिर्वा, ग्रन्थविरचनादिना हि तत्कर्तुः स्मृतिर्दृढा दृढतरा दृढतमा च जायते ।

परम्परप्रयोजनं त्वपवर्गावाप्तिः, धर्मोपदेशदानस्य हि मोक्षफलत्वात् । तथा चोक्तम्—

**"सर्वज्ञोक्तोपदेशेन, यः सत्त्वानामनुग्रहम् ।**
**करोति दुःखतप्तानां स प्राप्नोत्यचिराच्छिवम् ॥१॥"** इति ।

श्रोतुरनन्तरं प्रयोजनं तु क्षपकश्रेणिविषयकं ज्ञानम्; परम्परं तु निर्वाणावाप्तिः । तथाहि—विज्ञातसारभूतकर्मक्षपणाक्रमाः प्राणिनः प्रकृत्यसारात् संसाराद् विरज्यन्ते । ततः कर्मक्षयाय प्रयत्नं समाचरन्ति,क्षीणे च कर्मणि निःश्रेयसमासादयन्ति । यदुक्तम्—

**"सम्यक्शास्त्रपरिज्ञानाद् विरक्ता भवतो जनाः ।**
**क्रियासक्ता ह्यविघ्नेन गच्छन्ति परमां गतिम् ॥१॥"** इति ।

मङ्गला-ऽभिधेय-प्रयोजनानि प्रोक्तानि, सम्प्रति प्रेक्षावतां प्रवृत्त्यर्थं सम्बन्धोऽपि वक्तव्यः । यदुक्तम्—

**"उक्तार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।**
**शास्त्रादौ तेन वक्तव्यः, सम्बन्धः सप्रयोजनः ॥१॥"** इति ।

स च द्विविधः, गुरुपर्वक्रमलक्षण उपायोपेयस्वरूपश्चेति । तत्राद्यः श्रद्धाऽनुसारिणः प्रति, स च **"गुरुपसाया"** इत्यनेन दर्शितः । तथाहि—घनघातिकर्मचतुष्के विलयमापादिते लब्धलोकालोकप्रकाशककेवलज्ञानेनाऽष्टमहाप्रातिहार्यपरमार्हन्त्यसम्पत्समृद्धेन भगवता **श्रीमहावीरेण** संसारमहीरुहोन्मूलनैकहेतुपञ्चत्रिंशद्गुणसमन्वितसर्वजगज्जन्तुजातस्वस्वभाषापरिणामिभारत्या सुरासुरनरेश्वरनिकरपरिकरितपर्षद्यर्थतः कर्मक्षपणाक्रमः प्रतिपादितः,स च गणभृता **सुधर्मस्वामिना** सूत्रतो रचितः । तदनु **जम्बूस्वामि-प्रभव-शय्यम्भव-यशोभद्र-सम्भूतिविजय-भद्रबाहु-स्थूलभद्र-कर्मप्रकृतिकार-सप्ततिकाकार-कषायप्राभृतकार-तच्चूर्णिकार-वृत्तिकारादिभिः** स्वकीयस्वकीयशास्त्रेषूपनिबद्धः । ततस्तत्तच्छास्त्राध्ययनाऽध्यापनादिना समानीतो यावदस्मद्गुरुचरणाः । ततो विनयवैयावृत्त्यादिना प्रसन्नैस्तैर्मां प्राध्यापितः । इत्थं परम्परया सर्वज्ञमूलकर्मक्षपणाक्रमो यस्मात् गुरुप्रसादाद् मया प्राप्तः, तमेवाऽऽश्रित्य परम्परया समागतं क्षपणाक्रमं क्षपकश्रेणिग्रन्थरूपेण भवन्तं वक्ष्यामीति, तदेवं **"गुरुपसाय."** इत्यनेन गुरुपर्वक्रमलक्षणः सम्बन्धः सूचितः । उक्तसम्बन्धविरहे तु छद्मस्थावस्थाऽगोचरविविधाऽतीन्द्रियपदार्थसार्थप्रतिपादके शास्त्रे सुधियो न प्रवर्तेरन्, अभिदध्युश्च ते यथा-नाऽऽरम्भणीयमेतच्छास्त्रम्, सम्बन्धवन्ध्यत्वात् स्वेच्छारचितशास्त्रवदिति ।

द्वितीयस्तु तर्कानुसारिणः प्रति । स चैवम्—वचनरूपाऽऽपन्नः क्षपकश्रेणिग्रन्थ उपायः, तत्परिज्ञानं चोपेयम् । सामर्थ्यादेष सम्बन्धो ज्ञायते, साक्षात् तु नासौ कथितः ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिहितं मङ्गलाभिधेयादि । सम्प्रति क्षपकश्रेणिं प्रतिपादयितुकाम आदौ तावत् तस्या नवा-ऽधिकारान् गाथाद्वयेन प्राह—

**तत्थ य णव अहिगारा अहापवत्तकरणं तह हवेइ ।**
**करणमपुव्वं हवए सवेअअणियट्टिकरणं च ॥२॥**
**हयकण्ण-किट्टिकरण-तयणुहव-अवगयकसायअद्धा य ।**
**तह अत्थि सजोगिगुणट्ठाणमजोगिगुणठाणं च ॥३॥**

तत्र च नवाधिकारा यथाप्रवृत्तकरणं तथा भवति ।
करणमपूर्वं भवति सवेदा-ऽनिवृत्तिकरणं च ॥ २ ॥
हयकर्ण-किट्टिकरण-तदनुभवा-ऽपगतकषायाद्धा च ।
तथाऽस्ति सयोगिगुणस्थानमयोगिगुणस्थानञ्च ॥३॥ इति पदसंस्कारः ।

'**तत्थ**' इत्यादि, 'तत्र च'ग्रन्थरूपायां क्षपकश्रेणौ 'नव' नवसङ्ख्याका अधिकाराः सन्तीत्युपस्कारः । अथाऽधिकारान् नामग्राहं भणति—'**अहापवत्तकरणं**'इत्यादि,प्रथमोऽधिकारो यथाप्रवृत्तकरणम् , कथयिष्यते च "**अणच्चउगं**" इत्यादिगाथाभिः । तथाशब्दः समुच्चये, एवमग्रेऽपि, 'करणमपूर्वम्' द्वितीयोऽधिकारोऽपूर्वकरणं भवति । भाषिष्यते च "**काय व्वं सेकाले**" इत्यादिगाथाभिः । '**हवए सवेअअणियट्टिकरणं च**'त्ति चकारः समुच्चये,एवमग्रेऽपि, तृतीयोऽधिकारः सवेदाऽनिवृत्तिकरणं भवति, तत्र वेदेन=वेदोदयेन सह सवेदम्, "**सहस्तेन**" (सिद्धहेम० ३-१-२४)इत्यनेन सूत्रेण बहुव्रीहिसमासः,सवेदं च तदनिवृत्तिकरणं च सवेदाऽनिवृत्तिकरणम् । एतदुक्तं भवति-अनिवृत्तिकरणस्य प्रथमसमयात् प्रभृति पुरुषवेदोदयचरमसमयं यावद् या क्षपणप्रक्रिया भवति,साऽस्मिन्नधिकारे निरूपयिष्यते । प्रतिपादयिष्यते चा-ऽयमधिकारः "**सेकाले अनियट्टिं**"इत्यादिगाथाभिः ।

'**हयकण्ण०**' इत्यादि, 'हयकर्ण-किट्टिकरण-तदनुभवा-ऽपगतकषायाद्धा च' करणशब्दो द्वाभ्यां सम्बध्यते, अद्धाशब्दश्च प्रत्येकमभिसम्बध्यते, "**द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते ।**"इति न्यायात् । ततश्चायमर्थः–हयकर्णकरणाद्धा, किट्टिकरणाद्धा, तदनुभवाद्धा= किट्टिवेदनाद्धा, तच्छब्दस्य पूर्ववस्तुपरामर्शित्वेन किट्टेः परामर्शात् , अपगतकषायाद्धा=क्षीणकषायकालो द्वादशगुणस्थानककाल इत्यर्थः, तत्र सर्वथा कषायापगमनदर्शनात् । न चाऽपगतकषायशब्देन सयोगिकेवलिगुणस्थानका-ऽयोगिकेवलिगुणस्थानकेऽपि कुतो न गृह्येते ? इति वाच्यम् , तयोरग्रे वक्ष्यमाणत्वेन तत्र पुनरुक्तताप्रसङ्गात् । भावार्थः पुनरयम्–चतुर्थोऽधिकारो हयकर्णकरणाद्धा, विवर्णयिष्यते च "**हयकण्णा०**" इत्यादिगाथाभिः, इहाऽपूर्वकरणवदनिवृत्तिकरणमेकाऽधिकारमनभिधायाऽनिवृत्तिकरणे यत् पृथक्पृथक्सवेदाऽनिवृत्तिकरण-हयकर्णकरणाद्धादिकाऽभिधानम् , तत्प्रयोजनमग्रे वक्ष्यते । पञ्चमोऽधिकारः किट्टिकरणाद्धा, दर्शयिष्यते च "**पुण्णे हयकण्णे**" इत्यादिगाथाभिः । षष्ठो-ऽधिकारः किट्टिवेदनाद्धा, निरूपयिष्यते "**तत्तो य कोहपढमं**"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादिगाथाभिः । सप्तमो-ऽधिकारः क्षीणकषायाद्धा, प्रतिपादयिष्यते च "से कालेऽखगय-कसायगुणं" इत्यादिगाथाभिः ।

'तह' इत्यादि,तथा 'सयोगिगुणस्थानं' "भीमो भीमसेनः" इति न्यायात् पदैकदेशेन पदसमुदायस्य गम्यमानत्वात् सयोगिकेवलिगुणस्थानकमष्टमोऽधिकारोऽस्ति,कथयिष्यते च "सेकाले पावेइ" इत्यादिगाथाभिः । 'अयोगिगुणस्थानञ्च' अयोगिकेवलिगुणस्थानकं च नवमो-ऽधि-कारोऽस्ति, वर्णयिष्यते च 'सेकाले लहइ" इत्यादिगाथाभिः ॥२, ३॥

अथ "यथोद्देशं निर्देशः" इति न्यायेन प्रथमाऽधिकारं विवर्णयितुकामः प्राह—

**अणचउगं दिट्ठितिगं च खविय उज्जमइ सेसखवणाए ।**
**आढवइ अप्पमत्तो अहापवत्तकरणं समणो ॥४॥**

अनचतुष्कं दृष्टित्रिकञ्च क्षपयित्वोद्यच्छते शेषक्षपणायै ।
आरभतेऽप्रमत्तो यथाप्रवृत्तकरणं श्रमणः ॥४॥ इति पदसंस्कारः ।

**'अणचउगं'** इत्यादि-'अनचतुष्कम्' पदैकदेशेन पदसमुदायस्य गम्यमानत्वाद् अनन्तानु-बन्धिचतुष्कम् अनन्तानुबन्धिक्रोध-मान-माया लोभलक्षणम् , 'दृष्टित्रिकञ्च' मिथ्यात्वमोहनीय-सम्यङ्मिथ्यात्वमोहनीय-सम्यक्त्वमोहनीयलक्षणं दर्शनत्रिकं च 'क्षपयित्वा' निःसत्ताकीकृत्य 'शेष-क्षपणायै' शेषाणाम्=अप्रत्याख्यानावरण-प्रत्याख्यानावरण-संज्वलनकषाय-नवनोकषायरूपमोहनीय-स्य ज्ञानावरणादीनां च क्षपणायै=विनाशाय'उद्यच्छते' चेष्टते जीवः । अयम्भावः—चतुर्गतिकोऽविरत-सम्यग्दृष्टिर्देशविरतस्तिर्यङ् मनुष्यो वा सर्वविरतस्तु मनुष्य आन्तर्मौहूर्तिकानि यथाप्रवृत्तकरणाऽपूर्व-करणाऽनिवृत्तिकरणाख्यानि त्रीणि करणानि कुरुते, तत्राऽपूर्वकरणप्रथमसमयतः प्रभृति स्थितिघातं रसघातमपूर्वस्थितिबन्धं गुणश्रेणिं गुणसंक्रमं च करोति,तथाऽनन्तानुबन्धिक्रोध-मान-माया-लोभानां प्रदेशाग्रं गुणसङ्क्रमेणोद्वलनासंक्रमानुविद्धेन विनाशयति=शेषकषायत्वेन स्थापयतीत्यर्थः । अपूर्वकरणं विधायाऽनिवृत्तिकरणं कुरुते । तत्र चाऽनन्तानुबन्धिनां स्थितिं यथाक्रममपवर्तनाकरणेन घातयन् पल्योपमाऽसंख्येयभागप्रमाणां विधत्ते । अपवर्तनाविधिश्च कर्मप्रकृत्युक्तोद्वलनासङ्क्रमवद् बोध्यः । अनन्तानुबन्धिनां पल्योपमाऽसंख्येयभागप्रमाणस्थितिगतमपि दलमधस्तादावलिकामात्रं परित्यज्य बध्यमानमोहनीयप्रकृतिषु प्रतिसमयमसंख्येयगुणक्रमेण परिणमयंश्चरमसमये सर्वसङ्क्रमेण परिणमयति । यच्चावलिकागतं दलिकम् ,तत् स्तिबुकसङ्क्रमेण वेद्यमानासु परप्रकृतिषु संक्रमयति । ततोऽन्तर्मु-हूर्तात् परतोऽनिवृत्तिकरणपर्यवसाने शेषकर्मणामपि स्थितिघातादीन् न करोति, किन्तु स्वभाव-स्थ एव भवति ।

आवश्यकचूर्णिकाराद्यभिप्रायेण त्वनन्तानुबन्धिनामनन्ततमभागप्रमाणं दलं मिथ्यात्वे प्रक्षिपति,ततो यदा दर्शनत्रिकक्षपणामारभते, तदा मिथ्यात्वं तदंशेन सहैव क्षपयति । तथा चोक्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मावश्यकचूर्णौ–"अणंताणुबंधिकोह-माण-माया-लोभा जुगवं खवंति, पच्छा ताणं अणंतभागं मिच्छत्तंसेयणिज्जे कम्मे छुभति, ताहे तं खवेति ।" इति ।**

इह कालान्तरे कश्चिद् मिथ्यात्वोदयाद् भूयो-ऽप्यनन्तानुबन्धिन उपचिनोति, तद्बीजस्य मिथ्यात्वस्याविनाशात् । अन्यस्तु विनाशितानन्तानुबन्धी जीवो जघन्यतो-ऽन्तर्मुहूर्तमात्रं काल-मुत्कृष्टतश्च सागरोपमाणां सातिरेके द्वे षट्षष्टी व्यतिक्रम्य दर्शनत्रिकक्षपणाय प्रयतते । तत्र जिनविहरणकालसंभवी वर्षाष्टकस्योपरि वर्तमानः प्रथमसंहननो मनुष्यो दर्शनत्रिकक्षपणार्थं यथाप्रवृत्तादीनि त्रीणि करणानि करोति । तत्रादौ तावद् यथाप्रवृत्तकरणं करोति, ततोऽपूर्वकरणम् । अपूर्वकरणेऽनुदितयोर्मिथ्यात्व-सम्यङ्मिथ्यात्वयोर्दलिकं गुणसंक्रमेण सम्यक्त्वमोहनीये प्रक्षिपति, उद्वलनासंक्रममपि तयोरारभते । तद्यथा–प्रथमस्थितिखण्डं बृहत्तरमुद्वलयति, ततो द्वितीयं विशेषहीनम्, ततस्तृतीयं विशेषहीनम्, ततोऽपि चतुर्थं विशेषहीनम् । एवं तावद्यावचरम्, यावदपूर्व-करणचरमस्थितिखण्डम् । ततो-ऽनिवृत्तिकरणं विधत्ते । तत्र स्थितिघातादयः पूर्ववत् प्रवर्तन्ते । अनिवृत्तिकरणे प्रथमसमयतो दर्शनमोहस्य देशोपशमना-निधत्ति-निकाचनाकरणानि व्यवच्छिद्यन्ते । दर्शन-त्रिकस्य स्थितिसत्कर्माऽनिवृत्तिकरणप्रथमसमयादारभ्य स्थितिघातादिभिर्घात्यमानं स्थितिखण्ड-सहस्रेषु गतेष्वसंज्ञिपञ्चेन्द्रियस्थितिसत्कर्मतुल्यं भवति । ततः स्थितिखण्डसहस्रपृथक्त्वे गते चतुरि-न्द्रियस्थितिसत्कर्मसमानं भवति, ततोऽपि तावन्मात्रेषु स्थितिखण्डेषु व्रजितेषु त्रीन्द्रियस्थिति-सत्कर्मतुल्यं भवति । ततः पुनस्तावन्मात्रेषु स्थितिखण्डेषु व्यतिक्रान्तेषु द्वीन्द्रियस्थितिसत्कर्म-समानं भवति । ततस्तावन्मात्रेषु स्थितिखण्डेषु व्यतीतेष्वेकेन्द्रियस्थितिसत्कर्मतुल्यं स्थितिसत्त्वं भवति । ततोऽपि तावन्मात्रेषु स्थितिखण्डेषु गतेषु स्थितिसत्त्वं पल्योपममात्रं जायते, ततो दर्शन-त्रिकस्य स्थितिसत्कर्मण एकं संख्येयभागं विमुच्य शेषान् संख्येयान् बहून् भागान् विनाशयति । एतच्च **कर्मप्रकृतिचूर्णिकाराद्यभिप्रायेण** प्रोक्तम् । **पञ्चसंग्रहकाराभिप्रायेण** तु पल्योपमसंख्येय-भागमात्रस्थितिसत्कर्मभवनानन्तरं स्थितिसत्कर्मणः संख्येयान् भागान् विनाशयति । एवं स्थिति-घाताः सहस्रशो गच्छन्ति, तदनन्तरं मिथ्यात्वस्याऽसंख्येयभागान् विनाशयति, सम्यक्त्वमोहनीय-सम्यङ्मिथ्यात्वमोहनीययोस्तु पूर्ववत् संख्येयान् भागान् विनाशयति । अनेन क्रमेण बहुषु स्थितिखण्डेषु गतेषु मिथ्यात्वमुदयावलिकारहितं सर्वं क्षीणम् । यच्चावलिकागतम्, तत् स्तिबुक-सङ्क्रमेण सम्यक्त्वमोहनीये प्रक्षिपति । तदानीं सम्यक्त्वमोहनीय-सम्यङ्मिथ्यात्वमोहनीययोः स्थिति-सत्कर्म पल्योपमाऽसंख्येयभागमात्रमवतिष्ठते । तस्याऽसंख्येयभागान् स्थितिखण्डेन विनाशयति, एकमसंख्येयभागं मुञ्चति । ततः प्रभृतेषु स्थितिखण्डेषु व्रजितेषु सम्यङ्मिथ्यात्वमावलिकामात्रमवति-ष्ठते, शेषं सर्वं क्षीणम्, सम्यक्त्वमोहनीयस्य च स्थितिसत्कर्माऽष्टवर्षमात्रं भवति । अष्टवर्षमात्रस्थिति-सत्कर्मा निश्चयनयमतेन दर्शनमोहनीयक्षपक उच्यते । ततः परमान्तर्मौहूर्तिकान्यनेकानि स्थिति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खण्डानि विघातयति । तत्र चरमस्थितिखण्डे घातितेऽसौ क्षपकः कृतकरणो भण्यते । अस्यां च कृतकरणाद्धायां वर्तमानः कश्चित् कालमपि कृत्वा चतसृणां गतीनामन्यतमायां गतौ समुत्पद्यते, तदानीं च लेश्यापरावृत्तिरपि भवति । एवं दर्शनत्रिकक्षपणायाः प्रस्थापको मनुष्यो भवति, निष्ठापकस्त्वन्यतमश्चतुर्गतिकः । यदुक्तं **कर्मप्रकृतिचूर्णौ–'पट्ठवगो उ मणूसो निट्ठवगो होइ चउसु गईसु"**इति । विशेषार्थिना **त्वस्मत्कृतोपशमनाकरणवृत्ति**रवलोकनीया, तत्र विस्तरेण दर्शनत्रिकक्षपणायाः प्रतिपादितत्वात् ।

अबद्धायुष्को वेदितसम्यक्त्वमोहनीयशेषोऽन्तर्मुहूर्तं विश्रम्य चारित्रमोहनीयादिकक्षपणाय यतते, यद्यसौ न तीर्थकृन्नामसत्कर्मा,तथा चोक्तं **श्रीकर्मप्रकृतिचूर्णौ–"अह न बद्धाउओ तो खवगसेढिमेव पडिवज्जति,जति न तित्थयरसंतकंमिगो ।"** इति । बद्धायुष्कः पुनर्यदि तदानीं कालं न करोति,तथापि नासौ तद्भवे चारित्रमोहादिक्षपणाय यतते,किन्तूत्कृष्टतः सातिरेकत्रयस्त्रिंशत्सागरोपमाणि व्यतिक्रम्याऽवश्यं चारित्रमोहनीयादिक्षपणाय यतते । चारित्रमोहनीयादिक्षपणाय प्रयतमानो जीव आदौ किं करोति ? इत्यत आह–**'आढवइ'** इत्यादि, अप्रमत्तः **'श्रमणः'** श्राम्यति तपस्यतीति श्रमणः संयत इत्यर्थः, यथाप्रवृत्तकरणमारभते । अयं भावः–क्षीणसप्तकः प्रमत्तगुणस्थानकमप्रमत्तगुणस्थानकं च बहुशः स्पृशति, ततश्चारित्रमोहनीयादिक्षपणयोग्यविशुद्धिं प्राप्तो वर्षाष्टकस्योपरि वर्तमानोऽसौ प्रथमसंहननोऽप्रमत्तसंयतो यथाप्रवृत्तकरणं करोति । तत्र पूर्वविदप्रमत्तश्चेत् , तर्हि शुक्लध्यानोपगतोऽपि, अन्ये तु धर्मध्यानोपगताः । इदं तु **शतकलघुचूर्णिकृदाद्यभिप्रायेण** बोध्यम् , तच्च न विरुध्यते, **ध्यानशतककृद्भि**रप्रमत्तानामपि पूर्वधराणां शुक्लध्यानद्वयस्य स्वीकारात् । तथा च तद्ग्रन्थः—

**"सव्वप्पमायरहिया मुणओ खीणोवसंतमोहा य ।**
**झायारो नाणधणा धम्मज्झाणस्स निद्दिट्ठा ॥१॥**
**एएच्चिय पुव्वाणं पुव्वधरा सुप्पसत्थसंघयणा ।····" इति ।**

अयं भावः–ये धर्मध्यानस्य ध्यातारोऽप्रमत्तसंयतादयो भवन्ति, त एव पूर्वयोः–पृथक्त्ववितर्कसविचारैकत्ववितर्काऽविचारलक्षणयोर्ध्यायिनो भवन्ति, अयं तु विशेषः–सुप्रशस्तसंहननाः = आद्यसंहननयुक्ताः पूर्वधराः=चतुर्दशपूर्वविदस्तदुपयुक्ताः, इदं त्वप्रमत्तसंयतानां विशेषणम् , निर्ग्रन्थानां तु माषतुषादिवदन्यथाऽपि शुक्लध्यानोपपत्तेः। तदेवं क्षपकश्रेणिं प्रतिपन्नस्य पूर्वविदः शुक्लध्यानद्वयं न विरुध्यते ।

**शतकबृहच्चूर्णिकारादीनामभिप्रायेण** पुनः सर्वे श्रेणिं प्रतिपत्तुकामा धर्मध्यानोपगता एव भवन्ति,सूक्ष्मसम्परायं यावद् धर्मध्यानस्यैव स्वीकारात् । न चैतत्स्वमनीषिकयाऽभिहितम् , **शतकभाष्यकारै**रप्युक्तत्वात् । तथा च तद्ग्रन्थः—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"सुहुमोऽट्ठवेयगो इह सुक्कज्झाणेण डहइ कम्मं ति ।
जं वुत्तं तं आसन्नवीयरागत्तणमवेक्ख ॥ १ ॥
दठ्ठव्वमन्नहा ऊ सुहुमस्स उ धम्मझाणमेवेगं ।
होई एवं पुण गुरुयचुन्निभिप्पायओ वुत्तं ॥ २ ॥
लहुचुन्निअभिप्पाएणं सुक्कज्झाण आइयदुभेयं ।
न विरुद्धं पुव्वधराण होइ सुत्ते जओ भणियं ॥ ३ ॥" इति ।

धर्मध्यानशुक्लध्यानयोः स्वरूपं तु क्षीणकषायगुणस्थानकाद्धाप्ररूपणाऽवसरे वक्ष्यामः ॥४॥

सम्प्रति यथाप्रवृत्तकरणेऽध्यवसायस्थानानि तेषां चोर्ध्वमुखीं तिर्यङ्मुखीं च विशुद्धिं निरूरूपयिषुराह—

**परिणामट्ठाणाइं अणुसमयमसंखलोगमेत्ताणि ।**
**उड्ढमुहाऽणंतगुणा सोही तिरिया उ छट्ठाणा ॥५॥**

परिणामस्थानान्यनुसमयमसङ्ख्यलोकमात्राणि ।
ऊर्ध्वमुख्यनन्तगुणा शोधिस्तिर्यक् तु षट्स्थाना ॥५॥ इति पदसंस्कारः।

'**परिणामट्ठाणाइं**' इत्यादि, 'परिणामस्थानानि' अध्यवसायस्थानानि 'अनुसमयं' समये समय इत्यनुसमयम् ,"**योग्यतावीप्सा०**" (सिद्धहेम० ३-१-४०) इत्यनेन सूत्रेण वीप्सायामव्ययीभावसमासः, प्रतिसमयमित्यर्थः, 'असङ्ख्यलोकमात्राणि' विशुद्धिभेदेनाऽसङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणानि भवन्ति ।

ननु यथाप्रवृत्तकरणं प्रतिपन्नानां कालत्रयापेक्षया जीवानामनन्तत्वेना-ऽध्यवसायस्थानानामनन्तत्वं कुतो न भवति ? इति चेत् , उच्यते—सत्यम् , स्यादेवम् , यदि यथाप्रवृत्तकरणं प्रतिपन्नानां सर्वेषां जीवानामध्यवसायस्थानानि पृथक् पृथग् भिन्नान्येव स्युः, तच्चेह नास्ति, बहूनामेकाऽध्यवसायस्थानवर्तित्वात् । यथा कश्चिदशीतिश्चारित्रिणो दशस्वध्यवसायस्थानेषु वर्तन्ते, अष्टानामष्टानां चारित्रिणामेकाध्यवसायस्थानवर्तित्वात् ,तथैवेहाऽपि यथाप्रवृत्तकरणं प्रतिपन्नानामनन्तानामनन्तानां जीवानामेकध्यवसायस्थानवर्तित्वात् तेऽसंख्येयेष्वेवाऽध्यवसायस्थानेषु वर्तन्ते । तेन यथाप्रवृत्तकरणे प्रतिसमयमसंख्येयलोकाकाशप्रदेशराशिमात्राण्येवाऽध्यवसायस्थानानि,न ततोऽधिकानि । अयमत्र विशेषः—यथाप्रवृत्तकरणे प्रतिसमयमध्यवसायस्थानान्यसङ्ख्येयलोकाकाशप्रदेशराशिमात्राण्यभिहितानि,तानि न प्रथमादिसमयेषु मिथस्तुल्यानि भवन्ति, किन्तु यथाप्रवृत्तकरणस्य प्रथमसमयतो द्वितीयसमयेऽध्यवसायस्थानानि विशेषाधिकानि भवन्ति, ततोऽपि तृतीयसमये विशेषाधिकानि, एवं तावद् वक्तव्यानि, यावद् यथाप्रवृत्तकरणचरमसमयः । स्थाप्यमानानि पुनरेतानि विषमचतुरस्रक्षेत्रमास्तृणन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथोक्ताऽध्यवसायस्थानानां विशुद्धिमभिधत्ते–'उड्ढमुहा' इत्यादि, "अणुसमयम्" इति पदस्याऽत्राऽपि सम्बन्धात्, अनुसमयम् ऊर्ध्वमुखी 'शोधिः' विशुद्धिरनन्तगुणा भवति, 'तिर्यक् तु' तिर्यङ्मुखी विशुद्धिस्तु 'षट्स्थाना' षट्स्थानविशिष्टा षट्स्थानपतितेत्यर्थः। भावार्थः पुनरयम्–उत्तरोत्तरसमयेऽध्यवसायस्य विमृश्यमाना विशुद्धिरूर्ध्वमुखी विशुद्धिर्भण्यते, विवक्षितैकसमयभाविनां बहूनामध्यवसायस्थानानां मिथो विमृश्यमाना विशुद्धिस्तिर्यङ्मुखी विशुद्धिर्निगद्यते। इह यथाप्रवृत्तकरणे प्रथमसमयतो द्वितीयसमये विशुद्धिरनन्तगुणा भवति, ततोऽपि तृतीयसमयेऽनन्तगुणा भवति, एवं तावद्वक्तव्या, यावच्चरमसमयः। तेन यथाप्रवृत्तकरणे प्रतिसमयमूर्ध्वमुखी विशुद्धिरनन्तगुणा भणिता। तथा यथाप्रवृत्तकरणविवक्षितैकसमयभाविनामसङ्ख्येयलोकाकाशप्रदेशराशिमात्राणामध्यवसायस्थानानामेकतमस्याध्यवसायस्य विशुद्धिरन्याऽध्यवसायस्थानविशुद्ध्यपेक्षयाऽनन्तभागवृद्धा वा-ऽसंख्येयभागवृद्धा वा संख्येयभागवृद्धा वा संख्येयगुणवृद्धा वाऽसंख्येयगुणवृद्धा वा-ऽनन्तगुणवृद्धा वा भवति, एवं षड्विधहानिविशिष्टा-ऽपि भवति। तेन यथाप्रवृत्तकरणे तिर्यङ्मुखी विशुद्धिः षट्स्थानपतिता।

इह यथाप्रवृत्तकरणे या प्रतिसमयमूर्ध्वमुखी विशुद्धिरनन्तगुणा प्रतिपादिता, सैकजीवापेक्षयैव बोद्धव्या, नानाजीवाऽपेक्षया तु षट्स्थानपतिता सम्भवति। वक्ष्यमाणाऽपूर्वकरणे त्वनेकजीवापेक्षयाऽप्यूर्ध्वमुखी विशुद्धिरनन्तगुणा न विरुध्यते, पूर्वपूर्वसमयभाव्युत्कृष्टविशोधितोऽप्युत्तरोत्तरसमयभाविजघन्यविशोधेरनन्तगुणत्वात्। तिर्यङ्मुखी विशुद्धिस्तु सर्वत्र नानाजीवापेक्षयैवाऽवगन्तव्या, एकजीवस्यैकसमये नानाऽध्यवसायानामसम्भवात् ॥५॥

यथाप्रवृत्तकरणे प्रतिसमयमध्यवसायस्थानानि विशोधिभेदेनासंख्येयलोकाकाशप्रदेशराशिमात्राणि प्रोक्तानि। सम्प्रति विशोधितारतम्यमार्यात्रिकेण प्रदर्शयति—

**करणस्स पढमसमये सव्वत्थोवा जहण्णिया सोही।**
**तो पढमसंखभागं जाव जहण्णा अणंतगुणा ॥६॥**
**तत्तो पढमे समये उक्कोसा होअए अणंतगुणा।**
**तो उवरि पढमसमये होइ जहण्णा अणंतगुणा ॥७॥**
**एवं हेट्ठे उवरि य जाव जहण्णाऽत्थि चरिमसमयम्मि।**
**तत्तो सेसुक्कोसा कमेण हुन्ते अणंतगुणा ॥८॥**

करणस्य प्रथमसमये सर्वस्तोका जघन्या शोधिः।
ततः प्रथमसङ्ख्यभागं यावज्जघन्याऽनन्तगुणा ॥६॥
ततः प्रथमे समय उत्कृष्टा भवत्यनन्तगुणा।
तत उपरि प्रथमसमये भवति जघन्या-ऽनन्तगुणा ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमध उपरि च यावज्जघन्याऽस्ति चरमसमये ।
ततः शेषोत्कृष्टाः क्रमेण भवन्त्यनन्तगुणाः ॥८॥ इति पदसंस्कारः ।

'करणस्स' इत्यादि, 'करणस्य' प्रस्तुतत्वाद् **"भामा सत्यभामा"** इति न्यायाच्च यथाप्रवृत्तकरणस्य प्रथमसमये जघन्या 'शोधिः' विशोधिः सर्वस्तोका भवति, तदितरासां प्रभूतत्वात् । ततः 'प्रथमसङ्ख्यभागं' यथाप्रवृत्तकरणस्य प्रथमसङ्ख्येयभागं यावज्जघन्या विशोधिरनन्तगुणा । इदमुक्तं भवति—यथाप्रवृत्तकरणप्रथमसमयभाविजघन्यविशोधितो यथाप्रवृत्तकरणस्य द्वितीयसमये जघन्यविशोधिरनन्तगुणा, ततोऽपि तृतीयसमये जघन्यविशोधिरनन्तगुणा, ततोऽपि चतुर्थसमये जघन्या विशोधिरनन्तगुणा । एवंक्रमेण तावद् वक्तव्या, यावद् यथाप्रवृत्तकरणप्रथमसंख्येयभागचरमसमयभाविजघन्यविशोधिः । 'तत्तो' इत्यादि, 'ततः' यथाप्रवृत्तकरणप्रथमसंख्येयभागचरमसमयभाविजघन्यविशोधितः 'प्रथमे समये' यथाप्रवृत्तकरणस्य प्रथमे समये उत्कृष्टा विशोधिरनन्तगुणा भवति, 'ततः' यथाप्रवृत्तकरणप्रथमसमयभाव्युत्कृष्टविशोधितः 'उपरि' यथाप्रवृत्तकरणप्रथमसङ्ख्येयभागस्योपरि प्रथमसमये जघन्या विशोधिरनन्तगुणा भवति । 'एवं' इत्यादि, 'एवम्' अनेन क्रमेणाऽध उपरि च विशोधिर्यत्तदोर्मिथः सापेक्षत्वादुत्तरत्र यच्छब्दोपादानाच्च तावद् वक्तव्या, यावत् 'चरमसमये' यथाप्रवृत्तकरणचरमसंख्येयभागाऽन्तिमसमये जघन्या विशोधिः 'अस्ति' भवति । इयमत्र भावना—यथाप्रवृत्तकरणप्रथमसंख्येयभागोपरितनप्रथमसमयभाविजघन्यविशोधितो यथाप्रवृत्तकरणद्वितीयसमये उत्कृष्टा विशोधिरनन्तगुणा भवति, ततो यथाप्रवृत्तकरणप्रथमसंख्येयभागोपरितनद्वितीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि यथाप्रवृत्तकरणतृतीयसमये उत्कृष्टा विशोधिरनन्तगुणा । ततोऽपि यथाप्रवृत्तकरणप्रथमसङ्ख्येयभागोपरितनतृतीयसमये जघन्या विशोधिरनन्तगुणा । एवंक्रमेणाऽध उपरि चोत्कृष्टा जघन्या च विशोधिस्तावदभिधातव्या, यावद् यथाप्रवृत्तकरणचरमसंख्येयभागचरमसमयभाविजघन्यविशोधिः, सा च यथाप्रवृत्तकरणचरमसमयभाविजघन्यविशोधिः । 'तत्तो' इत्यादि, 'ततः' यथाप्रवृत्तकरणचरमसमयभाविजघन्यविशोधितः 'शेषोत्कृष्टाः' यथाप्रवृत्तकरणचरमसंख्येयभागगता या अनुक्ताः शेषा उत्कृष्टा विशोधयः, ताः क्रमेणाऽनन्तगुणा भवन्ति । तद्यथा—यथाप्रवृत्तकरणचरमसमयभाविजघन्यविशोधितो यथाप्रवृत्तकरणचरमसङ्ख्येयभागप्रथमसमयभाव्युत्कृष्टविशोधिरनन्तगुणा भवति, ततोऽपि यथाप्रवृत्तकरणचरमसङ्ख्येयभागद्वितीयसमयभाव्युत्कृष्टविशोधिरनन्तगुणा । ततोऽपि यथाप्रवृत्तकरणचरमसङ्ख्येयभागतृतीयसमयभाव्युत्कृष्टविशोधिरनन्तगुणा । एवमनन्तगुणक्रमेणोत्तरोत्तरसमये उत्कृष्टा विशोधिस्तावद् वक्तव्या, यावद् यथाप्रवृत्तकरणचरमसमयभाव्युत्कृष्टविशोधिः ।

अध्यवसायस्थानानामनुकृष्ट्यादयस्त्वस्मत्कृतोपशमनाकरणगतसम्यक्त्वोत्पाद-यथाप्रवृत्तकरणटीकायां निरूपिताः, ततोऽवसेयाः, ग्रन्थगौरवभयान्नाऽत्र वितन्यन्ते ॥६-८॥

**★ यथाप्रवृत्तकरणे विशोधितारतम्यमाश्रित्याऽध्यवसायानां स्थापना ★**

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org




●●●●तिर्यक्स्थापितैरेभिर्बिन्दुभिरध्यवसायस्थानानि सूचितानि, तानि च परमार्थतोऽसंख्येयलोकाकाशप्रदेश-राशिमात्राणि, पूर्वपूर्वसमयतश्चोत्तरोत्तरसमये विशेषाधिकानि। स्थाप्यमानानि च विषमचतुरस्रं क्षेत्रमास्तृणन्ति।

ज०= तत्तत्समये प्रथमबिन्दुना यदध्यवसायस्थानं सूचितं, तस्य या विशोधिः, सा जघन्या।

उ०= तत्तत्समयेऽन्तिमबिन्दुना यदध्यवसायस्थानं सूचितं, तस्य या विशोधिः, सोत्कृष्टा।

शेषबिन्दुभिः सूचिताऽध्यवसायस्थानानां या विशोधिः, सा मध्यमा, सा च मिथः षट्स्थानपतिता।

असत्कल्पनया यथाप्रवृत्तकरणस्य १२ समयाः कल्पिताः, तत्संख्येयभागश्च चतुरसमयमात्रः।

→ एतच्चिह्नमनन्तगुणतां सूचयति।

एतर्हि यथाप्रवृत्तकरणे वर्तमानस्य जीवस्य योगादीन् प्रतिपिपादयिषुराह—

## मणवयणोरालाणं जोगे वट्टइ अण्णयरे।
## सुअउवजोगे मइ-सुअ-चक्खु-अचक्खूसु वा इगकसाये ॥९॥ (उद्गीतिः)

मनोवचनौदाराणां योगे वर्तते ऽन्यतरस्मिन्।
श्रुतोपयोगे मति-श्रुत-चक्षुरचक्षुष्षु वैककषाये ॥९॥ इति पदसंस्कारः।

**'मण०'** इत्यादि, 'मनोवचनौदाराणां' क्षपकश्रेणिं प्रतिपत्तुकामो मनोयोगचतुष्कवचनयोग-चतुष्कौदारिककाययोगानाम् 'अन्यतरस्मिन्' अन्यतमे योगे वर्तते, औदारिकमिश्रकाययोगादिषु क्षपकश्रेणिप्रतिपत्त्यसंभवात्। यदुक्तं कषायप्राभृतचूर्णौ—**"जोगे त्ति विहासा अण्णदरो मणजोगो अण्णदरो वचिजोगो ओरालियकायजोगो वा"** इति।

**'सुअ०'** इत्यादि, 'श्रुतोपयोगे' क्षपकश्रेणिं प्रतिपत्तुकामः श्रुतोपयोगलक्षणे साकारोपयोगे वर्तते। केचित् तु मत्याद्युपयोगेष्वन्यतम उपयोगे वर्तमानो भवतीति मन्यन्ते, तन्मतं दर्शयितुकाम आह—**'मइ०'** इत्यादि, 'मतिश्रुतचक्षुरचक्षुष्षु वा' मतिज्ञानोपयोग-श्रुतज्ञानोपयोग-चक्षुर्दर्शनोपयोगा-ऽचक्षुर्दर्शनोपयोगेष्वन्यतरस्मिन्नुपयोगे वर्तमानो भवति, वाशब्दो मतान्तरद्योतकः। यदवादि कषाय-प्राभृतचूर्णौ—**"एक्को उवएसो णियमा सुदोवजुत्तो होदूण खवगसेढिं चडदि त्ति एक्को उवदेसो सुदेण वा मदीए वा चक्खुदंसणेण वा अचक्खुदंसणेण वा।"** इति। न च मतिश्रुतज्ञानचक्षुरचक्षुर्दर्शनोपयोगवदवधिज्ञानेन वा मनःपर्यायज्ञानेन वाऽवधिदर्शनेन वा क्षपक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रेणिं कुतो न प्रतिपद्यते ? इति वाच्यम् , सिद्धान्तेऽवधिज्ञानोपयोगेन वाऽवधिदर्शनोपयोगेन वा मनःपर्यवज्ञानोपयोगेन वा क्षपकश्रेणिप्रतिपत्तेरस्वीकारात् ।

**'इगकसाये'** त्ति 'एककषाये' अनन्तानुबन्धिनां क्षीणत्वाद् अप्रमत्तगुणस्थानके च प्रत्याख्यानावरणादीनामुदयविरहात् संज्वलनक्रोध-मान-माया-लोभानाम् एकस्मिन्=अन्यतमे कषाये वर्तते क्षपकश्रेणेरारोहकः । उक्तं च **कषायप्राभृतचूर्णौ–कसाये त्ति विहासा-अण्णदरो कसायो ।"** इति ॥९॥

सम्प्रति यथाप्रवृत्तकरणं कुर्वतो जीवस्य वेदादिकं प्राह—

**पुरिसाईणं वेए अण्णयरम्मि य विसुज्झयरसुक्काए ।**
**पयइठिइरसपएसा पडुच्च णेयाणि बन्धुदयसंताइं ॥१०॥** (आर्यागीतिः)

पुरुषादीनां वेदेऽन्यतरस्मिंश्च विशुद्धतरशुक्लायाम् ।
प्रकृति-स्थिति-रस-प्रदेशान् प्रतीत्य ज्ञेयानि बन्धोदयसत्त्वानि ॥१०॥ इति पदसंस्कारः ।

**'पुरिसाईणं'** इत्यादि, **'वट्टेइ'** इति पूर्वगाथोक्तपदमत्राऽप्यनुवर्तते, तेन 'पुरुषादीनां' पुरुषवेद-स्त्रीवेद-नपुंसकवेदानामन्यतरस्मिन् वेदे वर्तते क्षपकश्रेणेः प्रतिपत्ता । यदुक्तं **कषायप्राभृतचूर्णौ-"वेदो य को भवे त्ति विहासा अण्णदरो वेओ ।"** इति । चकारः समुच्चयार्थो भिन्नक्रमश्च, स चोत्तरत्र योज्यः । 'विशुद्धतरशुक्लायां च' पूर्वपूर्वसमयभाविशुक्ललेश्याऽपेक्षयोत्तरोत्तरसमये विशुद्धतरायां शुक्ललेश्यायां वर्तते क्षपकश्रेणेः समारोहकः, अनुभागापेक्षया कषायाणामुदयस्याऽनन्तगुणहीनत्वेन शुभलेश्याया हानेरवस्थानस्य चाऽसम्भवात् । उक्तं च **कषायप्राभृतचूर्णौ–"लेस्सा त्ति विहासा णियमा सुक्कलेसा णियमा वड्ढमाणलेसा ।"** इति ।

अथ यथाप्रवृत्तकरणं विदधानस्य बन्धादिकं सूचयति-**'पयइ'०** इत्यादि प्रकृति-स्थिति-रस-प्रदेशान् 'प्रतीत्य'समाश्रित्य**'बन्धुदयसन्ताइं'** ति,इह सदिति निर्देशस्य भावप्रधानत्वात् सच्छब्देन सत्त्वं व्याख्येयम् । बन्धोदयसत्त्वानि 'ज्ञेयानि' स्वयमेवाभ्यूह्यानि, सुगमत्वात् , पाठकेभ्यो वा बोद्धव्यानि । एतदुक्तं भवति–यथाप्रवृत्तकरणं कुर्वतो जीवस्य प्रकृतिबन्धः स्थितिबन्धो रसबन्धः प्रदेशबन्धश्च ज्ञातव्यः, एवं प्रकृत्युदयः स्थित्युदयो रसोदयः प्रदेशोदयश्च बोद्धव्यः, तथा प्रकृतिसत्ता स्थितिसत्ताऽनुभागसत्ता प्रदेशसत्ता चाऽवसेया ।

अथ विनेयबुद्धिवैशद्यार्थं विस्तरेण प्रकृतिबन्धादयः प्रतिपाद्यन्ते–

**तत्रादौ तावद् मूलप्रकृतिबन्धः**–क्षपकश्रेणिं प्रतिपद्यमान आयुर्वर्जशेषाणि सप्तैव कर्माणि बध्नाति, क्षपकश्रेण्यामायुर्बन्धाऽसम्भवाद् विशुद्धिप्रकर्षाच्च ।

**अथोत्तरप्रकृतिबन्धः**—मतिज्ञानावरण-श्रुतज्ञानावरणा–ऽवधिज्ञानावरण–मनःपर्यवज्ञानावरण-केवलज्ञानावरणरूपं ज्ञानावरणप्रकृतिपञ्चकं चक्षुर्दर्शनावरणा-ऽचक्षुर्दर्शनावरणा-ऽवधिदर्शनावरण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलदर्शनावरण-निद्रा-प्रचलालक्षणं दर्शनावरणप्रकृतिषट्कं सातवेदनीयं संज्वलनक्रोध-मान-माया-लोभ-पुरुषवेद-हास्य-रति-भय-जुगुप्सारूपं मोहनीयप्रकृतिनवकमुच्चैर्गोत्रं दानान्तराय-लाभान्तराय-भोगान्तरायोपभोगान्तराय-वीर्यान्तरायलक्षणमन्तरायपञ्चकञ्चेति नामकर्मवर्जशेषकर्मणां सप्तविंशतिं (२७)प्रकृतीर्बध्नाति,नामकर्मणस्तु देवगति-पञ्चेन्द्रियजाति-वैक्रियशरीर-तैजस-कार्मणशरीर-वैक्रियाङ्गोपाङ्ग-समचतुरस्रसंस्थान-वर्ण-गन्ध-रस-स्पर्श--देवानुपूर्वी-शुभखगति-त्रस-बादर–पर्याप्त-प्रत्येक-स्थिर-शुभ-सुभग-सुस्वरा-ऽऽदेय-यशःकीर्त्यगुरुलघूपघात-पराघात-श्वासोच्छ्वास–निर्माणरूपाऽष्टाविंशति-प्रकृतीर्बध्नाति । तेन जघन्यतः क्षपकः पञ्चपञ्चाशत्प्रकृत्यात्मकं (५५) बन्धस्थानं बध्नाति । कश्चिज्जीवस्तु जिननामाऽपि बध्नातीति नामकर्मण एकोनत्रिंशत्प्रकृतीर्बध्नन् जीवः षट्पञ्चाशत्प्रकृत्यात्मकं (५६) बन्धस्थानं बध्नाति । अन्यस्तु नामकर्मणः प्रागुक्तदेवगत्याद्यष्टाविंशतिप्रकृतीराहारकशरीराऽऽहारकाङ्गोपाङ्गलक्षणं चा-ऽऽहारकद्विकं बध्नातीति नामकर्मणस्त्रिंशत्प्रकृतीर्बध्नन् जीवः सप्तपञ्चाशत्प्रकृत्यात्मकं (५७) बन्धस्थानं बध्नाति । कश्चिज्जीवः पुनर्नामकर्मणः प्रोक्त-देवगत्याद्यष्टाविंशतिप्रकृतीराहारकद्विकं जिननाम च बध्नातीति नामकर्मण एकत्रिंशत्प्रकृतीर्बध्नन् जीवोऽष्टपञ्चाशत्प्रकृत्यात्मकं (५८) बन्धस्थानं बध्नाति ।

यन्त्रकम्

| बन्धस्थानम् | प्रकृतयः |
|---|---|
| ५५ प्रकृत्यात्मकम् | ज्ञानावरणस्य ५, दर्शनावरणस्य ६, वेदनीयस्य १, मोहनीयस्य ९, नाम्नः २८, गोत्रस्य १, अन्तरायस्य च ५ |
| ५६ „ | ५५+जिननाम |
| ५७ „ | ५५+आहारकद्विकम् |
| ५८ „ | ५५+आहारकद्विकम्+जिननाम |

अन्वयव्यतिरेकाभ्यां पदार्थचिन्ता कर्तव्या । इहान्वयेन कृता प्रकृतिबन्धचिन्ता । सम्प्रति व्यतिरेकेण क्रियते—

मूलकर्मस्वायुष्कस्य बन्धो व्यवच्छिन्नः ।

उत्तरकर्मसु नामकर्मवर्जशेषकर्मणां स्त्यानर्द्धित्रिका-ऽसातवेदनीय-द्वादशकषाय-मिथ्यात्व-शोका-ऽरति-स्त्रीवेद-नपुंसकवेदाऽऽयुष्कचतुष्क-नीचैर्गोत्ररूपषड्विंशतिप्रकृतीनां बन्धो व्यवच्छिन्नः,नामकर्मणश्च देवगतिवर्जगतित्रिक-पञ्चेन्द्रियवर्जजातिचतुष्कौदारिकशरीरौदारिकाङ्गोपाङ्ग-संहननषट्क-प्रथम-संस्थानवर्जशेषसंस्थानपञ्चक-देवानुपूर्वीवर्जशेषानुपूर्वीत्रिकाऽशुभखगत्यातपोद्योत-स्थावर-सूक्ष्माऽपर्याप्तसाधारणा-ऽस्थिरा-ऽशुभ-दुर्भग-दुःस्वराऽनादेया-ऽयशःकीर्त्तिरूपषट्त्रिंशत्प्रकृतीनां बन्धः स्माऽपग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छति। उक्तं च कषायप्राभृतचूर्णौ–"**थीणगिद्धितियमसाद-मिच्छत्त-बारसकसाय-अर-दि-सोग-इत्थिवेद-णवुंसयवेद-सव्वाणि चेव आउगाणि परियत्तमाणियाओ णामाओ असुहाओ सव्वाओ चेव मणुसगइ-ओरालियसरीरंगोवंग-वज्जरिसहसंघडणमणुसगइपाओग्गाणुपुव्वीआदावुज्जोवणामाओ च सुहाओ णीचागोदं च एदाणि कम्माणि बंधेण वोच्छिण्णाणि।**" अत्र "परियत्तमाणियाओ णामाओ असुहाओ सव्वाओ चेव" इत्यनेन नरकतिर्यग्गति-जातिचतुष्काद्यवर्जसंस्थानपञ्चकाद्यवर्जसंहननपञ्चक–नरकतिर्यगानुपूर्वी–कुखगति-स्थावर-सूक्ष्मा-ऽपर्याप्त-साधारणा-ऽस्थिराऽशुभ-दुर्भग-दुःस्वरा–ऽनादेया–ऽयशःकीर्तिरूपाः प्रकृतयो ग्राह्याः, तासां परावर्तमानाऽशुभनामकर्मत्वात्।

**अथ स्थितिबन्धोऽभिधीयते**—सप्तानामपि कर्मणां स्थितिबन्धोऽन्तःसागरोपमकोटाकोटिप्रमाणो भवति, स च सत्तागतस्थितितः संख्यातगुणहीनो भवति। तथा प्रत्यन्तमुहूर्तं पूर्वपूर्वत उत्तरोत्तरस्थितिबन्धः पल्योपमसंख्येयभागेन हीनो हीनतरो जायते। इदमुक्तं भवति–यथाप्रवृत्तकरणप्रथमसमये यः स्थितिबन्धः प्रारभ्यते, सोऽन्तमुहूर्तं यावत् प्रवर्तते। तस्मिन् पूर्णेऽन्यः पल्योपमसंख्येयभागेन हीनः स्थितिबन्धः प्रारभ्यते, सोऽप्यन्तमुहूर्तं यावत् प्रवर्तते। एवमग्रेऽपि प्रत्यन्तमुहूर्तं पल्योपमसंख्येयभागेन हीनो हीनतरः स्थितिबन्धः प्रवर्तते।

**अथाऽनुभागबन्धो विविच्यते**—शुभप्रकृतीनां चतुःस्थानकमशुभानां प्रकृतीनां पुनर्द्विस्थानकमनुभागं बध्नाति, तमपि प्रतिसमयं शुभानामनन्तगुणवृद्धमशुभानां चाऽनन्तगुणहीनं बध्नाति।

**सम्प्रति प्रदेशबन्धोऽभिधीयते**—उत्कृष्टयोगी निद्राद्विक-हास्य-रति-भय-जुगुप्सा-देवद्विक-वैक्रियद्विक-प्रथमसंस्थान-शुभखगति-सुभगत्रिकरूपसप्तदशप्रकृतीनामुत्कृष्टं प्रदेशाग्रं बध्नाति। शेषाणां चत्वारिंशत्प्रकृतीनामनुत्कृष्टमेव प्रदेशं बध्नाति। अत्र कारणमस्मत्कृतोपशमनाकरणगत-प्रथमौपशमिकसम्यक्त्वटीकातोऽवसेयम्। नामकर्मण एकोनत्रिंशत्प्रकृत्यात्मकं बन्धस्थानं तथा त्रिंशत्प्रकृत्यात्मकं बन्धस्थानं बध्नन्नुत्कृष्टयोगी क्रमेण जिननाम्न आहारकद्विकस्य वोत्कृष्टप्रदेशाग्रं बध्नाति, तदानीं शेषाणां नामप्रकृतीनामनुत्कृष्टप्रदेशाग्रं बध्नाति। अनुत्कृष्टयोगी तु निद्रादीनां सर्वप्रकृतीनामनुत्कृष्टप्रदेशाग्रं बध्नाति।

**अथ प्रकृत्युदयो निरूप्यते**—

**मूलप्रकृत्युदयः**—अष्टानामपि मूलकर्मणामुदयो विद्यते।

**उत्तरप्रकृत्युदयः**–ज्ञानावरणपञ्चकं दर्शनावरणचतुष्कमन्यतरद्वेदनीयं संज्वलनक्रोधादिष्वन्यतमः कषायोऽन्यतमो वेदोऽन्यतरं युगलमन्तरायपञ्चकं मनुष्यायुरुच्चैर्गोत्रं चेति नामवर्जशेषक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्मणां जघन्यत एकविंशतिप्रकृतीनामुदयः प्रवर्तते । नामकर्मणः पुनर्वर्णचतुष्क-तैजसकार्मणशरीरा-ऽगुरुलघुनिर्माण-स्थिरा-ऽस्थिर-शुभा-ऽशुभरूपद्वादशध्रुवोदयप्रकृतीनां तथा मनुष्यगतिः पञ्चेन्द्रियजातिरौदारिकद्विकं प्रथमसंहननं षट्स्वन्यतमं संस्थानमन्यतरा खगतिः पराघात उच्छ्वास उपघातस्त्रसचतुष्कं सुभग आदेयो यशःकीर्तिः स्वरद्विकेऽन्यतरश्चेत्यष्टादशाऽध्रुवोदयप्रकृतीनामुदयो भवति । एवं सर्वसंख्यया त्रिंशत्प्रकृतीनामुदयः प्रवर्तते । इत्थं जघन्यत एकपञ्चाशत्प्रकृतय उदयन्ति, अन्यस्य जन्तोर्निद्राद्विकेऽन्यतरा भय-जुगुप्सयोरन्यतरा वोदेतीति तस्य जन्तोर्द्वापञ्चाशत्प्रकृत्यात्मकमुदयस्थानकम्, इतरस्य पुनर्भयजुगुप्सयोरन्यतरा तथा निद्राद्विकेऽन्यतरा यद्वा भय-जुगुप्से उदित इति तस्य जन्तोस्त्रयःपञ्चाशत्प्रकृत्यात्मकमुदयस्थानकं निश्चेतव्यम् । कस्यचिज्जन्तोर्निद्राद्विकेऽन्यतरा भयजुगुप्से चोदयन्तीति तस्य जन्तोश्चतुःपञ्चाशत्प्रकृत्यात्मकमुदयस्थानकं भवति । तत्रैकैकमुदयस्थानकं भिन्नभिन्नप्रकृतीराश्रित्याऽनेकविधं भवति । तथाहि—कश्चित् क्रोधोदयविशिष्टो जन्तुः क्षपकश्रेणिमारोहेत् । अन्यो मानोदयविशिष्टः, इतरःपुनर्मायोदयविशिष्टः, अपरस्तु लोभोदयविशिष्टः । एवंविधाश्चत्वारोऽपि जन्तवोऽसातोदयविशिष्टाः सातोदयविशिष्टा वा क्षपकश्रेणिं प्रतिपित्सवो भवेयुः । इत्थं प्रकृतिभेदेनैकस्योदयस्थानकस्य यावन्तः प्रकारा भवन्ति, तावन्तस्तस्योदयस्थानकस्य भङ्गा भवन्ति । तत्र प्रथमस्योदयस्थानकस्य द्वापञ्चाशदधिकैकादशशतानि (११५२), द्वितीयस्याष्टोत्तरषट्चत्वारिंशच्छतानि (४६०८), तृतीयस्य षष्ट्यधिकसप्तपञ्चाशच्छतानि (५७६०), तुर्यस्य च चतुरधिकत्रयोविंशतिशतानि (२३०४) ।

**न्यासस्त्वेवं कार्यः—**

| प्रथममुदयस्थानकम्, | प्रकृतयः, | कषायः, | वेदः, | युगलम्, | वेदनीयम्, | संस्थानम्, | खगतिः, | स्वरः, | निद्रा, | भङ्गाः |
|---|---|---|---|---|---|---|---|---|---|---|
| | ५१ | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ | | =११५२ |
| द्वितीयमुदयस्थानकम् प्रकृतयः५२, | | | | | | | | | | |
| ५१ + अन्यतरा निद्रा | | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ × | २ | =२३०४ |
| ५१ + भयः | | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ | | =११५२ |
| ५१ + जुगुप्सा | | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ | | =११५२ |
| | | | | | | | | | | ४६०८ |
| तृतीयमुदयस्थानकम् प्रकृतयः ५३, | | | | | | | | | | |
| ५१ + अन्यतरा निद्रा + भयः | | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ × | २ | =२३०४ |
| ५१ + ,, + जुगुप्सा | | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ × | २ | =२३०४ |
| ५१ + भयः + जुगुप्सा | | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ | | =११५२ |
| | | | | | | | | | | ५७६० |
| चतुर्थमुदयस्थानकम्, प्रकृतयः५४, | | | | | | | | | | |
| ५१ + भयजुगुप्से + अन्यतरा निद्रा | | ४ × | ३ × | २ × | २ × | ६ × | २ × | २ × | २ | =२३०४ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं चतुर्णामुदयस्थानकानां समुदितभङ्गाश्चतुर्विंशत्यधिकाष्टशतोत्तरत्रयोदशसहस्राणि भवन्ति। न्यासः—११५२+४६०८+५७६०+२३०४=१३८२४।

ये क्षपकश्रेणौ निद्राप्रचलयोरुदयं न मन्यन्ते, तेषां मतेनाऽष्टाधिकषट्चत्वारिंशच्छतं (४६०८) भङ्गा ज्ञातव्याः।

ननु के आचार्याः क्षपकश्रेणौ निद्राद्विकोदयं मन्यन्ते के पुनर्न स्वीकुर्वन्ति ? इति चेत्, उच्यते--प्राचीनकर्मस्तवकारादयस्तु क्षीणकषायद्विचरमसमयं यावदभ्युपगच्छन्ति। तथा चा-ऽत्र **प्राचीनकर्मस्तवः--"निद्दापयलाए तहा खीणदुचरिमम्मि उदयवोच्छेओ।"** एतेन सिद्धं यत्क्षपकश्रेणावपि निद्राप्रचलोदयः कर्मस्तवकारादीनां मतेन विद्यते। उक्तं च **मेरुतुङ्ग-सूरिपादैः-"अन्ये तु पुनराचार्याः क्षीणमोहद्विचरमसमयं यावदुदये दर्शनावरणस्य चतस्रःप्रकृतयः पञ्चकं वा ब्रुवते, क्षपकस्याऽपि निद्राप्रचलयोरुदयमिच्छन्तीत्यर्थः।" सप्ततिकाचूर्णिकारादयस्तु क्षपकस्य निद्राप्रचलोदयं न मन्यन्ते। यदुक्तं सप्ततिकाचूर्णौ"खवगा अच्चन्तविसुद्ध त्ति काउं तेण निद्दापयलाणं उदयओ नत्थि, अविसुद्धस्स चासंकिलिट्ठस्स वा निद्दोदओ त्ति।"** उपशमश्रेणौ तु सर्वेऽपि शास्त्रकारा निद्राप्रचलोदय-मिच्छन्ति।

न चोपशमश्रेणिं प्रतिपद्यमानः प्रतिसमयमनन्तगुणक्रमेण विशुद्ध्या प्रवर्धमानो भवति, निद्रोदयश्च चैतन्यापायकारणमस्ति, तेनोपशमश्रेणौ निद्रोदयः कथं भवति, विशिष्टचैतन्य—भावादिति वाच्यम्, यतो य उपशमश्रेणौ निद्राद्विकमध्येऽन्यतरस्या उदयः, स तत्र क्षणे सर्वा-धिव्याधिव्याधिविकल्पव्यपगमसमुद्भूताननुभूतपूर्वसमाधिविलयविशेषे सति योगनिद्रारूप एवाऽवसेयः। निद्राप्रचलोदयेऽपि परिणामविशुद्धिरिष्यते एव, अन्यथा यामद्वयशायिनामपि मुनीनामप्रमत्त—गुणस्थानका-ऽनवकाशत्वेन प्रमत्तगुणस्थानकस्याऽन्तर्मुहूर्ताभ्यधिकः कालःप्रसज्येत, न चाऽयमिष्टः, सिद्धांते प्रमत्तगुणस्थानकालस्याऽन्तर्मुहूर्तमात्रत्वप्रतिपादनात्। वैराग्यतरङ्गतरङ्गितचेतसां च निद्रोद-येऽपि तथाविधसुस्वप्नदर्शनात् विशुद्धः परिणामोऽनुभवसिद्धः। एवं ये क्षपकश्रेणौ निद्राद्विकोदयं मन्यन्ते। तेषां मते निद्राद्विकोदयो न विशुद्धपरिणामस्य प्रतिबन्धको भवति*, इति दिक्।

अत्रैकजीवमाश्रित्योत्कृष्टतश्चतुःपञ्चाशत्प्रकृतय उदयमानाः प्रोक्ताः, नानाजीवगोचरोदयमानप्र-कृतयस्तु सप्ततिर्भवन्ति। तथाहि—ज्ञानावरणपञ्चकं स्त्यानर्द्धित्रिकवर्जदर्शनावरणषट्कमन्तरायपञ्चकं

---

*उक्तं च जयधवलाकारैरपि चारित्रमोहक्षपणाऽधिकारे—"कधं पुण एदस्स खीणकसायस्स विदियसुक्कज्झाणग्गिणा घादिकम्मिंधणाणि दहमाणस्स एदम्मि अवत्थंतरे णिद्दापयलाणमुदयवोच्छेदसंभवो, झाणपरिणामविरुद्धसहावत्तादो त्ति णासंकणिज्जं, अवत्तव्वसरूवस्स, तदुदयस्स झाणोवजुत्तेसु वि संभवं पडि विरोहाभावादो।"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेदनीयद्विकं संज्वलनचतुष्कं नवनोकषाया मनुष्यायुरुच्चैर्गोत्रं चेति नामवर्जशेषकर्मणां त्रयस्त्रिंशत्प्रकृतय उदयन्ति। नामकर्मणस्तु ध्रुवोदया द्वादश मनुष्यगति-पञ्चेन्द्रियजात्यौदारिकद्विक-वज्रर्षभनाराचसंहनन-संस्थानषट्क-खगतिद्विक-पराघातोच्छ्वासोपघात-स्वरद्विक-त्रसचतुष्क-सुभगादेय-यशःकीर्तिरूपपञ्चविंशतिप्रकृतयश्चोदयन्तीति नानाजीवापेक्षया सप्ततिप्रकृतीनामुदयो भवति । न च कर्मस्तवादिग्रन्थेष्वप्रमत्तगुणस्थानके षट्सप्ततिप्रकृतीनामुदयो निगदितः,अत्र यथाप्रवृत्तकरणे सप्ततिप्रकृतीनामुदयः कथमुच्यते ? इति वाच्यम्,तत्र सप्तमगुणस्थानकमाश्रित्योक्तत्वादत्र च क्षपकश्रेणेरधिकारत्वेन प्रथमवर्जसंहननपञ्चक-सम्यक्त्वमोहनीयरूपषट्प्रकृतीनामुदयाऽसंभवात् ।

**अथोदयेन व्यवच्छिन्नाः प्रकृतय उच्यन्ते—**

नामकर्मवर्जशेषकर्मणां स्त्यानर्द्धित्रिक-मिथ्यात्व-सम्यङ्मिथ्यात्व-सम्यक्त्वमोहनीय-द्वादशकषाय-मनुष्यवर्जायुस्त्रय-नीचैर्गोत्ररूपा द्वाविंशतिः प्रकृतयो नामकर्मणश्च मनुष्यवर्जगतित्रिकानुपूर्वीचतुष्क-पञ्चेन्द्रियवर्जजातिचतुष्क-वैक्रियद्विकाऽऽहारकद्विक-प्रथमवर्जसंहननपञ्चकाऽऽतपोद्योत-स्थावर-सूक्ष्म-साधारणाऽपर्याप्त-दुर्भगाऽनादेयाऽयशःकीर्तिरूपा एकोनत्रिंशत्प्रकृतय उदयेन व्यवच्छिन्ना जाताः । केषांचिज्जन्तूनां जिननामकर्मणस्त्वनुदयो विद्यते,क्षीणकषायगुणस्थानकादूर्ध्वं तेषां तदुदयसंभवात् । उक्तं च कषायप्राभृतचूर्णौ-**"थीणगिद्धितियं मिच्छत्तसम्मत्त-सम्मामिच्छत्त-बारसकसाय-मणुसाउगवज्जाणि आउणाणि णिरयगति-तिरिक्खगइ-देवगइपाओग्गणामाओ आहारदुगं च वज्जरिसहसंघडणवज्जाणि सेसाणि संघडणाणि मणुसगइ-पाओग्गाणुपुव्वी अपज्जत्तणामं असुहतियं तित्थयरणामं च सिया,णीचागोदं एदाणि कम्माणि उदयेण वोच्छिण्णाणि"** । अत्र "णिरयगइ-तिरिक्खगइ-देवगइपाओग्गणामाओ" इत्यनेन नरकगति-तिर्यग्गति-देवगति-मनुष्यवर्जानुपूर्वीत्रिक-जातिचतुष्क-वैक्रियद्विका-ऽऽतपोद्योत-स्थावर-सूक्ष्म-साधारणप्रकृतीनां ग्रहणं कर्तव्यम् । "असुहतिगं" इत्यनेन दुर्भगानादेयायशःकीर्तीनां ग्रहणं कर्तव्यम् ।

उदीरणा तु वेदनीयद्विक-मनुष्यायुर्लक्षणप्रकृतित्रयं वर्जयित्वा शेषाणामुदयमानानां प्रकृतीनां भवति । तथा चोक्तं कषायप्राभृतचूर्णौ-**"आउगवेदणीयवज्जाणं वेदिज्जमाणाणं कम्माणं पवेसगो ।"**

**अथ स्थित्युदयोऽभिधीयते**—सर्वकर्मणामुदयप्राप्तस्यैकस्थितिस्थानकस्य तथोदीरणाकरणेन वेदनीयायुर्वर्जशेषकर्मणामुदयावलिकाया उपरितनानामन्तःसागरोपमकोटाकोटिमात्राणां स्थितीनामुदयो भवति ।

**अथानुभागोदयः प्ररूप्यते**—उदयमानानां प्रकृतीनामनुभागोऽजघन्या-ऽनुत्कृष्ट उदये वर्तते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अथ प्रदेशोदयो निरूप्यते**–उदयमानानां प्रकृतीनामजघन्यानुत्कृष्टप्रदेशोदयो भवति ।

**सम्प्रति क्रमप्राप्ता प्रकृतिसत्ताऽभिधीयते**–दर्शनसप्तक-मनुष्यायुर्वर्जशेषायुष्कत्रिक-लक्षणदशप्रकृतिवर्जशेषाऽष्टाचत्वारिंशदुत्तरशतप्रकृतयः (१४८) क्षपकश्रेणेरारोहकस्य सत्तायामुत्कृष्टतो भवन्ति । येन जीवेन जिननाम न बद्धम् , तस्य सत्तायां सप्तचत्वारिंशदुत्तरशतप्रकृतयो (१४७) भवन्ति । येन त्वाहारकसप्तकं न बद्धम् , तस्यैकचत्वारिंशदधिकशतं (१४१) प्रकृतयः सत्तायां भवन्ति । येन त्वाहारकसप्तकजिननामरूपाऽष्टप्रकृतयो न बद्धाः, तस्य चत्वारिंशदुत्तरशतप्रकृतयः (१४०) सत्तायां भवन्ति । इत्थं यथाप्रवृत्तकरणे चत्वारि सत्तास्थानानि ।

**अथ स्थितिसत्ता भण्यते**–मनुष्यायुर्वर्जानां शेषकर्मणां स्थितिसत्ताऽन्तःसागरोपमकोटीकोटीप्रमाणा । **अथ रससत्ता निगद्यते**–अशुभानां कर्मणां द्विस्थानकरससत्ता, शुभानां च चतुःस्थानकरससत्ता भवति । **अथ प्रदेशसत्ता प्रतिपाद्यते**–सर्वप्रकृतीनामजघन्यानुत्कृष्टप्रदेशसत्ता ।

संख्येयेषु स्थितिबन्धेषु गतेष्वन्तर्मुहूर्तप्रमाणं यथाप्रवृत्तकरणं परिसमापयति ॥१०॥

**"यथोद्देशं निर्देशः"** इति न्यायाद् यथाप्रवृत्तकरणमभिधाय द्वितीयाधिकारमपूर्वकरणं प्रतिपादयितुमनाः प्राह—

**सेकाले कुणइ अपुव्वकरणमेअम्मि होअइ विसोही ।**
**गोमुत्तिकमेण जहण्णा उक्कोसा अणन्तगुणा ॥११॥**

अनन्तरकाले करोत्यपूर्वकरणमेतस्मिन् भवति विशोधिः ।
गोमूत्रिकाक्रमेण जघन्योत्कृष्टाऽनन्तगुणा ॥११॥ इति पदसंस्कारः

'सेकाले' इत्यादि, सेशब्दो मगधदेशप्रसिद्धोऽथार्थकः, अथशब्दश्चात्राऽनन्तरार्थको बोध्यः, **'मङ्गला-ऽनन्तरारम्भ-प्रश्न-कार्त्स्न्येष्वथो अथ ।"** इत्यमरकोशवचनात् । एवमग्रेऽपि यथास्थानं व्याख्येयम् । 'अनन्तरकाले' यथाप्रवृत्तकरणचरमसमयादनन्तरसमये 'अपूर्वकरणं' संसारेऽप्राप्तपूर्वत्वाद् अपूर्वकरणव्यपदेशार्हं करणं 'करोति' विदधाति । यदुक्तं **तत्त्वार्थसूत्रवृत्तौ**–

**"स ततः क्षपकश्रेणिं प्रतिपद्य चरित्रघातिनीः शेषाः ।**
**क्षपयन् मोहप्रकृतीः प्रतिष्ठते शुक्ललेश्याकः ॥१॥**
**प्रविशत्यपूर्वकरणं प्रस्थित एवं ततोऽपरं स्थानम् ।**
**तदपूर्वकरणमिष्टं कदाचिदप्राप्तपूर्वत्वात् ॥२॥" इति ।**

अपूर्वाणि करणानि=स्थितिघातादीनां निर्वर्तनादीनि यत्रेति व्युत्पत्तिस्त्वनन्तरगाथया मूल एव दर्शयिष्यते ।

अथाऽपूर्वकरणे विशोधिं प्राह-**एअम्मि**' इत्यादि, 'एतस्मिन्' अपूर्वकरणे 'विशोधिः' विशुद्धिः **'गोमूत्रिकाक्रमेण'** गोमूत्रधारासदृशक्रमेण जघन्योत्कृष्टा चाऽनन्तगुणा भवतीत्युपस्कारः । अयं भावः—इहाऽपूर्वकरणस्य प्रथमसमयेऽसंख्येयलोकाकाशप्रदेशराशिमात्राण्यध्यवसायस्थानानि

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

भवन्ति, द्वितीयसमये तदन्यानि विशेषाधिकानि भवन्ति, ततोऽपि तृतीयसमये विशेषाधिकानि, एवं तावद्वाच्यानि, यावदपूर्वकरणचरमसमयः । एतानि स्थाप्यमानानि विषमचतुरस्रक्षेत्रमभिव्याप्नुवन्ति । ननु द्वितीयादिसमयेष्वध्यवसायानां वृद्धौ किं कारणम् ? इति चेत् , उच्यते-प्रतिसमयं विशुद्धयन्तः खल्विह प्रतिपत्तारः स्वभावत एव बहुशो विभिन्नेष्वध्यवसायस्थानेषु वर्तन्ते । अत्र यथाप्रवृत्तकरणचरमसमयभाग्युत्कृष्टविशोधितोऽपूर्वकरणप्रथमसमये जघन्यविशोधिरनन्तगुणा । ततस्तस्मिन्नेव समय उत्कृष्टा विशोधिरनन्तगुणाः । ततोऽप्यपूर्वकरणस्य द्वितीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि तस्मिन्नेव समय उत्कृष्टा विशोधिरनन्तगुणा, एवंक्रमेण तावद् वाच्या, यावदपूर्वकरणचरमसमयः । अयं क्रमो गोमूत्रिकोपमया दर्शितः । तथाहि—गौः=बलिवर्दः, तस्याध्वनि गच्छतो वक्रतयेतस्ततः पतिता मूत्रधारा गोमूत्रिका भण्यते, यथा गोमूत्रिका वामभागतो दक्षिणभागे दक्षिणभागतश्च वामभागे वक्राकारेणाऽऽस्ते, तथैव जघन्यविशोधित उत्कृष्टविशोधिरुत्कृष्टविशोधितश्चाऽनन्तरसमयभाविजघन्यविशोधिरनन्तगुणक्रमेण तिष्ठति । तेनायं क्रमो गोमूत्रिकोपमया दर्शितः ।

इहाऽपूर्वकरणेऽपि यथाप्रवृत्तकरणवत् प्रतिसमयमूर्ध्वमुखी विशुद्धिरनन्तगुणा, तिर्यङ्मुखी च षट्स्थानपतिता भवति । नवरमूर्ध्वमुखी विशुद्धिर्नानाजीवापेक्षयाऽपि प्रतिसमयमनन्तगुणा भवति ॥११॥

सम्प्रत्यपूर्वकरणं नाम सान्वर्थमिति व्युत्पिपादयिषुराह—

**बीयकरणपढमसमयओ ठिइघाओ सुहासुहाण तहा ।**
**गुणसंकमो असुहपयडीणं अणुभागघाओ य ॥१२॥**
**अण्णो य ट्ठिइबंधो गुणसेढि त्ति अहिगारपंचतयं ।**
**जुगवं पयट्टइ तओ णाम अपुव्वकरणं अत्थि ॥१३॥**

द्वितीयकरणप्रथमसमयतः स्थितिघातः शुभाऽशुभानां तथा ।
गुणसंक्रमोऽशुभप्रकृतीनामनुभागघातश्च ॥ १२ ॥
अन्यश्च स्थितिबन्धो गुणश्रेणिरित्यधिकारपञ्चतयम् ।
युगपत्प्रवर्तते ततो नामाऽपूर्वकरणमस्ति ॥ १३ ॥ इति पदसंस्कारः ।

**'बीय०'** इत्यादि, 'द्वितीयकरणप्रथमसमयतः' अपूर्वकरणप्रथमसमयादारभ्य 'शुभाशुभानां' शुभानाम्=आयुर्वर्जसातवेदनीयादीनाम् अशुभानां=मतिज्ञानावरणादीनां 'स्थितिघातः' स्थितेः=अन्त्यन्तर्मुहूर्तं पल्योपमसंख्येयभागप्रमाणस्थित्या घातः=अपवर्तनाकरणेनाऽल्पीकरणम् , **'तहा'** इत्यादि 'तथा' तथाशब्दः समुच्चये, अशुभप्रकृतीनाम्—अबध्यमानानामप्रत्याख्यानावरणादिप्रकृतीनां 'गुणसङ्क्रमः' गुणेन=प्रतिसमयमसंख्येयगुणकारेण सङ्क्रमः=अन्यरूपेण परिणमनम् , **'अणुभागविघाओ य'** त्ति, **घण्टालालान्यायेन** 'असुहपयडीणं'ति पदमत्राऽपि सम्बध्यते । ततश्चाऽयमर्थः—अशुभप्रकृतीनां=मतिज्ञानावरणादीनां 'अनुभागघातश्च' अनुभागस्य=बह्वनन्तभागप्रमाणस्य रसस्य 'घातः' खण्डनम् , चकारः समुच्चये, एवमग्रेऽपि । **'अण्णो'** इत्यादि, 'अन्यश्च स्थितिबन्धः' अन्यो=यथा—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवृत्तकरणस्य चरमस्थितिबन्धतः पल्योपमसंख्येयभागहीन इतरोऽभिनवः स्थितिबन्धः,चकारः समुच्चये, 'गुणसेढी' त्ति 'गुणश्रेणिः' गुणेन-प्रतिसमयमसंख्येयगुणक्रमेण दलिकं गृहीत्वाऽन्तर्मुहूर्तमात्रनिषेकाणामुदयनिषेकादारभ्य प्रतिनिषेकेऽसंख्येयगुणकारेण श्रेणिः-दलरचना, इतिशब्द इयत्ताऽवधारणार्थकः, 'अधिकारपञ्चतयं' स्थितिघातगुणसंक्रमरसघाताऽपूर्वस्थितिबन्धगुणश्रेणिरूपं युगपत्प्रवर्तते । तत्र पञ्चाऽवयवा अस्य समुदायस्येति पञ्चतयम्, "अवयवात् तयट्" ( सिद्धहेम० ७-१-१५१ ) इति सूत्रेण तद्धिततयट्प्रत्ययः, अधिकाराणां पञ्चतयमिति षष्ठीतत्पुरुषसमासः, पञ्चानामधिकाराणां समुदाय इत्यर्थः । न चाऽत्रा-ऽधिकारशब्दस्य पञ्चशब्दस्य चा-ऽभेदान्वये पञ्चशब्दस्या-ऽधिकारशब्दसापेक्षत्वेना-ऽसामर्थ्यात्तद्धिता-ऽनुपपत्तिः, **"सापेक्षमसमर्थम्"** इति वचनादिति वाच्यम्, यतः पञ्चाऽवयवा अस्य समुदायस्येति पञ्चतयमिति प्रथमं व्युत्पाद्य पञ्चशब्दस्याधिकारशब्दमनपेक्ष्यैव समुदायेऽन्वयान्नास्त्यसामर्थ्यम् । पश्चाच्चा-ऽधिकाराणां पञ्चतयमित्यधिकारशब्दः समुदायेऽन्वेति, तस्य प्रत्ययार्थतया प्रधानत्वात् । न त्वधिकारशब्दस्य पञ्चतयशब्दैकदेशभूतपञ्चशब्देना-ऽभेदान्वयः**"पदार्थः पदार्थेनाऽन्वेति न तु तदेकदेशेन"**, इति न्यायात् । ततश्चाऽधिकारशब्दपञ्चशब्दयोः परस्परवार्ताऽनभिज्ञयोरेव शब्दमर्यादया समुदायेऽन्वये सति पश्चात् संख्यायाः परिच्छेदकत्वस्वभावतया पञ्चत्वस्य परिच्छेद्यपर्यालोचनायां प्रत्यासत्त्याऽधिकारा एव परिच्छेद्यतया सम्बध्यन्ते-पञ्चानामधिकाराणां समुदाय इति ।

"**तओ**" इत्यादि, 'ततः' अधिकारपञ्चतयस्य युगपत्प्रवर्तनाद् अपूर्वकरणं नाम 'अस्ति' भवति, अपूर्वाणि-अभिनवानि करणानि-स्थितिघातरसघातगुणसंक्रमगुणश्रेणिस्थितिबन्धानां निर्वर्तनानि यस्मिन् तदपूर्वकरणमिति व्युत्पत्तेरित्यर्थः ॥१२-१३॥

अपूर्वकरणं व्युत्पाद्य तत्र प्रवर्तमानस्थितिघाताऽऽदीनां स्वरूपं व्याजिहीर्षुरादौ स्थितिघातस्य स्वरूपं प्रकटयति—

**उक्कोसं ठिइखण्डं वि पल्लसंखेज्जभागमाणं खु ।**
**खंडइ अवरत्तो संखेज्जगुणं जाव तक्करणं ॥१४॥**

उत्कृष्टं स्थितिखण्डमपि पल्यसंख्येयभागमानं खलु ।
खण्डयत्यपरस्मात् संख्येयगुणं यावत् तत्करणम् ॥ १४ ॥ इति पदसंस्कारः ।

स्थितिघातो नाम स्थितिसत्कर्मणोऽग्रिमभागात् स्थितिं घातयति । तत्र जघन्यतः पल्योपमसंख्येयभागमात्रं स्थितिखण्डं प्रत्यन्तर्मुहूर्तं विघातयति । प्रथमौपशमिकसम्यक्त्वोत्पाद-देशविरति-सर्वविरत्यनन्तानुबन्धिविसंयोजना-दर्शनत्रिकक्षपणाप्रभृतिषूत्कृष्टतः स्थितिखण्डं सागरोपमपृथ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्त्वप्रमितं भवति । इह चारित्रमोहनीयक्षपणायां कियद्भवतीति शङ्कापरिहारार्थमाह—"**उक्कोसं**" इत्यादि, उत्कृष्टमपि अपिशब्दस्य भिन्नक्रमत्वेनाऽत्र योजनात्, स्थितिखण्डं पल्यसंख्येयभागमानं खलु 'खण्डयति' विघातयति, दर्शनत्रिकक्षपणायां घातितावशेषस्थितिसत्कर्मणः सागरोपमपृथक्त्वप्रमाणखण्डा-ऽनर्हत्वात् क्षीणसप्तकस्य स्थितिसत्कर्मणो वृद्धेरसंभवाच्च । उक्तं च **कषायप्राभृतचूर्णौ**–"**जहा दंसणमोहणीयस्स उवसामणाए च दंसणमोहणीयस्स खवणाए च कसायाणमुवसामणाए च एदेसिं तिण्हं आवासयाणं जाणि अपुव्वकरणाणि तेसु अपुव्वकरणेसु पढमट्ठिदिखंडयं जहण्णयं पलिदोवमस्स संखेज्जदिभागो उक्कस्सयं सागरोवमपुधत्तं, एत्थ पुण कसायाणं खवणाए जं अपुव्वकरणं तम्हि अपुव्वकरणे पढमट्ठिदिखंडयं जहण्णयं पि उक्कस्सयं पि पलिदोवमस्स संखेज्जदिभागो ।**"

ननूत्कृष्टं स्थितिखण्डं पल्योपमसंख्येयभागमात्रं भवदपि जघन्यतः कियद्गुणं भवति ? इत्यत आह—'**अवरत्तो**' इत्यादि, 'अपरस्मात्' जघन्यस्थितिखण्डात् संख्येयगुणमुत्कृष्टस्थितिखण्डं भवति । ननु जघन्यस्थितिखण्डतः उत्कृष्टस्थितिखण्डं संख्येयगुणं कियन्तं कालं भवति ? इत्यतः प्राह–'**जाव**' इत्यादि, यावत् 'तत्करणम्' अपूर्वकरणम्, अपूर्वकरणे प्रथमस्थितिखण्डादारभ्य चरमस्थितिखण्डं यावत् जघन्यस्थितिखण्डत उत्कृष्टस्थितिखण्डं संख्येयगुणं भवतीत्यर्थः ।

जघन्यस्थितिखण्डं कस्य जन्तोर्भवति, उत्कृष्टं पुनः कस्य भवतीति जिज्ञासानोदिता वयमभिदध्महे—

एको जन्तुर्दर्शनमोहनीयं क्षपयित्वा यथासंभवं कालान्तरे उपशमश्रेणिमारोहति, तदानीमेवा-ऽन्योऽक्षपितदर्शनमोहनीय उपशमश्रेणिं प्रतिपद्यते । तत उभौ पततः । पतित्वा च द्वितीयो जन्तुर्दर्शनत्रिकं क्षपयति । तदनन्तरमुभौ जन्तू युगपत् चारित्रमोहक्षपणामुपक्रमेते । तत्रा-ऽपूर्वकरणे प्रथमजन्तोः स्थितिसत्त्वं द्वितीयजन्तुतः संख्येयगुणं भवति, यत उपशमश्रेणौ उभयोः स्थितिसत्त्वं मिथः सदृशं जातम् । ततः पुनर्दर्शनत्रिकक्षपणा-ऽपूर्वकरणे द्वितीयजन्तुना स्वस्थितिसत्त्वं संख्येयगुणहीनं क्रियते, प्रथमजन्तुना तु स्वस्थितिसत्त्वं संख्येयगुणहीनं न निर्वर्त्यते, उपशमश्रेण्यारोहणतः प्राग् दर्शनत्रिकस्य क्षपितत्वात् । इत्थं द्वितीयपुरुषतो प्रथमपुरुषस्य स्थितिसत्त्वं संख्येयगुणं भवति । एवं प्रकारान्तरेणाऽपि संख्यातगुणं स्थितिसत्त्वं भावनीयम् । स्थितिखण्डस्य च स्थितिसत्त्वानुसारित्वादपूर्वकरणे द्वितीयपुरुषस्य प्रथमस्थितिखण्डतः प्रथमपुरुषस्य प्रथमस्थितिखण्डं संख्येयगुणं सिध्यति । एवमेव द्वितीयपुरुषस्य द्वितीयखण्डतः प्रथमपुरुषस्य द्वितीयखण्डं संख्येयगुणं भवति, एवं तावद्वाच्यम्, यावदपूर्वकरणस्य चरमस्थितिखण्डम् । उक्तं च **कषायप्राभृतचूर्णौ**—"**दो कसायक्खवगा अपुव्वकरणं**

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**समगं पविट्ठा, एक्कस्स पुण ट्ठिदिसंतकम्मं संखेज्जगुणं एक्कस्य ट्ठिदिसंतकम्मं संखेज्ज-गुणहीणं, जस्स संखेज्जगुणहीणं ट्ठिदिसंतकम्मं तस्स ट्ठिदिखंडयादो पढमादो संखेज्ज-गुणट्ठिदिसंतकम्मियस्स ठिदिखंडयं पढमं संखेज्जगुणं, विदियादो विदियं संखेज्ज-गुणं, एवं तदियादो तदियं, एदेण कमेण सव्वम्हि अपुव्वकरणे जाव चरिमादो ठिदिखंडयादो त्ति तदिमादो तदिमं संखेज्जगुणं।"**

अपूर्वकरणप्रथमसमयात्प्रभृति प्रतिसमयं पल्योपमसंख्येयभागप्रमाणस्थितिखण्डतो दलिक-मुत्किरति, उत्कीर्य चा-ऽधस्तात् प्रक्षिपति। एवं स्थितिघाताद्धाया द्विचरमसमयं यावत् पल्योपम-संख्येयभागप्रमाणां स्थितिं दलिकापेक्षया तन्वीं करोति, चरमसमये तु तद्गतशेषसर्वदलं गृहीत्वा-ऽधस्तात् प्रक्षिपति, तेन तदानीं सत्तायां पल्योपमसंख्येयभागेन स्थितिन्यूना भवति। स्थितिघा-ताद्धा चा-ऽन्तमुहूर्तप्रमाणा भवति। प्रथमस्थितिघाते पूर्णे पुनः पल्योपमसंख्येयभागमात्रं द्वितीयं स्थितिखण्डमुत्करितुमारभते, अन्तमुहूर्तप्रमाणस्थितिघाताद्धाया द्विचरमसमयं यावत् स्थितिखण्ड-गतां स्थितिं प्रदेशापेक्षया तन्वीं करोति, चरमसमये तु तद्गतं शेषं सर्वं प्रदेशाग्रमुत्कीर्या-ऽधस्तात् प्रक्षिपति, तेन तदानीं सत्कर्मणि पुनः पल्योपमसंख्येयभागेन स्थितिहीना भवति। इत्थं द्वितीय-स्थितिघातः पूर्णो भवति। एवंक्रमेण संख्यातसहस्रेषु स्थितिघातेषु गतेष्वपूर्वकरणं परिसमाप्तिं याति। (पश्यन्तु यन्त्रकम्–१)

स्थितिघातस्य विशेषस्वरूपं तु कर्मप्रकृतिग्रन्थे उपशमनकरणगतसम्यक्त्वोत्पादटीकायां निरूपितम्, विशेषार्थिना ततो-ऽवसेयम् ॥१४॥

सम्प्रति गुणसंक्रमं निगदितुकाम आह—

## असुहपयडीण-ऽसंखगुणं दलिअं खिवइ अन्नासु।
## बंधंतासु सपयडीसु अणुखणं स गुणसंकमो णेयो ॥१५॥ (उद्गीतिः)

अशुभप्रकृतीनामसंख्यगुणं दलिकं क्षिपत्यन्यासु।
बध्यमानासु स्वप्रकृतिष्वनुक्षणं स गुणसंक्रमो ज्ञेयः॥ १५ ॥ इति पदसंस्कारः।

'असुह०' इत्यादि, अपूर्वकरणप्रथमसमयात्प्रभृति 'अशुभप्रकृतीनाम्' **"व्याख्यानतो विशेषप्रतिपत्तिः"** इति न्यायाद् अबध्यमानानामशुभप्रकृतीनामप्रत्याख्यानावरणादिरूपाणां 'दलिकं' प्रदेशाग्रम् 'अनुक्षणं' प्रतिसमयम् 'असंख्यगुणम्' असंख्यातगुणं येन संक्रमेण यत्तदोः सापेक्षत्वादुत्तरत्र तत्पदोपादानदर्शनाद् यत्पदोपादानम्, बध्यमानासु 'अन्यासु' परासु 'स्वप्रकृतिषु' स्वजातीयप्रकृतिषु 'क्षिपति' संक्रमयति, स गुणसंक्रमो 'ज्ञेयः' बोद्धव्यः। यदुक्तं **कषायप्राभृत-**

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

चूर्णौ–"जे अपसत्थकम्मंसा ण बज्झंति तेसिं कम्माणं गुणसंकमो जादो।" अयं भावः गुणसंक्रमेणा-ऽपूर्वकरणप्रथमसमये बध्यमानासु परप्रकृतिष्वबध्यमाना-ऽशुभप्रकृतीनां यावत् प्रदेशाग्रं संक्रमयति, ततो द्वितीयसमयेऽसंख्येयगुणं संक्रमयति, ततोऽपि तृतीयसमयेऽसंख्येयगुणम्। एवमग्रेतनेष्वपि समयेषु वक्तव्यम् ॥ १५ ॥

गुणसंक्रममभिधाय रसघातं व्याख्यातुकाम आह—

**खंडइ अणंतभागा रसस्स णत्थि च सुहाण रसघाओ।**
**एक्केक्कम्मि ठिइविघाये रसघाया सहस्साइं ॥ १६ ॥**

खण्डयत्यनन्तभागान् रसस्य नास्ति च शुभानां रसघातः।
एकैकस्मिन् स्थितिविघाते रसघाताः सहस्राणि ॥ १६ ॥ इति पदसंस्कारः।

'खंडइ' इत्यादि, तत्र 'रसस्य' शुभप्रकृतीनां प्रतिषेधस्य वक्ष्यमाणत्वात् सामर्थ्यात् सत्तागता-ऽशुभप्रकृतीनामनुभागस्य 'अनन्तभागान्' अनन्तबहुभागान् 'खण्डयति' रसघाताद्धया विघातयति। उक्तं च **कषायप्राभृतचूर्णौ**—**"अणुभागखंडयं च आगाइदं, तं पुण अप्पसत्थाणं कम्माणमणंता भागा।"** इदमत्र हृदयम्–रसघाताद्धाऽन्तर्मुहूर्तमात्रा भवति। एकस्यां रसघाताद्धायां सत्तागता-ऽनुभागस्या-ऽनन्ता बहुभागा विनाश्यन्ते,एकश्चाऽनन्ततमभागः सत्कर्मणि विमुच्यते। एवं प्रतिरसघाताद्धमनन्तबहुभागान् घातयित्वैकभागं परित्यज्य प्रत्यन्तर्मुहूर्तमनुभागसत्त्वमनन्तगुणहीनं करोति। अशुभानां प्रकृतीनामेव रसघातो भवति, अतः शुभानां रसघातनिषेधाय भणति—'णत्थि' इत्यादि, 'नास्ति' न भवति च 'शुभानां' सातवेदनीयादीनां रसघातः। 'एकैकस्मिन्'-एकस्मिन् एकस्मिन् **"वीप्सायाम्"** (सिद्धहेम० ७–४–८०) इति द्विरुक्त एकशब्दः। **"प्लुप् चादावेकस्य स्यादेः"** (सिद्धहेम०७–४–८१) इति द्विरुक्तस्यैकशब्दस्य स्यादेर्लुप् भवति, प्रत्येकस्मिन्नित्यर्थः, स्थितिघाते रसघाताः सहस्राणि भवन्तीति शेषः। अयं भावः—स्थितिघातेन सहैव रसघातः प्रारभ्यते, तन्निष्ठा तु स्थितिघाततः प्रागेव भवति, एकस्मिन् स्थितिघाते रसघातसहस्राणां दर्शनात्। यदा पुनरभिनवः स्थितिघातः प्रारभ्यते, तदा रसघातोऽपि प्रारभ्यते।

अपूर्वकरणाद्धायां स्थितिघातानां सहस्रत्वप्रतिपादनाद्रसघाता अपि सहस्राणि गच्छन्ति ॥१६॥

अथाभिनवस्थितिबन्धं व्याचिख्यासुराह—

**बंधो अंतोकोडाकोडी सत्ताउ संखगुणहीणो।**

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

## अपूर्वकरणे चित्रेण प्रदर्श्यमानः स्थितिघातः (गाथा-१४)




अपूर्वकरणप्रथमसमये अन्तःसागरोपमकोटीकोटीप्रमाणं स्थितिसत्कर्म जघन्यं स्थितिखण्डं पल्योपमसंख्येयभागमात्रम्, ततः संख्येयगुणमुत्कृष्टं स्थितिखण्डम्, तदपि पल्योपमसंख्येयभागप्रमाणम् ।



स्थितिघाताद्धाद्विचरमसमयं यावत् पल्योपमसंख्येयभागप्रमाणा स्थितिर्दलिकापेक्षया तन्वी भवति ।



स्थितिघाताद्धाचरमसमये तत्स्थितिखण्डगतसर्वदलिकानि गृहीत्वाऽधस्तात् प्रक्षिपति, तेन तदानीं स्थितिसत्ता पल्योपमसंख्येयभागेन न्यूना भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अपूर्वकरणे चित्रेण प्रदर्श्यमानः स्थितिबन्धः

अपूर्वकरणे प्रथमस्थितिबन्धः




अपूर्वकरणे प्रथमस्थितिबन्धाद्धायां पूर्णायां द्वितीय-स्थितिबन्धः प्रथमस्थितिबन्धापेक्षया पल्योपम-संख्येयभागेन न्यूनो भवति, एवमग्रेऽपि ।




Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

यन्त्रकम्–५ ( चित्रम्–५ ) ।

अपूर्वकरणप्रथमसमयेऽनुसमय उदयवतीनां प्रकृतीनां गुणश्रेणिः




यन्त्रकम्–६ ( चित्रम्–६ ) 

अपूर्वकरणद्वितीयसमयेऽनुदयवतीनां प्रकृतीनां गुणश्रेणिः




उदयेनैकनिषेकः क्षीणः ।

•••• अनेन चिह्नेन दीयमानं दलं सूचितम् ।

०००० अनेन चिह्नेन दीयमानदलिकतो व्यतिरिक्तं सत्तागतं दलं सूचितम् ।

उ= उदयावलिका ।

क= अपूर्वकरणप्रथमसमय उदयावलिकाया उपरितनः प्रथमो निषेक आसीत्, सोऽधुना चोदयावलिकायां प्रविष्टः । तस्मिंश्च यद् दलमपूर्वकरणप्रथमसमये प्रक्षिप्तम्, तद् * अनेन चिह्नेन सूचितम् ।

दशसंख्या त्वत्राऽसंख्येयत्वेन परिकल्पिता । तेनोत्तरोत्तरगुणश्रेणिनिषेके दशगुणक्रमेण दीयमानानि दलिकानि चित्रे दर्शितानि, वस्तुतस्त्वसंख्येयगुणक्रमेण दर्शयितव्यानि ।

गुणश्रेण्या उपरि प्रथमनिषेकेऽसंख्येयगुणहीनं दलं दीयते, ततः परं सर्वत्र विशेषहीनक्रमेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपूर्वकरणप्रथमसमय उदयवतीनां प्रकृतीनां गुणश्रेणिः अपूर्वकरणद्वितीयसमय उदयवतीनां प्रकृतीनां गुणश्रेणिः

गुणश्रेण्यायामः; स च करणद्वयकालतो विशेषाधिकः । तत्र चासंख्येयगुणक्रमेण दलिकप्रक्षेपः ।

गुणश्रेणेरुपरितनेषु निषेकेषु दलिकनिक्षेपः



गुणश्रेण्यायामः; स च प्रथमसमयापेक्षयैकसमयेन हीनः; तत्र चासंख्येयगुणक्रमेण दलिकप्रक्षेपः

गुणश्रेणेरुपरितनेषु निषेकेषु दलिकनिक्षेपः



सङ्केतविवरणम्—

(१) ००० एभिः शून्यैर्गुणश्रेणितः प्राग् निषेकरचना सूचिता ।

(२) ·······एतैर्बिन्दुभिरपूर्वकरणप्रथमसमये दीयमानं दलं सूचितम् ।

(३) दशसंख्या-ऽत्राऽसंख्येयत्वेन कल्पिता, तेन गुणश्रेण्यामुत्तरोत्तरनिषेके दशगुणं दलं दीयते, वस्तुतस्त्वसंख्येयगुणं दलं दीयते । गुणश्रेणिचरमनिषेकतोऽसंख्येयगुणहीनं दलं तदुपरितने निषेके प्रक्षिपति, ततः सर्वत्र विशेषहीनक्रमेण तावत् प्रक्षिपति, यावदतीत्थापनाऽप्राप्ता भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूण्णे ठिइबंधे अण्णो होज्जइ पल्लसंखभागोणो ॥१७॥ (गीतिः)

बन्धोऽन्तःकोटिकोटि सत्तायाः संख्यगुणहीनः ।
पूर्णे स्थितिबन्धोऽन्यो भवति पल्यसंख्यभागोनः ॥१७॥ इति पदसंस्कारः ।

'बंधो' इत्यादि, अपूर्वकरणप्रथमसमये 'बन्ध': स्थितिबन्धः 'अन्तःकोटिकोटि' अन्तः-सागरोपमकोटिकोटिप्रमाणः सागरोपमकोटिशतसहस्रपृथक्त्वमात्र इत्यर्थः । ननु तदानीं स्थिति-सत्त्वमप्यन्तःसागरोपमकोटिकोटिमितं भवति, द्वाविंशतितमगाथायां तत्प्रतिपादनदर्शनात्, तर्हि किं स्थितिबन्धस्थितिसत्त्वयोस्तुल्यत्वम्, उत वैषम्यमिति शंकापरिहारार्थमाह–'सत्ताउ' इत्यादि, 'सत्तायाः' स्थितिसत्कर्मतः संख्यगुणहीनः स्थितिबन्धो भवति, न तुल्यः । उक्तं च कषायप्राभृतचूर्णौ-"तदो ठिदिसंतकम्मं ठिदिबंधो च सागरोवमकोडिसदसहस्सपुधत्तमंतोकोडाकोडीए बंधादो पुण संतकम्मं संखेज्जगुणं ।" कषायप्राभृतचूर्णौ स्थितिबन्धतः स्थितिसत्त्वस्य संख्येयगुणत्वप्रतिपादनात् स्थितिसत्त्वतः स्थितिबन्धः संख्येयगुणहीनः सिध्यति । अपूर्वकरण-प्रथमसमये प्रारब्धः स्थितिबन्धोऽन्तर्मुहूर्तं यावत्प्रवर्तते । प्रथमस्थितिबन्धे पूर्णे यो विशेषस्तं दर्शयति–'पूण्णे' इत्यादि, 'पूर्णे स्थितिबन्धे' प्रथमस्थितिबन्धे निष्ठिते 'अन्यः' द्वितीयः 'पल्य-संख्यभागोनः' पल्यस्य-पल्योपमस्य संख्यभागः–संख्यातभागः, तेन ऊनः–हीनः, "ऊनार्थ-पूर्वाद्यैः" ( सिद्धहेम० ३–१–६७ ) इति तृतीयातत्पुरुषसमासः, स्थितिबन्धो 'भवति' जायते । उपलक्षणमेतद्, तेन द्वितीयस्थितिबन्धे पूर्णे तृतीयस्थितिबन्धः पूर्वतः पल्योपमसंख्येयभागेन हीनः प्रारभ्यते । एवंक्रमेण पूर्वपूर्वतः पल्योपमसंख्येयभागेन हीनो हीनतरः स्थितिबन्धो जायते । स्थितिबन्धाद्धा स्थितिघाताद्धया तुल्या भवति, तेन स्थितिबन्धः स्थितिघातश्च युगपदारभ्येते युगपन्निष्ठां च यातः । अपूर्वकरणे स्थितिघातानां संख्येयत्वोपलम्भात् स्थितिबन्धा अपि संख्येया व्रजन्ति । ( पश्यन्तु यन्त्रकम्–२ ) ॥ १७ ॥

अथ गुणश्रेणिं विवर्णयिषुराह—

गुणसेढीए आयामो हवए करणदुगऽहिओ गलिओ ।
खिवइ दलं कमसो घेत्तूण-ऽणुसमयं असंखगुणणाए ॥१८॥ (गीतिः)

गुणश्रेणेरायामो भवति करणद्विकाऽधिको गलितः ।
क्षिपति दलं क्रमशो गृहीत्वा-ऽनुसमयमसंख्यगुणनया ॥१८॥ इति पदसंस्कारः ।

अपूर्वकरणप्रथमसमयादेवायुर्वर्जसप्तकर्मणां गुणश्रेणिः प्रवर्तते । तत्र गुणश्रेणिनिक्षेपः कियान् भवतीत्यत आह–'गुणसेढीए' इत्यादि, गुणश्रेणेः 'आयामः' उदयसमयप्रभृतिगुणश्रेणिशिरःपर्यन्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सानिषेकरूपः 'करणद्विकाऽधिकः' करणद्विकेन-अपूर्वकरणानिवृत्तिकरणाभ्यामधिको* भवति। उक्तं च कषायप्राभृतचूर्णौ-"अपुव्वकरणद्धादो अणियट्टिकरणद्धादो च विसेसुत्तर-कालो।" स चाऽऽयामोऽन्तर्मुहूर्तमात्रो भवन्नपि 'गलितः' गलितावशेषमात्रो ज्ञातव्यः, पूर्वपूर्वसमये क्षीणे शेषेषु शेषेषु समयेषु दलिकनिक्षेपो भवतीत्यर्थः। ननु निरुक्तगुणश्रेण्यायामे केन क्रमेण दलिकं गृहीत्वा प्रक्षिपति ? इत्यत आह—'खिवइ' इत्यादि, 'असंखगुणणाए' इति पदं ग्रहण-क्रियायां प्रक्षेपक्रियायां चोभयत्राऽन्वेति। 'असंख्यगुणनया' असंख्येयगुणकारेण 'अनुसमयं' प्रतिसमयं दलं 'गृहीत्वा' आदायाऽसंख्येयगुणकारेण 'क्षिपति' निक्षिपति। इदमत्र हृदयम्—अपूर्व-करणप्रथमसमयादुदयमानप्रकृतीनां सत्तागतप्रदेशतो दलं गृहीत्वा नव्यशतककारादीनां मतेनोदय-समयादारभ्या-ऽन्तर्मुहूर्तमात्रा-ऽऽयामे-ऽसंख्येयगुणकारेण दलं रचयति। तथा चा-ऽत्र नव्यश-तकम्-"कथंपुनर्दलरचना ? कस्माच्चारभ्य केन च गुणकारेण विधीयते जन्तुनेत्याह-अनुसमयं समयं समयमनुलक्षीकृत्य प्रतिसमयमित्यर्थः। उदयादुदयक्षणादार-भ्याऽसंख्येयगुणनयाऽसंख्यातगुणकारेण।" कषायप्राभृतचूर्णिकारादीनामभिप्रायेण तूदयावलिकाया उपरितननिषेकादारभ्या-ऽन्तर्मुहूर्तप्रमाणे आयामे गुणश्रेणिं करोति, असंख्येय-गुणकारेण दलं रचयतीत्यर्थः। तथा च तद्ग्रन्थः-"गुणसेढी उदयावलियबाहिरे णिक्खित्ता।"

भावार्थः पुनरयम्—अपूर्वकरणप्रथमसमये दलिकमुत्कीर्य गुणश्रेण्यायामगतोत्तरोत्तरनिषे-केऽसंख्येयगुणक्रमेण तावत् प्रक्षिपति, यावद् गुणश्रेण्यायामसत्कचरमनिषेकः। तदनन्तरोपरित-ननिषेके-ऽसंख्येयगुणहीनं दलिकं निक्षिप्योपरि विशेषहीनक्रमेण तावत् प्रक्षिपति, यावदती-त्थापना-ऽप्राप्ता भवति। पुनर्द्वितीयसमये प्राक्तनसमयगृहीतदलतो-ऽसंख्येयगुणदलमादाय प्रथम-समयत एकसमयोनप्राक्तनगुणश्रेण्यायामे उत्तरोत्तरनिषेके-ऽसंख्येयगुणक्रमेण तावत् प्रक्षिपति, यावद् गुणश्रेण्यायामसत्कचरमनिषेकः, एकसमयस्योदयेन वेदितत्वात्। तदनन्तरोपरित-ननिषेके तु गुणश्रेण्यायामचरमनिषेकतो-ऽसंख्येयगुणहीनं दलिकं निक्षिपति, तत ऊर्ध्वं विशेष-हीनक्रमेण प्रक्षिपति। एवमुत्तरोत्तरसमये पूर्वपूर्वतो-ऽसंख्येयगुणं दलमादाय गलिता-ऽवशेषमात्रे गुणश्रेण्यायामे-ऽसंख्येयगुणक्रमेण निक्षिपति।

अनुदयवतीनां प्रकृतीनां पुनर्गुणश्रेणिरुभयेषां मतेनोदयावलिकाया उपरितननिषेकात्प्रभृति भवति। (पश्यन्तु यन्त्रकम्-३, ४, ५, ६) ॥१८॥

---

* आधिक्यं च जयधवलाकारैः सूक्ष्मसम्परायक्षीणमोहच्छद्मस्थगुणस्थानकाद्धाद्वयेन किञ्चिदधिकं दर्शितम्। तथा च तद्ग्रन्थः-"एत्थ विसेसाहियपमाणं सुहुमसाम्पराइयखीणकसायद्धाहितो विसेसुत्तरमिदि घेत्तव्वं।"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु संसारावस्थायां संक्लिष्टपरिणामा मिथ्यादृष्टिप्रभृत्यप्रमत्तसंयतपर्यवसानाः सर्वे जीवाः सर्वाः स्थितीर्वैकां स्थितिं वा-ऽऽश्रित्योत्कीर्णदलिकतो बहुदलमुद्वर्तयन्ति,स्तोकं त्वपवर्तयन्ति। मध्यमपरिणामास्तु यावद् दलमुद्वर्तयन्ति, तावद् दलमपवर्तयन्ति । विशुद्धपरिणामाः पुनः स्तोकमुद्वर्तयन्ति बहु दलमपवर्तयन्ति । अनुत्कीर्णं सत्तागतदलं तु त्रिविधानामपि जन्तूनामुद्वर्तनातो-ऽपवर्तनातो वाऽसंख्येयगुणं विद्यते । यदुक्तं कषायप्राभृतचूर्णौ–"**अक्खवगाणुवसामगस्स पुण सव्वाओ ट्ठिदीओ एगट्ठिदिं वा पडुच्च वड्ढीदो हाणी तुल्ला वा विसेसाहिया विसेसहीणा वा । अवट्ठाणमसंखेज्जगुणं ।**" करणाभिमुखानां तूद्वर्तनातोऽपवर्तनायामसंख्येयगुणं दलिकं भवति, ततोऽनुत्कीर्यमाणं सत्तागतदलमसंख्येयगुणं भवतीति, तर्हि क्षपकश्रेणिं प्रतिपद्यमानस्य जन्तोरुद्वर्तनादीनामल्पबहुत्वं कथं भवतीति शंकापरिहारार्थमाह—

उव्वट्टणाअ खु असंखगुणा ओवट्टणा तओ सत्ता ।
जं उक्किरणस्स असंखंसो उव्वट्टणाअ होएइ ॥१६॥ (गीतिः)

उद्वर्तनायाः खल्वसंख्यगुणाऽपवर्तना ततः सत्त्वम् ।
यद् उत्कीर्णस्य असंख्यांश उद्वर्तनायां भवति ॥१६॥ इति पदसंस्कारः ।

'उव्वट्टणाअ' इत्यादि, 'उद्वर्तनायाः' उद्वर्तनातः '**खु**' त्ति खलु-निश्चयेन "**हु खु निश्चयवितर्कसंभावने विस्मये**" (सिद्धहेम० ८–२–१९८) इति वचनात् असंख्यगुणा अपवर्तना, 'ततः' अपवर्तनातः सत्ताऽसंख्येयगुणा । अत्र सत्ताशब्देन उद्वर्तनाऽपवर्तनागतदलं वर्जयित्वा शेषप्रदेशसत्ता ग्राह्या । अयं भावः–एकनिषेकं सर्वनिषेकांश्चा-ऽऽश्रित्योद्वर्त्यमानप्रदेशाग्रतोऽपवर्त्यमानप्रदेशाग्रमसंख्येयगुणं भवति, ततः सत्तागतप्रदेशाग्रं यद् नोद्वर्त्यते, नवाऽपवर्त्यते, तदसंख्येयगुणं भवति, सत्तागतदलसत्काऽसंख्येयभागमात्रस्यैव दलस्योत्कीर्णत्वात् ।

ननूद्वर्तनातोऽपवर्तनाऽसंख्येयगुणा कुतो भवतीत्याह—'जं' इत्यादि, 'यद्' यतः 'उत्कीर्णस्य' उत्कीर्णप्रदेशाग्रस्य 'असंख्यांशः' एकोऽसंख्येयभाग उद्वर्तनायां भवति, शेषा बहुभागास्त्वपवर्तनायां भवन्तीत्यर्थः । तेन क्षपकस्योद्वर्तनागतदलतोऽपवर्तनागतदलमसंख्येगुणं भवति । तथाहि—यस्मात्कस्माच्चिदपि निषेकात् सत्तागतदलं पल्योपमाऽसंख्यभागरूपभागहारेण भक्त्वैकभागमुत्किरति, शेषान् बहुभागान् सत्तायां विमुञ्चति । पुनरुत्कीर्णदलं पल्या-ऽसंख्येयभागप्रमाणभागहारेण विभज्यैकभाग उद्वर्त्यते बहुभागाश्चाऽपवर्त्यन्ते, तेनेदमल्पबहुत्वं सङ्गच्छते–दलिकस्योद्वर्तनातोऽपवर्तनाऽसंख्येयगुणा, उद्वर्तनातोऽपवर्तनायामुत्कीर्णदलस्याऽसंख्येयबहुभागमात्रत्वात् । अपवर्तनातो-ऽनुत्कीर्यमाणदलिकसत्ता-ऽसंख्येयगुणा, सत्तागतदलिकसत्का-ऽसंख्येयभागस्योत्की-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्णत्वात् । एवं सर्वनिषेकानाश्रित्याऽपि वक्तव्यम् । तथाहि—आगमा-ऽविरोधेन सत्तागतसर्वनिषेकगतदलं पल्योपमाऽसंख्येयभागेन भक्त्वैकभागमुत्किरति । उत्कीर्णदलं पुनः पल्योपमा-ऽसंख्येयभागेन विभज्यैकं भागमुद्वर्तयति बहुभागांश्चा-ऽपवर्तयति । इत्थं सर्वनिषेकानाश्रित्या-ऽप्युद्वर्तनातो दलिकाऽपवर्तनाऽसंख्येयगुणा भवति, ततोऽनुत्कीर्यमाणदलिकसत्ता-ऽसंख्येयगुणा जायते । उक्तं च **कषायप्राभृते**—

**"वड्ढीदु होइ हाणी अहिगा हाणीदु तह अवट्ठाणं ।**
**गुणसेढी असंखेज्जा च पदेसग्गेण बोद्धव्वा ॥ १ ॥"**

**एवं तच्चूर्णावपि—"विहासा, जं पदेसग्गमुक्कड्डिज्जदि सा वड्ढि त्ति सण्णा । जमोकड्डिज्जदि सा हाणि त्ति सण्णा । जं ण ओकड्डिज्जदि,ण उक्कड्डिज्जदि पदेसग्गं तमवट्ठाणं त्ति सण्णा । एदीए सण्णाए एक्कं ठिदिं पडुच्च सव्वाओ ट्ठिदीओ पडुच्च अप्पाबहुअं । तं जहा–वड्ढी थोवा, हाणी असंखेज्जगुणा, अवट्ठाणमसंखेज्जगुणं ।"**

इयं प्ररूपणोपशमश्रेणिं प्रतिपद्यमानस्या-ऽपि ज्ञातव्या, विशेषाभावात् ॥१९॥

सम्प्रत्यपूर्वकरणे बन्धोदयोर्व्यवच्छेदं व्याजिहीर्षुराह—

**पढमंसेऽपुव्वस्स उ वे णिद्दा सुरगइप्पभिइतीसा ।**
**छट्ठंसे हासरइभयदुगुच्छाऽन्ते य बंधत्तो ॥२०॥**
**वोच्छिज्जंति छ हासाई उदयत्तो य ठिइबंधो ।**
**पढमसमयओ चरिमसमयम्मि संखेज्जगुणहीणो ॥२१॥(उपगीतिः)**

प्रथमांशे-ऽपूर्वस्य तु द्वे निद्रे सुरगतिप्रभृतित्रिंशत् ।
षष्ठांशे हास्य-रति-भय-जुगुप्सा अन्ते च बन्धतः ॥ २० ॥

व्यवच्छिद्यन्ते षट् हास्यादय उदयतः स्थितिबन्धः ।
प्रथमसमयतश्चरमसमये संख्येयगुणहीनः ॥ २१ ॥ इति पदसंस्कारः ।

**'पढमंसे'** इत्यादि, अपूर्वकरणाद्धायाः सप्तभागाः कर्तव्याः । एकैकभागे संख्येयाः स्थितिबन्धा व्रजन्ति । तत्र 'अपूर्वकरणस्य' अपूर्वकरणाद्धायाः 'प्रथमांशे' प्रथमसप्तभागपर्यवसाने तु 'द्वे निद्रे' स्त्यानर्द्धित्रिकस्य प्रागेव व्यवच्छेदात् निद्राप्रचलारूपे बन्धतो व्यवच्छिद्येते इति क्रियया सहा-ऽन्वयः । इह बध्यते, उत्तरत्र न बध्यते, तद्बन्धाध्यवसायस्थानाभावात् । इतः परं निद्राद्वि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्य गुणसंक्रमः प्रवर्तते, तस्या-ऽशुभा-ऽबध्यमानत्वात् । उक्तं च **कषायप्राभृतचूर्णौ–"एवं ठिदिबंधसहस्सेहिं गदेहिं अपुव्वकरणद्धाए संखेज्जदिभागे गदे तदो निद्दापयलाणं बन्धवोच्छेदो । ताधे चेव गुणसंक्रमेण संकमति ।"**

**'सुर०'** इत्यादि, तत्र 'षष्ठांशे' अपूर्वकरणाद्धायाः षष्ठसप्तमभागप्रान्ते 'सुरगतिप्रभृतित्रिंशत्' सुरगतिप्रभृतीनां त्रिंशत्-त्रिंशत्संख्याका देवगत्यादयो बन्धतो व्यवच्छिद्यन्ते । अयं भावः–देवगति-देवानुपूर्वीपञ्चेन्द्रियजाति-वैक्रियद्विका-ऽऽहारकद्विक-तैजसकार्मणशरीर--समचतुरस्रसंस्थान-वर्णचतुष्क-शुभखगति–त्रसनवक–जिननाम–निर्माणा-ऽगुरुलघूपघात-पराघात-श्वासोच्छ्वासरूपास्त्रिंशत्प्रकृतयो-ऽपूर्वकरणाद्धायाः षष्ठसप्तमभागपर्यवसाने बन्धतो व्यवच्छिद्यन्ते, उत्तरत्र न बध्यन्ते इत्यर्थः । अतः परमुपघातस्य गुणसंक्रमः प्रवर्तते, तस्या-ऽशुभा-ऽबध्यमानत्वात् ।

**'हास०'** इत्यादि, 'हास्य-रति-भय-जुगुप्साः' एताश्चतस्रः प्रकृतयः 'अन्ते' अपूर्वकरणस्य चरमसप्तमभागपर्यवसाने अपूर्वकरणाद्धाचरमसमये इत्यर्थः, बन्धतो व्यवच्छिद्यन्ते, उत्तरत्र न बध्यन्ते इत्यर्थः । अतः परं हास्य-रति-भय-जुगुप्सानां गुणसंक्रमः प्रवर्तते, अशुभा-ऽबध्यमानत्वात् ।

**'छ हासाई'** इत्यादि, अपूर्वकरणस्य चरमसमये 'षट्' षट्संख्याकाः 'हास्यादयः' हास्य-रति-शोका-ऽरति-भय-जुगुप्सारूपा उदयतो व्यवच्छिद्यन्ते, विशुद्धतरपरिणामत्वादुत्तरत्र तेषामुदयो न भवतीत्यर्थः ।

अथ स्थितिबन्धं प्रकटयितुकामः प्राह–**'ठिइ०'** इत्यादि, 'स्थितिबन्धः' आयुर्वर्जसप्तानामपि कर्मणां स्थितिबन्धः 'प्रथमसमयतः' अपूर्वकरणसत्का-ऽऽद्यसमयतश्चरमसमये संख्येयगुणहीनो भवति, संख्येयभागमात्रो भवतीत्यर्थः ॥२०–२१॥

अथाऽपूर्वकरणचरमसमये स्थितिसत्त्वं विभणिषुराह—

**जं ठिइसंतं अंतोकोडाकोडी अपुव्वआइखणे ।**
**तं संखेज्जगुणूणं अंते ठिइघायसंखेहिं ॥२२॥**

यत्स्थितिसत्त्वमन्तःकोटिकोट्यपूर्वा-ऽऽदिक्षणे ।
तत्संख्येयगुणोनमन्ते स्थितिघातसंख्यैः ॥२२॥ इति पदसंस्कारः ।

**'जं०'** इत्यादि, तत्र 'अपूर्वादिक्षणे' अपूर्वकरणप्रथमसमये यत्स्थितिसत्त्वम् 'अन्तःकोटिकोटि' कोटिकोटीनां-सागरोपमकोटिकोटीनाम् अन्तर्—मध्ये, अन्तःकोटिकोटि, **"पारेमध्येऽग्रे-ऽन्तः**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठ्या व" (सिद्धहेम० ३-१-३०)इत्यनेना-ऽव्ययीभावसमासः, सागरोपमकोटिशतसहस्रपृथक्त्व-मित्यर्थः, आसीत् इति शेषः, तत् स्थितिसत्त्वं 'स्थितिघातसंख्यैः' संख्यशब्दो-ऽत्र बहुत्ववाची, तेन स्थितिघातसंख्यातसहस्रैर्घातितं सद् 'अन्ते' अपूर्वकरणचरमसमये 'संख्येयगुणोनं' संख्येय-गुणहीनं संख्येयभागमात्रं भवतीत्यर्थः। उपलक्षणमेतद्, तेन स्थितिबन्धो-ऽपूर्वकरणप्रथमसमयत-श्चरमसमये संख्येयगुणहीनो भवतीत्युपलक्ष्यते। एवं स्थितिखण्डसंख्यातसहस्रैरपूर्वकरणं परिसमाप्तं भवति ॥२२॥

प्राक्प्रतिज्ञातनवा-ऽधिकारेष्वधिकारद्वयं निरूप्य तृतीया-ऽधिकारं विस्तरतो निजिगदि-षुराह—

से काले अनियट्टि विणासेउं आढवेइ ठिइखंडं।
तं हस्सत्तो संखेज्जभागअहिअं तु उक्कोसं ॥२३॥

अनन्तरकाले-ऽनिवृत्ति विनाशयितुमारभते स्थितिखण्डम्।
तद् ह्रस्वतः संख्येयभागा-ऽधिकं तूत्कृष्टम् ॥ २३ ॥ इति पदसंस्कारः।

'से काले' इत्यादि, 'अनन्तरकाले' अपूर्वकरणस्य चरमसमयादनन्तरे समये इत्यर्थः, 'अनि-वृत्ति' अनिवृत्तिकरणं भवति, अनिवृत्तिशब्देन 'भीमो भीमसेनः' इतिन्यायाद् अनिवृत्तिकरणं ग्राह्यम्, न विद्यते निवृत्तिः—तुल्यकाले प्रविष्टानां जन्तूनां सम्बन्धिनामध्यवसायस्थानानां पर-स्परं व्यावृत्तिर्यस्मिन् तदनिवृत्ति, अनिवृत्ति च तत्करणं च अनिवृत्तिकरणम्, अस्य करणस्यो-पर्युक्तव्युत्पत्तेस्तिर्यग्मुखी विशुद्धिरस्मिन् करणे न भवति, केवलं पूर्वत उत्तरोत्तरसमये ऊर्ध्वमुखी विशुद्धिरनन्तगुणक्रमेणा-ऽवतिष्ठते। तेना-ऽध्यवसायस्थानेषु तुल्यकालप्रविष्टजन्तूनां विवक्षित-समये एकमेवाऽध्यवसायस्थानं भवति, न पुनर्यथाप्रवृत्तकरणादिवदसंख्येयलोकप्रदेशमात्राणि। तथाहि—अनिवृत्तिकरणप्रथमसमये ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते, तेषां सर्वेषामप्येक-रूपमेवा-ऽध्यवसायस्थानम्, द्वितीयसमये-ऽपि ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते, तेषां सर्वेषामेकरूपमध्यवसायस्थानम्। एवं तावद् वाच्यम्, यावदनिवृत्तिकरणचरमसमयः। नवरं प्रथमसमय-भाव्यध्यवसायस्थानतो द्वितीयसमये-ऽध्यवसायस्थानमनन्तगुणं विशुद्धं भवति। ततोऽपि तृतीयसमये ऽनन्तगुणं विशुद्धम्। एवं पूर्वपूर्वसमयत उत्तरोत्तरसमयेऽनन्तगुणं विशुद्धं तावद् वाच्यम्, यावच्चरम-समयः। अत एवा-ऽस्य करणस्य यावन्तः समयास्तावन्त्यध्यवसायस्थानानि पूर्वपूर्वसमयतश्चाऽनन्त-गुणवृद्धानि भवन्ति, स्थाप्यमानानि पुनर्मुक्तावलीसंस्थानेन तिष्ठन्ति।

अथाऽनिवृत्तिकरणप्रथमसमये कार्यविशेषं प्रतिपादयति—'विणा०' इत्यादि, अनिवृत्तिकरण-प्रथमसमयवर्ती जीवः 'स्थितिखण्डम्' अभिनवं पल्योपमसंख्येयभागमितं स्थितिकण्डकं 'विनाश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यितुं' विघातयितुम् 'आरभते' उपक्रमते। तत् घात्यमानं स्थितिखण्डं किमपूर्वकरणवज्जघन्यत उत्कृष्टं संख्येयगुणं भवति, उत प्रकारान्तरेणेति शङ्काव्युदासाय भणति–'तं' इत्यादि, 'तत्' घात्यमानं स्थितिखण्डं 'ह्रस्वात्' जघन्यस्थितिखण्डात् 'संख्येयभागाधिकं' संख्येयतमभागेनाऽधिकमुत्कृष्टं भवति। उक्तं च **कषायप्राभृतचूर्णौ**–**"पढमट्ठिदिखंडयं विसमं जहण्णयादो उक्कस्सयं संखेज्जभागुत्तरं।"** कथमेतदवसीयते? इति चेद्, शृणुत–अनिवृत्तिकरणप्रथमसमये जघन्यस्थितिसत्कर्मत उत्कृष्टस्थितिकर्मणः संख्येयभागेनाऽऽधिक्यात् स्थितिखण्डस्य प्रायः स्थितिसत्कर्माऽनुसारित्वाच्च जघन्यत उत्कृष्टं स्थितिखण्डं संख्येयभागेनाऽधिकं भवति, न त्वपूर्वकरणवत् संख्येयगुणम्।

न चाऽनिवृत्तिकरणप्रथमसमये जघन्यत उत्कृष्टस्थितिसत्कर्म संख्येयगुणं कथं न भवतीति वाच्यम्, तथास्वाभाव्यात्। एतदुक्तं भवति—यद्यप्यपूर्वकरणे जघन्यत उत्कृष्टं स्थितिसत्त्वं संख्येयगुणं दृश्यते, तथापि तत्र तेन क्रमेण स्थितिघातं करोति, येना-ऽनिवृत्तिकरणप्रथमसमये घातिता-ऽवशेषस्थितिसत्त्वं जघन्यत उत्कृष्टं केवलं संख्येयभागेना-ऽधिकं भवति।

अनिवृत्तिकरणप्रथमसमये स्थितिखण्डं विनाशयितुमारभते इत्येतदुपलक्षणम्, तेन तदानीमेवाऽपूर्वकरणचरमस्थितिबन्धतः पल्योपमसंख्येयभागेन हीनमभिनवं स्थितिबन्धमभिनवं च रसघातमारभते इत्युपलक्ष्यते। उक्तं च **कषायप्राभृतचूर्णौ**–**"पढमसमयअणियट्टिस्स अण्णं ट्ठिदिखंडयं पलिदोवमस्स संखेज्जदिभागो, अण्णमणुभागखंडयं सेसस्स अणंता भागा, अण्णो ट्ठिदिबंधो पलिदोवमस्स संखेज्जदिभागेण हीणो।"** इति॥२३॥

सम्प्रत्यनिवृत्तिकरणप्रथमसमये देशोपशमनादिकरणत्रयस्य व्यवच्छेदमनिवृत्तिकरणे प्रथमस्थितिबन्धं च व्याजिहीर्षुराह—

पढमखणे देसोवसमणानिकायणनिहत्तिकरणाइं।
वोच्छिन्नाइं अंतोलक्खं पढमो उ ठिइबंधो॥ २४॥

प्रथमक्षणे देशोपशमना-निकाचना-निधत्तिकरणानि।
व्यवच्छिन्नान्यन्तर्लक्षं प्रथमस्तु स्थितिबन्धः॥ २४॥ इति पद्यसंस्कारः।

**'पढम०'** इत्यादि, 'प्रथमक्षणे' अनिवृत्तिकरणप्रथमसमये देशोपशमनानिकाचनानिधत्तिकरणानि व्यवच्छिन्नानि भवन्ति, सत्तागतसर्वकर्मणां प्रदेशेषु देशोपशमना-निधत्ति-निकाचनाकरणानि न प्रवर्तन्ते, तथा सत्तागतसर्वकर्मणां सर्वप्रदेशा देशोपशमना-निकाचना-निधत्तिकरणैर्विरहिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति, यथासंभवं चोदयसंक्रमोद्वर्तना-ऽपवर्तनाकरणसाध्या भवन्तीत्यर्थः । अनिवृत्तिकरणे प्रथमस्तु तुर्वाक्यभेदे **"स्यात्तु भेदेऽवधारणे"** इति वचनात् स्थितिबन्धः 'अन्तर्लक्षम्' लक्षस्य-शतसहस्रस्य अन्तर्-मध्ये **'पारेमध्येऽग्रेऽन्तः षष्ठया वा"** ( सिद्धहेम० ३-१-३० ) इत्यनेन सूत्रेणा-ऽव्ययीभावसमासः, सागरोपमसहस्रपृथक्त्वमात्रः स्थितिबन्धो जायत इत्यर्थः । यद्वादि **कषायप्राभृतचूर्णौ—"ट्ठिदिबंधो सागरोपमसहस्सपुधत्तमंतोसदसहस्सस्स ।"** इति ॥ २४ ॥

अथा-ऽनिवृत्तिकरणप्रथमसमये स्थितिसत्त्वं प्रतिपिपादयिषुराह—

जं ट्ठिसंतं अंतोकोडाकोडी अपुव्वपढमखणे ।
होज्जा तं अंतोकोडी अनियट्टिपढमखणम्मि ॥ २५ ॥

यत्स्थितिसत्त्वमन्तःकोटिकोटयपूर्वप्रथमक्षणे ।
भवति तदन्तःकोटयनिवृत्तिप्रथमक्षणे ॥ २५ ॥ इति पदसंस्कारः ।

**'जं'** इत्यादि, यत् स्थितिसत्त्वं 'अपूर्वप्रथमक्षणे' अपूर्वकरणप्रथमसमये 'अन्तःकोटिकोटि' सागरोपमकोटिशतसहस्रपृथक्त्वमात्रमासीत्, तत् 'अनिवृत्तिप्रथमक्षणे' अनिवृत्तिकरणप्रथमसमये 'अन्तःकोटि' कोटेरन्तः सागरोपमशतसहस्रपृथक्त्वं भवतीत्यर्थः । न्यगादि च **कषायप्राभृतचूर्णौ—"ट्ठिदिसंतकम्मं सागरोवमसदसहस्सपुधत्तमंतोकोडीए ।"** अपूर्वकरणप्रथमसमये सप्तकर्मणो यत् स्थितिसत्कर्म सागरोपमकोटिशतसहस्रपृथक्त्वप्रमितमासीद्, तत् प्रत्येकस्थितिघातेन पल्योपमसंख्येयभागोनं भवत् संख्यातैः स्थितिघातसहस्रैर्घातितं सागरोपमशतसहस्रपृथक्त्वप्रमितं भवतीति फलितार्थः ॥२५॥

स्थितिसत्त्वस्य प्रमाणमभिधाय सम्प्रति त्रिकालगोचरनानाजीवा-ऽपेक्षया-ऽनिवृत्तिकरणे समानं स्थितिसत्त्वं स्थितिखण्डं च प्रतिपिपादयिषुराह—

पढमे ठिइखंडे पुण्णे तुल्लं हवइ संतकम्मं तु ।
सव्वेसिं जीवाणं ठिइखंडं य वि हवइ तुल्लं ॥ २६ ॥

प्रथमे स्थितिखण्डे पूर्णे तुल्यं भवति सत्कर्म तु ।
सर्वेषां जीवानां स्थितिखण्डं चा-ऽपि भवति तुल्यम् ॥२६॥ इति पदसंस्कारः ।

**'पढमे'** इत्यादि, अनिवृत्तिकरणे 'प्रथमे' आदिमे स्थितिखण्डे 'पूर्णे' अपगते 'सर्वेषां जीवानां' युगपत्प्रविष्टानां नानाजीवानां 'सत्कर्म तु' स्थितिसत्त्वं तु 'तुल्यं' समानं भवति । उक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च कषायप्राभृतचूर्णौ–"पढमे ठिदिखंडए हदे सव्वस्स तुल्लकाले अणियट्टिपविट्ठस्स ठिदिसंतकम्मं तुल्लं ।"

अनिवृत्तिकरणे प्रथमस्थितिखण्डे पूर्णे सर्वेषां जीवानां न केवलं स्थितिसत्कर्म मिथस्तुल्यं भवति, किन्तु स्थितिखण्डमपि । तदेव प्राह–'ठिइखण्डं' इत्यादि, सर्वेषां जीवानां 'स्थितिखण्डं' द्वितीयादिस्थितिखण्डं चा-ऽपि तुल्यं समानं भवति, स्थितिसत्त्वस्य सदृशत्वात् स्थितिखण्डस्य प्रायेण स्थितिसत्त्वानुसारित्वाच्च । एतदुक्तं भवति–अनिवृत्तिकरणे प्रथमे स्थितिखण्डेऽपगते सति तुल्यकाले प्रविष्टेषु नानाजीवेष्वेकतमस्य जीवस्य द्वितीयस्थितिखण्डेनाऽपरस्य द्वितीयस्थितिखण्डं तुल्यं भवति । एवमेकस्य तृतीयस्थितिखण्डेनेतरस्य तृतीयं स्थितिखण्डं सदृशं भवति । एवमग्रेऽपि । उक्तं च कषायप्राभृतचूर्णौ–"ठिदिखंडयं पि सव्वस्स अणियट्टिपविट्ठस्स विदियट्ठिदिखण्डयादो विदियट्ठिदिखण्डयं तुल्लं, तदो पहुडि तदियादो तदियं तुल्लं ।" इति ॥ २६ ॥

नन्वनिवृत्तिकरणे उत्तरोत्तरस्थितिबन्धे पल्योपमसंख्येयभागेन स्थितिर्न्यूना न्यूनतरा भवति । तत्र संख्यातैः स्थितिबन्धैरनिवृत्तिकरणस्य संख्येयबहुभागेषु गतेषु स्थितिबन्धः कियान् भवति ? इत्यत आह—

ठिइबंधसंखगमणे असण्णितुल्लो पहवइ ठिइबंधो ।
चउतिदुएगिंदियतुल्लो बंधो अंतरे य बहुबंधा ॥ २७ ॥ (गीतिः)

स्थितिबन्धसंख्यगमने-ऽसंज्ञितुल्यः प्रभवति स्थितिबन्धः ।
चतुस्त्रिद्व्येकेन्द्रियतुल्यो बन्धो-ऽन्तरे च बहुबन्धाः ॥ २७ ॥ इति पदसंस्कारः ।

'ठिइबंध०' इत्यादि, अनिवृत्तिकरणे 'स्थितिबन्धसंख्यगमने' सति स्थितिबन्धसंख्यातेषु गतेषु सत्स्वित्यर्थः, अनिवृत्तिकरणस्य संख्येयतमे भागेऽवशिष्यमाणे सप्तानां कर्मणां स्थितिबन्धः 'असंज्ञितुल्यः' असंज्ञिस्थितिबन्धेन सदृशः 'प्रभवति' जायते, मोहनीयस्य सागरोपमसहस्रचतुःसप्तभागमात्रः ($\frac{१००० \times ४}{७}$ सा०), ज्ञानावरण-दर्शनावरण-वेदनीया–ऽन्तरायाणां सागरोपमसहस्रत्रिसप्तभागप्रमाणः ($\frac{१००० \times ३}{७}$ सा०) स्वस्थाने तु मिथः सदृशः, नाम-गोत्रयोः सागरोपमसहस्रद्विसप्तभागमितः ($\frac{१००० \times २}{७}$ सा०) स्वस्थाने परस्परं तुल्यः स्थितिबन्धो भवतीत्यर्थः । उक्तं च कषायप्रातभृचूर्णौ–"एवं संखेज्जेसु ठिदिबंधसहस्सेसु गदेसु तदो अण्णो ठिदिबंधो असण्णिट्ठिदिबंधसमगो जादो ।" ततः क्रमेण चतुस्त्रिद्व्येकेन्द्रियतुल्यो 'बन्धः' स्थिति-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

बन्धो भवति, 'अन्तरे च' मध्ये च बहुबन्धा' बहवः स्थितिबन्धा भवन्ति, न पुनरसंज्ञिबन्धतुल्य-बन्धादनन्तरं चतुरिन्द्रियबन्धसमानः स्थितिबन्धो भवति, अपि त्वन्तरे बहुस्थितिबन्धेषु गतेषु–चतुरिन्द्रियबन्धेन तुल्यः स्थितिबन्धो भवति, एवं चतुरिन्द्रियबन्धतुल्यस्थितिबन्धभवनाद् बहुषु–स्थितिबन्धेषु गतेषु त्रीन्द्रियस्थितिबन्धसदृशः स्थितिबन्धो भवति । एवमग्रेऽपि ।

भावार्थः पुनरयम्–असंज्ञिस्थितिबन्धतुल्यस्थितिबन्धभवनात् संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु चतुरिन्द्रियस्थितिबन्धेन सदृशः स्थितिबन्धो भवति, मोहनीयस्य सागरोपमशतचतुः-सप्तभागमात्रः $\left(\frac{१०० \times ४}{७}\text{सा०}\right)$, ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां सागरोपमशतत्रि–सप्तभागमितः $\left(\frac{१०० \times ३}{७}\text{सा०}\right)$, नाम–गोत्रयोस्तु सागरोपमशतद्विसप्तभागमानः $\left(\frac{१०० \times २}{७}\text{सा०}\right)$ स्थितिबन्धो भवतीत्यर्थः । ततः पुनः संख्यातेषु स्थितिबन्धसहस्रेषु व्रजितेषु सत्सु त्रीन्द्रिय-स्थितिबन्धसमानः स्थितिबन्धो भवति, मोहनीयस्य पञ्चाशत्सागरोपमचतुःसप्तभागमानः $\left(\frac{५० \times ४}{७}\text{सा०}\right)$ ज्ञानावरणादीनां चतुर्णां पञ्चाशत्सागरोपमत्रिसप्तभागप्रमितः $\left(\frac{५० \times ३}{७}\text{सा०}\right)$, नाम–गोत्रयोः पञ्चाशत्सागरोपमद्विसप्तभागप्रमाणः $\left(\frac{५० \times २}{७}\text{सा०}\right)$ स्थितिबन्धो भवतीत्यर्थः । ततः संख्यातेषु स्थितिबन्धेष्वपगतेषु सत्सु द्वीन्द्रियस्थितिबन्धेनैकादृक्षः स्थितिबन्धो भवति, मोहनीयस्य पञ्चविंशतिसागरोपमचतुःसप्तभागप्रमितः $\left(\frac{२५ \times ४}{७}\text{सा०}\right)$, ज्ञानावरण-दर्शनावरण–वेदनीया–ऽन्तरायाणां पञ्चविंशतिसागरोपमत्रिसभागमानः $\left(\frac{२५ \times ३}{७}\text{सा०}\right)$, नामगोत्रयोः पञ्चविंशतिसागरोपमद्विसप्तभागप्रमाणः $\left(\frac{२५ \times २}{७}\text{सा०}\right)$ स्थितिबन्धो भवतीत्यर्थः । ततः पुनः स्थितिबन्धसंख्यातसहस्रेषु व्यतिक्रान्तेष्वेकेन्द्रियस्थितिबन्धसदृशः स्थितिबन्धो जायते, मोहनीयस्यसागरोपमचतुःसप्तभागमितः ( $\frac{४}{७}$ सा० ), ज्ञानावरणदर्शनावरण–वेदनीया–ऽन्तरायाणां सागरोपमत्रिसप्त–भागमात्रः ( $\frac{३}{७}$ सा० ), नामगोत्रयोः सागरोपमद्विसप्तभागप्रमितः ( $\frac{२}{७}$ सा० ) स्थितिबन्धो भवति । युक्तियुक्तमेतत् सर्वम्, त्रैराशिकेन साधितत्वात् । तथाहि—यदि सप्ततिसागरोपमकोटि–कोटिस्थितिकस्य मिथ्यात्वमोहनीयस्यैकसागरोपमस्थितिको बन्ध एकेन्द्रिये भवति, तर्हि चत्वारिं–शत्सागरोपमकोटिकोटिस्थितिकस्य चारित्रमोहनीयस्य कियान् स्थितिबन्धो भवेदिति त्रैराशिकेन [ ७० सा० को० को० । ४० सा० को० को० । १ सा० । लब्धम् $\frac{४}{७}$ सा० । ] मोहनीयस्य सागरोपमचतुःसप्तमात्रः साध्येत । तथा चा-ऽत्र त्रैराशिककरणसूत्रम्—

"प्रमाणमिच्छा च समानजाती आद्यन्तयोस्तत्फलमन्यजातिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मध्ये तदिच्छाहतमाद्यहृत् स्यादिच्छाफलं व्यस्तविधिर्विलोमे ॥ १ ॥"**

प्रमाणमत्र सप्ततिसागरोपमकोटिकोटयः, इच्छा च चत्वारिंशत्सागरोपमकोटिकोटयः, प्रमाणफलम् पुनः सागरोपमः। ततः प्रमाणफलमिच्छया गुण्यते, ततो गुणितं प्रमाणेन विभज्यते, तदा **"शून्यं शून्येन पातयेत्"** इति वचनात् चत्वारः सागरोपमस्य सप्तभागा लभ्यन्ते। तथा सागरोपमकोटीकोटीस्थितिकस्य मिथ्यात्वमोहनीयस्यैकसागरोपममात्रः स्थितिबन्ध एकेन्द्रिये भवति, तर्हि त्रिंशत्सागरोपमकोटीकोटीस्थितिकानां ज्ञानावरणादीनां कियान् स्थितिबन्धो भवेदिति त्रैराशिकेन [ ७० सा० को० को०। ४० सा० को० को०। १ सा०। लब्धम् $\frac{३}{७}$ सा० ] ज्ञानावरणादीनां सागरोपमत्रिसप्तभागमात्रः स्थितिबन्धः प्राप्तव्यः। तथा सप्ततिसागरोपमकोटिकोटिस्थितिकस्यैकसागरोपमः स्थितिबन्ध एकेन्द्रिये भवति, तर्हि विंशतिसागरोपमकोटीकोटीस्थितिकयोर्नाम-गोत्रयोः कियान् भवेदिति त्रैराशिकेन [ ७० सा० को० को०। ४० सा० को० को०। १ सा०। लब्धम् $\frac{२}{७}$ सा० ] नाम-गोत्रयोः स्थितिबन्धो सागरोपमद्विसप्तभागप्रमितः साध्यः। एवं द्वीन्द्रियादिष्वपि त्रैराशिकेन स्थितिबन्धः साधनीयः, नवरं तत्र यथाक्रमं पञ्चविंशतिगुणः पञ्चाशद्गुणः शतगुणः सहस्रगुणश्च स्थितिबन्धो वक्तव्यः। उक्तं च **कषायप्राभृतचूर्णौ–"तदो संखेज्जेसु ठिदिबंधसहस्सेसु गदेसु चउरिंदियट्ठिदिबंधसमगो जादो। एवं तीइंदियसमगो, बीइंदियसमगो एगिंदियसमगो जादो।"** इति ॥ २७ ॥

अथ लाघवार्थ्यधिकारगाथां भणति—

**ठिइबंधबहुसहस्सेसु गयेसु होइ जं तु एक्केक्कं।**
**तं भणिहामो णत्थि विसेसे णियमो कहिमु बंधं ॥ २८ ॥**

स्थितिबन्धबहुसहस्रेसु गतेषु भवति यत्त्वेकैकम्।
तद्भणिष्यामो नास्ति विशेषे नियमो कथयामो बन्धम् ॥ २८ ॥ इति पदसंस्कारः।

'ठिइ०' इत्यादि, स्थितिबन्धबहुसहस्रेषु गतेषु यत्त्वेकैकं भवति, तत् भणिष्यामः। इदमुक्तं भवति-बहुशब्दः संख्यातवाची। ततश्चायमर्थः–इतः परं यानि वस्तूनि वक्ष्यामः, तेषामेकं स्थितिबन्धसंख्यातसहस्रेषु गतेषु वक्तव्यम्, ततः पुनः स्थितिबन्धसंख्यातसहस्रेषु गतेष्वन्यदेकं निगदितव्यम्। ततो भूयः स्थितिबन्धसंख्यातसहस्रेषु व्यतिक्रान्तेष्वितरदेकमभिधातव्यम्। एवं संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु गतेष्वेकैकं भाषितव्यम्। यथा-ऽनन्तरगाथायां नामगोत्रादीनां स्थितिबन्धं वक्ष्यति, स एकेन्द्रियबन्धतुल्यस्थितिबन्धभवनात् संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु ज्ञातव्यः। एवं ततोऽप्यग्रे यद्यद्वक्ष्यति तत्तत्संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु वक्तव्यम्। ननु किमियं व्याप्तिः सर्वत्र ज्ञातव्या, उता-ऽस्ति कश्चिद् विशेषः? इत्यत आह–**'णत्थि'** इत्यादि, **'विशेषे'**

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

प्ररूपणाविशेषे नियमो नास्ति, संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु भवतीति व्याप्तिनियमो नास्ती-त्यर्थः, यथा "पुण्णे" इत्यादि द्वात्रिंशत्तमगाथायाम् एकस्मिन् स्थितिबन्धे पूर्णेऽल्पबहुत्व-मभिधास्यति, तत् प्राक्तनबन्धतः संख्येषु स्थितिबन्धेषु गतेषु स्थितिबन्धे पूर्णे न वक्तव्यम, किन्तु तस्मिन्नेव स्थितिबन्धे पूर्णे-ऽभिधातव्यम् । एवमन्यत्रा-ऽपि, विशेषेण सामान्यस्य बाधद-र्शनात् । अथ प्रतिजिज्ञासुराह–'कहिमु बंधं' ति 'कथयामः' निरूपयामः 'बन्धं' मोहनीयादीनां स्थितिबन्धम् ॥ २८ ॥

अथ प्रतिज्ञातमेव प्राह—

**एग-दिवड्ढ-दु-पल्लाणि वीसगाणं य तीसगाणं य ।**
**मोहस्स य परिवाडीअ दुगस्स उ संखगुणहीणो ॥२९॥**

एक-द्व्यर्ध-द्विपल्यानि विंशतिकयोश्च त्रिंशत्कानां च ।
मोहस्य च परिपाट्या द्विकस्य तु संख्यगुणहीनः ॥ २९ ॥ इति पदसंस्कारः ।

'एग०' इत्यादि, एकेन्द्रियबन्धतुल्यस्थितिबन्धभवनात्संख्यातेषु सहस्रेषु स्थितिबन्धेषु व्यतिक्रान्तेषु 'विंशतिकयोश्च' विंशतिसागरोपमकोटिकोटीस्थितिकयोर्नाम-गोत्रयोरित्यर्थः, चकारः समुच्चये,एवमग्रेऽपि 'त्रिंशत्कानां' त्रिंशत्सागरोपमकोटिकोटिस्थितिकानां च ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां चेत्यर्थः 'मोहस्य' मोहनीयकर्मणश्च स्थितिबन्धः 'परिपाट्या' क्रमेण 'एकद्व्यर्ध-द्वि-पल्यानि'एक-सार्ध-द्विपल्योपमानि भवति।इदमुक्तं भवति–नाम-गोत्रयोः स्थितिबन्ध एकपल्यो-पममात्रो ज्ञानावरणादीनां सार्धपल्योपममानो मोहनीयस्य तु द्विपल्योपमप्रमितो भवति । उक्तं च **कषायप्राभृतचूर्णौ–"एइंदियट्ठिदिबंधसमगादो ट्ठिदिबंधादो संखेज्जेसु ट्ठिदिबंध-सहस्सेसु गदेसु णामागोदाणं पलिदोवयट्ठिदिगो बंधो जादो, ताधे णाणावरणी-य–दंसणावरणीय-वेदणीय–अंतराइयाणं दिवड्ढपलिदोवमट्ठिदिगो बंधो मोहणी-यस्स वे पलिदोवमट्ठिदिगो बंधो ।"** युक्तियुक्तमिदं वचनम् । तथाहि—यदि विंशति-सागरोपमकोटिकोटिस्थितिकयोर्नाम-गोत्रयोः स्थितिबन्ध एकपल्योपममात्रो भवति, तर्हि त्रिंशत्सा-गरोपमकोटिकोटिस्थितिकानां ज्ञानावरणादीनां कियान् स्थितिबन्धो भवेदिति त्रैराशिकेन [ २० सा० को० को० । ३० सा० को० को० । १ पल्यो० । लब्धम् १½ पल्यो० । ] ज्ञानावरणादीनां स्थितिबन्धः सार्धपल्योपममात्रः साध्यः । तथा विंशतिसागरोपमकोटि-कोटिस्थितिकयोर्नामगोत्रयोः स्थितिबन्धो यदि पल्योपमप्रमाणो भवति, तर्हि चत्वारिंशत्साग-रोपमकोटिकोटिस्थितिकस्य मोहनीयस्य स्थितिबन्धः कियान् भवेदिति त्रैराशिकेन [ २० सा० को० को० । ४० सा० को० । १ पल्यो० । लब्धे २ पल्यो० ] मोहनीयस्य स्थितिबन्धो द्विपल्योपमप्रमितोऽवाप्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदानीं स्थितिबन्धाऽल्पबहुत्वमित्थं द्रष्टव्यम्-नामगोत्रयोः सर्वाल्पः स्थितिबन्धः, स्वस्थाने तु मिथः सदृशः,पल्योपममात्रत्वात् । ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां विशेषाधिकः, सार्धपल्योपममात्रत्वात् । ततो मोहनीयस्य विशेषाधिकः, द्विपल्योपममितत्वात् । इतः पूर्वमप्यनेनैव क्रमेण स्थितिबन्धा-ऽल्पबहुत्वं वक्तव्यम् । यदवादि कषायप्राभृतचूर्णौ-**"जाधे णामागोदाणं पलिदोवमट्ठिदिगो बंधो, ताधे अप्पाबहुअं वत्तइस्सामो, तं जहा-णामागोदाणं ठिदिबंधो थोवो, णाणावरणीय-दंसणावरणीय-वेदणीय-अंतराइयाणं ठिदिबंधो विसेसाहिओ, मोहणीयस्स ट्ठिदिबंधो विसेसाहिओ । अदिक्कंता सव्वे ठिदिबन्धा एदेण अप्पाबहुअविहिणा गदा ।"** इति ।

यदा नाम-गोत्रयोः स्थितिबन्धः पल्योपममात्रो भवति, तदा-ऽनिवृत्तिकरणस्य प्रथमसमयात् सहस्रैः स्थितिघातैर्घातितं सत् तत्प्रथमसमयतः संख्येयगुणहीनं भवदपि सप्तानामपि कर्मणां स्थितिसत्त्वमद्यापि सागरोपमशतसहस्रपृथक्त्वप्रमाणं विद्यते । उक्तं च कषायप्राभृतचूर्णौ-**"ताधे ठिदिसंतकम्मं सागरोवमसदसहस्सपुधत्तं ।"** इति ।

**'दुगस्स'** इत्यादि, नाम-गोत्रयोः पल्योपममात्रे स्थितिबन्धे पूर्णे सति 'द्विकस्य' नाम-गोत्ररूपस्य स्थितिबन्धः संख्यगुणहीनो भवति, प्राक्तनस्थितिबन्धतो नाम-गोत्रयोः संख्येयगुणहीनः पल्योपमसंख्येयभागमितः स्थितिबन्धो जायते इत्यर्थः, यतः प्रभृति यस्य कर्मणः पल्योपममितः स्थितिबन्धो भवति,ततः परं तस्य कर्मण उत्तरोत्तरस्थितिबन्धः संख्येयगुणहीनो जायते इति व्याप्तेः । शेषाणां पञ्चानां कर्मणां तु स्थितिबन्धः प्राक्तनस्थितिबन्धतः पूर्ववत् पल्योपमसंख्येयभागेन हीनो भवति । यदभाणि कषायप्राभृतचूर्णौ-**"तदो णामागोदाणं पलिदोवमट्ठिदिगो बंधो, पुण्णे जो अण्णो ठिदिबंधो सो संखेज्जगुणहीणो, सेसाणं कम्माणं ठिदिबंधो विसेसहीणो ।"** इति ।

नामगोत्रयोः पल्योपममात्रे स्थितिबन्धे पूर्णे स्थितिबन्धा-ऽ-ल्पबहुत्वमित्थं प्ररूपयितव्यम्-नाम-गोत्रयोः सर्वाल्पः स्थितिबन्धः, स च पल्योपमसंख्येयभागप्रमाणः । ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां संख्येयगुणः, पल्योपमसंख्येयभागन्यूनसार्धपल्योपममात्रत्वात् । ततो मोहनीयस्य विशेषाधिकः, पल्योपमसंख्येयभागोनद्विपल्योपममितत्वात् । उक्तं च कषायप्राभृतचूर्णौ-**"ताधे अप्पाबहुअं-णामागोदाणं ठिदिबंधो थोवो, चदुण्हं कम्माणं ट्ठिदिबंधो तुल्लो संखेज्जगुणो, मोहणीयस्य ट्ठिदिबंधो विसेसाहिओ ।"** इति ॥२६॥

ततः परं संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु नामगोत्रादीनां स्थितिबन्धं वक्तुकाम आह--

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**संखंसेगतिभागुत्तरपल्लाइ खलु वीसगाईणं।**
**ताउ परं तीसाणं तहेव संखेज्जगुणहीणो ॥३०॥**

संख्यांशैकत्रिभागोत्तरपल्यानि खलु विंशतिकादीनाम्।
तस्मात्परं त्रिंशतां तथैव संख्येयगुणहीनः ॥ ३० ॥ इति पदसंस्कारः।

**'संख०'** इत्यादि, अनन्तरोक्ता-ऽल्पबहुत्वक्रमेण संख्यातेषु स्थितिबन्धेषु गतेषु सत्सु 'विंशतिकादीनां' विंशतिकत्रिंशत्कचत्वारिंशत्कानां—नामद्विक-ज्ञानावरणचतुष्क-मोहनीयानां क्रमेण स्थितिबन्धः संख्यांशैकत्रिभागुत्तरपल्यानि भवति, खलुर्वाक्यालङ्कारे। एतदुक्तं भवति—प्रागुक्ता-ऽल्पबहुत्वक्रमेण संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु नामगोत्रयोः स्थितिबन्धः पल्योपमसंख्येयभागमानः, ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां पल्योपममात्रः, मोहनीयस्य तु त्रिभागोत्तरपल्योपममितो जायते। यदुक्तं कषायप्राभृतचूर्णौ--**"एदेण संखेज्जाणि ट्ठिदिबंधसहस्साणि गदाणि, तदो णाणावरणीय-दंसणावरणीय-वेदणीय-अंतराइयाणं पलिदोवमट्ठिदिगो बंधो जादो। ताधे मोहणीयस्स तिभागुत्तरपलिदोवमट्ठिदिगो बंधो जादो।"** इति। इदं वचनं युक्तिमदेव। तथाहि—यदि त्रिंशत्सागरोपमकोटिकोटिस्थितिकानां ज्ञानावरणादीनां स्थितिबन्ध एकपल्योपममात्रो जायते, तर्हि चत्वारिंशत्सागरोपमकोटिकोटिस्थितिकस्य मोहनीयस्य स्थितिबन्धः कियान् भवेदिति त्रैराशिकेन [३० सा० को०को०। ४० सा०को०को०। १ पल्यो०। लब्धम् १$\frac{1}{3}$पल्यो०।] मोहनीयस्य स्थितिबन्धस्त्रिभागाधिकपल्योपममात्रः साध्यते।

**'ताउ परं'**इत्यादि, 'तस्मात्'ज्ञानावरणादीनां पल्योपममात्रस्थितिबन्धभवनात् परं'त्रिंशतां'त्रिंशत्सागरोपमकोटिकोटिस्थितिकानां ज्ञानावरण-दर्शनावरण-वेदनीया—ऽन्तरायाणामित्यर्थः,**'तहेव'**त्ति 'तथैव' तथाशब्दः साम्ये, नामगोत्रवत् स्थितिबन्धः संख्येयगुणहीनो भवतीति शेषः, प्राक्तनस्थितिबन्धतो ज्ञानावरणादीनां संख्येयगुणहीनः पल्योपमसंख्येयभागमितः स्थितिबन्धो भवतीत्यर्थः। उक्तं च कषायप्राभृतचूर्णौ—**"तदो अण्णो ट्ठिदिबंधो चदुण्हं कम्माणं संखेज्जगुणहीणो।"** इत्थं नाम-गोत्र-ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामुत्तरोत्तरस्थितिबन्धः संख्येयगुणहीनो भवति, मोहनीयस्य तु पल्योपमसंख्येयभागेन हीनः संजायते।

ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां पल्योपममात्रे स्थितिबन्धे पूर्णे स्थितिबन्धाऽल्पबहुत्वं चिन्त्यते। तद्यथा—नाम-गोत्रयोः सर्वस्तोकः स्थितिबन्धः, स च पल्योपमसंख्येयभागप्रमाणः। ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां पल्योपमसंख्येयभागमात्रो भवन्नपि संख्यातगुणो भवति। ततो मोहनीयस्य संख्येयगुणः, पल्योपमसंख्येयभागन्यूनत्रिभागोत्तरपल्योपमप्रमाणत्वात्। उक्तं च कषायप्राभृतचूर्णौ—**"ताधे अप्पाबहुअं-णामागोदाणं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ट्ठिदिबंधो थोवो, चदुण्हं कम्माणं ट्ठिदिबंधो संखेज्जगुणो मोहणीयस्स ट्ठिदिबंधो संखेज्जगुणो ।**" इति ॥ ३० ॥

ततः परं संख्यातेषु स्थितिबन्धसहस्रेषु व्रजितेषु स्थितिबन्धमानिर्दिदिक्षुराह—

**मोहस्स पल्लमेत्तो सेसाणं पल्लसंखभागमिओ ।**
**ताउ परं सव्वेसिं कम्माणं संखगुणहीणो ॥ ३१ ॥**

मोहस्य पल्यमात्रः शेषाणां पल्यसंख्यभागमितः ।
तस्मात्परं सर्वेषां कर्मणां संख्यगुणहीनः ॥ ३१ ॥ इति पदसंस्कारः ।

**'मोहस्स'** इत्यादि, निरुक्तस्थितिबन्धाऽल्पबहुत्वक्रमेण संख्यातेषु सहस्रेषु स्थितिबन्धेषु व्रजितेषु सत्सु 'मोहस्य' मोहनीयकर्मणः 'पल्यमात्रः' एकपल्योपममात्रः स्थितिबन्धो जायते, 'शेषाणां' उक्तोद्धरितानां नाम-गोत्र-ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायरूपाणां 'पल्यसंख्यभागमितः' पल्योपमसंख्येयतमभागप्रमाणः स्थितिबन्धो भवति । उक्तं च **कषायप्राभृतचूर्णौ—** "**एदेणेव कमेण संखेज्जाणि ट्ठिदिबन्धसहस्साणि गदाणि, तदो मोहणीयस्स पलिदोवमट्ठिदिगो बंधो, सेसाणं कम्माणं पलिदोवमस्स संखेज्जदिभागो ट्ठिदिबंधो ।**" **'ताउ परं'** इत्यादि, 'तस्मात्' मोहनीयस्य पल्योपममात्रस्थितिबन्धभवनात् परं 'सर्वेषां कर्मणां' आयुर्वर्जानां सप्तानामपि कर्मणां स्थितिबन्धः संख्यगुणहीनो भवति, प्राक्तनस्थितिबन्धत उत्तरोत्तरस्थितिबन्धः संख्येयगुणेन हीनो हीनतरो जायते इत्यर्थः ॥ ३१ ॥

मोहस्य पल्योपममात्रे स्थितिबन्धे पूर्णे सत्यारभ्यमाणस्थितिबन्धस्याऽल्पबहुत्वमभिधित्सुराह—

**पुण्णे बंधेऽणुकमं तु वीसगाईण संखगुणो ।**
**तो वीसगाण जायइ पलियअसंखेजभागमिओ ॥३२॥ (उपगीतिः)**

पूर्णे बन्धेऽनुक्रमं तु विंशतिकादीनां संख्यगुणः ।
ततो विंशतिकयोर्जायते पल्योपमाऽसंख्येयभागमितः ॥ ३२ ॥ इति पदसंस्कारः ।

**'पुण्णे'** इत्यादि, तत्र 'बंधे' त्ति एकवचननिर्देशात् एकस्मिन् बन्धे—स्थितिबन्धे 'पूर्णे' समाप्तिं गते, मोहनीयस्य यः पल्योपममात्रः स्थितिबन्धः प्रारब्धः, तस्मिन् पूर्णे इत्यर्थः, 'विंशतिकादीनां' विंशतिसागरोपमकोटिकोटिस्थितिकत्रिंशत्सागरोपमकोटिकोटिस्थितिकचत्वारिंशत्सागरोपमकोटिकोटिस्थितिकरूपाणां नाम-गोत्रयोर्ज्ञानावरण—दर्शनावरण—वेदनीया-ऽन्तरायाणां मोहनीयस्य चेत्यर्थः, 'अनुक्रमं तु' क्रममनतिक्रम्य "**योग्यता-वीप्सार्था-ऽनतिवृत्तिसादृश्ये**" (सिद्धहेम०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३-१-४०) इति सूत्रेणा-ऽनतिवृत्तौ अव्ययीभावसमासः, तुरवधारणे यथाक्रममेवेत्यर्थः, स्थिति-बन्धः संख्येयगुणो भवति। इदमुक्तं भवति—मोहनीयस्य पल्योपममात्रे स्थितिबन्धे पूर्णे नाम-गोत्रयोः सर्वाल्पः स्थितिबन्धः, स च पल्योपमसंख्येयभागमितः, स्वस्थाने मिथस्तुल्यः, ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां पल्योपमसंख्येयभागमात्रो भवन्नपि संख्येयगुणो भवति, ततो मोहनीयस्य संख्येयगुणो भवति, सो-ऽपि पल्योपमसंख्येयभागमात्रः, प्राक्तनस्थितिबन्धस्य पल्यो-पममात्रत्वेन सर्वेषां कर्मणां पल्योपममात्रस्थितिबन्धभवनादूर्ध्वमुत्तरोत्तरस्थितिबन्धस्य संख्येयगुण-हानिदर्शनात्। उक्तं च **कषायप्राभृतचूर्णौ**—"**एदम्हि ट्ठिदिबंधे पुण्णे मोहणीयस्स ट्ठिदि-बंधो पलिदोवमस्स संखेज्जदिभागो चेव। ताधे वि अप्पाबहुअं—णामागोदाणं ट्ठिदिबंधो थोवो, णाणावरण—दंसणावरण—वेदणीय-अन्तराइयाणं ट्ठिदिबन्धो संखे-ज्जगुणो, मोहणीयस्स ट्ठिदिबन्धो संखेज्जगुणो।**" इति।

'तो' इत्यादि, 'ततः' अनन्तरोक्तस्थितिबन्धाल्पबहुत्वतः संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु 'विंशतिकयोः' नाम-गोत्रयोः स्थितिबन्धः 'पल्या-ऽसंख्येयभागमितः' पल्योपमाऽसंख्येय-भागमितो* जायते। शेषाणां पञ्चानां तु पूर्ववत्पल्योपमसंख्येयभागप्रमितः स्थितिबन्धो भवति। उक्तं च **कषायप्राभृतचूर्णौ**—"**एदेण कमेण संखेज्जाणि ट्ठिदिबन्धसहस्साणि गदाणि, तदो अण्णो ट्ठिदिबन्धो, जाधे णामागोदाणं पलिदोवमस्स असंखेज्जदिभागो, ताधे सेसाणं कम्माणं ट्ठिदिबंधो पलिदोवमस्स संखेज्जदिभागो।**" इति। नाम-गोत्रयोः पल्योपमा-ऽसंख्येयभागमिते स्थितिबन्धे जाते स्थितिबन्धाल्पबहुत्वमित्थमभिधातव्यम्—नाम-गोत्रयोः सर्वस्तोकः स्थितिबन्धः, पल्योपमा-ऽसंख्येयभागमात्रत्वात्, ततो ज्ञानावरण-दर्शना-वरण-वेदनीया-ऽन्तरायाणां स्थितिबन्धो-ऽसंख्येयगुणः, तस्य पल्योपमसंख्येयभागमात्रत्वात्, ततो मोहनीयस्य स्थितिबन्धः पल्योपमसंख्येयभागमितो भवन्नपि संख्येयगुणो भवति। उक्तं च **कषायप्राभृतचूर्णौ**—"**ताधे अप्पाबहुअं—णामागोदाणं ठिदिबन्धो थोवो, चदुण्हं कम्माणं ठिदिबन्धो असंखेज्जगुणो, मोहणीयस्स ठिदिबन्धो संखेज्जगुणो।**" ततः

---

* अनन्तरोक्ताल्पबहुत्वक्रमेण संख्येयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु नाम-गोत्रयोः पल्योपमा-ऽसंख्येयभागप्रमाणश्चरमस्थितिबन्धो दूरापकृष्टिसंज्ञको भवति। तद्व्याख्या च कर्मप्रकृतिग्रन्थे-ऽस्माभिरुप-शमनाकरणटीकायां कृता, ततोऽवसेया। दूरापकृष्टिसंज्ञकबन्धतः परं नामगोत्रयोरसंख्येयबहुभागाः स्थिति-बन्धतोऽपगच्छन्ति। तेन तदानीं नामगोत्रयोः प्रथमस्थितिबन्धः पल्योपमा-ऽसंख्येयभागप्रमाणो भवती-त्याहुर्जयधवलाकाराः। तथा च तद्ग्रन्थः—"**एवमेदेण अप्पाबहुविहिणा सव्वेसिं कम्माणं पलिदो०-संखेज्जभागिगेसु संखेज्जेसु ट्ठिदिबंधसहस्सेसु गदेसु तदो णामागोदाणं वा पच्छिमे पलिदोवमस्स संखेज्ज-भागिगे ट्ठिदिबंधे दूरावकिट्टिसंणिदे संपत्ते तदो असंखेज्जे भागे ट्ठिदिबंधेणोसरमाणस्स जाधे णामागोदाणं पलिदो०असंखभागिओ पढमो ट्ठिदिबंधो जादो। ताधे अण्णारिसमप्पाबहुअं होदि त्ति।**" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभृति नाम-गोत्रयोरुत्तरोत्तरस्थितिबन्धो-ऽसंख्यातगुणहीनो जायते, शेषाणां तु पूर्ववत् संख्यातगुणहीनो भवति ॥ ३२ ॥

निरुक्ता-ऽल्पबहुत्वक्रमेण संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु ज्ञानावरणादीनां मोहनीयस्य च स्थितिबन्धमाविश्चिकीर्षुराह—

**तो तीसगाण पल्लस्स असंखंसो तओ य मोहस्स ।**
**पल्लअसंखंसोऽन्तोलक्खं संतं य सत्तण्हं ॥ ३३ ॥**

ततस्त्रिंशत्कानां पल्यस्या-ऽसंख्यांशस्ततश्च मोहस्य ।
पल्या-ऽसंख्यांशो-ऽन्तर्लक्षं सत्त्वं च सप्तानाम् ॥ ३३ ॥ इति पदसंस्कारः ।

'तो' इत्यादि, 'ततः' नाम-गोत्रयोः स्थितिबन्धस्य पल्योपमाऽसंख्येयभागमात्रत्वभवनात् स्थितिबन्धसहस्रेषु गतेषु 'त्रिंशत्कानां' ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां बन्धः 'पल्यस्या-ऽसंख्यांशः' पल्योपमा-ऽसंख्येयभागप्रमितो* भवति । उक्तं च **कषायप्राभृतचूर्णौ-"तदो संखेज्जेसु ठिदिबन्धसहस्सेसु गदेसु तिण्हं घादिकम्माणं वेदणीयस्स च पलिदोवमस्स असंखेज्जदिभागो ठिदिबन्धो जादो ।"** यदा ज्ञानावरणादीनां स्थितिबन्धः पल्योपमाऽसंख्येयभागमितो भवति, तदा स्थितिबन्धाऽल्पबहुत्वं निगद्यते—नाम-गोत्रयोः सर्वस्तोकः स्थितिबन्धः, स च पल्योपमाऽसंख्येयभागप्रमाणो भवति, स्वस्थाने तु मिथस्तुल्यः । ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां स्थितिबन्धः पल्योपमाऽसंख्येयभागमात्रो भवन्नप्यसंख्येयगुणो भवति । ततो मोहनीयस्या-ऽसंख्येयगुणः, पल्योपमसंख्येयभागमात्रत्वात् । उक्तं च **कषायप्राभृतचूर्णौ—"ताधे अप्पाबहुअं–णामागोदाणं ठिदिबन्धो थोवो, चउण्हं कम्माणं ठिदिबन्धो असंखेज्जगुणो, मोहणीयस्स ठिदिबन्धो असंखेज्जगुणो ।"** ततो ज्ञानावरणादीनामप्युत्तरोत्तरस्थितिबन्धो-ऽसंख्यातगुणहीनः प्रवर्तते ।

मोहनीयस्य स्थितिबन्धमाविश्चिकीर्षुर्भणति–'तओ य' इत्यादि, 'ततश्च' ज्ञानावरणादीनां पल्योपमा-ऽसंख्येयभागप्रमाणस्थितिबन्धभवनाच्च प्रागुक्ता-ऽल्पबहुत्वक्रमेण संख्यातेषु स्थितिब-

---

* अनन्तरोक्ता–ऽल्पबहुत्वक्रमेण संख्यातस्थितिबन्धेषु सहस्रेषु गतेषु ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां चरमः पल्योपमसंख्येयभागमानः स्थितिबन्धो दूरापकृष्टिसंज्ञको भवति । ततश्चतुर्णां ज्ञानावरणादीनामसंख्येयबहुभागाः स्थितिबन्धतोऽपगच्छन्ति । तेन ज्ञानावरणादीनां प्रथमस्थितिबन्धः पल्योपमाऽसंख्येयभागमात्रो भवतीति जयधवलाकाराः । अक्षराणि त्वेवम्—**"एवमेदेण अप्पाबहुअविधिणा पुणो वि संखेज्जसहस्समेत्तेसु ट्ठिदिबंधेसु समइक्कंतेसु तदो णाणावरण-दंसणावरण-वेदणीय-अंतराइयाणं पि दुरावकिट्टीविसये संपत्ते तदो प्पहुडि तेसिं पि असंखेज्जे भागे ट्ठिदिबन्धेणोसरमाणस्स पढमे पलिदो० असंखे० भागिए पडिबंधे जादे तत्तो पाए अण्णारिसमप्पाबहुअं पयट्टदि ।"**

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

न्धसहस्रेषु व्यतिक्रान्तेषु 'मोहस्य' मोहनीयस्य कर्मणः 'पल्या-ऽसंख्यांशः' पल्योपमाऽसंख्येय-भागमात्रः* स्थितिबन्धो भवतीत्यर्थः । इत्थं तदानीं सप्तानामपि कर्मणां स्थितिबन्धः पल्योपमा-ऽसंख्येयभागमितो भवति । उक्तं च **कषायप्राभृतचूर्णौ**—**"तदो संखेज्जेसु ठिदिबन्ध-सहस्सेसु गदेसु मोहणीयस्स वि पलिदोवमस्स असंखेज्जदिभागो ठिदिबन्धो जादो ।"** इतः प्रभृति सप्तानामपि कर्मणां स्थितिबन्धः पल्योपमा-ऽसंख्येयभागमात्रस्तावद् वक्तव्यः ,यावत् स्थितिबन्धे विशेषो नाभिधीयेत ।

यदा मोहनीयस्य स्थितिबन्धः पल्योपमाऽसंख्येयभागप्रमितो भवति, तदा स्थितिबन्धा-ल्पबहुत्वं भण्यते–नाम-गोत्रयोः सर्वाल्पः स्थितिबन्धः, स्वस्थाने तु मिथः समानः, ततो ज्ञाना-वरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः, ततो मोहनीय-स्याऽसंख्येयगुणः । उक्तं च **कषायप्राभृतचूर्णौ**—**"जाधे पढमदाए मोहणीयस्स पलि-दोवमस्स असंखेज्जदिभागो ठिदिबन्धो जादो, ताधे अप्पाबहुअं–णामागोदाणं ठिदिबन्धो थोवो, चदुण्हं कम्माणं ठिदिबन्धो तुल्लो असंखेज्जगुणो, मोहणीयस्स ठिदिबन्धो असंखेज्जगुणो ।"** इतः प्रभृति मोहनीयस्या-ऽप्युत्तरोत्तरस्थितिबन्धो-ऽसंख्येय-गुणहीनो भवति ।

यदा मोहनीयस्य पल्योपमा-ऽसंख्येयभागमितो भवति, तदा स्थितिसत्त्वं विभणिषुराह–**'न्तोलक्खं'** इत्यादि, सन्धिविश्लेषे सत्यकारे प्राप्ते 'अन्तोलक्खं' ति 'अन्तर्लक्षम्' लक्षस्य–सागरोपम-शतसहस्राणामन्तर्–मध्ये सागरोपमसहस्रपृथक्त्वमित्यर्थः, 'सत्त्वं' स्थितिसत्कर्म 'सप्तानाम्' आयुर्व-र्जानां कर्मणां भवतीति शेषः । अयं भावः—यदा नाम-गोत्रयोः स्थितिबन्धः पल्योपममात्रो-ऽभवत्, तदा-ऽऽयुर्वर्जानां सर्वेषां कर्मणां यत् स्थितिसत्त्वं सागरोपमशतसहस्रपृथक्त्वमात्रमासीत्, तत् संख्यातसहस्रैः स्थितिघातैर्घातितं सदिदानीं सागरोपमसहस्रपृथक्त्वप्रमितं भवति । उक्तं च **कषायप्राभृतचूर्णौ**—**"ताधे ठिदिसंतकम्मं सागरोपमसहस्सपुधत्तमंतोसदसहस्स-स्स ।"** ॥ ३३ ॥

---

* ज्ञानावरणादीनां पल्योपमा-ऽसंख्येयभागप्रमितस्थितिबन्धभवनादुक्तस्थितिबन्धा-ऽल्पबहुत्व–क्रमेण संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु मोहनीयस्य दूरापकृष्टि प्राप्तस्य जन्तोः पल्योपमसंख्येय-भागमितश्चरमस्थितिबन्धो जायते, ततो मोहनीयस्य स्थितिबन्धतो-ऽसंख्येयबहुभागा अपगच्छन्ति, एकभागश्च बध्यते । तदानीं मोहनीयस्य प्रथमः पल्योपमा-ऽसंख्येयभागमानः स्थितिबन्धो भवतीति जयधवलाकारै–रुक्तम् । अक्षराणि त्वेवम्—**"एवमेदेणाणंतरपरूविदेण अप्पाबहुअविहाणेण पुणो वि संखेज्जसहस्समेत्तेसु ट्ठिदिबंधेसु वदिक्किंतेसु मोहणीयस्स वि दूरावकिट्टिविसये जहाकमं संपत्ते तदो प्पहुडि तस्स वि असंखेज्जे भागे ट्ठिदिबंधेणोसरमाणस्स पलिदोवमस्सासंखेज्जदिभागिओ पढमो ट्ठिदिबंधो समाढत्तो त्ति ।"**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु मोहनीयस्य स्थितिबन्धः क्रमेण ज्ञानावरणादीनां नाम-गोत्रयोश्चा-ऽधस्ताद् गच्छति, तदाविश्चिकीर्षुराह—

**ताउ असंखगुणो एक्कपहारेणेइ तीसगाए अहो ।**
**मोहट्ठिइबंधो तो वीसगहेट्ठा कमेण-ऽसंखगुणो ॥ ३४ ॥ (गीतिः)**

तस्मादसंख्येयगुण एकप्रहारेणैति त्रिंशत्कानामधः ।
मोहस्थितिबन्धस्ततो विंशतिका-ऽधस्तात् क्रमेणा-ऽसंख्यगुणः ॥३४॥इति पदसंस्कारः ।

'**ताउ**' इत्यादि, 'तस्मात्' मोहनीयकर्मणः पल्योपमा-ऽसंख्येयभागप्रमाणस्थितिबन्धभवनात् स्थितिबन्धसंख्यसहस्रेषु गतेषु 'एक्क०' त्ति "लुक्" (सिद्धहेम०८-१-१०) इति सन्धिसूत्रेण 'एइ' त्ति पदस्थे एकारे परे णकारोत्तरा-ऽकारस्य लोपो जातः, सन्धिविश्लेषे पुनरकारः प्राप्त इति कृत्वा 'एक्कपहारेण' त्ति 'एकप्रहारेण' एकहेलयैव 'त्रिंशत्कानां' ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामधो-ऽसंख्येयगुणो 'मोहस्थितिबन्धः, मोहनीयकर्मणः स्थितिबन्धः 'एति' गच्छति, एकप्रहारेण ज्ञानावरणादितो मोहनीयस्य स्थितिबन्धो-ऽसंख्येयगुणहीनो जायते इत्यर्थः, तत्प्राक्तना मोहनीयसंख्येयसहस्रस्थितिबन्धा ज्ञानावरणादितो-ऽसंख्येयगुणवृद्धा व्यतिक्रान्ताः, सम्प्रत्यनन्तरपूर्वस्थितिबन्धा-ऽपेक्षया मोहनीयस्थितिबन्धस्यैतावद्धानिर्भवति, येन ज्ञानावरणादितो-ऽसंख्येयगुणहीनो मोहनीयस्थितिबन्धो जायते, मोहनीयस्या-ऽप्रशस्ततमत्वात् प्रभूता हानिर्न विरुध्यते इति भावः । तदानीमल्पबहुत्वमित्थं प्ररूपयितव्यम्—नाम-गोत्रयोः सर्वस्तोकः स्थितिबन्धः स्वस्थाने तु मिथस्तुल्यः, ततो मोहनीयस्या-ऽसंख्येयगुणः, ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां स्थितिबन्धो-ऽसंख्येयगुणः, स्वस्थाने तु मिथः समानः । उक्तं च **कषायप्राभृतचूर्णौ**—"**एदेण कमेण संखेज्जाणि ठ्ठिदिबन्धसहस्साणि गदाणि, तदो जम्हि अण्णो ठ्ठिदिबंधो तम्हि एक्कसराहेण णामागोदाणं ठ्ठिदिबन्धो थोवो, मोहणीयस्स ठ्ठिदिबन्धो असंखेज्जगुणो, चदुण्हं कम्माणं ठ्ठिदिबंधो तुल्लो असंखेज्जगुणो ।**" इति ।

'**तो**' इत्यादि, 'ततः' ज्ञानावरणाद्यपेक्षया मोहनीयस्थितिबन्धस्या-ऽसंख्येयगुणहीनत्वभवनात् स्थितिबन्धसंख्यातसहस्रेषु गतेषु मोहनीयस्थितिबन्ध एकप्रहारेण 'विंशतिका-ऽधस्तात्' नाम-गोत्रयोरधस्तादसंख्येयगुण एति, नामगोत्रतो-ऽसंख्येयगुणहीनो जायते मोहनीयस्या ऽप्रशस्ततमत्वेन प्रभूतहानिसम्भवादित्यर्थः । इदमुक्तं भवति—इतः पूर्वं ये संख्येयसहस्राणि मोहनीयस्य स्थितिबन्धा व्यतिक्रान्ताः, ते सर्वे नामगोत्रयोः स्थितिबन्धतो-ऽसंख्येयगुणवृद्धाः, सम्प्रत्येकहेलयैव नामगोत्रतो मोहनीयस्थितिबन्धो-ऽसंख्येयगुणहीनो जायते । तदानीमल्पबहुत्वमभिधित्सुराह—"**कमेण**" इत्यादि, प्रागपि नामगोत्रयोः स्थितिबन्धतो ज्ञानावरणादीनामसंख्येयगुण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसीत्, मोहनीयस्य तु सम्प्रति नामगोत्रतोऽसंख्येयगुणहीनो जातः । तेन मोहनीयस्य नामगोत्रयोर्ज्ञानावरण–दर्शनावरण–वेदनीया-ऽन्तरायाणां च स्थितिबन्धः क्रमेणाऽसंख्यगुणो भवति । तथाहि—मोहनीयस्य स्थितिबन्धः सर्वस्तोकः, ततो नामगोत्रयोरसंख्येयगुणः, स्वस्थाने तु मिथस्तुल्यः, ततोऽपि ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामसंख्येयगुणः, स्वस्थाने तु मिथः सदृक्षः । उक्तं च **कषायप्राभृतचूर्णौ—"एदेण कमेण संखेज्जाणि ट्ठिदिबन्धसहस्साणि गदाणि, तदो जम्हि अण्णो ट्ठिदिबन्धो, तम्हि एक्कसराहेण मोहनीयस्स ट्ठिदिबन्धो थोवो, णामागोदाणं ट्ठिदिबन्धो असंखेज्जगुणो, चदुण्हं कम्माणं ट्ठिदिबन्धो तुल्लो असंखेज्जगुणो ।"** इति ॥ ३४ ॥

नामगोत्रा-ऽपेक्षया मोहनीयस्थितिबन्धस्या-ऽसंख्येयगुणहीनत्वभवनात् यद्भवति, तदुक्तुकाम आह—

**तो वेअणिज्जबंधो सेसाणं तीसगाण उवरिं उ ।**
**तो सेसतीसगाणं ठिइबंधो वीसगाण अहो ॥ ३५ ॥**

तस्माद् वेदनीयबन्धः शेषाणां त्रिंशत्कानामुपरि तु ।
तस्मात् शेषत्रिंशत्कानां स्थितिबन्धो विंशतिकयोरधः ॥ ३५ ॥ इति पदसंस्कारः ।

'**तो**' इत्यादि, 'असंखगुणो एक्कपहारेण' इति पदत्रयं पूर्वतोऽनुवर्तते । 'तस्मात्' नामगोत्रस्थितिबन्धतो मोहनीयस्थितिबन्धस्याऽसंख्येयगुणहीनत्वभवनात् संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु 'वेदनीयबन्धः' वेदनीयकर्मणः स्थितिबन्ध एकप्रहारेण 'शेषाणां त्रिंशत्कानां' ज्ञानावरणदर्शनावरणाऽन्तरायाणामुपरि असंख्यगुण एति-गच्छति, ज्ञानावरणादितो-ऽसंख्येयगुणो जायते, ज्ञानावरणादीनामप्रशस्ततरत्वेन प्रभूतहानिसंभवादिति भावः । 'तु'तुः पादपूरणे । इदमुक्तं भवति–इतः प्रागुत्तरोत्तरस्थितिबन्धोऽसंख्येयगुणहीनो भवन् ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां मिथः समान आसीत्, सम्प्रत्येकहेलयैव ज्ञानावरण-दर्शनावरणाऽन्तरायाणां प्रभूतः स्थितिबन्धो हीयते, येन वेदनीयतो ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामसंख्येयगुणहीनः संजायते । ततश्च ज्ञानावरणादितो वेदनीयस्य स्थितिबन्धोऽसंख्येयगुणो भवति । तदानीं स्थितिबन्धाल्पबहुत्वं चिन्त्यते-मोहनीयस्य स्थितिबन्धः सर्वस्तोकः, ततो नाम-गोत्रयोरसंख्येयगुणः,ततो ज्ञानावरण-दर्शनावरणा-न्तरायाणामसंख्येयगुणो भवति, ततो-ऽपि वेदनीयस्या-ऽसंख्येयगुणः । उक्तं च **कषायप्राभृतचूर्णौ-"एदेण कमेण संखेज्जाणि ट्ठिदिबंधसहस्साणि गदाणि, तदो जम्हि अण्णो ट्ठिदिबंधो तम्हि एक्कसराहेण मोहणीयस्स ठिदिबंधो थोवो, णामागोदाणं ठिदिबंधो असंखेज्जगुणो तिण्हं घादिकम्माणं ठिदिबंधो असंखेज्जगुणो, वेदणीयस्स ठिदिबंधो असंखेज्जगुणो ।** '**तो**' इत्यादि, 'तस्मात्' घातित्रयतो वेदनीयस्थितिबन्धस्या-ऽसंख्येयगुणत्व-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

भवनात् संख्यातेषु स्थितिबन्धसहस्रेषु अजितेषु सत्सु 'शेषत्रिंशत्कानां' शेषत्रिंशत्सागरोपमकोटीकोटी-स्थितिकानां ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामित्यर्थः, स्थितिबन्ध एकप्रहारेण 'विंशतिकयोः' नाम-गोत्रयोः 'अधः' अधस्ताद् असंख्येयगुणो गच्छति, नामगोत्रतोऽसंख्येयगुणहीनो जायते, ज्ञानावरणदर्शनावरणाऽन्तरायाणामप्रशस्ततरत्वेन प्रभूतहानिसंभवादित्यर्थः ॥ ३५ ॥

तदानीं नाम-गोत्रतो वेदनीयस्य स्थितिबन्धः कियान् भवति ? इत्यत आह—

ताहे वीसगबंधा तइयस्स विसेसअहिगो खु ।
एवंकमेण गच्छइ बंधो अह भणिमु ठिइसंतं ॥३६॥ (उपगीतिः)

तदा विंशतिकबन्धात् तृतीयस्य विशेषाधिकः खलु ।
एवंक्रमेण गच्छति बन्धोऽथ भणामः स्थितिसत्त्वम् ॥ ३६ ॥ इति पदसंस्कारः ।

'ताहे' इत्यादि, 'तदा' यदा ज्ञानावरणादीनां स्थितिबन्धस्या-ऽधस्तादसंख्यगुणो नाम-गोत्रयोः स्थितिबन्धो गच्छति, तदानीमित्यर्थः, 'विंशतिकबन्धात्' नाम-गोत्रयोः स्थितिबन्धात् 'तृतीयस्य' वेदनीयकर्मणः स्थितिबन्धो विशेषाधिकः खलु—निश्चयेन जायते, न ततो-ऽधिकः, विंशतिसागरोपमकोटीकोटिस्थितिकनामगोत्रतस्त्रिंशत्सागरोपमकोटीकोटीस्थितिकवेदनीयस्थितिबन्धस्य त्रिद्विभागगुणसंभवात् । तदानीं स्थितिबन्धाल्पबहुत्वमित्थं निरूपयितव्यम्-मोहनीयस्य स्थितिबन्धः सर्वस्तोकः, ततो ज्ञानावरण-दर्शनावरण—ऽन्तरायाणामसंख्येयगुणः, ततो नाम-गोत्रयोरसंख्येयगुणः, ततो वेदनीयस्य विशेषाधिकः । उक्तं च कषायप्राभृतचूर्णौ—"एवं संखेज्जाणि **ठिदिबन्धसहस्साणि गदाणि, तदो अण्णो ठिदिबन्धो एक्कसराहेण मोहणीयस्स ठिदिबन्धो थोवो, तिण्हं घादिकम्माणं ठिदिबन्धो असंखेज्जगुणो, णामागोदाणं ठिदिबन्धो असंखेज्जगुणो, वेदणीयस्स ठिदिबन्धो विसेसाहिओ।**" 'एवंकमेण' इत्यादि, 'एवंक्रमेण' चरमाऽल्पबहुत्वक्रमेण 'बन्धो' अभिनवोऽभिनवः स्थितिबन्धो 'गच्छति' व्यतिक्रामति ।

स्थितिबन्धं विस्तरतो-ऽभिधाय सम्प्रति स्थितिसत्त्वं निजिगदिषुराह—'अह' इत्यादि, 'अथ' अथशब्दोऽनन्तरार्थकः, स्थितिबन्धप्ररूपणा-ऽनन्तरमित्यर्थः, 'स्थितिसत्त्वं' सप्तानामप्यायुर्वर्जानां कर्मणां स्थितिसत्कर्म 'भणामः' शब्दतः प्रतिपादयिष्यामः ॥ ३६ ॥

प्रतिज्ञातमेवा-ऽऽह—

तत्तो असण्णितुल्लं ठिइसंतं ताउ बंधव्व ।
ता णेयं जावंतप्पबहुत्तं खलु ण पाविज्ज ॥ ३७ ॥ (उपगीतिः)

Jain Education International　　　　For Private & Personal Use Only　　　　www.jainelibrary.org

ततोऽसंज्ञितुल्यं स्थितिसत्त्वं तस्माद् बन्धवत् ।
तावज्ज्ञेयं यावदन्ता-ऽल्पबहुत्वं खलु न प्राप्येत ॥३७॥ इति पदसंस्कारः ।

'तत्तो' इत्यादि, 'ततः' मोहनीयस्य स्थितिबन्धः सर्वाल्पस्ततो ज्ञानावरण-दर्शनावरणाऽन्तरायाणामसंख्येयगुणस्ततो नाम-गोत्रयोरसंख्येयगुणस्ततो वेदनीयस्य विशेषाधिक इत्येवंरूपस्थितिबन्धा-ऽल्पबहुत्वभवनात् परं संख्येयेषु स्थितिबन्धसहस्रेष्वतिक्रान्तेषु 'असंज्ञितुल्यं' असंज्ञिस्थितिबन्धेन तुल्यं-सदृशं 'स्थितिसत्त्वं' आयुर्वर्जसप्तकर्मणां स्थितिसत्कर्म भवति, मोहनीयस्य स्थितिसत्त्वं सागरोपमसहस्रचतुःसप्तभागप्रमितं ($\frac{१०००\times४}{७}$) ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां सागरोपमसहस्रत्रिसप्तभागमानं ($\frac{१०००\times३}{७}$) नाम-गोत्रयोः सागरोपमसहस्रद्विसप्तभागमात्रं ($\frac{१०००\times२}{७}$) भवतीत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—"एदेणेव कमेण संखेज्जाणि ट्ठिदिबन्धसहस्साणि गदाणि, तदो ठिदिसंतकम्ममसण्णिठिदिबन्धेण समगं जादं ।"** इति ।

'ताउ' इत्यादि, 'तस्मात्' असंज्ञिबन्धतुल्यस्थितिसत्त्वभवनात्परं 'बन्धवत्' स्थितिबन्धवत् तावज्ज्ञेयम् यावद् 'अन्ता-ऽल्पबहुत्वम्' चरमाऽल्पबहुत्वम्, मोहनीयस्थितिसत्त्वं स्तोकं ततो ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां स्थितिसत्त्वमसंख्येयगुणं ततो नाम-गोत्रयोरसंख्येयगुणं ततो वेदनीयस्य विशेषाधिकमित्येवंलक्षणं खलु न प्राप्येत । इदमुक्तं भवति—सप्तानामपि कर्मणामसंज्ञिस्थितिबन्धतुल्यस्थितिसत्त्वभवनात् संख्यातेषु स्थितिबन्धेषु सहस्रेषु गतेषु सत्सु सप्तानां कर्मणां चतुरिन्द्रियस्थितिबन्धेन सदृशं स्थितिसत्त्वं भवति, मोहनीयस्य स्थितिसत्त्वं सागरोपमशतचतुःसप्तभागमितम् ($\frac{१००\times४}{७}$), ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां सागरोपशतत्रिसप्तभागमात्रम् ($\frac{१००\times३}{७}$), नाम-गोत्रयोः सागरोपमशतद्विसप्तभागमानं ($\frac{१००\times२}{७}$), भवतीत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—"तदो संखेज्जेसु ठिदिबन्धसहस्सेसु गदेसु चउरिंदियट्ठिदिबन्धेण समगं जादं ।"** इति ।

ततः पुनः संख्यातेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु त्रीन्द्रियस्थितिबन्धसमानं स्थितिसत्त्वं भवति, मोहनीयस्य स्थितिसत्त्वं पञ्चाशत्सागरोपमचतुःसप्तभागप्रमितम् ($\frac{५०\times४}{७}$), ज्ञानावरणादीनां चतुर्णां पञ्चाशत्सागरोपमत्रिसप्तभागप्रमितम् ($\frac{५०\times३}{७}$), नाम-गोत्रयोस्तु पञ्चाशत्सागरोपमद्विसप्तभागप्रमितं ($\frac{५०\times२}{७}$), भवतीत्यर्थः । ततः संख्यातेषु सहस्रस्थितिबन्धेषु व्रजितेषु सत्सु द्वीन्द्रियस्थितिबन्धसदृशं स्थितिसत्त्वं भवति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहनीयस्य स्थितिसत्कर्म पञ्चविंशतिसागरोपमचतुःसप्तभागप्रमाणम् ($\frac{२५\times४}{७}$), ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां पञ्चविंशतिसागरोपमत्रिसप्तभागमितम् ($\frac{२५\times३}{७}$),नाम-गोत्रयोः पञ्चविंशतिसागरोपमद्विसप्तभागमानं ($\frac{२५\times२}{७}$), भवतीत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ—"एवं तीइंदियबीइंदियठिदिबन्धेण समगं जादं।"** इति।

ततो भूयः संख्यातस्थितिबन्धसहस्रेषु व्यतिक्रान्तेषु स्थितिसत्त्वमेकेन्द्रियस्थितिबन्धेन सदृशं भवति,मोहनीयस्य सागरोपमचतुःसप्तभागप्रमाणम् ($\frac{४}{७}$) ज्ञानावरण-दर्शनावरण-वेदनीयाऽन्तरायाणां सागरोपमत्रिसप्तभागमात्रम् ($\frac{३}{७}$) नाम-गोत्रयोः सागरोपमद्विसप्तभागप्रमितं ($\frac{२}{७}$) भवतीत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ—"तदो संखेज्जेसु ट्ठिदिखंडयसहस्सेसु गदेसु एइंदियठिदिबन्धेण समगं ट्ठिदिसंतकम्मं जादं।"** अत्र कषायप्राभृतचूर्णिकारैः स्थितिखण्डसहस्रेषु गतेष्वित्युक्तम्, स्थितिघाताद्धायाः स्थितिबन्धाद्धया तुल्यत्वेनाऽन्यतरोपादाने विरोधाभावात्। तेन वयमपीतः परं स्थितिबन्धसहस्रेषु गतेष्वित्यस्य स्थाने स्थितिखण्डसहस्रेषु गतेष्वित्यभिधास्यामहे।

एकेन्द्रियबन्धतुल्यस्थितिसत्त्वभवनात् संख्यातेषु स्थितिखण्डसहस्रेषु गतेषु सत्सु नाम-गोत्रयोः स्थितिसत्त्वं पल्योपममात्रं भवति, ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां सार्धपल्योपममितं भवति, मोहनीयस्य तु पल्योपमद्वयमात्रं भवति। उक्तं च **कषायप्राभृतचूर्णौ—"तदो संखेज्जेसु ट्ठिदिखंडयसहस्सेसु गदेसु णामागोदाणं पलिदोवमट्ठिदिसंतकम्मं जादं। ताधे चदुण्हं कम्माणं दिवड्ढपलिदोवमट्ठिदिसंतकम्मं, मोहणीयस्स वि बेपलिदोवमठिदिसंतकम्मं।"** अत्र युक्तिस्तु स्थितिबन्धवदुपन्यसनीया, एवमग्रेऽपि। तदानीं स्थितिसत्त्वा-ऽल्पबहुत्वमित्थं प्ररूपयितव्यम्—नामगोत्रयोः स्थितिसत्त्वं सर्वस्तोकम्, स्वस्थाने मिथस्तुल्यम्। ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां विशेषाधिकम्, सार्धपल्योपममात्रत्वात् स्वस्थाने तु परस्परं तुल्यम्। ततो-ऽपि मोहनीयस्य विशेषाधिकम्, पल्योपमद्वयमात्रत्वात्। इतः परं नाम-गोत्रयोः स्थितिसत्त्वस्य संख्येयगुणहानिर्भवति, प्रतिस्थितिघातेन सत्तागतस्थितेः संख्येयबहुभागा विनाश्यन्त इत्यर्थः, यतः प्रभृति यस्य कर्मणः पल्योपममात्रं स्थितिसत्त्वं भवति, ततः परं प्रतिस्थितिघातेन तस्य कर्मणः स्थितिसत्त्वं संख्येयगुणहीनं भवतीति व्याप्तेः। शेषाणां पञ्चानां कर्मणां तु पल्योपमसंख्येयभागमितं स्थितिखण्डं विनाशयति। तेन नाम-गोत्रयोः पल्योपममात्रस्थितिसत्त्वभवनादेकस्मिन् स्थितिखण्डे घातिते नाम-गोत्रयोः स्थितिसत्त्वं पल्योपमसंख्येयभागप्रमाणं भवति। उक्तं च **कषायप्राभृतचूर्णौ—"एदम्हि ट्ठिदिखंडये उक्किण्णे णामागोदाणं पलिदोवमस्स संखेज्जदिभागियं ठिदिसंतकम्मं।"** ज्ञानावरण-दर्शनावरण-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वेदनीया-ऽन्तरायाणां देशोनसार्धपल्योपममात्रं स्थितिसत्त्वम्, मोहस्य पुनर्देशोनद्विपल्योपममात्रं भवति। तदानीमल्पबहुत्वं चिन्त्यते—नामगोत्रयोः सर्वस्तोकं स्थितिसत्त्वम्, स्वस्थाने तु मिथस्तुल्यम्, तच्च पल्योपमसंख्येयभागमानं भवति। ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां संख्येयगुणम्; देशोनसार्धपल्योपममितत्वात्, स्वस्थाने तु मिथ एकादृशम्। ततो-ऽपि मोहनीयस्य विशेषाधिकम्, देशोनपल्योपमद्वयमात्रत्वात्। उक्तं च **कषायप्राभृतचूर्णौ**—"**ताधे अप्पाबहुअं–सव्वत्थोवं णामागोदाणं ट्ठिदिसंतकम्मं, चदुण्हं कम्माणं ट्ठिदिसंतकम्मं तुल्लं संखेज्जगुणं, मोहणीयस्स ठिदिसंतकम्मं विसेसाहियं** ।" इति।

अनेन स्थितिसत्त्वा-ऽल्पबहुत्वक्रमेण स्थितिखण्डसंख्यातसहस्रेषु गतेषु सत्सु ज्ञानावरण-दर्शनावरणवेदनीयाऽन्तरायाणामपि पल्योपममात्रं स्थितिसत्त्वं भवति, मोहनीयस्य तु त्रिभागाधिकपल्योपमप्रमितं जायते। न्यगादि च **कषायप्राभृतचूर्णौ**—"**एदेण कमेण ठिदिखण्डयपुधत्ते गदे तदो चउण्हं कम्माणं पलिदोवमट्ठिदिसंतकम्मं, ताधे मोहणीयस्स पलिदोवमतिभागुत्तरं ठिदिसंतकम्मं** ।" अतः परं ज्ञानावरणादीनां प्रतिस्थितिघातेन स्थितिसत्त्वं संख्येयगुणहीनं भवति, व्याप्तेः प्रागुक्तत्वात्। मोहनीयस्य तु पूर्ववत् प्रतिस्थितिघातेन पल्योपमसंख्येयभागं नाशयति। तेन ज्ञानावरणादीनां पल्योपममात्रस्थितिसत्त्वभवनादेकस्मिन् स्थितिघाते पूर्णे ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामपि स्थितिसत्त्वं पल्योपमसंख्येयभागप्रमितं भवति। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो ट्ठिदिखण्डये पुण्णे चदुण्हं कम्माणं पलिदोवमस्स संखेज्जदिभागो ट्ठिदिसंतकम्मं** ।" मोहनीयस्य तु देशोनत्रिभागोत्तरपल्योपममात्रं भवति। तदानीं स्थितिसत्त्वा-ऽल्पबहुत्वं निगद्यते—नाम-गोत्रयोः स्थितिसत्त्वं सर्वस्तोकम्, तच्च पल्योपमसंख्येयभागमानम्, स्वस्थाने मिथस्तुल्यं भवति, ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां पल्योपमसंख्येयभागप्रमितं भवदपि संख्येयगुणम्, स्वस्थाने तु मिथः सदृशम्, ततो मोहनीयस्य संख्येयगुणम्, तस्य देशोनत्रिभागाधिकपल्योपममात्रत्वात्। उक्तं च **कषायप्राभृतचूर्णौ**—"**ताधे अप्पाबहुअं-सव्वत्थोवं णामागोदाणं ट्ठिदिसंतकम्मं, चदुण्हं कम्माणं ट्ठिदिसंतकम्मं तुल्लं संखेज्जगुणं, मोहणीयस्स ट्ठिदिसंतकम्मं संखेज्जगुणं** ।"इति।

अनेन स्थितिसत्त्वा-ऽल्पबहुत्वक्रमेण स्थितिघातसहस्रेषु व्रजितेषु सत्सु मोहनीयस्य स्थितिसत्त्वं पल्योपममात्रं भवति। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो ठिदिखण्डयपुधत्तेण मोहणीयस्स ठिदिसंतकम्मं पलिदोवमं जादं** ।" इतः परं प्रतिस्थितिघातेन मोहनीयस्थितिसत्त्वमपि संख्येयगुणहीनं भवति, व्याप्तेः प्रागुक्तत्वात्। इत्थमितः परं सर्वेषां कर्मणां प्रतिस्थितिघातेन स्थितिसत्त्वं संख्येयगुणहीनं जायते। तेन मोहनीयस्य पल्योपममात्रस्थितिसत्त्वभवनादेक-

Jain Education International　　　　For Private & Personal Use Only　　　　www.jainelibrary.org

स्मिन् स्थितिघाते पूर्णे मोहनीयस्या-ऽपि स्थितिसत्कर्म पल्योपमसंख्येयभागमितं भवति। अत एव तदानीं सर्वेषां कर्मणां स्थितिसत्त्वं पल्योपमसंख्येयभागमात्रं भवति। उक्तं च **कषायप्राभृत-चूर्णौ**—"**तदो ठिदिखण्डए पुण्णे सत्तण्हं कम्माणं पलिदोवमस्स संखेज्जदिभागो ठिदिसंतकम्मं जादं।**" इति। तदानीं स्थितिसत्त्वाऽल्पबहुत्वमित्थं निगदितव्यम्—नाम-गोत्रयोः स्थितिसत्त्वं सर्वस्तोकम्, ततो ज्ञानावरणदर्शनावरणवेदनीयाऽन्तरायाणां संख्येयगुणम्, ततोऽपि मोहनीयस्य संख्येयगुणम्।

ततः परं संख्यातेषु स्थितिघातसहस्रेषु व्यतिक्रान्तेषु नाम-गोत्रयोः स्थितिसत्त्वं पल्योपमाऽसंख्येयभागप्रमाणं भवति। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो संखेज्जेसु ठिदिखण्डयसहस्सेसु गदेसु णामागोदाणं पलिदोवमस्स असंखेज्जदिभागो ठिदिसंतकम्मं जादं।**" तदानीमल्पबहुत्वं विचार्यते—नाम-गोत्रयोः स्थितिसत्त्वं सर्वस्तोकं स्वस्थाने मिथः समानम्, तच्च पल्योपमाऽसंख्येयभागमानम्, ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामसंख्येयगुणम्, पल्योपमसंख्येयभागमात्रत्वात्, स्वस्थाने तु मिथः सदृशम्, ततो मोहनीयस्य पल्योपमसंख्येयभागमितं भवदपि संख्येयगुणं भवति। उक्तं च **कषायप्राभृत-चूर्णौ**—"**ताधे अप्पाबहुअं-सव्वत्थोवं णामागोदाणं ठिदिसंतकम्मं, चउण्हं कम्माणं ठिदिसंतकम्मं तुल्लमसंखेज्जगुणं, मोहणीयस्स ठिदिसंतकम्मं संखेज्जगुणं।**" इति। इतः प्रभृति नामगोत्रयोः स्थितिसत्त्वं प्रतिस्थितिघातेना-ऽसंख्येयगुणहीनं जायते।

ततः परमनन्तरोक्ता-ऽल्पबहुत्वक्रमेण स्थितिखण्डेषु संख्यातसहस्रेषु व्यतीतेषु ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां स्थितिसत्त्वं पल्योपमा-ऽसंख्येयभागप्रमाणं भवति। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो ठिदिखण्डयपुधत्तेण चउण्हं कम्माणं पलिदोवमस्स असंखेज्जदिभागो ठिदिसंतकम्मं जादं।**" मोहनीयस्य तु पल्योपमसंख्येयभागप्रमाणं भवति। तदानीं स्थितिसत्त्वा-ऽल्पबहुत्वं भण्यते—नाम-गोत्रयोः सर्वस्तोकं स्थितिसत्कर्म, स्वस्थाने तु मिथस्तुल्यम्, तच्च पल्योपमाऽसंख्यभागप्रमाणं भवति, ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां पल्योपमा-ऽसंख्येयभागमात्रं भवदप्यसंख्येयगुणं स्वस्थाने तु परस्परं सदृशम्, ततो मोहनीयस्या-ऽसंख्येयगुणम्, पल्योपमसंख्येयभागमात्रत्वात्। उक्तं च **कषायप्राभृतचूर्णौ**—"**ताधे अप्पाबहुअं—णामागोदाणं ठिदिसंतकम्मं थोवं, चउण्हं कम्माणं ठिदिसंतकम्मं तुल्लमसंखेज्जगुणं, मोहणीयस्स ठिदिसंतकम्ममसंखेज्जगुणं।**" इति। इतः प्रभृति ज्ञानावरणादीनामपि स्थितिसत्त्वं प्रतिस्थितिघातेना-ऽसंख्येयगुणहीनं जायते।

ततो भूयः स्थितिखण्डसंख्यसहस्रे व्यतिक्रान्तेषु सत्सु मोहनीयकर्मणः स्थितिसत्कर्म पल्योपमाऽसंख्येयभागमानं भवति। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो ठिदिखण्डयपुधत्तेण मोहणीयस्स वि पलिदोवमस्स असंखेज्जदिभागो ठिदिसंतकम्मं जादं।**" इत्थमितः प्रभृति सर्वेषां

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

कर्मणां स्थितिसत्त्वं पल्योपमा-ऽसंख्येयभागमितं तावद्वक्तव्यम्, यावद्विशेषो ना-ऽभिधीयेत। साम्प्रतमल्पबहुत्वमित्थं द्रष्टव्यम्-नाम-गोत्रयोः स्थितिसत्त्वं सर्वाल्पं स्वस्थाने तु मिथस्तुल्यम्, ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामसंख्येयगुणं स्वस्थाने मिथः समानम्, ततो मोहनीयस्या-ऽसंख्येयगुणम्। उक्तं च **कषायप्राभृतचूर्णौ**–"**ताधे अप्पाबहुअं जधा–णामा-गोदाणं ठ्ठिदिसंतकम्मं थोवं, चदुण्हं कम्माणं ठिदिसंतकम्मं तुल्लमसंखेज्जगुणं, मोहणीयस्स ठिदिसन्तकम्मं असंखेज्जगुणं।**" इति। इतः प्रभृति मोहनीयस्या-ऽपि स्थितिसत्त्वं प्रतिस्थितिघातेना-ऽसंख्येयगुणहीनं जायते।

ततः परमुक्ताल्पबहुत्वक्रमेण स्थितिखण्डसंख्यसहस्रेष्वतिक्रान्तेषु सत्सु मोहनीयस्य स्थिति-सत्त्वमेकप्रहारेणैव ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामधस्तादसंख्येयगुणं गच्छति, ज्ञानावरणादितोऽसंख्येयगुणहीनं जायते इत्यर्थः। इदमुक्तं भवति—इतः प्राग् ज्ञानावरणादीनां चतुर्णां स्थितिसत्त्वतो मोहनीयस्य स्थितिसत्त्वमसंख्येयगुणमासीत्, इदानीं पुनरेकस्थितिघातेन ज्ञानावरणादीनां स्थितिसत्त्वतो मोहनीयस्य स्थितिसत्त्वमसंख्येयगुणहीनं संजायते। इदन्त्ववधेयम्–अनन्तरोक्तस्थितिसत्त्वा-ऽल्पबहुत्वतः परं व्रजितानां संख्यातसहस्रस्थितिघातानां द्विचरमस्थितिघातं यावज्ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां स्थितिसत्त्वतो मोहनीयस्य स्थितिसत्त्वमसंख्येय-गुणं भवति स्म, चरमस्थितिघातेन तु मोहनीयस्यैतावत्प्रभूतं स्थितिसत्त्वं घातयति, येन ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां स्थितिसत्त्वतो मोहनीयस्य स्थितिसत्त्वमसंख्येयगुणहीनं भवति। एवमग्रेऽपि यत्रैकप्रहारेणेति वक्ष्यते, तत्रेत्थमेव भावनीयम्। तदानीं स्थितिसत्त्वा-ऽल्पबहुत्वं भण्यते-नामगोत्रयोः सर्वस्तोकं स्थितिसत्त्वं स्वस्थाने तु मिथस्तुल्यम्, ततो मोहनीयस्या-ऽसंख्येयगुणम्, ततोऽपि ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणामसंख्येयगुणं स्वस्थाने तु परस्परं तुल्यम्। उक्तं च **कषायप्राभृतचूर्णौ**–"**एदेण कमेण संखेज्जाणि ठिदिखण्डयसहस्साणि गदाणि तदो णामागोदाणं ठिदिसंतकम्मं थोवं, मोहणीयस्स ठिदिसंतकम्मम-संखेज्जगुणं, चउण्हं कम्माणं ठिदिसंतकम्मं तुल्लमसंखेज्जगुणं।**" इति।

ततः परमनन्तरोक्तस्थितिसत्त्वा-ऽल्पबहुत्वक्रमेण संख्यसहस्रेषु स्थितिखण्डेषु व्यतीतेषु मोह-नीयस्य स्थितिसत्त्वमेकप्रहारेणैव नामगोत्रयोरधस्तादसंख्येयगुणं गच्छति, नामगोत्रतोऽसंख्येय-गुणहीनं जायते इत्यर्थः। इतः प्राग् नाम-गोत्रयोः स्थितिसत्त्वतो मोहनीयस्य यत्स्थितिसत्त्वम-संख्येयगुणमासीत्, तदतः प्रभृत्यसंख्येयगुणहीनं जायते। तदानीं स्थितिसत्त्वा-ऽल्पबहुत्वं प्रति-पाद्यते—मोहनीयस्य स्थितिसत्त्वं सर्वाल्पम्, ततो नाम-गोत्रयोरसंख्येयगुणम्, स्वस्थाने तु मिथः सदृक्षम्, ततो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां स्थितिसत्त्वमसंख्येयगुणम्, स्वस्थाने तु परस्परं समानम्। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो ठिदिखण्डयपुधत्ते**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गदे एक्कसराहेण मोहणीयस्स ठिदिसंतकम्मं थोवं, णामागोदाणं ठिदिसंतकम्ममसंखेज्जगुणं, चउण्हं कम्माणं ठिदिसंतकम्मं तुल्लमसंखेज्जगुणं।"**इति।

अनन्तरोक्तस्थितिसत्त्वा-ऽल्पबहुत्वक्रमेण स्थितिखण्डसंख्यसहस्रेषु गतेषु वेदनीयस्य स्थितिसत्त्वं ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामुपर्यसंख्येयगुणं गच्छति, ज्ञानावरणादितोऽसंख्येयगुणं संजायते इत्यर्थः। इतः प्राग् ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां वेदनीयस्य च स्थितिसत्त्वं परस्परं तुल्यमासीत्, अतः प्रभृति ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां स्थितिसत्त्वतो वेदनीयस्य स्थितिसत्त्वमसंख्येयगुणं जायते। इदानीं स्थितिसत्त्वा-ऽल्पबहुत्वमित्थं भणितव्यम्—मोहनीयस्य स्थितिसत्त्वं सर्वाल्पम्, ततो नामगोत्रयोरसंख्येयगुणम्, ततो ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामसंख्येयगुणम्, ततो वेदनीयस्या-ऽसंख्येयगुणम्। उक्तं च **कषायप्राभृतचूर्णौ—"तदो ठिदिखण्डयपुधत्तेण मोहणीयस्स ठिदिसन्तकम्मं थोवं, णामागोदाणं ठिदिसंतकम्मं असंखेज्जगुणं, तिण्हं घादिकम्माणं ठिदिसंतकम्ममसंखेज्जगुणं, वेदणीयस्स ठिदिसन्तकम्ममसंखेज्जगुणं।"**इति।

ततः परं संख्यसहस्रेषु स्थितिखण्डेषु व्रजितेषु ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामुपर्यसंख्येयगुणं नामगोत्रयोः स्थितिसत्त्वं गच्छति, ज्ञानावरणादितोऽसंख्येयगुणं भवतीत्यर्थः, ततो वेदनीयस्य स्थितिसत्त्वं केवलं विशेषाधिकं भवति। प्राक्तु नाम-गोत्रयोः स्थितिसत्त्वतोज्ञानावरण दर्शनावरणा-ऽन्तरायाणां स्थितिसत्त्वमसंख्येयगुणमासीत्, ततो वेदनीयमसंख्येयगुणम्, इदानीं पुनर्ज्ञानावरणादितो नामगोत्रयोः स्थितिसत्त्वमसंख्येयगुणं भवति, नामगोत्रयोश्च स्थितिसत्त्वतो वेदनीयस्य स्थितिसत्त्वं केवलं विशेषाधिकं भवतीति भावः। स्थितिसत्त्वाऽल्पबहुत्वं पुनरित्थमभिधातव्यम्—मोहनीयस्य स्थितिसत्त्वं सर्वस्तोकम्, ततो ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामसंख्येयगुणम्, स्वस्थाने तु मिथः सदृशम्, ततोऽपि नाम-गोत्रयोरसंख्येयगुणम्, स्वस्थाने तु मिथस्तुल्यम्, ततो वेदनीयस्य विशेषाधिकम्। उक्तं च **कषायप्राभृतचूर्णौ—"तदो ठिदिखण्डयपुधत्तेण मोहणीयस्स ठिदिसन्तकम्मं थोवं, तिण्हं घादिकम्माणं ठिदिसंतकम्मं असंखेज्जगुणम्, णामागोदाणं ठिदिसन्तकम्ममसंखेज्जगुणं, वेदणीयस्स ठिदिसंतकम्मं विसेसाहियं।"** इति ॥ ३७ ॥

साम्प्रतमनिवृत्तिकरणप्रथमसमयात्प्रभृत्यनन्तरोक्तस्थितिसत्त्वा-ऽल्पबहुत्वं यावत् सर्वा प्ररूपणा यन्त्रके दर्श्यते।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## यन्त्रकम्

( i ) अनिवृत्तकरणप्रथमसमये देशोपशमनानिधत्तिनिकाचनाकरणानि व्यवच्छिन्नानि ।
( ii ) „ „ स्थितिबन्धो-ऽन्तःसागरोपमकोटिप्रमितः, स्थितिसत्कर्म पुनरन्तःसागरोपमकोटीकोटीप्रमाणम् ।
( iii ) „ „ जघन्यस्थितिखण्डत उत्कृष्टस्थितिखण्डं संख्येयभागाधिकम् ।
( iv ) प्रथमे स्थितिखण्डे घातिते सर्वजन्तूनां स्थितिखण्डं मिथस्तुल्यम् । एवं स्थितिसत्कर्माऽपि ।

| | मोहनीयस्य | ज्ञानावरणादीनाम् | नामगोत्रयोः | |
|---|---|---|---|---|
| (१) स्थितिबन्धसंख्यातसहस्रेषु गतेष्वनिवृत्तिकरणस्य संख्येयतमभागे शेषे स्थितिबन्धः | $\frac{4000}{7}$ सा० | $\frac{3000}{7}$ सा० | $\frac{2000}{7}$ सा० | असंज्ञिबन्धतुल्यः |
| (२) ततः स्थितिबन्धसंख्यातसहस्रेषु व्यतिक्रान्तेषु स्थितिबन्धः | $\frac{400}{7}$ „ | $\frac{300}{7}$ „ | $\frac{200}{7}$ „ | चतुरिन्द्रियबन्धतुल्यः |
| (३) „ „ „ „ „ | $\frac{200}{7}$ „ | $\frac{150}{7}$ „ | $\frac{100}{7}$ „ | त्रीन्द्रियबन्धतुल्यः |
| (४) „ „ „ „ „ | $\frac{100}{7}$ „ | $\frac{75}{7}$ „ | $\frac{50}{7}$ „ | द्वीन्द्रियबन्धतुल्यः |
| (५) „ „ „ „ „ | $\frac{4}{7}$ „ | $\frac{3}{7}$ „ | $\frac{2}{7}$ „ | एकेन्द्रियबन्धतुल्यः |

| | नामगोत्रयोः | ज्ञानावरणादीनाम् | मोहनीयस्य | अल्पबहुत्वम् |
|---|---|---|---|---|
| (६) ततः स्थितिबन्धसंख्यातसहस्रेषु गतेषु बन्धः | १ पल्योपमम् । इतः परं । बन्धः संख्य-गुणहीनः । | १॥ पल्योपमम् । | २ पल्योपमे । | (१) नामगोत्रयोः स्थितिबन्धः स्तोकः । स्थितिसत्त्वं तु साग०-शतसहस्र-पृथक्त्वम् ।<br>(२) ततो ज्ञानावरणादीनां संख्येयगुणः ।<br>(३) „ मोहनीयस्य विशेषाधिकः ।<br>प्राक्तनाः सर्वे बन्धा अनेनाऽल्पबहुत्वक्रमेण गताः । |
| (७) „ „ „ „ „ | पल्यसंख्य-भागः । | १ पल्योपमम् । इतः परं संख्यगुणहीनः । | १$\frac{1}{3}$ पल्योपमम् । | (१) नामगोत्रयोः स्थितिबन्धोऽल्पः । गाथा-३०<br>(२) ततो ज्ञानावरणादीनां संख्येयगुणः । „ „<br>(३) ततो मोहनीयस्य विशेषाधिकः । „ „ |
| (८) „ „ „ „ „ | पल्यसंख्य-भागः । | पल्यासंख्य-भागः । | १ पल्योपमम् । इतः परं संख्यगुणहीनः । | बन्धे पूर्णे (१) नामगोत्रयोर्बन्धोऽल्पः । गा०-३१-३२<br>(२) ततो ज्ञानावरणादीनां संख्यगुणः „ „<br>(३) „ मोहनीयस्य „ । „ „ |
| (९) ततः स्थितिबन्धसंख्यातसहस्रेषु गतेषु बन्धः | पल्यासंख्य-भागः, इतः प्रभृत्यसं-ख्यगुणहीनः । | पल्यसंख्य-भागः । | पल्यसंख्य-भागः । | (१) नामगोत्रयोः स्थितिबन्धः स्तोकः । गा०-३२<br>(२) ततो ज्ञानावरणादीनामसंख्येयगुणः । „ „<br>(३) „ मोहनीयस्य संख्येयगुणः । „ „<br>अपूर्णम् |

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## यन्त्रकम्

| | नामगोत्रयोः | ज्ञानावरणादीनाम् | | मोहनीयस्य | अल्पबहुत्वम् | |
|---|---|---|---|---|---|---|
| (१०) ततःस्थितिबन्धसंख्यसहस्रेषु गतेषु बन्धः | पल्या-ऽसंख्य-भागः | पल्या-ऽसंख्य-भागः इतः प्रभृत्यसं-ख्यगुणहीनः | | पल्यसंख्य-भागः | (१) नामगोत्रयोः स्थितिबन्धः स्तोकः (२) ततो ज्ञाना० असंख्यगुणः (३) ततो मोहनीयस्या-ऽसंख्यगुणः। | गाथा–३३ |
| (११) ” ” ” ” ” | पल्या-ऽसंख्य-भागः | पल्या-ऽसंख्य-भागः | | पल्या-ऽसंख्यभागः इतः प्रभृत्यसं-ख्यगुणहीनः | (१) नामगोत्रयोर्बन्धोऽल्पः (२) ततो ज्ञाना०असंख्यगुणः। (३) ततो मोहस्या-ऽसंख्यगुणः। | सत्त्वं तु साग०स-हस्रपृथक्त्वम् |
| (१२) ” ” ” ” ” | | अधो मोहबन्धो-ऽसंख्यगुणहीन एकप्रहारेण ←— | | | (१) नामगोत्रयोः स्थितिबन्धोऽल्पः। (२) ततो मोहनीयस्या-ऽसंख्यगुणः। (३) ततो ज्ञाना० असंख्यगुणः। | गाथा–३४ |
| (१३) ” ” ” ” ” | अधो मोहबन्धो-ऽसंख्यगुणहीन एकप्रहारेण ←— | | | | (१) मोहनीयस्य स्थितिबन्धोऽल्पः। (२) ततो नामगोत्रयोरसंख्यगुणः। (३) ततो ज्ञाना० असंख्यगुणः। | गाथा–३४ |
| (१४) ” ” ” ” ” | नामगोत्रयोः | घातित्रयस्य | वेदनीयस्य | मोहनीयस्य | अल्पबहुत्वम् | |
| | | उपरि वेद-नीयबन्धोऽ-संख्यगुण एकप्रहारेण | | | (१) मोहनीयस्य बन्धोऽल्पः। (२) ततो नामगोत्रयोरसंख्यगुणः। (३) ततो ज्ञाना० असंख्यगुणः। (४) ततो वेदनीयस्या-ऽसंख्यगुणः। | |
| (१५) ” ” ” ” ” | अधो ज्ञानाव-रणादिबन्धो-ऽसंख्यगुणहीन एकप्रहारेण | | नामगोत्रतो विशेषाधिकः | | (१) मोहनीयस्य स्थितिबन्धः स्तोकः (२) ततो घातित्रयस्या-ऽसंख्यगुणः। (३) ततो नामगोत्रयोरसंख्यगुणः। (४) ततो वेदनीयस्य विशेषाधिकः। | |
| (१६) ” ” ” ” ” सत्त्वम्। | $\frac{2000}{3}$ सा०। | $\frac{3000}{3}$ सा० | | । $\frac{4000}{3}$ सा०। | असञ्ज्ञिबन्धतुल्यमित्यर्थः। | गा–३७ |

● ततः स्थितिबन्धवत् स्थितिसत्कर्म तावद् वक्तव्यम्, यावत् पञ्चदशस्थानोक्तमल्पबहुत्वं न प्राप्येत।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

ततः संख्यातेषु स्थितिखण्डसहस्रेषु गतेष्वसंख्येयसमयप्रबद्धोदीरणा जायते, तां व्याजिहीर्षुराह—

**चरिमप्पबहुत्ताउ असंखखणपबद्धुदीरणा होइ ।**
**तोऽट्ठकसाया खवए जहण्णठिइसंकमो चरिमे ॥३८॥**

चरिमा-ऽल्पबहुत्वादसंख्यक्षणप्रबद्धोदीरणा भवति ।
ततोऽष्टकषायान् क्षपयति जघन्यस्थितिसंक्रमश्चरमे ॥ ३८ ॥ इति पदसंस्कारः ।

**'चरिम०'** इत्यादि, 'चरमाल्पबहुत्वात्' मोहनीयस्य स्थितिसत्त्वं स्तोकं ततो ज्ञानावरण-दर्शनावरणाऽन्तरायाणामसंख्येयगुणं ततो नामगोत्रयोरसंख्येयगुणं ततो वेदनीयस्य विशेषाधिकमित्येवंरूपात् संख्यातेषु स्थितिखण्डसहस्रेषु गतेषु 'असंख्यक्षणप्रबद्धोदीरणा' असंख्येयसमयप्रबद्धोदीरणा 'भवति' जायते । उक्तं च **कषायप्राभृतचूर्णौ**—**"एदेण कमेण संखेज्जाणि ट्ठिदिखंडयसहस्साणि गदाणि,तदो असंखेज्जाणं समयपबद्धाणमुदीरणा ।"** इति । ननु का नामा-ऽसंख्येयसमयप्रबद्धोदीरणा ? इति चेत्, उच्यते—इतः पूर्वमपकृष्टदलं पल्योपमाऽसंख्येयभागेन विभज्य तदेकभागं गुणश्रेण्यर्थं गृह्णाति स्म, शेषांश्चाऽसंख्येयबहुभागान् गुणश्रेण्युपरितननिषेकेषु निक्षिपति स्म । गुणश्रेण्यर्थं गृहीतदलमसंख्येयलोकाकाशप्रदेशमात्रेण भागहारेण भक्त्वा तदेकभागमुदयावलिकायां प्रक्षिप्य बहुभागानुदयावलिकाया उपरितनेषु गुणश्रेणिनिषेकेषु प्रक्षिपति स्म,तेनैकसमयप्रबद्धस्याऽसंख्येयभागमितं दलमुदीरणायामागच्छति स्म,इदानीं पुनर्गुणश्रेण्यर्थं गृहीतदलं पल्योपमा-ऽसंख्येयभागेन विभज्यैकभागमुदयावलिकायां निक्षिप्य बहुभागानुदयावलिकाया उपरितनेषु गुणश्रेणिनिषेकेषु निक्षिपति ।तेनेदानीमुदीरणायां दलमसंख्येयसमयप्रबद्धमात्रं वर्तते । एकसमयेन यावद्दलं बध्यते, तदेकसमयप्रबद्धमुच्यते । इतः प्रभृति क्षपकस्योदीरणायामसंख्येयसमयप्रबद्धदलमागच्छति । तस्मात् कारणाद् इयमसंख्येयसमयप्रबद्धोदीरणा व्यपदिश्यते*, इति भावः । **कर्मप्रकृतिचूर्णिकारादिमतेना**-ऽसंख्येयसमयप्रबद्धोदीरणा नाम यावत्यः स्थितयो बध्यन्ते, तदपेक्षया याः पूर्वबद्धाः सत्तागताः समयादिहीनाः स्थितयस्ता एवोदीरणामुपगच्छन्ति, नान्याः । उक्तं च **कर्मप्रकृतिचूर्णिकारैरुपशमनाकरणे**—**"जाहे पलिओवमस्स असंखेज्जतिभागं ट्ठितिबन्धन्ति, तम्मि**

* जयधवलाकारैरपि इत्थमेव व्याख्याता-ऽसंख्येयसमयप्रबद्धोदीरणा । व्यगादि च तैश्चारित्रमोहोपशमनाधिकारे-"हेट्ठा सव्वत्थेव असंखेज्जलोगपडिभागेण पयट्टमाणा उदीरणा,एण्हि परिणामपाहम्मेण पुव्वुत्तकिरियाकलावस्सुवरि असंखेज्जाणं समयपबद्धाणमुदीरणा च पवत्तदि। दिवड्ढगुणहाणीमेत्तसमयपबद्धाणमोकड्डणभागहारादो असंखेज्जगुणेण भागहारेण खंडिदेयखंडस्स असंखेज्जसमयपबद्धपमाणस्सेत्थुदीरणासरूवेणुदये पवेसदंसणादो । इति । तथैव चारित्रमोहक्षपणाधिकारेऽपि-"× × × × तदो परिणामप्पाहम्मेण सव्वेसिं कम्माणं वेदिज्जमाणाणं असंखेज्जलोगपडिभागिया उदीरणा णस्सियूण असंखेज्जाणं समयपबद्धाणं उदीरणा पारद्धा त्ति एसो एत्थ सुत्तत्थसंगहो त्ति ।" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**काले जातो कम्मट्ठितीतो बज्झमाणट्ठितीओ समयादिहीणातो तातो ट्ठितीतो उदीरणं एन्ति, उवरिमाउ न इंति उदीरणं।"** इति। इतः परं सर्वत्रा-ऽसंख्येयसमयप्रबद्धोदीरणा ज्ञातव्या। अल्पबहुत्वं चेत्थं प्ररूपयितव्यम्, तदानीं प्रदेशोदीरणा स्तोका भवति, ततः प्रदेशो-दयोऽसंख्येयगुणो भवति, उदीरणाया असंख्येयसमयप्रबद्धत्वेऽप्युदयस्ततोऽसंख्येयगुणो भवतीत्यर्थः। इदन्त्ववधेयम्—सर्वत्र क्षपकश्रेणौ तद्व्यतिरिक्तावस्थायां चोदीरणादलिकत उदयदलिकमसंख्येयगुणं भवति।

सम्प्रत्यष्टकषायाणां क्षपणां भणितुकाम आह—'तो' इत्यादि, 'ततः' असंख्येयसमय-प्रबद्धोदीरणातः संख्यातेषु स्थितिखण्डसहस्रेषु गतेषु 'अष्टकषायान्' अप्रत्याख्यानप्रत्याख्याना-वरणचतुष्कलक्षणान् 'क्षपयति' बध्यमानासु परप्रकृतिषु संक्रमयन् क्षपयितुमारभते, यद्यप्यपूर्वकर-णतः प्रभृति कषायाष्टकस्य गुणसंक्रम आसीत्, किन्त्वितः प्रभृति तस्य विशेषघातो जायते, तेन तस्य क्षपणा निगद्यते। उक्तं च **कषायप्राभृतचूर्णौ—"तदो संखेज्जेसु ठिदिखंडय-सहस्सेसु गदेसु अट्ठण्हं कसायाणं संकामगो।"** इति। अत्रापि 'अट्ठण्हं कसायाणं संकामगो' इत्यनेनाऽष्टानां कषायाणां क्षपणायाः प्रारम्भको ज्ञातव्यः, अन्यथा तेषां संक्रमकस्तु पूर्वमपूर्व-करणेऽप्यासीत्। ततः परं संख्यातेषु स्थितिखण्डसहस्रेषु व्यतिक्रान्तेष्वावलिकाप्रमाणं स्थितिसत्कर्म विमुच्य शेषं सर्वं कषायाऽष्टकं विनाशयति, तदानीं 'जहण्ण०' इत्यादि, चरमे—चरमप्रक्षेपे 'जघन्यस्थितिसंक्रमः' कषायाष्टकस्य पल्योपमाऽसंख्येयभागमितो जघन्यस्थितिसंक्रमो भवति। उक्तं च **कषायप्राभृतचूर्णौ—"तदो अट्ठकसाया ठिदिखंडयपुधत्तेण संका-मिज्जंति। अट्ठण्हं कसायाणं अपच्छिमठिदिखंडए उक्किण्णे तेसिं संतकम्ममाव-लियं पविट्ठं सेसं। ×××× अट्ठण्हं कसायाणं जहण्णट्ठिदिसंकमो कस्स ? खव-यस्स तेसिं चेव अपच्छिमट्ठिदिखंडयं चरिमसमयसंछुहमाणयस्स जहण्णयं।"** इति। **तथैव कर्मप्रकृतिचूर्णावपि—"सेसगाणं' ति वुत्तसेसाणं थीणगिद्धितिगतेरसणा-मा अट्ठकसायणवणोकसाया कोहसंजलणमाणमायासंजलणाणं-एयासिं छत्तीसाए कम्मपगतीणं 'खवणक्कम्मेण' त्ति खवणपरिवाडिते चेव अप्पणो चरिमसंछोभे वट्टमाणो अणियट्टिजहण्णट्ठितिसंकमसामी।"** इति।

तदानीमेव शीघ्रं क्षपणायाऽभ्युत्थितस्य गुणितकर्मांशस्य जन्तोरुत्कृष्टप्रदेशसंक्रमो भवति। उक्तं च **कर्मप्रकृतिचूर्णौ—"थीणगिद्धितिगछन्नोकसायासत्तणाम-अट्ठकसायाणं एतासिं चउवीसाए पगतीणं गुणितकंमंसितस्स अणियट्टिकरणे वट्टमाणस्स उक्कोसपदेससंकमो सव्वसंकमेण लब्भति।"** इति। एवं **कषाय-प्राभृतचूर्णावपि** ॥३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः परं कषायाष्टकस्यावलिकामात्रं स्थितिसत्कर्म स्तिबुकसंक्रमेण प्रतिसमयं संक्रम्य कषायाष्टकं सर्वात्मना निर्लेपयति। स्थितिखण्डसहस्रेषु च गतेषु सत्सु स्थावरादिषोडशप्रकृतीः क्षपयितुमारभते, तद्वक्तुकाम आह—

**तो थावरतिरिनिरयायवदुगसाहारणेगविगलाइं।**
**थीणद्धितिगं य खवइ तो बंधइ देसघाईणि ॥३६॥**

ततः स्थावरतिर्यङ्निरया-ऽऽतपद्विकसाधारणैकविकलानि।
स्त्यानर्द्धित्रिकं च क्षपयति ततो बध्नाति देशघातीनि ॥३६॥ इति पदसंस्कारः।

'तो' इत्यादि, 'ततः' कषायाष्टकसत्कक्षपणातः परं संख्यातेषु स्थितिघातसहस्रेषु गतेषु 'स्थावरतिर्यङ्निरया-ऽऽ-तपद्विकसाधारणैकविकलानि' स्थावरतिर्यङ्निरयाऽऽतपद्विकमित्यत्र द्विकशब्दः प्रत्येकं सम्बध्यते। ततश्चायमर्थः-स्थावरद्विकम्-स्थावर-सूक्ष्मरूपम्, तिर्यग्द्विकम्-तिर्यग्गति-तिर्यगानुपूर्वीलक्षणम्, निरयद्विकं-नरकगति-नरकाऽऽनुपूर्वीस्वरूपम्, आतपद्विकम्-आतपोद्योताख्यम्, साधारणं-साधारणनामकर्म च 'एकविकलानि' एकेन्द्रियजाति-द्वीन्द्रियजाति-त्रीन्द्रियजाति-चतुरिन्द्रियजातिरूपाणि च, तत इतरेतरद्वन्द्वसमासः, 'स्त्यानर्द्धित्रिकं' निद्रानिद्रा-प्रचलाप्रचला-स्त्यानर्द्धिलक्षणं 'च' चकारः समुच्चयार्थकः 'क्षपयति' अनन्तरोक्तषोडशप्रकृतीर्नाशयितुमुपक्रमते। उक्तं च **कषायप्राभृतचूर्णौ–"तदो ठिदिखंडयपुधत्तेण णिद्दाणिद्दा-पयलापयला-थीणगिद्धीणं णिरयगदि-तिरिक्खगदिपाओग्गणामाणं संतकम्मस्स संकामगो।"** स्थितिखण्डपृथक्त्वे गते आवलिकाप्रमाणं सत्कर्म विमुच्य शेषं सर्वं षोडशप्रकृतीनां स्थितिसत्त्वं विनाशयति, तदप्यावलिकामात्रं स्थितिसत्त्वं स्तिबुकसंक्रमेण संक्रम्य निरुक्तषोडशप्रकृतीः सर्वथा निर्लेपयति। उक्तं च **कषायप्राभृतचूर्णौ–"तदो ठिदिखंडयपुधत्तेण अपच्छिमे ठिदिखंडए उक्किण्णे एदेसिं सोलसण्हं कम्माणं ठिदिसंतकम्ममावलियब्भंतरं सेसं।"** इति। एवं **कर्मप्रकृतिचूर्णावपि "निरयगतितिरियगति-एगिंदियजाति जाव चोरिंदिजाति णरयाणुपुव्वि तिरियाणुपुव्वि आयावं उज्जोवं थावरं सुहुमं साहारणं एए तेरस, थीणगिद्धितिगेण सह सोलस 'उवरिं' ति अट्ठसु कसातेसु खविएसुवरि संखेज्जेसु ठितिखंडेसु गतेसु सोलस वि जुगवं णस्संति।"** इति। एतासां षोडशप्रकृतीनां चरमप्रक्षेपे जघन्यस्थितिसंक्रमो भवति, स च पल्योपमा-ऽसंख्येयभागप्रमाणो ज्ञातव्यः। यथागमं गुणितकर्मांशस्य चोत्कृष्टप्रदेशसंक्रमो भवति। **सप्ततिकाचूर्णिकारादिभिः** कषाया-ऽष्टकस्थावरादिषोडशप्रकृतीनां क्षपणा त्वित्थं प्रदर्शिता—

**अणियट्टिबायरे थीणगिद्धितिग-णिरयतिरियणामाउ।**

संखेज्जइमे सेसे तप्पाओगाउ खीयंति ॥ १ ॥

अणियट्टिबायरे थीण० गाहा, अणियट्टिअद्धाए [अ]संखेज्जेसु भागेसु गतेसु थीणगिद्धितिगनिरयगति-तिरियगति-एगिंदिय-बे०-ते०-चउरिंदियजाइनिरयतिरियाणुपुव्वीओ आयाव-उज्जोव-थावर-सुहुम-साहारणमिति एएसिं सोलसण्हं कम्माणं उव्वलणविहिणा उव्वट्टिज्जमाणा उव्वट्टिज्जमाणा पलिओवमस्स असंखेज्जइभागमेत्ता ठिती जाया। तओ बज्झमाणियासु गुणसंकमेण छुब्भंताणि छुब्भंताणि खीणाणि भवंति।

एत्तो हणइ कसायट्ठगं पि पच्छा णपुंसगं इत्थि।
तो णोकसायछक्कं छुब्भइ संजलणकोहम्मि ॥ १ ॥

'एत्तो हणइ०' गाहा, अट्ठकसाया-अपच्चक्खाणावरणपच्चक्खाणावरणा, एए अट्ठवि पुव्वं खवित्तुमाढत्ता, अंतोमुहुत्तं खविज्जमाणा खविज्जमाणा गया न ताव खविया। तत्थ किर सोलस पुव्वुत्ताणि कम्माणि खविउमाढत्ताणि खविज्जमाणाणि खविज्जमाणाणि अंतरे खीणाणि भवंति। पच्छा अट्ठकसाया उव्वलणविहिणा अंतोमुहुत्तेणं खीयंति त्ति एयं एगेसिं मतं। अण्णे यायरिया भणंति सोलसकम्माणि पुव्वं खविउमाढविज्जंति तओ अंतरे पुव्वं अट्ठकसाया खीयंति, पच्छा सोलसकम्माणि, एस सुत्ताएसो।" इति। सप्ततिकावृत्तिकारैः श्रीमदुपाध्यायपुङ्गवैश्चापीत्थमेव चतुर्विंशतिप्रकृतीनां क्षपणा निरूपिता, नवरं तैरनिवृत्तिकरणाद्धायाः प्रथमसमये कषायाष्टकं पल्योपमाऽसंख्येयभागमितस्थितिकं भवतीत्युक्तम्। तथा चाऽत्र सप्ततिकावृत्तिः-"तत्राऽपूर्वकरणे स्थितिघातादिभिरप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं तथा क्षपयति स्म यथाऽनिवृत्तिकरणाद्धायाः प्रथमसमये तत् पल्योपमाऽसंख्येयभागमात्रस्थितिकं जातम्। अनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु स्त्यानर्द्धित्रिक-नरकगति-तिर्यग्गति-नरकानुपूर्वी-तिर्यगानुपूर्व्येकद्वित्रिचतुरिन्द्रियजाति-स्थावराऽऽपोद्योत-सूक्ष्म-साधारणरूपाणां षोडशप्रकृतीनामुद्वलनासंक्रमेणोद्वल्यमानानां पल्योपमाऽसंख्येयभागमात्रा स्थितिर्जाता। ततो बध्यमानासु प्रकृतिषु तानि षोडश कर्माणि गुणसंक्रमेण प्रतिसमयं प्रक्षिप्यमाणानि प्रक्षिप्यमाणानि निःशेषतः क्षीणानि भवन्ति। इहाप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं पूर्वमेव क्षपयितुमारब्धं परं तन्नाद्यापि क्षीणं, केवलमपान्तराल एव पूर्वोक्तप्रकृतिषोडशकं क्षपितम्। ततः पश्चात्तदपि कषायाष्टकमन्तर्मुहूर्तमात्रेण क्षपयति, तथा चाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अणियट्टिबायरे थीणगिद्धितिगनिरयतिरियनामाउ । संखेज्जइमे सेसे तप्पाउग्गाओ खीयंते ॥१॥ एत्तो हणइ कसायट्ठगं पि पच्छा नपुंसगं इत्थीं । तो नोकसायछक्कं छुभइ संजलणकोहम्मि ॥२॥" अनिवृत्तिबादरगुणस्थानके संख्येयतमे भागे शेषे स्त्यानर्द्धित्रिकं निरयगति-तिर्यग्गतिनाम्नी 'तत्प्रायोग्याश्च' निरयगतितिर्यग्गतिप्रायोग्याश्च एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियजाति-निरयानुपूर्वी-तिर्यगानुपुर्वी-स्थावराऽऽतपोद्योत-सूक्ष्म-साधारणरूपाः सर्वसंख्यया षोडश प्रकृतयः क्षीयन्ते । तत 'इतः' प्रकृतिषोडशकक्षयादनन्तरं निःशेषतः कषायाष्टकं हन्ति । अन्ये पुनराहुः षोडश कर्माण्येव पूर्वं क्षपयितुमारभते, केवलमपान्तरालेऽष्टौ कषायान् क्षपयति, पश्चात् षोडश कर्माणि ।" इति । एवं श्रीमदुपाध्यायपुङ्गवविरचितकर्मप्रकृतिटीकायामपि दृश्यते ।

इत्थं केषांचिदाचार्याणां मतेनादौ कषायाष्टकं सर्वथा क्षपयति, ततः संख्यातेषु स्थितिखण्डसहस्रेषु गतेषु स्थावरप्रभृतीः षोडशप्रकृतीः सर्वात्मना क्षपयति । अन्येषामाचार्याणां मतेन प्रथमतः स्थावरप्रभृतीः षोडशप्रकृतीर्निश्शेषं विनाशयति, ततः संख्यातेषु स्थितिखण्डसहस्रेषु व्रजितेषु कषायाष्टकं सर्वथा क्षपयति* ।

आवश्यकनिर्युक्तिकारादिमतेन प्राक् कषायाष्टकं क्षपयितुमारभते, ततो दर्शनावरणस्य तिस्रः प्रकृतीर्नामकर्मणश्च त्रयोदशप्रकृतीः सर्वात्मना युगपत् क्षपयति, किन्तु पूर्वतोऽयं विशेषः— आतपोद्योतयोः स्थानेऽपर्याप्ताऽप्रशस्तविहायोगतिलक्षणप्रकृतिद्वयं क्षपयति, ततः कषायाष्टकं सर्वात्मना क्षपयति । तथा चात्रावश्यकनिर्युक्तिः—

"गतिआणुपुव्वि दो दो जातिनामं च जाव चउरिंदी ।
अपसत्था विहगगती थावरणामं च सुहुमं च ॥ १ ॥
साहारणमपज्जत्तं निद्दानिद्दं च पयलपयलं च ।
थीणं खवेति ताहे अवसेसं जं च अट्ठण्हं ॥ २ ॥

एवमावश्यकचूर्णावपि—"तत्थ तहेव संजलणवज्जे अट्ठ वि कसाए एगट्ठे

* उक्तं च धवलाकारैरपि–"एवं काऊण अणियट्टिगुणट्ठाणं पविसिय तत्थ वि अणियट्टिअद्धाए संखेज्जे भागे अपुव्वकरणविहाणेण गमिय अणियट्टिअद्धाए संखेज्जदिभागे सेसे थीणगिद्धितियं निरयगइ-तिरिक्खगइ-एइंदिय-बीइंदिय-तेइंदिय-चउरिंदियजादि-णिरयगइ--तिरिक्खगइपाओग्गाणुपुव्वि-आदावुज्जोव-थावर-सुहुम-साहारणा त्ति एदाओ सोलस पयडीओ खवेदि । तदो अंतोमुहुत्तं गंतूण पच्चक्खाणाऽपच्चक्खाणावरण-कोधमाणमायालोभे अक्कमेण खवेदि । एसो संतकम्मपाहुडउवएसो । कसायपाहुडउवएसो पुण अट्ठकसाएसु खीणेसु पच्छा अंतोमुहुत्तं गंतूण सोलसकम्माणि खविज्जंति त्ति ।"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेव खवेति,जाहे तेसिं अट्ठण्हं कसायाणं संखेज्जतिभागं खवेमाणो गतो भवति,ताहे नामस्स कम्मस्स इमाओ तेरस पयडीओ खवेइ। तं जहा-निरयगइनामं तिरियगइनामं एगिंदियजातिनामं बेइंदिय॰तेइंदिय॰चउरिंदियजातिनामं निरयाणुपुव्वीनामं तिरिक्खजोणियाणुपुव्वीनामं अप्पसत्थविहायोगतिनामं थावरनामं सुहुमनामं साहारणनामं अपज्जत्तं, तहा दरिसणावरणीयस्स इमाओ तिन्नि पयडीओ,तं जहा-निद्दानिद्दा पयलापयला थीणागिद्धीय। तासिं अट्ठण्हं सेसं तं पि।'' तथैव बृहत्कल्पवृत्तावप्युक्तम्। तत्त्वं पुनः केवलिनो विदन्ति।

'तो' इत्यादि, 'ततः' षोडशप्रकृतिक्षपणातः स्थितिघातपृथक्त्वे गते 'बध्नाति देशघातीनि' दानान्तरायमनःपर्यवज्ञानावरणादीनि वक्ष्यमाणानि कर्माणि क्रमेण देशघातीनि बध्नाति, अश्रेणिगता अशेषजनास्तानि कर्माणि सर्वघातीन्येव बध्नन्ति, उपशमश्रेणौ क्षपकश्रेण्यां वा महात्मानो विशुद्धिमाहात्म्येन तानि कर्माणि देशघातीनि बध्नन्तीति भावः॥ ३९॥

ननु कानि तानि कर्माणि यानि श्रेणौ देशघातीनि बध्यन्ते? इत्यत आह—

**दाणंतरायमणपज्जवाण तो लाभओहिदुगकम्माणं।**
**तो सुअअचक्खुभोगाण तओ चक्खुस्स अहुवभोगमईणं।४०। (आर्यागीतिः)**
**तो वीरियस्स रसबंधो हवए देसघाई उ।**
**तो तेरसपयडीण-ऽन्तरं कुणेइ ठिइबंधकालेण॥४१॥(उद्गीतिः)**

दानान्तराय-मनःपर्यवयोस्ततो लाभाऽवधिद्विककर्मणाम्।
ततः श्रुता-ऽचक्षुर्भोगानां ततश्चक्षुषोऽथोपभोगमत्योः॥ ४०॥
ततो वीर्यस्य रसबन्धो भवति देशघाती तु।
ततस्त्रयोदशप्रकृतीनामन्तरं करोति स्थितिबन्धकालेन॥ ४१॥ इति पदसंस्कारः।

'**दाणं॰**' इत्यादि, स्थावरादिषोडशप्रकृतिक्षपणातः परं स्थितिघातसंख्यातसहस्रेषु गतेषु सत्सु 'दानान्तरायमनःपर्यवयोः' 'रसबंधो हवए देसघाई' इति वक्ष्यमाणं पदत्रयं सर्वत्र योज्यम्। तेना-ऽयमर्थः—दानान्तरायमनःपर्यवज्ञानावरणयोः 'रसबन्धो' अनुभागबन्धो देशघाती 'भवति' जायते, अनयोरनुभागो देशघाती बध्यत इत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ**—**''तदो ठिदिखंडयपुधत्तेण मणपज्जवणाणावरणीयदाणंतराइयाणं च अणुभागो देसघादी जादो।''** इति।

'**तो**' इत्यादि, 'ततः' दानान्तराय-मनःपर्यवज्ञानावरणसत्कदेशघातिरसबन्धभवनात् संख्यातेषु

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

स्थितिघातसहस्रेषु व्रजितेषु सत्सु 'लाभावधिद्विककर्मणां' पदैकदेशेन पदसमुदायस्य गम्यमानत्वात् लाभा-ऽन्तराया–ऽवधिज्ञानावरणा-ऽवधिदर्शनावरणप्रकृतीनां रसबन्धो देशघाती भवति, एतेषां कर्मणामनुभागो देशघाती बध्यते इत्यर्थः । यदवादि **कषायप्राभृतचूर्णौ—"तदो ठिदिखंडय-पुधत्तेण ओहिणाणावरणीय-ओहिदंसणावरणीय-लाहंतराइयाणमणुभागो बंधेण देशघादी जादो ।"** इति ।

'तो' इत्यादि, 'ततः' अवधिज्ञानावरणादीनां बन्धे देशघातिरसभवनात् स्थिति–खण्डपृथक्त्वे गते सति 'श्रुता-ऽचक्षुर्भोगानां' श्रुतज्ञानावरणा-ऽचक्षुर्दर्शनावरण-भोगान्तरायाणां कर्मणां रसबन्धो देशघाती भवति । न्यगादि च **कषायप्राभृतचूर्णौ—"तदो ठिदिखंडयपुधत्तेण सुदणाणावरणीय-अचक्खुदंसणावरणीय-भोगंतराइयाणमणु-भागो बंधेण देशघादी जादो ।"** इति ॥

'ततः' श्रुतज्ञानावरणादीनां बन्धे देशघातिरसभवनात् परं स्थितिघातपृथक्त्वे-ऽतीते 'चक्षुषः', चक्षुर्दर्शनावरणस्य रसबन्धो देशघाती भवति । उक्तं च **कषायप्राभृतचूर्णौ—"तदो ठिदि-खंडयपुधत्तेण चक्खुदंसणावरणीयस्स अणुभागो बंधेण देशघादी जादो ।"** इति । 'अथ' चक्षुर्दर्शनावरणस्य देशघातिरसबन्धभवनानन्तरं स्थितिघातपृथक्त्वे गते सति 'उपभोगमत्योः' उपभोगान्तराय-मतिज्ञानावरणयो रसबन्धो देशघाती भवति । उक्तं च **कषायप्राभृतचूर्णौ—ठिदिखंडयपुधत्तेण आभिणिबोहियणाणावरणीय-परिभोगंतराइयाणमणुभागो बंधेण देशघादी जादो ।"** इति ।

'तो' इत्यादि, 'ततः' उपभोगान्तराय-मतिज्ञानावरणयो रसबन्धस्य देशघातित्वभवनात् स्थिति-खण्डपृथक्त्वे गते 'वीर्यस्य' वीर्यान्तरायस्य रसबन्धो देशघाती भवति । 'तु' तुः पादपूरणे । उक्तं च **कषायप्राभृतचूर्णौ—"तदो ठिदिखंडयपुधत्तेण वीरियंतराइयस्स अणुभागो बंधेण देसघादी जादो ।"** इति ।

न च दानान्तरायादीनामनुभागबन्धस्य देशघातित्वकरणेऽयं क्रमः कथमवसीयते ? इति वाच्यम्, क्षपकाऽनिवृत्तिकरणेऽनुभागबन्धाल्पबहुत्वक्रमस्य तथाविधत्वेनाऽस्य क्रमस्यो-पपत्तौ विरोधा-ऽभावात् । तथाहि– क्षपकानिवृत्तिकरणे विवक्षितकालावच्छेदेन मनःपर्यवज्ञानावरण-दानान्तराययोर्यावाननुभागो बध्यते, ततोऽ-नन्तगुणोऽनुभागो-ऽवधिज्ञानावरणा-ऽ-वधिदर्शनावरण-लाभान्तरायाणां बध्यते, स्वस्थाने तु मिथस्तुल्यः । ततो-ऽनन्तगुणः श्रुतज्ञानावरणा-ऽचक्षुर्दर्श-नावरण-भोगान्तरायाणामनुभागबन्धो भवति, स्वस्थाने तु मिथः सदृशः । ततश्चक्षुर्दर्शनावरण-स्या-ऽनन्तगुणो-ऽनुभागबन्धो भवति, ततो-ऽनन्तगुणो मतिज्ञानावरणोपभोगान्तराययोः, स्वस्थाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु परस्परं सदृशः, ततो-ऽनन्तगुणो वीर्यान्तरायस्य। अनेन क्रमेणा-ऽनुभागबन्धा-ऽल्पबहुत्वस्य सद्भावात् मनःपर्यवज्ञानावरण-दानान्तराययोर्बन्धे-ऽनुभागस्याऽवधिज्ञानावरणादितो-ऽनन्तगुणहीनत्वात् प्रथमं तयोरनुभागो देशघाती बध्यते, ततः परं प्रतिसमयमवधिज्ञानावरणादीनामनुभागोऽनन्तगुणेन हीयमानः सन् स्थितिखण्डपृथक्त्वे गतेऽवधिज्ञानावरणा-ऽवधिदर्शनावरण-लाभान्तरायाणामनुभागो देशघाती बध्यते। एवंक्रमेण श्रुतज्ञानावरणादीनामपि देशघात्यनुभागबन्धो व्युत्पादनीयः।

असंख्येयसमयप्रबद्धोदीरणाप्रभृतयो यन्त्रके दर्श्यन्ते।

यन्त्रकम्

| | |
|---|---|
| (१) चरमा-ऽल्पबहुत्वतः स्थितिखण्डसंख्यसहस्रेषु गतेषु | असंख्येयसमयप्रबद्धोदीरणा जायते। गाथा-३८ |
| (२) ततः स्थितिखण्डसंख्यातसहस्रेषु गतेषु | कषायाष्टकं क्षपयितुमारभते। गाथा-३८ |
| (३) ,, ,, ,, ,, ,, | कषायाष्टकं सर्वथा क्षीणम्, नवरमावलिकामात्रमवशिष्यते। गाथा-३८<br>(१) तदानीं कषायाष्टकस्य जघन्यस्थितिसंक्रमः।<br>(२) तदानीमेव गुणितकर्मांशस्योत्कृष्टप्रदेशसंक्रमः। आवलिकामात्रं सत्कर्म स्तिबुकेन संक्रमयति। |
| (४) ,, ,, ,, ,, ,, | स्थावरादीः षोडशप्रकृतीः क्षपयितुमुपक्रमते। गा.-३९ |
| (५) ,, ,, ,, ,, ,, | ,, ,, सर्वथा विनाशयति। गा.-३९<br>नवरमावलिकामात्रं तासां सत्त्वमवशिष्यते।<br>(१) तदानीं तासां जघन्यस्थितिसंक्रमः।<br>(२) तदानीमेव यथागमं गुणितकर्मांशस्योत्कृष्टप्रदेशसंक्रमः। आवलिकां स्तिबुकेन संक्रमयति। |
| (६) ,, ,, ,, ,, ,, | दानान्तरायमनःपर्यवज्ञानावरणयो रसो देशघाती बध्यते। गाथा-४० |
| (७) ,, ,, ,, ,, ,, | लाभान्तरायावधिज्ञानावधिदर्शनावरणानां रसो देशघाती बध्यते। |
| (८) ,, ,, ,, ,, ,, | श्रुतज्ञानावरणाऽचक्षुर्दर्शनावरणभोगान्तरायाणां रसो देशघाती बध्यते। |
| (९) ,, ,, ,, ,, ,, | चक्षुर्दर्शनावरणस्य रसो देशघाती बध्यते। |
| (१०) ,, ,, ,, ,, ,, | उपभोगान्तरायमतिज्ञानावरणयो रसो देशघाती बध्यते। |
| (११) ,, ,, ,, ,, ,, | वीर्यान्तरायस्य रसो देशघाती बध्यते। गाथा-४१ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथा-ऽनिवृत्तिकरणे-ऽन्यं क्रियाविशेषं प्रतिपादयति—'तो' इत्यादि, 'ततः' वीर्यान्तरायस्य बन्धे देशघातिरसभवनात् स्थितिखण्डसहस्रेषु संख्येयेषु गतेषु सत्सु 'त्रयोदशप्रकृतीनां' संज्वलनचतुष्क-नवनोकषायरूपाणां प्रकृतीनाम् 'अन्तरम्' अन्तरकरणम्–अन्तर्मुहूर्तमात्रस्थितौ दलिकाभावलक्षणं 'स्थितिबन्धकालेन' एकवचननिर्देशाद् एकस्थितिबन्धाद्धया 'करोति' अधस्तादुपरि च कियतीञ्चित् स्थितिं विमुच्या-ऽन्तर्मुहूर्तमितमध्यमस्थितेर्निषेकाणां दलिकशून्यत्वमेकस्थितिबन्धाद्धया सम्पादयतीत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ**–"**तदो ट्ठिदिखण्डयसहस्सेसु गदेसु अण्णं ट्ठिदिखंडयमण्णमणुभागखण्डयमण्णो ट्ठिदिबंधो अंतरट्ठिदीओ च उक्कीरिदुं चत्तारि वि एदाणि करणाणि समगमाढत्तो। चदुण्हं संजलणाणं णवण्हं णोकसायवेदणीयाणमेदेसिं तेरसण्हं कम्माणमंतरं, सेसाणं कम्माणं णत्थि अंतरं।**" इति। तथैव **सप्ततिकाचूर्णावपि**—"**तओ अंतोमुहुत्तेणं णवण्हं नोकसायाणं चउण्हं संजलणाणं च अंतरकरणं करेति।**" इति।

भावार्थः पुनरयम्—अनन्तानुबन्धिचतुष्क-मिथ्यात्व-सम्यङ्मिथ्यात्व-सम्यक्त्वमोहनीयलक्षणस्य दर्शनसप्तकस्या-ऽप्रत्याख्यानावरणचतुष्क-प्रत्याख्यानावरणचतुष्कलक्षणकषायाष्टकस्य च प्राग् नष्टत्वेन वीर्यान्तरायस्य बन्धे देशघातिरसभवनात्स्थितिखण्डसहस्रेषु गतेषु मोहनीयस्या-ऽवशिष्यमाणसंज्वलनचतुष्क-नवनोकषायरूपत्रयोदशप्रकृतीनामन्तरकरणं कर्तुमारभते, तदानीं चाऽभिनवं स्थितिबन्धं स्थितिघातं रसघातं चारभते, अधस्तादुपरि च स्थितिं विमुच्य मध्यस्थाया अन्तर्मुहूर्तप्रमाणस्थितेर्दलानि प्रतिसमयमुत्किरति। एकस्थितिबन्धकालेना-ऽन्तर्मुहूर्तप्रमाणां स्थितिं सर्वथा दलिकाभाववतीं करोति, तदानीं च स्थितिबन्धाद्धया सह स्थितिघाताद्धा रसघाताद्धा च निष्ठां यातः, किन्तु तावता कालेन रसघाताद्धाः सहस्राणि गच्छन्ति, एकस्मिन् स्थितिघाते रसघातानां सहस्रत्वप्रतिपादनात्। उक्तं च **कषायप्राभृतचूर्णौ**—"**संपहि अवट्ठिदअणुभागखंडयसहस्सेसु गदेसु अण्णमणुभागखंडयं जो च अंतरे उक्कीरिज्जमाणे ट्ठिदिबंधो पबद्धो जं च ठिदिखंडयं जाव अंतरकरणद्धा,एदाणि समगं णिट्ठाणियमाणाणि णिट्ठिदाणि।**" इति ॥४०–४१॥

अन्तरकरणं कुर्वन्नधस्तात् कियतीं स्थितिं परित्यजति? इत्यत आह—

**भिन्नमुहुत्तं उदियाणं आवलिया पराण पढमठिई।**
**संढत्थीण समाऽप्पा पुरिसाईण कमसो विसेसहिया॥ ४२॥ (गीतिः)**

भिन्नमुहुर्तमुदितानामावलिका परासां प्रथमस्थितिः।
षण्ढस्त्रियोः समाऽल्पा पुरुषादीनां क्रमशो विशेषाऽधिका॥ ४२॥ इति पदसंस्कारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'भिन्न०'** इत्यादि, अन्तरकरणे क्रियमाणे-ऽधस्ताद् या स्थितिर्विमुच्यते, सा प्रथमस्थितित्वेन व्यपदिश्यते। तत्र 'उदितानां'उदयवतीनां प्रकृतीनां 'भिन्नमुहूर्तम्' अन्तर्मुहूर्तं प्रथमस्थितिर्भवति। 'परासाम्' अनुदितानां–उदयरहितानां प्रकृतीनाम् 'आवलिका' आवलिकाप्रमाणा प्रथमस्थितिर्भवति। अयं भावः–चतुर्षु संज्वलनक्रोधादिष्वन्यतमस्य यस्य संज्वलनस्योदयः, त्रयाणां च वेदानां पुरुषादीनामन्यतमस्य यस्य वेदस्योदयः, तयोः कषायवेदयोरन्तर्मुहूर्तमात्रा प्रथमस्थितिर्भवति। शेषाणामेकादशप्रकृतीनां प्रथमस्थितिरावलिकाप्रमाणा भवति, यथा पुरुषवेदोदयारूढजीवस्य पुरुषवेदस्य प्रथमस्थितिरन्तर्मुहूर्तमात्रा, इतरवेदद्वयस्य त्वावलिकामात्रा। एवं स्त्रीवेदोदयेन प्रतिपन्नस्य स्त्रीवेदस्य प्रथमस्थितिरन्तर्मुहूर्तमात्रा,अन्यवेदद्वयस्य पुनरावलिकामात्रा, तथैव नपुंसकवेदोदयेन समारूढस्य नपुंसकवेदस्य प्रथमस्थितिरन्तर्मुहूर्तमिता,अन्यवेदद्विकस्य त्वावलिकामात्रा। तथा क्रोधोदयेन प्रतिपन्नस्य जन्तोः संज्वलनक्रोधस्य प्रथमस्थितिरन्तर्मुहूर्तमिता शेषसंज्वलनत्रिकस्य पुनरावलिकामात्रा, मानोदयेनारूढस्य जन्तोः संज्वलनमानस्यान्तर्मुहूर्तमात्रा प्रथमस्थितिः, शेषसंज्वलनत्रयस्य त्वावलिका प्रमिता। एवं मायालोभयोरपि वक्तव्या। हास्यषट्कस्य त्वावलिकामात्रैव प्रथमस्थितिर्भवति, उदयरहितत्वात्तस्य।

ननूदयमानानां सर्वासां प्रकृतीनां किं प्रथमस्थितिस्तुल्या भवति, उत विषमा? इत्यत आह-**'संढ०'** इत्यादि, 'षण्ढस्त्रियोः' नपुंसकवेदस्त्रीवेदयोः प्रथमस्थितिः 'समा' मिथः समाना 'अल्पा' स्तोका च भवति, 'पुरुषादीनां' पुरुषवेदक्रोधमानमायालोभरूपाणां प्रथमस्थितिर्विशेषाधिका भवति। तथाहि–एको नपुंसकवेदोदयेन क्षपकश्रेणिं प्रतिपद्यते, अन्यस्तु स्त्रीवेदोदयेन, तत्र प्रथमजन्तोर्नपुंसकवेदस्य यावती प्रथमस्थितिर्भवति, तावत्येव द्वितीयजन्तोः स्त्रीवेदस्य प्रथमस्थितिर्भवति, सा च स्तोका, ततः पुरुषवेदोदयेन क्षपकश्रेणिमारूढस्य जीवस्य पुरुषवेदस्य प्रथमस्थितिः संख्येयतमभागेन विशेषाधिका भवति, संख्येयतमभागश्च वक्ष्यमाणहास्यषट्कक्षपणाकालमात्रो बोद्धव्यः, एतच्चाऽग्रे वेदनानात्वे स्फुटीभविष्यति।

पुरुषवेदस्य प्रथमस्थितितः क्रोधोदयेन क्षपकश्रेणिं समारूढस्य क्रोधस्य प्रथमस्थितिः संख्येयतमभागेन विशेषाधिका भवति, संख्येयतमभागश्च वक्ष्यमाणाऽश्वकर्णकरणाद्धाकिट्टिकरणाद्धामात्रो ज्ञेयः।

क्रोधप्रथमस्थितितो मानोदयेन क्षपकश्रेणिमधिगतस्य मानस्य प्रथमस्थितिः संख्येयभागेन विशेषाधिका भवति, संख्येयतमभागश्च वक्ष्यमाणक्रोधकिट्टिक्षपणाकालप्रमाणो निश्चेतव्यः।

मानप्रथमस्थितितो मायोदयेन क्षपकश्रेणिं प्रतिपन्नस्य मायायाः प्रथमस्थितिः संख्येयभागेन विशेषाधिका भवति, संख्येयतमभागश्च वक्ष्यमाणमानक्षपणाकालप्रमितोऽधिगन्तव्यः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मायाप्रथमस्थितितो लोभोदयेन क्षपकश्रेणिं समधिगतस्य लोभस्य प्रथमस्थितिः संख्येयतमभागेन विशेषाधिका भवति, संख्येयतमभागश्च मायाक्षपणाकालमितो-ऽवसेयः। एतत्सर्वमग्रे कषायनानात्वे व्यक्तीभविष्यति ॥ ४२ ॥

नन्वेकचत्वारिंशत्तमगाथायां त्रयोदशप्रकृतीनामन्तरकरणमन्तर्मुहूर्तप्रमाणमध्यमस्थितिगतदलिकाऽभावसम्पादनलक्षणं प्रतिपादितम्। तत्रा-ऽन्तर्मुहूर्तप्रमाणस्थितौ दलिका-ऽभावं सम्पादयंस्तत्स्थितिगतदलं कुत्र निक्षिपति ? इत्यत आह—

सुदयाणं पयडीणं पढमठिईए खिवेइ उक्किण्णं।
दलिअं बंधंतीण अबाहुवरिमबीयगठिईए ॥४३॥

सोदयानां प्रकृतीनां प्रथमस्थितौ क्षिपत्युत्कीर्णम्।
दलिकं बध्यमानानामबाधोपरितनद्वितीयस्थितौ ॥ ४३ ॥ इति पदसंस्कारः।

'**सुदयाणं**' इत्यादि, 'सोदयानाम्' उदयेन सह वर्तन्ते इति सोदयाः "**सहार्थस्तेन**" (सिद्धहेम० ३-१-२४) इत्यनेन बहुव्रीहिसमासः, तासाम्, उदयवतीनामित्यर्थः, प्रकृतीनां प्रथमस्थितौ 'उत्कीर्णम्' अन्तरकरणत उद्धरितं दलिकं 'क्षिपति' निक्षिपति। '**बंधंतीण**' इत्यादि, बध्यमानानां प्रकृतीनामनुत्कीर्यमाणायामबाधोपरितनद्वितीयस्थितौ अन्तरकरणत उत्कीर्णं दलिकमुद्वर्तनाकरणेन प्रक्षिपति, उद्वर्तनायामबाधाया अतीत्थापनत्वेन तत्र दलिकं न प्रक्षिपति। उक्तं च **कषायप्राभृतचूर्णौ**—"**जाओ अन्तरट्ठिदीओ उक्कीरंति, तासिं पदेसग्गमुक्कीरमाणियासु ट्ठिदीसु ण दिज्जदि। जासिं पयडीणं पढमट्ठिदी अत्थि, तिस्से पढमट्ठिदीए जाओ संपहि ठिदीओ उक्कीरंति, तमुक्कीरमाणगं पदेसग्गं संछुहदि। अध जाओ बज्झंति पयडीओ तासिमाबाहमधिच्छियूण जा जहण्णिया णिसेगठिदी तमादिं कादूण बज्झमाणियासु ठिदीसु उक्कड्डिज्जदे।**" इति। **भावार्थः पुनरयम्**—

(१) यस्याः प्रकृतेर्बन्ध उदयश्च विद्येते, तस्या अन्तरकरणत उत्कीर्यमाणदलं स्वप्रथमस्थितौ बध्यमानोदयमानानां परप्रकृतीनां प्रथमस्थितौ च प्रक्षिपति, तथा-ऽबाधाकालमतिक्रम्या-ऽनुत्कीर्यमाणायां स्वकीयद्वितीयस्थितौ बध्यमानपरप्रकृतिसत्कद्वितीयस्थितौ च प्रक्षिपति, यथा पुरुषवेदारूढः पुरुषवेदस्या-ऽन्तरकरणत उत्कीर्यमाणदलं पुरुषवेदप्रथमस्थितौ बध्यमानोदयमानक्रोधादिरूपपरप्रकृतीनां प्रथमस्थितौ च प्रक्षिपति, तथा-ऽबाधामतिक्रम्या-ऽनुत्कीर्यमाणायां पुरुषवेदद्वितीयस्थितौ बध्यमानक्रोधादीनां च द्वितीयस्थितौ प्रक्षिपति।

(२) यस्याः प्रकृतेर्बन्धो विद्यते, उदयश्च न भवति, तस्या अन्तरकरणत उत्कीर्यमाणदलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्तरकरणं कुर्वतः प्रथमस्थितेश्चित्रम् (गाथा-४२)। तथा
अन्तरकरणं कुर्वतोत्कीर्यमाणदलं यासु स्थितिषु प्रक्षिप्यते, तासां चित्रम् (गाथा—४३)




सङ्केतस्पष्टीकरणम्—

१=मोहनीयस्यानुदयवतीनां प्रकृतीनां प्रथमस्थितिः, तस्यां चा-ऽन्तरकरणत उत्कीर्यमाणं दलं न प्रक्षिपति, सा चावलिकाप्रमाणा।

२=अन्यतमस्य यस्य वेदस्य यस्य च कषायस्योदयः, तयोः प्रथमस्थितिः, तस्याञ्चा-ऽन्तरकरणत उत्कीर्यमाणं दलं प्रक्षिपति। अयन्तु विशेषः—वेद्यमानवेदप्रथमस्थितितो वेद्यमानकषायप्रथमस्थिति-र्विशेषाधिका बोध्या।

३=गुणश्रेणेः सङ्ख्येयतमभागः, तं चाऽन्तरकरणं कुर्वन् घातयति।

४=बध्यमानानां पुरुषवेद क्रोध-मान-माया-लोभानां द्वितीयस्थितिः, तस्यां चाऽन्तरकरणत उत्कीर्य-माणं दलं प्रक्षिप्यते।

५=अबध्यमानानां स्त्रीवेद-नपुंसकवेद-हास्यषट्कानां द्वितीयस्थितिः, तस्यां चा-ऽन्तरकरणत उत्कीर्य-माणं दलं न निक्षिप्यते।

६=गुणश्रेणिशिरः।

यत्र दलिकं प्रक्षिपति, तद् ←⋯⋯अनेन चिह्नेन दर्शितम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## यन्त्रकम्-८ (चित्रम्-८)

एकस्थितिबन्धाद्धया-ऽन्तरकरणे कृते उदयवतीनां प्रथमस्थितिर्द्वितीयस्थितिश्च

द्वि ती य स्थि तिः



अन्तरकरणगता स्थितिः, तत्र च मोहनीयदलिकस्य सर्वथाऽभावः ।



उदयवतोर्वेद-कषाययोरन्तर्मुहूर्तप्रमाणा प्रथमस्थितिः ।

## यन्त्रकम्-९ (चित्रम्-९)

एकस्थितिबन्धाद्धया-ऽन्तरकरणे कृतेऽनुदयवतीनां प्रकृतीनां प्रथमस्थितिर्द्वितीयस्थितिश्च

द्वि ती य स्थि तिः



अन्तरकरणगता स्थितिः, तत्र च

मोहनीयदलिकस्य सर्वथाऽभावः ।



अनुदयवतीनां प्रकृतीनामावलिकाप्रमाणा प्रथमस्थितिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बध्यमानोदयमानपरप्रकृतिप्रथमस्थितौ एव निक्षिपति, तस्या उदयरहितत्वेन तत्प्रथमस्थित्यभावात्* । तथा-ऽबाधामुल्लङ्घ्या-ऽनुत्कीर्यमाणायां स्वद्वितीयस्थितौ बध्यमानपरप्रकृतिसत्कद्वितीयस्थितौ च प्रक्षिपति । यथा क्रोधोदयारूढो मानादीनामन्तरकरणत उत्कीर्यमाणप्रदेशाग्रं क्रोधपुरुषवेदप्रथमस्थितौ प्रक्षिपति, तथा-ऽबाधामतिक्रम्यानुत्कीर्यमाणायां स्वद्वितीयस्थितौ बध्यमानपुरुषवेद-क्रोधादिरूपपरप्रकृतीनां द्वितीयस्थितौ च प्रक्षिपति ।

(३) यस्याः प्रकृतेरुदयो विद्यते, बन्धश्च न भवति, तस्या अन्तरकरणत उत्कीर्यमाणदलं स्वप्रथमस्थितौ बध्यमानोदयमानपरप्रकृतिसत्कप्रथमस्थितौ च प्रक्षिपति, तथा-ऽबाधामुल्लङ्घ्या-ऽनुत्कीर्यमाणायां बध्यमानपरद्वितीयस्थितौ च प्रक्षिपति, न तु स्वद्वितीयस्थितौ, तस्या अबध्यमानत्वेन स्वस्थाने उद्वर्तना-ऽभावात् । यथा स्त्रीवेदक्रोधोदयारूढः स्त्रीवेदस्याऽन्तरकरणत उत्कीर्यमाणदलिकं स्वप्रथमस्थितौ क्रोधप्रथमस्थितौ च प्रक्षिपति, क्रोधस्य बध्यमानत्वे सत्युदयमानत्वात्, तथा-ऽबाधामतिक्रम्याऽनुत्कीर्यमाणायां पुरुषवेदक्रोधादीनां द्वितीयस्थितौ प्रक्षिपति ।

(४) यस्याः प्रकृतेरुदयो न विद्यते, ना-ऽपि बन्धः, तस्या अन्तरकरणत उत्कीर्यमाणदलं सबन्धोदय-परप्रकृतिप्रथमस्थितौ एव प्रक्षिपति, तस्या उदयरहितत्वेन तत्प्रथमस्थित्यभावात्, तथा-ऽबाधां विमुच्य-ऽनुत्कीर्यमाणायां बध्यमानपरद्वितीयस्थितौ एव प्रक्षिपति, न तु स्वद्वितीयस्थितौ, तस्या अबध्यमानत्वेन स्वस्थाने उद्वर्तना-ऽभावात् । यथा पुरुषवेदोदयारूढः नपुंसकवेदस्याऽन्तरकरणत उत्कीर्यमाणं दलं पुरुषवेदादीनां प्रथमस्थितौ अबाधामतिक्रम्य चाऽनुत्कीर्यमाणायां पुरुषवेदादीनां द्वितीयस्थितौ प्रक्षिपति । पश्यन्तु पाठका यन्त्राणि ७-८-९ । इति॥४३॥

अन्तरकरणत उत्कीर्यमाणप्रदेशानां निक्षेपमभिधाया-ऽधुना निष्पादिता-ऽन्तरकरणानां क्षपकाणां वक्ष्यमाणाः सप्ता-ऽधिकारा युगपत् प्रवर्तन्ते, तान् व्याजिहीर्षुराह—

**मोहस्स संखवरिसा बंधो इगठाणिआ य बंधुदया।**
**तस्सेव आणुपुव्वीसंकमणमसंकमो य लोहस्स ॥४४॥ (गीतिः)**
**तह आवलिगासु छसु उदीरणा संढवेअखवणा य।**
**कयअंतराण सत्त-ऽहिगारा जुगवं पयट्टंते ॥४५॥**

मोहस्य संख्यवर्षो बन्ध एकस्थानिकौ बन्धोदयौ ।
तस्यैवा-ऽऽनुपूर्वीसंक्रमणमसंक्रमश्च लोभस्य ॥ ४४ ॥

---

*यद्यप्युदयरहितानां प्रकृतीनामावलिकामात्रा प्रथमस्थितिर्भवति, तथाप्युदयरहितप्रकृतीनामुदयावलिकायां दलनिक्षेपो न संभवति, अतस्तत्प्रथमस्थित्यभावादित्युक्तम् । एवमग्रेऽपि यथास्थानं भावनीयम् ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

तथा-ऽऽवलिकासु षट्सूदीरणा षण्ढवेदक्षपणा च ।
कृता-ऽन्तराणां सप्ताऽधिकारा युगपत् प्रवर्तन्ते ॥ ४५ ॥ इति पदसंस्कारः ।

**'मोहस्स'** इत्यादि, (१) 'मोहस्य' मोहनीयकर्मणः 'संख्यवर्षाः' संख्येयवर्षप्रमितो 'बन्धः' स्थितिबन्धो भवतीति शेषः । इदमुक्तं भवति — इतः पूर्वमन्तरकरणसमाप्तिं यावत् सप्तानामपि कर्मणां स्थितिबन्धो-ऽसंख्येयवर्षप्रमाणो भवति स्म, अतः प्रभृति मोहनीयस्य संख्यातवार्षिकः स्थितिबन्धो जायते, स च पूर्वपूर्वत उत्तरोत्तरः संख्येयगुणहीनो भवति, बन्धस्य संख्येयवार्षिकत्वभवनात्, न तु पूर्ववदसंख्येयगुणहीनः, द्वितीयस्थितिबन्धस्या-ऽन्तर्मुहूर्तमात्रत्वप्रसङ्गात् । शेषकर्मणां तु पूर्ववदसंख्येयवर्षप्रमाणः स्थितिबन्धो भवन्नुत्तरोत्तरो-ऽसंख्येयगुणहीनो भवतीति प्रथमो-ऽधिकारः ।

**'इग०'** इत्यादि, एकस्थानकौ च बन्धोदयौ, चकारः समुच्चयार्थकः, ततश्चा ऽयमर्थः — (२) इतः प्रभृति मोहनीयकर्मण एकस्थानको-ऽनुभागो बध्यते, प्राग् हि द्विस्थानको बध्यते स्मेति द्वितीयो-ऽधिकारः । (३) प्राग् मोहनीयस्य द्विस्थानको-ऽनुभागोदय आसीत्, इतः प्रभृति मोहयनीस्यैकस्थानको-ऽनुभागोदयो जायते, इति तृतीयो-ऽधिकारः ।

**'तस्सेव'** इत्यादि, (४) 'तस्यैव' मोहनीयस्यैव 'आनुपूर्वीसंक्रमणम्' आनुपूर्व्या-परिपाट्या संक्रमणम्-संक्रमो भवति । तथाहि — अन्तरकरणक्रियासमाप्त्यनन्तरं नपुंसकवेदस्य स्त्रीवेदस्य च दलं पुरुषवेदे संक्रमयति, ना-ऽन्यत्र । तथा पुरुषवेद-हास्यषट्करूपसप्तप्रकृतीनां दलं संज्वलनक्रोधे संक्रमयति, ना-ऽन्यत्र । यदभाणि **कषायप्राभृते** —

**"संछुहदि पुरिसवेदे इत्थीवेदं णवुंसयं चेव ।
सत्तेव णोकसाये णियमा कोहम्हि संछुहदि ॥१॥"** इति ।

तथैव तच्चूर्णावपि — **"एदिस्से तदियाए गाहाए विहासा, तं जहा-इत्थीवेदं णवुंसयवेदं च पुरिसवेदे संछुहदि, ण अण्णत्थ । सत्तणोकसाये कोहे संछुहदि, ण अण्णत्थ ।"** इति । तथा संज्वलनक्रोधदलं संज्वलनमाने संक्रमयति, संज्वलनमानस्य प्रदेशाग्रं संज्वलनमायायां संक्रमयति, संज्वलनमायाया दलं संज्वलनलोभे संक्रमयति । उक्तं च **कषायप्राभृते** —

**"कोहं च छुहइ माणे माणं मायाए णियमसा छुहइ ।
मायं च छुहइ लोहे पडिलोमो संकमो णत्थि ॥ १ ॥"** इति ।

अनेन क्रमेण मोहनीयकर्मणः प्रदेशाग्रं संक्रमयति, तेना-ऽऽनुपूर्वीसंक्रम उच्यते । प्राक्तव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानुपूर्व्या संज्वलनक्रोधप्रदेशाग्रं पुरुषवेदे मानादिषु च, संज्वलनमानस्य तु पुरुषवेदे क्रोधे मायादिषु च संक्रमयति स्मेति चतुर्थो-ऽधिकारः ।

'असंकमो' इत्यादि,(५) तत्र 'लोभस्य' संज्वलनलोभस्य 'असंक्रमः' संक्रमा-ऽभावो जायते । एतदुक्तं भवति-प्राग् हि संज्वलनलोभस्य प्रदेशाग्रं शेषसंज्वलनत्रिके पुरुषवेदे च संक्रमयति स्म, इतः प्रभृत्यानुपूर्वीसंक्रमसद्भावेन प्रतिलोमसंक्रमा-ऽभावात् संज्वलनलोभस्य संक्रमो न भवति । न चा-ऽऽनुपूर्वीसंक्रमनिर्देशादेव संज्वलनलोभस्य संक्रमाऽ-भावः सिध्यति, पुनः कुतः प्रतिपाद्यते ? इति वाच्यम्, शिष्यबुद्धिवैशद्यार्थं मन्दधीलोका-ऽनुग्रहार्थं च तत्प्रतिपादनात्, इति पञ्चमो-ऽधिकारः ।

'तह आवलि०' इत्यादि, (६) 'तथा षट्स्वावलिकासु' बन्धसमयादारभ्य षट्स्वावलिकासु व्यतिक्रान्तास्वेव 'उदीरणा' सर्वकर्मणामुदीरणा भवति । अयं भावः-मोहनीयकर्मण इतरकर्मणां च याः प्रकृतयो बध्यन्ते, तासां षण्णामावलिकानां मध्ये उदीरणा न भवति, किन्तु षट्स्वावलिकासु व्यतिक्रान्तास्वेव, अधुनातननूतनबन्धस्य तथाविधस्यभावत्वसंभवात् । इतः पूर्वं तु बद्धदलं बन्धावलिकायां व्यतिक्रान्तायामुदीरणायामायाति स्म । न्यगादि च **कषायप्राभृतचूर्णौ-"छसु आवलियासु गदासु उदीरणा णाम किं भणिदं होइ ? विहासा-जहा णाम समयपबद्धो बद्धो आवलियादिक्कंतो सक्को उदीरेदुमेपमंतरादो पढमसमयकदादो पाए जाणि कम्माणि बज्झंति मोहणीयं वा मोहणीयवज्जाणि वा, ताणि कम्माणि छसु आवलियासु गदासु सक्काणि उदीरेदुं, ऊणिगासु छसु आवलियासु ण सक्काणि उदीरेदुं । एसा छसु आवलियासु गदासु उदीरणा त्ति सण्णा ।"** इति । षष्ठो-ऽधिकार ।

**"संढवेअखवणा"** इत्यादि, (७) 'षण्ढवेदक्षपणा च' चकारः समुच्चये, षण्ढवेदस्य—नपुंसकवेदस्य क्षपणा—विनाशनं प्रवर्तते । एतदुक्तं भवति—अन्तरकरणे कृते नपुंसकवेदं क्षपयितुमुपक्रमते । यदुक्तं **सप्ततिकाचूर्णौ—"अंतरं करेत्तु नपुंसगवेयं खवेतु माढवेति ।"** क्षपणाविधिश्चायम्-प्रथमसमये नपुंसकवेदस्य स्तोकं दलं पुरुषवेदे निक्षिप्य क्षपयति, द्वितीयसमये-ऽसंख्येयगुणं प्रक्षिप्य क्षपयति, ततोऽपि तृतीयसमये-ऽसंख्येयगुणं निक्षिप्य क्षपयति । एवं प्रतिसमयमसंख्येयगुणक्रमेण नपुंसकवेददलं पुरुषवेदे प्रक्षिप्य क्षपयति । इति सप्तमो-ऽधिकारः । इत्येते 'कृतान्तराणां' कृतं—निष्पादितम् अन्तरम्—अन्तरकरणं यैः क्षपकैः, ते कृतान्तराः, तेषां सप्त—सप्तसंख्या अधिकारा युगपत् प्रवर्तन्ते, न तु व्यवधानेनेत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—ताधे चेव णवुंसयवेदस्स आजुत्तकरणसंकामगो । मोहणीयस्स संखेज्जवस्सट्ठिदिगो बंधो । मोहणीयस्स एगट्ठाणिया बंधोदया । जाणि कम्माणि बज्झंति, तेसिं छसु आवलियासु गदासु उदीरणा । मोहणीयस्स आणुपुव्वीसंकमो । लोहसंजलणस्स असंकमो । एदाणि सत्त करणाणि अंतरदुसमयकदे आरद्धाणि ।"** इति ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

अन्तरकरणे निष्पादिते घातिकर्मणामनुभागसत्कर्म सूक्ष्मैकेन्द्रियतोऽनन्तगुणहीनं जायते। न्यगादि च **कर्मप्रकृतिचूर्णौ—"खवयगस्स अणुभागो जाव अंतरकरणं न कीरति,ताव 'घातीण' सव्वघातिदेसघातीणं सुहुमएगिंदियस्स अणुभागसंतकम्मातो अणंतगुणितो होइ। अंतरकरणे कते सुहुमस्स अणुभागतो हेट्ठा भवति।"** इति ॥४४-४५॥

यन्त्रकम्

अन्तरकरणे कृते सप्त पदार्था युगपत् प्रवर्तन्ते। ( गाथा-४४-४५ )

| | |
|---|---|
| (१) मोहनीयस्य सख्यातवार्षिक स्थितिबन्धः। | (५) संज्वलनलोभस्या-ऽसंक्रमः। |
| (२) मोहनीयस्यैकस्थानको-ऽनुभागबन्धः। | (६) षड्स्वावलिकासु गतासु नूतनबद्धकर्मणामुदीरणा। |
| (३) मोहनीयस्यैकस्थानको-ऽनुभागोदयः। | (७) नपुंसकवेदस्य क्षपणा। |
| (४) मोहनीयप्रकृतीनामानुपूर्वीसंक्रमः। | घातिनामनुभागसत्त्वं सूक्ष्मैकेन्द्रियतोऽनन्तगुणहीनम्। |

नन्वन्तरकरणे कृते सति प्रथमसमयादारभ्य मोहनीयकर्मणो-ऽनुभागविषयको बन्ध उदयः संक्रमश्च परस्परं किं समा हीना अधिका वा भवन्ति ? इति शङ्कान्युदासायव्याहरति—

**कयअंतराण मोहस्स बंधुदयसंकमा रसे होन्ति।**
**कमसो अणंतगुणसेढीए अह ते दले भणिमो॥ ४६ ॥**

कृतान्तराणां मोहस्य बन्धोदयसंक्रमा रसे भवन्ति।
क्रमशो-ऽनन्तगुणश्रेण्या-ऽथ तान् दले भणामः ॥ ४६ ॥ इति पदसंस्कारः।

**'कयअंतराण'** इत्यादि, 'कृतान्तराणां' निष्पादिता-ऽन्तरकरणानां जीवानां 'रसे' विषयसप्तमीयम्, ततश्चा-ऽयमर्थः—अनुभागविषया 'मोहस्य' मोहनीयकर्मणो बन्धोदयसंक्रमाः 'क्रमशः' क्रमेण अनन्तगुणश्रेण्या भवन्ति। एतदुक्तं भवति—अन्तरकरणक्रियासमाप्तितः परं विवक्षितसमये मोहस्य यावाननुभागो बध्यते, ततस्तदानीमेवा ऽनन्तगुणो-ऽनुभाग उदयेना-ऽनुभूयते, सत्तागतपुरातना-ऽनुभागस्या ऽनन्तगुणत्वेनोदयेना-ऽनुभूयमानस्या-ऽनन्तगुणत्वे विरोधाभावात्। ततोऽप्यनन्तगुणो-ऽनुभागः संक्रम्यते। कुतः ? इति चेत्, उच्यते—क्षपकश्रेणौ सत्तागता-ऽनुभागोऽनन्तगुणहीनीभूयोदये आगच्छति, संक्रमे तु सत्तागतो-ऽनुभागो यावान् भवति, तावान् परप्रकृतिषु संक्रामति। तेनोदयतः संक्रमेऽनुभागो-ऽनन्तगुणो भवति। यदुक्तं **कषायप्राभृते—**

**"बंधेण होइ उदओ अहिओ उदएण संकमो अहिओ।**
**गुणसेढी अणंतगुणा बोद्धव्वा होइ अणुभागे॥१॥" इति।**

तथैव **तच्चूर्णावपि—"विहासा—अणुभागेण बंधो थोवो, उदओ अणंतगुणो, संकमो अणंतगुणो।"** इति। 'मोहस्स' इति पदं पञ्चाशत्तमगाथां यावदनुवर्तते।

'अह' इत्यादि, अथशब्दो-ऽनन्तरार्थकः, 'तान्' तच्छब्दस्य पूर्ववस्तुपरामर्शित्वात् बन्धोदयसंक्रमान् 'दले' प्रदेशविषयान् 'भणामः' भविष्यत्यर्थे **"सत्सामीप्ये सद्वद् वा"** (सिद्धहेम. ५-४-१) इत्यनेन वर्तमाना, प्रदेशाग्रमाश्रित्य बन्धादीनामल्पबहुत्वं वक्ष्याम इत्यर्थः ॥४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ प्रतिज्ञाताल्पबहुत्वमुत्तरोत्तरसमये-ऽनुभागबन्धोदयौ च वक्तुकाम आह—

**होन्ति पएसे कमसो, बंधउदयसंकमा असंखगुणा ।**
**से काले से काले रसबंधुदया अणंतगुणहीणा ॥ ४७॥ (गीतिः)**

भवन्ति प्रदेशे क्रमशो बन्धोदयसंक्रमा असंख्यगुणाः ।
अनन्तरकाले-ऽनन्तरकाले रसबन्धोदयावनन्तगुणहीनौ ॥४७॥ इति पदसंस्कारः ।

'**होन्ति**' इत्यादि, 'प्रदेशे' प्रदेशविषया मोहनीयकर्मणो बन्धोदयसंक्रमाः 'क्रमशः' क्रमेण असंख्यगुणा भवन्ति । तथाहि—अन्तरकरणे कृते सति विवक्षितसमये पुरुषवेदादीनां बध्यमानप्रकृतीनां यावत् प्रदेशाग्रं बध्नाति, ततस्तदानीमेवोदयेना-ऽसंख्येयगुणं दलमनुभवति, किं कारणम् ? इति चेत्, उच्यते—विवक्षितसमये एकसमयप्रबद्धदलिकं बन्धे वर्तते, उदीरणायां पुनरसंख्येयसमयप्रबद्धमात्रं दलिकं वर्तते, तदानीमसंख्येयसमयप्रबद्धोदीरणायाः प्रवर्तमानत्वात् । उदीरणातश्चाऽप्युदये दलिकमसंख्येयगुणं भवति, गुणश्रेण्या प्रभूतदलिकस्य रचितत्वात् । अतो बन्धतः सुतरामुदये प्रदेशाग्रमसंख्येयगुणं सिध्यति । ततो-ऽपि संक्रम्यमाणं दलमसंख्येयगुणं भवति । अत्र संक्रमशब्देन गुणसंक्रमो यथाप्रवृत्तसंक्रमश्च ग्राह्यः । तेन यासां नपुंसकवेदादीनां प्रकृतीनां गुणसंक्रमोऽस्ति, तासामुदयमानप्रदेशतो गुणसंक्रमेण संक्रम्यमाणं दलमसंख्येयगुणं भवति । यासां पुरुषवेदसंज्वलनक्रोधादीनां प्रकृतीनां पुनर्यथाप्रवृत्तसंक्रमो-ऽस्ति, तासां प्रकृतीनामुदयमानदलतो यथाप्रवृत्तसंक्रमेण संक्रम्यमाणं दलिकमसंख्येयगुणं भवति । ननु गुणसंक्रमभागहारस्योत्कर्षणापकर्षणभागहारतो-ऽसंख्येयगुणहीनत्वेनोदयमानदलिकतो गुणसंक्रमेण संक्रम्यमाणं दलिकमसंख्येयगुणमस्तु, यथाप्रवृत्तसंक्रमेण संक्रम्यमाणं दलिकमुदयगतदलिकतो-ऽसंख्यातगुणं कथं घटते ? यथाप्रवृत्तसंक्रमभागहारस्योत्कर्षणापकर्षणभागहारतो-ऽसंख्येयगुणत्वात् । उक्तं च **कषायप्राभृतचूर्णौ**—"**ओकड्डुक्कड्डुणाए कम्मस्स अवहारकालो थोवो, अधापवत्तसंकमेण कम्मस्स अवहारकालो असंखेज्जगुणो ।**" इति । यथाप्रवृत्तसंक्रमभागहारस्य प्रभूतत्वे संक्रम्यमाणं दलमुदयदलिकतः स्तोकं संभवतीति चेत्, उच्यते-समीचीनमेतद्, किन्तूत्कर्षणा-ऽपकर्षणभागहारेण विभज्य यावद्दलमपवर्तयति, तत्सर्वं गुणश्रेणौ न निक्षिपति, अपि तु तदसंख्येयभागमात्रमेव । यथाप्रवृत्तसंक्रमभागहारेण पुनर्विभज्य गृहीतं सर्वं दलं संक्रमयति । तेन यथाप्रवृत्तसंक्रमभागहारस्य प्राधान्येनोदयगतदलिकतो यथाप्रवृत्तसंक्रमेण संक्रम्यमाणं दलमसंख्येयगुणं सिध्यति । न्यगादि चेदमल्पबहुत्वं **कषायप्राभृते**—

**"बंधेण होइ उदओ अहिओ उदएण संकमो अहिओ ।**
**गुणसेढी असंखेज्जा च पदेसग्गेण बोद्धव्वा ॥१॥"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथैव तच्चूर्णावपि–“**विहासा, जहा-पदेसग्गेण बंधो थोवो, उदयो असंखेज्जगुणो, संकमो असंखेज्जगुणो ।**” इति ।

नन्वनुभागबन्धोदयौ किं स्वस्थाने तुल्यौ वा-ऽधिकौ वा हीनौ वा प्रवर्तेते ? इति जिज्ञासा-नोदित आह—‘**से काले**’ इत्यादि ‘अनन्तरकालेऽनन्तरकाले’ विवक्षितसमयादनन्तरोपरितन-समये ततः परं तदनन्तरोपरितनसमये, उत्तरोत्तरसमये इत्यर्थः, मोहनीयस्य रसबन्धोदयौ अनन्तगुणहीनौ भवतः, पूर्वपूर्वसमयत उत्तरोत्तरसमये-ऽनुभागबन्धोऽनन्तगुणहीनो भवति । एवं पूर्वपूर्वसमयत उत्तरोत्तरसमयेऽनन्तगुणहीनो-ऽनुभागोदयः प्रवर्तत इत्यर्थः । इदमत्र हृदयम्–अन्तरकरणे कृते सति प्रथमे समये मोहनीयस्य यावाननुभागो बध्यते, ततो-ऽनन्तरमाविसमये-ऽनन्तगुणहीनो-ऽनुभागो बध्यते, ततस्तृतीयसमये-ऽनन्तगुणहीनो-ऽनुभागो बध्यते, ततश्चतुर्थ-समयेऽनन्तगुणहीनो बध्यते, विशुद्धेरनन्तगुणत्वात् । एवमुत्तरोत्तरसमये वक्तव्यम् । तथा-ऽन्त-रकरणे कृते सति प्रथमसमये यावाननुभाग उदेति, ततो-ऽनन्तगुणहीनो-ऽनुभागो द्वितीयसमये उदेति, ततस्तृतीयसमये-ऽनन्तगुणहीन उदेति, ततोऽपि चतुर्थसमये-ऽनन्तगुणहीन उदयते । एवमुत्तरोत्तरसमये निश्चेतव्यः । उक्तं च **कषायप्राभृते**—

**“बंधोदएहिं णियमा अणुभागो होदि णंतगुणहीणो ××××॥१॥**
**गुणसेढी अणंतगुणेणूणाए वेदगो दु अणुभागे ××××॥२॥**
**गुणदो अणंतगुणहीणं वेदयदि णियमसा दु अणुभागे ।××××॥३॥**” इति ।

तथैव **कषायप्राभृतचूर्णावपि**–“**विहासा-अस्सिं समये अणुभागबंधो बहुओ, से काले अणंतगुणहीणो । एवं समये समये अणंतगुणहीणो । एवमुदओ वि कायव्वो । अस्सिं समए अणुभागुदयो बहुगो, से काले अणंतगुणहीणो, एवं सव्वत्थ ।**” इति । इदन्त्ववधेयम्-अनेन क्रमेण प्रतिसमयं हीयमानो-ऽनुभागो यथाप्रवृत्तकरण-प्रथमसमयात्प्रभृति बध्यते उदेति च, तथापि मन्दबुद्धिजनानां स्मृत्यै अत्राऽप्यभिहितः ॥४७॥

उत्तरोत्तरसमयेऽनुभागबन्धोदयौ व्याहृत्या-ऽनुभागसंक्रमं प्रदेशबन्धं चा-ऽभिधित्सुराह—

**रससंकमो उ खण्डे पुण्णे होज्जइ अणंतगुणहीणो ।**
**से काले से काले पएसबंधो चउविहो य ॥ ४८ ॥**

रससंक्रमस्तु खण्डे पूर्णे भवत्यनन्तगुणहीनः ।
अनन्तरकाले-ऽनन्तरकाले प्रदेशबन्धश्चतुर्विधश्च ॥ ४८ ॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'**रससंकमो**' इत्यादि, 'रससंक्रमस्तु' तुः पुनरर्थे, मोहनीयकर्मणो-ऽनुभागसंक्रमः पुनः '**खण्डे**' एकवचननिर्देशाद् एकस्मिन् रसखण्डे 'पूर्णे' निष्ठां गते 'अनन्तगुणहीनः' प्राक्तना-ऽनुभागसंक्रमतो-ऽनन्तगुणहीनो भवति, नार्वाक्, रसघाताद्धाया अन्तर्मुहूर्तप्रमाणत्वात् । रस-खण्डं यावन्न घातयति, तावदनुभागसंक्रमस्तुल्यो भवति । ततो-ऽन्यद् रसखण्डं घातयितुमुपक्रमते तस्मिन्नपि घातिते सत्यनुभागसंक्रमो-ऽनन्तगुणहीनो जायते, ततोऽर्वागनुभागसंक्रमः सदृशो जायते । भावार्थः पुनरयम्—यावद्विवक्षिता-ऽनुभागखण्डं परिसमाप्तं न भवति, तावदनुभागसंक्रमः सदृशो भवति । तस्मिन्ननुभागखण्डे परिपूर्णे-ऽन्यदनुभागखण्डं प्रारभ्यते, तदा पूर्वतो-ऽनन्तगुण-हीनोऽनुभागसंक्रमो भवति,प्राक्तनाऽनुभागखण्डविनाशेना-ऽनुभागसत्कर्मणो-ऽनन्तगुणहीनत्वसम्पा-दनात् । सोऽपि चैकादृशस्तावत् प्रवर्तते, यावदनुभागखण्डं निष्ठां न याति । कथमेतदवसीयते ? इति चेद्—उच्यते, रसघातकालस्याऽन्तर्मुहूर्तमात्रत्वेनाऽन्तर्मुहूर्तं यावदेकादृशोऽनुभासंक्रमो जायते, ततः परमभिनवरसघातारम्भे पूर्वतो-ऽनन्तगुणहीनो-ऽनुभागसंक्रमः प्रवर्तते, प्राक्तनाऽनु-भागखण्डविनाशेनानुभागसत्कर्मणोऽनन्तगुणहीनत्वसम्पादनात् । ततः परमनुभागसंक्रमः सदृशो भवन् रसघाताद्धायां पूर्णायामनन्तगुणहीनो भवति । उक्तं च **कषायप्राभृतचूर्णौ**—"**संकमो जाव अणुभागखंडयमुक्कीरेदि, ताव तत्तिगो तत्तिगो अणुभागसंकमो । अण्णम्हि अणुभागखंडए आढत्ते अणंतगुणहीणो अणुभागसंकमो** ।" इति ।

'**से काले से काले**' त्ति 'अनन्तरकाले ऽनन्तरकाले' पूर्वपूर्वत उत्तरोत्तरसमये इत्यर्थः, 'प्रदेशबन्धः' स्थितिरसनिरपेक्षदलिकसंख्याप्रधानरूपो बन्धश्चतुर्विधो वृद्धो हीनो वा संभवति । चकारः समुच्चयार्थः, स चाऽवस्थितो-ऽपि प्रदेशबन्धः संभवतीति संचिनोति, योगस्य चतुर्विध-वृद्धिहान्यवस्थानसंभवेन तत्प्रयोज्यप्रदेशबन्धस्य चतुर्विधवृद्धिहान्यवस्थानत्वे विरोधा-ऽभावात् । इदमुक्तं भवति—अन्तरकरणे कृते सति कश्चिज्जीवो विवक्षितसमये मोहस्य यावत् प्रदेशाग्रं बध्नाति, ततो-ऽनन्तरसमये योगानुसारेणाऽसंख्येयभागवृद्धं वा संख्येयभागवृद्धं वा संख्येयगुण-वृद्धं वा-ऽसंख्येयगुणवृद्धं वा बध्नाति । एवमन्यो योगानुरूपमसंख्येयभागहीनं वा संख्येयभाग-हीनं वा संख्येयगुणहीनं वा-ऽसंख्येयगुणहीनं वा बध्नाति । यद्वाऽपरो-ऽवस्थितयोगेन तावदेव बध्नाति । उक्तं च **कषायप्राभृते**—"**से काले से काले भज्जो बंधो पदेसग्गे** ।" तथैव **तच्चूर्णावपि**—"**पदेसबंधो चउव्विहाए वड्ढीए चउव्विहाए हाणीए अवट्ठाणे च भजियव्वो**" । इति ॥ ४८ ॥

उत्तरोत्तरसमये प्रदेशबन्धमभिधाय प्रदेशोदयं प्रदेशसंक्रमं चाभिधातुकाम आह—

**से काले से काले पएसउदओ असंखगुणो ।**
**से काले से काले दलसंकमणं असंखगुणं ॥४९॥ (उपगीतिः)**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तरकाले-ऽनन्तरकाले प्रदेशोदयो-ऽसंख्यगुणः ।
अनन्तरकाले-ऽनन्तरकाले प्रदेशसंक्रमणमसंख्यगुणम् ॥४९॥ इति पदसंस्कारः ।

**'से काले'** इत्यादि, 'अनन्तरकाले-ऽनन्तरकाले' उत्तरोत्तरसमये इत्यर्थः, 'प्रदेशोदयो' मोहनीयकर्मणः प्रदेशोदयो-ऽसंख्यगुणो भवति । इदमुक्तं भवति–अन्तरकरणे कृते सति प्रथमसमये मोहनीयकर्मणः प्रदेशोदयः स्तोको भवति, ततो द्वितीयसमये-ऽसंख्येयगुणो भवति, ततो-ऽपि तृतीयसमये ऽसंख्येयगुणो जायते । एवमुत्तरोत्तरसमये वक्तव्यम्, गुणश्रेण्योत्तरोत्तरनिषेकेऽसंख्येयगुणदलिकस्य रचितत्वात् । अभाणि च **कषायप्राभृतचूर्णौ—"पदेसुदयो अस्सिं समए थोवो, से काले असंखेज्जगुणो, एवं सव्वत्थ ।"** इति ।

**'से काले'** इत्यादि, अन्तरकरणे कृते 'अनन्तरकालेऽनन्तरकाले' उत्तरोत्तरसमये 'दलसंक्रमणं' प्रदेशसंक्रमो-ऽसंख्यगुणो भवति । एतदुक्तं भवति–अन्तरकरणे कृते सति विवक्षितसमये मोहनीयस्य यावत्प्रदेशाग्रं संक्रम्यते, ततो द्वितीयसमये-ऽसंख्येयगुणं संक्रम्यते, ततो–ऽपि तृतीयसमयेऽसंख्येयगुणं संक्रम्यते, एवमुत्तरोत्तरसमयेऽसंख्येयगुणक्रमेण प्रदेशसंक्रमो वक्तव्यः । अभ्यधायि च **कषायप्राभृते — "गुणसेढी असंखेज्जा च पदेसग्गेण संकमो उदओ ।"** इति । तथैव **तच्चूर्णावपि—"पदेसुदओ अस्सिं समये थोवो, से काले असंखेज्जगुणो, सव्वत्थ । जहा उदओ, तहा संकमो वि कायव्वो ।"** इति । अत्र दलसंक्रमशब्देन यासां प्रकृतीनां गुणसंक्रमो भवति, तासां दलसंक्रमः प्रतिसमयमसंख्येयगुणकारेण भवतीति ज्ञातव्यम् । यासां प्रकृतीनां पुनर्यथाप्रवृत्तसंक्रमः प्रवर्तते, तासां श्रेणिवर्जस्थाने प्रदेशसंक्रमः प्रतिसमयमसंख्येयगुणो न भवतीति सुप्रतीतम् । श्रेणौ तु यथा-ऽऽगमं भावनीयः ॥ ४९ ॥

साम्प्रतं वर्तमानभाविलक्षणकालद्वयमाश्रित्याऽनुभागबन्धोदयौ बिभणिषुराह—

## संपइ बहुगो उदयो तत्तो बंधो-ऽत्थि ताउ अणुभागे ।
## से काले उदयो तत्तो बंधो-ऽणंतगुणहीणो ॥ ५० ॥

सम्प्रति बहुक उदयस्ततो बन्धोऽस्ति तस्मादनुभागे ।
अनन्तरकाले उदयस्ततो बन्धो-ऽनन्तगुणहीनः ॥ ५० इति पदसंस्कारः ।

**'संपइ'** इत्यादि, 'अणुभागे' त्ति पदं **डमरुकमणिन्यायेन** सर्वत्र सम्बध्यते । 'सम्प्रति' अन्तरकरणे कृते सति विवक्षितवर्तमानसमये इत्यर्थः, 'अनुभागे' मोहस्या-ऽनुभागविषय उदयो 'बहुकः' प्रभूतो भवति, 'ततः' निरुक्तसमयसत्कानुभागोदयात् तदानीमेवा-ऽनुभागविषयो बन्धो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽनन्तगुणहीनो 'अस्ति' भवति । 'अणंतगुणहीणो' इति दूरस्थं पदमत्रा-ऽपि सम्बध्यते । एवमग्रेऽपि योजनीयम् । 'तस्मात्' निरुक्तसमयसत्काऽ-नुभागबन्धात् 'अनन्तरकाले' निरुक्तसमयस्या-ऽनन्तरोपरितनसमये इत्यर्थः, अनुभागविषय उदयोऽनन्तगुणहीनः प्रजायते, प्रतिसमयमनुभागोदयस्य विशुद्धिमाहात्म्येना-ऽनन्तगुणहीनत्वदर्शनात्, स चा-ऽधस्तनसमयभाविबन्धतोऽप्यनन्तगुणहीनो जायते, इति सिद्धमनेन विधानेन । 'ततो' निरुक्तसमयस्या-ऽनन्तरोपरितनसमये योऽनुभागोदयः, ततः इत्यर्थः, निरुक्तसमयस्या-ऽनन्तरोपरितनसमये एवा ऽनुभागविषयो बन्धो-ऽनन्तगुणहीनो भवति । उक्तं च **कषायप्राभृते—**

**"उदओ च अणंतगुणो संपहिबंधेण होइ अणुभागे ।**
**से काले उदयादो संपहिबंधो अणंतगुणो ॥ १ ॥"** इति ।

**तच्चूर्णावपि– 'से काले अणुभागबंधो थोवो, से काले चेव उदओ अणंतगुणो, अस्सिं समए बंधो अणंतगुणो, अस्सिं चेव समए उदओ अणंतगुणो ।"** इति ।

एवं गाथापञ्चकेना-ऽन्तरकरणे कृते सति बन्धादीनामल्पबहुत्वादिकमभिहितम् । एता एव पञ्चगाथाः प्रागप्यपूर्वकरणादौ यथा-ऽऽगमं व्याख्येयाः ॥ ५० ॥

## अन्तरकरणे निष्पादिते मोहनीयमाश्रित्या-ऽल्पबहुत्वानि (यन्त्रकम्)

| | |
|---|---|
| (१) अनुभागबन्धोदयसंक्रमा-ऽल्पबहुत्वम्(गा.४६)<br>(i) मोहनीयस्यानुभागबन्धोऽल्पः ।<br>(ii) ततो मोहस्यानुभागोदयोऽनन्तगुणः ।<br>(iii) ततो मोहस्यानुभागसंक्रमोऽनन्तगुणः । | (२) प्रदेशबन्धोदयसंक्रमा-ऽल्पहुत्वम् (गाथा-४६)<br>(i) मोहनीयस्य प्रदेशबन्धः स्तोकः ।<br>(ii) ततो मोहनीयस्य प्रदेशोदयोऽसंख्यगुणः ।<br>(iii) " " प्रदेशसंक्रमो-ऽसंख्यगुणः । |
| (३) उत्तरोत्तरसमये रसबन्धाल्पबहुत्वम् (गा.-४७)<br>(i) प्रथमसमये मोहस्य रसबन्धो-ऽल्पः ।<br>(ii) ततो द्वितीयसमये मोहस्य रसबन्धोऽनन्तगुणहीनः ।<br>(iii) ततस्तृतीयसमये " " " गुणहीनः । एवमुत्तरोत्तरोसमये रसबन्धोऽनन्तगुणहीनक्रमेण भवति । | (४) उत्तरोत्तरसमये रसोदया-ऽल्पबहुत्वम् (गा.-४७)<br>(i) प्रथमसमये मोहस्य रसोदयोऽल्पः ।<br>(ii) ततो द्वितीयसमये मोहस्य रसोदयोऽनन्तगुणहीनः ।<br>(iii) ततस्तृतीयसमये " " " न्तगुणहीनः । एवं मुत्तरोत्तरसमये रसोदयो-ऽनन्तगुणहीनक्रमेण भवति । |
| (५) उत्तरोत्तरसमये-ऽनुभागसंक्रमः–(गाथा ४८)<br>(i) प्रथमसमये मोहस्य यावान् रससंक्रमो भवति । | (६) उत्तरोत्तरसमये प्रदेशबन्धः—(गाथा-४८)<br>प्रथमसमयतो द्वितीयसमये मोहस्य प्रदेशबन्धश्चतुर्विधहान्या चतुर्विधवृद्ध्या-ऽवस्थानेन वा |

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

(ii) द्वितीयसमयेऽपि मोहस्य तावानेव रससंक्रमो भवति।

(iii) ततस्तृतीयसमयेऽपि मोहस्य तावानेव रससंक्रमो भवति, एवं तावद्वक्तव्यम्, यावदन्तर्मुहूर्तम्।

(i) ततोऽनन्तरसमये मोहस्य रससंक्रमोऽनन्तगुणहीनः।

(ii) ततो द्वितीयसमये मोहस्य रससंक्रमस्तावानेव। एवं तावद्वक्तव्यम्, यावदन्तर्मुहूर्तम्। इत्थमन्तर्मुहूर्तं यावद् रससंक्रमस्तुल्यो भवति, पूर्णे त्वन्तर्मुहूर्तेऽनन्तगुणहीनो जायते।

भवति, योगानुरूपत्वात्तस्य। एवं शेषसमयेष्वपि भावनीयम्।

**(७) उत्तरोत्तरसमये प्रदेशोदया-ऽल्पबहुत्वम् (गा. ४९)**

(i) प्रथमसमये मोहस्य प्रदेशोदयोऽल्पः।

(ii) ततो द्वितीयसमयेऽसंख्यगुणः।

(iii) ततस्तृतीयसमये-ऽसंख्यगुण।

एवमुत्तरोत्तरसमये-ऽसंख्यगुणक्रमेण वक्तव्यः।

**(८) उत्तरोत्तरसमये प्रदेशसंक्रमा-ऽल्पबहुत्वम्- (गाथा-४९)**

(i) प्रथमसमये प्रदेशसंक्रमोऽल्पः।

(ii) ततो द्वितीयसमये-ऽसंख्येयगुणः।

(iii) ततस्तृतीयसमयेऽसंख्येयगुणः।

एवमुत्तरोत्तरसमयेऽसंख्येयगुणक्रमेण वक्तव्यः।

**(९) रसबन्धोदयोर्मिथो-ऽल्पबहुत्वम्--(गाथा-५०)**

(i) प्रथमसमये मोहस्य रसोदय स्तोकः।

(ii) ततस्तस्मिन्नेव समये मोहस्य रसबन्धोऽनन्तगुणहीनः।

(iii) ततोऽनन्तरसमये मोहस्य रसोदयोऽनन्तगुणहीनः।

(iv) ततस्तदानीमेव मोहस्य रसबन्धोऽनन्तगुणहीनः।

(९) न्यासः—




→एतच्चिह्नमनन्तगुणहीनतां बोधयति।

पुरुषवेदोदयारूढस्य जीवस्य नपुंसकवेदसत्कां निःशेषतः क्षपणां स्त्रीवेदक्षपणां च निरूपयिषुराह—

**ठिइखंडेसु गयेसुं संढं सव्वं खवेइ तत्तो थिं।**
**खवणद्धासंखंसे, बंधो संखवरिसा तिघाईणं ॥ ५१ ॥ (गीतिः)**

स्थितिखण्डेषु गतेषु षण्ढं सर्वं क्षपयति ततः स्त्रियम्।
क्षपणाद्धासंख्यांशे बन्धः संख्यवर्षास्त्रिघातिनाम् ॥ ५१ ॥ इति पदसंस्कारः।

'**ठिइखंडेसु**' इत्यादि, अन्तरकरणे कृते सति प्रथमसमये द्वितीयस्थितिगतं नपुंसकवेदस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तोकं प्रदेशाग्रं पुरुषवेदे संक्रम्य क्षपयति, ततोऽसंख्येयगुणं द्वितीयसमये क्षपयति। एवंक्रमेण 'स्थितिखण्डेषु' स्थितिखण्डसहस्रेषु 'गतेषु' व्रजितेषु सत्सु 'षण्ढं' सर्वं नपुंसकवेदं 'क्षपयति' नपुंसकवेदक्षपणाद्धाचरमसमये नपुंसकवेदं पुरुषवेदे सर्वसंक्रमेण संक्रम्य सर्वात्मना विनाशयतीत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो संखेज्जेसु ट्ठिदिखंडयसहस्सेसु गदेसु णवुंसयवेदो संकामिज्जमाणो संकामिदो।**" सप्ततिकाचूर्ण्यादौ नपुंसकवेदं परप्रकृतिषु संक्रम्य विनाशयति, न केवलं पुरुषवेदे इत्युक्तम्। तथा च तद्ग्रन्थः–"**अंतरकरणस्स उवरिमठितिदलियं उव्वट्टिज्जमाणं उव्वट्टिज्जमाणं पलिओवमस्स असंखेज्जइभागमेत्तं जायं, तओ तं परपगईसु असंखेज्जगुणेणं संछुब्भमाणं संछुब्भमाणं अंतोमुहुत्तेण संछूढं भवति। एवं नपुंसगवेदो खीणो।**" इति। एवं **कर्मप्रकृतिटीकायां श्रीमदुपाध्यायपादैरपि** न्यगादि—"**अन्तरकरणं च कृत्वा नपुंसकवेददलिकमुपरितनस्थितिगतमुद्वलनविधिना क्षपयितुमारभते, तच्चाऽन्तर्मुहूर्तमात्रेण पल्योपमाऽसंख्येयभागमात्रं भवति। ततः प्रभृति बध्यमानासु प्रकृतिषु गुणसंक्रमेण तद्दलिकं प्रक्षिपति। तच्चैवं प्रक्षिप्यमाणं प्रक्षिप्यमाणमन्तर्मुहूर्तमात्रेण निःशेषं क्षीयते।**" इति।

तदानीं चरमप्रक्षेपे शीघ्रं क्षपणायोद्यतस्य गुणितकर्मांशस्य जन्तोर्नपुंसकवेदस्योत्कृष्टप्रदेशसंक्रमो भवति। उक्तं च **कर्मप्रकृतिचूर्णौ**—"**अट्ठवासिगो सत्तमासब्भतिगो, तस्स खवणाए अब्भुट्ठितस्स 'णपुंसगे सव्वसंकमेण' णपुंसगवेदस्स सव्वसंछोभे गुणितकंमंसितस्स उक्कोसो पदेससंकमो लब्भति।**" इति।

'**तत्तो**' इत्यादि, 'ततः' नपुंसकवेदक्षपणासमनन्तरं 'स्त्रियं' स्त्रीवेदं क्षपयति, 'खिवेइ' इति पदस्य **देहलीदीपकन्यायेना**-ऽत्राऽपि सम्बन्धात्। तत्र स्त्रीवेदक्षपणाद्धाप्रथमसमये स्त्रीवेददलं स्तोकं क्षपयति, ततो द्वितीयसमये-ऽसंख्येयगुणं क्षपयति, ततो-ऽपि तृतीयसमयेऽसंख्येयगुणं क्षपयति। एवंक्रमेण प्रतिसमयमसंख्येयगुणकारेण क्षपयति। स्त्रीवेदक्षपणारम्भसमयादभिनवः स्थितिघातः स्थितिबन्धो रसघातश्चारभ्यन्ते। 'क्षपणाद्धासंख्यांशे' प्रक्रमात् स्त्रीवेदक्षपणाद्धायाः संख्येयतमे भागे गते–नपुंसकवेदक्षयस्या-ऽनन्तरसमयात् प्रभृति स्त्रीवेदक्षपणाद्धाचरमसमयं यावद् यो-ऽन्तर्मुहूर्तप्रमाणः कालः, स स्त्रीवेदक्षपणाद्धा व्यपदिश्यते, तस्याः संख्येयतमे भागे नपुंसकवेदक्षयात् परं स्थितिखण्डपृथक्त्वेन व्रजिते इत्यर्थः, 'त्रिघातिनां' त्रयाणां घातिकर्मणां–ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामित्यर्थः, 'बन्धः' स्थितिबन्धः 'संख्यवर्षाः' संख्येयवर्षप्रमाणो भवति। प्राग् य एतेषां कर्मणां स्थितिबन्धो-ऽसंख्यवर्षप्रमाण आसीत्, सो-ऽसंख्यगुणहान्या हीयमानः सन् सम्प्रति संख्यातवार्षिको जायते इति फलितार्थः। उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो से काले इत्थिवेदस्स पढमसमयसंकामगो, ताधे अण्णं ट्ठिदिखंडयमण्णमणुभागखंडयमण्णो ट्ठिदिबंधो च आरद्धाणि। तदो ट्ठिदिखंडयपुधत्तेण इत्थिवेद-**

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

क्खवणद्धाए संखेज्जदिभागे गदे णाणावरण-दंसणावरण-अंतराइयाणं तिण्हं घादिकम्माणं संखेज्जवस्सट्ठिदिगो बंधो ।" इति । इत ऊर्ध्वं ज्ञानावरण-दर्शनावरणाऽन्तरायाणां स्थितिबन्धः प्रत्यन्तर्मुहूर्तं संख्येयगुणेन हीनो हीनतरो भवति ॥ ५१ ॥

स्त्रीवेदस्य निःशेषतः क्षपणां मोहस्य च स्थितिसत्त्वमभिधित्सुराह—

**तत्तो ठिइखंडपुहुत्तेणं इत्थिं खवेइ णिस्सेसं ।**
**ताहे संतं मोहस्य संखवासपमिअं होई ॥५२॥**

ततः स्थितिखण्डपृथक्त्वेन स्त्रियं क्षपयति निश्शेषम् ।
तदा सत्त्वं मोहस्य संख्यवर्षप्रमितं भवति ॥५२॥ इति पदसंस्कारः ।

'तत्तो' इत्यादि, 'ततः' घातित्रयसत्कस्थितिबन्धस्य संख्येयवर्षमात्रत्वभवनात् स्थितिखण्डपृथक्त्वेन स्त्रीवेदक्षपणाद्धायाः शेषेषु संख्येयेषु बहुभागेषु गतेषु 'स्त्रियं' स्त्रीवेदं 'निःशेषं' सर्वात्मना 'क्षपयति' विनाशयति । ततः परं सत्कर्मणि स्वस्वरूपेण स्त्रीवेदस्यैकमपि दलं न विद्यते इत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—"तदो ट्ठिदिखंडयपुधत्तेण इत्थिवेदस्स जं ठिदिसंतकम्मं, तं सव्वमागाइदं ।"** इति । गुणितकर्मांशस्य शीघ्रं क्षपणायोद्यतस्य जीवस्य स्त्रीवेदस्योत्कृष्टप्रदेसंक्रमो भवति । उक्तं च **कर्मप्रकृतिचूर्णौ—"अट्ठवासिगो सत्तमासब्भहिओ खवणाए अब्भुट्ठितो सो, 'सव्वसंछोभे' इति गुणियकम्मंसिगो चरिमसंछोभे वट्टमाणो इत्थिवेदस्स उक्कोसपदेससंकमगो ।"** इति ।

तदानीं मोहनीयकर्मणः स्थितिसत्त्वं निगदितुकाम आह—'ताहे' इत्यादि, 'तदा' यस्मिन् समये स्त्रीवेदः सर्वथा क्षपितस्तस्मिन् समये इत्यर्थः, 'मोहस्य' मोहनीयकर्मणः 'सत्त्वं' स्थितिसत्कर्म 'संख्यवर्षप्रमितं' संख्यातवर्षप्रमाणं 'भवति' जायते । उक्तं च **कषायप्राभृतचूर्णौ—"ताधे चेव मोहणीयस्स ठिदिसंतकम्मं संखेज्जाणि वस्साणि ।"** इति । अतः परं प्रतिस्थितिखण्डेन मोहनीयकर्मणः संख्यातगुणहीनं स्थितिसत्त्वं जायते, शेषाणां कर्मणां पुनरसंख्येयगुणहीनं भवति, यतो ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तराय-नाम-गोत्राणां स्थितिसत्त्वमद्यापि पल्योपमा-ऽसंख्येयभागप्रमाणं विद्यते ॥ ५२ ॥

स्त्रीवेदक्षपणाया अनन्तरसमयात् पुरुषवेदहास्यषट्कलक्षणसप्तनोकषायान् क्षपयितुमारभते इति सप्तनोकषायक्षपणां स्थितिबन्धस्थितिसत्त्वयोरल्पबहुत्वं च प्ररूपयिषुराह—

**से काले खवए सत्तणोकसाये-ऽप्पबहुअं य ।**
**मोहस्स ट्ठिइबंधो थोवो घाईण संखगुणो ॥५३॥ (उपगीतिः)**

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तो वीसाण असंखगुणो तो तइयस्स खलु विसेसहिओ ।
ठिइसंतं मोहस्सप्पं घाईणं असंखगुणं ॥ ५४ ॥
तो वीसाण असंखगुणं तो तइयस्स खलु विसेसऽहिअं ।
खवणद्धासंखंसे-ऽघाईणं संखवासिगो बंधो ॥५५॥

अनन्तरकाले क्षपयति सप्तनोकषायानल्पबहुत्वं तु ।
मोहस्य स्थितिबन्धः स्तोको घातिनां संख्यगुणः ॥ ५३ ॥
ततो विंशतिकयोरसंख्यगुणस्ततस्तृतीयस्य खलु विशेषाधिकः ।
स्थितिसत्त्वं मोहस्या-ऽल्पं घातिनामसंख्यगुणम् ॥ ५४ ॥
ततो विंशतिकयोरसंख्यगुणं ततस्तृतीयस्य खलु विशेषाधिकम् ।
क्षपणाद्धासंख्यांशे ऽघातिनां संख्यवार्षिको बन्धः ॥ ५५ ॥ इति पदसंस्कारः ।

'से काले' इत्यादि 'अनन्तरकाले' स्त्रीवेदक्षपणाया अनन्तरसमये 'सप्तनोकषायान्' स्त्रीन-पुंसकवेदयोः क्षीणत्वात् हास्यषट्क-पुरुषवेदलक्षणान् 'क्षपयति' युगपत्क्षपयितुमुपक्रमते । उक्तं च **कषायप्राभृतचूर्णौ-"से काले सत्तण्हं णोकसायाणं पढमसमयसंकामगो ।"** एवं सप्त-तिकाचूर्णावपि-"**तओ सत्त वि नोकसाए जुगवं खवेतुमाढवेति ।**" इति । सप्ततिकाचूर्णिकारादीनां मतेनाऽतः प्रभृति हास्यषट्कं पुरुषवेदे न संक्रमयति, किन्तु संज्वलनक्रोधे । तथा चाऽत्र **सप्ततिकाचूर्णिः—'तओ पभिति छण्णोकसाया पुरिसवेदम्मि न संकमंति, कोहसंजलणाए संकमंति ।"** एवमुपाध्यायपुङ्गवैरप्युक्तम्—"**ततः षड्नोकषायान् युगपत् क्षपयितुमारभते । ततः प्रभृति तेषामुपरितनस्थितिगतं दलिकं पुंवेदे न संक्रमयति, अपि तु संज्वलनक्रोधे ।**" इति । **कषायप्राभृतचूर्णिकारादीनामभिप्रायेण** पुनरन्तरकरणक्रियानिष्ठातः प्रभृति हास्यषट्कं क्रोधे एव संक्रमयति । तथा च **तद्ग्रन्थः— "अन्तरादो दुसमयकदादो पाये छण्णोकसाये कोहे संछुहदि, ण अण्णम्हि कम्हि वि ।"** इति ।

अकारस्य लुप्तत्वात् '**अप्पबहुअं य**' त्ति 'अल्पबहुत्वं च' चकारः समुच्चये, तदानीं च स्थितिबन्धस्थितिसत्त्वयोः स्तोकबहुत्वं वक्तव्यमिति शेषः । आदौ तावत् स्थितिबन्धा-ऽल्पबहुत्व-मभिधातुकाम आह—'**मोहस्स**' इत्यादि, 'मोहस्य' मोहनीयकर्मणः स्थितिबन्धः 'स्तोकः' अल्पः, उपरि भण्यमानकर्मणां स्थितिबन्धस्य प्रभूतत्वात् । स च संख्येयवर्षप्रमाणः । ततः 'घातिनां' मोहनीयस्योक्तत्वात् ज्ञानावरण दर्शनावरणा-ऽन्तरायलक्षणानां कर्मणामित्यर्थः, स्थिति-बन्धः संख्येयवर्षमात्रो भवन्नपि 'संख्यगुणः' संख्येयगुणो भवति । '**तो**' इत्यादि, 'ततः' घाति-त्रयस्य स्थितिबन्धाद् 'विंशतिकयोः' विंशतिसागरोपमकोटिकोटिस्थितिकयोर्नामगोत्रयोरित्यर्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'असंख्यगुणः' असंख्येयगुणः स्थितिबन्धो भवति, तस्या-ऽसंख्येयवर्षप्रमाणत्वात् । 'ततः' नामगोत्रस्थितिबन्धतः 'तृतीयस्य' वेदनीयकर्मणः 'खलु' खलुर्वाक्यालङ्कारे स्थितिबन्धो-ऽसंख्येयवर्षप्रमितो जायमानोऽपि विशेषाधिको भवति । उक्तं च कषायप्राभृतचूर्णौ— **सत्तण्हं णोकसायाणं पढमसमयसंकामगस्स ठिदिबंधो मोहणीयस्स थोवो, णाणावरण दंसणावरण अंतराइयाणं ठिदिबंधो संखेज्जगुणो, णामागोदाणं ठिदिबंधो असंखेज्जगुणो वेदणीयस्स ठिदिबंधो विसेसाहिओ ।**" इति । पूर्ववत् स्थितिबन्धो घातिकर्मणां प्रतिस्थितिघाताद्ध्वं संख्येयगुणहीनो जायते, नामगोत्रवेदनीयानामसंख्येयगुणहीनो भवति । अभ्यधायि च कषायप्राभृतचूर्णौ—"**ठिदिबंधो णामा-गोद-वेदणीयाणं असंखेज्जगुणहीणो, घादिकम्माणं ठिदिबंधो संखेज्जगुणहीणो ।**" इति ।

अथ सप्तनोकषायक्षपणाप्रथमसमये स्थितिसत्त्वाऽल्पबहुत्वं निगदति—'**ठिइसंतं**' इत्यादि, 'स्थितिसत्त्वं' स्थितिसत्कर्म 'मोहस्य' मोहनीयकर्मणः 'अल्पं' स्तोकं भवति, उपरि भणिष्यमाणकर्मणां स्थितिसत्त्वस्य प्रभूतत्वात्, तच्च संख्येयवार्षिकं भवति, ततः घातिनां' मोहनीयस्याऽभिहितत्वात् ज्ञानावरण-दर्शनावरणा-ऽन्तरायरूपाणां कर्मणां स्थितिसत्त्वमसंख्यगुणं भवति, तस्या-ऽसंख्येयवर्षप्रमाणत्वात् । 'ततः' घातित्रयस्थितिबन्धतः 'विंशतिकयोः' नामगोत्रयोः स्थितिसत्त्वमसंख्येयवर्षप्रमाणं भवदप्यसंख्येयगुणं भवति । 'ततः' नामगोत्रस्थितिसत्त्वात् 'तृतीयस्य' वेदनीयकर्मणः खलु विशेषाधिकं स्थितिसत्त्वं भवति । उक्तं च कषायप्राभृतचूर्णौ—"**ताधे ठिदिसंतकम्मं मोहणीयस्स थोवं, तिण्हं घादिकम्माणं ठिदिसंतकम्ममसंखेज्जगुणं, णामागोदाणं ठिदिसंतकम्ममसंखेज्जगुणं, वेदणीयस्स ठिदिसंतकम्मं विसेसाहियं ।**" इति ।

स्थितिखण्डपृथक्त्वे गते नाम-गोत्र-वेदनीयानां स्थितिबन्धमभिधातुमना आह—'**खवणद्धासंखंसे**' इत्यादि, 'क्षपणाद्धासंख्यांशे' सप्तनोकषायक्षपणाप्रारम्भतः परं स्थितिखण्डपृथक्त्वेन हास्यषट्कपुरुषवेदसत्कक्षपणाद्धायाः संख्येयतमे भागे गते सतीत्यर्थः 'अघातिनाम्' नामगोत्र वेदनीयानां 'संख्यवार्षिकः' संख्यातवर्षप्रमाणो 'बन्धः' स्थितिबन्धो भवति, प्रागेतेषां कर्मणामसंख्येयवर्षप्रमितः स्थितिबन्ध आसीत्, सम्प्रति संख्येयवर्षप्रमाणो भवतीति फलितार्थः । उक्तं च कषायप्राभृतचूर्णौ—"**तदो ठिदिखंडयपुधत्ते गदे सत्तण्हं णोकसायाणं खवणद्धाए संखेज्जदिभागे गदे णामा-गोद-वेदणीयाणं संखेज्जाणि वस्साणि ठिदिबंधो ।**" इति । इत्थं सर्वेषां कर्मणां स्थितिबन्ध इदानीं संख्येयवर्षमात्रो जायते । तथा चोत्तरोत्तरः स्थितिबन्धः संख्येयगुणहीनो भवति ।। ५३–५४–५५ ।।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

सप्तनोकषायसत्कक्षपणाद्धायाः संख्येयेषु बहुभागेषु गतेषु घातिकर्मणां स्थितिसत्त्वं पुरुषवेदस्या-ऽऽगालप्रत्यागालयोर्व्यवच्छेदं च वक्तुकाम आह—

खवणाद्धासंखंसेसु संतं संखवासिअं घाईणं ।
आगालो पडिआगालो आलिदुगे य सेसगे वोच्छिन्ना ॥५६॥ (आर्यागीतिः)

क्षपणाद्धासंख्यांशेषु सत्त्वं संख्यवार्षिकं घातिनाम् ।
आगालः प्रत्यागाल आवलिकाद्विके च शेषे व्यवच्छिन्नौ ॥५६॥ इति पदसंस्कारः।

'खवणाद्धा०' इत्यादि, 'क्षपणाद्धासंख्यांशेषु' अघातित्रयस्य संख्येयवर्षमात्रस्थितिबन्धप्रारम्भात् परं स्थितिखण्डपृथक्त्वेन सप्तनोकषायाणां क्षपणाद्धायाः संख्यातेषु बहुभागेषु गतेषु सत्स्वित्यर्थः, 'घातिनां' स्त्रीवेदक्षपणाद्धाचरमसमये एव मोहस्य स्थितिसत्कर्मणः संख्यातवार्षिकत्वप्रतिपादनात् ज्ञानावरण-दर्शनावरणा-ऽन्तरायरूपाणां त्रयाणां कर्मणां 'सत्त्वं' स्थितिसत्कर्म संख्यवार्षिकं भवति, संख्येयवर्षप्रमितं जायते इत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—"तदो ट्ठिदिखंडयपुधत्ते गदे सत्तण्हं णोकसायाणं खवणद्धाए संखेज्जेसु भागेसु गदेसु णाणावरणदंसणावरण अंतराइयाणं संखेज्जवस्सट्ठिदिसंतकम्मं जादं ।"** इति । ततः परमुत्तरोत्तरस्थितिघाते पूर्णे मोहनीयवद् ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणामपि स्थितिसत्त्वं संख्येयगुणहीनं भवति, स्थितिसत्कर्मणः संख्येयवार्षिकत्वात् , अघातित्रयस्य च पूर्ववदसंख्येयगुणहीनं संजायते, स्थितिसत्कर्मणो-ऽसंख्येयवर्षप्रमाणत्वात् । उक्तं च **कषायप्राभृतचूर्णौ—"तदो पाए [ घादिकम्माणं ] ट्ठिदिबंधे ट्ठिदिखंडए च पुण्णे पुण्णे ट्ठिदिबंधट्ठिदिसंतकम्माणि संखेज्जगुणहीणाणि,णामागोदवेदणीयाणं पुण्णे ट्ठिदिखंडए असंखेज्जगुणहीणं ठिदिसंतकम्मं ।"** इति ।

**'आगालो'** इत्यादि, आगालः प्रत्यागालश्च, उत्तरस्थस्य चकारस्य व्यवहितसम्बन्धत्वेना-ऽत्र योजनात् 'आवलिकाद्विके' पुरुषवेदस्य प्रथमस्थितौ आवलिकाद्वये 'शेषे' अवशिष्टे व्यवच्छिन्नौ भवतः । एतदुक्तं भवति—आगलनम्—आगालः, आपूर्वको गलिधातुः, **"गल भक्षणे स्रावे च"** ततः **'भावाकर्त्रोः'** (सिद्धहेम० ५–३–१८) इत्यनेन भावे घञ् , द्वितीयस्थितितः कर्मप्रदेशानामुदीरणाप्रयोगेणोदये आगमनमित्यर्थः । न्यगादि च **कर्मप्रकृतिचूर्णौ सम्यक्त्वोत्पादाधिकारे—"जं बितीयठितीतो आणेउ पोग्गले छुभति, तस्स आगाल त्ति सण्णा ।"** इति । प्रत्यागलनं प्रत्यागालः, प्रथमस्थितितः कर्मप्रदेशानामुद्वर्तनया द्वितीयस्थितौ गमनमित्यर्थः । पुरुषवेदस्याऽऽगालप्रत्यागालौ तावत् प्रवर्तेते, यावत् प्रथमस्थितेरावलिकाद्वयं शेषं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति, ततो व्यवच्छिद्येते, न प्रवर्तेते इत्यर्थः । उक्तं च कषायप्राभृतचूर्णौ-"पुरिसवेदस्स दो **आवलियासु पढमट्ठिदीए सेसासु आगालपडिआगालो वोच्छिण्णो ।"*** इति । आगालप्रत्यागालव्यवच्छेदात् परं प्रथमस्थितितः पुरुषवेदस्योदीरणा पूर्ववत् प्रवर्तते ॥५६॥

अथ पुरुषवेदस्य जघन्योदीरणां चरमोदयं च व्याजिहीर्षुराह—

समयाहिअआवलिसेसाअ जहण्णा उदीरणा होइ ।
चरिमे समयूणदुआवलिबद्धमुदयठिई सेसा ॥ ५७ ॥

समयाधिकावलिकाशेषायां जघन्योदीरणा भवति ।
चरमे समयोनद्व्यावलिकाबद्धमुदयस्थितिः शेषा ॥५८॥ इति पदसंस्कारः ।

**'समया०'** 'समयाधिकावलिकाशेषायां' पुरुषवेदसत्कायां प्रथमस्थितौ समयाधिकावलिकायां शेषायां 'जघन्योदीरणा' एकसमयस्थितिका जघन्यस्थित्युदीरणा जघन्यानुभागोदीरणा च भवति । उक्तं च कषायप्राभृतचूर्णौ—**"समयाहियाए आवलियाए सेसाए जहण्णिया ठिदिउदीरणा ।"** × × × × × **पुरिसवेदस्स जहण्णाणुभागउदीरणा कस्स ? पुरिसवेदखवगस्स समयाहियावलियचरिमसमयसवेदस्स ।"** इति । तथैव कर्मप्रकृतिचूर्णावपि—**"ताए पढमठितीए समयाहियावलिसेसाए मिच्छत्तस्स तिण्हं वेयाणं चउण्हं संजलणाणं सम्मत्तस्स च जहण्णिया ठितिउदीरणा भवति । पंचविहअंतराइय-केवलणाणकेवलदंसणावरण-चउण्हं संजलणाणं णवण्हं णोकसायाणं एयासिं वीसाए पगईणं अप्पप्पणो उदीरणंते जहण्णिया अणुभागउदीरणा होति ।"** इति । पुरुषवेदस्य प्रदेशोदीरणा तु तदानीं गुणितकर्मांशस्य महात्मन उत्कृष्टा भवति । तथा चोक्तं कषायप्राभृतचूर्णौ-**"पुरिसवेदस्स उक्कस्सिया पदेसुदीरणा कस्स ? खवगस्स समयाहियावलियचरिमसमयपुरिसवेदगस्स ।"** इति । तथैव कर्मप्रकृतिचूर्णावपि—**"वेयाणं तिण्हं पि अप्पप्पणो समयाहियावलियचरिमसमयवेयगो ।"** इति । ततः परं पुरुषवेदस्य प्रथमस्थितेरावलिकायां शेषायामित्यर्थः, पुरुषवेदस्योदीरणा व्यवच्छिन्ना भवति । केवलमुदयः प्रवर्तते, कथमेतदवसीयते ? इति चेद्, शृणुत, वेदस्य जघन्याऽनुभागोदयः क्षपकश्रेण्यामेव प्राप्यते, विशुद्धेः प्राबल्यात् । स च जघन्याऽनुभागोदयो जघन्याऽनुभागोदीरणया सदृशो न भवति, यतो वेदस्योदीरणायां व्यवच्छिन्नायां परत आवलिकामतिक्रम्य तच्चरमसमये

---

* एवं जयधवलाकारैरपि – पढमविदियट्ठिदीणमुक्कड्डुणोकड्डुणवसेण परोप्परं विसयसंकमो आगाल-पडिआगालो त्ति भण्णदे । सो पुरिसवेदपढमट्ठिदीए आवलियपडिआवलियमेत्तसेसाए उप्पादाणुच्छेदेण वोच्छिण्णो त्ति भणिदं होदि ।" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्या-ऽनुभागोदयो जायते । उक्तं च *कर्मप्रकृतौ—

"अणुभागुदओ वि जहण्णं नवरि आवरणविग्घवेयाण ।
संजलणलोभसम्मत्ताण य गंतूणमावलिगं ॥ १ ॥" इति ।

तथैव तट्टीकायामपि—"नवरं ज्ञानावरणपञ्चका-ऽन्तरायपञ्चक-दर्शनावरण-चतुष्टय-वेदत्रय-संज्वलनलोभ-सम्यक्त्वादीनामुदीरणाव्यवच्छेदे सति परत आवलिकां गत्वा-अतिक्रम्य तस्या-आवलिकायाश्चरमसमये जघन्याऽनुभागोदयो वक्तव्यः।" इति । तेनोदीरणायां व्यवच्छिन्नायामपि केवलं शुद्ध उदयः प्रवर्तते इति सिद्धम् । न केवलं युक्त्या साध्यते, सप्ततिकाचूर्णिकारैरप्युक्तम् । अक्षराणि त्वेवम्—"तिण्हं वेयाण तेण तेण वेदेण सेढिं पडिवण्णस्स अंतरकरणे कए पढमट्ठितीए जाव आवलिया सेस त्ति ताव उदओ य उदीरणा य जुगवं । ततो आवलियामेत्तं कालं उदओ चेव । उदीरणा णत्थि ।" इति । पुरुषवेदं केवलेन शुद्धेनोदयेना-ऽनुभवन् पुरुषवेदोदयस्य द्विचरम-समये संख्येयवर्षस्थितिकं हास्यषट्कं संज्वलनक्रोधे सर्वसंक्रमेण सर्वात्मना क्षपयन् पुरुषवेदस्य चरमस्थितिखण्डं घातयति । कथमेतदवसीयते ? इति चेत्, शृणुत-पञ्चप्रकृत्यात्मकसत्तास्थानस्य कालो जघन्यत उत्कृष्टतश्च समयोनद्व्यावलिकामात्रो भवति, यदुक्तं कषायप्राभृतचूर्णौ प्रकृति विभक्त्यधिकारे—"पंचण्हं विहत्तिओ केवचिरं कालादो ? जहण्णुक्कस्सेण दोआव-लिओ समयूणाओ ।" इति । स च जघन्योत्कृष्टकाल इत्थं भावनीयः—पुरुषवेदोदयेन क्षपकश्रेणिं प्रतिपन्नः पुरुषवेदप्रथमस्थितेर्द्विचरमसमये सर्वं हास्यषट्कं पुरुषवेदस्य चैकामुदय-स्थितिमावलिकाद्वयबद्धनूतनदलं च वर्जयित्वा शेषं पुरुषवेदं सर्वात्मना क्षपयति । ततोऽनन्तर-समये-ऽर्थात् पुरुषवेदप्रथमस्थितिचरमसमये पुरुषवेदसंज्वलनचतुष्करूपाः पञ्चप्रकृतयः सत्कर्मणि विद्यन्ते । तेन ततः प्रभृति पञ्चप्रकृत्यात्मकं सत्तास्थानं प्राप्यते, तच्च तावद् भवति, यावत् सम-योनावलिकाद्वयेन बद्धनूतनपुरुषवेदः क्रोधे निश्शेषतः संक्रान्तो न भवति * । इदं तु नयविशेषेण बोध्यम्, सामान्येन तु पुरुषवेदप्रथमस्थितिद्विचरमसमये हास्यषट्के क्षीणे आवलिकाद्वयं यावत् पञ्चप्रकृत्यात्मकं सत्तास्थानं संभवति,एतच्च सूक्ष्मधिया परिभावनीयम् । न च क्षपयतु हास्य-

---

*एवं धवलाकारैरप्युदयप्ररूपणायामुक्तम् । तथा च तद्ग्रन्थः—"पचणाणावरणीय-चत्तारिदं-सणावरणीय-सम्मत्त-तिण्णिवे-दलोहसंजलण-पंचअंतराइयाणं जहण्णओ अणुभागउदओ कस्स ? जो एदेसिं कम्माणं जहण्णअणुभागउदीरओ होदूण तदो आवलियाए अदिक्कंताए सो चेव जहण्णाणुभागवेदओ होदि ।" इति ।

* भावितश्चैवमेव जयधवलाकारैरपि, तथा च तद्ग्रन्थः—कुदो ? कोधसंजलणपुरिसवेदोदएण खवगसेढिं चडिदस्स सवेदियदुचरिमसमए छण्णोकसाएहि सह खविदपुरिसवेदचिराणसंतस्स सवेदियच-रिमसमए समयूणदोआवलियमेत्तपुरिसवेदणवकसमयपबद्धाणमुवलंभादो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षट्कं पुरुषवेदोदयद्विचरमसमये, पञ्चप्रकृत्यात्मकसत्तास्थानसत्कस्य कालस्य समयोनावलिकाद्वयमात्रत्वात्, पुरुषवेदस्य चरमस्थितिखण्डं तदानीमेव घात्यते इत्येतत् कथमवगन्तव्यम् ? इति वाच्यम्, **कषायप्राभृतचूर्णौ प्रदेशविभक्त्यधिकारे** उक्तत्वात् । तथाहि—पुरुषवेदोदयद्विचरमसमये पुरुषवेदस्य चरमस्थितिखण्डं सर्वात्मना घात्यते । तथा चाऽत्र कषायप्राभृतचूर्णिः—"**दुचरिमसमयसवेदस्स चरिमट्ठिदिखंडगं चरिमसमयविणट्ठं ।**" तथा **कर्मप्रकृतिचूर्णावपि सत्ताधिकारे** प्रथमस्थितेर्द्विचरमसमये पुरुषवेदस्य चरमस्थितिघाताद्धायाश्चरमसमये यज्जघन्यं प्रदेशसत्त्वं भवति, तत आरभ्य एकैकपरमाणुना वृद्धमुत्कृष्टप्रदेशसत्त्वं यावद् यावन्ति स्थानानि लभ्यन्ते, तेषामेकं स्पर्धकं विहितम् । तथा चा-ऽत्र **कर्मप्रकृतिचूर्णिः— दुचरिमसमयपुरिसवेयगस्स अपच्छिमठितिखंडगस्स चरिमसमए जहण्णगं पदेससंतं आदि काऊण जाव अप्पणो उक्कोसं पदेससंतं निरंतराणि ठाणाणि लब्भंति ।**" इति । अत्र वेदोदयद्विचरमसमये-ऽर्थात् पुरुषवेदप्रथमस्थितिद्विचरमसमये स्थितिघाताद्धायाश्चरमसमयप्रतिपादनाद् एतत् सूपपद्यते, यत् पुरुषवेदोदयद्विचरमसमये पुरुषवेदस्य चरमस्थितिखण्डं घात्यते ।

**अन्ये पुनराहुः**-पुरुषवेदोदयचरमसमये हास्यषट्कं सर्वथा क्षीयते, हास्यषट्कक्षयसमकाले पुरुषवेदबन्धस्य व्यवच्छेदप्रतिपादनात् । उक्तं च श्रीमदुपाध्यायपुङ्गवैः—"**यस्तु पुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नस्तस्य नोकषायषट्कक्षयसमकालं पुरुषवेदस्य बन्धव्यवच्छेद** इति ।" एवं पुरुषवेदोदयचरमसमये नवकबद्धपुरुषवेदं विहाय शेषः पुरुषवेदः क्षीयते इति मन्यन्ते ।

अन्यच्च **कर्मप्रकृतिचूर्णिकृता** पुरुषवेदस्य प्रथमस्थितौ समयोनद्व्यावलिकायां शेषायां पुरुषवेदस्य पतद्ग्रहत्वं निषिद्धम् । **अक्षराणि त्वेवम्–"ततो पुरिसवेयस्स पढमट्ठितिए समऊणदुआवलिआए सेसाए पुरिसवेदो पडिग्गहो ण होति त्ति ते दस पुरिसवेदूणेसु चउसु संजलणेसु समयूणदुआवलियमेत्तं संकमंति ।"** इति । तच्च मतान्तरमन्यथा वा परिभावनीयम् । **कषायप्राभृतचूर्णिसप्ततिकाचूर्णिकारादिमतेन** तु स्त्रीवेदे क्षीणे पुरुषवेदः पतद्ग्रहो न भवति, यतः **कषायप्राभृतचूर्णिकारमतेना**-ऽन्तरकरणनिष्ठातः प्रभृति हास्यषट्कं पुरुषवेदे न संक्रमयति, केवलं स्त्रीनपुंसकलक्षणवेदद्वयं संक्रमयति, तस्य च क्षीणत्वात् न कांचिदपि प्रकृतिं पुरुषवेदे संक्रमयति । **सप्ततिकाचूर्णिकाराद्यभिप्रायेण** स्त्रीवेदे क्षीणे हास्यषट्कं संज्वलनक्रोधे संक्रामन्ति, न पुरुषवेदे, तच्च प्राग् दर्शितम् । आनुपूर्वीसंक्रमसद्भावाच्च क्रोधादयः पुरुषवेदे न संक्रामन्ति ।

हास्यषट्कस्य चरमस्थितिखण्डं संक्रमयतो जन्तोर्हास्यषट्कस्य जघन्यस्थितिसंक्रमो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्याऽनुभागसंक्रमश्च भवति, प्रदेशसंक्रमस्तु गुणितकर्मांशस्य जन्तोरुत्कृष्टो भवति। उक्तं च **कर्मप्रकृतिचूर्णौ**—"**सेसगाणं ति वुत्तसेसाणं थीणगिद्धितिग-तेरसणामा अट्ठकसायणवणोकसाया कोहसंजलणमाणमायासंजलणाणं एयासिं छत्तीसाए कम्मपगतीणं 'खवणकमेण' त्ति खवणपरिवाडिते चेव अप्पणो चरिमसंछोभे वट्टमाणो अनियट्टिजहण्णट्ठितिसंकमसामो। ×××× अंतरकरणे कए उवरि जासिं घातिकम्माणं जहिं जहण्णगो ट्ठितिसंकमो भणितो, तासिं अप्पप्पणो ठाणे तहिं जहण्णाणुभागसंकमो। ××× थीणगिद्धितिग-छन्नोकसायासत्तणाम-अट्ठकसायाणं एतासिं चउवीसाए पगतीणं गुणितकंमंसितस्स अणियट्टिकरणे वट्टमाणस्स उक्कोस्सो पदेससंकमो सव्वसंकमेण लब्भति।**" इति। एवं **कषायप्राभृतचूर्णावपि**।

तदानीमेव **कर्मप्रकृतिकारादीना**मभिप्रायेण पुरुषवेदोदयारूढस्य गुणितकर्मांशस्य क्षपकस्य पुरुषवेदस्योत्कृष्टप्रदेशसंक्रमो भवति। अक्षराणि त्वेवम्—"**ततो चुतो 'लहुं'ति मासपुहुत्तट्ठवासिगो 'पुरिसं संछुभमाणस्स' त्ति खवणाए उवट्ठियस्स पुरिसवेदं चरिमसंछोभणाए संछुभमाणस्स पुरिसवेदस्स उक्कोस्सगो पदेससंकमो संसारे उवचियस्स दलियस्स गुणसंकमेण संचियस्स चरिमसंछोभे होइ। दोहिं आवलियाहिं बन्धवोच्छेदो होहिति त्ति जं तंमि काले दलितं बद्धं, तण्ण होति संसारोवचियं। मोत्तुं सेसस्स उक्कोसो पदेससंकमो भवति।**" इति। **कषायप्राभृतचूर्णिकारादीनां** मतेन पुनर्यो गुणितकर्मांशः स्त्रीवेदोदयेन वा नपुंसकवेदोदयेन वा क्षपकश्रेणिं प्रतिपद्यते, स एव पुरुषवेदस्योत्कृष्टतः प्रदेशाग्रं संक्रमयति, न पुरुषवेदोदयारूढः, कथमेतदवसीयते इति चेत्? उच्यते, यः पुरुषवेदोदयेन क्षपकश्रेणिमधिगच्छति, तस्य जीवस्य वेदस्य प्रथमस्थितिः स्त्रीवेदोदयारूढस्य वेदप्रथमस्थितितः संख्येयभागेनाऽधिका भवति, स्त्रीवेदे क्षीणे कषायप्राभृतकारादीनां मतेन पुरुषवेदोदयारूढस्य जीवस्य पुरुषवेदे न काचिदपि प्रकृतिः संक्रामति, तेन स्त्रीवेदक्षयादुपरि केवलं बन्धेनैकसमयप्रबद्धदलिकमागच्छति, उदयेन तु प्रतिसमयमसंख्यसमयप्रबद्धदलं निर्जरामेति, एवमायतो व्ययः प्रभूतो भवति, तेन पुरुषवेदस्योत्कृष्टप्रदेशसंक्रमो गुणिताकर्मांशस्य स्त्रीवेदोदयारूढस्य नपुंसकवेदोदयारूढस्य च जीवस्य पुरुषवेदसत्कचरमखण्डाद्धाचरमसमये भवति, तस्यैवोत्कृष्टप्रदेशसञ्चयसम्भवात्।

न च **कर्मप्रकृतिचूर्णिकारादयो-ऽपि** पुरुषवेदस्योत्कृष्टप्रदेशसंक्रमः परवेदोदयेनाऽऽरूढस्य गुणितकर्मांशस्य जीवस्य कुतो न मन्यन्ते? इति वाच्यम्, मतान्तरसम्भवेन विरोधाभावात्, तथाहि—**कर्मप्रकृतिचूर्णिकारादयः** पुरुषवेदस्य पतद्ग्रहता पुरुषवेदप्रथमस्थितौ समयोनद्व्यावलिकाशेषायामपगच्छतीति मन्यन्ते, न तु **कषायप्राभृतचूर्णिसप्ततिकाचूर्णिका-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रादिवत् स्त्रीवेदे क्षीणे। यदुक्तं **कर्मप्रकृतिचूर्णौ संक्रमकरणाधिकारे–"ततो पुरिसवेयस्स पढमट्ठितीए समऊणदुआवलिआए सेसाए पुरिसवेदो पडिग्गहो ण होदि त्ति।"** इति। एवं स्त्रीवेदे क्षीणेऽपि पुरुषवेदस्य पतद्ग्रहत्वात् हास्यषट्कं पुरुषवेदे संक्रमयति**कर्मप्रकृतिचूर्णिकारमतेन**। तेन पुरुषवेदस्य प्रभूतसञ्चयः पुरुषवेदोदयारूढस्य जीवस्य भवति। यद्यपि परवेदोदयारूढापेक्षया प्रथमस्थितेर्विशेषाधिकत्वेन प्रतिसमयमुदयेनाऽसंख्येयसमयप्रबद्धं प्रदेशाग्रं पुरुषवेदस्य निर्जरति, किन्तु हास्यषट्कतः प्रतिसमयं दलिकं गुणसंक्रमेणाऽऽगच्छति, अतः पुरुषवेदोदयेन प्रतिपन्नस्य क्षपकस्य गुणितकर्मांशस्य जीवस्य पुरुषवेदस्योत्कृष्टप्रदेशसञ्चयो भवति, व्ययत आयस्य प्रभूतत्वात्। तेन **कर्मप्रकृतिचूर्णिकारादीनां** मतेन स्वोदयारूढस्य जीवस्य पुरुषवेदसत्कोत्कृष्टप्रदेशसंक्रमो भवति। **कषायप्राभृतचूर्णिकारादीनां** मतेन पुनः परोदयेनारूढस्यैव जीवस्य पुरुषवेदसत्कोत्कृष्टप्रदेशसंक्रमो भवति, स्त्रीवेदे क्षीणे पुरुषवेदस्य पतद्ग्रहत्वाभावेनाऽऽयतो व्ययस्य प्रभूतत्वात्।

अथ पुरुषवेदस्य चरमोदयं तदानीं चाऽवशिष्यमाणं पुरुषवेदस्य दलं प्ररूपयिषुराह–**'चरिमे'** इत्यादि, 'चरमे' पुरुषवेदोदयचरमसमये 'समयोनद्व्यावलिकाबद्धं' पुरुषवेदस्य समयोनावलिकाद्वयेन बद्धं नूतनप्रदेशाग्रं शेषं विद्यते, द्वितीयस्थितौ समयोनाऽऽवलिकाद्वयबद्धदलं सत्कर्मण्यवशिष्यते इत्यर्थः, तथा 'उदयस्थितिः शेषा' पुरुषवेदस्यैकोदयस्थितिः शेषा भवति, शेषः सर्वः पुरुषवेदः सर्वात्मना क्षीणः। न्यगादि च **कषायप्राभृतचूर्णौ**–"**तदो चरिमसमयसवेदो जादो, ताधे छण्णोकसाया संछुद्धा। पुरिसवेदस्स जाओ दो आवलिआओ समयूणाओ, एत्तिगा समयपबद्धा विदियठिदीए अत्थि, सेसं पुरिसवेदस्स संतकम्मं सव्वं संछुद्धं।**" इति।

ननु समयोनद्व्यावलिकाबद्ध-नूतनपुरुषवेददलं प्रथमस्थितिचरमसमये कुतो न सर्वथा क्षपयति? इति चेत्, शृणुत – पुरुषवेदस्य प्रथमतो बन्धः प्रवर्तते, तेन यथा चिरकालबद्धदलं क्षपयति, तथैव नूतनबद्धदलिकमपि क्षपयति, किन्तु बन्धावलिकायां व्यतिक्रान्तायामेव, नार्वाग्, बन्धावलिकायाः सकलकरणाऽयोग्यत्वात्। अतः पुरुषवेदप्रथमस्थितिसत्कद्विचरमाऽऽवलिकायाः प्रथमसमये पुरुषवेदस्य बद्धं दलिकं बन्धसमयादारभ्याऽऽवलिकाचरमसमयं यावत्तदवस्थं तिष्ठति, तत्क्षपणं नास्ति, बन्धावलिकायाः सकलकरणाऽयोग्यत्वात्। तदनन्तरं प्रथमस्थितिचरमाऽऽवलिकाप्रथमसमयात् प्रभृति क्षपयितुमारभते, एकसमयेन बद्धं दलिकं क्षपयितुमावलिकाप्रमाणः कालो गच्छतीति कृत्वा प्रथमस्थितिसत्कद्विचरमावलिकाप्रथमसमयेन बद्धं दलं चरमावलिकायाश्चरमसमये सर्वथा क्षपयति, द्विचरमावलिकाद्वितीयसमयेन बद्धं दलं चरमाऽऽवलिकायाः प्रथमसमयं यावत्तदवस्थं तिष्ठति। ततश्चरमावलिकाया द्वितीयसमयात् प्रभृति प्रतिसमयं क्षपयंश्चरमावलिका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमसमये न सर्वथा क्षपयति, किन्त्वपगतवेदप्रथमसमये सर्वथा क्षपयति, एवं द्विचरमावलिका-सत्कतृतीयादिसमयैरपि बद्धदलिकं पुरुषवेदोदयचरमसमये न सर्वात्मना क्षपयति । तेन पुरुष-वेदोदयचरमसमये समयोना-ऽऽवलिकाद्वयबद्धदलिकं न निश्शेषतः क्षीणं भवति, तावता कालेन बद्धदलं तदानीं सत्कर्मणि विद्यते इत्यर्थः, इत्यलं प्रपञ्चेन । तच्च नूतनदलमश्वकर्णकरणाद्धायां तावता कालेन क्षपयिष्यति ।

पुरुषवेदोदयचरमसमये जघन्यस्थित्युदयो जघन्याऽनुभागोदयश्च भवति । उक्तं च **कर्मप्रकृतौ—**

**"ठिइउदओ वि ठिइक्खयपयोगसा ठिइउदीरणा अहिगो ।**
**उदयठिईए हस्सो छत्तीसा एगउदयठिई ॥ १ ॥**
**अणुभागुदओ वि जहण्णं नवरि आवरणविग्घवेयाण ।**
**संजलणलोभसम्मत्ताण य गंतूणमावलिगं ॥ २ ॥"** इति ।

तदानीमेव गुणितकर्मांशस्य जीवस्य पुरुषवेदस्योत्कृष्टप्रदेशोदयो भवति । उक्तं च **कर्मप्रकृतिचूर्णौ—"संमत्तस्स चउण्हं संजलणाणं तिण्हं वेयाणं तेसिं अट्ठण्ह खवगस्स गुणियकंमंसिगस्स अप्पप्पणो उदयचरिमसमते वट्टमाणस्स उक्कोसतो पदेसुदओ ।"** इति ॥ ५७ ॥

पुरुषवेदस्य चरमस्थितिबन्धं स्थितिसत्त्वं च निजिगदिषुराह—

## पुरिसस्स अट्ठवरिसा सोलसवरिसाणि संजलणगाणं ।
## बंधो संतं घाइअघाईणं संखऽसंखवासाइं ॥५८॥ (गीतिः)

पुरुषस्या-ऽष्टवर्षाः षोडशवर्षाणि संज्वलनानाम् ।
बन्धः सत्त्वं घात्यघातिनां संख्या-ऽसंख्यवर्षाणि ॥ ५८ ॥ इति पदसंस्कारः ।

**'पुरिसस्स'** इत्यादि, 'पुरुषस्य' पुरुषवेदस्य 'बन्धः' स्थितिबन्धः 'अष्टवर्षाः' अष्टवर्षप्रमाणो भवति । 'संज्वलनानां' संज्वलनक्रोधमानमायालोभानां 'षोडशवर्षाणि' षोडशवर्षप्रमाणः स्थितिबन्धो जायते, शेषाणां षट्कर्मणां स्थितिबन्धः पूर्ववत् संख्येयवर्षसहस्रप्रमाणो भवति । न च स्त्रीवेदक्षपणाद्धासंख्येयतमे भागे गते त्रयाणां घातिकर्मणां, सप्तनोकषायक्षपणाद्धासंख्येयतम-भागे च व्रजिते-ऽघातित्रयस्य संख्येयवर्षमात्रः स्थितिबन्धो-ऽभिहितः, इदानीं पुनः संख्येयवर्ष-सहस्रप्रमितः कुत उच्यते ? निरुक्तस्थानतः प्रभृति निरुक्तकर्मणां स्थितिबन्धे प्रत्यन्तर्मुहूर्तं संख्येयगुणहानिदर्शनादिति वाच्यम्, तदानीमसंख्येयवार्षिकत्वनिषेधायाऽभिहितत्वात्, वस्तुतस्तदानी-मपि संख्यातसहस्रवर्षमितस्थितिबन्धस्येष्टत्वेऽपि संख्यातराशेरनेकविधत्वेन संख्यातसहस्राणामपि

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

संख्यातराशौ समावेशात् । उक्तं च **कषायप्राभृतचूर्णौ**—"**सत्तण्हं णोकसायाणं संकामयस्स चरिमो ट्ठिदिबंधो पुरिसवेदस्स अट्ठवस्साणि, संजलणाण सोलसवस्साणि, सेसाणं कम्माणं संखेज्जाणि वस्ससहस्साणि ट्ठिदिबंधो ।**" इति ।

अथ स्थितिसत्त्वं बिभणिषुराह—'**संतं**' इत्यादि, 'सत्त्वं' स्थितिसत्त्वं 'घात्यघातिनां' घातिकर्मणामघातिकर्मणां च यथासंख्यं 'संख्या-ऽसंख्यवर्षाणि' संख्यवर्षाण्यसंख्यवर्षाणि च भवति । सप्तनोकषायक्षपणाद्धासत्कसंख्येयभागशेषतः प्रभृति संख्येयैः स्थितिखण्डसहस्रैर्घातितं सद् इदानीमपि ज्ञानावरण-दर्शनावरणा-ऽन्तराय-मोहनीयानां स्थितिसत्त्वं संख्येयवर्षमात्रं नाम-गोत्र-वेद-नीयानां चा-ऽसंख्येयवर्षप्रमितमवतिष्ठते इत्यर्थः । अभाणि च **कषायप्राभृतचूर्णौ**—"**ट्ठिदि-संतकम्मं पुण घादिकम्माणं चदुण्हं पि संखेज्जाणि वस्ससहस्साणि, णामा-गोद-वेदणीयाणमसंखेज्जाणि वस्साणि ।**" इति ।

तदानीमेव पुरुषवेदस्य बन्धोदयौ व्यवच्छिद्यमानौ व्यवच्छिन्नौ भवतः । केचित्तूदीरणा सहैव बन्धोदयौ व्यवच्छिद्येते, न त्वावलिकायाः पूर्वमुदीरणा व्यवच्छिद्यते इत्याहुः । तथा चा-ऽत्र **सप्ततिकाचूर्णिः**—"**तओ खविज्जमाणा खविज्जमाणा अंतोमुहुत्तेणं तो नोकसायछक्कं पि छुब्भति, संजलणकोहम्मि' त्ति छन्नोकसाया कोहसंजलणाए संछुद्धा । तम्मि चेव समए पुरिसवेयस्स बंधोदयोदीरणवोच्छेओ ।**" इति । तथैवोक्तं **श्रीमदुपाध्याय-पुङ्गवैः कर्मप्रकृतिटीकायाम्**—"**तत्समये एव च पुंवेदस्य बन्धोदयोदीरणोच्छेदः ।**" इति । एतच्च मतान्तरं संभवति, अन्यथा **सप्ततिकाचूर्णा**वेवोदयविच्छेदतः प्रागुदीरणाविच्छेदो य उक्तः, अक्षराणि त्वेवम्—"**तिण्हं वेयाण तेण तेण वेदेण सेढिं पडिवण्णस्स अंतरकरणे कए पढमट्ठितीए जाव आवलियासेस त्ति ताव उदओ य उदीरण य जुगवं । ततो आवलियामेत्तं कालं 'उदओ चेव, उदीरणा नत्थि ।**" इति । स न घटेत । अत्र मतद्वय-संग्रहार्थं **सप्ततिकाचूर्णिकारै**रुभयथा प्ररूपितम्, यद्वा कारणान्तरेण, तदभिप्रायं तु वयं न विद्मः ।

**अन्ये** पुनराहुः-बन्धोदयौ युगपन्न व्यवच्छिद्येते, किन्तु प्राग् बन्धो व्यवच्छिद्यते, तत उदयः । कथमेतदवसीयते ? इति चेद्, उच्यते-केचित् संज्वलनक्रोधादिचतुष्प्रकृत्यात्मकबन्धस्थानकाले पुरुषवेदसंज्वलनक्रोधत्रिकरूपचतुष्प्रकृत्यात्मकसंक्रमस्थानसद्भावे वेदोदयं मन्यन्ते, तेन तेषां मतेन चतुर्विधबन्धकस्य जन्तोर्वेद-कषायलक्षणद्विकोदये द्वादशभङ्गाः संभवन्ति । तथा चात्र **पञ्चसंग्र-हमूलटीका**—"**चतुर्विधबन्धकस्याप्याद्यविभागे त्रयाणां वेदानामन्यतमस्य वेद-स्योदयं केचिदिच्छन्ति, अतश्चतुर्विधबन्धकस्याऽपि द्वादश द्विकोदयात् जानी-हीति ।**" इति । तथैव **सप्ततिकाचूर्णिः**—"**एत्थ अण्णे अण्णारिसं पढंति । तच्चेदम्-पंचाओ चउक्कं संकममाणस्स होंति ते चेव । वेएहिं परिहीणा चउरो चरिमेसु**

कसिणेसु ।'' इति । तथैव सप्ततिकावृत्तावपि न्यगादि—'इह केचिच्चतुर्विधबन्धसंक्रमणकाले त्रयाणां वेदानामन्यतमस्य वेदस्योदयमिच्छन्ति, ततस्तन्मतेन चतुर्विधबन्धकस्याऽपि प्रथमकाले द्वादश द्विकोदये भङ्गा लभ्यन्ते ।'' इति । इत्थमिदं स्फुटीभवति, यत् पुरुषवेदस्योदये-ऽपि तद्बन्धो नास्ति, वेदकषायलक्षणद्विकोदयेऽपि क्रोधमानमायालोभात्मकचतुष्प्रकृत्यात्मकबन्धस्थानस्योपलम्भात्* ।

## नपुंसकवेदक्षयप्रभृतयो यन्त्रके प्रदर्श्यन्ते ।

(१) (i) अन्तरकरणनिष्पादनतः संख्येयसहस्रस्थितिबन्धेषु गतेषु नपुंसकवेदः सर्वथा क्षीणो भवति । गा०-५१

(ii) तदानीं गुणितकर्मांशस्य शीघ्रक्षपकस्य जीवस्य नपुंसकवेदस्योत्कृष्टप्रदेशसंक्रमो भवति ।

(२) ततः स्त्रीवेदं क्षपयितुमारभते । गाथा-५१

(३) स्थितिखण्डपृथक्त्वेन स्त्रीवेदक्षपणायाः संख्येयतमे भागे गते त्रिघातिकर्मणां संख्येयवार्षिकः स्थितिबन्धो भवति । इत ऊर्ध्वं घातित्रयस्य स्थितिबन्धः संख्येयगुणहीनः । गाथा-५२

(४) (i) ततः स्थितिखण्डपृथक्त्वेन शेषेषु स्त्रीवेदक्षपणाद्धायाः संख्येयबहुभागेषु गतेषु स्त्रीवेदः सर्वात्मना क्षीणः ।

(ii) तदानीं गुणितकर्मांशस्य जीवस्य स्त्रीवेदस्योत्कृष्टप्रदेशसंक्रमो भवति । गाथा-५२

(५) तदनन्तरसमये सप्तनोकषायाणां क्षपणारम्भः । गाथा-५३-५४-५५

(i) तदानीं स्थितिबन्धाल्पबहुत्वम्

(१) मोहनीय स्थितिबन्धः स्तोकः ।

(२) ततो घातित्रयस्य स्थितिबन्धः संख्येयगुणः ।

(३) ततो नामगोत्रयोः स्थितिबन्धोऽसंख्येयगुणः

(४) ततो वेदनीयस्य स्थितिबन्धो विशेषाधिकः ।

(ii) तदानीं स्थितिसत्त्वाल्पबहुत्वम्

(१) मोहनीयस्य स्थितिसत्त्वं स्तोकम्

(२) ततो घातित्रयस्य स्थितिसत्त्वमसंख्येयगुणम्

(३) ततो नामगोत्रयोः " " "

(४) ततोऽपि वेदनीयस्य स्थितिसत्त्वं विशेषाधिकम् ।

(६) ततः स्थितिखण्डपृथक्त्वेन सप्तनोकषायक्षपणाद्धायाः संख्येयतमे भागे गतेऽघातिनां कर्मणां संख्येयवार्षिकः स्थितिबन्धो जायते । गाथा-५५

(७) ततः स्थितिखण्डपृथक्त्वेन सप्तनोकषायक्षपणाद्धायाः संख्येयेषु बहुभागेषु गतेषु ज्ञानावरणदर्शनावरणाऽन्तरायाणां संख्येयवर्षप्रमितं स्थितिसत्त्वं जायते । गाथा-५६

(८) पुरुषवेदस्य प्रथमस्थितावावलिकाद्वयशेषायामागालप्रत्यागालौ व्यवच्छिन्नौ ।

(९) (i) पुरुषवेदस्य प्रथमस्थितौ समयाधिकावलिकाशेषायां पुरुषवेदस्य जघन्या स्थित्युदीरणा जघन्यानुभागोदीरणा च भवति ।

(ii) तदानीमेव गुणितकर्मांशस्य जीवस्योत्कृष्टप्रदेशोदीरणा भवति ।

(१०) (i) तत आवलिकायां गतायां पुरुषवेदस्य चरमोदयः ।

(ii) तदानीं हास्यषट्कं निश्शेषं क्षीणं समयोनद्वयावलिकाबद्धनूतनदलं च वर्जयित्वा शेषः पुरुषवेदः क्षीणः ।

अपूर्णम्

* उक्तञ्च गोमटसारटीकायामपि—''पुरुषवेदोदयेन श्रेण्यारूढे पुंवेदस्य बन्धव्युच्छित्तिः उदयव्युच्छित्तिश्च द्वे युगपदेव । अथवा चक्षब्दाद् बन्धव्युच्छित्तिः उदयद्विचरमसमये स्यात् ।'' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(iii) पुरुषवेदस्य बन्धोदयौ व्यवच्छिद्यमानौ व्यवच्छिन्नौ ।.
(iv) केचित् बन्धोदयाभ्यां सहैवोदीरणा व्यवच्छिन्ना भवतीति मन्यन्ते ।
(v) केचिदाहुः-पुरुषवेदस्य बन्धः प्राग् व्यवच्छिद्यते, तत उदयः ।
(vi) पुरुषवेदस्य जघन्यस्थित्युदयो जघन्यानुभागोदयो गुणितकर्मांशस्य चोत्कृष्टप्रदेशोदयो भवति ।
(vii) स्थितिबन्धः पुरुषवेदस्याष्टवर्षप्रमाणः ।
(viii) " " संज्वलनचतुष्कस्य षोडशवार्षिकः ।
(ix) शेषाणां षण्णां कर्मणां स्थितिबन्धः संख्यातवार्षिकः ।
(x) घातिकर्मणां स्थितिसत्त्वं संख्येयानि वर्षाणि, (xi) अघातिनां चाऽसंख्येयानि वर्षाणि ।
(११) ततोऽश्वकर्णकरणाद्धाप्रारम्भः, पुरुषवेदस्य बद्धनूतनदलं यथागमं प्रतिसमयं संक्रमयति ।

पुरुषवेदस्य चरमोदयस्थितिमनुभूयाऽश्वकर्णकरणाद्धायां प्रविशति । तत्रा-ऽश्वकर्णकरणाद्धायाः प्रथमसमयात् पुरुषवेदस्य समयोना-ऽऽवलिकाद्वयेन बद्धनूतनदलं संज्वलनक्रोधे संक्रमयन् तावता कालेन सर्वथा क्षपयति । तत्र पुरुषवेदक्षपणाचरमसमये पुरुषवेदस्य जघन्यस्थितिसत्कर्म जघन्या-ऽनुभागसत्कर्म जघन्ययोगिना बद्धपुरुषवेददलिकस्य जघन्यप्रदेशसत्त्वं भवति । उक्तं च **कषायप्राभृतचूर्णौ**–'**पुरिसवेदस्स जहण्णट्ठिदिविहत्ती कस्स ? पुरिसवेदखवयस्स चरिमसमयअणिल्लेविदपुरिसवेदस्स** । ×××× **पुरिसवेदस्स जहण्णाणुभागसंतकम्मं कस्स? पुरिसवेदेण उवट्ठिदस्स चरिमसमयअसंकामयस्स** । ×××× **पुरिसवेदस्स जहण्णयं पदेससंतकम्मं कस्स ? चरिमसमयपुरिसवेदोदयक्खवगेण घोलमाणजहण्णजोगट्ठाणे वट्टमाणेण जं कम्मं बद्धं, तं कम्ममावलियसमयअवेदो संकामेदि । जत्तो पाए संकामेदि, तत्तो पाए सो समयपबद्धो आवलियाए अकम्मं होदि । तदो एगसमयमोसक्किदूण जहण्णयं पदेससंतट्ठाणं** ।" इति ।

तदानीं च स्वबन्धचरमसमयेन बद्धं पुरुषवेदं निःशेषतः सर्वसंक्रमेण संक्रमयतो जन्तोः पुरुषवेदस्य जघन्यः स्थितिसंक्रमो ऽनुभागसंक्रमश्च भवति । उक्तं च **कषायप्राभृतचूर्णौ**–'**कोहसंजलणस्स जहण्णट्ठिदिसंकमो कस्स ? खवयस्स कोहसंजलणस्स अपच्छिमट्ठिदिबंधचरिमसमयसंछुहमाणयस्स तस्स जहण्णयं, एवं माणमायासंजलणपुरिसवेदाणं** । × × × × **कोहसंजलणस्स जहण्णाणुभागसंकामओ को होइ ? चरिमाणुभागबंधस्स चरिमसमयअणिल्लेवगो, एवं माणमायासंजलणपुरिसवेदाणं** ।" इति तथैव **कर्मप्रकृतिचूर्णावपि**—"**ततो पुरिसवेदं खवेति, तस्स समयूणदुआवलियबंधो सव्वजहन्नगो ठितिसंकमो लब्भति । अंतरकरणे कए उवरि जासिं घातिकम्माणं जहिं जहण्णगो ट्ठितिसंकमो भणितो, तासिं अप्पप्पणो ठाणे तहिं जहण्णाणुभागसंकमो** ।"

तदानीमेव **कर्मप्रकृतिचूर्णौ** जघन्यप्रदेशसंक्रमोऽप्युक्तः । तथा च **तद्ग्रन्थः**—"**पुरिसकोहमाणमायासंजलणाणं 'घोलमाणेणं' ति जहण्णगजोगिणा 'चरिमबद्धस्स'**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अश्वकर्णकरणाद्धायाश्चित्रम्




संक्षेपतो विवरणम्—

अस्मिंश्चित्रेऽश्वस्य कर्णो दर्शितः, स च मध्यभागे बाहल्यतः प्रभूतः, ततो हीनो हीनतरः, एवमेवाऽश्वकरणाद्धायां प्रथमे-ऽनुभागखण्डे विनाशिते संज्वलनक्रोधादीनां क्रमशः सत्तागतो-ऽनुभागो हीनो हीनतरः भवति। इहा-ऽश्वकर्णोऽनन्तगुणक्रमेण हीनो हीनतरो न सम्भवति, किन्तु विशेषहीनः संख्यातगुणहीनो वा सम्भवति, तेन सादृश्यं केवलहीनत्वहीनतरत्वाद्यपेक्षया बोध्यम्, न त्वनन्तगुणहीनत्वाद्यपेक्षया।

"लोभवेदनकालस्याद्यत्रिभागोऽश्वकर्णकरणाद्धा, यथा ह्यश्वकर्णस्तले बहुस्थूलः क्रमेणाऽपकर्षतो यावदन्तेऽतावत् तनुरस्तथाऽवस्थितस्योपशमकस्योपरितनस्थितेः पूर्वस्पर्द्धकानामनुभागविधानेन तदाकृतिभावादनुभागोऽश्वकर्ण इवाश्वकर्णस्तस्य करणाद्धेति।" इति श्रीमुनिचन्द्रसूरिपादैः श्रीशतकचूर्णिटिप्पनेऽश्वकर्णकरणाद्धार्थो व्याख्यातः, सोऽपि नाऽत्र विरुध्यते, क्षपकैरप्यपूर्वस्पर्धकानां निर्वृत्तेः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदोलकरणाद्धायाश्चित्रम्




संक्षेपतो विवरणम्—

अस्मिंश्चित्रे आदोलो दर्शितः, तत्र वृक्षशाखाया रज्ज्वाश्चान्तरालगत आकारस्त्रिकोणीभूय क्रमेण हीनो हीनतरो भवति, एवमेवास्यामद्धायां प्रथमाऽनुभागखण्डे घातिते संज्वलनक्रोधादीनामनुभागसत्कर्माऽनन्तगुण-क्रमेण हीनं हीनतरं भवति, इह चित्रे त्रिकोणाकारो विशेषहीनक्रमेण सम्भवति, न त्वनन्तगुणहीनक्रमेण, तेन सादृश्यं केवलहीनत्वाद्यपेक्षया बोध्यम ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**खवणाए अब्भुट्ठियस्स अप्पप्पणो चरिमसमयबद्धस्स 'सगअंतिमे'त्ति अप्पप्पणो चरिमसमए छोभे सव्वसंकमेणं जहण्णतो पदेससंकमो होति त्ति । कहं? भण्णइ-एतेसिं चतुण्हं बंधवोच्छेयकाले दुआवलियबद्धलतं मोत्तूण अण्णं णत्थि पदेसग्गं, तं च समए समए खीयमाणं अंतिमे समए अंतिमसमयबद्धस्स असंखेज्जतिभागो सेसो भवति, तेण चरिमसमए जहण्णतो पदेससंकमो होइ ।"** इति । **कषायप्राभृत-चूर्णिकारैस्तु** चरमसमयबद्धप्रदेशाग्रं संक्रमयत उपशमकस्य जघन्यप्रदेशसंक्रमोऽभिहितः । तथा च तद्ग्रन्थः—**"कोहसंजलणस्स जहण्णओ पदेससंकमो कस्स? उवसामयस्स चरिमसमयबद्धो जाधे उवसामिज्जमाणो उवसंतो, ताधे तस्स कोहसंजलणस्स जहण्णओ पदेससंकमो, एवं माणमायासंजलणपुरिसवेदाणं ।** इति ॥ ५८ ॥

तदेवमभिहितस्तृतीयाऽधिकारः । सम्प्रति **"हयकण्ण०"** इत्यनेनोद्दिष्टस्य चतुर्थाऽधिकारस्याऽवसरः । यद्यपि चतुर्थाधिकारः पञ्चमाऽधिकारो बादरकिट्टिपर्यवसानः षष्ठाऽधिकारश्चेत्येतेऽनिवृत्तिकरणे एव भवन्ति, बादरकिट्टिवेदनचरमसमयं यावदनिवृत्तिबादरसम्परायगुणस्थानस्योपलम्भात्, तथापि क्रियाविशेषप्रतिपादनार्थमनिवृत्तिकरणतः पृथगधिकारत्वेन हयकर्णकरणाद्धादयो निर्दिष्टाः । अनिवृत्तिकरणं तु बादरकिट्टिवेदनाद्धाचरमसमये व्यवच्छेत्स्यति । पुरुषवेदोदयेऽपगते क्रोधवेदनाद्धायास्त्रयो भागाः कर्तव्याः । तत्र प्रथमभागे हयकर्णकरणाद्धा, द्वितीयभागे किट्टिकरणाद्धा, तृतीयभागे च क्रोधकिट्टिवेदनाद्धा । अथ चतुर्थाऽधिकारं हयकर्णकरणाद्धालक्षणं विभणिषुरादौ तावद् हयकर्णकरणाद्धायाः पर्यायनामानि प्राह—

**हयकण्णादोलोव्वट्टणउव्वट्टणकरणअद्धा ।**
**हयकण्णकरणकालस्स तिन्नि णामाणि णेयाणि ॥५९॥ (उपगीतिः)**

हयकर्णाऽऽदोलाऽपवर्तनोद्वर्तनकरणाऽद्धा ।
हयकर्णकरणकालस्य त्रीणि नामानि ज्ञेयानि ॥५९॥ इति पदसंस्कारः ।

**'हयकण्ण०'** इत्यादि, 'हयकर्णाऽऽदोलापवर्तनोद्वर्तनाकरणाद्धा' करणाद्धाशब्दः प्रत्येकमभिसम्बध्यते । ततश्चाऽयमर्थः—हयकर्णकरणाद्धा आदोलकरणाद्धा अपवर्तनोद्वर्तनकरणाद्धा च 'हयकर्णकरणकालस्य' अश्वकर्णकरणाद्धायाः 'त्रीणि' त्रिसंख्याकानि 'नामानि' पर्यायनामानि 'ज्ञेयानि' सार्थकानि ज्ञातव्यानि । उक्तं च **कषायप्राभृतचूर्णौ—"अस्सकण्णकरणे त्ति वा आदोलकरणे त्ति ओव्वट्टणउव्वट्टणाकरणे त्ति तिण्णि णामाणि अस्सकण्णकरणस्स ।"** इति । एतदुक्तं भवति-हयति हिनोति वा हयः " अच् " (सिद्धहेम० ५-१-४९) **इत्यनेन सूत्रेण** हिधातो कर्तरि अच्प्रत्ययः, अश्व इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"घोटकस्तुरगस्ताक्ष्यस्तुरङ्गो-ऽश्वस्तुरङ्गमः ।
गन्धर्वोऽर्वा सप्तवीति वाहो वाजी हयो हरिः ॥१॥ इति वचनात् । तस्य कर्णः, कण्यते-ऽनेनेति कर्णः, "भावाकर्त्रोः" ( सिद्धहेम० ५-३-१८ ) इत्यनेन घञ् प्रत्यय, यद्वा किरत्यनेन "इणुची०" (उणादि० १८२) इत्यनेन णप्रत्ययः । श्रोत्रमित्यर्थः, "कर्णः श्रोत्रं श्रवणं च" इति वचनात्, हयकर्णवत् करणं प्रथमे-ऽनुभागखण्डे-ऽपगते संज्वलनक्रोधप्रभृतिसंज्वलनलोभपर्यवसानानां कषायाणां यथाक्रममनन्तगुणहीनाऽनुभागव्यवस्थापनम् हयकर्णकरणम्, तस्य अद्धा-कालः, हयकर्णकरणाद्धा अश्वकर्णकरणाद्धेत्यर्थः, यथा-ऽश्वकर्णो मध्यात् प्रभृत्या-ऽऽग्रं हीनो हीनतरो भवति, तथैवा-ऽस्यामद्धायामपि प्रथमे-ऽनुभागे खण्डे विनष्टे संज्वलनक्रोधादीनां सत्तागतो-ऽनुभागः क्रमशो-ऽनन्तगुणहीनत्वेन व्यवस्थाप्यते । सम्प्रत्यादोलकरणाद्धा व्युत्पाद्यते—आदोल्यते-ऽस्मिन्निति आदोलः "भावकर्त्रोः" (सिद्धहेम० ५-३-१८) इति अधिकरणे घञ्प्रत्ययः, प्रेङ्खोलनमित्यर्थः । आदोल इव करणं संज्वलनक्रोधादीनां यथाक्रममनन्तगुणहीनाऽनुभागव्यवस्थापनम् आदोलकरणम् , तस्या-ऽद्धा आदोलकरणाद्धा । यथा आदोले वृक्षशाखाया रज्ज्वोश्चाऽन्तरालगत आकारस्त्रिकोणीभूय क्रमेण हीयमानो दृश्यते, तथैवाऽस्यामद्धायामपि संज्वलनक्रोधादीनामनुभागसत्कर्मा-ऽनन्तगुणहीनक्रमेण दृश्यते । अथ अपवर्तनोद्वर्तनकरणाद्धा व्युत्पाद्यते-अपवर्तनं नाम हानिः, उद्वर्तनं नाम वृद्धिः । अस्यामद्धायां प्रथमे-ऽनुभागखण्डे व्रजिते सति क्षपकः संज्वलनक्रोधादीनामनुभागसत्कर्म क्रमशो-ऽनन्तगुणहीनं करोति, संज्वलनलोभादीनामनुभागसत्त्वं पुनर्यथाक्रममनन्तगुणवृद्धत्वेन व्यवस्थापयतीत्यपवर्तनोद्वर्तनकरणाद्धा व्यपदिश्यते । यद्वा-ऽस्यामद्धायां प्रथमा-ऽनुभागखण्डे-ऽनुभागस्पर्धकानि संज्वलनलोभादीनां विशेषहीनक्रमेण दृश्यन्ते, संज्वलनक्रोधादीनां पुनर्विशेषाधिकक्रमेण दृश्यन्ते इत्यपवर्तनोद्वर्तनकरणाद्धा व्यपदिश्यते । पश्यन्तु पाठका यन्त्रकाणि १०-११ इति ॥५९॥

सम्प्रत्यश्वकर्णकरणाद्धायाः प्रथमसमये स्थितिसत्त्वं स्थितिबन्धं च विभणिषुराह—

**ठिइसंतं संखसहस्सवासमेत्तं तयाणि मोहस्स ।**
**अंतोमुहुत्तऊणो सोलसवासपमिओ बंधो ॥ ६० ॥**

स्थितिसत्त्वं संख्यसहस्रवर्षमात्रं तदानीं मोहस्य ।
अन्तर्मुहूर्तोनः षोडशवर्षप्रमितो बन्धः ॥६०॥ इति पदसंस्कारः ।

'ठिइसंतं' इत्यादि, तत्र 'तदानीं' प्रत्यासत्तेरश्वकर्णकरणाद्धायाः प्रथमसमये 'मोहस्य' मोहनीयकर्मणः संज्वलनचतुष्कस्येति यावत् , स्थितिसत्त्वं संख्यसहस्रवर्षमात्रं भवति, पूर्वमपि स्त्रीवेदक्षपणाद्धाचरमसमये मोहनीयकर्मणः स्थितिसत्त्वं संख्येयसहस्रवर्षप्रमितमासीत्, स्थितिखण्डसहस्रैर्घातितं सत् सम्प्रत्यपि संख्येयसहस्रवर्षप्रमाणं भवति, किन्तु पूर्वतः संख्येयगुणहीनं भवतीत्यर्थः—

न च स्त्रीवेदक्षपणाद्धाचरमसमये पुरुषवेदक्षपणाद्धाचरमसमये च मोहनीयसत्कर्म संख्येय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वार्षिकमभिहितम् । निरुक्तस्थानतः प्रभृति संख्येयगुणहानिदर्शनाद् इदानीं संख्येयसहस्रवर्षप्रमितं मोहनीयस्थितिसत्त्वं कुतो भण्यते ? इति वाच्यम् , तदानीमपि संख्येयसहस्रवर्षप्रमाणसत्कर्मण इष्टत्वे-ऽपि संख्यातराशेरनतिक्रान्तत्वात् संख्यातसहस्राणामपि संख्यातराशौ समावेशात् । एवमन्यत्रा ऽपि बोद्धव्यम् । स्थितिखण्डसहस्रैर्व्यतीतं सत् पूर्ववच्छेषघातिकर्मणामपि स्थितिसत्त्वं संख्येयसहस्रवर्षप्रमाणं नामगोत्रवेदनीयानां चा-ऽघातिकर्मणामसंख्येयवर्षप्रमितं ज्ञातव्यम् ।

घण्टालालान्यायेन **"तयाणि मोहस्स"** इति पदद्वयमुत्तरत्राऽपि सम्बन्धनीयम् । **'अंतो'** इत्यादि, तदानीं 'मोहस्य' सज्वलनचतुष्कस्य 'बन्धः' स्थितिबन्धो 'अन्तमुहूर्तोनः' अन्तर्मुहूर्तन्यूनः षोडशवर्षप्रमितो भवति । एतदुक्तं भवति—पुरुषवेदोदयचरमसमये संज्वलनचतुष्कस्य षोडशवर्षप्रमाणः स्थितिबन्ध आसीत्, सम्प्रत्यन्तमुहूर्तन्यूनषोडशवर्षप्रमाणं स्थितिबन्धमारभते, अतः प्रभृति हि संज्वलनस्थितिबन्धस्या-ऽन्तमुहूर्तप्रमाणा हानिर्भवति । उक्तं च **कषायप्राभृतचूर्णौ**—"**ट्ठिदिबंधो सोलसवस्साणि अंतोमुहुत्तूणाणि** ।" इति । शेषकर्मणां तु पूर्ववत् स्थितिबन्धः संख्येयवर्षप्रमाणो ज्ञातव्यः, पूर्वपूर्वतश्च संख्येयगुणेन हीनो हीनतरो भवति ॥६०॥

अथा-ऽश्वकर्णकरणाद्धाप्रथमसमयेऽनुभागसत्कर्मविषयकमल्पबहुत्वमभिधित्सुराह—

**रससंतं माणस्सप्पमह विसेसाहिअक्कमेण खलु ।**
**होज्जाइ कोहमायालोहाणं तव्व बंधो वि ॥६१॥**

रससत्त्वं मानस्याल्पमथ विशेषाधिकक्रमेण खलु ।
भवति क्रोधमायालोभानां तद्वद् बन्धो-ऽपि ॥६१॥ इति पदसंस्कारः ।

**'रससंतं'** इत्यादि, 'रससत्त्वम्' अश्वकर्णकरणाद्धायाः प्रथमसमये ऽनुभागसत्कर्म मानस्य 'अल्पम्' स्तोकम् , उपरि भण्यमानक्रोधादीनामनुभागसत्कर्मणः प्रभूतत्वात् । 'अह' त्ति 'अथ' अथशब्द आनन्तर्यार्थकः, मानस्याऽनुभागसत्त्वं स्तोकमभिहितं तदनन्तरमित्यर्थः, विशेषाधिकक्रमेण भवति क्रोधमायालोभानां रससत्त्वमिति गम्यते । एतदुक्तं भवति—अश्वकर्णकरणाद्धाप्रथमसमये संज्वलनमानस्या-ऽनुभागसत्त्वं सर्वाल्पम् , ततः संज्वलनक्रोधस्या-ऽनुभागसत्कर्म विशेषाधिकम् , आधिक्यं चा-ऽनन्तै रसस्पर्धकैर्द्रष्टव्यम् । ततो-ऽपि मायाया विशेषाधिकम् , ततो लोभस्य विशेषाधिकम् । उक्तं च **कषायप्राभृतचूर्णौ**—"**अणुभागसंतकम्मं सह आगाइदेण माणे थोवं, कोहे विसेसाहियं, मायाए विसेसाहियं, लोहे विसेसाहियं** ।" इति । अत्र 'अणुभागसंतकम्मं सह आगाइदेण" इतिपदत्रयेणा-ऽश्वकर्णकरणाद्धायां प्रविशता जन्तुना यदनुभागखण्डं घात्यते, तेन सह तात्कालिका-ऽनुभागसत्कर्म बोध्यम्* ।

---

* तथा चाहुर्जयधवलाकारा अपि—"एत्थ सह आगाइदेण त्ति वुत्ते अस्सकण्णकरणमाढवेंतेण जमणुभागखंडयमागाइदं तेण सह तक्कालभावियस्स अणुभागसंतकम्मस्स एदमप्पाबहुअं कीरदि त्ति भणिदं होदि । एत्थ विसेसाहियपमाणमणंताणि फद्दयाणि ।" इति ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अथा-ऽश्वकर्णकरणाद्धाप्रथमसमयेऽनुभागबन्धस्याऽल्पबहुत्वमतिदिदिक्षुराह-'तच्च' इत्यादि, 'तद्वत्' अनुभागसत्कर्मवत् 'बन्धो-ऽपि' अनुभागबन्धो-ऽपि भवति । उक्तं च **कषायप्राभृत-चूर्णौ--बंधो वि एवमेव ।''** इति । इदमुक्तं भवति—अश्वकर्णकरणाद्धाप्रथमसमये मानस्या-ऽनुभागबन्धः स्तोकः, ततः क्रोधस्य विशेषाधिकः, ततो मायाया विशेषाधिकः, ततो-ऽपि लोभस्य विशेषाधिकः ॥६१॥

अनुभागसत्त्वं रसबन्धं च प्ररूप्या-ऽश्वकर्णकरणाद्धायाः प्रथमसमये प्रथमाऽनुभागखण्डेन संज्वलनचतुष्कस्य घात्यमानमनुभागं व्याजिहीर्षुराह—

**रसखंडं कोहादीण कमेण विसेसअहिअमह ।**
**घाइअऽवसेसफड्डाइं लोहादीणऽणंतगुणणाए ॥६२॥ (उद्गीतिः)**

रसखण्डं क्रोधादीनां क्रमेण विशेषाधिकमथ ।
घातिता ऽवशेषस्पर्धकानि लोभादीनामनन्तगुणनया ॥ २॥ इति पदसंस्कारः ।

**'रसखंडं'** इत्यादि, अश्वकर्णकरणाद्धाप्रथमसमये 'रसखंडम्' अनुभागखण्डं क्रोधादीनां क्रमेण विशेषाधिकं भवति । एतदुक्तं भवति—अश्वकर्णकरणाद्धायां प्रथमे-ऽनुभागखण्डे क्रोध-स्या-ऽनुभागस्पर्धकानि स्तोकानि, ततो मानस्य विशेषाधिकानि, ततो मायाया विशेषाधिकानि, ततो-ऽपि लोभस्य विशेषाधिकानि विद्यन्ते । उक्तं च **कषायप्राभृतचूर्णौ--अणुभागखंडयं पुण जमागाइदं, तस्स अणुभागखंडयस्स फद्दयाणि कोधे थोवाणि, माणे फद्दयाणि विसेसाहियाणि, मायाए फद्दयाणि विसेसाहियाणि, लोभे फद्दयाणि विसेसाहि-याणि ।''** इति । इतः प्रागनुभागखण्डे घात्यमानस्पर्धकानामल्पबहुत्वमित्थमासीत्—मानस्य स्पर्धकानि स्तोकानि, ततः क्रोधस्य विशेषाधिकानि, ततो-ऽपि मायाया विशेषाधिकानि, ततो-ऽपि लोभस्य विशेषाधिकानि, अनुभागसत्त्वस्य तथात्वेनाऽनुभागखण्डस्य चाऽनुभागसत्कर्मानु-रूपत्वेनाऽनुभागखण्डगताऽनुभागस्य तथाविधा-ऽल्पबहुत्वसंभवात् । न चा-ऽश्वकर्णकरणाद्धा-प्रथमसमये-ऽपि मानक्रोधमायालोभानां यथाक्रममनुभागसत्त्वं विशेषाधिकं क्रमेण तिष्ठति, तर्हि रसखण्डा-ऽल्पबहुत्वस्य सत्त्वाऽल्पबहुत्वेन सह वैषम्यं कुतो दृश्यते ? इति वाच्यम् , अश्वकर्णकरणा-द्धायां प्रथमे-ऽनुभागखण्डे विनष्टे संज्वलनक्रोधादीनां यथाक्रममनुभागसत्कर्मणो-ऽनन्तगुण-हीनत्वदर्शनात् । यदि च सत्त्वानुरूपेणैवा-ऽश्वकर्णकरणाद्धाप्रथमा-ऽनुभागखण्डे रसस्पर्धकानि भवेयुः, तर्हि तस्मिन्ननुभागखण्डे पूर्णे-ऽनुभागसत्त्वं क्रोधादीनामनुक्रममनन्तगुणहीनं न स्यात् । यद्वा-ऽपूर्वस्पर्धककिट्टिकरणादिभिर्विनाशयिष्यमाणं यस्या-ऽनुभागसत्कर्म मन्दं मन्दतरं कृत्वा पश्चाद् निःशेषतः क्षपयिष्यते, तस्या-ऽनुभागः प्रभूतः प्रभूततरो घात्यते इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अह' इत्यादि, 'अथ' अथशब्दोऽत्र प्रकरणान्तरसूचकः, प्रथमाऽनुभागखण्डे स्पर्धकाऽल्पबहुत्वमुक्तम्, सम्प्रति घातिताऽवशेषाऽनुभागस्पर्धकानामल्पबहुत्वमभिधीयते इति सूचयति। 'घातिताऽवशेषस्पर्धकानि' अश्वकर्णकरणाद्धायां प्रथमाऽनुभागखण्डेन यदनुभागसत्कर्म घात्यते, तेन रहितमनुभागसत्कर्म पूर्वस्पर्धक-वक्ष्यमाणाऽपूर्वस्पर्धकलक्षणानि घातिताऽवशेषस्पर्धकान्युच्यते, तानि 'लोभादीनां' लोभ-माया-मान-क्रोधानां क्रमेण 'अनन्तगुणनया' अनन्तगुणकारेणाऽवतिष्ठन्ते इति गम्यते, लोभस्य घातिताऽवशेषस्पर्धकानि स्तोकानि तिष्ठन्ति, ततो मायाया अनन्तगुणानि, ततो मानस्याऽनन्तगुणानि, ततोऽपि क्रोधस्याऽनन्तगुणानि तिष्ठन्तीत्यर्थः। उक्तं च कषायप्राभृतचूर्णौ-"आगाइदसेसाणि पुण फद्दयाणि लोभे थोवाणि, मायाए अणंतगुणाणि, माणे अणंतगुणाणि, कोधे अणंतगुणाणि।" इति। नन्वश्वकर्णकरणाद्धाप्रथमसमयेऽनुभागसत्त्वं मान-क्रोध-माया-लोभानां यथाक्रमं विशेषाधिकमासीत्, तथाऽश्वकर्णकरणाद्धायां प्रथमानुभागखण्डेन क्रोधादीनामनुक्रमं केवलं विशेषाधिकानि स्पर्धकानि घात्यन्ते, तर्हि घातिताऽवशेषाऽनुभागस्पर्धकानि लोभादीनां क्रमेणाऽनन्तगुणानि कथं सम्पद्यन्ते ? इति चेत्, उच्यते-अश्वकर्णकरणाद्धाप्रथमसमये मानस्यानुभागसत्कर्मतः क्रोधस्याऽनुभागसत्कर्म विशेषाधिकं भवति। मानस्यानुभागसत्त्वतः क्रोधस्य यावन्ति स्पर्धकान्यधिकानि, तावन्ति स्पर्धकानि बुद्ध्याऽपनीय पृथक् स्थापयितव्यानि। ततः क्रोधस्याऽनुभागखण्डेन समानं मानस्याऽनुभागखण्डं बुद्ध्या गृहीतव्यम्। ततश्चाऽधस्तनमनुभागसत्कर्म मानक्रोधयोर्मिथस्तुल्यं दृश्यते, बुद्ध्योभयोरपि सदृशखण्डग्रहणात्। अथ मानस्याऽवशिष्टाऽनुभागसत्कर्मणोऽनन्तानि खण्डानि कृत्वैकं खण्डं तत्रैव विमुच्य शेषाणि बहूनि खण्डानि प्रागुक्तऽनुभागखण्डेन सह विघाताय गृह्णाति, इमानि च गृह्यमाणान्यनन्तानि खण्डानि मानस्य सकलाऽनुभागसत्कर्मणोऽनन्ततमभागमात्राण्युपरितनपृथक्स्थापित-क्रोधाऽनुभागस्पर्धकतोऽनन्तगुणानि भवन्ति। उपरितनपृथक्स्थापित-क्रोधाऽनुभागस्पर्धकानि क्रोधस्याऽनुभागखण्डेन सह विघातयति। इत्थमश्वकर्णकरणाद्धायां प्रथमाऽनुभागखण्डे क्रोधस्य घात्यमानस्पर्धकतो मानस्य घात्यमानस्पर्धकानि विशेषाधिकानि भवन्ति। ततो घातितेषु तेषु स्पर्धकेषु घातिताऽवशेषस्पर्धकानि मानतः क्रोधस्याऽनन्तगुणानि तिष्ठन्ति।

प्रदर्श्यते एतत्सर्वमसत्कल्पनया—अश्वकर्णकरणाद्धाप्रथमसमये क्रोधस्याऽनुभागसत्त्वं त्रयोदशाधिकपञ्चशतान्यनुभागस्पर्धकानि (५१३) कल्पयितव्यम्, मानस्य तु द्वादशाधिकपञ्चशती (५१२)। चतुःसंख्या चाऽनन्तराशित्वेन परिकल्पनीया। एवमुपरितनं क्रोधस्यैकं स्पर्धकं मानतोऽधिकं भवति, तत् पृथक्स्थापयितव्यम्। ततः क्रोधस्य चतुरशीत्यधिकशतत्रयस्पर्धकमात्रखण्डेन (३८४) सदृशं मानस्य चतुरशीत्यधिकत्रिशतस्पर्धकमात्रं खण्डं (३८४) गृह्णाति। अथ मानस्याऽवशिष्टाष्टाविंशत्युत्तरशतस्पर्धकानाम् (१२८) अनन्तानि खण्डानि कृत्वैकखण्डं

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

द्वात्रिंशत्स्पर्धकप्रमाणं (३२) तत्रैव विमुच्य शेषाणि षण्णवतिस्पर्धकानि (९६) चतुरशीत्यधिकत्रिशतस्पर्धकात्मकानुभागखण्डेन (३८४) सह विघाताय गृह्णाति। इमानि च गृह्यमाणानि षण्णवतिस्पर्धकानि (९६) मानस्य सकला-ऽनुभागसत्कर्मणो द्वादशाधिकपञ्चशतस्पर्धकलक्षणस्या-ऽनन्ततमभागमात्राण्युपरितनपृथक्स्थापितक्रोधैका-ऽनुभागस्पर्धकतो-ऽनन्तगुणानि भवन्ति। उपरितनपृथक्स्थापितक्रोधैका-ऽनुभागस्पर्धकं चतुरशीत्यधिकत्रिशतस्पर्धकात्मकाऽनुभागखण्डेन सह घातयति। इत्थं प्रथमखण्डे क्रोधस्य घात्यमानपञ्चाशीत्युत्तरत्रिशतस्पर्धकतो (३८५) मानस्य घात्यमानान्यशीत्यधिकचतुःशतस्पर्धकानि (४८०) विशेषाधिकानि भवन्ति। तेन प्रथमा-ऽनुभागखण्डे घातिते घातिता-ऽवशेषस्पर्धकानि क्रोधस्या-ऽष्टाविंशत्युत्तरशतं (१२८) तिष्ठन्ति, मानस्य तु द्वात्रिंशत् (३२)। इत्थं मानस्य घातिता-ऽवशेषद्वात्रिंशत्स्पर्धकतः क्रोधस्या-ऽनन्तगुणानि घातिताऽवशेषस्पर्धकान्यष्टाविंशत्युत्तरशतं (१२८) भवन्ति, चतुःसंख्याया अनन्तत्वेन परिकल्पनात्।

एवं मानस्याऽनुभागसत्कर्मतो मायाया अनुभागसत्कर्म विशेषाधिकं विद्यते। मानतो यावन्ति स्पर्धकान्यधिकानि, तावन्ति बुद्धया पृथक् स्थापयितव्यानि। ततो मानस्या-ऽनुभागखण्डेन सदृशं मायाया अनुभागखण्डं बुद्धया गृहीतव्यम्। ततो-ऽधस्तनमनुभागसत्कर्म मानमाययोः समानं दृश्यते, बुद्ध्योभयोरपि सदृशखण्डग्रहणात्। अथ मायाया अवशिष्टा-ऽनुभागसत्कर्मणो-ऽनन्तानि खण्डानि कृत्वैकं खण्डं तत्रैव विमुच्य शेषाणि बहुभागमात्राण्यनन्तानि खण्डानि प्रागुक्ता-ऽनुभागखण्डेन सह विघाताय गृह्णाति। इमानि च गृह्यमाणान्यनन्तानि खण्डानि मायायाः सकला-ऽनुभागसत्कर्मणोऽनन्ततमभागप्रमाणानि भवन्ति, उपरितनपृथक्स्थापित-माया-ऽनुभागस्पर्धकतो-ऽनन्तगुणानि भवन्ति। तत उपरितनपृथक्स्थापित-मायास्पर्धकानि मायाया अनुभागखण्डेन सह घातयति। इत्थं मानस्य घात्यमानस्पर्धकतो मायाया घात्यमानस्पर्धकानि विशेषाधिकानि भवन्ति। ततः प्रथमे-ऽनुभागखण्डे विनाशिते घातिता-ऽवशेषस्पर्धकानि मायातो मानस्या-ऽनन्तगुणानि भवन्ति।

**भाव्यते चेदमसत्कल्पनया**—अश्वकर्णकरणाद्धाप्रथमसमये मायाया अनुभागसत्कर्म चतुर्दशाधिकपञ्चशतान्यनुभागस्पर्धकानि (५१४) कल्पयितव्यम्, मानस्य तु पूर्ववद् द्वादशाधिकपञ्चशतानि (५१२)। अथोपरितने मायाया द्वे स्पर्धके मानतो-ऽधिके स्तः, ते पृथक्स्थापयितव्ये। ततो मानस्या-ऽशीत्यधिकचतुश्शतस्पर्धकप्रमाणखण्डेन (४८०) सदृशं मायाया अशीत्युत्तरचतुःशतस्पर्धकप्रमाणं (४८०) खण्डं गृह्णाति। अथ मायाया अवशिष्टद्वात्रिंशत्स्पर्धकानाम् (३२) अनन्तानि खण्डानि कृत्वैकं खण्डमष्टस्पर्धकमात्रं (८) तत्रैव विमुच्य शेषाणि चतुर्विंशतिस्पर्धकान्यशीत्यधिकचतुःशतस्पर्धकात्मकानुभागखण्डेन सह विघाताय गृह्णाति। इमानि च गृह्यमाणानि चतुर्विंशतिस्पर्धकानि (२४) मायाया सकला-ऽनुभागसत्कर्मणश्चतुर्दशाधिकपञ्चशतस्पर्धकरूपस्या-ऽनन्ततमभागमात्राणि भवन्ति, उपरितनपृथक्स्थापित-मायासत्कस्पर्धकद्वयतश्चा-ऽनन्तगुणानि। तत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपरितनपृथक्स्थापित-माया ऽनुभागस्पर्धकद्वयं मायाया अनुभागखण्डेन सह घातयति । इत्थं प्रथमे ऽनुभागखण्डे मानस्य घात्यमाना-ऽशीत्यधिकचतुःशतस्पर्धकतो (४८०) मायाया घात्यमानषडुत्तरपञ्चशतस्पर्धकानि (२+४८०+२४=५०६) विशेषाधिकानि भवन्ति। ततः प्रथमे-ऽनुभागखण्ड विनाशिते मानस्य घातिता-ऽवशेषस्पर्धकानि द्वात्रिंशत् मायाया घातिता-ऽवशेषाष्टस्पर्धकतो-ऽनन्तगुणानि भवन्ति, चतुःसंख्याया अनन्तत्वेन ग्रहणात् ।

एवं मायालोभयोरपि वक्तव्यम् । तथाहि–अश्वकर्णकरणाद्धाप्रथमसमये मायाया अनुभागसत्कर्मतो लोभस्या-ऽनुभागसत्कर्म विशेषाधिकं भवति । यावद्भिः स्पर्धकैरधिकं भवति, तावन्ति स्पर्धकानि बुद्ध्या पृथक् स्थापयितव्यानि । ततो मायाया अनुभागखण्डेन सदृशं लोभस्या ऽनुभागखण्डं बुद्ध्या गृहीतव्यम् ततो-ऽधस्तनमनुभागसत्कर्म मायालोभयोः सदृशं भवति, बुद्ध्योभयोरपि सदृक्खण्डग्रहणात् । अथ लोभस्या-ऽवशिष्टानुभागसत्त्वस्या-ऽनन्तानि खण्डानि कृत्वैकं खण्डं तत्रैव विमुच्य शेषाण्यनन्तानि खण्डानि प्रागुक्ता-ऽनुभागखण्डेन सह विघाताय गृह्णाति । इमानि च गृह्यमाणान्यनन्तानि खण्डानि लोभस्य सकला-ऽनुभागसत्कर्मणो-ऽनन्ततमभागप्रमाणानि भवन्ति, उपरितनपृथक्स्थापितलोभसत्का-ऽनुभागस्पर्धकतश्चा-ऽनन्तगुणानि भवन्ति । तत उपरितनपृथक्स्थापितलोभस्पर्धकानि लोभस्या-ऽनुभागखण्डेन सह घातयति। इत्थं लोभस्य घात्यमानस्पर्धकानि मायाया घात्यमानस्पर्धकतो विशेषाधिकानि जायन्ते । ततः प्रथमे-ऽनुभागखण्डे घातिते मायाया घातिता-ऽवशेषस्पर्धकानि लोभतो-ऽनन्तगुणानि भवन्ति ।

**भाव्यते चेदमसत्कल्पनया**—अश्वकर्णकरणाद्धाप्रथमसमये लोभस्या-ऽनुभागसत्कर्म पञ्चदशाधिकपञ्चशतानि (५१५) अनुभागस्पर्धकानि कल्पयितव्यम्, मायायाश्च पूर्ववत् चतुर्दशाधिकपञ्चशतानि (५१४) अथोपरितनमेकं स्पर्धकं लोभस्य मायातो-ऽधिकमस्ति, तत् पृथक्स्थापयितव्यम् । ततो मायाया षडुत्तरपञ्चशतस्पर्धकप्रमाणखण्डेन (५०६) सदृशं लोभस्य षडुत्तरपञ्चशतस्पर्धकप्रमाणं (५०६) खण्डं गृह्णाति । अथ लोभस्याऽवशिष्टाष्टस्पर्धकानामनन्तानि खण्डानि कृत्वैकं खण्डं द्विस्पर्धकमितं (२) तत्रैव परित्यज्य शेषाणि षट् स्पर्धकानि (६) षडधिकपञ्चशतस्पर्धकात्मकखण्डेन (५०६) सह विघाताया-ऽऽददाति । इमानि चादीयमानानि षट्स्पर्धकानि (६) लोभस्य सकला-ऽनुभागसत्त्वस्य पञ्चदशाधिकपञ्चशतस्पर्धकलक्षणस्याऽनन्ततमभागमात्राणि भवन्ति, उपरितनपृथक्स्थापितलोभसत्कैकस्पर्धकतश्चा-ऽनन्तगुणानि भवन्ति । तत उपरितनपृथक्स्थापितलोभसत्कैका-ऽनुभागस्पर्धकं लोभस्या-ऽनुभागखण्डेन सह घातयति । इत्थमश्वकर्णकरणाद्धायाः प्रथमे-ऽनुभागखण्डे मायाया घात्यमानषडुत्तरपञ्चशतस्पर्धकतो (५०६) लोभस्य घात्यमानत्रयोदशाधिकपञ्चशतस्पर्धकानि (१+५०६+६=५१३) विशेषाधिकानि भवन्ति । ततः प्रथमे-ऽनुभागखण्डे-ऽपगते मायाया घातिता-ऽवशेषस्पर्धकान्यष्टसंख्याकानि (८) लोभस्य घातिता-ऽवशेषस्पर्धकद्वयतो-ऽनन्तगुणानि भवन्ति, चतुःसंख्याया अनन्तत्वेन परिकल्पनात् ॥ ६२ ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

## स्थापना

| | क्रोधस्य | मानस्य | मायाया | लोभस्य |
|---|---|---|---|---|
| अश्वकर्णकरणाद्धाप्रथमसमये-ऽनुभागसत्कर्मणि स्पर्धकानि – | ५१३ | ५१२ | ५१४ | ५१५ |
| अश्वकर्णकरणाद्धायां प्रथमखण्डे घात्यमानस्पर्धकानि – | ३८५ | ४८० | ५०६ | ५१३ |
| घातिता-ऽवशेषस्पर्धकानि – | १२८ | ३२ | ८ | २ |

० ० ० इमानि शून्यानि स्पर्धकानि सूचयन्ति ।




Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अश्वकर्णकरणाद्धायाः प्रथमसमये स्थितिसत्त्वादीनामल्पबहुत्वादीनि

| | |
|---|---|
| (१) प्रथमसमये स्थितिसत्कर्म, गाथा-६०<br>(१) मोहनीयस्य स्थितिसत्त्वं संख्येयसहस्रवर्षाणि ।<br>(२) ज्ञानावरणादीनामपि सत्त्वं संख्येयसहस्रवर्षाणि।<br>(३) नामगोत्रवेदनीयानामसंख्येयवर्षाणि। | (२) प्रथमसमये स्थितिबन्धः, गाथा- ६०<br>(१) मोहस्य बन्धोऽन्तर्मुहूर्तन्यूनषोडशवर्षमात्रः ।<br>(२) शेषकर्मणां बन्धः संख्यातवार्षिकः । |
| (३) प्रथमसमयेऽनुभागसत्कर्माऽल्पबहुत्वम्, गाथा-६१<br>अङ्कतः<br>(१) प्रथमसमये मानस्याऽनुभागसत्कर्म स्तोकम् । (५१२)<br>(२) ततः क्रोधस्यानुभागसत्कर्म विशेषाधिकम् । (५१३)<br>(३) ततो मायाया अनुभागसत्कर्म विशेषाधिकम् । (५१४)<br>(४) ततो लोभस्याऽनुभागसत्कर्म विशेषाधिकम् । (५१५) | (४) प्रथमसमयेऽनुभागबन्धाल्पबहुत्वम्, गाथा-६१<br>(१) प्रथमसमये मानस्याऽनुभागबन्धः स्तोकः ।<br>(२) ततः क्रोधस्याऽनुभागबन्धो विशेषाधिकः ।<br>(३) ततो मायाया अनुभागबन्धो विशेषाधिकः ।<br>(४) ततो लोभस्याऽनुभागबन्धो विशेषाधिकः । |
| (५) अश्वकर्णकरणाद्धायां प्रथमरसखण्डवर्तिस्पर्धकानामल्पबहुत्वम् गाथा-६२<br>अङ्कतः<br>(१) क्रोधस्यानुभागस्पर्धकानि स्तोकानि घात्यन्ते । (३८५)<br>(२) ततो मानस्यानुभागस्पर्धकानि विशेषाधिकानि घात्यन्ते। (४८०)<br>(३) ततो मायाया अनुभागस्पर्धकानि विशेषाधिकानि घात्यन्ते। (५०६)<br>(४) ततो लोभस्यानुभागस्पर्धकानि विशेषाधिकानि घात्यन्ते । (५१३) | (६) घातितावशेषस्पर्धकानामल्पबहुत्वम्, गाथा-६२<br>अङ्कतः<br>(१) लोभस्य घातिताऽवशेषस्पर्धकानि स्तोकानि । (२)<br>(२) ततो मायाया घातिताऽवशेषस्पर्धकान्यनन्तगुणानि । (८)<br>(३) ततो मानस्य घातिताऽवशेषस्पर्धकान्यनन्तगुणानि । (३२)<br>(४) ततः क्रोधस्य घातिताऽवशेषस्पर्धकान्यनन्तगुणानि (१२८) |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अश्वकर्णकरणाद्धाप्रथमसमयात् प्रभृति संज्वलनचतुष्कस्या-ऽपूर्वस्पर्धकानि कर्तुमारभते। तान्यपूर्वस्पर्धकानि कथं करोति? इत्यत आह—

संजलणजहण्णगपुव्वफड्डगत्तो अणंतगुणहीणं ।
करए उक्कोसमपुव्वफड्डगं तं कयं न पुव्वं ति ॥ ६३ ॥ (गीतिः)

संज्वलनजघन्यपूर्वस्पर्धकादनन्तगुणहीनम् ।
करोत्युत्कृष्टमपूर्वस्पर्धकं तत् कृतं न पूर्वमिति ॥ ६३ ॥ इति पदसंस्कारः ।

'**संजलण०**' इत्यादि, अश्वकर्णकरणाद्धाप्रथमसमये 'संज्वलनजघन्यपूर्वस्पर्धकात्' संज्वलनक्रोध-मान-माया-लोभसत्कस्वस्वजघन्यपूर्वस्पर्धकत उत्कृष्टमपूर्वस्पर्धकमनन्तगुणहीनं 'करोति' निर्वर्तयति। नन्वपूर्वस्पर्धकं कुत उच्यते? इत्यत आह—'तं' इत्यादि, 'तत्' अपूर्वस्पर्धकं 'पूर्वम्' अश्वकर्णकरणाद्धातः प्राग् न कृतं—निष्पादितमिति हेतोरपूर्वस्पर्धकमुच्यते। तात्पर्यार्थः पुनरयम्— संसारा-ऽवस्थायामप्राप्तस्वरूपाणि हयकर्णकरणाद्धायामेव जघन्यपूर्वस्पर्धकतो-ऽनन्तगुणहीनरसतामापाद्य निर्वर्त्यमानानि स्पर्धकान्यपूर्वस्पर्धकान्युच्यन्ते, अश्वकर्णकरणाद्धायामेव लब्धस्वरूपत्वात्। तेषामपूर्वस्पर्धकानां यत् तीव्रानुभागकं सर्वोत्कृष्टस्पर्धकम्, तदपि जघन्यपूर्वस्पर्धकतो-ऽनन्तगुणहीनं भवति।

अपूर्वस्पर्धकस्वरूपपरिज्ञानस्य पूर्वस्पर्धकस्वरूपपरिज्ञानपूर्वकत्वात् प्रथमतस्तावत् पूर्वस्पर्धकस्वरूपमुच्यते—

सत्तागते एकैकपरमाणौ जघन्यतो-ऽपि सर्वजीवा-ऽनन्तगुणा रसाऽविभागास्तिष्ठन्ति। रसा-ऽविभागो नाम केवलिप्रज्ञाच्छेदनकेनाऽविभाज्यो रसस्या-ऽन्ततमोंऽशः।

सत्कर्मण्यनन्तकर्मपरमाणवो विद्यन्ते, तत्र येषु कर्मपरमाणुषु सर्वस्तोका रसाऽविभागा भवन्ति, तेषां समूहः प्रथमा वर्गणा, तस्यां च कर्मपरमाणवः प्रभूततमाः। तत एकेन रसाऽविभागेनाधिका ये परमाणवः, तेषां समुदायो द्वितीया वर्गणा, प्रथमवर्गणात एते परमाणवो विशेषहीना भवन्ति। तत एकेन रसाऽ-विभागेन वृद्धानां परमाणूनां समुदायस्तृतीय वर्गणा। एवंक्रमेणा-ऽभव्येभ्यो-ऽनन्तगुणाः सिद्धानामनन्ततमभागतुल्या वर्गणा वाच्याः। तावतीनां वर्गणानां समूहः स्पर्धकमुच्यते, एकोत्तररसाऽविभागवृद्ध्या परस्परं स्पर्धन्ते वर्गणा यत्र तत् स्पर्धकमिति व्युत्पत्तेः। एतच्च स्पर्धकं प्रथमं ज्ञातव्यम्। इत ऊर्ध्वमेकेन रसाऽविभागेन वृद्धः कश्चिदपि परमाणुः सत्कर्मणि न प्राप्यते, नाऽपि द्वाभ्यां रसा-ऽविभागाभ्यां वृद्धः परमाणुः सत्कर्मणि तिष्ठति, नापि संख्येयैः, नाप्यसंख्येयैः, नाप्यनन्तैः, किन्तु प्रथमस्पर्धकचरमवर्गणातः सर्वजीवा-ऽनन्तगुणै रसाविभागैरधिकाः परमाणवः प्राप्यन्ते, तेषां समुदायो द्वितीयस्पर्धकस्य प्रथम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्गणा। द्वितीयस्पर्धकं कुतो भण्यते ? इति चेत्, उच्यते--प्रथमस्पर्धकचरमवर्गणात एकोत्तररसाऽविभागक्रमेण वृद्धेरदर्शनात् द्वितीयस्पर्धकमुच्यते, एवमग्रेऽप्यन्तरस्य दर्शनादेकोत्तरक्रमेण च वृद्धेरदर्शनात् नवानि नवानि स्पर्धकानि ज्ञातव्यानि। ततो द्वितीयस्पर्धकेऽपि पूर्ववदेकोत्तरसाविभागवृद्धया-ऽभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागकल्पा वर्गणा वक्तव्याः, तासां समुदायो द्वितीयस्पर्धकम्। ततः पुनः सर्वजीवा-ऽनन्तगुणरसाऽविभागैरन्तरमभिधाय सर्वजीवा-ऽनन्तगुणैरभ्यधिकाः परमाणवः प्राप्यन्ते, तेषां समुदायस्तृतीयस्पर्धकस्य प्रथमवर्गणा। तत एकोत्तररसाविभागवृद्धया परमाणूनां वर्गणा अभव्येभ्यो-ऽनन्तगुणाः सिद्धानामनन्तभागकल्पा वक्तव्याः। ततः सर्वजीवानन्तगुणैरन्तरमभिधातव्यम्। एवंक्रमेण सत्कर्मणि सर्वाण्यभव्येभ्यो-ऽनन्तगुणानि सिद्धानन्तभागप्रमितानि स्पर्धकानि भवन्ति।

**अथाऽनन्तरोपनिधा**–उपनिधानम्-उपनिधा मार्गणमित्यर्थः, अनन्तरेणोपनिधा अनन्तरोपनिधा। सा चा-ऽत्राऽनुभागं प्रदेशाग्रं चाश्रित्य द्विधा। तत्र आद्या-ऽनुभागापेक्षया-ऽनन्तरोपनिधा नामाऽनन्तरवर्गणातस्तदुत्तरवर्गणायां रसाऽविभागमार्गणम्। द्वितीया प्रदेशापेक्षया-ऽनन्तरोपनिधा नामा-ऽनन्तरवर्गणातस्तदुत्तरवर्गणायां प्रदेशाग्रमार्गणम्। अनुभागोपेक्षयाऽनन्तरोपनिधाऽग्रे वक्ष्यते।

**अथ प्रदेशापेक्षया-ऽनन्तरोपनिधा विविच्यते। प्रदेशाऽपेक्षया-ऽनन्तरोपनिधा**—प्रथमस्पर्धकस्य प्रथमवर्गणायां सर्वप्रभूतं प्रदेशाग्रं भवति, ततो द्वितीयवर्गणायां विशेषहीनं प्रदेशाग्रं भवति, एवंक्रमेणोत्तरोत्तरवर्गणायां प्रदेशाग्रं पूर्वपूर्ववर्गणातो विशेषहीनं विशेषहीनं वक्तव्यम्।

**परम्परोपनिधा**–परम्परया उपनिधा-मार्गणम्=परम्परोपनिधा। सा-ऽपि द्विधा, अनुभागप्रदेशभेदात्। स्पर्धकवर्गणायां रसाऽविभागानां परम्परया मार्गणमनुभागा-ऽपेक्षया परम्परोपनिधा। स्पर्धकवर्गणायां प्रदेशानां परम्परया मार्गणं प्रदेशाश्रिता परम्परोपनिधा व्यपदिश्यते। अनुभागाऽपेक्षया परम्परोपनिधा-ऽग्रे वक्ष्यते।

**अथ प्रदेशापेक्षया परम्परोपनिधा भण्यते। प्रदेशापेक्षया परम्परोनिधा**-प्रथमस्पर्धकस्य प्रथमवर्गणात उत्तरोत्तरवर्गणायां विशेषहीनक्रमेण विद्यमानाः प्रदेशाः कतिपयेष्वनन्तेषु स्पर्धकेषु गतेषु प्राप्यमाणस्पर्धकस्य प्रथमवर्गणायां प्रथमस्पर्धक प्रथमवर्गणातोऽर्धा भवन्ति। ततः पुनस्तावन्मात्रेषु स्पर्धकेषु व्यतिक्रान्तेषु तत्रत्यस्पर्धकस्यप्रथमवर्गणायामर्धाः पुद्गला भवन्ति। एवमग्रे-ऽपि वक्तव्यम्। तत्र प्रथमस्पर्धकप्रथमवर्गणातो विशेषहीनक्रमेण विद्यमाना यावत्यायामे गते प्रथमस्पर्धकप्रथमवर्गणातः प्रदेशा अर्धा भवन्ति, तावान् आयामो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विगुणहानिरिति परिभाष्यते। तस्यां चा-ऽभव्येभ्यो-ऽनन्तगुणानि सिद्धानन्तभागप्रमाणानि स्पर्धकानि भवन्ति। एकैकस्मिन् स्पर्धके वर्गणास्त्वभव्येभ्यो-ऽनन्तगुणाः सिद्धानन्तभागमात्राः प्रागुक्ता एव। तत्रैकद्विगुणहानौ स्पर्धकानि स्तोकानि भवन्ति, तत एकस्मिन् स्पर्धके वर्गणा अनन्तगुणा विद्यन्ते।

**नानाद्विगुणहानयः**–प्रथमस्पर्धकप्रथमवर्गणातो यावत्यायामे गते तत्रत्यस्पर्धकसत्क-प्रथमवर्गणायां प्रदेशा अर्धा भवन्ति, स आयामः प्रथमा द्विगुणहानिः, ततः पुनस्तावत्यायामे गते तत्रत्यस्पर्धकस्य प्रथमवर्गणायां प्रदेशा अर्धा भवन्ति, प्रथमस्पर्धकप्रथमवर्गणा-ऽपेक्षया तु चतुर्भागमात्रा भवन्ति, स आयामो द्वितीयद्विगुणहानिः। ततः पुनस्तावत्यायामे व्रजिते तत्रत्य-स्पर्धकस्य प्रथमवर्गणायां प्रदेशा अर्धा भवन्ति। प्रथमवर्गणा-ऽपेक्षया त्वष्टभागमात्राः। स आयामस्तृतीया द्विगुणहानिः। एवं सत्तागतस्पर्धकेषु यावत्यो द्विगुणहानयो लभ्यन्ते, ता नाना-द्विगुणहानय उच्यन्ते, नानारूपा द्विगुणहानयो नानाद्विगुणहानय इति व्युत्पत्तेः। ताश्च प्रगणना-तो-ऽनन्ता भवन्ति।

**अत्रा-ऽल्पबहुत्वम्**–(१) नानाद्विगुणहानयः स्तोकाः। (२) ततो-ऽनन्तगुणा द्विगुण-हानिः, एकद्विगुणहानिगतवर्गणास्थानान्यनन्तगुणानीत्यर्थः*। तथा (१) एकद्विगुणहानौ स्पर्धकानि स्तोकानि भवन्ति, (२) तत एकस्मिन् स्पर्धके वर्गणा अनन्तगुणाः, ततो-ऽपि नानाद्विगुणहानयो-ऽनन्तगुणा भवन्ति। प्रत्येकं द्विगुणहान्यां स्पर्धकानां राशिस्तुल्या भवति। एवं वर्गणानामपि।

**चयः**—प्रथमस्पर्धकस्य प्रथमवर्गणातो द्वितीयवर्गणायां यावन्तः प्रदेशा हीयन्ते, तावतां परमाणूनां समूहश्चय उच्यते, एवं द्वितीयवर्गणातस्तृतीयवर्गणायां हीयमानानां प्रदेशानां समुदायो-ऽपि चयो निगद्यते। उत्तरोत्तरवर्गणायां हीयमानपरमाणूनां समुदायश्चय उच्यते इति यावत्। एकस्यां द्विगुणहानौ चयः पूर्वपूर्ववर्गणात उत्तरोत्तरवर्गणायां समानस्तिष्ठति। तथा प्रथमद्विगुणहान्यां यश्चयो भवति, ततो-ऽर्धश्चयो द्वितीयद्विगुणहानौ भवति। ततो-ऽपि तृतीयद्वि-गुणहानौ अर्धो भवति। एवं पूर्वपूर्वत उत्तरोत्तरद्विगुणहान्यां चयोऽर्धोऽर्धो भवति, किं कारणम्? इति चेत्, उच्यते—प्रथमद्विगुणहानिगतप्रथमवर्गणातो द्वितीयद्विगुणहानिगतप्रथमवर्गणायां प्रदेशा अर्धा भवन्ति, ततो-ऽपि तृतीयद्विगुणहानिगतप्रथमवर्गणायां प्रदेशा अर्धा भवन्ति, एवमग्रे-ऽपि। तत्र विवक्षितद्विगुणहानिगतप्रथमवर्गणाप्रदेशा द्वाभ्यां द्विगुणहानिभ्यां विभज्यन्ते, तदा卐 लब्धि-

---

*उक्तं च धवलाकारैरपि–"सव्वत्थोवा णाणापदेसगुणहाणिट्ठाणंतरसलागाओ। एगपदेसगुण-हाणिट्ठाणंतरमणंतगुणं। को गुणगारो? अभवसिद्धिएहिं अणंतगुणो सिद्धाणमणंतभागमेत्तो।" इति।

卐 भाज्याद्भाजको यावद्वारं विशुद्धयति, तद्वारसंख्या लब्धिसंज्ञिका भवति, भजनफलं लब्धिसंज्ञकं भवतीत्यर्थः। यथा २५६, ३२, अनयोः संख्ययोः षट्पञ्चाशदधिकशतद्वयलक्षणसंख्यातो द्वात्रिंशद्रूपसंख्या-ऽष्टवारं विशुद्धयति। भाज्योऽत्र २५६, भाजकः ३२, लब्धिश्च ८। अत्र षट्पञ्चाशदधिकद्विशतसंख्या द्वात्रिंशत्संख्यया विभक्ता चेल्लब्धिरष्टसंख्या भवतीति व्यवह्रियते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लब्धिस्तद्द्विगुणहानिसत्कचयो भवति । तेन प्रथमद्विगुणहानिगतप्रथमवर्गणाप्रदेशा द्वाभ्यां द्विगुणहानिभ्यां विभज्यन्ते, तदा लब्धिः प्रथमद्विगुणहानिचयो भवति । प्रथमद्विगुणहानिप्रथमवर्गणातोऽर्धा द्वितीयद्विगुणहानिगतप्रथमवर्गणाप्रदेशा द्वाभ्यां द्विगुणहानिभ्यां विभज्यन्ते, तदा द्वितीयद्विगुणहानिचयः प्राप्यते, स च प्रथमद्विगुणहानिचयतोऽर्धो भवति, द्विगुणहानिद्वयलक्षणभाजकस्य समानत्वे सति भाज्यस्यार्धमात्रत्वात् । एवमुत्तरोत्तरद्विगुणहानौ चयो-ऽर्धो-ऽर्धः साधयितव्यः ।

**प्रदर्श्यते चैतदसत्कल्पनया—**

(१) कल्प्यन्तां प्रथमद्विगुणहानिप्रथमवर्गणायां षट्पञ्चाशदधिकद्विशती (२५६) प्रदेशाः । तेन द्वितीयद्विगुणहानिसत्कप्रथमवर्गणायां परमाणवो-ऽष्टाविंशत्यधिकशतं (१२८) तिष्ठन्ति ।

(२) द्विगुणहानिः षोडशवर्गणामात्रा कल्प्यते ।

अथ प्रथमद्विगुणहानिगतप्रथमवर्गणासत्कप्रदेशाः षट्पञ्चाशदुत्तरद्विशती (२५६) द्विगुणहानिद्वयरूपद्वात्रिंशता (३२) विभज्यते, तदा लब्धश्चयोऽष्टौ (८) प्रदेशाः, तेन प्रथमद्विगुणहान्यां चयोऽष्टप्रदेशमात्रो भवति । द्वितीयगुणहानिगतप्रथमवर्गणाप्रदेशा अष्टाविंशत्यधिकशतं (१२८) द्विगुणहानिद्वयलक्षणद्वात्रिंशता (३२) भज्यते, तदा लब्धश्चयश्चत्वारः (४) प्रदेशाः । तेन प्रथमद्विगुणहानितो द्वितीयस्यां द्विगुणहानौ चयोऽर्धो जायते । एवमन्यस्यामप्यनन्तरानन्तरद्विगुणहानौ चयो-ऽर्धो-ऽर्धो भवति ।

## अथ गणितविभागः

**अथ सत्तागतपरमाणूनां वर्गणास्पर्धकादिरचना-ऽसत्कल्पनया प्ररूप्यते—**

कल्प्यन्तां (१) सत्तागतकर्मप्रदेशा अशीत्युत्तराष्टपञ्चाशच्छतानि (५८८०) ।

(२) नानाद्विगुणहानयश्चतस्रः (४) ।

(३) द्विगुणहानिः षोडशवर्गणामात्रा (१६) ।

(४) तत्रैकैकद्विगुणहानौ स्पर्धकानि चत्वारि (४) ।

(५) एकैकस्मिन् स्पर्धके वर्गणाश्चतस्रः (४) ।

(६) किञ्चिन्न्यूनसार्धद्विगुणहानिः पुन पञ्चत्रिंशदुत्तरसप्तशतानि द्वात्रिंशद्भागाः (किञ्चिन्न्यून $\frac{७३५}{३२}$) कुतः ? इति चेत्, उच्यते—द्विगुणहानिः षोडशवर्गणाप्रमाणा, तेन सार्धद्विगुणहानिश्चतुर्विंशतिवर्गणाप्रमिता सिध्यति, किन्तु प्रकृते सा किञ्चिन्न्यूना-ऽपेक्षिता, तेन द्वाविंशतिर्वर्गणा एकत्रिंशच्च द्वात्रिंशद्भागाः ($२२\frac{३१}{३२}$) इति कल्प्यते ।

यद्यप्येकद्विगुणहानिगतस्पर्धकत एकस्पर्धके वर्गणा अनन्तगुणाः, ततो नानाद्विगुणहानयो-ऽनन्तगुणा भवन्ति, किन्तु गणितप्रक्रियासौकर्यार्थं त्रीण्यपि पदानि चतुःसंख्यकानि कल्पितानि ।

**अथ प्रथमद्विगुणहानिगतप्रथमवर्गणायां कर्मप्रदेशा निरूप्यन्ते**—सत्तागतकर्मप्रदेशेषु किञ्चिन्न्यूनसार्धद्विगुणहान्या विभक्तेषु प्रथमद्विगुणहानिगतप्रथमवर्गणासत्ककर्मप्रदेशा लभ्यन्ते । अतः प्रकृते पञ्चत्रिंशदुत्तरसप्तशतैर्द्वात्रिंशद्भागैः सत्तागतकर्मप्रदेशेष्वशीत्युत्तराष्टपञ्चाशच्छतमितेषु विभाजितेषु प्रथमद्विगुणहानिगतप्रथमवर्गणासत्काः प्रदेशाः षट्पञ्चाशदधिकद्विशती (२५६) लभ्यन्ते ।

न्यासः—प्रथमद्विगुणहानिप्रथमवर्गणाकर्मप्रदेशाः = सत्तागतपरमाणव ÷ किञ्चिन्न्यूनसार्धद्विगुणहानिः

प्रकृतेऽङ्कतः    ,,    ,,    ,,    $= ५८८० \div \frac{७३५}{३२}$

,,    ,,    ,,    $= ५८८० \times \frac{३२}{७३५}$

,,    ,,    ,,    $= २५६$

**चयः**–विवक्षितद्विगुणहानिसत्कप्रथमवर्गणागतपरमाणवो द्वाभ्यां द्विगुणहानिभ्यां विभज्यन्ते, तदा तद्द्विगुणहानिसत्कश्चयो लभ्यते इति करणम् । प्रकृते द्विगुणहानिद्वयलक्षणद्वात्रिंशता (३२) षट्पञ्चाशदधिकशतद्वये भाजिते चयो-ऽष्टपरमाणुमात्रः प्राप्यते ।

न्यासः—

$$\text{तत्तद्द्विगुणहानिचयः} = \frac{\text{तत्तद्द्विगुणहानिप्रथमवर्गणाप्रदेशाः}}{\text{द्वे द्विगुणहानी}}$$

$$\text{प्रकृतेऽङ्कतः प्रथमद्विगुणहानिचयः} = \frac{२५६}{२ \times १६}$$

$$= ८$$

प्रथमद्विगुणहानौ प्रथमवर्गणातः परमुत्तरोत्तरवर्गणायामष्टपरमाणुभिर्हीना हीनतराः प्रदेशा भवन्ति, चयस्या-ऽष्टपरमाणुमात्रत्वात् । तथाहि–प्रथमद्विगुणहानिसत्कप्रथमस्पर्धकस्य प्रथमवर्गणायां परमाणवः षट्पञ्चाशदुत्तरद्विशती (२५६), द्वितीयवर्गणायामष्टचत्वारिंशदधिकद्विशती (२४८), तृतीयवर्गणायां चत्वारिंशदुत्तरद्विशती (२४०), चतुर्थवर्गणायां द्वात्रिंशदधिकद्विशतमिता (२३२) भवन्ति । ततः प्रथमद्विगुणहानिसत्कद्वितीयस्पर्धकस्य प्रथमवर्गणायां द्विशती चतुर्विंशतिश्च (२२४), द्वितीयवर्गणायां षोडशोत्तरद्विशती (२१६) । एवमेकैकचयेन हीना हीनतराः कर्मपरमाणवस्तावदभिधातव्याः, यावच्चतुर्थस्पर्धकस्य चतुर्थवर्गणा । तस्यां च षट्त्रिंशदधिकशतं (१३६) कर्मप्रदेशा भवन्ति ।

**द्वितीयद्विगुणहानिसत्कप्रथमादिवर्गणासु कर्मप्रदेशाः**— प्रथमद्विगुणहानेश्चतुर्थस्पर्धकचतुर्थवर्गणासत्केभ्यः षट्त्रिंशदधिकशतप्रदेशेभ्योऽष्टपरमाणुमात्रैकचयो विशोध्यते, तदा-ऽष्टा-

ननु प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशप्राप्त्यर्थं किञ्चिन्न्यूनसार्धद्विगुणहान्या कुतो विभज्यन्ते सत्तागतसर्वप्रदेशाः ? इति चेत्, उच्यते-इहादौ तावत् प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशका द्विगुणहानिवर्गणामात्र्यो वर्गणाः स्थाप्याः, असत्कल्पनया षट्पञ्चाशदधिकद्विशतप्रदेशकाः(२५६) षोडश(१६) वर्गणाः । सत्तामाश्रित्य सर्ववर्गणास्तुल्यप्रदेशका न भवन्ति, परन्तु प्रथमवर्गणापेक्षया द्वितीयवर्गणायामेकचयेन हीनाः प्रदेशा भवन्ति, तृतीयस्यां द्वाभ्यां चयाभ्यां हीनाः, चतुर्थ्यां त्रिभिश्चयैर्हीना भवन्ति, एवंक्रमेण प्रथमद्विगुणहानेश्चरमस्पर्धकचरमवर्गणायां प्रथमस्पर्धकप्रथमवर्गणापेक्षयैकोनद्विगुणहानिवर्गणाराशिमात्रैश्चयैर्हीनाः प्रदेशा भवन्ति । ताँश्चयान् सङ्कलय्य तेषां प्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणा निष्पादयितव्याः, निष्पाद्य च तासु प्राक्स्थाप्याभ्यो द्विगुणहानिवर्गणाप्रमाणाभ्यो वर्गणाभ्यो विशोधितासु शेषाः प्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणाः प्रथमद्विगुणहानिसर्वप्रदेशनिष्पन्नाः । इह चयानां सङ्कलनं वर्गणादिनिष्पादनादिकं चैवम्-"सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या" इत्यनेन करणसूत्रेण सर्वचयाः सङ्कलयितव्याः, पदं चेह द्विगुणहानिवर्गणाराशिः, असत्कल्पनया १६ । अनेन करणसूत्रेणाऽसत्कल्पनामाश्रित्य सङ्कलिताश्चयाः $(१५+१)\times\frac{१५}{२}=१२०$ । प्रथमद्विगुणहानिसङ्कलितचयैः प्रथमद्विगुणहान्येकचयप्रदेशा गुण्यन्ते, तदा प्रथमद्विगुणहानिसर्वचयप्रदेशाः प्राप्यन्ते, असत्कल्पनया $१२०\times८=९६०$, ते च प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशैर्विभज्यन्ते, तदैकवर्गणोनद्विगुणहानेश्चतुर्भागप्रमाणाः प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणा लभ्यन्ते, असत्कल्पनया $\frac{९६०}{२५६}=\frac{१५}{४}$, $\frac{१६-१}{४}=\frac{१५}{४}=३\frac{३}{४}$ । ताश्च द्विगुणहानिवर्गणाप्रमाणाभ्यो वर्गणाभ्यो विशोधयितव्याः, विशोधने कृते प्रथमवर्गणाचतुर्भागाधिकद्विगुणहानित्रिचतुर्भागप्रमाणाः प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणाः, ताश्चाऽसत्कल्पनया $१६-३\frac{३}{४}=१२\frac{१}{४}$, । प्रतिवर्गणं प्रदेशास्तु २५६, २५६, २५६, २५६, २५६, २५६, २५६, २५६, २५६, २५६, २५६, २५६, ६४ । इत्थं यथोत्तरमेकैकचयहीनप्रदेशकत्वेनाऽवतिष्ठमानाः प्रथमद्विगुणहानिसर्ववर्गणाः स्वप्रथमवर्गणाप्रदेशतुल्यप्रदेशकाः क्रियन्ते, तदा स्वप्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणाः स्वप्रथमवर्गणाचतुर्भागाधिकद्विगुणहानित्रिचतुर्भागप्रमाणा भवन्ति, असत्कल्पनया $१२\frac{१}{४}$ । एवं शेषद्विगुणहानीनामपि वर्गणाः स्वस्वप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशकाः क्रियन्ते, तदा स्वस्वप्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणाः स्वस्वप्रथमवर्गणाचतुर्भागाधिकद्विगुणहानित्रिचतुर्भागप्रमाणा लभ्यन्ते, असत्कल्पनया $१२\frac{१}{४}$ । यदि पुनस्ताः प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशकाः क्रियन्ते, तदा पूर्वपूर्वद्विगुणहानिवर्गणातोऽर्धा अर्धा भवन्ति, असत्कल्पनया $६\frac{१}{८}$, $३\frac{१}{१६}$ $१\frac{१७}{३२}$, उत्तरोत्तरद्विगुणहानिप्रथमवर्गणाप्रदेशानां द्विगुणहीनत्वात् । अथ प्रथमद्विगुणहानिवर्जशेषद्विगुणहानीनां प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणाः सङ्कलयितव्याः, सङ्कलिताश्च ताश्चरमद्विगुणहानिप्रदेशनिष्पन्नप्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशकवर्गणाहीनप्रथमद्विगुणहानिसत्कस्वप्रथमवर्गणाप्रदेशतुल्यप्रदेशकसर्ववर्गणाप्रमाणा भवन्ति, असत्कल्पनया $६\frac{१}{८}+३\frac{१}{१६}+१\frac{१७}{३२}=१०\frac{२३}{३२}$, $(१२\frac{१}{४}-१\frac{१७}{३२})=१०\frac{२३}{३२}$ । ताश्च स्वप्रथमवर्गणाचतुर्भागाधिकद्विगुणहानित्रिचतुर्भागप्रमाणासु प्रथमद्विगुणहानिवर्गणासु प्रक्षिप्यन्ते, तदा प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशतुल्यप्रदेशका वर्गणाः किञ्चिन्न्यूनसार्धद्विगुणहानिप्रमाणा लभ्यन्ते, असत्कल्पनया $१२\frac{१}{४}+१०\frac{२३}{३२}=\frac{७३५}{३२}=२२\frac{३१}{३२}$ । एतावत्प्रथमवर्गणामात्राः प्रदेशाः सत्तायां भवन्ति । यत एतावत्प्रथमवर्गणामात्राः प्रदेशाः सत्तायां भवन्ति, तत एतावतीभिर्वर्गणाभिर्विभक्तेषु प्रदेशेषु प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशा लभ्यन्ते । तथा यत एव द्विगुणहानीनां सर्वप्रदेशाः स्वस्वप्रथमस्पर्धकप्रथमवर्गणाचतुर्भागाधिकद्विगुणहानित्रिचतुर्भागप्रमाणस्वस्वप्रथमस्पर्धकवर्गणाप्रदेशतुल्यप्रदेशकवर्गणामात्रा भवन्ति, ततस्ताभिः ( $\frac{३}{४}$ द्विगुणहानिः $+\frac{१}{४}$ ) तत्तद्द्विगुणहानिसकलप्रदेशेषु विभक्तेषु तत्तद्द्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणाप्रदेशा लभ्यन्ते । तेन नवोत्तराधिकशततमपृष्ठे द्वात्रिंशतितमपङ्क्तौ "द्विगुणहानि त्रिचतुर्भागी कृत्यं० इत्यादिकरणमुक्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विंशत्यधिकशतपरमाणवो-ऽवशिष्यन्ते, ते च द्वितीयद्विगुणहानिसत्कप्रथमस्पर्धकप्रथमवर्गणागता भवन्ति, न च ते-ऽसिद्धाः, करणसूत्रेण तावतामेव लाभात् । तथा चा-ऽत्र करणसूत्रम्—प्रथमद्विगुणहानिसत्कप्रथमवर्गणागतपरमाणुषु द्विकेन हृतेषु द्वितीयद्विगुणहानिसत्कप्रथमवर्गणागतकर्मप्रदेशाः प्राप्यन्ते । एतेन षट्पञ्चाशदुत्तरद्विशतयोर्द्विकेन भाजितयोरष्टाविंशत्यधिकशतप्रमिता द्वितीयद्विगुणसत्कप्रथमवर्गणागतपरमाणवो लभ्यन्ते ।

न्यासः—

द्वितीयद्विगुणहानिप्रथमवर्गणाप्रदेशाः $= \frac{\text{प्रथमद्विगुणहानिप्रथमवर्गणाप्रदेशाः}}{२}$

प्रकृते-ऽङ्कतो　,,　,,　,,　$= \frac{२५६}{२}$

$= १२८$

चयः—प्रथमद्विगुणहान्यां यश्चयः प्राप्तः, तदर्धो द्वितीयद्विगुणहान्यां भवति । तेन द्विकेन विभक्तः प्रथमद्विगुणहानिगतचयश्चतुष्परमाण्वात्मको द्वितीयद्विगुणहानिगतचयो लभ्यते ।

न्यासः—

द्वितीयद्विगुणहानौ चयः $= \frac{\text{प्रथमद्विगुणहानिचयः}}{२}$

प्रकृते-ऽङ्कतो　,,　,,　,,　$= \frac{८}{२}$

$= ४$

यद्वा द्वितीयद्विगुणहानिसत्कप्रथमवर्गणास्थितपरमाणवो द्विगुणहानिद्वयेन विभज्यन्ते, तदा द्वितीयद्विगुणहानिसत्कचयः प्राप्यते । अनेन विधिनाऽप्यष्टाविंशत्यधिकशते द्विगुणहानिद्वयरूपद्वात्रिंशता विभक्ते चयश्चतुष्परमाण्वात्मको लभ्यते ।

न्यास —

द्वितीयद्विगुणहान्यां चयः $= \frac{\text{द्वितीयद्विगुणहानिप्रथमवर्गणागतपरमाणवः}}{\text{द्वे द्विगुणहानी}}$

प्रकृतेऽङ्कतो　,,　,,　,,　$= \frac{१२८}{२ \times १६}$

$= \frac{१२८}{३२}$

$= ४$

एवं पूर्वपूर्वत उत्तरोत्तरद्विगुणहानौ प्रथमवर्गणायां परमाणवो-ऽर्धा अर्धा भवन्ति, तथैव पूर्वपूर्वत उत्तरोत्तरद्विगुणहानौ चयो-ऽप्यर्धो-ऽर्धो भवति । उत्तरोत्तरवर्गणायां च कर्मप्रदेशा एकैकचयेन हीना वक्तव्याः ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## सत्तागत-सर्वपरमाणूनां वर्गणास्पर्धकादीनि दर्शययन्त्रकम्—

| | प्रथमं स्पर्धकम् | द्वितीयं स्पर्धकम् | तृतीयं स्पर्धकम् | चतुर्थं स्पर्धकम् |
|---|---|---|---|---|
| द्विगु०.चयः, वर्गणा— | प्र० द्वि० तृ० च० | प्र० द्वि० तृ० च० | प्र० द्वि० तृ० च० | प्र० द्वि० तृ० च० |
| प्रथमा ८ परमाणवः- | २५६,२४८,२४०,२३२ | २२४,२१६,२०८,२०० | १९२,१८४,१७६,१६८ | १६०,१५२,१४४,१३६ |
| द्वितीय ४ ,, | १२८,१२४,१२०,११६ | ११२,१०८,१०४,१०० | ९६, ९२, ८८, ८४ | ८०, ७६, ७२, ६८ |
| तृतीया २ ,, | ६४, ६२, ६०, ५८ | ५६, ५४, ५२, ५० | ४८, ४६, ४४, ४२ | ४०, ३८, ३६, ३४ |
| चतुर्थी १ ,, | ३२, ३१, ३०, २९ | २८, २७, २६. २५ | २४. २३. २२. २१ | २०, १९, १८, १७ |

**सम्प्रति प्रकारान्तरेणैषैव वक्तव्यता प्रदर्श्यते**—कर्मप्रदेशादीनामसत्कल्पना पूर्ववत् कर्तव्या ।

**अन्तिमद्विगुणहानौ परमाणवः**—नानाद्विगुणहानिसंख्याप्रमाणद्विकानां परस्परं गुणनं कृत्वा गुणिततो रूपं विशोध्या-ऽवशिष्टेन सत्तागतपरमाणवो विभक्तव्याः, लब्धौ प्राप्यमाण-परमाणवश्चरमद्विगुणहानिसत्का भवन्ति । एतदुक्तं भवति—सत्कर्मणि यावत्यो द्विगुणहानयो भवन्ति, तावन्ति द्विकानि स्थापयितव्यानि । ततो द्विकानि परस्परं गुणयितव्यानि, गुणिततो रूपं विशोध्या-ऽवशिष्टेन सत्तागतपरमाणवो विभक्तव्याः, लब्धिस्तु चरमद्विगुणहानिगतसकल-परमाणुराशिर्भवति ।

न्यासः—

$$\text{अन्तिमद्विगुणहानिगतपरमाणवः} = \frac{\text{सत्तागतपरमाणवः}}{(२)^{\text{नानाद्विगुणहानयः}} - १}$$

$$\text{प्रस्तुतेऽङ्कतो ,, ,,} = \frac{५८८०}{(२)^{४}-१}$$

$$= \frac{५८८०}{(२\times२\times२\times२)-१}$$

$$= \frac{५८८०}{१६-१}$$

$$= ३९२$$

**शेषासु द्विगुणहानिषु परमाणूनामुपलब्धिः**—पूर्वानुपूर्व्या यतितमद्विगुणहान्याः परमाणवो-ऽभिप्रेता भवन्ति, तावत्संख्यान्यूननानाद्विगुणहानिसंख्याप्रमाणद्विकानि मिथो गुणयित्वा गुणितैश्चरमद्विगुणहानिगतपरमाणवो गुण्यन्ते, तदा निरुक्तद्विगुणहानिगतपरमाणवो लभ्यन्ते । भावार्थः पुनरयम्—यतितमद्विगुणहानेः परमाणवो-ऽभिप्रेता भवेयुः, तावतीं संख्यां नानाद्विगुण-हानितो व्यवकलय्या-ऽवशिष्टा यावती संख्या भवति, तावन्ति द्विकानि स्थापयित्वा परस्परं गुणयितव्यानि, गुणनफलं च पुनश्चरमद्विगुणहानिगतपरमाणुभिर्गुण्यते, तदा विवक्षितद्विगुण-हानिगतपरमाणवः प्राप्यन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यासः— नानाद्विगुणहानयः —इष्टद्विगुणहानिः

विवक्षितद्विगुणहान्यां परमाणवः = चरमद्विगुणहानिपरमाणवः × (२)

प्रकृतेऽङ्कतः प्रथमद्विगुणहान्यां प्रदेशाः = ३९२ × (२ ^४—१^)

= ३९२ × (२)³

= ३९२ × (२ × २ × २)

= ३९२ × ८

= ३१३६

द्वितीयद्विगुणहान्यां प्रदेशाः = ३९२ × (२)^४—२^

= ३९२ × (२)²

= ३९२ × (२ × २)

= ३९२ × ४

= १५६८

तृतीयद्विगुणहान्यां परमाणवः = ३९२ × (२)^४—३^

= ३९२ × (२)¹

= ३९२ × २

= ७८४

**विवक्षितद्विगुणहानिगतप्रथमादिवर्गणासु कर्मपरमाणूनां निरूपणम्**— द्विगुणहानिं त्रिचतुर्भागीकृत्यैकरूपस्य चतुर्भागं संकलय्य सङ्कलितेन तद्द्विगुणहानिगतपरमाणुषु विभक्तेषु तद्द्विगुणहानिगतप्रथमवर्गणासत्काः परमाणवः प्राप्यन्ते इति करणम् ।

अनेन करणेन प्रथमद्विगुणहानिगतप्रथमादिवर्गणासु कर्मप्रदेशा निरूप्यन्ते—

न्यासः—

विवक्षितद्विगुणहानिगतप्रथमवर्गणायां परमाणवः = $\frac{\text{तद्द्विगुणहानिगतपरमाणवः}}{(\frac{३}{४}\ \text{द्विगुणहानिः}) + \frac{१}{४}}$

प्रकृतेऽङ्कतः प्रथमद्विगुणहानिगतप्रथमवर्गणायां परमाणवः = $\frac{३१३६}{(\frac{३}{४} \times १६) + \frac{१}{४}}$

$= \frac{३१३६}{१२ + \frac{१}{४}}$

$= \frac{३१३६}{\frac{४९}{४}}$

$= \frac{३१३६}{४९} \times ४$

= २५६

उत्तरोत्तरवर्गणायामेकैकचयेन परमाणवो हीयन्ते, चयस्त्वष्टपरमाणुमात्रः प्रथमविकल्पवत् साधनीयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रत्यनन्तरोक्तकरणेन द्वितीयद्विगुणहानिगतप्रथमादिवर्गणासु कर्मप्रदेशा निरूप्यन्ते—

$$\text{द्वितीयद्विगुणहानिगतप्रथमवर्गणायां परमाणवः} = \frac{१५६८}{(\frac{३}{४}\times १६)+\frac{१}{४}}$$

$$= \frac{१५६८}{१२+\frac{१}{४}}$$

$$= \frac{१५६८}{\frac{४९}{४}}$$

$$= \frac{१५६८}{४९}\times ४$$

$$= १२८$$

तत उत्तरोत्तरवर्गणायामेकैकचयेन परमाणवो हीना हीनतरा वक्तव्याः, चयस्तु चतुष्परमाणुप्रमितः प्रथमविकल्पवत् साध्यः। एवं शेषद्विगुणहान्योः प्रथमादिवर्गणासु कर्मप्रदेशाः साधयितव्याः।

**अथवा** द्वितीयविकल्पमाश्रित्यैकैकद्विगुणहानिगतपरमाणून् प्राप्य वक्ष्यमाणप्रकारेण प्रथमादिवर्गणासु कर्मप्रदेशा अभिधातव्याः।

तत्तद्द्विगुणहानिगतपरमाणवः पदेन विभक्तव्याः। लब्धिश्च मध्यमधनं भवति। मध्यमधनं पुनरेकोनपदार्धन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां विभज्यते, तदा तत्तद्द्विगुणहानिगतचयः प्राप्यते। चये तु द्विगुणहानिद्वयेन गुणिते तत्तद्द्विगुणहानिसत्कप्रथमवर्गणागतपरमाणवः प्राप्यन्ते, तत उत्तरोत्तरवर्गणायामेकैकचयेन हीनाः परमाणवो वक्तव्याः। पदं चाऽत्र द्विगुणहानिमात्रं बोध्यम्।

न्यासः—

$$\text{मध्यमधनम्} = \frac{\text{तत्तद्द्विगुणहानिगतसकलपरमाणवः}}{\text{पदम्}}$$

$$\text{चयः} = \frac{\text{मध्यमधनम्}}{\text{द्वे द्विगुणहानी} - \frac{\text{पदम्}-१}{२}}$$

तत्तद्द्विगुणहानिगतप्रथमवर्गणायां परमाणवः = चयः × द्वे द्विगुणहानी

उत्तरोत्तरवर्गणायामेकैकचयेन परमाणवो हीना वक्तव्याः।

अनया रीत्याऽङ्कतः प्रथमद्विगुणहानिगतप्रथमादिवर्गणासु कर्मप्रदेशाः—

प्रथमद्विगुणहानौ सकलपरमाणवः $= ३१३६$

$$\text{मध्यमधनम्} = \frac{३१३६}{१६}$$

$$= १९६$$

$$\text{चयः} = \frac{१९६}{(२\times १६)-\frac{१६-१}{२}}$$

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## यन्त्रकम्-१२ (चित्रम्-१२)

### असत्कल्पनया पूर्वस्पर्धकानां रचना

प्रथमद्विगुणहानिः | द्वितीयद्विगुणहानिः
तस्यामसत्कल्पनया सर्वसंख्यया स्पर्धकानि चत्वारि (४), षोडश (१६) वर्गणाः, षट्त्रिंशदधिकैकत्रिंशच्छतसंख्याकाः (३१३६) कर्मप्रदेशाः, परमार्थतस्तु स्पर्धकानि वर्गणाः कर्मप्रदेशाश्चाऽनन्ता भवन्ति । | तस्यां कर्मप्रदेशाः १५६८




सङ्केतस्पष्टीकरणम्—

१=प्रथमवर्गणा । २=द्वितीयवर्गणा । ३=तृतीयवर्गणा । ४=चतुर्थवर्गणा ।
र०=एकप्रदेशे रसाविभागाः रसा०=रसाविभागाः

**प्रदेशापेक्षया-ऽनन्तरोपनिधा—**

प्रथमद्विगुणहान्यां चयोऽष्टप्रदेशात्मकः, द्वितीयद्विगुणहान्यां तु तदर्धश्चतुष्प्रदेशात्मकः । तेन प्रथमद्विगुणहान्यामुत्तरोत्तरवर्गणायामष्टभिरष्टभिः प्रदेशैर्हीना हीनतराः प्रदेशा भवन्ति, द्वितीयद्विगुणहान्यां तु चतुर्भिश्चतुर्भिर्हीना हीनतरा भवन्ति, असत्कल्पनयेह चित्रे प्रथमद्विगुणहानिप्रथमवर्गणायां प्रदेशाः २५६, द्वितीयवर्गणायाम् २४८, तृतीयवर्गणायाम् २४०, एवमग्रेऽपि ।

**प्रदेशापेक्षया परम्परोपनिधा—**

अत्र षोडशवर्गणाप्रमाणा द्विगुणहानिः कल्पिता । तेनाऽसत्कल्पनया प्रथमद्विगुणहान्याः प्रथमवर्गणायां ये षट्पञ्चाशदधिकद्विशतसंख्याकाः (२५६) प्रदेशा भवन्ति, तदर्धाः प्रदेशा द्वितीयद्विगुणहानिप्रथमवर्गणायामष्टाविंशत्युत्तरशतसङ्ख्याका (१२८) भवन्ति, तदर्धास्तृतीयद्विगुणहानिप्रथमवर्गणायां चतुष्षष्टिः (६४) । एवमग्रेऽपि ।

**अनुभागापेक्षया-ऽनन्तरोपनिधा—**

प्रथमद्विगुणहानिप्रथमवर्गणायां रसाविभागाः १०००००, एकाधिकास्ते द्वितीयवर्गणायाम् १००००१, एवमुत्तरोत्तरवर्गणायामेकैकेनाऽधिका वाच्याः, इहैकस्पर्धके चतुर्वर्गणानां कल्पनात् चरमवर्गणायाम् १००००३ । ९९,९९७ रसाविभागास्त्वन्तरत्वेन कल्पिताः, तेन प्रथमद्विगुणहानिद्वितीयस्पर्धकप्रथमवर्गणायां रसाविभागाः २०००००, एवमग्रे-ऽपि वक्तव्याः ।

**अनुभागाऽपेक्षया परम्परोपनिधा—**

प्रथमद्विगुणहानिप्रथमस्पर्धकप्रथमवर्गणागतरसाविभागतः [ १००००० ] द्वितीयस्पर्धकप्रथमवर्गणायां द्विगुणाः २००००० रसाविभागाः । तृतीयस्पर्धकप्रथमवर्गणायां तु त्रिगुणाः ३०००००, एवमग्रेऽपि प्रथमद्विगुणहानिप्रथमवर्गणापेक्षया यतिसंख्यं स्पर्धकं भवति, तत्संख्यगुणा रसाविभागास्तत्स्पर्धकप्रथमवर्गणायां भवन्ति ।

अथ प्रथमस्पर्धकप्रथमवर्गणागतरसाविभागतो [ १००००० ] द्वितीयस्पर्धकप्रथमवर्गणायां रसाविभागा द्विगुणाः २००००० भवन्ति, द्वितीयस्पर्धकप्रथमवर्गणागतरसाविभागतः [२०००००] तृतीयस्पर्धकप्रथमवर्गणायां त्रिद्विभागगुणाः [ २००००० × $\frac{3}{2}$ ] ३००००० भवन्ति, ततश्चतुर्थस्पर्धकप्रथमवर्गणायां चतुस्त्रिभागगुणाः [ ३००००० × $\frac{4}{3}$ ] ४००००० भवन्ति । एवमग्रेऽपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

$$= \frac{१६६}{३२-\frac{१५}{२}}$$

$$= \frac{१६६}{\frac{४६}{२}}$$

$$= ८$$

प्रथमवर्गणायां कर्मप्रदेशाः $= ८ \times (२ \times १६)$

$$= ८ \times ३२$$

$$= २५६$$

तत उत्तरोत्तरवर्गणायामष्टपरमाणुलक्षणैकैकचयेन हीना हीनतराः कर्मप्रदेशा निगदितव्याः । एवं शेषद्विगुणहानिगतवर्गणासु कर्मप्रदेशा निश्चेतव्याः । पश्यन्तु पाठका यन्त्रकम्-१२ ।

## गणितविभागः समाप्तः ।

स्पर्धकेषु वर्गणास्तत्र च परमाणून्निरूप्य सम्प्रति रसाऽविभागानभिदध्महे ।

**अनुभागा-ऽपेक्षया-ऽनन्तरोपनिधा**— प्रथमस्पर्धकस्य प्रथमवर्गणायां सर्वस्तोका रसाऽविभागा भवन्तोऽपि सर्वजीवेभ्योऽनन्तगुणा विद्यन्ते । तत एकेनाधिका रसाऽविभागा द्वितीयवर्गणायां भवन्ति । ततोऽप्येकेना-ऽधिकास्तृतीयवर्गणायाम्, एवं तावद् वक्तव्यम्, यावत् प्रथमस्पर्धकस्य चरमवर्गणा । ततो द्वितीयस्पर्धकस्य प्रथमवर्गणायां रसाऽविभागाः सर्वजीवानन्तगुणैरधिका भवन्ति, प्रथमस्पर्धकस्य चरमवर्गणातो द्वितीयस्पर्धकस्य प्रथमवर्गणायां रसा-ऽविभागानां मार्गणमप्यनन्तरोपनिधा भण्यते, प्रथमस्पर्धकचरमवर्गणातो द्वितीयस्पर्धकप्रथमवर्गणाया अनन्तरत्वात् । द्वितीयस्पर्धकस्य प्रथमवर्गणातस्तद्द्वितीयवर्गणायां रसाऽविभागा एकेनाधिका भवन्ति, ततस्तत्तृतीयायामेकेनाधिकाः । एवंक्रमेण यत्र यत्र स्पर्धकद्वयस्य सन्धिर्भवति, तत्र तत्र प्राक्तनवर्गणातो-ऽनन्तरोत्तरवर्गणायां रसाऽविभागाः सर्वजीवाऽनन्तगुणैरधिका वक्तव्याः, अन्यत्रैकेन रसाऽविभागेनाऽधिका वक्तव्याः । एवं तावद्वक्तव्यम्, यावच्चरमस्पर्धकस्य चरमवर्गणा ।

**अनुभागापेक्षया परम्परोपनिधा**—प्रथमस्पर्धकस्य प्रथमवर्गणातस्तत्स्पर्धकस्याऽन्यासु वर्गणास्वनन्ततमभागेनाधिका रसा-ऽविभागा भवन्ति, न पुनरसंख्येयभागादिभिर्वृद्धाः तथा प्रथमस्पर्धकप्रथमवर्गणायां यावन्तो रसा-ऽविभागा भवन्ति, ततो द्विगुणा रसाऽविभागा द्वितीयस्पर्धकस्य प्रथमवर्गणायां भवन्ति, तृतीयस्पर्धकस्य प्रथमवर्गणायां तु त्रिगुणाः, चतुर्थस्य स्पर्धकस्य प्रथमवर्गणायां तु चतुर्गुणा भवन्ति । एवं प्रथमद्विगुणहानौ यतिसंख्यं यतिसंख्यं स्पर्धकं चिन्त्यते, तत्तत्संख्यागुणिताः प्रथमस्पर्धकसत्कप्रथमवर्गणागता रसाऽविभागास्ततिसंख्यस्य ततिसंख्यस्य स्पर्धकस्या-ऽऽदिवर्गणायां वक्तव्याः । तदेवं प्रथमद्विगुणहानौ परम्परोपनिधा गता, शेषद्विगुणहानिषु तु यथागमं भावनीया ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

# अथ गणितविभागः

**अथ पूर्वपूर्वस्पर्धकत उत्तरोत्तरस्पर्धकस्य प्रथमवर्गणायां रसाऽविभागाः सुबोधार्थं निरूप्यन्ते**—प्रथमस्पर्धकस्य प्रथमवर्गणातो द्वितीयस्पर्धकस्य प्रथमवर्गणायां द्विगुणा रसाऽविभागा भवन्ति, द्वितीयस्पर्धकस्य प्रथमवर्गणातस्ततृतीयस्पर्धकस्य प्रथमवर्गणायां त्रिद्विभागगुणा रसाऽविभागा भवन्ति, तृतीयस्पर्धकस्य प्रथमवर्गणातश्चतुर्थस्पर्धकगतप्रथमवर्गणायां चतुस्त्रिभागगुणा रसाऽविभागा भवन्ति, चतुर्थस्पर्धकस्य प्रथमवर्गणातः पञ्चमस्पर्धकगतप्रथमवर्गणायां पञ्चचतुर्भागगुणा रसाऽविभागा भवन्ति, पञ्चमस्पर्धकस्य प्रथमवर्गणातः षष्ठस्पर्धकगतप्रथमवर्गणायां षट्पञ्चभागगुणा रसाऽविभागा भवन्ति ।

**इदमत्र करणम्**–प्रथमद्विगुणहानौ यतिसंख्यं स्पर्धकमुद्दिष्टं भवति, एकोनतत्संख्याविभक्ततत्संख्यागुणा रसाऽविभागा उद्दिष्टस्पर्धकस्य प्रथमवर्गणायां तत्प्राक्तनस्पर्धकप्रथमवर्गणातो भवन्तीति ।

**न्यास** —

विवक्षितस्पर्धकप्रथमवर्गणायां रसाविभागास्तत्प्राक्तनस्पर्धकप्रथमवर्गणातः $= \frac{\text{यतितमं स्पर्धकं तत्संख्या}}{\text{रूपोनतत्संख्या}}$ गुणाः

नन्वनन्तरोक्तकरणेन शततमस्पर्धकगतप्रथमवर्गणायां रसाविभागास्तत्प्राक्तनस्पर्धकप्रथमवर्गणातः कियद्गुणा रसाविभागा भवन्ति ? इति चेत्, उच्यते–शत-नवनवतिभागगुणा भवन्ति ।

**न्यासः**—

शततमस्पर्धकप्रथमवर्गणायां रसाविभागास्तत्प्राक्तनस्पर्धकवर्गणातः $= \frac{१००}{१००-१}$ गुणाः

$= \frac{१००}{९९}$

ननु कतितमस्य स्पर्धकस्य प्रथमवर्गणायां रसाऽविभागास्तत्प्राक्तनस्पर्धकप्रथमवर्गणातः प्राक्तनस्पर्धकगतप्रथमवर्गणासत्करसाऽविभागानामुत्कृष्टसंख्येयभागेना-ऽधिका भवन्ति ? इति चेत्, शृणुत-जघन्यपरित्ता-ऽसंख्येयतमस्य स्पर्धकस्य प्रथमवर्गणायां भवन्ति, कथमेतदवगन्तव्यम् ? इति चेद्, उच्यते—जघन्यपरित्ता-ऽसंख्येयतमस्य स्पर्धकस्य प्रथमवर्गणायां रसाऽविभागाः प्रथमस्पर्धकस्य प्रथमवर्गणातो-ऽसंख्येयगुणा भवन्ति, तत्पूर्ववर्तिस्पर्धकस्य च प्रथमवर्गणायामुत्कृष्टसंख्येयगुणा विद्यन्ते, उत्कृष्टसंख्येयतमस्पर्धकस्य जघन्यपरित्ताऽसंख्येयतमस्पर्धकतोऽनन्तरपूर्ववर्तित्वात् ।

असत्कल्पनया प्रथमस्पर्धकप्रथमवर्गणायां रसाविभागाः 'क' इति, तेन जघन्यपरित्ताऽसंख्येयतमस्पर्धकस्य प्रथमवर्गणायां रसाविभागाः क×जघन्यपरित्तासंख्येयमिति, जघन्यपरित्ताऽसंख्येयतमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रस्पर्धकात्पूर्ववर्तिनः स्पर्धकस्योत्कृष्टसंख्येयतमस्पर्धकरूपस्य प्रथमवर्गणायां पुना रसाऽविभागाः=क ×उत्कृष्टसंख्यातमिति ।

जघन्यपरित्ताऽसंख्येयतमस्पर्धकस्य प्रथमवर्गणागतरसाऽविभागत उत्कृष्टसंख्येयतमस्पर्धकस्य प्रथमवर्गणागतरसाऽविभागान् विशोध्य शेषा रसाऽविभागा उत्कृष्टसंख्येयतमस्पर्धकसत्कप्रथमवर्गणागतरसाऽविभागाऽपेक्षयाऽधिका भवन्ति । तेन जघन्यपरित्ताऽसंख्यातम् × क इत्येतस्माद् उत्कृष्टसंख्यातम् × क इत्येतद्विशोध्य शेषं 'क' विद्यते । एवं जघन्यपरित्तासंख्येयतमस्पर्धकप्रथमवर्गणायामुत्कृष्टसंख्येयतमस्पर्धकसत्कप्रथमवर्गणाऽपेक्षया 'क' इत्येतै रसाऽविभागैरधिका भवन्ति ।

न्यासः (जघन्यपरित्ताऽसंख्यातम् × क)—(उत्कृष्टसंख्यातम् × क)
= (जघन्यपरित्ताऽसंख्यातम् – उत्कृष्टसंख्यातम् ) × क
जघन्यपरित्ताऽसंख्यातम् = उत्कृष्टसंख्यातम् + १
= (उत्कृष्टसंख्यातम् + १ – उत्कृष्टसंख्यातम्) × क
= १ × क
= क

'क' इत्येते रसाऽविभागा उत्कृष्टसंख्यातम् × क इत्येतेषां रसाऽविभागानामुत्कृष्टसंख्येयतमभागमात्रा भवन्ति

न्यासः— $क = \frac{\text{उत्कृष्टसंख्यातम्} \times क}{\text{उत्कृष्टसंख्यातम्}} = \frac{\text{जघन्यासंख्यतमस्पर्धकापेक्षपूर्ववर्तिस्पर्धकाद्यवर्गणाऽविभागाः}}{\text{उत्कृष्टसंख्यातम्}}$

अतो यस्मिन् स्पर्धके तत्पूर्ववर्तिस्पर्धकप्रथमवर्गणात उत्कृष्टसंख्येयभागेनाऽधिका रसाविभागा भवन्ति, तत्स्पर्धकं जघन्यपरित्ताऽसंख्याततमं भवति ।

**इयमत्र व्याप्तिः**—प्रथमद्विगुणहानौ प्रथमस्पर्धकतः प्रभृति विवक्षितस्पर्धकापेक्षप्राक्तनस्पर्धकं यतितमं भवति, तत्स्पर्धकप्रथमवर्गणागतरसाविभागानां ततिभागेना-ऽधिका रसाविभागा विवक्षितस्पर्धकस्य प्रथमवर्गणायां पूर्ववर्तिस्पर्धकापेक्षया भवन्ति ।

न्यासः—

इष्टस्पर्धकाद्यवर्गणायां रसाविभागाः प्राक्तनस्पर्धकाद्यवर्गणातः = $\frac{\text{पूर्वस्पर्धकप्रथमवर्गणारसाविभागाः}}{\text{यतितमं पूर्वस्पर्धकं, तत्संख्या}}$ एतैरधिकाः

अतो विवक्षितस्पर्धकप्रथमवर्गणायां रसाविभागाः = पूर्वस्प०प्र०व०रसाविभागाः + $\frac{\text{पूर्वस्प० प्र० व०}}{\text{यतितमं पूर्वस्पर्धकं, तत्संख्या}}$

अत एव जघन्यपरित्ता-ऽसंख्येयतमस्पर्धकं यावत् पूर्वपूर्वत उत्तरोत्तरस्पर्धकस्य प्रथमवर्गणायां रसाविभागाः संख्येयभागेना-ऽधिका भवन्ति, ततः परं जघन्यपरित्ता-ऽनन्ततमस्पर्धकं यावत् पूर्व-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

पूर्वत उत्तरोत्तरस्पर्धकस्य प्रथमवर्गणायां रसाविभागा असंख्येयभागेना-ऽधिका भवन्ति। तथा जघन्यपरित्ता-ऽनन्ततमस्पर्धकप्रथमवर्गणायां रसाऽविभागास्तत्पूर्ववर्तिस्पर्धकसत्कप्रथमवर्गणास्थित-रसाविभागतः पूर्ववर्तिस्पर्धकसत्कप्रथमवर्गणागतरसाविभागानामुत्कृष्टासंख्याताऽसंख्यातभागेना-ऽधिका विद्यन्ते। ततः परं सर्वत्र पूर्वपूर्वत उत्तरोत्तरस्पर्धकस्य प्रथमवर्गणायां रसाविभागा अनन्ततम-भागेना-ऽधिका भवन्ति।

**सम्प्रति वर्गणासु रसाविभागाः सूक्ष्मगणितानुसारेणाऽभिधीयन्ते,** अनन्त-रोक्तप्ररूपणायाः स्थूलगणितानुसारेण दर्शितत्वात्। कथमेतदवगन्तव्यम्? इति चेद्, उच्यते—यद्यपि प्रथमस्पर्धकप्रथमवर्गणासत्कैकैकपरमाणुगतरसाऽविभागतो द्वितीयस्पर्धकप्रथमवर्गणागतै-कैकपरमाणौ रसाऽविभागा द्विगुणा भवन्ति, तथापि प्रथमस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुस्थित-निखिलरसा-ऽविभागतो द्वितीयस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुगता-ऽशेषरसाऽविभागा द्वि-गुणा न भवन्ति, किन्तु किञ्चिन्न्यूनद्विगुणाः, प्रथमस्पर्धकप्रथमवर्गणातो द्वितीयस्पर्धकप्रथम-वर्गणासत्कसकलपरमाणूनां विशेषहीनत्वात्। एवमुत्तरोत्तरस्पर्धकप्रथमवर्गणायां परमाणूनां हीयमानत्वात् प्रथमस्पर्धकप्रथमवर्गणागतसर्वरसाऽविभागतस्तृतीयस्पर्धकप्रथमवर्गणायां सकल-रसाऽविभागाः किञ्चिन्न्यूनत्रिगुणा भवन्ति, चतुर्थस्पर्धकप्रथमवर्गणायां च सर्वरसाऽविभागाः किञ्चिन्न्यूनचतुर्गुणा भवन्ति।

ननु तेषां न्यूनत्वं कियद्भवति? इति चेत्, उच्यते—प्रथमस्पर्धकप्रथमवर्गणातस्तद्द्वितीयवर्ग-णायां परमाणवो विशेषहीना भवन्ति, एकचयेन हीना भवन्तीत्यर्थः। ततोऽप्येकेन चयेन हीना-स्तृतीयवर्गणायां परमाणवो भवन्ति, ततश्चतुर्थवर्गणायामेकचयेन हीना भवन्ति, ततोऽप्येकचयेन हीनाः पञ्चमवर्गणायां भवन्ति। एवमेकचयहीनक्रमेण तावद् वाच्याः, यावच्चरमस्पर्धकस्य चरमवर्गणा। तस्मात् कारणात् प्रथमस्पर्धकस्य प्रथमवर्गणातो द्वितीयवर्गणायामेकचयेन हीनाः परमाणवो भवन्ति, प्रथमवर्गणातस्तृतीयवर्गणायां चयद्वयेन हीना भवन्ति, चतुर्थवर्गणायां त्रिभिश्चयैर्हीना भवन्ति, पञ्चमवर्गणायां चतुर्भिश्चयैर्हीना भवन्ति, अनेन क्रमेण चरमवर्गणायामे-कोनैकस्पर्धकवर्गणाराशिमात्रैश्चयैर्हीना भवन्ति, द्वितीयस्पर्धकस्य प्रथमवर्गणायां तु प्रथमस्पर्धक-प्रथमवर्गणात एकस्पर्धकगतवर्गणाराशिमात्रचयैर्हीनाः परमाणवो भवन्ति, तृतीयस्पर्धकप्रथम-वर्गणागतपरमाणवः स्पर्धकद्वयगतवर्गणाराशिप्रमाणचयैर्हीना भवन्ति।

**इयमत्र व्याप्तिः**—प्रथमद्विगुणहानौ यतितमं विवक्षितस्पर्धकं भवति, एकोनतत्संख्या-गुणितैकस्पर्धकवर्गणाराशिमात्रचयगताः परमाणवः प्रथमद्विगुणहानौ विवक्षितस्पर्धकस्य प्रथमवर्गणायां प्रथमस्पर्धकप्रथमवर्गणातो हीना भवन्ति।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

न्यासः—

प्रथमद्विगुणहानौ प्रथमस्पर्धकादिवर्गणातो विवक्षितस्पर्धकादिवर्गणायां हीयमानचयाः

= यतितमं विवक्षितस्पर्धकम्, एकोनतत्संख्या × एकस्पर्धकवर्गणाः

∴ प्रथमद्विगुणहानौ प्रथमस्पर्धकादिवर्गणातो विवक्षितस्पर्धके हीयमानपरमाणवः

= हीयमानचयाः × एकचयगतपरमाणवः

तस्मात् कारणात् प्रथमस्पर्धकप्रथमवर्गणागतनिखिलरसाविभागतो द्वितीयस्पर्धकप्रथमवर्गणायां निखिलरसाविभागा एकस्पर्धकगतवर्गणाराशिमात्रचयगतपरमाणुभिर्द्विगुणान् प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाविभागान् गुणयित्वा गुणितैर्न्यूना द्विगुणा भवन्ति, तृतीयस्पर्धकप्रथमवर्गणागतनिखिलरसाविभागास्तु स्पर्धकद्वयगतवर्गणाराशिमात्रचयगतपरमाणुभिस्त्रिगुणान् प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाविभागान् गुणयित्वा गुणितैर्न्यूनास्त्रिगुणा भवन्ति ।

न्यासः—

सङ्केतसूचिः—

(१) प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाविभागाः = र

(२) प्रथमस्पर्धकप्रथमवर्गणागतपरमाणवः = प

(३) एकस्पर्धकगतवर्गणाः = व

द्वितीयस्पर्धकादिवर्गणागतसकलरसाविभागाः = २ (र × प) — { (व × चय ) × २ × र }

तृतीय ,, ,, ,, ,, = ३ (र × प) — { (२ × व × चय ) × ३ × र }

**इयमत्र व्याप्तिः**—प्रथमद्विगुणहानौ प्रथमस्पर्धकप्रथमवर्गणागतपरमाणुतो विवक्षितस्पर्धकप्रथमवर्गणायां यावन्तः परमाणवो हीयन्ते, तावद्गुणितैः, यावतिथं प्रथमद्विगुणहानिसत्कं विवक्षितं स्पर्धकं भवति तत्संख्यागुणैः प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाविभागैर्न्यूनाः, यतितमं विवक्षितस्पर्धकं भवति, तत्संख्यागुणाः प्रथमस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुस्थितसर्वरसाविभागा विवक्षितस्पर्धकप्रथमवर्गणासत्कसर्वपरमाणुस्थितसर्वरसाविभागा भवन्ति। एतदुक्तं भवति—प्रथमद्विगुणहानौ प्रथमस्पर्धकप्रथमवर्गणागतपरमाणूनपेक्ष्येष्टस्पर्धकप्रथमवर्गणायां यावन्तः परमाणवो हीयन्ते, तावतः परमाणूनिष्टस्पर्धकेन गुणयित्वा गुणितं पुनः प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाविभागैस्ताडयित्वा प्राप्यमाणैर्न्यूना इष्टस्पर्धकेन गुणिताः प्रथमस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुप्रतिबद्धनिखिलरसाविभागा इष्टस्पर्धकप्रथमवर्गणासत्कनिखिलपरमाणुस्थितसर्वरसाविभागा भवन्ति ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

न्यासः—

सङ्केतसूचिः—

| | | असत्कल्पनया-ऽङ्कतः |
|---|---|---|
| (१) विवक्षितस्पर्धकम् ( इष्टस्पर्धकम् ) | = अ | ३ |
| (२) प्रथमस्पर्धकादिवर्गणातो हीयमानपरमाणवः | = ब | ६४ |
| (३) प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाविभागाः | = स | १,००,००० |
| (४) ,, ,, सत्कसर्व ,, ,, सर्वरसाविभागाः | = ड | २,५६,००,००० |

प्रथमस्पर्धकादिवर्गणा-ऽपेक्षया विवक्षितस्पर्धकप्रथमवर्गणायां रसाविभागाः

= अ × ड — { ब (अ × स)

अङ्कतः = ३ × २,५६,००,००० — { ६४ (३ × १,००,०००) }

= ७,६८,००,००० — { ६४ × ३,००,००० }

= ७,६८,००,००० — १,९२,००,०००

= ५,७६,००,०००

अत्र प्रथमस्पर्धकप्रथमवर्गणायां यावन्तः परमाणवो भवन्ति, तावन्त एव यदि द्वितीयस्पर्धकस्य प्रथमवर्गणायां भवेयुः, तर्हि द्वितीयस्पर्धकस्य प्रथमवर्गणायां सकलपरमाणुगतसकलरसाऽविभागा द्विगुणाः स्युः, द्वितीयस्पर्धकस्य प्रथमवर्गणायामेकैकपरमाणौ रसाऽविभागानां प्रथमस्पर्धकप्रथम-वर्गणासत्कैकैकपरमाणुगतरसाविभागतो द्विगुणत्वदर्शनात्। परन्तु प्रथमस्पर्धकप्रथमवर्गणागतपरमाणुतो द्वितीयस्पर्धकस्य प्रथमवर्गणायामेकस्पर्धकगतवर्गणाराशिमात्रचयैः परमाणवो हीना भवन्ति। न यावन्तः परमाणवो हीयन्ते, तावद्गुणितैर्द्विगुणैः प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाऽ-विभागैर्न्यूनाः प्रथमस्पर्धकप्रथमवर्गणागतसकलरसाऽविभागतो द्विगुणा द्वितीयस्पर्धकप्रथमवर्गणातः सकलरसाऽविभागा भवन्ति। एवं प्रथमस्पर्धकप्रथमवर्गणागतपरमाणुतस्तृतीयस्पर्धकप्रथमवर्गणायां यावन्तः परमाणवो हीयन्ते, तावद्गुणितैस्त्रिगुणैः प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसा-ऽवि-भागैर्न्यूनाः प्रथमस्पर्धकप्रथमवर्गणागतसकलरसा-ऽविभागतस्त्रिगुणास्तृतीयस्पर्धकप्रथमवर्गणागत-सकलरसाऽविभागा भवन्ति। एवमग्रे-ऽपि वाच्यम्।

ननु प्रथमद्विगुणहान्यां विवक्षितस्पर्धकस्य प्रथमवर्गणायां प्रथमस्पर्धकप्रथमवर्गणातः कया व्याप्त्या परमाणवो हीयन्ते ? इति चेत्, उच्यते—प्रथमद्विगुणहानौ यतितमं विवक्षितस्पर्धकं भवति, एकोनतत्संख्यागुणितैकस्पर्धकवर्गणाराशिमात्रचयगताः परमाणवः प्रथमद्विगुणहानौ विवक्षितस्पर्धकस्य प्रथमवर्गणायां प्रथमस्पर्धकप्रथमवर्गणाणातो हीना भवन्ति। (एषा व्याप्ति ११५ तमपृष्ठे प्रोक्ता।)

न्यासः—

प्रथमद्विगुणहानौ प्रथमस्पर्धकादिवर्गणातो विवक्षितस्पर्धके हीयमानचयाः

= यतितमं स्पर्धकम्, एकोनतत्संख्या × एकस्पर्धकवर्गणाः × चयः

∴ प्रथमद्विगुणहानौ प्रथमस्पर्धकादिवर्गणातो विवक्षितस्पर्धके हीयमानपरमाणवः

= हीयमानचयाः × एकचयगतपरमाणवः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनन्तरोक्तवक्तव्यता वर्गणासु रसाविभागादीन् परिकल्प्य स्फुटीक्रियते।** तथाहि—प्रथमद्विगुणहानौ पूर्वपूर्वस्पर्धकचरमवर्गणात उत्तरोत्तरस्पर्धकप्रथमवर्गणायां सप्तनवत्युत्तरनवशताधिकनवनवतिसहस्रैः (९९,९९७) रसाविभागैरधिका रसाविभागाः कल्प्यन्ते, ते चेहाऽन्तरत्वेन व्यपदेष्टव्याः। चयोऽष्टपरमाणुमात्रः कल्पयितव्यः, एकस्मिन् स्पर्धके वर्गणाश्चतस्रः परिकल्प्यन्ते। अथ प्रथमस्पर्धकस्य प्रथमवर्गणायां परमाणवः षट्पञ्चाशदधिकद्विशती (२५६) कल्प्यन्ते, तत्र चैकैकपरमाणौ रसाविभागा एकलक्षं (१,००,०००) परिकल्प्यन्ते। द्वितीयवर्गणायां परमाणवोऽष्टचत्वारिंशदधिके द्वे शते (२४८) अभिधातव्याः, चयस्याऽष्टपरमाणुमात्रत्वपरिकल्पनात् एकैकपरमाणौ चैकाधिकलक्षं(१,००,००१)रसाविभागा वाच्याः,उत्तरोत्तरवर्गणायामेकैकरसाविभागस्य वृद्धेः प्रतिपादितत्वात्। एवं तृतीयवर्गणायां परमाणवः द्वे शते चत्वारिंशच्च (२४०) एकैकपरमाणौ च रसाविभागा द्व्युत्तरलक्षम् (१०००००२), चतुर्थवर्गणायां परमाणवो द्वात्रिंशदधिके द्वे शते (२३२) एकैकपरमाणौ च रसाविभागास्त्र्युत्तरलक्षम् (१,००,००३)।

तथा द्वितीयस्पर्धकस्य प्रथमवर्गणायां परमाणवश्चतुर्विंशत्युत्तरे द्वे शते (२२४), एकैकस्मिंश्च परमाणौ रसाविभागा द्वे लक्षे (२,००,०००), सप्तनवत्युत्तरनवशताधिकनवनवतिसहस्राणां (९९९९७) रसाविभागानामन्तरत्वेन परिकल्पनात्। द्वितीयस्पर्धकस्य द्वितीयवर्गणायां परमाणवः षोडशाधिकद्विशती (२१६) प्रत्येकस्मिंश्च परमाणौ रसाऽविभागा एकाधिके द्वे लक्षे (२००००१), तृतीयवर्गणायां चाष्टाधिकद्विशती (२०८) परमाणवो रसाविभागाश्च एकैकपरमाणौ द्व्यधिके द्वे लक्षे (२००००२)। चतुर्थवर्गणायां च परमाणवो द्विशती (२००), एकैकपरमाणौ च रसाविभागास्त्र्युत्तरे द्वे लक्षे (२००००३)। तृतीयस्पर्धकप्रथमवर्गणायां परमाणवो द्विनवतं शतं (१९२) एकैकस्मिंश्च परमाणौ रसाविभागास्त्रीणि लक्षाणि (३,००,०००),द्वितीयवर्गणायां परमाणवश्चतुरशीत्यधिकशतं (१८४), रसाविभागाश्चैकाधिकानि त्रीणि लक्षाणि (३००००१) तृतीयचतुर्थवर्गणयोरेकैकचयेन हीनाः परमाणव एकोत्तरवृद्ध्या च रसाविभागा वक्तव्याः।

**सम्प्रति प्रथमस्पर्धकप्रथमवर्गणातो द्वितीयादिस्पर्धकप्रथमवर्गणायां रसाविभागा भाव्यन्ते**—प्रथमस्पर्धकप्रथमवर्गणातो द्वितीयस्पर्धकप्रथमवर्गणायामेकस्पर्धकगतवर्गणामात्राश्चत्वारश्चया हीयन्ते, एकचयश्चाऽष्टपरमाणुमात्रः, तेन द्वात्रिंशत् परमाणवो हीयन्ते, तथा प्रथमस्पर्धकप्रथमवर्गणातस्तृतीयस्पर्धकप्रथमवर्गणायां स्पर्धकद्वयगतवर्गणामात्रा अष्टौ चया हीयन्ते, परमाणवस्तु चतुःषष्टिर्हीयन्ते, प्रथमद्विगुणहानौ यतितमं विवक्षितं स्पर्धकं भवति, एकोनतत्संख्यागुणितैकस्पर्धकवर्गणाराशिमात्रचयगताः परमाणवः प्रथमद्विगुणहानौ विवक्षितस्पर्धकस्य प्रथमवर्गणायां प्रथमस्पर्धकप्रथमवर्गणातो हीना भवन्तीति व्याप्तेरुक्तत्वेनेहैकस्पर्धके चतसृणां वर्गणानां कल्पितत्वात् एकचयस्य चाऽष्टपरमाणुमात्रत्वपरिकल्पनात्।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

न्यासः—द्वितीयस्पर्धकादिवर्गणायां हीयमानाश्रयाः =(२—१)×४
=१×४
=४

द्वितीयस्पर्धकादिवर्गणायां हीयमानाः परमाणवः =४×८
=३२

तृतीयस्पर्धकादिवर्गणायां हीयमानाश्रयाः =(३—१)×४
=२×४
=८

तृतीयस्पर्धकादिवर्गणायां हीयमानाः परमाणवः =८×८
=६४

एवं शेषस्पर्धकप्रथमवर्गणायां हीयमानपरमाणवो भावनीयाः।

अथ प्रथमस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुस्थितसर्वरसाविभागाः परमाणुसंख्यया षट्पञ्चाशदुत्तरद्विशतरूपया गुणिता एकपरमाणुस्थितैकलक्षरसाविभागाः षट्पञ्चाशल्लक्षोत्तरद्विकोटिमिताः (२५६×१,००,०००=२,५६,०००००) भवन्ति। द्वात्रिंशत्परमाणुगुणितैर्द्विगुणैः प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतैकलक्षरसाविभागैर्न्यूना द्विगुणाः प्रथमस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुस्थितषट्पञ्चाशल्लक्षोत्तरद्विकोटिरसाविभागा द्वितीयस्पर्धकस्य प्रथमवर्गणायां भवन्ति, तथा चतुःषष्टिपरमाणुगुणितैस्त्रिगुणैः प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुस्थितैकलक्षरसाविभागैर्न्यूनास्त्रिगुणाः प्रथमस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुगतषट्पञ्चाशल्लक्षद्विकोटिरसाविभागास्तृतीयस्पर्धकप्रथमवर्गणायांभवन्ति, प्रथमद्विगुणहानौ प्रथमस्पर्धकप्रथमवर्गणागतपरमाणुतो विवक्षितस्पर्धकप्रथमवर्गणायां यावन्तः परमाणवो हीयन्ते, तावद्गुणितैः, यावतिथं प्रथमद्विगुणहानिसत्कं विवक्षितं स्पर्धकं भवति, तत्संख्यागुणैः प्रथमस्पर्धकप्रथमवर्गणासत्कैकपरमाणुगतरसाविभागैर्न्यूनाः, यतितमं विवक्षितस्पर्धकं भवति तत्संख्यागुणाः प्रथमस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुगतसकलरसाविभागा विवक्षितस्पर्धकप्रथमवर्गणासत्कसर्वपरमाणुस्थितसकलरसाविभागा भवन्तीति व्याप्तेरुक्तत्वात्।

न्यास :—

द्वितीयस्पर्धकप्रथमवर्गणायां सकलरसाविभागा =२×२५६०००००—{३२×(२×१०००००)}
=५१२०००००—{३२×२०००००}
=५१२०००००—६४०००००
=४४८०००००

तृतीय ,, ,, ,, =३×२५६०००००—{६४×(३×१०००००)}
=७६८०००००—{६४×३०००००}
=७६८०००००—१९२०००००
=५७६०००००

तदेवं द्वितीयस्पर्धकप्रथमवर्गणायां सर्वपरमाणुस्थितसकलरसाविभागा अष्टचत्वारिंशल्लक्षोत्तर-चतुष्कोटिमिताः, तृतीयस्पर्धकादिवर्गणायां पुनः षट्सप्ततिलक्षाधिकपञ्चकोटिप्रमाणा लभ्यन्ते । न चैतदसिद्धम्,त्रैराशिकविधिना-ऽपि यथोक्तमानोपलब्धेः,तथाहि-द्वितीयस्पर्धकादिवर्गणासत्कैकपरमाणौ द्वे लक्षे (२००००००) रसाविभागाः परिकल्पिताः, परमाणवः पुनश्चतुर्विंशत्युत्तरे द्वे शते (२२४)। यदि एकपरमाणौ द्वे लक्षे रसाविभागा भवन्ति, तर्हि चतुर्विंशत्यधिकद्विशतप्रमाणेषु परमाणुषु कियन्तो भवेयुरिति त्रैराशिकेनाऽष्टाचत्वारिंल्लक्षाधिकचतुष्कोटिमिता रसाविभागा लभ्यन्ते । एवं तृतीय-स्पर्धकप्रथमवर्गणासत्कसकलपरमाणुस्थितनिखिलरसाविभागास्त्रैराशिकविधिना भणितव्याः । त्रैराशिककरणसूत्रं च सप्तविंशतितमगाथायाष्टीकायां निरूपितम् ।

| न्यासः—प्रमाणम् | प्रमाणफलम् | इच्छा | इच्छाफलम् |
|---|---|---|---|
| १ | २०००००० | २२४ | ४४८००००० लब्धा द्वितीयस्पर्धकाद्यवर्गणायाम् |
| १ | ३०००००० | १९२ | ५७६०००००० लब्धास्तृतीयस्पर्धकाद्यवर्गणायाम् |

एवं पूर्वोक्तव्याप्त्या चतुर्थादिस्पर्धकप्रथमवर्गणायां सकलपरमाणुस्थितसर्वरसाविभागाः प्रथम-स्पर्धकप्रथमवर्गणासत्कसकलपरमाणुस्थितसर्वरसाविभागतः किञ्चिन्न्यूनाश्चतुरादिगुणाः साध्याः ।

तथा (१) यतिसंख्यं स्पर्धकमुद्दिष्टं भवति, एकोनतत्संख्याविभक्ततत्संख्यागुणा रसाविभागा उद्दिष्टस्पर्धकस्य प्रथमवर्गणायां तत्प्राक्तनस्पर्धकप्रथमवर्गणातो भवन्ति, (२) प्रथमस्पर्धकतः प्रभृति प्रथमद्विगुणहानौ विवक्षितस्पर्धकापेक्षप्राक्तनस्पर्धकं यतितमं भवति, तत्स्पर्धकप्रथमवर्गणागत-रसाविभागानां ततिभागेना-ऽधिका रसाविभागा विवक्षितस्पर्धकस्य प्रथमवर्गणायां पूर्ववर्तिस्पर्ध-कापेक्षया भवन्ति, इति यद्व्याप्तिद्वयं प्रागुक्तम् , तत्राऽपि विवक्षितस्पर्धकप्रथमवर्गणासत्कसकल-परमाणुस्थितसर्वरसाविभागाः किञ्चिन्न्यूनाः सूक्ष्मगणितानुसारेण वाच्याः, न्यूनप्रमाणं चा-ऽन-न्तरोक्तविधिनैव साध्यम् ।

**प्रथमव्याप्तिमाश्रित्य स्थापना—**

विवक्षितस्पर्धकादिवर्गणागतसकलरसाविभागास्तत्प्राक्तनस्पर्धकादिवर्गणागतसकलरसाविभागतः

$$= \frac{\text{यतितमं स्पर्धकं, तत्संख्या}}{\text{रूपोनतत्संख्या}} \text{ गुणाः—} \left\{ \text{ब} \times (\text{अ} \times \text{स}) \right\}$$

**द्वितीयव्याप्तिमाश्रित्य स्थापना—**

विवक्षितस्पर्धकप्रथमवर्गणायां सकलरसाविभागास्तत्प्राक्तनस्पर्धकादिवर्गणागतसकलरसाविभागतः

$$= \frac{\text{पूर्वस्पर्धकप्रथमवर्गणागतैकपरमाणुस्थितरसाविभागाः}}{\text{यतितमं पूर्वस्पर्धकं तत्संख्या}} \text{ इत्येतैरधिकाः—} \left\{ \text{ब} \times (\text{अ} \times \text{स}) \right\}$$

# समाप्तो गणितविभागः ।

**सम्प्रति घातिप्रकृतीराश्रित्या-ऽनुभागस्पर्धकेषु देशघात्यादिरसप्ररूपणा—**

जघन्यरसस्पर्धकादारभ्याऽनन्तरसस्पर्धकान्येकस्थानकाऽनुभागविशिष्टानि भवन्ति । तेषामुपर्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्तरसस्पर्धकानि द्विस्थानका-ऽनुभागकानि भवन्ति । पुनस्तेषामुपर्यनन्तानि रसस्पर्धकानि त्रिस्थानकाऽनुभागकानि विद्यन्ते, भूयस्तेषामुपर्यु त्कृष्टरसस्पर्धकपर्यन्तान्यनन्तानि रसस्पर्धकानि चतुःस्थानकाऽ-नुभागकानि तिष्ठन्ति ।

जघन्यरसस्पर्धकात् प्रभृति सर्वाण्येकस्थानका-ऽनुभागकानि द्विस्थानका-ऽनुभागकानां च रसस्पर्धकानामाद्याऽनन्ततमभागकल्पानि रसस्पर्धकानि देशघातीनि वक्तव्यानि। तेषां सर्वोत्कृष्टं रसस्पर्धकमुत्कृष्टं देशघातिरसस्पर्धकमुच्यते ।

ततो द्विस्थानका-ऽनुभागकानां रसस्पर्धकानामनन्ततमभागस्योपरि प्रथमं जघन्यसर्वघाति-रसस्पर्धकं वक्तव्यम् । ततः परं शेषद्विस्थानका-ऽनुभागकानि स्पर्धकानि त्रिचतुःस्थाना-ऽनुभाग-विशिष्टानि च सर्वाणि रसस्पर्धकानि सर्वघातीनि भणितव्यानि । तेषां सर्वोत्कृष्टं रसस्पर्धक-मुत्कृष्टसर्वघातिस्पर्धकमुच्यते ।

न्यास :—

| एकस्थानकानुभागकानि | द्विस्थानानुभागकानि | त्रिस्थानानुभागकानि | चतुःस्थानानुभागकानि |
|---|---|---|---|
| [1]0000000000000 | । 000[2] । 0[3]00000 । | 00000000 । | 0000000[4] । |

१=सर्वजघन्यदेशघातिस्पर्धकम् ।　　　　३=सर्वजघन्यं सर्वघातिस्पर्धकम् ।
२=सर्वोत्कृष्टदेशघातिस्पर्धकम् ।　　　　४=सर्वोत्कृष्टं सर्वघातिस्पर्धकम् ।

घातिप्रकृतयो द्विविधा भवन्ति, देशघातिसर्वघातिभेदात् । सत्कर्मणि सम्यक्त्वमोहनीय-वर्जदेशघातिप्रकृतीनां रसस्पर्धकानि देशघातीनि सर्वघातीनि च भवन्ति, सम्यक्त्वमोहनीयस्य तु देश-घातीन्येव, सर्वघातिप्रकृतीनां पुना रसस्पर्धकानि सर्वघातीन्येव भवन्ति ।

**अथ देशघातिप्रकृतीनां रसस्पर्धकानि विविच्यन्ते**—केवलज्ञानावरणं वर्जयित्वा शेषज्ञानावरणचतुष्कं चक्षुरचक्षुरवधिदर्शनावरणलक्षणं दर्शनावरणत्रिकं संज्वलनचतुष्कं नवनोकषायाः सम्यक्त्वमोहनीयं पञ्चाऽन्तराया इति षड्विंशतिदेशघातिप्रकृतीनां जघन्यरसस्पर्धकस्य प्रथमवर्ग-णायां प्रत्येकस्मिन् परमाणौ रसाऽविभागा मिथस्तुल्या भवन्ति। इदमुक्तं भवति-अक्षपकजीव-माश्रित्य मतिज्ञानावरणस्य जघन्यस्पर्धकसत्कप्रथमवर्गणागतैकैकपरमाणौ यावन्तो रसाऽविभागा भवन्ति, तावन्त एव रसाऽविभागाश्चक्षुर्दर्शनावरणस्य जघन्यस्पर्धकसत्कप्रथमवर्गणागतैकैकपरमाणौ विद्यन्ते । एवं सर्वासां देशघातिप्रकृतीनां परस्परं वक्तव्याः । उक्तं च **कषायप्राभृतचूर्णौ**— **"सव्वस्स अक्खवगस्स सव्वकम्माणं देसघादिफद्दयाणमादिवग्गणा तुल्ला।"** इति । एवं-विधाद् देशघातिप्रकृतीनां जघन्यरसस्पर्धकात् प्रभृत्युत्कृष्टदेशघातिरसस्पर्धकं यावद् रसस्पर्धकानि देशघातीनि वक्तव्यानि । तेषामुपरि सम्यक्त्वमोहनीयवर्जशेषपञ्चविंशतिदेशघातिप्रकृतीनां सर्वाणि रसस्पर्धकानि सर्वघातीन्यवतिष्ठन्ते । सम्यक्त्वमोहनीयस्य तु सर्वोत्कृष्टदेशघातिरसस्पर्धकात् परं रसस्पर्धकं न विद्यते, तस्य सर्वघातिरसस्पर्धका-ऽभावात् ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**अथ सर्वघातिप्रकृतीनां रसस्पर्धकानि विविच्यन्ते**—सत्कर्मा-ऽपेक्षया केवलज्ञानावरणं केवलदर्शनावरणं निद्रापञ्चकं संज्वलनवर्जद्वादशकषाया मिश्रमोहनीयं मिथ्यात्वमोहनीयं चेत्येकविंशतिप्रकृतीनां देशघातीनि रसस्पर्धकानि सत्कर्मणि न विद्यन्ते, अपि तु सर्वघातीन्येव । तत्र मिथ्यात्ववर्जशेषविंशतिप्रकृतीनां जघन्यसर्वघातिरसस्पर्धकस्य प्रथमवर्गणासत्कैकैकपरमाणौ रसाऽविभागाः परस्परं तुल्या भवन्ति । इदमुक्तं भवति-केवलज्ञानावरणस्य जघन्यरसस्पर्धकसत्कप्रथमवर्गणागतैकैकपरमाणौ यावन्तो रसविभागा भवन्ति, तावन्त एव रसाऽविभागाः केवलदर्शनावरणस्य जघन्यरसस्पर्धकसत्कप्रथमवर्गणागतैकैकपरमाणौ विद्यन्ते, एवं विंशतिप्रकृतीनामन्यो-ऽन्यं द्रष्टव्याः । उक्तं च कषायप्राभृतचूर्णौ-**"सव्वघादीणं पि मोत्तूण मिच्छत्तं, सेसाणं कम्माणं सव्वघादीणमादिवग्गणा तुल्ला ।"** इति ।

मिथ्यात्वमोहनीयस्य तु जघन्यरसस्पर्धकप्रथमवर्गणागतैकैकपरमाणुस्थितरसाऽविभागास्तदितरसर्वघातिप्रकृतेर्जघन्यस्पर्धकप्रथमवर्गणागतैकैकपरमाणौ विद्यमानै रसाविभागैः सदृशा न भवन्ति। किं कारणम् ? इति चेत्, उच्यते-सम्यक्त्वमोहनीयस्य सर्वोत्कृष्टदेशघातिरसस्पर्धकानन्तरं सम्यङ्मिथ्यात्वस्य जघन्यरसस्पर्धकं प्राप्यते, तत्प्रथमवर्गणायां मिथ्यात्ववर्जशेषसर्वघातिप्रकृतीनां जघन्यस्पर्धकसत्कप्रथमवर्गणागतरसाविभागैः सदृशा रसाऽविभागास्तिष्ठन्ति । सम्यङ्मिथ्यात्वस्य जघन्यरसस्पर्धकादारभ्य द्विस्थानकाऽनुभागविशिष्टानां स्पर्धकानामनन्ततमे भागे गते एव मिथ्यात्वस्य जघन्यं रसस्पर्धकं प्राप्यते,तेन मिथ्यात्वस्य जघन्यरसस्पर्धकगतप्रथमवर्गणायां रसा-ऽविभागा इतरसर्वघातिप्रकृतिसत्कजघन्यरसस्पर्धकप्रथमवर्गणागतरसाऽविभागैस्तुल्या न भवन्ति ।

इदं त्ववधेयम्-मिश्रवर्जशेषसर्वघातिप्रकृतीनां सर्वघातिस्पर्धकानि तावद्वक्तव्यानि, यावत्सर्वोत्कृष्टं चतुःस्थानकाऽनुभागविशिष्टं रसस्पर्धकं प्राप्यते, मिश्रस्य तु सर्वोत्कृष्टं सर्वघातिस्पर्धकं मध्यमद्विस्थानकाऽनुभागकं भवति, अग्रे मिश्रस्याऽभावात् । तथा सम्यक्त्वमोहनीयवर्जानां सर्वासां देशघातिप्रकृतीनामुत्कृष्टरसस्पर्धकं चतुःस्थानकं भवति, तच्च सर्वघाति । सम्यक्त्वमोहनीयस्य तूत्कृष्टस्पर्धकं द्विस्थानकरसोपेतं भवति, तथा देशघाति भवति ।

**सप्तचत्वारिंशतो घातिकर्मणामुत्कृष्टस्पर्धकचरमवर्गणागतरसाऽविभागा मिथस्तुल्या न भवन्ति,** तथाहि—(१) सम्यक्त्वमोहनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाऽविभागा स्तोका भवन्ति, देशघातित्वात् । (२) ततः सम्यङ्मिथ्यात्वमोहनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाऽविभागा अनन्तगुणा भवन्ति, सर्वघातित्वात् । (३) ततो हास्यमोहनीयस्योत्कृष्टस्पर्धकस्य चरमवर्गणायां रसाऽविभागा अनन्तगुणा भवन्ति, सर्वघातित्वे सति चतुःस्थानकानुभागवत्त्वात् । (४) ततो रतिमोहनीयस्योत्कृष्टस्पर्धकस्य चरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (५) ततः पुरुषवेदस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति । (६) ततः स्त्रीवेदस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (७) ततः प्रचलाया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (८) ततो निद्राया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (९) ततः प्रचलाप्रचलाया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१०) ततो निद्रानिद्राया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति (११) ततो जुगुप्सामोहनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१२) ततो भयमोहनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१३) ततः शोकमोहनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१४) ततोऽरतिमोहनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१५) ततो नपुंसकवेदस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१६-१७-१८) ततो मनःपर्यवज्ञानावरण-स्त्यानर्द्धि-दानान्तरायाणामुत्कृष्टस्पर्धकचरमवर्गणायां रसाऽविभागा अनन्तगुणा भवन्ति, स्वस्थाने तु मिथस्तुल्याः । (१९-२०-२१) ततोऽवधिज्ञानावरणा-ऽवधिदर्शनावरण-लाभान्तरायाणामुत्कृष्टस्पर्धकचरमवर्गणायां रसाऽविभागा अनन्तगुणा भवन्ति, स्वस्थाने तु मिथः समानाः । (२२-२३-२४) ततो भोगान्तराया-ऽचक्षुर्दर्शनावरण-श्रुतज्ञानावरणानामुत्कृष्टस्पर्धकचरमवर्गणायां रसाऽविभागा अनन्तगुणा भवन्ति, स्वस्थाने तु परस्परं तुल्याः । (२५) ततश्चक्षुर्दर्शनावरणस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (२६-२७) ततो मतिज्ञानावरण-परिभोगान्तराययोरुत्कृष्टस्पर्धकचरमवर्गणायां रसाऽविभागा अनन्तगुणा भवन्ति, स्वस्थाने तु मिथः समानाः । (२८) ततोऽप्रत्याख्यानावरणमानस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाऽविभागा अनन्तगुणा भवन्ति । (२९) ततोऽप्रत्याख्यानावरणक्रोधस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३०) ततोऽप्रत्याख्यानावरणमायाया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३१) ततोऽप्रत्याख्यानावरणलोभस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३२) ततः प्रत्याख्यानावरणमानस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (३३) ततः प्रत्याख्यानावरणक्रोधस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३४) ततः प्रत्याख्यानावरणमायाया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३५) ततः प्रत्याख्यानावरणलोभस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३६) ततः संज्वलनमानस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (३७) ततः संज्वलनक्रोधस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३८) ततः संज्वलनमायाया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (३९) ततः संज्वलनलोभस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (४०) ततोऽनन्तानुबन्धिमानस्योत्कृष्टस्पर्धक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (४१) ततोऽनन्तानुबन्धिक्रोधस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (४२) ततोऽनन्तानुबन्धिमायाया उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (४३) ततोऽनन्तानुबन्धिलोभस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा विशेषाधिका भवन्ति । (४४-४५-४६) ततः केवलज्ञानावरणकेवलदर्शनावरणवीर्यान्तरायाणामुत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति, स्वस्थाने तु परस्परं तुल्याः । (४७) ततो मिथ्यात्वमोहनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति ।

अनन्तरोक्तसप्तचत्वारिंशत्प्रकृतितो-ऽनिवृत्तिकरणस्थक्षपकस्य सत्कर्मणि संज्वलनचतुष्कं विना द्वादशकषाया दर्शनत्रिकं च न विद्यन्ते, प्रागेव क्षपितत्वात् । तेन तेषां रसस्पर्धकमपि सत्कर्मणि न भवति । शेषाणां द्वात्रिंशत्प्रकृतीनां क्षपकस्य सत्कर्मण्यनुत्कृष्टस्पर्धकमेव विद्यते, घातिकर्मणामुत्कृष्टानुभागस्य मिथ्यात्वगुणस्थानके एवोपलम्भात् ।

**सम्प्रत्यघातिकर्मणां रसस्पर्धकानि प्ररूप्यन्ते**—अघातिप्रकृतीनां जघन्यरसस्पर्धकात् प्रभृति चतुःस्थानकानुभागविशिष्टोत्कृष्टरसस्पर्धकपर्यवसानानि रसस्पर्धकानि वाच्यानि । तत्र जघन्यरसस्पर्धकस्य प्रथमवर्गणायां रसाविभागाः परस्परं समाना अवतिष्ठन्ते, उत्कृष्टस्पर्धकचरमवर्गणायां तु विषमाः । तद्यथा—(१) तिर्यगायुष उत्कृष्टस्पर्धकस्य चरमवर्गणायां रसाविभागाः स्तोका भवन्ति । (२) ततो मनुष्यायुष्कस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (३) ततो नरकायुष उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (४) ततो देवायुष उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (५) ततस्तिर्यग्गतेरुत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति (६) ततो नरकगतेरुत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (७-८) ततो-ऽयशःकीर्त्तिनीचैर्गोत्रयोरुत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति, स्वस्थाने मिथस्तुल्याः । (९) ततो-ऽसातवेदनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१०) तत औदारिकशरीरनामकर्मण उत्कृष्टस्पर्धकस्य चरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (११) ततो मनुष्यगतेरुत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१२) ततो वैक्रियशरीरनामकर्मण उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१३) तत आहारकशरीरनामकर्मण उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१४) ततस्तैजसशरीरनामकर्मण उत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१५) ततः कार्मणशरीरनामकर्मण उत्कृष्टचरमस्पर्धकवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१६) ततो देवगतेरुत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१७-१८) ततो यशःकीर्त्युच्चैर्गोत्रयोरुत्कृष्टस्पर्धकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । (१९) ततः सातवेदनीयस्योत्कृष्टस्पर्धकचरमवर्गणायां रसाविभागा अनन्तगुणा भवन्ति । तत्र वैक्रियशरीरादीनां पञ्चप्रकृतीनामुत्कृष्टानुभागः क्षपकेणाऽपूर्वकरणगुणस्थानके सञ्चितः । सातवेदनीय-यशःकीर्त्युच्चैर्गोत्राणामुत्कृष्टानुभागं सूक्ष्मसम्परायचरमसमये क्षपकः संचेष्यति । शेषाणामुत्कृष्टानुभागं यथागमं संसारा-ऽवस्थायां संचिनोति जीवः । क्षपकस्य सत्कर्मणि दैवनारकतैर्यगायुष्काणां तु सर्वथा-ऽभावः प्राग् दर्शित एव ।

तदेवं प्रसङ्गतो घात्यघातिकर्मणां रसस्पर्धकानि विवर्णितानि । सम्प्रति प्रकृतमनुसरामः— एवंविधेषु पूर्वस्पर्धकेषु संज्वलनचतुष्कस्य यानि पूर्वस्पर्धकानि, तेभ्योऽसंख्येयभागमितं प्रदेशाग्रं गृहीत्वा स्वस्वजघन्यपूर्वस्पर्धकगतप्रथमवर्गणातो-ऽनन्तगुणहीनानुभागकान्यनन्तान्यपूर्वस्पर्धकान्यश्वकर्णकरणाद्धाप्रथमसमये निर्वर्तयति । उक्तं च **कषायप्राभृतचूर्णौ**—"**तदो चदुण्हं संजलणाणमपुव्वफद्दयाइं णाम करेदि । ताणि कधं करेदि ? लोभस्स ताव लोहसंजलणस्स पुव्वफद्दएहिंतो पदेसग्गस्स असंखेज्जदिभागं घेत्तूण पढमस्स देसघादिफद्दयस्स हेट्ठा अणंतभागे अण्णाणि अपुव्वफद्दयाणि णिव्वत्तयदि** । × × × × × × × × × × × **जहा लोभस्स अपुव्वफद्दयाणि परूविदाणि पढमसमए, तहा मायाए माणस्स कोधस्स परूवेयव्वाणि** ।" एवं शतकचूर्णावपि—

**सो पुव्वफड्डगाणं हेट्ठा अण्णाणि फड्डगाइं तु ।**
**पकरेइ अपुव्वाइं अणंतगुणहीयमाणाइं ॥ १ ॥**

न चाऽत्राऽश्वकर्णकरणाद्धायां पुरुषवेदस्य समयोनाऽवलिकाद्वयबद्धनूतनाऽनुभागसंभवात् पुरुषवेदस्या-ऽपूर्वस्पर्धकानि कुतो न निर्वर्तयति ? इति वाच्यम्, **कषायप्राभृतचूर्णिकारैः सप्ततिकाचूर्णिकृद्भिश्च** संज्वलनचतुष्कस्यैवा-ऽपूर्वस्पर्धकानामुपदिष्टत्वात् । तथा-चाऽत्र **कषायप्राभृतचूर्णिः**—"**तदो चदुण्हं संजलणाणमपुव्वफद्दयाइं णाम करेदि** ।" इति । तथैव **सप्ततिकाचूर्णिः**—"**तत्थ अस्सकण्णकरणाद्धाए वट्टमाणो अणंताइं समए समए अपुव्वफड्डगाइं चउण्हं संजलणाणं करोति** ।" इति । पुरुषवेदस्य त्वपूर्वस्पर्धकनिर्वृत्तिं विना समयोनाऽवलिकाद्वयेन बद्धनूतनाऽनुभागं बन्धावलिकाऽपगमेऽश्वकर्णकरणाद्धायां तावता कालेन संज्वलनक्रोधे संक्रमयति ॥६३॥

नन्वश्वकर्णकरणाद्धाप्रथमसमये-ऽपूर्वस्पर्धकानि कति निर्वर्तयति ? इत्यत आह—

# ताणि अपुव्वाणिगदुगुणहाणिफड्डाणऽसंखइमभागो ।
# एत्थ पुण भागहारो ओकड्डणओ असंखगुणो ॥६४॥

तान्यपूर्वाण्येकद्विगुणहानिस्पर्धकानामसंख्यतमभागः ।
अत्र पुनर्भागहारोऽपकर्षणतो-ऽसंख्यगुणः ॥६४॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'ताणि'** इत्यादि, 'तानि' संज्वलनचतुष्कस्य पूर्वस्पर्धकानामनन्तगुणहीनरसतामापाद्य निर्वर्त्यमानानि 'अपूर्वाणि' अपूर्वस्पर्धकानि 'एकद्विगुणहानिस्पर्धकानाम्'एकस्यां द्विगुणहानौ यावन्ति स्पर्धकानि भवन्ति, तेषां 'असंख्यतमभागः' असंख्येयतमभागप्रमितानि भवन्ति, एतानि चाऽनन्तानि। उक्तं च कषायप्राभृतचूर्णौ-**"ताणि पगणणादो अणंताणि, पदेसगुणहाणिट्ठाणंतरफद्दयाणमसंखेज्जदिभागो, एत्तियमेत्ताणि ताणि अपुव्वफद्दयाणि ।"** इति। नन्वस्मिन् प्रस्तावे भागहारः कियन्मानः? इत्याह—**'एत्थ'** इत्यादि, 'अत्र' अस्मिन्नश्वकर्णकरणाद्धाप्रथमसमयाख्यप्रकरणे भागहारः पुनः 'अपकर्षणतः' उत्कर्षणाऽपकर्षणभागहारतोऽसंख्यगुणो ज्ञातव्य इति शेषः। एतदुक्तं भवति—प्रथमपूर्वस्पर्धकप्रथमवर्गणागतपरमाणुत उत्तरोत्तरवर्गणायामेकैकचयेन न्यूना भवन्तः परमाणवो यावत्यायामे गतेऽर्धा भवन्ति, तावान् आयामो द्विगुणहानिरुच्यते इति प्रागपि प्रतिपादितम्। तत्रैकद्विगुणहानौ यावन्ति स्पर्धकानि लभ्यन्ते, तावन्त्येकद्विगुणहानिस्पर्धकानीति व्यवह्रियन्ते। तानि च गणनातो-ऽभव्येभ्यो-ऽनन्तगुणानि सिद्धानन्तभागकल्पानि भवन्ति। तथा येन पल्योपमा-ऽसंख्येयभागेना-श्वकर्णकरणाद्धाप्रथमसमये सत्तागतदलिकानि विभज्योत्किरति जीवः, स भागहार इहोत्कर्षणा-ऽपकर्षणभागहारो व्यपदिश्यते। तत्रैकद्विगुणहानिस्पर्धकान्युत्कर्षणापकर्षणभागहारतो-ऽसंख्येयगुणेन भागहारेण विभज्यैकभागमात्राण्यपूर्वस्पर्धकानि निर्वर्त्यन्ते ॥ ६४ ॥

नन्वुत्कर्षणापकर्षणभागहारस्य पल्योपमा-ऽसंख्येयभागप्रमाणत्वेन ततो-ऽसंख्येयगुणो भागहारो-ऽसंख्येयपल्योपममितो-ऽपि स्यात्? इति परमाशङ्क्य प्राह—

## सो पुण असंखभागो पल्लपढमवग्गमूलस्स ।
## कमसो अपुव्वगाणाइवग्गणा-ऽत्थि य विसेस-ऽहिआ ॥६५॥ (उपगीतिः)

स पुनरसंखभागः पल्यप्रथमवर्गमूलस्य।
क्रमशो-ऽपूर्वाणामादिवर्गणा-ऽस्ति च विशेषाधिका ॥६५॥ इति पदसंस्कारः

**'सो'** इत्यादि, 'सः' अश्वकर्णकरणाद्धाप्रथमसमयभाव्युत्कर्षणा-ऽपकर्षणभागहारतो-ऽसंख्येयगुणो भागहारः पुनः 'असंख्यभागः' असंख्येयतमभागः कस्य? इत्याह—**'पल्ल०'** त्ति पल्योपमप्रथमवर्गमूलस्या-ऽसंख्येयतमभागकल्पो भवतीत्यर्थः।

न च निरुक्तभागहार उत्कर्षणापकर्षणभागहारतो-ऽसंख्येयगुणः पल्योपमप्रथमवर्गमूलस्य-चाऽसंख्येयभागकल्प इत्येतत् कथमवसीयते? इति वाच्यम्, तत्प्रतिपादकाऽल्पबहुत्वस्य दर्शनात्। तथा चाऽत्र कषायप्राभृतचूर्णिः-**"पढमसमयअस्सकण्णकरणकारयस्स जं पदेसग्गमोकड्डिज्जदि, तेण कम्मस्स अवहार कालो थोवो, अपुव्वफद्दएहिं पदेसगुणहाणिट्ठाणंतरस्स अवहारकालो असंखेज्जगुणो, पलिदोवमवग्गमूलमसंखेज्जगुणं।"** इति।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

चूर्ण्युच्चराणामिदं व्याख्यानम्—अश्वकर्णकरणाद्धाप्रथमसमये यावत्प्रदेशाग्रमपकर्षति, तेन प्रमाणेन कर्मण्यपह्रियमाणे यो-ऽपहारकालो गच्छेत्, सो-ऽपहारकाल उत्कर्षणापकर्षणभागहार-नामा स्तोको भवति। ततो निर्वर्त्यमानैरपूर्वस्पर्धकैरपह्रियमाणे एकप्रदेशगुणहानिस्थानान्तरे यो-ऽपहारकालो व्यतिक्रामेत्, स पल्योपमा-ऽसंख्येयभागप्रमितो भवन्नप्यसंख्येयगुणो भवति। इदमुक्तं भवति—प्रथमस्पर्धकप्रथमवर्गणातः प्रभृत्युत्तरोत्तरवर्गणायां परमाणवो विशेषहीनक्रमेण तिष्ठन्ति। तत्र प्रथमस्पर्धकप्रथमवर्गणातो-ऽभव्यानन्तगुण-सिद्धानन्तभागमात्रेषु स्पर्धकेषु गतेषु प्रथमस्पर्धकादिमवर्गणा-ऽपेक्षया द्विगुणहीना भवन्ति, ततः पुनस्तावन्मात्रेषु स्पर्धकेषु व्रजितेषु प्रदेशा द्विगुणहीना भवन्ति, पुनस्तावन्मात्रेषु स्पर्धकेषु गतेषु प्रदेशा द्विगुणहीना भवन्ति। तत्र द्वयोर्द्विगुणहान्योरपान्तराले यत् स्पर्धकजातं भवति, तद् एकप्रदेशगुणहानिस्थानान्तरमुच्यते, यदस्माभिर्द्विगुणहानिरिति प्राक् परिभाषितम्। अश्वकर्णकरणाद्धाप्रथमसमयभाव्युत्कर्षणापकर्षण-भागहारतो-ऽपूर्वस्पर्धकैरपह्रियमाणानामेकप्रदेशगुणहानिस्थानान्तरगतस्पर्धकानामपहारकालः पल्यो-पमा-ऽसंख्येयभागमात्रो भवन्नप्यसंख्येयगुणो भवति, तथा चासौ पल्योपमप्रथमवर्गमूलस्या-ऽसंख्येयभागप्रमाणो भवतीति कृत्वा चूर्णिकारैरपूर्वस्पर्धकैरेकप्रदेशगुणहानिस्थानान्तरस्याऽपहा-रकालतः पल्योपमप्रथमवर्गमूलमसंख्येयगुणं भवतीत्युक्तम्।

卐 इत्थमश्वकर्णकरणाद्धाप्रथमसमये उत्कर्षणापकर्षणभागहारतोऽसंख्येयगुणेन पल्योपम-प्रथमवर्गमूलस्य चासंख्येयभागप्रमितेन पल्योपमाऽसंख्येयभागलक्षणभागहारेणैकद्विगुणहानि-स्थितस्पर्धकानि विभज्यैकभागमितान्यपूर्वस्पर्धकानि करोति।

सम्प्रति रसाविभागानाश्रित्या-ऽपूर्वस्पर्धकानां प्रथमवर्गणां दर्शयति–'कमसो' इत्यादि, 'क्रमशः' क्रमेण 'अपुव्वगाण' त्ति प्राकृतत्वात् स्वार्थिकः कप्रत्ययः, 'अपूर्वेषां' संज्वलनचतुष्कस्याऽ-पूर्वस्पर्धकानां 'आदिवग्गणा' प्रथमवर्गणा विशेषाधिका 'अस्ति' भवति, चकारः पादपूर्त्यै। इदमुक्तं भवति—संज्वलनलोभस्य प्रथमा-ऽपूर्वस्पर्धकप्रथमवर्गणागतसकलरसाविभागतो द्वितीयाऽपूर्व-स्पर्धकप्रथमवर्गणाप्रतिबद्धसकलरसाविभागा विशेषाधिका भवन्ति। ततस्तृतीयाऽपूर्वस्पर्धकप्रथम-वर्गणास्थितसकलरसाविभागा विशेषाधिका भवन्ति। एवं तावद्वक्तव्यम्, यावच्चरमाऽपूर्वस्पर्धक-प्रथमवर्गणा। यथा लोभस्या-ऽपूर्वस्पर्धकानां प्रथमवर्गणागतरसाविभागाः प्ररूपिताः, तथैव मायामान-क्रोधानामपि प्रथमवर्गणागतरसाविभागा वक्तव्याः।

---

卐उक्तं च जयधवलाकारैरपि–"एदेण सुत्तेण ओकड्डुक्कड्डुणभागहारादो असंखेज्जगुणेण पलिदो-वमपढमवग्गमूलादो च असंखेज्जगुणहीणेण पलिदो० असंखे० भागेण एगपदेसगुणहाणिट्ठाणंतरफद्दएसु ओवट्टिदेसु जं भागलद्धं, तत्तियमेत्ताणि कोहादिसंजलणाणमपुव्वफद्दयाणि होंति त्ति एसो अत्थविसेसो जाणाविदो।" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदं तु संक्षिप्तव्याख्यानम् । **अथ विस्तरव्याख्यानेन प्ररूप्यते**—इह तावदश्वकर्णकरणाद्धाप्रथमसमये संज्वलनचतुष्कस्याऽपूर्वस्पर्धकानि करोति । तत्र लोभस्य प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणासत्कैकपरमाणौ यावन्तो रसाविभागा भवन्ति, ततो द्वितीयापूर्वस्पर्धकप्रथमवर्गणासत्कैकपरमाणौ द्विगुणा रसाविभागा भवन्ति, प्रथमापूर्वस्पर्धकप्रथमवर्गणासत्कैकपरमाणौ स्थितेभ्यो रसाविभागेभ्यस्तृतीयापूर्वस्पर्धकप्रथमवर्गणासत्कैकपरमाणौ रसाविभागास्त्रिगुणा भवन्ति । एवं प्रथमाऽपूर्वस्पर्धकापेक्षया यतिसंख्यं यतिसंख्यमपूर्वस्पर्धकं भवेत्, तत्संख्यागुणिताः प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतरसाविभागास्ततिसंख्यस्य ततिसंख्यस्याऽपूर्वस्पर्धकस्य प्रथमवर्गणायां भवन्ति । तेन प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणातश्चरमाऽपूर्वस्पर्धकस्य प्रथमवर्गणागतरसाविभागा अनन्तगुणा भवन्ति, अपूर्वस्पर्धकानामेकद्विगुणहानिस्थितस्पर्धकसत्काऽसंख्येयभागमात्रत्वेनाऽभव्यानन्तगुण-सिद्धानन्तभागमात्रत्वात् । यदुक्तं **कषायप्राभृतचूर्णौ**—"**जाणि पढमसमये अपुव्वफद्दयाणि णिव्वत्तिदाणि, तत्थ पढमस्स फद्दयस्स आदिवग्गणा थोवा । चरिमस्स अपुव्वफद्दयस्स आदिवग्गणा अणंतगुणा** ।" इति । चरमाऽपूर्वस्पर्धकप्रथमवर्गणातः प्रथमपूर्वस्पर्धकप्रथमवर्गणागतरसाविभागा अनन्तगुणा भवन्तीत्यनुक्तसिद्धम्, प्रथमपूर्वस्पर्धकप्रथमवर्गणातोऽनन्तगुणहीनरसतामापाद्य-ऽपूर्वस्पर्धकानां निर्वृत्तेः । उक्तं च **कषायप्राभृतचूर्णौ**-"**पुव्वफद्दयस्सादिवग्गणा अणंतगुणा** ।" इति ।

तथा प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतरसाविभागतो द्वितीयाऽपूर्वस्पर्धकप्रथमवर्गणायां रसाविभागा द्विगुणा भवन्ति । द्वितीयाऽपूर्वस्पर्धकप्रथमवर्गणातस्तृतीयापूर्वस्पर्धकप्रथमवर्गणायां रसाविभागा एकद्विभागेनाऽधिका भवन्ति । तृतीयाऽपूर्वस्पर्धकप्रथमवर्गणातश्चतुर्थापूर्वस्पर्धकप्रथमवर्गणायां रसाविभागास्त्रिभागेनाऽधिका भवन्ति । ततोऽपि पञ्चमाऽपूर्वस्पर्धकप्रथमवर्गणायां रसाविभागाश्चतुर्भागेनाधिका भवन्ति । एवं यतिसंख्यमपूर्वस्पर्धकं चिन्त्यते, एकोनतत्संख्याभागेनाधिका रसाविभागास्तत्पूर्ववर्त्यपूर्वस्पर्धकापेक्षया वक्तव्याः । तेन जघन्यपरित्ताऽसंख्येयतमाऽपूर्वस्पर्धकस्य प्रथमवर्गणायां रसाविभागा उत्कृष्टसंख्येयभागेनाऽधिका भवन्ति, तदुपरितनाऽपूर्वस्पर्धकानां प्रथमवर्गणायां पूर्वपूर्वतोऽसंख्येयभागेनाधिकास्तावद्वक्तव्याः, यावज्जघन्यपरित्ताऽनन्ततमस्पर्धकं प्राप्यते । तत उपरि पूर्वपूर्वत उत्तरोत्तराऽपूर्वस्पर्धकस्य प्रथमवर्गणायां रसाविभागा अनन्ततमभागेन वृद्धा भवन्ति । इदं तु प्रथमवर्गणागतैकपरमाणुमाश्रित्य प्रोक्तम् ।

**अथ प्रथमवर्गणागतसकलपरमाणूनाश्रित्याऽभिधीयते**—प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतसकलपरमाणुस्थितसर्वरसाविभागतो द्वितीयाऽपूर्वस्पर्धकप्रथमवर्गणासत्कसकलपरमाणुगतसकलरसाविभागा द्विगुणा न भवन्ति, किन्तु किंचिन्न्यूनद्विगुणा भवन्ति, प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतसकलपरमाणुतो द्वितीयाऽपूर्वस्पर्धकप्रथमवर्गणास्थितसकलपरमाणूनामनन्तभागेन

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

हीनत्वात् । तेन प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतसकलपरमाणुस्थितसर्वरसाविभागतो द्वितीयापूर्वस्पर्धकप्रथमवर्गणागतसकलपरमाणुषु सकलरसाविभागा अनन्तबहुभागैरधिका भवन्ति। द्वितीयाऽपूर्वस्पर्धकप्रथमवर्गणागतसर्वपरमाणुस्थितसकलरसाविभागतस्तृतीयाऽपूर्वस्पर्धकप्रथमवर्गणासत्क-—समस्तपरमाणुषु रसाविभागा किञ्चिन्न्यूनद्विभागेनाधिका भवन्ति। ततश्चतुर्था-ऽपूर्वस्पर्धकप्रथमवर्गणागतसकलपरमाणुषु रसाविभागाः किञ्चिन्न्यूनत्रिभागेनाऽधिका भवन्ति। एवं संख्येयभागेनाऽधिकास्तावद्वक्तव्याः, यावज्जघन्यपरित्तासंख्येयतमाऽपूर्वस्पर्धकं प्राप्यते। तदुपर्यसंख्येयभागेना-ऽधिकास्तावदनुगन्तव्याः, यावज्जघन्यपरित्तानन्ततमस्पर्धकं प्राप्यते। तत उपर्यनन्ततमभागेनाऽधिकास्तावदवबोद्धव्याः, यावद् द्विचरमा-ऽपूर्वस्पर्धकप्रथमवर्गणागतसकलपरमाणुप्रतिबद्धरसाविभागतश्चरमाऽपूर्वस्पर्धकप्रथमवर्गणागतसमस्तपरमाणुषु सकलरसाविभागा अनन्ततमभागेन विशेषाधिकाः। उक्तं च कषायप्राभृतचूर्णौ—**"एवमणंतराणंतरेण गंतूण दुचरिमस्स फद्दयस्स आदिवग्गणाए अविभागपडिच्छेदादो चरिमस्स अपुव्वफद्दयस्स आदिवग्गणा विसेसाहिया अणंतभागेण।"** इति।

## अनुभागमाश्रित्य पूर्वापूर्वस्पर्धकानां स्थापना

| | अपूर्वस्पर्धकानि | पूर्वस्पर्धकानि |
|---|---|---|
| लोभस्य | १ oooooooooooooooooooo २ oo ३ | ४ oooooooooooooooooooooooooooooooooooooooooooooooo ५ |
| मायायाः | १ ooooooooooooooooooo २ oo ३ | ४ ooooooooooooooooooooooooooooooooooooooooooo ५ |
| मानस्य | १ oooooooooooooo २ oo ३ | ४ ooooooooooooooooooooooooooooooooooo ५ |
| क्रोधस्य | १ ooooooooo २ oo ३ | ४ oooooooooooooooooooooooooooooooooooooo ५ |

### सङ्केतादीनां विवरणम्—

१ = लोभादीनामपूर्वस्पर्धकानां जघन्यवर्गणा। तत्र लोभाऽपूर्वस्पर्धकजघन्यवर्गणायां स्तोका रसाविभागाः।
मायाऽ- ,, ,, ,, विशेषाधिकाः ,, ।
मानस्या-ऽ ,, ,, ,, ,, ,, ,, ।
क्रोधस्या-ऽ ,, ,, ,, ,, ,, ,, ।

२ = लोभादीनां चरमाऽपूर्वस्पर्धकगतप्रथमवर्गणाप्रतिबद्धा रसाविभागा मिथस्तुल्या।

३ = ,, ,, ,, चरम ,, ,, ,, ,,

४ = ,, पूर्वस्पर्धकगतप्रथमवर्गणाप्रतिबद्धा रसाविभागा मिथस्तुल्याः।

५ = ,, चरमपूर्वस्पर्धकगतचरमवर्गणायां रसाविभागाः। तत्र मानस्य पूर्वस्पर्धकचरमवर्गणायां रसाविभागाः स्तोका भवन्ति, ततो विशेषाधिकाः क्रोधस्य पूर्वस्पर्धकचरमवर्गणायां भवन्ति, ततोऽपि मायायाः पूर्वस्पर्धकचरमवर्गणायां विशेषाधिका भवन्ति। ततोऽपि लोभस्य पूर्वस्पर्धकचरमवर्गणायां विशेषाधिका भवन्ति। अश्वकर्णकरणाद्धायां प्रथमेऽनुभागखण्डे घातिते तु लोभस्य पूर्वस्पर्धकचरमवर्गणायां रसाविभागाः स्तोका भवन्ति, ततो मायायाः पूर्वस्पर्धकचरमवर्गणायामनन्तगुणा भवन्ति, ततो मानस्य पूर्वस्पर्धकचरमवर्गणायामनन्तगुणा भवन्ति। ततः क्रोधस्य पूर्वस्पर्धकचरमवर्गणायामनन्तगुणा भवन्ति ॥६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु संज्वलनचतुष्कस्या-ऽपूर्वस्पर्धकान्येकद्विगुणहानिगतस्पर्धकानामसंख्येयभागमितानि करोति, तत्र किं क्रोधादीनामपूर्वस्पर्धकानि मिथस्तुल्यानि निर्वर्तयति, उता-ऽस्ति कश्चिद् विशेषः ? इत्यत आह—

कोहाईण अपुव्वाणि फड्डगाइं अणुकमेण ।
कुणए विसेसअहियाइं पढमखणे य अस्सकण्णस्स ॥६६॥ (गीतिः)

क्रोधादीनामपूर्वाणि स्पर्धकान्यनुक्रमेण ।
करोति विशेषाधिकानि प्रथमक्षणे चाश्वकर्णस्य ॥६६॥ इति पदसंस्कारः ।

'**कोहाईण**' इत्यादि, 'क्रोधादीनां' क्रोधमानमायालोभरूपाणां चतुर्णां संज्वलनकषायाणामपूर्वाणि स्पर्धकानि 'अनुक्रमं' यथोत्तरं विशेषाधिकानि 'अश्वकर्णस्य' पदैकदेशे पदसमुदायस्योपचाराद् अश्वकर्णकरणाद्धायाः 'प्रथमक्षणे' प्रथमसमये 'करोति' निर्वर्तयति । इदमुक्तं भवति— अश्वकर्णकरणाद्धाप्रथमसमये क्रोधस्या-ऽपूर्वस्पर्धकानि स्तोकानि निर्वर्तयति, ततो विशेषाधिकानि मानस्य, आधिक्यं चाऽनन्ततमभागेन ज्ञातव्यम् । एवमुत्तरत्राऽपि । मानस्याऽपूर्वस्पर्धकतो मायाया अपूर्वस्पर्धकानि विशेषाधिकानि निर्वर्तयति, ततोऽपि लोभस्य विशेषाधिकानि । उक्तं च **कषायप्राभृतचूर्णौ—"पढमसमए जाणि अपुव्वफद्दयाणि णिव्वत्तिदाणि, तत्थ कोधस्स थोवाणि, माणस्स अपुव्वफद्दयाणि विसेसाहियाणि, मायाए अपुव्वफद्दयाणि विसेसाहियाणि लोभस्स अपुव्वफद्दयाणि विसेसाहियाणि, विसेसो अणंतभागो ।**" इति ॥ ६६ ॥

ननु संज्वलनक्रोधादीनां निर्वर्त्यमाना-ऽपूर्वस्पर्धकानां प्रथमवर्गणायां रसाऽविभागा मिथस्तुल्या भवन्ति, उत विषमाः ? इत्यत आह—

अणुभागे चरिमअपुव्वाण हवइ पढमवग्गणा तुल्ला ।
लोहाईण अणूए अविभागा खलु विसेसअहियकमा ॥६७॥ (गीतिः)

अनुभागे चरमा-ऽपूर्वेषां भवति प्रथमवर्गणा तुल्या ।
लोभादीनामणौ अविभागाः खलु विशेषाधिकक्रमाः । ॥६७॥ इति पदसंस्कारः ।

'**अणुभागे**' इत्यादि, तत्र '**लोहाईण**' त्ति 'लोभादीनां' लोभमायामानक्रोधलक्षणानां कषायाणां 'चरमाऽपूर्वेषां' चरमाऽपूर्वस्पर्धकानाम् 'अनुभागे' अनुभागविषया प्रथमवर्गणा 'तुल्या भवति' रसाऽविभागानाश्रित्य समाना भवतीत्यर्थः । अश्वकर्णकरणाद्धाप्रथमसमये लोभस्य चरमा-ऽपूर्वस्पर्धकस्य प्रथमवर्गणायां यावन्तो रसाऽविभागा भवन्ति, तावन्त एव रसावि-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

भागा मायायाश्चरमाऽपूर्वस्पर्धकस्य प्रथमवर्गणायां भवन्ति । एवं मानक्रोधयोरपि चरमा-ऽपूर्व-स्पर्धकप्रथमवर्गणायां रसाविभागा मिथस्तुल्या वक्तव्याः । यदुक्तं **कषायप्राभृतचूर्णौ**–"**एवं चदुण्हं पि कसायाणं जाणि अपुव्वफद्दयाणि, तत्थ चरिमस्स अपुव्वफद्दयस्स आदि-वग्गणाए अविभागपडिच्छेदग्गं चदुण्हं पि कसायाणं तुल्लमणंतगुणं** ।" इति ।

ननु कषायचतुष्कस्य जघन्यायां वर्गणायां केन क्रमेण रसाविभागा भवन्ति ? इत्यत आह—'**लोहाईण**' इत्यादि, लोभादीनाम् 'अणौ' प्रथमाऽपूर्वस्पर्धकानां जघन्यवर्गणायाम् 'अविभागाः' रसा-ऽविभागाः खलु 'विशेषाधिकक्रमाः' विशेषेणा-ऽधिकः क्रमो येषां ते विशेषा-धिकक्रमाः, भवन्तीति गम्यते । इदमुक्तं भवति–अश्वकर्णकरणाद्धाप्रथमसमये लोभस्य प्रथमा-ऽपूर्व-स्पर्धकजघन्यवर्गणायां रसाविभागाः स्तोका भवन्ति, ततो मायायाः प्रथमाऽपूर्वस्पर्धकजघन्य-वर्गणायां रसाविभागा विशेषाधिका भवन्ति, ततो मानस्याऽपूर्वस्पर्धकजघन्यवर्गणायां रसावि-भागा विशेषाधिका भवन्ति, ततोऽपि क्रोधस्याऽपूर्वस्पर्धकजघन्यवर्गणायां रसाविभागा विशेषाधिका भवन्ति । कथमेतदवसीयते ? इति चेत्, उच्यते–संज्वलनचतुष्कस्य चरमाऽपूर्वस्पर्धकानां प्रथम-वर्गणा रसाविभागानाश्रित्य मिथः समानाः, संज्वलनक्रोधादीनामपूर्वस्पर्धकानि पुनः क्रमेण विशेषाधिकानि भवन्तीत्यनुपदमुक्तम् । तत्र चरमापूर्वस्पर्धकप्रथमवर्गणागतरसाविभागाः स्वस्वापूर्व-स्पर्धकराशिना भज्यन्ते, तदा लोभादीनां प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणाप्रतिबद्धरसाविभागाः प्राप्यन्ते, प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतरसाविभागतो द्वितीयाद्यपूर्वस्पर्धकप्रथमवर्गणागत-रसाविभागानां द्विगुणादिक्रमेणावस्थितत्वात् । अनया रीत्या लोभादीनामपूर्वस्पर्धकानामादिवर्ग-णायां लब्धाः प्रथमवर्गणागतरसाविभागाः क्रमेण विशेषाधिका भवन्ति, भाज्यराशेः समानत्वे सति भाजकस्य वैषम्यात् । उक्तं च **कषायप्राभृतचूर्णौ**–"**तेसिं चेव पढमसमए णिव्व-त्तिदाणमपुव्वफद्दयाणं लोभस्स आदिवग्गणाए अविभागपडिच्छेदग्गं थोवं । मायाए आदिवग्गणाए अविभागपडिच्छेदग्गं विसेसाहियं । माणस्स आदि-वग्गणाए अविभागपडिच्छेदग्गं विसेसाहियं । कोहस्स आदिवग्गणाए अविभाग-पडिच्छेदग्गं विसेसाहियं** ।" इति । इदन्त्ववधेयम्–यथा संज्वलनचतुष्कस्य चरमाऽपूर्व-स्पर्धकप्रथमवर्गणासु रसाविभागाः परस्परं तुल्या भवन्ति, तथैवाऽनन्तापूर्वस्पर्धकप्रथमवर्गणासु रसाविभागा मिथस्तुल्या भवन्ति, किन्तु क्रोधस्य यावन्त्यपूर्वस्पर्धकानि व्यतिक्रम्या-ऽपूर्वस्पर्धकस्य प्रथमवर्गणायां रसाविभागाश्चिन्त्येरन्, ततो मानस्याधिकान्यपूर्वस्पर्धकानि गत्वाऽपूर्वस्पर्धकस्य प्रथमवर्गणायां रसाविभागाश्चिन्तनीयाः । ततो मायाया अधिकान्यपूर्वस्पर्धकानि व्रजित्वाऽपूर्व-स्पर्धकस्य प्रथमवर्गणायां विमर्शनीयाः । ततो लोभस्याधिकान्यपूर्वस्पर्धकानि व्यतिक्रम्याऽ-पूर्वस्पर्धकप्रथमवर्गणायां रसाविभागाश्चिन्तनीयाः । तद्यथा- क्रोधस्य प्रथमाऽपूर्वस्पर्धकजघन्य-वर्गणाप्रतिबद्धरसाविभागतो मानस्य प्रथमापूर्वस्पर्धकप्रथमवर्गणागतरसाविभागान् विशोध्य ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रसाविभागा शेषत्वेन प्राप्यन्ते । तैर्मानस्य प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतरसाविभागा विभक्तव्याः । विभक्तेषु च यद् लभ्यते, तावन्मात्राणि क्रोधस्याऽपूर्वस्पर्धकानि, ततः साधिकानि मानस्य, ततः साधिकानि मायायाः, ततः साधिकानि लोभस्या-ऽपूर्वस्पर्धकानि गत्वा प्राप्यमाणाऽ-पूर्वस्पर्धकप्रथमवर्गणायां रसाऽविभागा मिथः समाना भवन्ति । पुनस्तावन्ति स्पर्धकानि व्यतिक्रम्य प्राप्यमाणाऽपूर्वस्पर्धकप्रथमवर्गणायां रसाविभागा मिथस्तुल्या भवन्ति । एवमनन्तान्यपूर्वस्पर्धकानि लभ्यन्ते, येषां प्रथमवर्गणायां रसाविभागा मिथः सदृशा भवन्ति।

असत्कल्पनया कल्प्यन्तां संज्वलनचतुष्कस्य प्रत्येकं चरमाऽपूर्वस्पर्धकप्रथमवर्गणायां रसा-विभागा द्वाचत्वारिंशच्छतानि (४२००) मिथस्तुल्यत्वात् । कल्प्यन्तां क्रोधस्याऽपूर्वस्पर्धकानि पञ्चविंशतिः (२५) मानस्य त्रिंशत् (३०), मायायाः पञ्चत्रिंशत् (३५), लोभस्य चत्वारिंशत् (४०), क्रोधादीनां क्रमेणाऽपूर्वस्पर्धकानां विशेषाधिकत्वात् । अथ द्वाचत्वारिंशच्छतानि स्वस्वाऽपूर्वस्पर्धकराशिना खण्ड्यन्ते, तदा क्रोधस्य प्रथमापूर्वस्पर्धकप्रथमवर्गणायां रसाविभागा अष्टाषष्ट्यधिकशतं (४२०० ÷ २५ = १६८), मानस्य प्रथमा ऽपूर्वस्पर्धप्रथमवर्गणायां रसाविभागाश्चत्वारिंशदुत्तरशतं (४२०० ÷ ३० = १४०) मायायाः प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणायां रसाविभागा विंशत्यधिकं शतं (४२०० ÷ ३५ = १२०) लोभस्य प्रथमा-ऽपूर्वस्पर्धकप्रथमवर्गणायां रसाविभागाः पञ्चाधिकशतं (४२०० ÷ ४० = १०५) प्राप्यन्ते। एवं क्रोधादीनां प्रथमाऽपूर्वस्पर्धकजघन्यवर्गणासु रसाविभागास्तुल्या न भवन्ति ।

तथा क्रोधस्य प्रथमस्पर्धकप्रथमवर्गणागतेभ्योऽष्टाषष्ट्यधिकशतरसाविभागेभ्यो मानस्य प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतचत्वारिंशदधिकशतरसाविभागेषु विशोधितेष्वष्टाविंशती रसाविभागा (२८) अवशिष्यन्ते, तैर्मानप्रथमाऽपूर्वस्पर्धकप्रथमवर्गणागतचत्वारिंशदुत्तरशतरसाविभागा विभ-ज्यन्ते, तदा पञ्च प्राप्यन्ते, तेन क्रोधस्य पञ्चा-ऽपूर्वस्पर्धकानि, मानस्य षट्, मायायाः सप्त, लोभस्य त्वष्टौ गत्वा प्रथमवर्गणायां रसाविभागाः परस्परं तुल्या भवन्ति। तद्यथा-क्रोधस्य पञ्चमाऽपूर्वस्पर्धक-प्रथमवर्गणायां रसाविभागाश्चत्वारिंशदधिकाष्टशतानि (१६८ × ५ = ८४०), मानस्य षष्ठाऽपूर्व-स्पर्धकप्रथमवर्गणायामपि रसाविभागाश्चत्वारिंशदधिकाष्टशतानि (१४० × ६ = ८४०), मायायाः सप्तमाऽपूर्वस्पर्धकप्रथमवर्गणायामपि रसाविभागाश्चत्वारिंशदधिकाष्टशतानि (१२० × ७ = ८४०), लोभस्याष्टमाऽपूर्वस्पर्धकप्रथमवर्गणायामपि रसाविभागाश्चत्वारिंशदधिकाष्टशतानि (१०५ × ८ = ८४०)। पुनरेतावत्स्वपूर्वस्पर्धकेषु गतेषु प्रथमवर्गणायां रसाविभागा मिथस्तुल्या भवन्ति । तद्यथा—क्रोधस्य दशमा-ऽपूर्वस्पर्धकस्य प्रथमवर्गणायां रसाविभागा अशीत्युत्तरषोडशशती (१६८ × १० = १६८०), मानस्य द्वादशा-ऽपूर्वस्पर्धकस्य प्रथमवर्गणायामपि रसाविभागा अशीत्यु-त्तरषोडशशती (१४० × १२ = १६८०) । मायायाः पञ्चदशा-ऽपूर्वस्पर्धकस्याद्यवर्गणायामपि रसावि-भागा अशीत्युत्तरषोडशशती (१२० × १४ = १६८०) । लोभस्य विंशतितमाऽपूर्वस्पर्धकस्य प्रथमव-र्गणायामपि रसाविभागा अशीत्युत्तरषोडशशती (१०५ × १६ = १६८०)। एवमग्रेऽपि ज्ञातव्यम्॥६७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## असत्कल्पनामाश्रित्य यन्त्रकम्

| अपूर्वस्पर्धकम् | प्रथमवर्गणायां | क्रोधस्य | मानस्य | मायायाः | लोभस्य | अपूर्वस्पर्धकम् | प्रथमवर्गणायां | क्रोधस्य | मानस्य | मायायाः | लोभस्य |
|---|---|---|---|---|---|---|---|---|---|---|---|
| प्रथमम् | रसाविभागाः | १६८ | १४० | १२० | १०५ | विंशतितमम् | रसाविभागाः | ३३६०△ | २८०० | २४०० | २१०० |
| द्वितीयम् | ,, | ३३६ | २८० | २४० | २१० | एकविंशतितम् | ,, | ३५२८ | २९४० | २५२०* | २२०५ |
| तृतीयम् | ,, | ५०४ | ४२० | ३६० | ३१५ | द्वा ,, | ,, | ३६९६ | ३०८० | २६४० | २३१० |
| चतुर्थम् | ,, | ६७२ | ५६० | ४८० | ४२० | त्रयो ,, | ,, | ३८६४ | ३२२० | २७६० | २४१५ |
| पञ्चमम् | ,, | ८४०卐 | ७०० | ६०० | ५२५ | चतुर्विंशतितम् | ,, | ४०३२ | ३३६०△ | २८८० | २५२०* |
| षष्ठम् | ,, | १००८ | ८४०卐 | ७२० | ६३० | पञ्चविंशतितमम् | ,, | ४२००+ | ३५०० | ३००० | २६२५ |
| सप्तमम् | ,, | ११७६ | ९८० | ८४०卐 | ७३५ | षड् ,, | ,, | | ३६४० | ३१२० | २७३० |
| अष्टमम् | ,, | १३४४ | ११२० | ९६० | ८४०卐 | सप्त ,, | ,, | | ३७८० | ३२४० | २८३५ |
| नवमम् | ,, | १५१२ | १२६० | १०८० | ९४५ | अष्टा ,, | ,, | | ३९२० | ३३६०△ | २९४० |
| दशमम् | ,, | १६८०★ | १४०० | १२०० | १०५० | नव ,, | ,, | | ४०६० | ३४८० | ३०४५ |
| एकादशम् | ,, | १८४८ | १५४० | १३२० | ११५५ | त्रिंशत्तम | ,, | | ४२००+ | ३६०० | ३१५० |
| द्वादशम् | ,, | २०१६ | १६८०★ | १४४० | १२६० | एकत्रिंशत्तमम् | ,, | | | ३७२० | ३२५५ |
| त्रयोदशम् | ,, | २१८४ | १८२० | १५६० | १३६५ | द्वात्रिंशत्तमम् | ,, | | | ३८४० | ३३६०△ |
| चतुर्दशम् | ,, | २३५२ | १९६० | १६८०★ | १४७० | त्रयस्त्रिंशत्तमम् | ,, | | | ३९६० | ३४६५ |
| पञ्चदशम् | ,, | २५२०* | २१०० | १८०० | १५७५ | चतु ,, | ,, | | | ४०८० | ३५७० |
| षोडशम् | ,, | २६८८ | २२४० | १९२० | १६८०★ | पञ्चत्रिंशत्तम् | ,, | | | ४२००+ | ३६७५ |
| सप्तदशम् | ,, | २८५६ | २३८० | २०४० | १७८५ | षट्त्रिंशम् | ,, | | | | ३७८० |
| अष्टादशम् | ,, | ३०२४ | २५२०* | २१६० | १८९० | सप्तत्रिंशम् | ,, | | | | ३८८५ |
| एकोनविंशतितमम् | ,, | ३१९२ | २६६० | २२८० | १९९५ | अष्टात्रिंशम् | ,, | | | | ३९९० |
| | | | | | | नवत्रिंशम् | ,, | | | | ४०९५ |
| | | | | | | चत्वारिंशत्तमम् | ,, | | | | ४२००+ |

卐 ★ * △ + एतैश्चिह्नैः सूचिताः प्रथमवर्गणा रसाविभागानाश्रित्य मिथस्तुल्या भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अश्वकर्णकरणाद्धाप्रथमसमये-ऽपूर्वस्पर्धकेष्वनुभागनिरूपणं विधाय दीयमानं प्रदेशाग्रमभिधातुमना आह—

**देइ अपुव्वेसु विसेसूणक्कमेणं दलं तओ देइ ।**
**पुव्वाईअ असंखगुणूणं सेसासु उण विसेसूणं ॥६८॥ (गीतिः)**

ददात्यपूर्वेषु विशेषोनक्रमेण दलं ततो ददाति ।
पूर्वादौ असंख्यगुणोनं शेषासु पुनर्विशेषोनम् ॥ इति पदसंस्कारः ।

'देइ' इत्यादि, 'अपूर्वेषु' प्रक्रमाद् अश्वकर्णकरणाद्धाप्रथमसमये-ऽपूर्वस्पर्धकेषु 'दलं' प्रदेशाग्रं 'विशेषोनक्रमेण' विशेषहीनक्रमेण ददाति । इदमुक्तं भवति-अश्वकर्णकरणाद्धाप्रथमसमये सर्वपूर्वस्पर्धकेभ्य उत्कर्षणापकर्षणभागहारेण विभज्यैकभागमात्रं दलं गृहीत्वा गृहीतं भूयः पल्योपमा-ऽसंख्येयभागेन खण्डयित्वा बहुभागप्रमाणं दलं पूर्वस्पर्धकेषु निक्षेप्तुं स्थापयति । शेषमेकभागप्रमितं दलं गृहीत्वा प्रथमपूर्वस्पर्धकप्रथमवर्गणागतदलिकप्रमितं सकला-ऽपूर्वस्पर्धकवर्गणाप्रमाणैश्चयैरधिकं दलं प्रथमा-ऽपूर्वस्पर्धकप्रथमवर्गणायां ददाति, तच्च प्रभूतं भवति, तत एकचयेन हीनं दलं प्रथमा-ऽपूर्वस्पर्धकद्वितीयवर्गणायां ददाति । तत एकचयेन हीनं दलं प्रथमा-ऽपूर्वस्पर्धकतृतीयवर्गणायां ददाति । एवमुत्तरोत्तरवर्गणायामेकैकचयेन हीनं हीनतरं दलं तावत् प्रक्षिपति, यावत् चरमा-ऽपूर्वस्पर्धकस्य चरमवर्गणा । द्वाभ्यां च द्विगुणहानिभ्यां प्रथमा-ऽपूर्वस्पर्धकप्रथमवर्गणागतदले विभक्ते एकचयदलं लभ्यते, तच्चा-ऽनन्ततमभागप्रमाणं भवति । तेनोत्तरोत्तरवर्गणायां विशेषहीनं दलं दीयते इति सिध्यति । उक्तं च **कषायप्राभृतचूर्णौ**–"**पढमसमये णिव्वत्तिज्जमाणगेसु अपुव्वफद्दएसु पुव्वफद्दएहिंतो ओकड्डियूण पदेसग्गमपुव्वफद्दयाणमादिवग्गणाए बहुअं देदि, विदियाए वग्गणाए विसेसहीणं देदि । एवमणंतराणंतरेण गंतूण चरिमाए अपुव्वफद्दयवग्गणाए विसेसहीणं देदि ।**" इति । इत्थमनन्तरोपनिधयोत्तरोत्तरवर्गणायामनन्ततमभागमितेनैकैकचयेन हीनं दलं प्रक्षिपति । परम्परोपनिधया पुनः प्रथमा-ऽपूर्वस्पर्धकप्रथमवर्गणातश्चरमा-ऽपूर्वस्पर्धकचरमवर्गणायामसंख्येयभागहीनं प्रदेशाग्रं ददाति, नाधिकम्, निर्वर्त्यमाना-ऽपूर्वस्पर्धकानामेकद्विगुणहानिगतस्पर्धकसत्का-ऽसंख्येयभागकल्पत्वात् ।

अत्र केचित् जघन्यस्पर्धकतः प्रभृति जघन्या-ऽतीत्थापनामात्राणि मन्दानुभागकान्यनन्तानि स्पर्धकानि विमुच्योपरितनपूर्वस्पर्धकेभ्यो-ऽसंख्येयभागप्रमाणं प्रदेशाग्रं गृहीत्वा-ऽपूर्वस्पर्धकानि करोतीत्याहुः, तन्न घटते, तथाहि-उपरितनस्पर्धकगता-ऽसंख्येयभागमितदलादपूर्वस्पर्धकनिर्वृत्तौ स्वीक्रियमाणायामपूर्वस्पर्धकेषु सकलं दीयमानं दलं सत्तागतदलस्या-ऽनन्ततमभागमात्रं स्यात् । कथम् ? इति चेत्, उच्यते--जघन्या-ऽतीत्थापनायामनन्तद्विगुणहानिस्पर्धकानां दर्शनात्

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

जघन्यातीत्थापनाया उपरितनेषु स्पर्धकेषु सकलदलं सत्तागतसर्वदलस्या-ऽनन्ततमभागमात्रं संभवति। न च जघन्या-ऽतीत्थापनायामनन्तद्विगुणहानिस्पर्धकान्यसिद्धानीति वाच्यम्, तथाविधाल्पबहुत्व-दर्शनात्। तथाहि—एकद्विगुणहानिस्पर्धकतो-ऽनन्तगुणानि स्पर्धकानि जघन्या-ऽतीत्थापनायां भवन्ति। तथा-चाऽत्र **कषायप्राभृतचूर्णिः**-"**सव्वत्थोवाणि पदेसगुणहाणिट्ठाणंतरफद्दयाणि, जहण्णओ णिक्खेवो अणंतगुणो, जहण्णिया अइच्छावणा अणंतगुणा**।" इति तथैव **कर्मप्रकृतिचूर्णावपि** भणितम्–"**सव्वत्थोवं पदेसगुणहाणिट्ठाणंतरं। जहण्णओ णिक्खेवो अणंतगुणो। जहण्णिता अतित्थावणा अणंतगुणा**।" तेन जघन्यातीत्थापना-यामेकद्विगुणहानिस्पर्धकतो-ऽनन्तगुणानि स्पर्धकानि भवन्तीतिसिद्धम्।

ननु गृह्णातु सकलसत्तागतदलस्याऽनन्तभागप्रमितं दलमपूर्वस्पर्धकनिर्वृत्तये विरोधा-भावादिति चेद्, उच्यते–अपूर्वस्पर्धकनिर्वृत्तये सकलसत्तागतदलस्या-ऽनन्ततमभागेऽभ्युपगम्यमाने सत्यपूर्वस्पर्धकचरमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायां दलमनन्तगुणं स्यात्, अपूर्वस्पर्धकार्थं गृही-तस्याऽनन्ततमभागप्रमितदलस्यैकद्विगुणहानिस्पर्धकसत्काऽसंख्येयभागमात्राऽपूर्वस्पर्धकेषु प्रक्षेपात्। न चा-ऽस्त्वपूर्वस्पर्धकचरमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायामनन्तगुणं दलमिति वाच्यम्, विरोधोपलम्भात्। तथाहि–यद्यपूर्वस्पर्धकचरमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायां दलिकमनन्त-गुणं स्वीक्रियेत, तर्हि पूर्वाऽपूर्वयोः स्पर्धकयोर्दृश्यमानदलमेकगोपुच्छाकारेण न स्यात्, अपूर्व-स्पर्धकचरमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायां दृश्यमानदलस्या-ऽनन्तगुणत्वप्रसङ्गात्। प्रतिपाद-यिष्यते च एकोनसप्ततिमगाथया पूर्वापूर्वस्पर्धकयोर्दृश्यमानदलमेकगोपुच्छाकारेण, तेन सह विरोधः स्यादित्यर्थः। किञ्च **कषायप्राभृतचूर्णौ** अपूर्वस्पर्धकप्रथमवर्गणातो-ऽपि पूर्वस्पर्धकप्रथम-वर्गणायां दलं विशेषहीनमेवाऽभिहितम्, तथा चाऽत्र **कषायप्राभृतचूर्णिः**– "**तम्हि चेव पढमसमए जं दिस्सदि पदेसग्गं, तमपुव्वफद्दयाणं पढमाए वग्गणाए बहुअं, पुव्व-फद्दयआदिवग्गणाए विसेसहीणं**।" इति। तेन सहा-ऽपि विरोधः स्यात्।

**केचित्तु** प्रथमपूर्वस्पर्धकप्रथमवर्गणाया अधस्तादनन्तस्पर्धकान्यन्तरयित्वा-ऽपूर्वस्पर्धकानि निर्वर्तयति, अन्तरितस्पर्धकानि पुनः शून्यरूपेण परित्यज्य न निर्वर्तयति। तावन्ति स्पर्धकान्यतीत्था-पनात्वेन मन्तव्यानीत्याहुः, तदपि नातिक्षोदक्षमम्। तथा-ऽभ्युगमेऽपूर्वस्पर्धकार्थं गृह्यमाणस्या-ऽपकर्षितदलसत्का-ऽसंख्येयभागमितस्य दलस्या-ऽतीत्थापना सूपपद्येत। किन्त्वपकर्षितदलसत्का-ऽसंख्येयबहुभागप्रमितदलिकस्य पूर्वस्पर्धकेषु निक्षिप्यमाणस्याऽतीत्थापना घटां कथमृच्छेत्? तेन तथास्वाभाव्यादेवा-ऽस्मिन् प्रस्तावेऽनुभागाऽपवर्तनाऽतीत्थापनां विनाऽपि संभवति। तत्त्वं तु बहुश्रुता विदन्ति।

इत्थमविशेषेणसत्तागतसर्वपूर्वस्पर्धकेभ्यो-ऽसंख्येयभागमात्रं दलं गृहीत्वा-ऽपूर्वस्पर्धकानि निर्वर्तयति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ पूर्वस्पर्धकेषु दीयमानं दलं प्ररूपयिषुराह–'तओ' इत्यादि, 'ततः' अपूर्वस्पर्धकतः परं चरमाऽपूर्वस्पर्धकचरमवर्गणातः परमित्यर्थः 'पूर्वादौ' पूर्वस्पर्धकादिवर्गणायां प्रथमपूर्वस्पर्धकप्रथमवर्गणायामित्यर्थः, 'असंख्यगुणोनम्' असंख्येयगुणहीनं दलं ददाति। इदमुक्तं भवति- चरमा-ऽपूर्वस्पर्धकचरमवर्गणायां यावद् दलं ददाति, ततोऽसंख्येयगुणहीनं प्रथमपूर्वस्पर्धकप्रथमवर्गणायां ददाति। किं कारणम्? इति चेद्, उच्यते–पूर्वस्पर्धकप्रथमवर्गणागतदलं सार्धद्विगुणहान्या गुण्यते, तदा सत्तागतसकलदलं प्राप्यते। सत्तागतसर्वदलमुत्कर्षणापकर्षणभागहारेण विभज्यैकभागप्रमाणदलमुत्किरति। उत्कीर्णदलं पुनः पल्योपमा-ऽसंख्येयभागेन भक्त्वैकभागप्रमाणदलमपूर्वस्पर्धकेषु विशेषहीनक्रमेण ददत् चरमा-ऽपूर्वस्पर्धकचरमवर्गणायां पूर्वस्पर्धकप्रथमवर्गणागतदलिकत एकचयेनाऽधिकं ददाति। शेषा-ऽसंख्येयबहुभागप्रमाणं दलं विशेषहीनक्रमेण सर्वपूर्वस्पर्धकवर्गणासु ददाति, तत्र प्रथमपूर्वस्पर्धकप्रथमवर्गणायां यावद्दलं ददाति, तावद्दलं यदीतरवर्गणास्वपि दद्यात्, तर्हि सार्धद्विगुणहानिप्रमाणवर्गणासु गतासूत्कीर्णदलस्याऽसंख्येयबहुभागप्रमाणं दलं परिसमाप्याद् इति कृत्वोत्कीर्णदलस्या-ऽसंख्येयबहुभागप्रमितदलं सार्धद्विगुणहान्या विभज्यते, तदा य एक भागो लभ्यते, तावन्मात्रं दीयमानं दलं प्रथमपूर्वस्पर्धकप्रथमवर्गणायां भवति। तच्च प्रथमपूर्वस्पर्धकप्रथमवर्गणाप्रतिबद्धप्राक्तनसत्तागतदलस्या-ऽसंख्येयभागमात्रं भवति। तेन प्रथमपूर्वस्पर्धकप्रथमवर्गणायां दीयमानदलमपूर्वस्पर्धकचरमवर्गणातो-ऽसंख्येयगुणहीनं भवति, चरमा-ऽपूर्वस्पर्धकचरमवर्गणायां दीयमानदलस्यैकचयेनाऽधिकपूर्वस्पर्धकप्रथमवर्गणागतदलप्रमितत्वात् प्रथमपूर्वस्पर्धकप्रथमवर्गणायां च दीयमानदलस्य स्वपुरातनसत्तागतदलसत्का-ऽसंख्येयभागप्रमाणत्वात्। अभ्यधायि च **कषायप्राभृतचूर्णौ–"तदो चरिमादो अपुव्वफद्दयवग्गणादो पढमस्स पुव्वफद्दयस्स आदिवग्गणाए असंखेज्जगुणहीणं देदि।"** इति।

न्यास :—

सत्तागतदलम् = प्रथमपूर्वस्पर्धकप्रथमवर्गणागतदलम् × सार्धद्विगुणहानिः

उत्कीर्यमाणदलम = सत्तागतदलम् ÷ उत्कर्षणापकर्षणभागहारः

अपूर्वस्पर्धकार्थं गृह्यमाणं दलम् = उत्कीर्यमाणदलम् ÷ पल्योपमा-ऽसंख्येयभागः

पूर्वस्पर्धकेषु निक्षिप्यमाणं दलम् = उत्कीर्यमाणदलम् — अपूर्वस्पर्धकतया परिणमनाय गृहीतदलम्

प्रथमपूर्वस्पर्धकप्रथमवर्गणायां दीयमानं दलम् = पूर्वस्पर्धकेषु निक्षिप्यमाणं दलम् ÷ सार्धद्विगुणहानिः

= स्वसत्तागतदलम् ÷ असंख्यातम्

चरमा-ऽपूर्वस्पर्धकचरमवर्गणायां दीयमानदलम् = आद्यपूर्वस्पर्धकप्रथमवर्गणादलम् + एकाचयः।

∴ चरमा-ऽपूर्वस्पर्धकचरमवर्गणायां दीयमानदलतः प्रथमपूर्वस्पर्धकप्रथमवर्गणायामसंख्येयगुणहीनं दलं ददाति।

एतर्हि पूर्वस्पर्धकानां शेषवर्गणासु दलिकनिक्षेपं वक्तुकाम आह—**'सेसासु'** इत्यादि, 'शेषासु' प्रथमपूर्वस्पर्धकप्रथमवर्गणां वर्जयित्वा शेषासु पूर्वस्पर्धकानां सर्ववर्गणासु पुनर्विशेषोनं दलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ददातीति सम्बध्यते । तथाहि—प्रथमपूर्वस्पर्धकप्रथमवर्गणायां दीयमानदलतस्तद्द्वितीयवर्गणायां विशेषहीनं दलं ददाति, विशेषश्चो-ऽनन्ततमभागो बोद्धव्यः । ततोऽपि तृतीयवर्गणायां विशेषहीनं दलं ददाति । एवंक्रमेण तावद्वक्तव्यम् , यावच्चरमनिक्षेपपूर्वस्पर्धकस्य चरमवर्गणा । उक्तं च **कषायप्राभृतचूर्णौ–"तदो विदियाए पुव्वफद्दयवग्गणाए विसेसहीणं देदि, सेसासु सव्वासु पुव्वफद्दयवग्गणासु विसेसहीणं देदि ।"** इति ॥६८॥

दीयमानदलमभिधाय साम्प्रतं पूर्वापूर्वस्पर्धकेषु दृश्यमानदलं प्ररूपयति—

## दिस्सइ दलिअं पुव्वापुव्वेसुं फड्डगेसु गोपुच्छेणं ।
## पुव्वाईअ अपुव्वाइत्तो दिस्सइ असंखभागविहीणं ॥६९॥ (आर्यागीतिः)

दृश्यते दलिकं पूर्वा-ऽपूर्वेषु स्पर्धकेषु गोपुच्छेन ।
पूर्वादावपूर्वादितो दृश्यते-ऽसंख्यभागविहीनम् ॥ ६९ ॥ इति पदसंस्कारः ।

**'दिस्सइ'** इत्यादि, इह तावत् प्रथममनन्तरोपनिधया दृश्यमानदलं निरूपयति । तत्र दृश्यमानं दलं नाम तदानीं निक्षिप्यमाणदलेन सहितं पुरातनसत्तागतदलम् । अपूर्वस्पर्धकेषु यन्निक्षिप्यमाणं दलं तदेव दृश्यमानं दलं भवति, तत्र पुरातनसत्तागतदलस्या-ऽभावदर्शनात् । पूर्वस्पर्धकेषु त्विदानीं निक्षिप्यमाणदलेन सहितं पुरातनसत्तागतदलिकं दृश्यमानं भवति । तत्र 'पुव्वापुव्वेसु' ति 'पूर्वापूर्वेषु' पूर्वस्पर्धकेष्वपूर्वस्पर्धकेषु च 'गोपुच्छेन' गोपुच्छाकारेण 'दलिकं' प्रदेशाग्रं दृश्यते । अयं भावः-प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणायां दृश्यमानं दलं प्रभूतं भवति । ततः प्रथमाऽपूर्वस्पर्धकद्वितीयवर्गणायां विशेषहीनं दृश्यमानं दलं भवति, निक्षिप्यमाणदलस्य विशेषहीनत्वात् । अयं हेतुरग्रेऽपि यथास्थानं योजनीयः । ततोऽपि तृतीयवर्गणायां दृश्यमानं दलं विशेषहीनं भवति, एवं विशेषहीनक्रमेण तावद्वक्तव्यम्, यावच्चरमा-ऽपूर्वस्पर्धकस्य चरमवर्गणा । अपूर्वस्पर्धकचरमवर्गणातः प्रथमपूर्वस्पर्धकप्रथमवर्गणायां दृश्यमानं दलं विशेषहीनं भवति, ततो-ऽपि प्रथमपूर्वस्पर्धकद्वितीयवर्गणायां विशेषहीनं दृश्यमानं दलं विद्यते । एवं विशेषहीनं विशेषहीनं तावद्वाच्यम्, यावच्चरमपूर्वस्पर्धकस्य चरमवर्गणा । विशेषश्चा-ऽनन्ततमभागो ज्ञातव्यः । अथ परम्परोपनिधया दृश्यमानं दलं प्ररूपयितुकाम आह— "पुव्वाईअ" इत्यादि, 'पूर्वादौ' पदैकदेशेन पदसमुदायस्य गम्यमानत्वात् पूर्वस्पर्धकादिवर्गणायां प्रथमपूर्वस्पर्धकप्रथमवर्गणायामित्यर्थः, 'असंख्यभागविहीनम्' असंख्येयतमभागेन न्यूनं दलं दृश्यते । उक्तं च **कषायप्राभृतचूर्णौ–"तम्हि चेव पढमसमये जं दिस्सदि पदेसग्गं, तमपुव्वफद्दयाणं पढमाए वग्गणाए बहुअं। पुव्वफद्दयआदिवग्गणाए विसेसहीणं ।"** इति विशेषश्चाऽत्रा-ऽसंख्येयभागो बोद्धव्यः । कुतः ? इति चेत्, शृणुत—अपूर्वस्पर्धकानामेकद्विगुणहानि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अश्वकर्णकरणाद्धाप्रथमसमयेऽपूर्वस्पर्धकेषु पूर्वस्पर्धकेषु च दीयमानं दृश्यमानं च दलम् ।




सङ्केतस्पष्टीकरणम् —

सकलापूर्वस्पर्धकानि वस्तुत एकद्विगुणहानिस्पर्धकानामसंख्येयभागमात्राणि भवन्ति, असत्कल्पनयाऽत्र चत्वारि दर्शितानि ।

१=प्रथमवर्गणा । २=द्वितीयवर्गणा । ३=तृतीयवर्गणा । ४=चतुर्थवर्गणा ।

*=सकलापूर्वस्पर्धकवर्गणाराशिप्रमाणैश्चयैरधिकं प्रथमपूर्वस्पर्धकप्रथमवर्गणागतदलिकं प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणायां दीयते, तच्च प्रभूतम्, तत उत्तरोत्तरवर्गणायामेकैकचयेन हीनं हीनतरं तावद्दीयते, यावत् चरमापूर्वस्पर्धकस्य चरमवर्गणा । एतत्सर्वम् * इत्यनेन चिह्नेन सूचितम् ।

०००=अनेन चिह्नेन चरमापूर्वस्पर्धकचरमवर्गणातः प्रथमपूर्वस्पर्धकप्रथमवर्गणायामसंख्येयगुणहीनं दलं दीयत इति सूचितम् ।

★=अनेन चिह्नेन पूर्वस्पर्धकेषु पुरातनसत्तागतं दलं सूचितम्, ★अनेन चिह्नेन सूचितस्य पूर्वस्पर्धकेषु पुरातनसत्तागतदलस्य सत्त्वाच्चरमापूर्वस्पर्धकचरमवर्गणापेक्षया पूर्वस्पर्धकप्रथमवर्गणायामसंख्येयगुणहीनं दलं दीयते, अन्यथैकगोपुच्छाकारेण पूर्वापूर्वस्पर्धकेषु दलं न दृश्येत । प्रथमपूर्वस्पर्धकप्रथमवर्गणायां दीयमानं दलं स्वपुरातनसत्तागतदलस्याऽसंख्येयभागप्रमाणं भवति ।

••••=अनेन चिह्नेन प्रथमपूर्वस्पर्धकप्रथमवर्गणात उत्तरोत्तरवर्गणायां विशेषहीनं दलं दीयत इति सूचितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुभागापेक्षयाऽनन्तरोपनिधा-प्रथमापूर्वस्पर्धकप्रथमवर्गणायामनुभागः स्तोकः, ततस्तद्द्वितीयवर्गणायामेकरसाविभागेनाऽधिकः, एवमुत्तरोत्तरवर्गणायां वाच्यः, नवरं यत्र द्वयोः स्पर्धकयोः सन्धिर्भवति, तत्राऽधस्तनस्पर्धकचरमवर्गणात उपरितनस्पर्धकप्रथमवर्गणायामनुभागः सर्वजीवानन्तगुणरसाविभागैरधिको भवति । यत्र च पूर्वापूर्वस्पर्धकयोः सन्धिर्भवति, तत्राऽपूर्वस्पर्धकचरमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायामनुभागोऽनन्तगुणो भवति ।

अनुभागापेक्षया परम्परोपनिधा–प्रथमापूर्वस्पर्धकस्य प्रथमवर्गणातो द्वितीयापूर्वस्पर्धकस्य प्रथमवर्गणायां रसाविभागा द्विगुणा भवन्ति, तृतीयस्पर्धकप्रथमवर्गणायां त्रिगुणाः, एवं यतिसंख्यं स्पर्धकम्, तत्संख्यगुणा रसाविभागाः प्रथमस्पर्धकप्रथमवर्गणारसाऽविभागापेक्षया भवन्ति ।

दृश्यमानदलापेक्षया-ऽनन्तरोपनिधा-दृश्यमानदलमपूर्वस्पर्धकस्य प्रथमवर्गणायां प्रभूतं दलं भवति, ततो द्वितीयवर्गणायां विशेषहीनम्, एवमुत्तरोत्तरवर्गणायां तावद्वाच्यम्, यावद् चरमपूर्वस्पर्धकस्य चरमवर्गणा ।

दृश्यमानदलापेक्षया परम्परोपनिधा–प्रथमापूर्वस्पर्धकत आरभ्य यावत् सकलापूर्वस्पर्धकानामसंख्येयतमभागकल्पान्यनन्तान्यपूर्वस्पर्धकानि व्यतिक्रम्यन्ते, तावदपूर्वस्पर्धकप्रथमवर्गणातो कस्याञ्चिदपि वर्गणायामनन्तभागहीनं दलं दृश्यते, ततः परं सर्वापूर्वस्पर्धकप्रथमवर्गणायां प्रथमपूर्वस्पर्धकप्रथमवर्गणायां चाऽसंख्येयभागहीनं दलं दृश्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्धकानामसंख्येयभागमात्रत्वाद् अपूर्वस्पर्धकप्रथमवर्गणात एकद्विगुणहानिस्पर्धकानामसंख्येयभागं व्यतिक्रम्य पूर्वस्पर्धकप्रथमवर्गणाऽवतिष्ठते । यद्यपूर्वस्पर्धकप्रथमवर्गणात एकद्विगुणहानिगत-स्पर्धकान्यतिक्रम्येरन् , तर्ह्यपूर्वस्पर्धकप्रथमवर्गणातो द्विगुणहीनाः प्रदेशा भवेयुरर्धाः स्युरित्यर्थः । अत्र त्वेकद्विगुणहानिस्पर्धकानामसंख्येयभाग एव व्यतिक्रान्तः, तेनाऽपूर्वस्पर्धकप्रथमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायामसंख्येयभागेन हीनं दलं तिष्ठति । इदमत्रा-ऽवधेयम्-न केवलमपूर्व-स्पर्धकप्रथमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायामसंख्येयभागहीनं दलं दृश्यते, अपि तु प्रथमाऽ-पूर्वस्पर्धकतो यावत् सकलाऽपूर्वस्पर्धकानां तत्प्रायोग्याऽसंख्येयतमभागकल्पान्यपूर्वस्पर्धकानि न व्यतिक्रम्यन्ते, तावदपूर्वस्पर्धकप्रथमवर्गणातो-ऽनन्तभागहीनं दलं दृश्यते, तदुपरितनसर्वाऽपूर्वस्पर्धक-वर्गणायामप्यसंख्येयभागहीनं दलं दृश्यते । पश्यन्तु पाठका यन्त्रकम्-१२ । इति ॥ ६९ ॥

अश्वकर्णकरणाद्धाप्रथमसमये-ऽपूर्वस्पर्धकानि प्ररूप्या-ऽश्वकर्णकरणाद्धाप्रथमसमयेऽनुभाग-बन्धोदयौ प्रतिपिपादयिषुराह—

## पढमसमये अपुव्वाणि फड्डगाइं अणंतभागमिआइं ।
## हेट्ठाणि पराण उदिण्णाइं बंधो तहेवऽणंतगुणूणो ॥७०॥ (आर्यागीतिः)

प्रथमसमये-ऽपूर्वाणि स्पर्धकान्यनन्तभागमितानि ।
अधस्तनानि परेषामुदीर्णानि बन्धस्तथैवाऽनन्तगुणोनः ॥ ७० ॥ इति पदसंस्कारः ।

**'पढमसमये'** इत्यादि, 'प्रथमसमये' अश्वकर्णकरणाद्धाप्रथमसमये 'अपूर्वाणि' अपूर्व-स्पर्धकानि 'परेषां' पूर्वस्पर्धकानां च 'अनन्तभागमितानि' अनन्ततमभागकल्पान्यधस्तनानि स्पर्ध-कान्युदीर्णानि भवन्ति । इदमुक्तं भवति—अश्वकर्णकरणाद्धायाः प्रथमसमयेन क्रियमाणसकला-ऽपूर्व-स्पर्धकेभ्यः कियन्तश्चित् प्रदेशास्तदानीमेवोदीरणाप्रयोगेणोदयस्थितौ निक्षिप्यन्ते, न सर्वे प्रदेशाः । एवं पूर्वस्पर्धकानामनन्ततमभागमात्राऽधस्तनाल्पानुभागकपूर्वस्पर्धकेभ्यः कियन्तश्चित् प्रदेशा उदीर-णाप्रयोगेणोदयस्थितौ प्रक्षिप्यन्ते, न तु तदुपरितनपूर्वस्पर्धकेभ्यः, नवा-ऽधस्तनपूर्वस्पर्धकेभ्यः सर्वे प्रदेशाः । इत्थं सकलाऽपूर्वस्पर्धकानि पूर्वस्पर्धकानां चाऽ-नन्ततमभागमात्राणि सर्वाण्यधस्तनपूर्वस्पर्ध-कानि स्वस्वरूपेणोदयन्ति । उक्तं च **कषायप्राभृतचूर्णौ—"उदयपरूवणा, जहा-पढमसमये चेव अपुव्वफद्दयाणि उदिण्णाणि च अणुदिण्णाणि च, पुव्वफद्दयाणं पि आदीदो अणंतभागो उदिण्णो च अणुदिण्णो च ।"** इति । एतेषामक्षराणामयं भावः-अश्वकर्ण-करणाद्धाप्रथमसमये परिणम्यमानसर्वा-ऽपूर्वस्पर्धकेभ्यः कियन्तश्चित् प्रदेशा उदीरणाप्रयोगेणोदय-स्थितौ प्रक्षिप्यन्ते, अपूर्वस्पर्धकानां द्वितीयस्थितावस्थानात्, शेषाश्च न प्रक्षिप्यन्ते । इहोदये निक्षिप्यमाणानपूर्वस्पर्धकसत्कप्रदेशानाश्रित्य चूर्णिकारैरपूर्वस्पर्धकान्युदीर्णानीत्युच्यते, अनिक्षि-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

प्यमाणानपूर्वस्पर्धकप्रदेशानवलम्ब्या-ऽपूर्वस्पर्धकान्यनुदीर्णानीति व्यवह्रियते । तथा पूर्वस्पर्धकाना-मनन्ततमभागमात्रपूर्वस्पर्धकेभ्यः कियन्तश्चित् प्रदेशा उदये निक्षिप्यन्ते, तेना-ऽनन्ततमभाग-मितानि पूर्वस्पर्धकान्युदीर्णानीति व्यपदिश्यते, तेभ्यश्च शेषाः प्रदेशा उदये न निक्षिप्ताः, तेन तान्यनुदीर्णान्यपि व्यवह्रियन्ते ।

अधस्तनाऽनन्ततमभागमात्रपूर्वस्पर्धकानि वर्जयित्वा शेषाणि पूर्वस्पर्धकान्यनुदीर्णानि ज्ञातव्यानि, तेभ्य एको-ऽपि प्रदेश उदयस्थितौ स्वस्वरूपेण न प्रक्षिप्यते इत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ**—"**उवरि अणंता भागा अणुदिण्णा ।** " इति । साम्प्रतमनुभाग-बन्धमतिदिदिक्षुराह—'**बंधो तहेव**' त्ति 'बन्धस्तथैव' यथा सर्वाण्यपूर्वस्पर्धकान्यनन्तभागप्रमा-णानि च पूर्वस्पर्धकान्युदीर्णानि भवन्ति, तथैव सर्वाण्यपूर्वस्पर्धकान्येकस्थानकपूर्वस्पर्धकानां चा-ऽनन्ततमभागप्रमाणानि पूर्वस्पर्धकानि बध्यन्ते, अनुभागमाश्रित्य सर्वाऽपूर्वस्पर्धकैरनन्ततम-भागप्रमाणपूर्वस्पर्धकैश्च सदृशानि स्पर्धकानि बध्यन्ते इत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ**— "**बंधेण णिव्वत्तिज्जंति अपुव्वफद्दयं पढममादिं कादूण जाव लदासमाणफद्दयाण-मणंतभागो त्ति ।**" इति '**तहेव**' इत्यनेनोदयातिदेशं कृत्वा बन्धे उदयतो यो विशेषः, तं दर्शयति '**अणंतगुणूणो**' त्ति 'अनन्तगुणोनः' बन्ध उदयतो-ऽनन्तगुणहीनो भवति, उदयमान-स्पर्धकेभ्यो बध्यमानस्पर्धकान्यनन्तगुणहीनानि भवन्तीत्यर्थः ॥ ७० ॥

अश्वकर्णकरणाद्धाप्रथमसमयमधिकृत्य प्ररूपणां कृत्वा द्वितीयादिसमयेष्वपूर्वस्पर्धकानि दर्शयति—

**अणुसमयमसंखगुणं दलिअं घेत्तूण पकुणेइ ।**
**पडिसमयमपुव्वाणि खलु असंखेज्जगुणहीणाइं ॥७१॥ (उपगीतिः)**

अनुसमयमसंख्यगुणं दलिकं गृहीत्वा प्रकरोति ।
प्रतिसमयमपूर्वाणि खल्वसंख्येयगुणहीनानि ॥७१॥ इति पदसंस्कारः ।

'**अणुसमयमसंखगुणं**' ति, अनुसमयमसंख्यगुणं 'दलिकं' प्रदेशाग्रं 'गृहीत्वा' अपकृष्य प्रतिसमयमसंख्येयगुणहीनानि 'अपूर्वाणि' अपूर्वस्पर्धकानि खलु 'प्रकरोति' निर्वर्तयति । इदमुक्तं भवति-अश्वकर्णकरणाद्धाप्रथमसमये यान्यपूर्वस्पर्धकानि कृतानि, ततो द्वितीयसमयेऽसंख्येयगुणहीनान्यन्यान्यपूर्वस्पर्धकानि निर्वर्तयति, दलिकं तु प्रथम-समयतो द्वितीयसमये-ऽसंख्येयगुणमपकर्षति ।' ततस्तृतीयसमये-ऽसंख्येयगुणहीनान्यन्यान्यपूर्व-स्पर्धकानि निर्वर्तयति, दलिकं त्वसंख्येयगुणमपकर्षति । एवमुत्तरोत्तरसमयेऽसंख्येयगुणं दलिकमप-कृष्या-ऽसंख्येयगुणहीनान्यन्यान्यपूर्वस्पर्धकानि निर्वर्तयति । न्यगादि च **कषायप्राभृतचूर्णौ**—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**"पढमसमए अपुव्वफड्डयाणि णिव्वत्तिदाणि बहुआणि । विदियसमए जाणि अपुव्वाणि अपुव्वफड्डयाणि कदाणि, ताणि असंखेज्जगुणहीणाणि । तदियसमए अपुव्वाणि अपुव्वफड्डयाणि कदाणि, ताणि असंखेज्जगुणहीणाणि । एवं समए समए जाणि अपुव्वाणि अपुव्वफड्डयाणि कदाणि, ताणि असंखेज्जगुणहीणाणि ।"** इति ॥७१॥

अथा-ऽश्वकर्णकरणाद्धाया द्वितीयादिसमयेषु दीयमानं दृश्यमानं च दलं विवर्णयितुकामो भणति—

तक्कालिएसु देइ अपुव्वेसु दलं विसेसूणं ।
तो पुव्विल्लअपुव्वादीअ असंखगुणहीणदलं ॥७२॥ (उपगीतिः)
तत्तो विसेसहीणकमेणं जा पुव्वचरिमाआ ।
दिस्सइ दलिअं पुव्वापुव्वेसु विसेसहीणकमं ॥७३॥ (उपगीतिः)

तात्कालिकेषु ददात्यपूर्वेषु दलं विशेषोनम् ।
ततः प्राक्तना-ऽपूर्वादौ असंख्यगुणहीनदलम् ॥ ७२ ॥
ततो विशेषहीनक्रमेण यावत्पूर्वचरमा ।
दृश्यते दलिकं पूर्वापूर्वेषु विशेषहीनक्रमम् ॥ ७३ ॥ इति पदसंस्कार ।

'**तक्कालियेसु**' इत्यादि, 'तात्कालिकेषु' तस्मिन् काले भवानि तात्कालिकानि "**ह्यादिभ्यो णिकेकणौ**" (सिद्धहेम० ६-३-३४) इति सूत्रेण णिकप्रत्ययो वा इकणप्रत्ययो वा, तेषु, तत्कालभाविष्वित्यर्थः, 'अपूर्वेषु' अपूर्वस्पर्धकेषु 'दलं' प्रदेशाग्रं 'विशेषोनं' विशेषहीनं 'ददाति' निक्षिपति । 'ततः' तात्कालिका-ऽपूर्वस्पर्धकचरमवर्गणातः 'प्राक्तना-ऽपूर्वादौ' प्राक्तनसमयकृतापूर्वस्पर्धकप्रथमवर्गणायामसंख्येयगुणहीनदलं ददातीति सम्बध्यते । 'ततः' प्रथमसमयकृता-ऽपूर्वस्पर्धकप्रथमवर्गणातो विशेषहीनक्रमेण यत्तदोः मिथः सापेक्षत्वात् तावद् ददाति 'यावत्पूर्वचरमा' यावत् पूर्वस्पर्धकचरमवर्गणा । भावार्थः पुनरयम्-अश्वकर्णकरणाद्धाद्वितीयसमये प्रथमसमयतो-ऽसंख्येयगुणं दलमपकृष्या-ऽसंख्येयगुणहीनान्यन्यान्यपूर्वस्पर्धकानि निर्वर्तयति । तत्र द्वितीयसमये निर्वर्त्यमानप्रथमाऽपूर्वस्पर्धकप्रथमवर्गणायां प्रभूतं दलिकं ददाति, ततो द्वितीयवर्गणायां विशेषहीनं दलिकं निक्षिपति, ततोऽपि तृतीयवर्गणायां विशेषहीनं दलं ददाति । एवं क्रमेण तावद् ददाति, यावद् द्वितीयसमयनिर्वर्त्यमानचरमा-ऽपूर्वस्पर्धकस्य चरमवर्गणा । द्वितीयसमयनिर्वर्त्यमान-चरमा-ऽपूर्वस्पर्धकचरमवर्गणातः प्रथमसमयकृतप्रथमा-ऽपूर्वस्पर्धकस्य प्रथमवर्गणायामसंख्येयगुणहीनं दलिकं ददाति, ततो द्वितीयवर्गणायां विशेषहीनं ददाति, ततस्तृतीयवर्गणायां विशेषहीनं ददाति । एवं विशेषहीनक्रमेण तावद् ददाति, यावद् प्रथमसमय-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कृतचरमाऽपूर्वस्पर्धकस्य चरमवर्गणा । ततः प्रथमपूर्वस्पर्धकस्य प्रथमवर्गणायां विशेषहीनं दलिकं निक्षिपति, ततोऽपि द्वितीयवर्गणायां विशेषहीनं ददाति । एवं विशेषहीनक्रमेण तावद् निक्षिपति, यावच्चरमनिक्षेपपूर्वस्पर्धकस्य चरमवर्गणा। उक्तं च **कषायप्राभृतचूर्णौ-"विदियसमये अपुव्वफद्दएसु पदेसग्गस्स दिज्जमाणयस्स सेढिपरूवणं वत्तइस्सामो, तं जहा-विदियसमए अपुव्वफद्दयाणमादिवग्गणाए पदेसग्गं बहुअं दिज्जदि, विदियाए वग्गणाए विसेसहीणं। एवमणंतरोवणिधाए विसेसहीणं दिज्जदि ताव, जाव जाणि विदियसमए अपुव्वाणि अपुव्वफद्दयाणि कदाणि, तदो चरिमादो वग्गणादो पढमसमए जाणि अपुव्वफद्दयाणि कदाणि, तेसिमादिवग्गणाए दिज्जदि पदेसग्गमसंखेज्जगुणहीणं। तदो विदियाए वग्गणाए विसेसहीणं दिज्जदि, तत्तो पाए अणंतरोवणिधाए सव्वत्थ विसेसहीणं दिज्जदि। पुव्वफद्दयाणमादिवग्गणाए विसेसहीणं दिज्जदि। सेसासु वि विसेसहीणं दिज्जदि ।"** इति । यथा द्वितीयसमये दीयमानदलप्ररूपणा कृता, तथा शेषसमयेष्वपि कर्तव्या, यावदश्वकर्णकरणाद्धाचरमसमयः ।

अथ द्वितीयादिसमयेषु दृश्यमानदलं प्ररूपयति–'**दिस्सइ**' इत्यादि, तत्र '**पुव्वापुव्वेसु**' '**त्ति**' 'पूर्वापूर्वेषु' पूर्वस्पर्धकेष्वपूर्वस्पर्धकेषु च विशेषहीनक्रमं दलिकं दृश्यते। तथाहि-अश्वकर्णकरणाद्धाया द्वितीयसमये निर्वर्त्यमानप्रथमा-ऽपूर्वस्पर्धकस्य प्रथमवर्गणायां प्रभूतं दलिकं दृश्यते, ततो द्वितीयवर्गणायां विशेषहीनं दृश्यते । ततोऽपि तृतीयस्यां विशेषहीनम् । एवं विशेषहीनक्रमेण तावद् वाच्यम्, यावद् द्वितीयसमये निवर्त्यमानचरमस्पर्धकस्य चरमवर्गणा । ततः प्रथमसमयकृतप्रथमाऽपूर्वस्पर्धकस्य प्रथमवर्गणायां विशेषहीनं दलिकं दृश्यते । ततो द्वितीयवर्गणायां विशेषहीनं दृश्यते । एवं विशेषहीनक्रमेण तावदभिधातव्यम्, यावच्चरमपूर्वस्पर्धकस्य चरमवर्गणा । अभ्यधायि च **कषायप्राभृतचूर्णौ–"विदियसमये अपुव्वफद्दएसु वा पुव्वफद्दएसु वा एक्केक्किस्से वग्गणाए जं दिस्सदि पदेसग्गं, तमपुव्वफद्दयआदिवग्गणाए बहुअं । सेसासु अणंतरोवणिधाए सव्वासु विसेसहीणं ।"** इति । अनेन क्रमेण दृश्यमानदलं तावन्निगदितव्यम्, यावदश्वकर्णकरणाद्धायाश्चरमसमयः ।

अश्वकर्णकरणाद्धायामनेन विधिना-ऽपूर्वस्पर्धकानि निर्वर्तयतो जीवस्य प्रथमेऽनुभागखण्डे विनष्टे लोभ-माया-मान-क्रोधानां यथाक्रममनुभागसत्कर्माऽनन्तगुणं भवति । उक्तं च **कषायप्राभृतचूर्णौ—"जहा तदियसमए एस कमो ताव, जाव पढममणुभागखंडयं चरिमसमयअणुक्किण्णं त्ति, तदो से काले अणुभागसंतकम्मे णाणत्तं । तं जहा-लोभे अणुभागसंतकम्मं थोवं, मायाए अणुभागसंतकम्ममणंतगुणं, माणस्साणुभागसंतकम्ममणंतगुणं, कोहस्साणुभागसंतकम्मणंतगुणं ।"** इति । एतच्च द्राघिष्ठतमगाथया प्राग् भावितम् ॥७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथा-ऽश्वकर्णकरणाद्धायां प्रथमे-ऽनुभागखण्डे विनष्टे-ऽष्टादशपदानामल्पबहुत्वमभिधित्सुराह—

इगखंडे पुण्णे-ऽप्पाबहुगं अट्ठारसपयाणं ।
कोहादीण अपुव्वाइं फड्डाइं विसेसअहियाइं ॥७४॥ (उद्गीतिः)
तत्तो एगदुगुणहाणिफड्डगाइं असंखगुणिआणि ।
तत्तो अणंतगुणिआ इगफड्डगवग्गणा होन्ति ॥७५॥
तत्तो य वग्गणा कोहअपुव्वगफड्डगाणऽणंतगुणा ।
माणादीण अपुव्वगफड्डाणं वग्गणा विसेसऽहिआ ॥७६॥ (गीतिः)
लोहस्स पुव्वफड्डाणि अणंतगुणाणि वग्गणा सिं य ।
एवं जाव अणंतगुणा कोहस्स खलु वग्गणा होंति ॥७७॥ (गीतिः)

एकखण्डे पूर्णे-ऽल्पबहुत्वमष्टादशपदानाम् ।
क्रोधादीनामपूर्वाणि स्पर्धकानि विशेषाधिकानि ॥७४॥
तत एकद्विगुणहानिस्पर्धकान्यसंख्यगुणितानि ।
तेभ्यो-ऽनन्तगुणिता एकस्पर्धकवर्गणा भवन्ति ॥७५॥
ताभ्यश्च वर्गणाः क्रोधा-ऽपूर्वस्पर्धकानामनन्तगुणाः ।
मानादीनामपूर्वस्पर्धकानां वर्गणा विशेषाधिकाः ॥७६॥
लोभस्य पूर्वस्पर्धकान्यनन्तगुणानि वर्गणास्तेषां च ।
एवं यावदनन्तगुणाः क्रोधस्य खलु वर्गणा भवन्ति ॥७७॥ इति पदसंस्कारः ॥

**'इगखंडे'** इत्यादि, 'एकखण्डे' **"भामा सत्यभामा"** इति न्यायेनाऽत्र खण्डशब्देना-ऽनुभागखण्डं ग्राह्यम्, ततश्चायमर्थः—अश्वकर्णकरणाद्धायामेकस्मिन्ननुभागखण्डे 'पूर्णे' निष्ठां गते घातिते इत्यर्थः, 'अष्टादशपदानाम्' अष्टादशसंख्यकानां पदानां क्रोधा-ऽपूर्वस्पर्धकादिरूपाणाम् 'अल्पबहुत्वं' स्तोकबहुत्वं भणितव्यमिति शेषः । तदेव दर्शयति–**'कोहादीण'** इत्यादि, 'क्रोधादीनाम्' क्रोधमानमायालोभरूपाणां 'अपूर्वाणि' प्रागुक्तस्वरूपाण्यपूर्वाणि स्पर्धकानि विशेषाधिकानि भवन्ति, विशेषाधिकक्रमेण तेषां निर्वृत्तेरुक्तत्वात् । एतदुक्तं भवति (१) संज्वलनक्रोधस्या-ऽपूर्वस्पर्धकानि सर्वस्तोकानि, (२) ततः संज्वलनमानस्या-ऽपूर्वस्पर्धकानि विशेषाधिकानि, (३) ततः संज्वलनमायाया अपूर्वस्पर्धकानि विशेषाधिकानि भवन्ति (४) ततो-ऽपि संज्वलनलोभस्या-ऽपूर्वस्पर्धकानि विशेषाधिकानि । (५) **'तत्तो'** इत्यादि, 'तेभ्यः' संज्वलनलोभस्या-ऽपूर्वस्पर्धकेभ्य एकद्विगुणहानिस्पर्धकानि 'असंख्यगुणितानि' असंख्येयगुणानि भवन्तीत्यर्थः, किं कारणम् ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति चेत्, उच्यते-एकद्विगुणहानिस्पर्धकानामसंख्येयभागमितान्येवा-ऽपूर्वस्पर्धकानि करोति । तेन पूर्वपदत इदं पदमसंख्येयगुणं सिध्यति । गुणकारश्च पल्योपमप्रथमवर्गमूलस्या-ऽसंख्येय-भागकल्पो ज्ञातव्यः । (६) **'तत्तो'** इत्यादि, 'तेभ्यः' एकप्रदेशद्विगुणहानिगतस्पर्धकेभ्य एकस्पर्धक-वर्गणा 'अनन्तगुणिताः' अनन्तगुणा भवन्ति । अत्र स्पर्धकशब्देन पूर्वस्पर्धकमपूर्वस्पर्धकं वा ग्राह्यम्, उभयत्राऽपि वर्गणानां समानत्वात् । यथैकद्विगुणहानिस्पर्धकान्यभव्येभ्योऽनन्तगुणानि सिद्धानां चाऽनन्तभागमितानि, तथैवैकस्मिन् स्पर्धके वर्गणा अपि अभव्येभ्यो-ऽनन्तगुणाः सिद्धानां चाऽ-नन्तभागकल्पा भवन्ति । किन्त्वेकद्विगुणहानिगतस्पर्धकत एकस्पर्धकगतवर्गणा अनन्तगुणा भवन्ती-त्येतदनेनाऽल्पबहुत्वेन ज्ञापितम् ।

(७) **'तत्तो य'** इत्यादि, 'ताभ्यश्च' एकस्पर्धकगतवर्गणाभ्यः **'कोहअपुव्वगफड्डुगाणं'** ति, अपूर्वशब्दात् "**'कश्च'**"(सिद्धहेम० ८-३-१)इत्यनेन प्राकृतसूत्रेण स्वार्थे कप्रत्ययः, एवमुत्तरत्रा-ऽपि,'क्रोधाऽपूर्वस्पर्धकानां' संज्वलनक्रोधसत्का-ऽपूर्वस्पर्धकानां वर्गणा अनन्तगुणा भवन्ति, चकारः 'तत्तो' इत्यस्योत्तरत्राऽनुवृत्त्यर्थः । पूर्वं ह्येकस्पर्धकगतवर्गणा उक्ताः, अस्मिन् पदे सकलाऽपूर्व-स्पर्धकगतवर्गणा भण्यन्ते, अपूर्वस्पर्धकानि त्वेकद्विगुणहानिगतस्पर्धकानामसंख्येयभागप्रमितानि गणनातश्चा-ऽनन्तानि क्रियन्ते । तेन पूर्वपदत इदं पदमनन्तगुणं भवति । गुणकारश्चाऽभव्ये-भ्योऽनन्तगुणः सिद्धानां चाऽनन्तभागमात्रो बोद्धव्यः । स पुनरेकप्रदेशद्विगुणहानिगतस्पर्धका-नामसंख्येयभागमात्रो भवति । ताभ्यः-क्रोधस्या-ऽपूर्वस्पर्धकगतवर्गणाभ्यः **'माणादीण'** इत्यादि, **'मानादीनां'** मान-माया-लोभलक्षणानां क्रमेण सकलानामपूर्वस्पर्धकानां वर्गणा विशेषाधिका भवन्ति, क्रोधतो मानादीनामपूर्वस्पर्धकानां क्रमेण विशेषाधिकत्वात्, सर्वत्रैकस्मिन् स्पर्धके वर्गणानां समानत्वाच्च ।

तथाहि–(८) संज्वलनक्रोधस्य सकला-ऽपूर्वस्पर्धकगतवर्गणातः संज्वलनमानस्य सकला-ऽपू-र्वस्पर्धकगतवर्गणा विशेषाधिका भवन्ति, क्रोधतो मानस्या-ऽपूर्वस्पर्धकानां विशेषाधिकत्वात् ।

(९) मानस्य सर्वा-ऽपूर्वस्पर्धकवर्गणातो मायाया निखिला-ऽपूर्वस्पर्धकगतवर्गणा विशेषा-धिकाः, मानतो मायाया अपूर्वस्पर्धकानां विशेषाधिकत्वात् ।

(१०) ततो-ऽपि लोभस्य सकलाऽपूर्वस्पर्धगतवर्गणा विशेषाधिकाः, मायातो लोभस्य निखिला-ऽपूर्वस्पर्धकानां विशेषाधिकत्वात् ।

(११) ताभ्यो 'लोभस्य' संज्वलनलोभस्य पूर्वस्पर्धकान्यनन्तगुणानि वक्तव्यानि । कथ-मेतदवसीयते ? इति चेत्, शृणुत-लोभस्या-ऽपूर्वस्पर्धकानामेकद्विगुणहानिगतस्पर्धकसत्का-ऽसंख्येय-भागमात्रत्वात् सकला-ऽपूर्वस्पर्धकतः पूर्वस्पर्धकसत्कायामेकस्यामेव द्विगुणहानौ असंख्येयगुणानि पूर्वस्पर्धकानि तिष्ठन्ति । पूर्वस्पर्धकविषयकाणां नानाद्विगुणहानीनामनन्तत्वात् सर्वा-ऽपूर्वस्पर्धकतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वपूर्वस्पर्धकान्यनन्तगुणानि भवन्ति, तथैकस्पर्धकगतवर्गणातो नानाद्विगुणहानीनामनन्तगुणत्वात् सर्वा-ऽपूर्वस्पर्धकगतवर्गणातो लोभस्य पूर्वस्पर्धकान्यनन्तगुणानि सिध्यन्ति ।

न्यासः—

| | | |
|---|---|---|
| | सकलपूर्वस्पर्धकानि | = एकद्विगुणहानिगतस्पर्धकानि × नानाद्विगुणहानयः |
| | नानाद्विगुणहानयः | = एकस्पर्धकगतवर्गणाः × अनन्तराशिः |
| ∴ | सकलानि पूर्वस्पर्धकानि | = एकद्विगुणहानिगतस्पर्धकानि × एकस्पर्धकगतवर्गणाः × अनन्तराशिः |
| | निखिला-ऽपूर्वस्पर्धकानि | = एकद्विगुणहानिगतस्पर्धकानि ÷ असंख्यातम् |
| | सर्वा-ऽपूर्वस्पर्धकवर्गणाः | = $\frac{\text{एकद्विगुणहानिगतस्पर्धकानि}}{\text{असंख्यातम्}}$ × एकस्पर्धकगतवर्गणाः |

∴ सर्वाऽपूर्वस्पर्धकगतवर्गणातो लोभस्य पूर्वस्पर्धकानि

$= \frac{\text{असंख्यातम्}}{\text{१ द्विगुणहानिस्पर्धकानि} \times \text{१ स्पर्धकगतवर्गणाः}} \times \text{१ द्विगुणहानिस्पर्धकानि} \times \text{१ स्पर्धकवर्गणाः} \times \text{अनंतराशिः}$

इत्येतावद्गुणानि

= असंख्यातम् × अनन्तराशिरित्येतावद्गुणानि भवन्ति ।

(१२) '**सिं च वग्गणा**' इत्यादि 'तेषां' लोभपूर्वस्पर्धकानां च वर्गणा अनन्तगुणा भवन्ति 'अणंतगुणाणि' इत्यस्य लिङ्गविपरिणामात् 'अनन्तगुणा' इति पदं लब्धम् । लोभसकलपूर्वस्पर्धकेभ्यो लोभसर्वपूर्वस्पर्धकानां वर्गणा अनन्तगुणा भवन्तीत्यर्थः । गुणकारश्चात्रैकस्पर्धकगतवर्गणा-राशिप्रमाणो ज्ञेयः । 'एवं' यथा लोभस्य पूर्वस्पर्धकानि तद्वर्गणाश्च क्रमेणाऽनन्तगुणानि निगदितानि, तथैव मायादीनां यथाक्रमं पूर्वस्पर्धकानि तद्वर्गणाश्चाऽनन्तगुणानि तावद्वक्तव्यानि, यावत् क्रोधस्य पूर्वस्पर्धकानां वर्गणाः खलु अनन्तगुणा भवन्ति । अयं भावः—

(१३) लोभस्य सकलपूर्वस्पर्धकगतवर्गणातो मायायाः पूर्वस्पर्धकान्यनन्तगुणानि वाच्यानि । न च कथमेतदवसीयते ? इति वाच्यम् , प्रथमे-ऽनुभागखण्डे घातिते लोभादीनामनुक्रमं पूर्वस्पर्धकानामनन्तगुणत्वदर्शनात् । न च भवतु नाम संज्वलनलोभपूर्वस्पर्धकतो मायायाः पूर्वस्पर्धकान्यनन्तगुणानि प्राक् प्रतिपादितत्वात् । संज्वलनलोभपूर्वस्पर्धकगतवर्गणातो मायायाः पूर्वस्पर्धकान्यनन्तगुणानि कुतो भवन्ति ? इति वाच्यम्, एकस्पर्धकगतवर्गणागुणकारतो पूर्वस्पर्धकगुणकारस्या-ऽनन्तगुणेन बृहत्तरत्वात् । अयं हेतुरग्रे-ऽपि यथास्थानं योजनीयः ।

(१४) मायापूर्वस्पर्धकतो मायाया वर्गणा अनन्तगुणा निश्चेतव्याः । गुणकारश्चैकस्पर्धकगतवर्गणाप्रमाणो बोद्धव्यः ।

(१५) ततो मानस्य पूर्वस्पर्धकान्यनन्तगुणानि बोद्धव्यानि, कारणं तु त्रयोदशपदवद्भणितव्यम् ।

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

(१६) ततो मानस्य पूर्वस्पर्धकगतवर्गणा अनन्तगुणा अभिधातव्याः । गुणकारश्चैकस्पर्धकगतवर्गणाराशिमात्रो बोध्यः ।

(१७) ततः क्रोधस्य पूर्वस्पर्धकान्यनन्तगुणानि निगदितव्यानि । हेतुस्तु त्रयोदशपदवद् बोधनीयः ।

(१८) ततः क्रोधस्य पूर्वस्पर्धकगतवर्गणा अनन्तगुणा अभिधातव्याः । गुणकारश्चैकस्पर्धकवर्गणामितो ज्ञातव्यः ।

उक्तं च कषायप्राभृतचूर्णौ—"**अस्सकण्णकरणस्स पढमे अणुभागखंडए हदे अणुभागस्स अप्पाबहुअं वत्तइस्सामो । तं जहा (१) सव्वत्थोवाणि कोहस्स अपुव्वफद्दयाणि, (२) माणस्स अपुव्वफद्दयाणि विसेसाहियाणि, (३) मायाए अपुव्वफद्दयाणि विसेसाहियाणि, (४) लोभस्स अपुव्वफद्दयाणि विसेसाहियाणि, (५) एयपदेसगुणहाणिट्ठाणंतरफद्दयाणि असंखेज्जगुणाणि (६) एयफद्दयवग्गणाओ अणंतगुणाओ, (७) कोधस्स अपुव्वफद्दयवग्गणाओ अणंतगुणाओ, (८) माणस्स अपुव्वफद्दयवग्गणाओ विसेसाहियाओ, (९) मायाए अपुव्वफद्दयवग्गणाओ विसेसाहियाओ,(१०) लोभस्स अपुव्वफद्दयवग्गणाओ विसेसाहियाओ । (११) लोभस्स पुव्वफद्दयाणि अणंतगुणाणि, (१२) तेसिं चेव वग्गणाओ अणंतगुणाओ, (१३) मायाए पुव्वफद्दयाणि अणंतगुणाणि, (१४) तेसिं चेव वग्गणाओ अणंतगुणाओ, (१५) माणस्स पुव्वफद्दयाणि अणंतगुणाणि, (१६) तेसिं चेव वग्गणाओ अणंतगुणाओ, (१७) कोहस्स पुव्वफद्दयाणि अणंतगुणाणि, (१८) तेसिं चेव वग्गणाओ अणंतगुणाओ ।**" इति । ७४-७५-७६-७७ ।।

अश्वकर्णकरणाद्धायां प्रथमेऽनुभागखण्डे व्रजिते द्वितीयमनुभागखण्डं घातयितुमारभ्यते । एवं सहस्रैरनुभागखण्डैरश्वकर्णकरणाद्धासत्का प्रथमस्थितिघाताद्धा प्रथमस्थितिबन्धाद्धा च पूर्यते । एवं प्रतिसमयमसंख्येयगुणहीनान्यसंख्येयगुणहीनानि नवान्यपूर्वस्पर्धकानि कुर्वन् स्थितिघातसहस्रैरश्वकर्णकरणाद्धायाश्चरमसमयं प्राप्नोति, तदानीं स्थितिबन्धं व्याजिहीर्षुराह—

**चरिमे समये मोहस्स अट्ठवस्सपमिओ हवइ बंधो ।**
**इयराण संखवस्ससहस्साइं भणिमु ठिइसंतं ।।७८।।**

चरमे समये मोहस्याऽष्टवर्षप्रमितो भवति बन्धः ।
इतरेषां संख्यवर्षसहस्राणि भणामः स्थितिसत्त्वम् ।।७८।। इति पदसंस्कारः ।।

'**चरिमे समये**' इत्यादि, 'चरमे समये' अश्वकर्णकरणाद्धाचरमसमये 'मोहस्य' संज्वलन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**क्रोधमानमायालोभलक्षणस्य** 'बन्धः' स्थितिबन्धो-ऽष्टवर्षप्रमितो भवति । उक्तं च **कषायप्राभृतचूर्णौ–"अस्सकण्णकारगस्स चरिमसमये संजलणाणं ट्ठिदिबंधो अट्ठवस्साणि ।"** इति । अश्वकर्णकरणाद्धाप्रथमसमये यो-ऽन्तर्मुहूर्तन्यूनषोडशवर्षप्रमाणः स्थितिबन्ध आसीत्, स प्रतिस्थितिबन्धाद्धमन्तर्मुहूर्तेन हीयमानो भवन्नश्वकर्णकरणाद्धाचरमसमये-ऽष्टवार्षिको जायते इत्यर्थः ।

**'इयराण'** इत्यादि, 'इतरेषां' ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तराय-नाम-गोत्रकर्मणां संख्यवर्षसहस्राणि स्थितिबन्धो भवति । उक्तं च **कषायप्राभृतचूर्णौ--"सेसाणं कम्माणं ट्ठिदिबंधो संखेज्जाणि वस्ससहस्साणि ।"** इति । अश्वकर्णकरणाद्धाप्रथमसमये यः संख्यातसहस्रवर्षमात्रः स्थितिबन्ध आसीत्, स प्रत्यन्तर्मुहूर्तं संख्येयगुणहीनो भवन् संख्यातेषु स्थितिबन्धसहस्रेषु गतेष्वपि संख्यातवर्षसहस्रप्रमाण एव भवतीति फलितार्थः । सम्प्रति स्थितिसत्त्वं वक्तुकामः प्रतिजानीते–**'भणिमु'** इत्यादि, स्थितिसत्त्वं 'भणामः' प्रतिपादयिष्यामः ।

अथ प्रतिज्ञातमेवाह—

**घाईण संखवाससहस्साणि पराण-ऽसंखवासाइं !**
**एवं हयकण्णकरणअद्धं खलु परिसमावेइ ॥७९॥**

घातिनां संख्यवर्षसहस्राणि परेषामसंख्यवर्षाणि ।
एवं हयकर्णकरणाद्धां खलु परिसमापयति ॥७९॥ इति पदसंस्कारः ।

**'घाईण'** इत्यादि, अश्वकर्णकरणाद्धाचरमसमये 'घातिनां' ज्ञानावरण-दर्शनावरणा-ऽन्तराय-मोहनीयकर्मणां संख्यवर्षसहस्राणि स्थितिसत्त्वं भवति । उक्तं च **कषायप्राभृतचूर्णौ--"चउण्हं घादिकम्माणं ट्ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि ।"** इति । इदमत्र हृदयम्-अश्वकर्णकरणाद्धाप्रथमसमये घातिचतुष्टयस्य संख्येयसहस्रवर्षमात्रं स्थितिसत्त्वमासीत् ,तत् प्रतिस्थितिघातं संख्येयगुणहीनं भवत् संख्यातसहस्रेषु स्थितिघातेषु व्रजितेष्वपि चरमसमये संख्येयसहस्रवर्षप्रमाणं भवति । **'पराण'** इत्यादि, 'परेषाम्' अघातिनां नामगोत्रवेदनीयरूपाणामित्यर्थः, असंख्यवर्षाणि स्थितिसत्त्वं भवति । उक्तं च **कषायप्राभृतचूर्णौ–"णामागोदवेदणीयाणं ट्ठिदिसंतकम्ममसंखेज्जाणि वस्ससहस्साणि ।"** इति । एतदुक्तं भवति-अश्वकर्णकरणाद्धाप्रथमसमये यदघातिकर्मणामसंख्यातवर्षप्रमाणं स्थितिसत्त्वमासीत्, तत् प्रतिस्थितिघातेना-ऽसंख्येयगुणहीनं भवत् संख्यातसहस्रस्थितिघातेषु व्यतिक्रान्तेष्वपि चरमसमये-ऽसंख्येयवर्षप्रमितं तिष्ठति ।

**'एवं'** इत्यादि, 'एवं' प्रागुक्तविधिना 'हयकर्णकरणाद्धाम्' अश्वकर्णकरणाद्धामन्तर्मुहूर्तप्रमाणां खलु 'समापयति' निष्ठां गमयति ॥७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अश्वकर्णकरणाद्धां निरूप्य "किट्टिकरण" इत्यनेनोद्दिष्टं पञ्चमाधिकारं किट्टिकरणाद्धालक्षणं व्याचिख्यासुराह--

**पुण्णे हयकण्णे आढवेइ किट्टिकरणं तम्मि ।**
**निव्वत्तइ पुव्वापुव्वफड्डगत्तो य किट्टीओ ॥८०॥ (उपगीतिः)**

पूर्णे हयकर्णे आरभते किट्टिकरणं तस्मिन् ।
निर्वर्तयते पूर्वाऽपूर्वस्पर्धकेभ्यश्च किट्टीः ॥८०॥ इति पदसंस्कारः ।

'पुण्णे' इत्यादि, तत्र 'हयकण्णे' त्ति 'हयकर्णे' 'भीमो भीमसेनः' इति न्यायेन हयकर्णकरणकाले 'पूर्णे' व्यतिक्रान्ते क्षपकश्रेणिं प्रतिपन्नः किट्टिकरणम् 'आढवेइ' त्ति आरभते, किट्टिकरणकालं प्रविशतीत्यर्थः। इदमत्र हृदयम्-हास्यषट्के सर्वथा क्षीणे यः क्रोधवेदनकालः, तस्य त्रयो विभागाः कर्तव्याः । तत्राद्यो विभागोऽश्वकर्णकरणाद्धा, द्वितीयो विभागः किट्टिकरणाद्धा, तृतीयश्च किट्टिवेदनाद्धा । उक्तं च कषायप्राभृतचूर्णौ-"**छसु कम्मेसु संछुद्धेसु जो कोधवेदगद्धा, तिस्से कोधवेदगद्धाए तिण्णि भागा । जो तत्थ पढमतिभागो (सो) अस्सकण्णकरणद्धा, विदियो तिभागो किट्टीकरणद्धा, तदियतिभागो किट्टीवेदगद्धा ।**" इति । इदन्त्ववधेयम्—यथाऽस्मत्कृतोपशमनाकरणटीकायां चारित्रमोहोपशमनाधिकारेऽश्वकर्णकरणाद्धादयो यथाक्रमं विशेषहीना उक्ताः, तथैवात्राऽप्यश्वकर्णकरणाद्धा, या हास्यषट्के क्षीणे शेषक्रोधवेदनाद्धायाः किञ्चिदधिकत्रिभागमात्रा, सा प्रभूता । ततो विशेषहीना किट्टिकरणाद्धा किञ्चिन्न्यूनत्रिभागप्रमिता, ततोऽपि किट्टिवेदनाद्धा किञ्चिन्न्यूनत्रिभागमिता विद्यमानाऽपि विशेषहीना संभवतीति वयं ब्रूमः ।

किट्टिकरणाद्धां प्रविष्टः सन् किं करोति ? इत्याह-'**तम्मि**' इत्यादि, 'तस्मिन्' किट्टिकरणकाले पूर्वापूर्वस्पर्धकेभ्यः किट्टीः 'निर्वर्तयते' करोति । इदमुक्तं भवति—किट्टयो नाम संज्वलनानां पूर्वाऽपूर्वस्पर्धकेभ्यो वर्गणा गृहीत्वा तासामनन्तगुणहीनरसतामापाद्यैकोत्तररसाविभागवृद्धेः परित्यागेनाऽनन्तगुणबृहदन्तरालतया व्यवस्थापनम् । इदमत्र हृदयम्—अपूर्वस्पर्धकानि कुर्वन् पूर्वस्पर्धकेभ्यो वर्गणा गृहीत्वाऽनन्तगुणहीनरसतामापाद्य ता एकोत्तररसाऽविभागवृद्ध्या स्थापयति स्म । असत्कल्पनया पूर्वस्पर्धकसत्कानां यासां वर्गणानामनुभागाऽविभागा अशीत्युत्तरषोडशशतानि, एकाशीत्यधिकषोडशशतानि, (१६८०, १६८१) इत्यादि, आसन्, अपूर्वस्पर्धकेषु तासामेवाऽनन्तगुणहीनरसतामापाद्यैकोत्तरवृद्ध्या रसाविभागा अष्टाषष्ट्युत्तरशतम्, एकोनसप्तत्यधिकशतम् (१६८, १६९) इत्यादि, स्थाप्यन्ते स्म । किट्टिकरणाद्धायां तु सर्वजघन्याऽपूर्वस्पर्धकतोऽप्यनन्तगुणहीनरसतामापाद्य पूर्वापूर्वस्पर्धकानां वर्गणा एकोत्तररसाऽविभागवृद्धिपरि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यागेन व्यवस्थाप्य लोभजघन्यकिट्टेरारभ्य पूर्वपूर्वतो नियमेनाऽनन्तगुणवृद्धया तावद् विन्यस्यति, यावत् क्रोधस्योत्कृष्टकिट्टिः। असत्कल्पनया किट्टिषु रसाऽविभागाः पञ्च, विंशतिः (५, २०) इत्यादि। तथा-ऽपूर्वस्पर्धकप्रथमवर्गणातः क्रोधस्य सर्वोत्कृष्टा किट्टिरप्यनन्तगुणहीना वर्तते। उक्तं च **कषायप्राभृतचूर्णौ–"लोभस्स जहण्णिया किट्टी अणुभागेहिं थोवा, विदियकिट्टी अणुभागेहिं अणंतगुणा, तदिया किट्टी अणुभागेहिं अणंतगुणा, एवमणंतराणंतरेण सव्वत्थ अणंतगुणा जाव कोधस्स चरिमकिट्टि त्ति। उक्कस्सिया वि किट्टी आदिफद्दयआदिवग्गणाए अणंतभागो।"** इति। इह संज्वलानानामनुभागसत्कर्माऽत्यन्तं कृश्यते-अल्पीक्रियते, तस्मात् किट्टिरिति व्यपदिश्यते इति संक्षेपः। उक्तं च **कषायप्राभृतचूर्णौ— 'किसं कम्मं कदं जम्हा, तम्हा किट्टी।"** इति। किट्टिकरणाद्धाप्रथमसमये संज्वलनचतुष्कस्य पूर्वापूर्वस्पर्धकेभ्यो दलं गृहीत्वा निरुक्तस्वरूपाः किट्टीर्निर्वर्तयति।

ननु संज्वलनचतुष्कस्य पूर्वापूर्वस्पर्धकेभ्यो दलिकमादाय किट्टीर्निर्वर्तयति, तर्हि पूर्वापूर्वस्पर्धकेषु केन क्रमेण प्रदेशाग्रं विद्यते ? इति चेत्, शृणुत-संज्वलनक्रोधस्य सर्वपूर्वापूर्वस्पर्धकेषु सर्वप्रभूतं दलं तिष्ठति, ततः संख्येयगुणहीनं संज्वलनलोभस्य निखिलपूर्वापूर्वस्पर्धकेषु, ततो विशेषहीनं संज्वलनमायाया निखिलपूर्वापूर्वस्पर्धकेषु, ततोऽपि विशेषहीनं संज्वलनमानस्य सर्वपूर्वापूर्वस्पर्धकेषु तिष्ठति। कथमेतदवसीयते ? इति चेद्, उच्यते-अन्तरकरणे कृते सत्यानुपूर्वीसंक्रमदर्शनात् षण्णोकषायाणां पुरुषवेदस्य च दलं संज्वलनक्रोधे एव संक्रमयति। तेन संज्वलनक्रोधस्य पूर्वापूर्वस्पर्धकेषु सर्वप्रभूतं दलं भवति। तथाहि—प्राक् चारित्रमोहनीयसत्तागतदलं विभागद्वये विभक्तमासीत्, एको भागः कषायाणामासीत्, अन्यः पुनर्नोकषायाणाम्। तत्राऽपि कषायाणां दलं चारित्रमोहसकलदलस्य किञ्चिदधिकार्धप्रमाणमासीत्। नोकषायाणां पुनश्चारित्रमोहसत्कसकलदलस्य किञ्चिन्न्यूनार्धप्रमितमासीत्। अनन्तानुबन्ध्यप्रत्याख्यानावरणप्रत्याख्यानावरणानां क्षीणत्वात् तेषां प्रभूतं दलं संक्रमेण संज्वलनक्रोधमानमायालोभैर्लब्धम्। तेन चारित्रमोहनीयसत्तागतदलसत्का-ऽर्धदलं यत् कषायसत्कमासीत्, तद्दलं संज्वलनचतुष्टये विभक्तव्यम्। विभक्ते च संज्वलनक्रोधेन मोहनीयसत्तागतसकलदलस्या-ऽष्टभागकल्पं दलं प्राप्तम्। एवं संज्वलनमानेन संज्वलनमायायाः सर्वमोहनीयदलस्याष्टभागदेशीयं प्राप्तम्, लोभेन तु मोहनीयसर्वदलस्य किञ्चिदधिकैका-ऽष्टभागप्रमाणं दलं प्राप्तम्, सत्कर्मणि लोभदलस्येतरतः सर्वप्रभूत्वदर्शनात्। **तथा चाऽत्राऽल्पबहुत्वम्**–संज्वलनलोभस्य प्रभूतं दलम्, ततो विशेषहीनं संज्वलनमायायाः, ततोऽपि विशेषहीनं क्रोधस्य, ततोऽपि मानस्य विशेषहीनं भवति। एवं प्रत्येकस्मिन् क्रोधादिकषाये आसन्नाष्टभागप्रमाणं दलं विद्यते। नोकषायसत्कस्य मोहनीयसर्वदलसत्ककिञ्चिन्न्यूनार्धमात्रदलस्य संज्वलनक्रोधे संक्रमेण प्रक्षेपात् किञ्चिन्न्यूनपञ्चाष्टभागप्रमाणदलं जायते। लोभे तु किञ्चिदधिकैकाष्टभागप्रमितं तिष्ठति, मानमाययोः पुनः किञ्चिन्न्यूनाष्टभाग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणं विद्यते। तेन क्रोधस्य पूर्वापूर्वस्पर्धकेषु सर्वप्रभूतं दलं विद्यते, तच्च किञ्चिन्न्यूनपञ्चाष्टभाग-प्रमाणम्। ततः संख्येयगुणहीनं लोभस्य पूर्वापूर्वस्पर्धकेषु विद्यते, किञ्चिदधिकाष्टभागप्रमाणत्वात् ततो विशेषहीनं मायायाः पूर्वापूर्वस्पर्धकेषु, किञ्चिन्न्यूनाष्टभागप्रमितत्वात्। ततोऽपि मानस्य पूर्वापूर्वस्पर्धकेषु किञ्चिन्न्यूनाष्टभागप्रमितं भवदपि विशेषहीनं विद्यते।

न्यास :—

असत्कल्पनया मोहनीयसत्तागतदलम् = 'क' इति कल्प्यते। तदर्धम् $= \frac{\text{क}}{\text{२}}$

$\because$ नोकषायाणां दलम् $= \frac{\text{क}}{\text{२}}$ − किञ्चिद्दलम्।

$\therefore$ कषायाणां दलम् $= \frac{\text{क}}{\text{२}}$ + ,, ,,

$\because$ कषायचतुष्कस्य दलम् = आसन्न $\frac{\text{क}}{\text{२}}$

$\therefore$ एकैककषायस्य दलम् = आसन्न $\frac{\text{क}}{\text{२} \times \text{४}}$

= आसन्न $\frac{\text{क}}{\text{८}}$

तत्र लोभदलस्य किञ्चिदधिकत्वात् लोभदलम् $= \frac{\text{क}}{\text{८}}$ + किञ्चिद्दलम्

$\therefore$ मायामानक्रोधानामेकैकस्य दलम् $= \frac{\text{क}}{\text{८}}$ — किञ्चिद्दलम्

संज्वलनक्रोधे नोकषायदलप्रक्षेपात् क्रोधदलम् = $\left(\frac{\text{क}}{\text{२}}\right.$ − किञ्चिद्दलम्$\left.\right)$ + $\left(\frac{\text{क}}{\text{८}}\right.$ − किञ्चिद्दलम्$\left.\right)$

$= \frac{\text{क}}{\text{२}} + \frac{\text{क}}{\text{८}}$ —(किञ्चिद्दलम् + किञ्चिद्दलम्)

$= \frac{\text{५ क}}{\text{८}}$ —किञ्चिद्दलम्

संज्वलनक्रोधे दलम् $= \frac{\text{५ क}}{\text{८}}$ — किञ्चिद्दलम्। तच्च प्रभूतं भवति।

,, लोभे ,, $= \frac{\text{क}}{\text{८}}$ + ,, ,, । तेन पूर्वतः संख्यातगुणहीनम्।

,, मायायां ,, $= \frac{\text{क}}{\text{८}}$ — ,, ,, । तेन पूर्वतो विशेषहीनम्।

,, माने ,, $= \frac{\text{क}}{\text{८}}$ — ,, ,, । किन्तु पूर्वतो विशेषहीनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## किट्टिकरणाद्धामाश्रित्य चित्रम्




सङ्केतस्पष्टीकरणम्—

००० अनेन चिह्नेन किट्टिकरणाद्धाप्रथमसमयः सूचितः। किट्टिकरणाद्धाप्रथमसमयतः प्रभृति संज्वलनचतुष्कस्य द्वितीयस्थितौ संज्वलनक्रोध-मान-माया-लोभानां पूर्वापूर्वस्पर्धकेभ्यो दलमादाय किट्टीः कर्तुमारभते।

१–किट्टिकरणाद्धायां पूर्वापूर्वस्पर्धकानि वेदयति, न तु किट्टीः, वक्ष्यते चैतद् चतुर्दशाधिकशततमगाथया (११४)।

* अनेन चिह्नेन किट्टिकरणाद्धायाश्चरमसमयः सूचितः।

△ अनेन चिह्नेन पूर्वापूर्वस्पर्धकरूपेण विद्यमानस्य क्रोधस्य प्रथमस्थितिः सूचिता।

★

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

संज्वलनक्रोधादिचतुष्टयस्य पूर्वापूर्वस्पर्धकस्थसर्वदलमुत्कर्षणापकर्षणभागहारेण विभज्यैकभागमपकर्षति। 卐 अपकृष्टदलं पुनः पल्योपमाऽसंख्येयभागेन खण्डयित्वैकखण्डं किट्ट्यर्थं गृह्णाति, शेषाणि बहूनि खण्डानि पूर्वापूर्वस्पर्धकेषु प्रक्षिपति। तत्र किट्टिकरणाद्धाप्रथमसमये संज्वलनक्रोधस्य पूर्वापूर्वस्पर्धकेभ्यो दलं गृहीत्वा संज्वलनक्रोधस्य किट्टीः करोति, एवं संज्वलनमानस्य पूर्वापूर्वस्पर्धकेभ्यो दलमादाय संज्वलनमानस्य किट्टीर्निर्वर्तयति, संज्वलनमायायाः पूर्वापूर्वस्पर्धकेभ्यो दलिकं गृहीत्वा संज्वलनमायायाः किट्टीरुत्पादयति। संज्वलनलोभस्य पूर्वापूर्वस्पर्धकेभ्यः प्रदेशाग्रमादाय संज्वलनलोभस्य किट्टीर्जनयति। उक्तं च **कषायप्राभृतचूर्णौ–"पढमसमयकिट्टीकारगो कोधादो पुव्वफद्दएहिंतो च अपुव्वफद्दएहिंतो च पदेसग्गमोकड्डियूण कोहकिट्टीओ करेदि। माणादो ओकड्डियूण माणकिट्टीओ करेदि। मायादो ओकड्डियूण मायाकिट्टीओ करेदि, लोभादो ओकड्डियूण लोभकिट्टीओ करेदि।"** इति ॥८०॥

**एवं शतकचूर्णावप्युक्तम्—**

**"तत्तो अपुव्वफड्डगहेट्ठा बहुगा करेइ किट्टीओ।**
**पुव्वाओ य अपुव्वेहिंतो वोकड्ढिय पएसे ॥१॥" इति।**

पश्यन्तु पाठका यन्त्रकम्–१४।इति ॥८०॥

अथोत्कृष्टकिट्टेरनुभागं किट्टिपरिमाणं च दर्शयितुकाम आह—

## जेट्ठा किट्टी उ अणंतगुणूणा पढमवग्गणाहिंतो।
## किट्टीओ फड्डस्स अणंतिमभागपमिआ होंति ॥८१॥

ज्येष्ठा किट्टिस्त्वनन्तगुणोना प्रथमवर्गणायाः।
किट्टयः स्पर्धकस्याऽनन्ततमभागप्रमिता भवन्ति ॥८१॥ इति पदसंस्कारः।

**'जेट्ठा'** इत्यादि, तत्र **'पढमवग्गणाहिंतो'** त्ति 'प्रथमवर्गणायाः' अपूर्वस्पर्धकस्य

---

卐 अभ्यधायि च जयधवलाकारैरपि-"पढमसमयकिट्टीकारगो पुव्वापुव्वफद्दएहिंतो **पदेसग्गस्सासंखेज्जदिभागमोकड्डियूण** पुण ओकड्डिदसयलदव्वस्सासंखेज्जदिभागमेत्तं दव्वं किट्टीसु णिक्खिवदि।" इति। क्षपणासारकृद्भिस्तु अपकृष्टदलस्य बहुभागमात्रं दलं किट्टिष्वेकभागमात्रं च पूर्वापूर्वस्पर्धकेषु ददातीति भणितम्। अक्षराणि त्वेवम्—

"कोहादीणं सगसगपुव्वापुव्वगयफड्डयेहिंतो।
उक्कड्डिदूण दव्वं ताणं किट्टी करेदि कमे ॥ १ ॥
उक्कट्टिददव्वस्स य पल्लासंखेज्जभागबहुभागो।
बादरकिट्टिणिबद्धो फड्डयगे सेसइगिभागो ॥२॥" इति।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

प्रथमवर्गणात इत्यर्थः, 'अनन्तगुणोना' अनन्तगुणहीना 'ज्येष्ठा किट्टिस्तु' क्रोधस्य सर्वोत्कृष्टा किट्टिस्तु भवति, जघन्यवर्गणागतानुभागतोऽनन्तगुणहीनरसतामापाद्य किट्टिनिर्वर्तनस्य प्रतिपादितत्वात् ।

ननु प्रथमसमये कियत्यः किट्टयो भवन्ति ? इत्याह— **किट्टीओ'** इत्यादि, 'किट्टयः' चतुर्णामपि संज्वलनानां किट्टयः स्पर्धकस्याऽनन्ततमभागप्रमिता भवन्ति । इदमुक्तं भवति-एकस्मिन् स्पर्धके वर्गणा अभव्येभ्योऽनन्तगुणाः सिद्धानां चाऽनन्ततमभागमिता भवन्ति, तासामेकाऽनन्ततमभागप्रमाणाः किट्टयो निर्वर्त्यन्ते। उक्तं च **कषायप्राभृतचूर्णौ**–"**एदाओ सव्वाओ वि चदुविहाओ किट्टीओ एयफद्दयवग्गणाणमणंतभागो पगणणादो** ।" इति ॥८१॥

अथ क्रोधादीनामेकैककषायस्य किट्टिपरिमाणं निर्दिदिक्षुराह—

**एगेगस्स कसायस्स तिण्णि तिण्णि अहवाऽणंता ।**
**संगहकिट्टी तिन्नि अवंतरकिट्टी अणंताओ ॥८२॥ (उपगीतिः)**

एकैकस्य कषायस्य तिस्रस्तिस्रो-ऽथवा-ऽनन्ताः ।
संग्रहकिट्टयस्तिस्रो-ऽवान्तरकिट्टयो-ऽनन्ताः ॥८२॥ इति पदसंस्कारः ।

**'एगेगस्स'** इत्यादि, किट्टिकरणाद्धायाम् "एकैकस्य कषायस्य' संज्वलनक्रोधादीनामेकैकस्य कषायस्येत्यर्थः 'तिस्रस्तिस्रः' **"वीप्सायाम्"** (सिद्धहेम० ७-४-८०) इत्यनेन द्विर्वचनम्, किट्टयो भवन्ति, प्रथमादिसंग्रहकिट्टिभेदात् । उक्तं च **सप्ततिकाचूर्णौ**–"**एक्केक्कस्स कसायस्स तिण्णि तिण्णि—पढमकिट्टी, बितियकिट्टी, ततियकिट्टि त्ति** ।" इति । **'अहवा'** त्ति 'अथवा' प्रकारान्तरेण क्रोधादीनामेकैककषायस्या-ऽनन्ताः किट्टयो जायन्ते ।

ननु प्रकारद्वयेन किट्टिपरिमाणकथने कोऽभिप्रायः ? इत्यत आह-'**संगह०**' इत्यादि, 'संग्रहकिट्टयस्तिस्रः' एकैककषायस्य यास्तिस्रस्तिस्रः किट्टयः प्रोक्ताः, तास्तिस्रः किट्टयः संग्रहकिट्टय इति व्यपदिश्यते इत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ**–"**एक्केक्कम्हि कसाए तिण्णि तिण्णि संगहकिट्टीयो त्ति एवं तिग तिग** ।" इति । '**अवंतर०**' इत्यादि, 'अवान्तरकिट्टयोऽनन्ताः' एकैकस्य कषायस्य या अनन्ताः किट्टय उत्पद्यन्ते, ता अवान्तरकिट्टयो भण्यन्ते, गणनातश्च ता अनन्ता भवन्ति । कुतः ? इति चेत्, उच्यते—एकस्यां संग्रहकिट्टौ अनन्तानामवान्तरकिट्टीनामुपलम्भादेकैककषायस्या-ऽनन्ताकिट्टयः सूपपद्यन्ते । यदुक्तं **कषायप्राभृतचूर्णौ**–"**एक्केक्किस्से संगहकिट्टीए अणंताओ त्ति एदेण अधवा अणंताओ जादा** ।" इति । ॥८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ क्रोधादीनामुदयेन प्रतिपन्नः कियतीः संग्रहकिट्टीः करोति ? इत्यतः प्राह—

**कोहादीणं उदयेणं पडिवन्नस्स कमसो हि ।**
**बारस णव च्छ तिण्णि य संगहकिट्टीउ जायन्ते ॥८३॥ (उपगीतिः)**

क्रोधादीनामुदयेन प्रतिपन्नस्य भवन्ति क्रमशो हि ।
द्वादश नव षट् तिस्रश्च संग्रहकिट्टयो जायन्ते ॥८३॥ इति पदसंस्कारः ।

'**कोहादीण**' इत्यादि, 'क्रोधादीनां' क्रोधमानमायालोभलक्षणानामुदयेन 'प्रतिपन्नस्य' क्षपकश्रेणिमारूढस्य क्रमशः 'हि' निश्चयेन द्वादश नव षट् तिस्रश्च संग्रहकिट्टयो 'जायन्ते' उत्पद्यन्ते। उक्तं च **कषायप्राभृते**-"**बारस णव छ तिण्णि य किट्टीओ होंति** × × ×" इति।

भावार्थः पुनरयम्—क्रोधोदयेन क्षपकश्रेणिं प्रतिपन्नश्चतुष्कषायाणां द्वादश संग्रहकिट्टीः करोति, एकैककषायस्य संग्रहकिट्टित्रयप्रतिपादनात्। उक्तं च **सप्ततिकाचूर्णौ**—"**किट्टिकरणद्धाए वट्टमाणो समए समए चउण्हं संजलणाण बारस किट्टीओ करेति,** × × ×, **एवं कोहेण पडिवण्णस्स।**" तथैव **कषायप्राभृतचूर्णावपि**—"**जइ कोहेण उवट्ठायदि, तदो बारस संगहकिट्टीओ होंति।**" इति।

संज्वलनमानोदयेन क्षपकश्रेणिं समारूढः शेषसंज्वलनत्रयस्य नव संग्रहकिट्टीः करोति, मानाऽश्वकर्णकरणाद्धायाः प्राक् संज्वलनक्रोधस्य स्पर्धकस्वरूपेण क्षपितत्वेन संज्वलनक्रोधस्य किट्टयसंभवात्। उक्तं च **सप्ततिकाचूर्णौ**—"**माणेण पडिवण्णो कोहे खविए उव्वलणालक्खणेणं सेसाणं तिण्हं कसायाणं नव किट्टीओ करेति पुव्वकमेणं।**" इति। एवं **कषायप्राभृतचूर्णावपि**—"**माणेण उवट्ठिदस्स णव संगहकिट्टीओ।**" इति।

मायोदयेन क्षपकश्रेणिं प्रतिपन्नो मायालोभयोः षट् संग्रहकिट्टीर्निर्वर्तयति, मायाश्वकर्णकरणाद्धायाः प्राक् क्रोधमानयोः किट्टिपरिणाममन्तं स्पर्धकस्वरूपेण क्षपितत्वात्। उक्तं च **सप्ततिकाचूर्णौ**—"**मायाए पडिवण्णो कोहमाणेहिं खविएहिं सेसदुगस्स छ किट्टीओ करेति पुव्वकमेणं।**" इति। तथैव **कषायप्राभृतचूर्णावपि**—"**मायाए उवट्ठिदस्स छ संगहकिट्टीओ।**" इति।

संज्वलनलोभोदयेन क्षपकश्रेणिमधिगतः संज्वलनलोभस्य तिस्रः संग्रहकिट्टीर्निर्वर्तयति, लोभा-ऽश्वकर्णकरणाद्धाया अर्वाक् संज्वलनक्रोधादित्रयस्य स्पर्धकस्वरूपेण विनाशितत्वात्। उक्तं च **सप्ततिकाचूर्णौ**—"**लोभेणं पडिवण्णो हेट्ठतिगे खविए लोभस्स तिण्णि किट्टीओ**

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

करेति ।" इति । तथैव **कषायप्राभृतचूर्णावपि—"लोभेण उवट्ठिदस्स तिण्णि किट्टीओ ।"** इति । ॥ ८३ ॥

कषायचतुष्कस्य संग्रहकिट्टीरुक्त्वा सम्प्रत्येकैकस्यां संग्रहकिट्टौ कति किट्टयो भवन्ति ? तथा पूर्वपूर्वसमयत उत्तरोत्तरसमये कियत्यः किट्टयो जायन्ते ? इत्याशङ्क्य प्राह—

**एगेगाए संगहकिट्टीअ अवंतराअ उ अणंता ।**
**होंति य किट्टीओ पडिसमयमसंखगुणहीणाओ ॥८४॥**

एकैकस्यां संग्रहकिट्टौ अवान्तरास्त्वनन्ताः ।
भवन्ति च किट्टयः प्रतिसमयमसंख्यगुणहीनाः ॥८४॥ इति पदसंस्कारः ।

**'एगेगाए'** इत्यादि, संज्वलनचतुष्कस्यैकैकस्यां संग्रहकिट्टौ अवान्तरास्तु किट्टयोऽनन्ता भवन्ति, एकैकसंग्रहकिट्टौ अवयवकिट्टयोऽनन्ता भवन्तीत्यर्थः । **'होंति य'** इत्यादि, 'भवन्ति च' जायन्ते च 'प्रतिसमयं' समये समये इति वीप्सायाम् **"योग्यतावीप्सार्थानतिवृत्तिसादृश्ये"** **(सिद्धहेम० ३-१-४०)** इति सूत्रेण-ऽव्ययीभावसमासः, अनुसमयमित्यर्थः; **'किट्टयः'** कषायचतुष्कस्याऽभिनवाऽवान्तरकिट्टयोऽसंख्येयगुणहीनाः । इदमुक्तं भवति—किट्टिकरणाद्धाप्रथमसमये बहूरवान्तरकिट्टीः करोति, द्वितीयसमयेऽसंख्येयगुणहीना अभिनवा अवान्तरकिट्टीर्निर्वर्तयति, असंख्येयभागमात्रा निर्वर्तयतीत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—"बिदियसमए अण्णाओ अपुव्वाओ किट्टीओ करेदि, पढमसमए णिव्वत्तिदकिट्टीणमसंखेज्जभागमेत्ताओ ।"** इति एवं पूर्वपूर्वत उत्तरोत्तरसमये-ऽसंख्येयगुणहीना अभिनवा किट्टयस्तावद्वक्तव्याः, यावत् किट्टिकरणाद्धायाश्चरमसमयः ॥८४॥

ननु प्रतिसमयं किट्टितया परिणमनाय कियद् दलं गृह्णाति ? इति परमाशङ्क्य प्राह—

**दलिअं उ पडिखणं उकिरइ असंखगुणिअं य किट्टीणं ।**
**अह किट्टीणं अणुभागप्पाबहुअं भणिज्जेइ ॥ ८५ ॥**

दलिकं तु प्रतिक्षणमुत्किरत्यसंख्यगुणितं च किट्टिभ्यः ।
अथ किट्टीनामनुभागाल्पबहुत्वं भण्यते ॥८५॥ इति पदसंस्कारः ।

**'दलिअं'** इत्यादि, तत्र **'किट्टीणं'** त्ति प्राकृतत्वात् **'तादर्थ्ये'** (सिद्धहेम० २-२-५४) इति सूत्रेण विहितायाश्चतुर्थ्याः स्थाने **"चतुर्थ्याः षष्ठी"** (सिद्धहेम० ८-१-१३१) इति सूत्रेण षष्ठी विभक्तिः, किट्टिभ्यः=किट्टितया परिणमनायेत्यर्थः **'दलिकं'** प्रदेशाग्रं तु 'प्रतिक्षणम्' अनुसमयम् असंख्येयगुणितं च 'उत्किरति' अपकर्षति । चकारः पादपूर्त्यै । इदमुक्तं भवति—किट्टिकरणाद्धाप्रथम-

समयतो-ऽनन्तगुणविशुद्धत्वाद् द्वितीयसमये-ऽसंख्येयगुणं दलं गृहीत्वा किट्टिषु ददाति, ततो-ऽपि तृतीयसमयेऽसंख्येयगुणं दलं गृहीत्वा किट्टिषु प्रक्षिपति । एवं प्रतिसमयं विशुद्धेरनन्तगुणक्रमेण प्रवर्धमानत्वादुत्तरोत्तरसमयेऽसंख्येयगुणमसंख्येयगुणं दलं गृहीत्वा किट्टिषु ददाति । अनेन क्रमेण तावद्वक्तव्यम्, यावत् किट्टिकरणाद्धायाश्चरमसमयः । उक्तं च कषायप्राभृतचूर्णौ—"**जं पदेसग्गं सव्वसमासेण पढमसमए किट्टीसु दिज्जदि, तं थोवं, विदियसमए असंखेज्जगुणं, तदियसमए असंखेज्जगुणं। एवं जाव चरिमादो त्ति असंखेज्जगुणं।**" इति ।

'अह' इत्यादि, अथशब्दः प्रकरणान्तरं सूचयति । 'किट्टीणं' ति किट्टीनाम् 'अनुभागा-ऽल्पबहुत्वम्' अनुभागविषयका-ऽल्पबहुत्वं 'भण्यते' प्रतिपाद्यते ॥८५॥

अथ किट्टिकरणाद्धाप्रथमसमये किट्टिकारस्य किट्टिगतरसा-ऽविभागानाश्रित्य पूर्वगाथायां प्रतिज्ञाता-ऽल्पबहुत्वं विवर्णयति—

लोहस्स पढमसंगहकिट्टीअ जहण्णगाअ खलु ।
थोवा रसाविभागा तत्तो बिइयाअऽणंतगुणिआऽत्थि ॥८६॥ (उद्गीतिः)
एवं जाव चरिमकिट्टीए बीयपढमाअऽणंतगुणा ।
पुव्वव्व जाव अंतिमकिट्टीए ताउ तइयाए ॥ ८७ ॥
पढमाअऽणंतगुणिआ जावं चरिमाअ एवं य ।
मायाए तिण्हं किट्टीसु मुणेया अणंतगुणणाए ॥८८॥ (उद्गीतिः)
तत्तो माणगकोहाणं तिण्ह रसाविभागा य ।
कमसो उ जाव कोहुक्कोसाए होज्जऽणंतगुणा ॥८९॥ (उपगीतिः)

लोभस्य प्रथमसंग्रहकिट्ट्या जघन्यायां खलु ।
स्तोका रसाविभागास्तेभ्यो द्वितीयस्यामनन्तगुणिताः सन्ति ॥८६॥
एवं यावच्चरमकिट्टौ द्वितीयप्रथमायामनन्तगुणा ।
पूर्ववद्यावदन्तिमकिट्टौ तेभ्यस्तृतीयस्याः ॥ ८७ ॥
प्रथमायामनन्तगुणिता यावत् चरमायामेवं च ।
मायायास्तिसृणां किट्टिषु ज्ञेया अनन्तगुणनया ॥८८॥
तेभ्यो मानक्रोधयोस्तिसृणां रसाऽविभागाश्च ।
क्रमशस्तु यावत् क्रोधोत्कृष्टायां भवन्त्यनन्तगुणा ॥८९॥ इति पदसंस्कारः ।

'**लोहस्स**' इत्यादि, 'लोभस्य' संज्वलनलोभस्य प्रथमसंग्रहकिट्ट्याः 'जघन्यायां' प्रथमा-ऽवान्तरकिट्टौ स्तोका रसाऽविभागा भवन्ति । रसाऽविभागा इति पदमग्रेऽप्यनुवर्तनीयम् । 'तेभ्यः'

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

संज्वलनलोभप्रथमसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टिगतरसविभागेभ्यो 'द्वितीयस्यां' लोभस्य प्रथमसंग्रहकिट्टया द्वितीया-ऽवान्तरकिट्टौ 'अनन्तगुणिताः' अनन्तगुणा रसाविभागाः 'सन्ति' भवन्ति, किट्टिगतानुभागस्य पूर्वानुपूर्व्याऽनन्तगुणवृद्धिं परित्यज्या-ऽन्यस्याऽसंभवात्। 'एवं' इत्यादि, 'एवं यावच्चरमकिट्टौ' एवंशब्दस्य साम्यार्थकत्वात् उत्तरोत्तरा-ऽवान्तरकिट्टौ अनन्तगुणक्रमेण रसाविभागास्तावदभिधातव्याः, यावद् लोभस्य प्रथमसंग्रहकिट्टेश्चरमा-ऽवान्तरकिट्टौ द्विचरमा-ऽवान्तरकिट्टितो-ऽनन्तगुणाः।

'बीयपढमाअ' 'इत्यादि, द्वितीयप्रथमायां' अत्र द्वितीयपदेन **"भीमो भीमसेनः"** इति न्यायात् द्वितीयसंग्रहकिट्टिर्बोद्धव्या, ततश्चायमर्थः-संज्वलनलोभस्य द्वितीयसंग्रहकिट्टयाः प्रथमा-ऽवान्तरकिट्टौ प्रथमसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसाविभागतो-ऽनन्तगुणा रसाविभागा भवन्ति, गुणकारश्च द्वादशसंग्रहकिट्टीनां स्वस्थानगुणकारतो-ऽनन्तगुणो ज्ञातव्यः। इदमुक्तं भवति-विवक्षितसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः सन्तस्तदुत्तर-संग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाविभागा जायन्ते, स परस्थानगुणकार उच्यते। ततःसंग्रह-किट्टौ विवक्षिता-ऽवान्तरकिट्टिगतरसाऽविभागाः येन गुणकारेण गुणिताः सन्तस्तदुत्तराऽवान्तर-किट्टिगतरसाऽविभागा जायन्ते, स स्वस्थानगुणकार उच्यते। उपर्युक्तपरस्थानगुणकारो द्वादशा-नामपि संग्रहकिट्टीनां स्वस्थानगुणकारतोऽनन्तगुणो ज्ञातव्यः, क्रोधतृतीयसंग्रहकिट्टिगतचरमा-वान्तरकिट्टयन्तरतो लोभप्रथमसंग्रहकिट्टयन्तस्यानन्तगुणत्वदर्शनात्, आविष्करिष्यते चेदं किट्टयन्तरप्ररूपणायाम्। 'पुव्वव्व'इत्यादि, 'पूर्ववत्'प्रथमसंग्रहकिट्टिवत् यत्तदोःसापेक्षत्वेनोत्तरत्र यत्पदोपादानात् तावद्वक्तव्याः, यावत् 'अन्तिमकिट्टौ' अन्ते भवा अन्तिमा **"पश्चादाद्यन्ताग्रादिमः"** (सिद्धहेम० ६-३-७५) इत्यनेन इमप्रत्ययः। अन्तिमा चाऽसौ किट्टिश्च, सा-ऽन्तिमकिट्टिः, तत्र, लोभद्वितीय-संग्रहकिट्टिसत्कायां चरमाऽवान्तरकिट्टौ इत्यर्थः, रसा-ऽविभागा वक्तव्याः। इदमुक्तं भवति—

लोभस्य द्वितीयसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टिगतरसाऽविभागतो द्वितीयाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा विद्यन्ते, ततोऽपि तृतीयाऽवान्तरकिट्टौ अनन्तगुणा रसाऽविभागा वर्तन्ते, एवंक्रमेण तावद्वक्तव्याः, यावद् द्विचरमा-ऽवान्तरकिट्टितश्चरमाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणास्तिष्ठन्ति।

'ताउ' इत्यादि 'तेभ्यः' लोभद्वितीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसाऽविभागे-भ्यः 'तृतीयस्याः लोभतृतीयसंग्रहकिट्टेः 'प्रथमायां' प्रथमाऽवान्तरकिट्टौ अनन्तगुणिता रसाऽविभागा भवन्ति। ततोऽपि द्वितीयाऽवान्तरकिट्टौ अनन्तगुणा रसाऽविभागा भवन्ति। ततोऽपि तृतीयस्यामवान्तरकिट्टावनन्तगुणा रसाऽविभागा भवन्ति, एवंक्रमेण तावद् वक्तव्याः, यावच्चरमा-ऽवान्तरकिट्टिः। तदेवा-ऽऽह-**'जाव चरिमाअ'** त्ति यावत् 'चरमायां' लोभतृतीयसंग्रहकिट्टिसत्क-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमावान्तरकिट्टौ रसाऽविभागा द्विचरमाऽवान्तरकिट्टितोऽनन्तगुणा भवन्तीत्यर्थः। 'एवं' इत्यादि, 'एवं' एवंशब्दः सादृश्यार्थकः, यथा लोभस्य तिसृणां संग्रहकिट्टीनामवान्तरकिट्टिषु रसाऽविभागाः प्ररूपिताः, तथैवेत्यर्थः मायायाः 'तिसृणां' प्रथम-द्वितीय-तृतीयरूपाणां संग्रहकिट्टीनां 'किट्टिषु' अवान्तरकिट्टिष्वनन्तगुणनया रसाऽविभागा वक्तव्याः। चकारः समुच्चये। एतदुक्तं भवति-संज्वलन-लोभस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागतो मायायाः प्रथमसंग्रहकिट्टिसत्क-प्रथमाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्ति। ततो-ऽपि मायायाः प्रथमसंग्रहकिट्टि-सत्कद्वितीया-ऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्ति। एवं तावद्वक्तव्याः, यावन्मायायाः प्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टौ रसाऽविभागा द्विचरमाऽवान्तरकिट्टितोऽनन्तगुणा भवन्ति। मायायाः प्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागतो मायाया द्वितीयसंग्रहकिट्टि-सत्कप्रथमाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्तिः ततोऽपि मायाया द्वितीयसंग्रह-किट्टिसत्कायां द्वितीयाऽवान्तरकिट्टावनन्तगुणा भवन्ति, ततो मायाया द्वितीयसंग्रहकिट्टि-सत्कायां तृतीया-ऽवान्तरकिट्टावनन्तगुणा रसाऽविभागा भवन्ति। एवंक्रमेण तावद्वक्तव्याः, यावद् मायाया द्वितीयसंग्रहकिट्टिसत्कद्विचरमा-ऽवान्तरकिट्टितश्चरमाऽवान्तरकिट्टौ रसाऽविभागा अनन्त-गुणा भवन्ति। मायाया द्वितीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसाऽविभागतोऽनन्तगुणा रसाऽविभागा मायायास्तृतीयसंग्रहकिट्टिसत्कायां प्रथमाऽवान्तरकिट्टौ तिष्ठन्ति, ततोऽपि द्वितीया-ऽवान्तरकिट्टावनन्तगुणा रसाविभागा वर्तन्ते, एवमनन्तगुणक्रमेण तावद्वक्तव्याः, यावत् तृतीय-संग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिः।

'तत्तो' इत्यादि, 'तेभ्यो' मायायास्तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽवि-भागेभ्यो 'मानक्रोधयोः' संज्वलनमानक्रोधयोः 'तिसृणां' संग्रहकिट्टित्रयस्य अवान्तरकिट्टिगता रसाऽविभागाश्च क्रमशस्त्वनन्तगुणास्तावद्भवन्ति, यावत् 'क्रोधोत्कृष्टायां' क्रोधतृतीयसंग्रहकिट्टि-सत्कचरमाऽवान्तरकिट्टौ रसाऽविभागाः। तथाहि—मायायास्तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टि-गतरसाऽविभागतो मानस्य प्रथमसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा अवतिष्ठन्ते। ततो-ऽपि मानस्य प्रथमसंग्रहकिट्टिसत्कद्वितीया-ऽवान्तरकिट्टावनन्तगुणा रसाऽ-विभागा भवन्ति, एवंक्रमेण तावद्वक्तव्याः, यावत् प्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगत-रसाविभागाः।

मानस्य प्रथमसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टितो मानस्य द्वितीयसंग्रहकिट्टिसत्क-प्रथमा-ऽवान्तरकिट्टौ रसाविभागा अनन्तगुणा भवन्ति। ततो-ऽपि द्वितीयसंग्रहकिट्टिसत्कद्वितीया-ऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा वर्तन्ते। एवमनन्तगुणक्रमेण तावद्वक्तव्याः, यावन्मा-नस्य द्वितीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसा-ऽविभागाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानस्य द्वितीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टितो मानस्य तृतीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा अनन्तगुणा भवन्ति, ततोऽपि तृतीयसंग्रहकिट्टिसत्कद्वितीयाऽवान्तरकिट्टौ रसाविभागा अनन्तगुणा भवन्ति। एवमुत्तरोत्तराऽवान्तरकिट्टौ अनन्तगुणक्रमेण रसाऽविभागास्तावद्वक्तव्याः, यावन्मानस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाविभागाः।

मानस्य तृतीयसंग्रहकिट्टिसत्कचरमावान्तरकिट्टिगतरसाऽविभागतः क्रोधस्य प्रथमसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्ति। ततः क्रोधप्रथमसंग्रहकिट्टिसत्कद्वितीया-ऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्ति। एवमुत्तरोत्तरा-ऽवान्तरकिट्टावनन्तगुणक्रमेण रसाऽविभागास्तावद्वक्तव्याः, यावत् क्रोधप्रथमसंग्रहकिट्टिसत्कचरमावान्तरकिट्टिगतरसाऽविभागाः।

क्रोधप्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागतः क्रोधद्वितीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्ति, ततोऽपि क्रोधद्वितीयसंग्रहकिट्टिसत्कद्वितीया-ऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा वर्तन्ते। एवमुत्तरोत्तराऽवान्तरकिट्टावनन्तगुणक्रमेण रसाऽविभागास्तावदभिधातव्याः, यावत् क्रोधद्वितीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसा-ऽविभागाः।

क्रोधद्वितीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागतः क्रोधतृतीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्ति, ततोऽपि क्रोधतृतीयसंग्रहकिट्टिसत्कद्वितीयावान्तरकिट्टौ रसाऽविभागा अनन्तगुणा वर्तन्ते। एवमुत्तरोत्तराऽवान्तरकिट्टावनन्तगुणक्रमेण रसाऽविभागास्तावद्वक्तव्याः, यावत् क्रोधतृतीयसंग्रहकिट्टिसत्कचरमावान्तरकिट्टिगतरसाविभागाः।

अपूर्वस्पर्धकप्रथमवर्गणायां क्रोधतृतीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टितोऽनन्तगुणा रसाऽविभागा अनुक्तसिद्धाः, किट्टिगताऽनुभागस्य स्पर्धकाऽनुभागतोऽनन्तगुणहीनत्वदर्शनात्। उक्तं च कषायप्राभृतचूर्णौ— **'पढमसमए णिव्वत्तिदाणं किट्टीणं तिव्वमंददाए अप्पाबहुअं वत्तइस्सामो। तं जहा-लोभस्स जहण्णिया किट्टी थोवा, विदिया किट्टी अणंतगुणा। एवमणंतगुणाए सेढीए जाव पढमाए संगहकिट्टीए चरिमकिट्टि त्ति। तदो विदियाए संगहकिट्टीए जहण्णिया किट्टी अणंतगुणा। एस गुणगारो बारसण्हं पि संगहकिट्टीणं सत्थाणगुणगारेहिं अणंतगुणो। विदियाए संगहकिट्टीए सो चेव कमो जो पढमाए संगहकिट्टीए। तदो पुण विदियाए च तदियाए च संगहकिट्टीणमंतरं तारिसं चेव। एवमेदाओ लोभस्स तिण्णि संगहकिट्टीओ। लोभस्स तदियाए संगहकिट्टीए जा चरिमा किट्टी, तदो मायाए जहण्णकिट्टी अणंतगुणा।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मायाए वि तेणेव कमेण तिण्णि संगहकिट्टीओ। मायाए जा तदिया संगहकिट्टी, तिस्से चरिमादो किट्टीदो माणस्स जहण्णिया किट्टी अणंतगुणा। माणस्स वि तेणेव कमेण तिण्णि संगहकिट्टीओ। माणस्स जा तदिया संगहकिट्टी, तिस्से चरिमादो किट्टीदो कोधस्स जहण्णिया किट्टी अणंतगुणा। कोहस्स वि तेणेव कमेण तिण्णि संगहकिट्टीओ। कोधस्स तदियाए संगहकिट्टीए जा चरिमकिट्टी, तदो लोभस्स अपुव्वफद्दयाणमादिवग्गणा अणंतगुणा।" इति। ८६-८७-८८-८६।

लोभादीनां किट्टयो-ऽनुभागमाश्रित्य पूर्वपूर्वतो-ऽनन्तगुणा भवन्तीत्युक्तम्। तत्र गुणकारः सर्वत्र न समानः। तद्यथा-लोभस्य प्रथमसंग्रहकिट्टेर्जघन्या-ऽवान्तरकिट्टिगतरसाऽविभागतो द्वितीयाऽवान्तरकिट्टौ रसाऽविभागा अनन्तगुणा भवन्ति, तत्र यो गुणकारः, तेन गुणकारेण द्वितीयाऽवान्तरकिट्टितृतीयाऽवान्तरकिट्टयोरन्तरालगतो गुणकारो न सदृशः, अपि त्वनन्तगुणो भवति, एवमग्रेऽपीति प्रदर्शयितुं किट्ट्यन्तराणामल्पबहुत्वं प्रतिजानीते—

**अह संगहकिट्टीअंतराण तहऽवंतरंतराण खलु।**
**भणिहामो अप्पाबहुअं जं अत्थि सुअअणुरूवं ॥६०॥**

अथ संग्रहकिट्ट्यन्तराणां तथा-ऽवान्तरान्तराणां खलु।
भणिष्यामो-ऽल्पबहुत्वं यदस्ति श्रुतानुरूपम् ॥ ६० ॥ इति पदसंस्कारः।

'अह' इत्यादि, तत्र किट्ट्यन्तरं नाम द्वयोः किट्टयोरन्तरालगतो गुणकारः। किमुक्तं भवति? विवक्षितकिट्टितस्तदनन्तरकिट्टिं लब्धुं यो गुणकारो युज्यते, स किट्टिगुणकारः किट्ट्यन्तरमुच्यते, किट्टिद्वया-ऽन्तरालप्रमाणसूचको गुणकारः किट्ट्यन्तरमिति संक्षेपः।

ननु किट्ट्यन्तरशब्देनोपरितनकिट्टिगतरसाऽविभागतोऽधस्तनकिट्टिगतरसाऽविभागान् व्यवकलय्यैकोनशेषराशिः कुतो न गृह्यते? एकोत्तर-रसाविभागवृद्धिक्रमस्यादर्शनादिति चेत्, शृणुत—एतत्समीचीनम्। किन्त्वयं दोष उद्भवति—लोभस्य प्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाविभागान् द्वितीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागतो विशोध्यैकोनशेषं प्रथमसंग्रहकिट्ट्यन्तरं मन्येत, द्वितीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागांश्च द्वितीयसंग्रहकिट्टिसत्कद्वितीया-ऽवान्तरकिट्टिगतरसा-ऽविभागतो व्यवकलय्यैकोनशेषं द्वितीयसंग्रहकिट्टिगतप्रथमाऽवान्तरकिट्ट्यन्तरमभ्युपगम्येत, तर्हि प्रथमसंग्रहकिट्ट्यन्तरतो द्वितीयसंग्रहकिट्टिगतप्रथमाऽवान्तरकिट्ट्यन्तरमनन्तगुणं स्यात्।

न चा-ऽस्तु प्रथमसंग्रहकिट्ट्यन्तरतो द्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्ट्यन्तरमनन्तगुणमिति वाच्यम्, विरोधोपलम्भात्। तथाहि—अग्रे क्रोधस्य तृतीयसंग्रहकिट्टिगतचरमाऽवान्तर-

Jain Education International                For Private & Personal Use Only                www.jainelibrary.org

किट्ट्यन्तरतोऽप्यनन्तगुणं प्रथमसंग्रहकिट्ट्यन्तरं भवतीति वक्ष्यते, तेन सह विरोधः स्यात्। तस्मादत्र किट्ट्यन्तरशब्देन किट्टिगुणकारो ग्राह्यः।

तच्च किट्ट्यन्तरं द्विविधम्, स्वस्थानपरस्थानगुणकारभेदेनाऽवान्तरकिट्ट्यन्तरसंग्रहकिट्ट्यन्तरभेदात्। तत्राऽवान्तरकिट्ट्यन्तरं नाम यस्यां कस्याश्चित् संग्रहकिट्टौ संलग्नयोर्द्वयोरवान्तरकिट्ट्योरन्तरालगतः स्वस्थानगुणकारः। एकैकस्यां च संग्रहकिट्टौ अवान्तरकिट्टीनामभव्येभ्योऽनन्तगुणत्वात् सिद्धाऽनन्तभागमात्रत्वाच्चावान्तरकिट्ट्यन्तराण्यनन्तानि भवन्ति, रूपोनाऽवान्तरकिट्टिराशेरवान्तरकिट्ट्यन्तरत्वेन दर्शनात्। **कषायप्राभृतचूर्णिकारास्तु** किट्ट्यन्तराणि भणन्ति, न त्ववान्तरकिट्ट्यन्तराणि। तथा चात्र **कषायप्राभृतचूर्णि "एक्किक्किस्से संगहकिट्टीए अणंताओ किट्टीओ। तासिमंतराणि वि अणंताणि। तेसिमंतराणं सण्णा किट्टीअंतराइणाम।"** इति। इह त्ववान्तरकिट्टीनामन्तराणि अवान्तरकिट्ट्यन्तराणीति व्युत्पत्तेर्बालजीवबोधाया-ऽवान्तरकिट्ट्यन्तराणीत्युक्तम्, वस्तुतस्तूभयोरभेदः।

संग्रहकिट्ट्यन्तरं नाम विवक्षितसंग्रहकिट्टिगतचरमाऽवान्तरकिट्टि-तदुत्तरसंग्रहकिट्टिगतप्रथमाऽवान्तरकिट्ट्योरन्तरालगतः परस्थानगुणकारः। संग्रहकिट्टीनां द्वादशत्वादन्तराणां च रूपोनसंग्रहकिट्टिराशित्वात् संग्रहकिट्ट्यन्तराण्येकादश भवन्ति। उक्तं च **कषायप्राभृतचूर्णौ- "संगहकिट्टीए च अंतराणि एक्कारस, तेसिं सण्णा संगहकिट्टीअंतराइणाम।"** इति।

अथ द्विविधानां किट्ट्यन्तराणामल्पबहुत्वं भणितुं प्रतिजानीते–'अह' इत्यादि, अथशब्दोऽधिकारान्तरसूचकः, संग्रहकिट्ट्यन्तराणां तथा 'अवान्तरान्तराणाम्' अवान्तरकिट्ट्यन्तराणां खलु 'अल्पबहुत्वं' स्तोकबहुत्वं 'भणिष्यामः' प्ररूपयिष्यामः। 'जं' इत्यादि, यदल्पबहुत्वं 'श्रुतानुरूपं' **कषायप्राभृतचूर्ण्यादिग्रन्थानुसारमस्ति,** एतेना-ऽल्पबहुत्वस्य कपोलकल्पितत्वं निरस्तम् ॥९०॥

अथ प्रतिज्ञाताऽल्पबहुत्वं विभणिषुराह—

तत्थ य लोहपढमऽवंतरकिट्टीअंतराउ आढविऊणं।
कोहचरिमऽवंतरकिट्टिअंतरं जावऽणंतगुणिअं णेयं ॥९१॥ (आर्यागीतिः)
तो लोहस्स पढमसंगहकिट्टीअंतरं अणंतगुणं।
तो बीयअंतरमह तइयकिट्टीअंतरं अणंतगुणं ॥९२॥ (गीतिः)
अह लोहगमायाणंतरं अणंतगुणिअं तहेवियराणं।
कोहचरिमाउ लोहअपुव्वाइमवग्गणान्तरं विण्णेयं ॥९३॥ (आर्यागीतिः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थ च लोभपढमाऽवान्तरकिट्टयन्तरादारब्भ ।
क्रोधचरमावान्तरकिट्टयन्तरं यावदनन्तगुणितं ज्ञेयम् ॥६१॥
तस्माल्लोभस्य प्रथमसंग्रहकिट्टयन्तरमनन्तगुणम् ।
तस्माद् द्वितीयाऽन्तरमथ तृतीयकिट्टयन्तरमनन्तगुणम् ॥६२॥
अथ लोभमाययोरन्तरमनन्तगुणितं तथैवेतरेषाम् ।
क्रोधचरमाल्लोभा-ऽपूर्वादिवर्गणा-ऽन्तरं विज्ञेयम् ॥६३॥ इति पदसंस्कारः ।

**'तत्थ य'** इत्यादि, 'तत्र च' अल्पबहुत्वप्ररूपणायां च 'लोभप्रथमाऽवान्तरकिट्टयन्तराद्' लोभप्रथमसंग्रहकिट्टिगतप्रथमाऽवान्तरकिट्टयन्तराद् आरभ्य 'क्रोधचरमाऽवान्तरकिट्टयन्तरं' क्रोधतृतीयसंग्रहकिट्टिगतचरमा-ऽवान्तरकिट्टयन्तरं यावत् क्रमेणाऽनन्तगुणितं ज्ञेयम् उत्तरोत्तरा-वान्तरकिट्टयन्तरमिति शेषः । तथाहि—लोभस्य प्रथमसंग्रहकिट्टिगतप्रथमा-ऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता लोभस्य प्रथमसंग्रहकिट्टिगतद्वितीयाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारः संज्वलनलोभस्य प्रथमसंग्रहकिट्टौ प्रथममवान्तरकिट्टयन्तरमुच्यते, तच्च सर्वस्तोकम्, उपरि भण्यमानपदानां प्रभूतत्वात् ।

ततो लोभस्य प्रथमसंग्रहकिट्टौ द्वितीया-ऽवान्तरकिट्टयन्तरमनन्तगुणं भवति । संज्वलन-लोभस्य प्रथमसंग्रहकिट्टिसत्कद्वितीयाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः सन्तः प्रथमसंग्रहकिट्टिसत्कतृतीया-ऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारो द्वितीयमवान्तर-किट्टयन्तरमुच्यते, तच्च पूर्वपदतोऽनन्तगुणं भवतीति फलितार्थः ।

ततो लोभस्य प्रथमसंग्रहकिट्टौ तृतीयमवान्तरकिट्टयन्तरमनन्तगुणं निश्चेतव्यम् । तत उत्तरोत्तराऽवान्तरकिट्टयन्तरमनन्तगुणक्रमेण तावदभिधातव्यम्, यावत् प्रथमसंग्रहकिट्टौ द्विचर-मा-ऽवान्तरकिट्टयन्तरतश्चरमाऽवान्तरकिट्टयन्तरमनन्तगुणं भवति । प्रथमसंग्रहकिट्टिसत्कद्विचरमा-वान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः सन्तः प्रथमसंग्रहकिट्टिसत्कचरमा-ऽवान्तर-किट्टिगतरसाऽविभागा भवन्ति, स गुणकारश्चरमाऽवान्तरकिट्टयन्तरमुच्यते। अत्राह प्रेरकः—ननु यथा प्रथमाऽवान्तरकिट्टि-द्वितीया-ऽवान्तरकिट्टयोरन्तरालगतगुणकारः प्रथममवान्तरकिट्टयन्तरमुच्यते, तथा द्विचरमाऽवान्तरकिट्टिचरमाऽवान्तरकिट्टयोरन्तरालगतो गुणकारो द्विचरमाऽवान्तरकिट्टयन्तरं वक्तव्यम्, चरमाऽवान्तरकिट्टयन्तरं कुतो व्यपदिश्यते ? । अत्रोच्यते—प्रथमद्वितीयादीनि पदानि नाऽवान्तरकिट्टीनां विशेषणानि, अपि त्ववान्तरकिट्टयन्तराणां विशेषणानि । तेन प्रथमा-ऽवान्तरकिट्टिद्वितीयाऽवान्तरकिट्टयोरन्तरालगतगुणकारः प्रथममवान्तरकिट्टयन्तरम्, ततोऽग्रे द्वितीयमवान्तरकिट्टयन्तरम् । एवं क्रमेणाऽन्त्यमवान्तरकिट्टयन्तरं चरममवान्तरकिट्टयन्तरमुच्यते, कर्मधारयसमासात् पुनश्चरमाऽवान्तरकिट्टयन्तरमिति प्रयुज्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ लोभस्य प्रथमसंग्रहकिट्टिगतचरमाऽवान्तरकिट्टयन्तरतो लोभस्य द्वितीयसंग्रहकिट्टौ प्रथमाऽवान्तरकिट्टयन्तरमनन्तगुणं भवति। किमुक्तं भवति ? उच्यते—द्वितीयसंग्रहकिट्टिसत्क-प्रथमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः सन्तो द्वितीयसंग्रहकिट्टिसत्क-द्वितीया-ऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारो द्वितीयसंग्रहकिट्टौ प्रथमा-ऽवान्तर-किट्टयन्तरमुच्यते। तच्च प्रथमसंग्रहकिट्टिगतचरमाऽवान्तरकिट्टयन्तरतोऽनन्तगुणं भवति।

न च प्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः सन्तो द्वितीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारोऽत्र कुतो न गृह्यते ? इति वाच्यम्, तस्य संग्रहकिट्टयन्तरव्यपदेशभाक्त्वेनोपरि भणिष्यमानक्रोधतृतीय-संग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टयन्तरतोऽपि बृहत्तरत्वात्। एवं सर्वत्र संग्रहकिट्टयन्तरस्य बृहत्तरत्वादवान्तरकिट्टयन्तरेषु भणितेष्वेव संग्रहकिट्टयन्तराणि यथास्थानमग्रे वक्ष्यन्ते।

लोभस्य द्वितीयसंग्रहकिट्टिगतप्रथमा-ऽवान्तरकिट्टयन्तरतो द्वितीयसंग्रहकिट्टिगतद्वितीयाऽ-वान्तरकिट्टयन्तरमनन्तगुणं भवति। एवमनन्तरानन्तरेणाऽनन्तगुणक्रमेण तावद्वक्तव्यम्, यावद् द्वितीयसंग्रहकिट्टिगतचरमाऽवान्तरकिट्टयन्तरम्।

लोभस्य द्वितीयसंग्रहकिट्टिगतचरमाऽवान्तरकिट्टयन्तरतस्तृतीयसंग्रहकिट्टौ प्रथमाऽवान्तर-किट्टयन्तरमनन्तगुणं भवति। ततोऽनन्तरानन्तरेणाऽनन्तगुणक्रमेण तावद्वक्तव्यम्, यावद् लोभस्य तृतीयसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततो मायायाः प्रथमसंग्रहकिट्टौ प्रथमाऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततो मायायाः प्रथम-संग्रहकिट्टौ द्वितीयाऽवान्तरकिट्टयन्तरमनन्तगुणम्। एवमनन्तगुणक्रमेण तावद्वक्तव्यम्, यावत् प्रथम-संग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततो मायाया द्वितीयसंग्रहकिट्टौ प्रथमाऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततोऽपि मायाया द्वितीयसंग्रहकिट्टौ द्वितीयाऽवान्तरकिट्टयन्तरमनन्तगुणम्। एवमनन्तरानन्तरेणाऽनन्तगुणं तावद्वक्त-व्यम्, यावद् मायाया द्वितीयसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततो मायायास्तृतीयसंग्रहकिट्टौ प्रथमाऽवान्तरकिट्टयन्तरमनन्तगुणं भवति। ततो मायाया-स्तृतीयसंग्रहकिट्टौ द्वितीयाऽवान्तरकिट्टयन्तरमनन्तगुणं भवति। एवमुत्तरोत्तराऽवान्तरकिट्टयन्तर-मनन्तगुणं तावद्वक्तव्यम्, यावद् मायायास्तृतीयसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततो मानस्य प्रथमसंग्रहकिट्टौ प्रथमाऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततो मानस्य प्रथम-संग्रहकिट्टौ द्वितीयाऽवान्तरकिट्टयन्तरमनन्तगुणं भवति। एवमुत्तरोत्तराऽवान्तरकिट्टयन्तरमनन्त-गुणं तावद्वक्तव्यम्, यावद् मानस्य प्रथमसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो मानस्य द्वितीयसंग्रहकिट्टौ प्रथमा-ऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततो मानस्य द्वितीयसंग्रहकिट्टौ द्वितीयाऽवान्तरकिट्टयन्तरमनन्तगुणं भवति। एवमुत्तरोत्तराऽवान्तरकिट्टयन्तर-मनन्तगुणं तावद्वक्तव्यम्, यावन्मानस्य द्वितीयसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततो मानस्य तृतीयसंग्रहकिट्टौ प्रथमाऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततोऽपि मानस्य तृतीयसंग्रहकिट्टौ द्वितीया-ऽवान्तरकिट्टयन्तरमनन्तगुणम्। एवमनन्तरानन्तरेणाऽनन्तगुणं ताव-द्वक्तव्यम्, यावन्मानस्य तृतीयसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततः क्रोधस्य प्रथमसंग्रहकिट्टौ प्रथमा-ऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततः क्रोधस्य प्रथमसंग्रहकिट्टौ द्वितीयाऽवान्तरकिट्टयन्तरमनन्तगुणं भवति। एवमुत्तरोत्तरा-ऽवान्तरकिट्टयन्तरमन-न्तगुणं तावदभिधातव्यम्, यावत् क्रोधप्रथमसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततः क्रोधस्य द्वितीयसंग्रहकिट्टौ प्रथमा-ऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततः क्रोधस्य द्वितीयसंग्रहकिट्टौ द्वितीया-ऽवान्तरकिट्टयन्तरमनन्तगुणम्। एवमनन्तरान्तरेणाऽनन्तगुणं तावन्नि-गदितव्यम्, यावत् क्रोधस्य द्वितीयसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

ततः क्रोधस्य तृतीयसंग्रहकिट्टौ प्रथमाऽवान्तरकिट्टयन्तरमनन्तगुणम्। ततो-ऽपि क्रोधस्य तृतीयसंग्रहकिट्टौ द्वितीया-ऽवान्तरकिट्टयन्तरमनन्तगुणम्। एवमुत्तरोत्तराऽवान्तरकिट्टयन्तरमनन्त-गुणं तावद् निश्चेतव्यम्, यावत् क्रोधस्य तृतीयसंग्रहकिट्टौ चरमाऽवान्तरकिट्टयन्तरम्।

न्यगादि च कषायप्राभृतचूर्णौ—"एदीए णामसण्णाए किट्टीअंतराणं संगहकि-ट्टीअंतराणं च अप्पाबहुअं वत्तइस्सामो। तं जहा—लोभस्स पढमाए संगहकिट्टीए जहण्णयं किट्टीअंतरं थोवं, विदियं किट्टीअंतरमणंतगुणं। एवमणंतराणंतरेण गंतूण चरिमकिट्टीअंतरमणंतगुणं। लोभस्स चेव विदियाए संगहकिट्टीए पढम-किट्टीअंतरमणंतगुणं। एवमणंतराणंतरेण जाव चरिमादो त्ति अणंतगुणं। लोभ-स्स चेव तदियाए संगहकिट्टीए पढमकिट्टीअंतरमणंतगुणं। एवमणंतराणंतरेण गंतूण चरिमकिट्टीअंतरमणंतगुणं। एत्तो मायाए पढमसंगहकिट्टीए पढमकिट्टी-अंतरमणंतगुणं। एवमणंतराणंतरेण मायाए वि तिण्हं संगहकिट्टीणं किट्टीअंत-राणि जहाकमेण अणंतगुणाए सेढीए णेदव्वाणि। एत्तो माणस्स पढमाए संगहकि-ट्टीए पढमकिट्टीअंतरमणंतगुणं। माणस्स वि तिण्हं संगहकिट्टीणमंतराणि जहा-कमेण अणंतगुणाए सेढीए णेदव्वाणि। एत्तो कोधस्स पढमसंगहकिट्टीए पढमकिट्टी-अंतरमणंतगुणं। कोहस्स वि तिण्हं संगहकिट्टीणमंतराणि जहाकमेण जाव चरि-मादो अंतरादो त्ति अणंतगुणाए सेढीए णेदव्वाणि।" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'**तो**' इत्यादि, 'तस्मात्' क्रोधतृतीयसंग्रहकिट्टिगतचरमाऽवान्तरकिट्टयन्तरात् लोभस्य प्रथमसंग्रहकिट्टयन्तरमनन्तगुणं भवति । इदमुक्तं भवति—लोभस्य प्रथमसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता द्वितीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स परस्थानगुणकारो लोभस्य प्रथमसंग्रहकिट्टयन्तरमुच्यते । तच्च चरमस्वस्थानगुणकारलक्षणक्रोधतृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टयन्तरतो-ऽनन्तगुणं भवति । अस्मादेव परस्थानगुणकारमाहात्म्यादेकैकस्य कषायस्य तिस्रस्तिस्रः संग्रहकिट्टयः प्ररूपिताः, अन्यथैकैकस्य कषायस्य विभागत्रयं नोपपद्येत ।

'**तो**' इत्यादि, 'तस्मात्' लोभप्रथमसंग्रहकिट्टयन्तरात् 'द्वितीयाऽन्तरं' लोभद्वितीयसंग्रहकिट्टयन्तरमनन्तगुणं भवति । लोभद्वितीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाविभागा येन गुणकारेण गुणिता लोभतृतीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा जायन्ते, स गुणकारो लोभस्य द्वितीयसंग्रहकिट्टयन्तरमुच्यते, तच्च पूर्वपदतोऽनन्तगुणं भवतीत्यर्थः ।

'**अह**' इत्यादि, अथशब्दोऽनन्तरार्थकः । उक्तं चाऽमरकोशे—"**मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ** ।" इति । ततश्चायमर्थः—लोभस्य द्वितीयसंग्रहकिट्टयन्तरतोऽनन्तरं 'तृतीयान्तरं' लोभतृतीयसंग्रहकिट्टयन्तरमनन्तगुणं भवति, लोभस्य द्वितीयसंग्रहकिट्टयन्तरतस्तृतीयसंग्रहकिट्टयन्तरमनन्तगुणं भवतीत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—"तदो लोभस्स पढमसंगहकिट्टीअंतरमणंतगुणं, विदियसंगहकिट्टीअंतरमणंतगुणं, तदियसंगहकिट्टीअंतरमणंतगुणं ।**" इति ।

ननु किं नाम लोभस्य तृतीयसंग्रहकिट्टयन्तरम् ? किं लोभस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः सन्तो लोभस्यैवा-ऽपूर्वस्पर्धकप्रथमवर्गणागतरसाविभागा भवन्ति, स गुणकारो लोभतृतीयसंग्रहकिट्टयन्तरपदेन गृह्यते ? आहोस्वित् लोभस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता मायायाः प्रथमसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारो गृह्यते ? न तावत् प्रथमविकल्पः, संग्रहकिट्टयन्तराऽल्पबहुत्वप्रसङ्गे संग्रहकिट्टिस्पर्धकान्तरा-ऽल्पबहुत्वस्या-ऽसंगतत्वात् । यथाकथं संगतौ निरूपितायामप्युपरितनपदस्य मायाप्रथमसंग्रहकिट्टयन्तरलक्षणस्याऽस्मात् पदादनन्तगुणत्वं न सिध्येत्, किट्टिस्पर्धकाऽन्तरतः किट्टयन्तरस्या-ऽनन्तगुणहीनत्वसंभवेन विरोधोपलम्भात् । नाऽपि द्वितीयविकल्पः, उपरि भण्यमानेन लोभमाययोरन्तरमनन्तगुणमित्यनेन पदेन सिद्धत्वात् प्रस्तुतपदस्य पुनरुक्तदोषवत्त्वेन वैयर्थ्यात् । न च पुनरुक्तदोषमपाकर्तुं लोभमाययोरन्तरमनन्तगुणमित्येतद् लोभसत्कर्म येन गुणकारेण गुणितं मायासत्कर्म भवति, स गुणकारो लोभमाययोरन्तरमिति व्याख्येयमिति वाच्यम्, सत्कर्माऽन्तरतः किट्टयन्तरस्या-ऽनन्तगुणहीनत्वदर्शनेनोपरि भण्यमानस्य मायाप्रथमसंग्रहकिट्टयन्तरस्य लोभमायाऽन्तरतोऽनन्तगुणत्वाऽसंभवात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोच्यते—(१) लोभस्य तृतीयसंग्रहकिट्टयन्तरमित्यनेन पदेन लोभस्य द्वितीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता लोभस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारो ग्राह्यः। एवंविधगुणकाररूपं तृतीयसंग्रहकिट्टयन्तरं द्वितीयसंग्रहकिट्टयन्तरतोऽनन्तगुणं भवति*। तथाहि—तृतीयसंग्रहकिट्टिगतसर्वाऽवान्तरकिट्टयन्तराणि परस्परं गुणयितव्यानि, गुणितानि च पुनर्द्वितीयसंग्रहकिट्टयन्तरेण गुणयितव्यानि, ततो लब्धं गुणनफलमत्र गुणकाररूपं तृतीयसंग्रहकिट्टयन्तरं बोद्धव्यम्। तेन तृतीयसंग्रहकिट्टयन्तरं सुतरां द्वितीयसंग्रहकिट्टयन्तरतोऽनन्तगुणं सिध्यति, परस्परगुणित-तृतीयसंग्रहकिट्टिसत्क-सर्वाऽवान्तरकिट्टयन्तरैर्द्वितीयसंग्रहकिट्टयन्तरस्य गुणितत्वात्। गुणकारोऽत्र तृतीयसंग्रहकिट्टिसत्कपरस्परगुणितसर्वाऽवान्तरकिट्टयन्तरमात्रो ज्ञातव्यः। न चेदं न प्रतिपादनीयम्, अनुक्तसिद्धत्वादिति वाच्यम्, लोभमाययोरन्तरमाहात्म्यदर्शनाय प्रतिपादितत्वात्। तथाहि-द्वितीयसंग्रहकिट्टयन्तरगुणिततृतीयसंग्रहकिट्टिगतपरस्परगुणितसर्वाऽवान्तरकिट्टयन्तरलक्षणतृतीयसंग्रहकिट्टयन्तरतोऽपि लोभस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता मायायाः प्रथमसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, तद्गुणकारस्वरूपं लोभमायाऽन्तरमनन्तगुणं भवति। अतः साफल्यमस्य पदस्य। '**अह तइय०**' इत्यादीनां मूलगाथोक्ता-ऽक्षराणामर्थस्त्वित्थं कार्यः—'अथ' अथशब्दस्या-ऽनन्तरार्थकत्वात् द्वितीयसंग्रहकिट्टयन्तरतोऽनन्तरं तृतीयसंग्रहकिट्टयन्तरमनन्तगुणं भवति, अथ—ततो-ऽनन्तरं लोभमाययोरन्तरमनन्तगुणितं भवति। द्वितीयसंग्रहकिट्टयन्तरतो लोभतृतीयसंग्रहकिट्टयन्तरगुणं भवति। ततोऽपि लोभमाययोरन्तरमनन्तगुणं भवतीत्यर्थः।

(२) अथवा लोभस्य तृतीयसंग्रहकिट्टिसत्क-चरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण सङ्गुणिता लोभस्याऽपूर्वस्पर्धकसत्कप्रथमवर्गणागत-रसाऽविभागा भवन्ति, स गुणकारोऽत्र तृतीयसंग्रहकिट्टयन्तरपदेन ग्राह्यः, सङ्गतिस्तु किट्टिस्पर्धकयोस्तत्तत्कषायसम्बन्धित्वाद् बोध्या। लोभमायान्तरपदेन च लोभस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता मायाप्रथमसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारो बोद्धव्यः। न चेत्थं व्याख्याते लोभस्य तृतीयसंग्रहकिट्टयन्तरतो लोभमाययोरन्तरमनन्तगुणं न स्यात्, संग्रहकिट्टयपूर्वस्पर्धकाऽन्तरतो किट्टयन्तरस्याऽनन्तगुणहीनत्वादिति वाच्यम्, लोभस्य द्वितीयसंग्रहकिट्टयन्तरतो लोभस्य तृतीयसंग्रहकिट्टयन्तरमनन्तगुणं प्ररूप्य ततः पुनर्लोभस्य द्वितीयसंग्रहकिट्टयन्तरं प्रति निवृत्य लोभस्य द्वितीयसंग्रहकिट्टयन्तरतो लोभमाययोरन्तरमनन्तगुणं

---

* अभ्यधायि च जयधवलाकारैरपि—"लोभस्स तदियसंगहकिट्टीअंतरमिति वुत्ते लोभस्स विदियसंगहकिट्टीए चरिमकिट्टी जेण गुणकारेण गुणिदा लोभस्स चेव तदियसंगहकिट्टीए चरिमकिट्टिं पावेदि, सो गुणगारो घेत्तव्वो, पुव्वुत्तविदियसंगहकिट्टी-अंतरादो परिप्फुडमेवेदस्साणंतगुणत्तदंसणादो। को एत्थ गुणगारो ? तदियसंगहकिट्टीए पविट्ठासेससत्थाणगुणगाराणमण्णोण्णसंवग्गो।" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवतीत्यभिप्रेतत्वात्卐। "**अह तइय०**" इत्याद्यक्षराणामर्थस्त्वेवं कार्यः 'अथ' लोभद्वितीय-संग्रहकिट्ट्यन्तरतोऽनन्तरं तृतीयसंग्रहकिट्ट्यन्तरमनन्तगुणं भवति, 'अथ' अथशब्दो विकल्पार्थकः। यन्न्यगादि **मेदिनीकोशे**—

> "**अथाथो संशये स्यातामधिकारे च मङ्गले।**
> **विकल्पानन्तरप्रश्नकात्स्न्यारम्भसमुच्चये** ॥ १ ॥" इति ॥

ततश्चायमर्थः—अथवा द्वितीयसंग्रहकिट्ट्यन्तरतो लोभमाययोरन्तरमनन्तगुणितं भवति।

(३) अथवा लोभस्य तृतीयसंग्रहकिट्ट्यन्तरमित्यनेन लोभस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता मायायाः प्रथमसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारोऽत्र ग्राह्यः, लोभस्य मायायाश्चाऽन्तरमित्यनेनाऽपि स एव गुणकारो व्याख्येयः। न च तथाविधव्याख्याने पुनरुक्तदोष उद्भवतीति वाच्यम्, पूर्वं सामान्येन अथ **तृतीयसंग्रहकिट्ट्यन्तरमनन्तगुण**मित्यभिधाय तस्यैव **अथ लोभमाययोरन्तरमनन्तगुणं भवतीति** व्याख्यानरूपेणाऽभिहितत्वात्❀।

मूलगाथोक्ताऽक्षरार्थस्त्वेवम्—अथ द्वितीयसंग्रहकिट्ट्यन्तरतोऽनन्तरं तृतीयसंग्रहकिट्ट्यन्तरमनन्तगुणम्, 'अथ' द्वितीयसंग्रहकिट्ट्यन्तरतो-ऽनन्तरं लोभस्य मायायाश्चाऽन्तरमनन्तगुणितमित्यर्थ इति शेषः❀। एवमग्रेऽपि यथास्थानं समाधानत्रिकं भावनीयम्, विरोधाऽनुपलम्भात्, वस्तुतः केवलज्ञानिनां केवलादर्शे एक एव विकल्पः प्रतिबिम्बितो भवति, तथा स एव साधुः, किन्तु तं ते एव जानन्ति, बहुश्रुता वा। साम्प्रतं तेषामभावात् न जानीमः, को विकल्पो तेषां ज्ञानादर्शे प्रतिबिम्बित इति कृत्वा त्रयो विकल्पाः प्रतिपादिताः।

एतानि त्रीण्यपि समाधानान्यवलम्ब्याऽग्रे स्थापना प्रदर्शयिष्यते।

'**अह**' इत्यादि, अथ लोभमाययोरन्तरमनन्तगुणितम्। उक्तं च **कषायप्राभृतचूर्णौ**—"**लोभस्स मायाए च अंतरमणंतगुणं।**" इति सुगममेतत्, प्राग् विस्तरतो भावितत्वात्।

अथ शेषकषायेष्वतिदिदिक्षुराह—'**तहेव**' इत्यादि, 'तथैव' यथा लोभस्य संग्रहकिट्ट्यन्तराणि व्याख्यातानि, तथैव 'इतरेषां' माया-मान-क्रोधलक्षणानां कषायाणां संग्रहकिट्ट्यन्तराणि

---

卐तथा चोक्तं जयधवलायामपि—"अधवा तदियसंगहकिट्टीए अपुव्वफद्दयादिवग्गणाए च अंतरं तदियसंगहकिट्टीअंतरमिदि घेत्तव्वं। संगहकिट्टीफद्दयंतरस्स वि कथंचि संगहकिट्टीअंतरत्तेण णिद्देसे विरोधाभावादो। ण तहाब्भुवगमे एत्तो उवरि मायालोभाणमंतरस्स अणंतगुणत्तविरोधो णेदासंकणिज्जो, लोभस्स सत्थाणप्पाबहुए भण्णमाणे एवं होदि त्ति अप्पणो अपुव्वफद्दएहिं संधाणं कादूण पुणो तत्तो णियत्तिदूण हेट्ठिमपदं चेव घेत्तूण तत्तो लोभमायाणमंतरस्साणंतगुणत्तेण णिद्देसावलंबणे तहासाणुवलंभादो।" इति।

❀न्यगादि च जयधवलाकारैरपि—"अधवा लोभस्स तदियसंगहकिट्टीअंतरमणंतगुणं इदि वुत्ते लोभमायाणमेव तदियपढमसंगहकिट्टीणं संधिगुणगारो गहेयव्वो। ण च तहावलंबिज्जमाणे उवरिमसुत्तेण पुणरुत्तभावो वि, तदियसंगहकिट्टीअंतरमणंतगुणमिदि सामण्णणिद्देसेण तं कदममिदि संदेहे समुप्पण्णे तण्णिरायरणमुहेण लोभमायाणमंतरमेव तदियसंगहकिट्टीअंतरमिह विवक्खियं, ण तत्तो अण्णमिदि पदुप्पायणट्ठमुवरिमसुत्तारंभे पुणरुत्तदोसासंभवादो।" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्येयानि । लोभं प्ररूपयता लोभस्य मायायाश्चाऽन्तरमुक्तम्, तत्र क्रोधे यो विशेषस्तं दर्शयति— '**कोहचरिमाउ**' इत्यादि, क्रोधचरमकिट्टेः—क्रोधतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टित आरभ्य 'लोभाऽपूर्वादिवर्गणान्तरं' लोभप्रथमापूर्वस्पर्धकप्रथमवर्गणां लभ्यु यो गुणकारो योज्यते, स इत्यर्थः, अनन्तगुणं 'विज्ञेयम्' विशेषतोऽवधेयम् ।

भावार्थः पुनरयम्—लोभमाययोरन्तरतो मायायाः प्रथमसंग्रहकिट्ट्यन्तरमनन्तगुणं भवति, मायायाः प्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता मायाया द्वितीयसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टिगतरसा-ऽविभागा भवन्ति, स गुणकारो मायायाः प्रथमसंग्रहकिट्ट्यन्तरमुच्यते । तच्च पूर्वपदतोऽनन्तगुणं भवतीत्यर्थः ।

ततोऽपि मायाया द्वितीयसंग्रहकिट्ट्यन्तरमनन्तगुणम्, मायाया द्वितीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता मायायास्तृतीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तर-किट्टिगतरसाऽविभागा भवन्ति, स गुणकारो द्वितीयसंग्रहकिट्ट्यन्तरमुच्यते, तच्च पूर्वपदतोऽनन्तगुणं भवति । उक्तं च **कषायप्राभृतचूर्णौ—"मायाए पढमसंगहकिट्टीअंतरमणंतगुणं, विदियसंगहकिट्टीअंतरमणंतगुणं ।"** इति ।

ततो मायायास्तृतीयसंग्रहकिट्ट्यन्तरमनन्तगुणम्, अथ मायाया मानस्य चाऽन्तरमनन्तगुणम् । उक्तं च **कषायप्राभृतचूर्णौ—"तदियसंगहकिट्टीअंतरमणंतगुणं, मायाए माणस्स च अंतरमणंतगुणं ।"** इति । लोभवद् व्याख्येयम्, नवरं लोभस्थाने माया वक्तव्या, मायास्थाने च मानो भणनीयः ।

ततोऽपि मानस्य प्रथमसंग्रहकिट्ट्यन्तरमनन्तगुणम्, संज्वलनमानस्य प्रथमसंग्रहकिट्टि-सत्कचरमाऽवान्तरकिट्टिगतरसाविभागा येन गुणकारेण गुणिता मानस्य द्वितीयसंग्रहकिट्टिसत्क-प्रथमाऽवान्तरकिट्टिगतरसाविभागा भवन्ति, स गुणकारो मानस्य प्रथमसंग्रहकिट्ट्यन्तरं भण्यते, तच्च पूर्वपदतोऽनन्तगुणं भवतीति भावः ।

ततोऽपि मानस्य द्वितीयसंग्रहकिट्ट्यन्तरमनन्तगुणं भवति, मानस्य द्वितीयसंग्रहकिट्टिसत्क-चरमाऽवान्तरकिट्टिगतरसाविभागा येन गुणकारेण गुणिता मानस्य तृतीयसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारो मानस्य द्वितीयसंग्रहकिट्ट्यन्तरमुच्यते, तच्च पूर्वतोऽनन्तगुणं भवतीत्यर्थः । न्यगादि च **कषायप्राभृतचूर्णौ—"माणस्स पढमसंगहकिट्टीअंतरमणंतगुणं । विदियसंगहकिट्टीअंतरमणंतगुणं ।"** इति ।

ततोऽपि मानस्य तृतीयसंग्रहकिट्ट्यन्तरमनन्तगुणम्, अथ मानस्य क्रोधस्य चाऽन्तरमनन्तगुणं भवति । उक्तं च **कषायप्राभृतचूर्णौ—"तदियसंगहकिट्टीअंतरमणंतगुणं । माणस्स कोहस्स च अंतरमणंतगुणं ।"** इति व्याख्यानं तु लोभवत् कर्तव्यम्, नवरं लोभस्थाने मानः, मायास्थाने च क्रोधो वक्तव्यः ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

ततोऽपि क्रोधस्य प्रथमसंग्रहकिट्टयन्तरमनन्तगुणं भवति, क्रोधस्य प्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः क्रोधस्य द्वितीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारः क्रोधप्रथमसंग्रहकिट्टयन्तरं निगद्यते, तच्च पूर्वतोऽनन्तगुणमित्यर्थः। ततोऽपि क्रोधस्य द्वितीयसंग्रहकिट्टयन्तरमनन्तगुणं भवति क्रोधस्य द्वितीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः क्रोधस्य तृतीयसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारः क्रोधस्य द्वितीयसंग्रहकिट्टयन्तरमभिधीयते, तच्च पूर्वपदतोऽनन्तगुणं भवतीत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ—"कोहस्स पढमसंगहकिट्टी-अंतरमणंतगुणं, विदियसंगहकिट्टीअंतरमणंतगुणं।"** इति।

ततः क्रोधस्य तृतीयसंग्रहकिट्टयन्तरमनन्तगुणम्, अथ क्रोधचरमावान्तरकिट्टि-लोभप्रथमाऽपूर्वस्पर्धकप्रथमवर्गणाऽन्तरमनन्तगुणम्। उक्तं च **कषायप्राभृतचूर्णौ—"तदियसंगहकिट्टी-अंतरमणंतगुणं, कोधस्स चरिमादो किट्टीदो लोभस्स** अपुव्वफद्दयाणमादिवग्गणाए **अंतरमणंतगुणं।"** इति। व्याख्यानं तु लोभतृतीयसंग्रहकिट्टिवत् समाधानत्रिकमाश्रित्य कर्तव्यम्, नवरं लोभस्थाने क्रोधो वक्तव्यः, मायायाश्च स्थाने लोभाऽपूर्वस्पर्धकप्रथमवर्गणा कथनीया। तथाहि—क्रोधस्य तृतीयसंग्रहकिट्टयन्तरमित्यनेन क्रोधस्य द्वितीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः क्रोधस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा भवन्ति, स गुणकारो ग्राह्यः। स च क्रोधस्य द्वितीयसंग्रहकिट्टयन्तरतो-ऽनन्तगुणो भवति, ततोऽपि क्रोधस्य तृतीयसंग्रहकिट्टिसत्कचरमावान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिता लोभस्याऽपूर्वस्पर्धकप्रथमवर्गणागतरसाऽविभागा भवन्ति, तद्गुणकाररूपं क्रोधतृतीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टि-लोभा-ऽपूर्वस्पर्धकप्रथमवर्गणा-ऽन्तरमनन्तगुणं भवतीति प्रथमविकल्पः।

**प्रथमसमाधानमाश्रित्या-ऽसत्कल्पनया स्थापना**

| | | किट्टयन्तराल्पबहुत्वक्रमाङ्कः | किट्टयनुभागाल्पबहुत्वक्रमाङ्कः |
|---|---|---|---|
| लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः 'स' | | १ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | 卐 २ | १ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः २ स | | २ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | ⊡ ४ | २ | |

卐 लोभप्रथमसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टिगतरसाविभागा येन गुणकारेण गुणिता लोभप्रथमसंग्रहकिट्टिसत्कद्वितीया-ऽवान्तरकिट्टिगतरसाविभागा भवन्ति, स गुणकारो लोभप्रथमसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टयन्तरमुच्यते। प्रकृते लोभप्रथमसंग्रहकिट्टेः प्रथमा-ऽवान्तरकिट्टौ रसाविभागाः 'स' इति कल्प्यन्ते, द्वितीयाऽवान्तरकिट्टौ तु '२ स' इति। अथ द्विकेन गुणिताः 'स' रसाविभागाः '२ स' भवन्ति, तेन प्रथमा-ऽवान्तरकिट्टयन्तरं द्विकं भवति। एवं द्वितीयाद्यवान्तरकिट्टयन्तराणि दर्शयितव्यानि।

⊡ द्विकं चा-ऽत्रा-ऽनन्तत्वेन कल्पितम्। तेन प्रथमा-ऽवान्तरकिट्टयन्तरतो द्वितीया-ऽवान्तरकिट्टयन्तरस्य द्विगुणत्वाद् द्वितीया-ऽवान्तरकिट्टयन्तरमनन्तगुणं भवति।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना प्रथमसमाधानमाश्रित्य स्थापना | | किट्टयन्तराल्पबहुत्वक्रमाङ्कः | किट्टयनुभागाल्पबहुत्वक्रमाङ्कः |
|---|---|---|---|
| लोभप्रथमसंग्रहकिट्टितृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः ८ स | | ३ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | ★ ८ | ३ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | × तस्यां रसाविभागाः ६४ स | | ४ |
| लोभप्रथमसंग्रहकिट्टयन्तरम् | ३२ अ$^{२}$ | ३७ | |
| लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टि | तस्यां रसाविभागाः २०४८ अ$^{२}$स | | ५ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | १६ | ४ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः १२७६८अ$^{२}$स | | ६ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | ३२ | ५ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टि | तस्यां रसाविभागाः १६अ$^{3}$स | | ७ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | ६४ | ६ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः १०२४ अ$^{3}$स | | ८ |
| लोभद्वितीयसंग्रहकिट्टयन्तरम् | ६४ अ$^{२}$ | ३८ | |
| लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः अ$^{६}$ स | | ९ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | १२८ | ७ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टि | तस्यां रसाविभागाः१२८अ$^{६}$स | | १० |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | २५६ | ८ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टि | तस्यांरसाविभागाः२२७६८अ$^{६}$स | | ११ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | ५१२ | ९ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः २५६अ$^{९}$स | | १२ |
| लोभतृतीयसंग्रहकिट्टयन्तरम् | △१६३८४ अ$^{3}$ | ३९ | |

★ एकैकस्यां संग्रहकिट्टौ त्रीण्यवान्तरकिट्टयन्तराणि भवन्ति, चतसृणामवान्तरकिट्टीनां परिकल्पनात्।

× एकैकस्यां संग्रहकिट्टौ चतस्रो-ऽवान्तरकिट्टयः कल्पिताः। इह सर्वसंग्रहकिट्टिष्ववान्तरकिट्टयो मिथस्तुल्या न भवन्ति, किन्तु ग्रन्थगौरवभयाद् असत्कल्पनया तुल्याः परिकल्पिताः, अन्यथा लोभप्रथमसंग्रहकिट्टिसत्कसकला-ऽवान्तरकिट्टित क्रोधतृतीयसंग्रहकिट्टिसत्कसर्वा-ऽवान्तरकिट्टयः संख्येयगुणाः कल्पयितव्याः, लोभप्रथमसंग्रहकिट्टिसत्कसर्वा-ऽवान्तरकिट्टितः क्रोधतृतीयसंग्रहकिट्टिसत्कसकलावान्तरकिट्टीनां संख्येयगुणत्वस्य वक्ष्यमाणत्वात्।

△ लोभद्वितीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टौ रसाविभागाः '१०२४ अ$^{3}$ स' इति भवन्ति, ते च '१६३८४ अ$^{3}$' इत्यनेन गुणिता लोभतृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगता रसाविभागाः '२५६ अ$^{९}$स' इति जाताः। तेन '१०२४ अ$^{3}$' इत्येतद् लोभतृतीयसंग्रहकिट्टयन्तरं भवति।

न्यासः—लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टिरसाविभागाः = १०२४ अ$^{3}$ स (= द्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टिरसाविभागाः) × १६३८४ अ$^{3}$
= १०२४ × १६३८४ अ$^{६}$स
= १६,७७२१६ अ$^{९}$स
= २५६ अ$^{९}$स

तथा लोभतृतीयसंग्रहकिट्टयन्तरम् = १६३८४ अ$^{3}$ = ६४ अ$^{२}$ (= द्वितीयसंग्रहकिट्टयन्तरम्) × १२८ × २५६ × ५१२ (= परस्परगुणितानि तृतीयसंग्रहकिट्टयवान्तरकिट्टयन्तराणि)

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना प्रथमसमाधानमाश्रित्य स्थापना | | किट्ट्यन्तराल्पबहुत्व-क्रमाङ्कः | किट्ट्यनुभागाल्पबहुत्व-क्रमाङ्कः |
|---|---|---|---|
| मायालोभयोरन्तरम् | ※३२७६८ अ$^{3}$ | ४० | |
| मायाप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | १२८ अ$^{११}$ स | | १३ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | १०२४ | १० | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः २अ$^{१२}$स | | १४ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | २०४८ | ११ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तद्ररसाविभागाः ४०९६ अ$^{१२}$स | | १५ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | ४०९६ | १२ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः २५६अ$^{१३}$स | | १६ |
| मायाप्रथमसंग्रहकिट्ट्यन्तरम् | अ$^{४}$ | ४१ | |
| मायाद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः२५६ अ$^{१७}$स | | १७ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ८१९२ | १३ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः ३२अ$^{१८}$स | | १८ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | १६३८४ | १४ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः ८अ$^{१९}$स | | १९ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | ३२७६८ | १५ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः ४ अ$^{२०}$स | | २० |
| मायाद्वितीयसंग्रहकिट्ट्यन्तरम् | २ अ$^{४}$ | ४२ | |
| मायातृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः ८ अ$^{२४}$स | | २१ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ६५५३६ = अ ❀ | १६ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः ८ अ$^{२५}$स | | २२ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | २ अ | १७ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागा १६अ$^{२६}$स | | २३ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | ४ अ | १८ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः ६४ अ$^{२७}$स | | २४ |
| मायातृतीयसंग्रहकिट्ट्यन्तरम् | १६ अ$^{७}$ | ४३ | |
| मायामानयोरन्तरम् | ३२ अ$^{७}$ | ४४ | |
| मानप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तद्ररसाविभागाः २०४८ अ$^{३४}$स | | २५ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ८ अ | १९ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तद्ररसाविभागाः१६३८४अ$^{३५}$स | | २६ |

※ लोभतृतीयसंग्रहकिट्टिसत्कचरमा-ऽवान्तरकिट्टिगता रसाविभागा '२५६ अ$^{७}$स' इति भवन्ति। ते च '३२७६८ अ$^{3}$' इत्यनेन गुणकारेण गुणिता मायाप्रथमसंग्रहकिट्टिसत्कप्रथमा-ऽवान्तरकिट्टिगतरसाविभागाः '१२८ अ$^{११}$स' इति जाताः। तेन '३२७६८ अ$^{3}$' इत्येतद् मायालोभयोरन्तरम्। तच्च प्राग्दर्शित-लोभतृतीयसंग्रहकिट्ट्यन्तरतोऽनन्तगुणं भवति, द्विकस्या-ऽनन्तत्वेन परिकल्पनात्।

❀ षट्त्रिंशदधिकपञ्चशतोत्तरपञ्चषष्टिसहस्राणां स्थाने 'अ' इति कल्प्यते।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना प्रथमसमाधानमाश्रित्य स्थापना | | किट्टयन्तराल्पबहुत्वक्रमाङ्कः | किट्टयनुभागाल्पबहुत्वक्रमाङ्कः |
|---|---|---|---|
| मानप्रथमसंग्रहकिट्टिद्वितीयावान्तरकिट्टयन्तरम् | १६ अ | २८ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः ४अ$^{३७}$स | | २७ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | ३२ अ | २९ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागा.१२८अ$^{३८}$स | | २८ |
| **मानप्रथमसंग्रहकिट्टयन्तरम्** | ६४ अ$^{७}$ | ४५ | |
| मानद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः८१९२अ$^{४४}$स | | २९ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | ६४ अ | २२ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः ८अ$^{४७}$स | | ३० |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | १२८ अ | २३ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः १०२४अ$^{४८}$स | | ३१ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | २५६ अ | २४ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः ४ अ$^{५०}$स | | ३२ |
| **मानद्वितीयसंग्रहकिट्टयन्तरम्** | १२८ अ$^{७}$ | ४६ | |
| मानतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः५१२अ$^{५७}$स | | ३३ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | ५१२ अ | २५ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः ४अ$^{५९}$स | | ३४ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | १०२४ अ | २६ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः४०९६अ$^{६०}$स | | ३५ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | २०४८ अ | २७ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः १२८अ$^{६२}$स | | ३६ |
| **मानतृतीयसंग्रहकिट्टयन्तरम्** | ३२ अ$^{१२}$✻ | ४७ | |
| **मानक्रोधयोरन्तरम्** | ६४ अ$^{१२}$ | ४८ | |
| क्रोधप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तद्रसाविभागाः८१९२अ$^{७४}$स | | ३७ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | ४०९६ अ | २८ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागा ५१२अ$^{७५}$स | | ३८ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | ८१९२ अ | २९ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः ६४अ$^{७८}$स | | ३९ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | १६३८४ अ | ३० | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः१६अ$^{८०}$स | | ४० |

✻ ननु '३२अ$^{१२}$' इत्यस्य कोऽर्थः? उच्यते–द्वादश अकाराः पृथक् पृथक् स्थाप्याः, ततः परस्परं गुणयितव्याः। गुणनफलं च पुनर्द्वात्रिंशता गुणनीयम्। गुणकारेण प्राप्तम् ३२ अ$^{१२}$ इति भवति। एवं यत्र यत्र 'अ' इत्यस्योपरि योऽङ्कः स्थापितो भवेत्, तत्संख्यका अकाराः स्थापयितव्याः, ततः परस्परं गुणयितव्याः। षट्त्रिंशदधिकपञ्चशतोत्तरपञ्चषष्टिसहस्राणां च स्थाने 'अ' इति कल्प्यत इति तु प्राग् दर्शितमेव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना प्रथमसमाधानमाश्रित्य स्थापना | | किट्ट्यन्तराल्पबहुत्व-क्रमाङ्कः | किट्ट्यनुभागाल्पबहुत्व-क्रमाङ्कः |
|---|---|---|---|
| क्रोधप्रथमसंग्रहकिट्ट्यन्तरम् | १२८ अ$^{१२}$ | ४९ | |
| क्रोधद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः२०४८अ$^{६२}$स | | ४१ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ३२७६८ अ | ३१ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः१०२४अ$^{६४}$स | | ४२ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | अ$^{२}$ | ३२ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागा.१०२४अ$^{६६}$स | | ४३ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | २ अ$^{२}$ | ३३ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तद्रसाविभागाः२०४८अ$^{६८}$स | | ४४ |
| क्रोधद्वितीयसंग्रहकिट्ट्यन्तरम् | २५६ अ$^{१२}$ | ५० | |
| क्रोधतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः ८अ$^{१११}$स | | ४५ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ४ अ$^{२}$ | ३४ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः ३२अ$^{११३}$स | | ४६ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | ८ अ$^{२}$ | ३५ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः२५६अ$^{११५}$स | | ४७ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | १६ अ$^{२}$ | ३६ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तद्रसाविभागाः ४०९६अ$^{११७}$स | | ४८ |
| क्रोधतृतीयसंग्रहकिट्ट्यन्तरम् | २ अ$^{११}$ | ५१ | |
| क्रोधचरमावान्तरकिट्टि-लोभापूर्वस्पर्धकादिवर्गणान्तरम् | अ$^{१५८}$ | ५२ | |
| लोभापूर्वस्पर्धकादिवर्गणा | तद्रसाविभागाः ४०९६अ$^{२३५}$स | | ४९ |

(२) अथवा क्रोधस्य तृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण गुणिताः क्रोधस्यैवाऽपूर्वस्पर्धकप्रथमवर्गणागतरसाऽविभागा भवन्ति, स गुणकारः क्रोधस्य तृतीयसंग्रहकिट्ट्यन्तरं निगद्यते, तच्च क्रोधस्य द्वितीयसंग्रहकिट्ट्यन्तरतोऽनन्तगुणं भवति, तथा द्वितीयसंग्रहकिट्ट्यन्तरत एव प्रागुक्तस्वरूपं क्रोधचरमाऽवान्तरकिट्टिलोभा-ऽपूर्वस्पर्धकप्रथमवर्गणयोरन्तरमप्यनन्तगुणं भवतीति द्वितीयो विकल्पः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| द्वितीयसमाधानमाश्रित्यासत्कल्पनया स्थापना | | किट्टयन्तराल्पबहुत्व-क्रमाङ्कः | किट्टयनुभागाल्पबहुत्व-क्रमाङ्कः |
|---|---|---|---|
| लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः 'स' | | १ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | २ | १ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः २ स | | २ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | ४ | २ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः ८ स | | ३ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | ८ | ३ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः ६४ स | | ४ |
| लोभप्रथमसंग्रहकिट्टयन्तरम् | २२ अ$^{२}$ | ३७ | |
| लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः २०४८अ$^{२}$स | | ५ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | १६ | ४ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः३२७६८अ$^{२}$स | | ६ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | ३२ | ५ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः १६अ$^{३}$स | | ७ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | ६४ | ६ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः १०२४अ$^{३}$स | | ८ |
| लोभद्वितीयसंग्रहकिट्टयन्तरम् | ६४ अ$^{२}$ | ३८,क★ | |
| लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः अ$^{६}$स | | ९ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्टयन्तरम् | १२८ | ७ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः १२८अ$^{६}$स | | १० |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टयन्तरम् | २५६ | ८ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः३२७६८अ$^{६}$स | | ११ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टयन्तरम् | ५१२ | ९ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागा २५६ अ$^{७}$स | | १२ |
| लोभतृतीयसंग्रहकिट्टयन्तरम् | १६ अ$^{२२८}$ | 卐 ख | |
| लोभाऽपूर्वस्पर्धकप्रथमवर्गणा | तद्रसाविभा० ४०९६अ$^{२३५}$स❀ | | ४९ |
| लोभमाययोरन्तरम् | △ १२८ अ$^{२}$ | ३९ | |

★ 'क' इत्यस्मात् 'ख' इत्येतदनन्तगुणम् ।

卐 ननु किं नाम 'ख'? इति चेत्, उच्यते— लोभतृतीयसंग्रहकिट्टिसत्कचरमावान्तरकिट्टिगत-रसाविभागाः '२५६अ$^{७}$स' इत्येतावन्तः '१६अ$^{२२८}$' इत्यनेन गुणकारेण गुणिता लोभप्रथमापूर्वस्पर्धकप्रथम वर्गणागता रसाविभागाः '४०९६ अ$^{२३५}$स' इत्येतावन्तो भवन्ति । तेन '१६ अ$^{२२८}$' इत्येतद् लोभतृतीयसंग्रह-किट्टयन्तरं भवति, तच्च खसंज्ञकम् । तत्पुनः कसंज्ञकतो (लोभद्वितीयसंग्रहकिट्टयन्तरतो) अनन्तगुणं भवति ।

△ लोभतृतीयसंग्रहकिट्टिसत्कचरमावान्तरकिट्टिप्रतिबद्धरसाविभागाः '२५६ अ$^{७}$स' इत्येतावन्तः '१२८ अ$^{२}$' इत्यनेन गुणिता मायाप्रथमसंग्रहकिट्टिसत्कप्रथमावान्तरकिट्टिगतरसाविभागाः '३२७६८ अ$^{६}$स' इत्येतावन्तो भवन्ति, तेन '१२८ अ$^{२}$' इत्येतद् लोभमाययोरन्तरम् , तच्च लोभद्वितीयसंग्रहकिट्टयन्तरतो-ऽनन्तगुणं भवति । एवं मायादीनामपि प्ररूपणाऽवसेया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना द्वितीयसमाधानमाश्रित्य स्थापना | | किट्ट्यन्तराल्पबहुत्वक्रमाङ्कः | किट्ट्यनुभागाल्पबहुत्वक्रमाङ्कः |
|---|---|---|---|
| मायाप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | ३२७६८ अ$^{९}$स | | १३ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | १०२४ | १० | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागा:५१२अ$^{१०}$स | | १४ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | २०४८ | ११ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागा:१६अ$^{११}$स | | १५ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | ४०९६ | १२ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागा: अ$^{१२}$स | | १६ |
| मायाप्रथमसंग्रहकिट्ट्यन्तरम् | २५६ अ$^{२}$ | ४० | |
| मायाद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागा: २५६अ$^{१४}$स | | १७ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ८१९२ | १३ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागा:३२अ$^{१५}$स | | १८ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | १६३८४ | १४ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तस्यां रसाविभागा:८ अ$^{१६}$स | | १९ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | ३२७६८ | १५ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागा: ४अ$^{१७}$स | | २० |
| मायाद्वितीयसंग्रहकिट्ट्यन्तरम् | ५१२ अ$^{२}$ | ४१,च★ | |
| मायातृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टि | तद्रसाविभागा:२०४८अ$^{१८}$स | | २१ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ६५५३६ = अ | १६ | |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्टिः | तद्रसाविभागा:२०४८अ$^{२०}$स | | २२ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | २ अ | १७ | |
| ,, ,, ,, ,, तृतीयावान्तरकिट्टिः | तद्रसाविभागा ४०९६अ$^{२१}$स | | २३ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | ४ अ | १८ | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तद्रसाविभागा:१६३८४अ$^{२२}$स | | २४ |
| मायातृतीयसंग्रहकिट्ट्यन्तरम् | १६३८४अ$^{२१२}$ | छ | |
| मायाऽपूर्वस्पर्धकप्रथमवर्गणा | तद्रसावि० ४०९६अ$^{२३५}$स❀ | | ५०वि ● |
| मायामानयोरन्तरम् | १०२४ अ$^{२}$ | ४२ | |
| मानप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागा:२५६अ$^{२५}$स | | २५ |
| ,, ,, ,, ,, प्रथमावान्तरकिट्ट्यन्तरम् | ८ अ | १९ | |
| ,, ,, ,, द्वितीयावान्तरकिट्टिः | तद्रसाविभागा:२०४८अ$^{२६}$स | | २६ |

★ 'च' इत्यस्मात् 'छ' इत्येतदनन्तगुणम्।

❀ परमार्थतो लोभादीनां क्रमेण प्रथमाऽपूर्वस्पर्धकप्रथमवर्गणाप्रतिबद्धरसाविभागा विशेषाधिका भवन्ति। इह तु स्थूलदृष्ट्या-ऽधिकत्वस्याऽविवक्षणात् चतुर्णामपि कषायाणां प्रथमापूर्वस्पर्धकप्रथमवर्गणागतरसाविभागास्तुल्या दर्शिताः।

● [redacted] एवमग्रेऽप्यत्र न❀चिह्ने नाऽयमेवार्थो बोध्यः। विशब्दविशिष्टोऽङ्कः पूर्वपदतः स्वस्य विशेषाधिकत्वं बोधयति, [redacted]शेषास्त्वनन्तगुणतां सूचयन्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना द्वितीयसमाधानमाश्रित्य स्थापना | | किट्ट्यन्तराल्पबहुत्वक्रमाङ्कः | किट्ट्यनुभागाल्पबहुत्वक्रमाङ्कः |
|---|---|---|---|
| मानप्रथमसंग्रहकिट्टिद्वितीयावान्तरकिट्ट्यन्तरम् | १६ अ | २० | |
| „ „ „ „ तृतीयावान्तरकिट्टिः | तद्रसाविभागाः३२७६८अ$^{२७}$स | | २७ |
| „ „ „ „ तृतीयावान्तरकिट्ट्यन्तरम् | ३२ अ | २१ | |
| „ „ „ „ चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः१६अ$^{२९}$स | | २८ |
| मानप्रथमसंग्रहकिट्ट्यन्तरम् | २०४८ अ$^{२}$ | ४३ | |
| मानद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तद्रसाविभागाः ३२७६८अ$^{३१}$स | | २९ |
| „ „ „ „ प्रथमावान्तरकिट्ट्यन्तरम् | ६४ अ | २२ | |
| „ „ „ „ द्वितीयावान्तरकिट्टिः | तद्रसाविभागाः ३२अ$^{३३}$स | | ३० |
| „ „ „ „ द्वितीयावान्तरकिट्ट्यन्तरम् | १२८ अ | २३ | |
| „ „ „ „ तृतीयावान्तरकिट्टिः | तद्रसाविभागाः४०९६अ$^{३४}$स | | ३१ |
| „ „ „ „ तृतीयावान्तरकिट्ट्यन्तरम् | २५६ अ | २४ | |
| „ „ „ „ चतुर्थावान्तरकिट्टिः | तद्रसाविभागाः १६ अ$^{३६}$स | | ३२ |
| मानद्वितीयसंग्रहकिट्ट्यन्तरम् | ४०९६ अ$^{२}$ | ४४ठ, ★ | |
| मानतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः अ$^{३८}$स | | ३३ |
| „ „ „ „ प्रथमावान्तरकिट्ट्यन्तरम् | ५१२ अ | २५ | |
| „ „ „ „ द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः५१२अ$^{४०}$स | | ३४ |
| „ „ „ „ द्वितीयावान्तरकिट्ट्यन्तरम् | १०२४ अ | २६ | |
| „ „ „ „ तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः ८अ$^{४२}$स | | ३५ |
| „ „ „ „ तृतीयावान्तरकिट्ट्यन्तरम् | २०४८ अ | २७ | |
| „ „ „ „ चतुर्थावान्तरकिट्टिः | तद्रसाविभागाः१६३८४अ$^{४३}$स | | ३६ |
| मानतृतीयसंग्रहकिट्ट्यन्तरम् | १६३८४ अ$^{१६५}$ | ठ, | |
| मानापूर्वस्पर्धकप्रथमवर्गणा | तद्रसाविभागाः४०९६अ$^{२९५}$स❀ | | ५१ वि |
| मानक्रोधयोरन्तरम् | ८१९२ अ$^{२}$ | ४५ | |
| क्रोधप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तद्रसाविभागाः२०४८अ$^{४६}$स | | ३७ |
| „ „ „ „ प्रथमावान्तरकिट्ट्यन्तरम् | ४०९६ अ | २८ | |
| „ „ „ „ द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः१२८अ$^{४८}$स | | ३८ |
| „ „ „ „ द्वितीयावान्तरकिट्ट्यन्तरम् | ८१९२ अ | २९ | |
| „ „ „ „ तृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः १६अ$^{५०}$स | | ३९ |
| „ „ „ „ तृतीयावान्तरकिट्ट्यन्तरम् | १६३८४ अ | ३० | |
| „ „ „ „ चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः ४अ$^{५२}$स | | ४० |
| क्रोधप्रथमसंग्रहकिट्ट्यन्तरम् | १६३८४ अ$^{२}$ | ४६ | |

★ 'ठ' इत्यस्मात् 'ठ' इत्येतदनन्तगुणम्।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना द्वितीयसमाधानमाश्रित्य स्थापना | | किट्टयन्तराल्पबहुत्व-क्रमाङ्कः | किट्टयनुभागाल्पबहुत्व-क्रमाङ्कः |
|---|---|---|---|
| क्रोधद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तस्यां रसाविभागाः $अ^{५५}$ | | ४१ |
| " " " " प्रथमावान्तरकिट्टयन्तरम् | ३२७६८ अ | ३१ | |
| " " " " द्वितीयावान्तरकिट्टिः | तद्रसाविभागाः ३२७६८$अ^{५७}$स | | ४२ |
| " " " " द्वितीयावान्तरकिट्टयन्तरम् | ६५५३६अ = $अ^{२}$ | ३२ | |
| " " " " तृतीयावान्तरकिट्टिः | तद्रसाविभागा ३२७६८$अ^{५९}$स | | ४३ |
| " " " " तृतीयावान्तरकिट्टयन्तरम् | २ $अ^{२}$ | ३३ | |
| " " " " चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः $अ^{६१}$स | | ४४ |
| क्रोधद्वितीयसंग्रहकिट्टयन्तरम् | ३२७६८ $अ^{२}$ | ४७ त★ | |
| क्रोधतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिः | तद्रसाविभागाः ३२७६८$अ^{६३}$स | | ४५ |
| " " " " प्रथमावान्तरकिट्टयन्तरम् | ४ $अ^{२}$ | ३४ | |
| " " " " द्वितीयावान्तरकिट्टिः | तस्यां रसाविभागाः २$अ^{६६}$स | | ४६ |
| " " " " द्वितीयावान्तरकिट्टयन्तरम | ८ $अ^{२}$ | ३५ | |
| " " " " तृतीयावान्तरकिट्टिः | तस्यां रसाविभागा १६$अ^{६८}$स | | ४७ |
| " " " " तृतीयावान्तरकिट्टयन्तरम् | १६ $^{२}$ | ३६ | |
| " " " " चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागा २५६$अ^{७०}$स | | ४८ |
| क्रोधतृतीयसंग्रहकिट्टयन्तरम् | १६ $अ^{१६२}$ △ | थ | |
| क्रोधापूर्वस्पर्धकप्रथमवर्गणा | तद्रसावि० ४०९६$अ^{२३५}$स★ | | ५२ वि |
| क्रोधचरमावान्तरकिट्टिलोभापूर्वस्पर्धकप्रथमवर्गणयोरन्तरम | १६ $अ^{१६२}$ △ | ४८ स★ | |
| लोभाऽपूर्वस्पर्धकप्रथमवर्गणा | तद्रसावि० ४०९६$अ^{२३४}$स | | |

(३) अथवा क्रोधस्य तृतीयसंग्रहकिट्टयन्तरमित्यनेन क्रोधस्य तृतीयसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टिगतरसाऽविभागा येन गुणकारेण सङ्गुणिता लोभस्याऽपूर्वस्पर्धकप्रथमवर्गणागतरसाऽविभागा भवन्ति, स गुणकारो ग्राह्यः, स एव च क्रोधचरमाऽवान्तरकिट्टिलोभाऽपूर्वस्पर्धकप्रथमवर्गणयोरन्तरं निगद्यते, नाऽन्यः। सामान्यविशेषभावश्चलोभवत्प्रतिपादनीय इति तृतीयो विकल्पः।

| तृतीयसमाधानमाश्रित्याऽसत्कल्पनया स्थापना | | किट्टयन्तराल्पबहुत्व-क्रमाङ्कः | किट्टयनुभागाल्पबहुत्व-क्रमाङ्कः |
|---|---|---|---|
| लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तस्यां रसाविभागाः स | | १ |
| " " " " प्रथमाऽवान्तरकिट्टयन्तरम् | २ | १ | |
| " " " " द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः २ स | | २ |
| " " " " द्वितीयावान्तरकिट्टयन्तरम् | ४ | २ | |

★ 'त' इत्यस्मात् 'थ' इत्येतदनन्तगुणम्।

△ यद्यपि क्रोधतृतीयसंग्रहकिट्टयन्तरतः क्रोधचरमावान्तरकिट्टिलोभापूर्वस्पर्धकप्रथमवर्गणयोरन्तरमनन्ततमभागेन हीनं भवति। तथापि स्थूलदृष्टया तस्याऽविवक्षणादुभयोरपि तुल्यता दर्शिता।
शेषं तु प्रथमसमाधानवद् बोध्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना तृतीयसमाधानमाश्रित्य स्थापना | | किट्ट्यन्तराल्पबहुत्व-क्रमाङ्कः | किट्ट्यनुभागाल्पबहुत्व-क्रमाङ्कः |
|---|---|---|---|
| लोभप्रथमसंग्रहकिट्टितृतीयावान्तरकिट्टिः | तस्यां रसाविभागाः ८ स | | ३ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्ट्यन्तरम् | ८ | ३ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः ६४ स | | ४ |
| लोभप्रथमसंग्रहकिट्ट्यन्तरम् | ३२ अ $^{2}$ | ३७ | |
| लोभद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टि | तस्यां रसाविभागाः२०४८अ $^{2}$ स | | ५ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्ट्यन्तरम् | १६ | ४ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तद्रसाविभागाः ३२७६८अ $^{2}$ स | | ६ |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्ट्यन्तरम् | ३२ | ५ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः १६अ $^{3}$ स | | ७ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्ट्यन्तरम् | ६४ | ६ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः १०२४अ $^{3}$ स | | ८ |
| लोभद्वितीयसंग्रहकिट्ट्यन्तरम् | ६४ अ $^{2}$ | ३८ | |
| लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तस्यां रसाविभागाः अ $^{6}$ स | | ९ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्ट्यन्तरम् | १२८ | ७ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः १२८अ $^{6}$ स | | १० |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्ट्यन्तरम् | २५६ | ८ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः३२७६८अ $^{6}$ स | | ११ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्ट्यन्तरम् | ५१२ | ९ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः २५६अ $^{7}$ स | | १२ |
| लोभतृतीयसंग्रहकिट्ट्यन्तरम् = लोभमाययोरन्तरम् | 卐 १२८ अ $^{2}$ | ३९ | |
| मायाप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तद्रसाविभागा ३२७६८अ $^{9}$ स | | १३ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्ट्यन्तरम् | १०२४ | १० | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः५१२अ $^{10}$ स | | १४ |
| ,, ,, ,, ,, द्वितीयावान्तरकिट्ट्यन्तरम् | २०४८ | ११ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः १६अ $^{11}$ स | | १५ |
| ,, ,, ,, ,, तृतीयावान्तरकिट्ट्यन्तरम् | ४०९६ | १२ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः अ $^{12}$ स | | १६ |
| मायाप्रथमसंग्रहकिट्ट्यन्तरम् | २५६ अ $^{2}$ | ४० | |

卐 लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिगतरसाविभागाः '२५६अ $^{7}$ स' इत्येतावन्तः १२८ अ $^{2}$ इत्यनेन गुणकारेण गुणिता मायाप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिगत-रसाविभागाः '३२७६८ अ $^{9}$ स' इत्येतावन्तो भवन्ति, तेन '१२८ अ $^{2}$' इत्येतद् लोभतृतीयसंग्रहकिट्ट्यन्तरं भवति। तदेव च लोभमाययोरन्तरं भवति, तच्च लोभद्वितीयसंग्रहकिट्ट्यन्तरतोऽनन्तगुणं भवति। एवं मायादीनामपि प्ररूपणा कर्तव्या।

शेषं प्रथमसमाधानस्थापनावद् बोध्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना तृतीयसमाधानमाश्रित्य स्थापना | | किट्टयन्तराल्पबहुत्वक्रमाङ्कः | किट्टयनुभागाल्पबहुत्वक्रमाङ्कः |
|---|---|---|---|
| मायाद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तस्यां रसाविभागाः २५६अ$^{१४}$स | | १७ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ८१९२ | १३ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागा.३२अ$^{१५}$स | | १८ |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टयन्तरम् | १६३८४ | १४ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः ८अ$^{१६}$स | | १९ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | ३२७६८ | १५ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः ,,अ$^{१७}$स | | २० |
| मायाद्वितीयसंग्रहकिट्टयन्तरम् | ५१२ अ$^{२}$ | ४१ | |
| मायातृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तद्रसाविभागाः२०४८अ$^{१९}$स | | २१ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ६५५३६ = अ | १६ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तद्रसाविभागाः२०४८अ$^{२०}$स | | २२ |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टयन्तरम् | २ अ | १७ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तद्रसाविभागाः४०९६अ$^{२१}$स | | २३ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | ४ अ | १८ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तद्रसाविभागाः१६३८४अ$^{२२}$स | | २४ |
| मायातृतीयसंग्रहकिट्टयन्तरम् = मानमाययोरन्तरम् | १०२४ अ$^{२}$ | ४२ | |
| मानप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तस्यां रसाविभागाः २५६अ$^{२४}$स | | २५ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ८ अ | १९ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तद्रसाविभागाः २०४८अ$^{२६}$स | | २६ |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टयन्तरम् | १६ अ | २० | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तद्रसाविभागाः ३२७६८अ$^{२७}$स | | २७ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | ३२ अ | २१ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः१६अ$^{२८}$स | | २८ |
| मानप्रथमसंग्रहकिट्टयन्तरम् | २०४८ अ$^{२}$ | ४३ | |
| मानद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तद्रसाविभागाः ३२७६८अ$^{३१}$स | | २९ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ६४ अ | २२ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागा.३२अ$^{३३}$स | | ३० |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टयन्तरम् | १२८ अ | २३ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः४०९६अ$^{३४}$स | | ३१ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | २५६ अ | २४ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः १६अ$^{३६}$स | | ३२ |
| मानद्वितीयसंग्रहकिट्टयन्तरम् | ४०९६अ$^{२}$ | ४४ | |
| मानतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तस्यां रसाविभागाः अ$^{३९}$स | | ३३ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ५१२ अ | २५ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः ५१२अ$^{४०}$स | | ३४ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| पूर्वतोऽनुवर्तमाना तृतीयसमाधानमाश्रित्य स्थापना | | किट्टयन्तराल्पबहुत्व-क्रमाङ्कः | किट्टयनुभागाल्पबहुत्व-क्रमाङ्कः |
|---|---|---|---|
| मानतृतीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टयन्तरम् | १०२४ अ | २६ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः ८ अ$^{४२}$ स | | ३५ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | २०४८ अ | २७ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तद्रसाविभागाः १६३८४अ$^{४३}$स | | ३६ |
| मानतृतीयसंग्रहकिट्टयन्तरम्=क्रोधमानयोरन्तरम् | ८१९२ अ$^{२}$ | ४५ | |
| क्रोधप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तद्रसाविभागाः २०४८अ$^{४६}$स | | ३७ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ४०९६ अ | २८ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः १२८अ$^{४८}$स | | ३८ |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टयन्तरम् | ८१९२ अ | २९ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः १६अ$^{५०}$स | | ३९ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | १६३८४ अ | ३० | |
| ,, ,, ,, ,, चतुर्थावान्तरकिट्टिः | तस्यां रसाविभागाः४ अ$^{५२}$स | | ४० |
| क्रोधप्रथमसंग्रहकिट्टयन्तरम् | १६३८४ अ$^{२}$ | ४६ | |
| क्रोधद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तस्यां रसाविभागाः अ$^{५५}$स | | ४१ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ३२७६८ अ | ३१ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तद्रसाविभागाः३२७६८ अ$^{५६}$स | | ४२ |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टयन्तरम् | अ$^{२}$ | ३२ | |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टिः | तद्रसाविभागाः३२७६८अ$^{५८}$ स | | ४३ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | २अ$^{२}$ | ३३ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः अ$^{६१}$स | | ४४ |
| क्रोधद्वितीयसंग्रहकिट्टयन्तरम् | ३२७६८ अ$^{२}$ | ४७ | |
| क्रोधतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः | तद्रसाविभागाः ३२७६८अ$^{६३}$स | | ४५ |
| ,, ,, ,, ,, प्रथमाऽवान्तरकिट्टयन्तरम् | ४ अ$^{२}$ | ३४ | |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टिः | तस्यां रसाविभागाः २अ$^{६६}$स | | ४६ |
| ,, ,, ,, ,, द्वितीयाऽवान्तरकिट्टयन्तरम् | ८ अ$^{२}$ | ३५ | |
| ,, ,, ,, ,, तृतीयावान्तकिट्टिः | तस्यां रसाविभागाः १६अ$^{६८}$स | | ४७ |
| ,, ,, ,, ,, तृतीयाऽवान्तरकिट्टयन्तरम् | १६ अ$^{२}$ | ३६ | |
| ,, ,, ,, ,, चतुर्थाऽवान्तरकिट्टिः | तस्यां रसाविभागाः२५६अ$^{७०}$स | | ४८ |
| क्रोधतृतीयसंग्रहकिट्टयन्तरम्=क्रोधचरमाऽवान्तर-किट्टिलोभापूर्वस्पर्धकप्रथमवर्गणान्तरम् | १६अ$^{१६५}$ | ४८ | |
| लोभापूर्वस्पर्धकप्रथमवर्गणा | तस्यां रसावि० ४०९६अ$^{२३५}$स | | ४९ |

तत्त्वं तु केवलिनो बहुश्रुता वा जानन्ति ॥ ९१।९२।९३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ द्वादशसंग्रहकिट्टीनां प्रदेशाऽल्पबहुत्वमवान्तरकिट्टयल्पबहुत्वं च विभणिषुराह—

**अह संगहकिट्टीणं पएसअप्पाबहुत्तं उ ।**
**माणस्स पढमसंगहकिट्टीअ पएसगा थोवा ॥९४॥ (उपगीतिः)**
**तत्तो बीयाए उ विसेसऽहिआ होन्ति माणस्स ।**
**तो तइआए अहिआ तो कोहस्स बिइयाअ अब्भहिआ ॥९५॥ (उद्गीतिः)**
**तो तइआए अहिआ तो मायाएऽहिआ कमा तीसु ।**
**तो लोहस्स कमेणं तीसु विसेसाहिआ तत्तो ॥९६॥**
**कोहस्स पढमसंगहकिट्टीए होंति संखगुणा ।**
**एवमवंतरकिट्टीणऽप्पाबहुअं मुणेयव्वं ॥९७॥ (उपगीतिः)**

अथ संग्रहकिट्टीनां प्रदेशाल्पबहुत्वं तु ।
मानस्य प्रथमसंग्रहकिट्टौ प्रदेशाः स्तोकाः ॥९४॥
तेभ्यो द्वितीयस्यां तु विशेषाधिका भवन्ति मानस्य ।
ततस्तृतीयायामधिकास्ततः क्रोधस्य द्वितीयस्यामभ्यधिकाः ॥९५॥
ततस्तृतीयस्यामधिकास्ततो मायाया अधिकाः क्रमात् तिसृषु ।
ततो लोभस्य क्रमेण तिसृषु विशेषाधिकास्तेभ्यः ॥९६॥
क्रोधस्य प्रथमसंग्रहकिट्टौ भवन्ति संख्यगुणाः ।
एवमवान्तरकिट्टीनामल्पबहुत्वं ज्ञातव्यम् ॥९७॥ इति पदसंस्कारः ।

**'अह'** इत्यादि, अथशब्दः प्रकरणान्तरसूचकः, किट्टयन्तराणि भणितानि, सम्प्रति प्रदेशाल्पबहुत्वं भणनाऽवसर इति प्रकरणान्तरं सूचयति । 'संग्रहकिट्टीनां' द्वादशसंग्रहकिट्टीनां 'प्रदेशाल्पबहुत्वं, प्रदेशविषयकाऽल्पबहुत्वं तु भण्यत इति शेषः ।

अथ प्रतिज्ञाताऽल्पबहुत्वं भणति–**'माणस्स'** इत्यादि, 'मानस्य, संज्वलनमानस्य प्रथमसंग्रहकिट्टौ **'पएसगा'** त्ति **"स्वार्थे कश्च वा"** ( सिद्धहेम० ८-२-१६४ ) इति प्राकृतलक्षणेन स्वार्थे कप्रत्ययः, प्रदेशाः स्तोका भवन्ति । अत्र प्रभूताऽनुभागका संग्रहकिट्टिः प्रथमा, ततो मन्दानुभागका द्वितीया, ततोऽपि मन्दतराऽनुभागका संग्रहकिट्टिस्तृतीयाऽस्ति । तेनाऽत्र प्रथमसंग्रहकिट्टिरित्युक्ते वक्ष्यमाणस्य *किट्टिवेदकस्य प्रथमसंग्रहकिट्टिर्ज्ञातव्या, वेदकस्य प्रथमं तीव्रानुभाग-

---

* यद्यपि **"कर्मजा तृचा च"** ( सिद्धहेम० ३-१-८३ ) इति सूत्रेण कर्मषष्ठीसमासो निषिध्यते, तथापि वेद्यवेदकभावाख्यसम्बन्धविवक्षायां किट्टिवेदकः, निर्वर्त्यनिर्वर्तकभावाख्यसम्बन्धविवक्षायां च किट्टिकारक इति **"षष्ठ्ययत्नाच्छेषे"** ( सिद्धहेम० ३-१-७६ ) इति सूत्रेण षष्ठीसमासो न विरुध्यते । अथवा याजकादेराकृतिगणत्वात् कर्मषष्ठीसमासेऽपि न काचित् क्षतिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेदनात् । किट्टिकारकस्य त्वनुभागमाश्रित्य तृतीया ज्ञातव्या, तत्र प्रभूततमाऽनुभागस्य सत्त्वात् । एवं तृतीयसंग्रहकिट्टिरित्युक्ते किट्टिवेदकस्यैव तृतीयसंग्रहकिट्टिर्ज्ञातव्या, मन्दतमाऽनुभागस्य पश्चाद् वेदनात्, किट्टिकारकस्य तु सैवाऽनुभागमाश्रित्य प्रथमा बोद्धव्या, मन्दतमनुभागसद्भावात् ।

( २ ) 'तत्तो' इत्यादि, 'तेभ्यः' मानप्रथमसंग्रहकिट्टिगतप्रदेशेभ्यो मानस्य द्वितीयस्यां संग्रहकिट्टौ तु विशेषाधिका विद्यन्ते, तीव्राऽनुभागविशिष्टप्रदेशाग्रतो मन्दानुभागविशिष्टप्रदेशाग्रस्य विशेषाधिकत्वे विरोधाभावात् । आधिक्यं च पल्योपमाऽसंख्येयभागभाजितप्रथमसंग्रहकिट्टिप्रदेशराशिना ज्ञातव्यम्, मानस्य प्रथमसंग्रहकिट्टिगतप्रदेशराशिं पल्योपमाऽसंख्येयभागेन विभज्य लब्धैकभागेनाऽधिकाः प्रदेशा मानस्य द्वितीयसंग्रहकिट्टौ भवन्तीत्यर्थः ।

( ३ ) 'तो' इत्यादि, 'ततः' मानस्य द्वितीयसंग्रहकिट्टिगतप्रदेशेभ्यः 'तृतीयायां' संज्वलनमानस्य तृतीयसंग्रहकिट्टौ 'अधिकाः' विशेषाधिकाः प्रदेशा भवन्ति । अधिकत्वं च पल्योपमाऽसंख्येभागभाजितमानद्वितीयसंग्रहकिट्टिप्रदेशराशिना बोद्धव्यम् ।

( ४ ) 'तो' इत्यादि, ततः 'क्रोधस्य' संज्वलनक्रोधस्य 'द्वितीयस्यां' द्वितीयसंग्रहकिट्टौ 'अभ्यधिकाः' विशेषाधिकाः प्रदेशा भवन्ति ।

( ५ ) 'तो' इत्यादि, 'ततः' क्रोधस्य द्वितीयसंग्रहकिट्टिगतसकलप्रदेशतः 'तृतीयस्यां' तृतीयसंग्रहकिट्टौ प्रदेशाः 'अधिका' विशेषाधिका भवन्ति ।

'तो' इत्यादि, ततो मायायास्तिसृषु प्रथमद्वितीयतृतीयलक्षणासु संग्रहकिट्टिषु 'क्रमात्' क्रमेण 'अधिका' विशेषाधिकाः प्रदेशा भवन्ति ।

अयं भावः–( ६ ) संज्वलनक्रोधस्य तृतीयसंग्रहकिट्टिगतसकलप्रदेशतः संज्वलनमायायाः प्रथमसंग्रहकिट्टौ प्रदेशा विशेषाधिका भवन्ति ।

( ७ ) ततः संज्वलनमायाया द्वितीयसंग्रहकिट्टौ विशेषाधिकाः प्रदेशास्तिष्ठन्ति ।

( ८ ) ततोऽपि संज्वलनमायायास्तृतीयसंग्रहकिट्टौ विशेषाधिकाः प्रदेशा वर्तन्ते ।

'तो इत्यादि, 'ततः' मायायास्तृतीयसंग्रहकिट्टिगतसर्वप्रदेशतः 'लोभस्य' 'तिसृषु' प्रथमद्वितीयतृतीयरूपासु संग्रहकिट्टिषु क्रमेण विशेषाधिकाः प्रदेशा भवन्ति ।

एतदुक्तं भवति—( ९ ) मायायास्तृतीयसंग्रहकिट्टिगतप्रदेशाग्रतो लोभस्य प्रथमसंग्रहकिट्टिगतसमस्तप्रदेशा विशेषाधिका भवन्ति ।

(१०) ततोऽपि लोभस्य द्वितीयसंग्रहकिट्टौ प्रदेशा विशेषाधिकास्तिष्ठन्ति ।

(११) ततोऽपि लोभस्य तृतीयसंग्रहकिट्टौ प्रदेशा विशेषाधिका भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१२) '**तत्तो**' त्ति 'तेभ्यः' लोभतृतीयसंग्रहकिट्टिगतसकलप्रदेशतः '**कोहस्स**' इत्यादि, क्रोधस्य प्रथमसंग्रहकिट्टौ प्रदेशाः संख्यगुणा भवन्ति ।

अभ्यधायि च **कषायप्राभृतचूर्णौ**—"**( १ ) माणस्स पढमाए संगहकिट्टीए पदेसग्गं थोवं । ( २ ) विदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । ( ३ ) तदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । विसेसो पलिदोवमस्स असंखेज्जदिभागपडिभागो । (४) कोहस्स विदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । (५) तदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । (६) मायाए पढमसंगहकिट्टीए पदेसग्गं विसेसाहियं । ( ७ ) विदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । ( ८ ) तदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । ( ९ ) लोभस्स पढमाए संगहकिट्टीए पदेसग्गं विसेसाहियं । ( १० ) विदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । (११) तदियाए संगहकिट्टीए पदेसग्गं विसेसाहियं । (१२) कोहस्स पढमाए संगहकिट्टीए पदेसग्गं संखेज्जगुणं** ।" इति ।

अनन्तरोक्ताऽल्पबहुत्वं किट्टिकारकापेक्षया तु प्रथमसंग्रहकिट्टिस्थाने तृतीयसंग्रहकिट्टिं तृतीयसंग्रहकिट्टिस्थाने च प्रथमसंग्रहकिट्टिमुक्त्वा प्रतिपादनीयम् । तथाहि —

( १ ) मानस्य तृतीयसंग्रहकिट्टौ प्रदेशाः स्तोकाः ।
( २ ) ततो मानस्य द्वितीयसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
( ३ ) ततो मानस्य प्रथमसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
( ४ ) ततः क्रोधस्य द्वितीयसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
( ५ ) ततः क्रोधस्य प्रथमसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
( ६ ) ततो मायायास्तृतीयसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
( ७ ) ततो मायाया द्वितीयसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
( ८ ) ततो मायायाः प्रथमसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
( ९ ) ततो लोभस्य तृतीयसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
(१०) ततो लोभस्य द्वितीयसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
(११) ततो लोभस्य प्रथमसंग्रहकिट्टौ प्रदेशा विशेषाधिकाः ।
(१२) ततः क्रोधस्य तृतीयसंग्रहकिट्टौ प्रदेशाः संख्येयगुणाः ।

ननूक्ताऽल्पबहुत्वं कथमवसीयते ? इति चेत्, उच्यते—मोहनीयकर्मणः सकलप्रदेशाग्रं सत्कर्मणि सार्धद्विगुणहानिगुणितप्रथमवर्गणाप्रदेशप्रमाणं विद्यते । तत्र लोभस्य प्रदेशाग्रं किञ्चिद्धिकाष्टभागप्रमाणं भवति, संज्वलनमायायाः किञ्चिन्न्यूनाष्टभागमात्रं तिष्ठति, मानस्याऽपि किञ्चिन्न्यूनाष्टभागप्रमाणं वर्तते, संज्वलनक्रोधस्य तु किञ्चिन्न्यूनपञ्चाष्टभागप्रमाणमस्ति, नो-

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

कषायदलस्य तत्र प्रक्षिप्तत्वात् । प्रदेशाऽल्पबहुत्वं चेत्थम् (१) मानस्य स्तोकं प्रदेशाग्रम् (२) ततो विशेषाधिकं मायायाः, आधिक्यं चाऽऽवलिकाऽसंख्येयभागभाजितमानप्रदेशमात्रेण राशिना बोद्धव्यम् । (२) ततोऽपि लोभस्य विशेषाधिकम्, आधिक्यं चाऽऽवलिकाऽसंख्येयभागभाजितमायाप्रदेशमात्रेण राशिना निश्चेतव्यम्, प्रकृतिविशेषस्य तथात्वात् । (३) ततः किञ्चिन्न्यूनपञ्चगुणं क्रोधस्य, तस्य मोहनीयसकलदलपञ्चाष्टभागप्रमाणत्वात् पूर्वपदस्य त्वेकाष्टभागप्रमाणत्वात् ।

किट्टिकरणाद्धाप्रथमसमये प्रदेशसत्कर्मानुरूपं प्रदेशाग्रमुत्किरति । (१) तेन मानस्योत्कीर्णप्रदेशाग्रं स्तोकं भवति । तच्च कषायचतुष्कसत्कोत्कीर्णदलस्य किञ्चिन्न्यूनाष्टभागप्रमाणं भवति । (२) ततो विशेषाधिकं मायायाः, प्रदेशसत्कर्मणो विशेषाधिकत्वात् । तदपि किञ्चिन्न्यूनाऽष्टभागप्रमाणं भवति । (३) ततोऽपि लोभस्य विशेषाधिकमुत्कीर्णं प्रदेशाग्रं भवति, मायातो लोभप्रदेशसत्कर्मणो विशेषाऽधिकत्वात् । तच्च साधिकाष्टभागमात्रं भवति (४) ततः क्रोधस्योत्कीर्णप्रदेशाग्रं किञ्चिन्न्यूनपञ्चगुणं भवति, लोभसत्कर्मतः क्रोधप्रदेशसत्कर्मणस्तावद्गुणत्वात् । एतानुत्कीर्णप्रदेशान् पल्योपमाऽसंख्येयभागेन विभज्य बहुभागप्रमाणदलं पूर्वापूर्वस्पर्धकेषु निक्षिप्यैकभागप्रमितदलं संज्वलनचतुष्ककिट्टितया परिमणयति । तत्र संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य किंचिन्न्यूनाऽष्टभागप्रमाणं दलं मानकिट्टितया परिणमनाय गृह्णाति, तच्च स्तोकम् । ततो विशेषाधिकं दलं मायाकिट्टितया परिणमनाय गृह्णाति, ततोऽपि संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य किञ्चिन्न्यूनाष्टभागप्रमाणं भवति । ततो विशेषाधिकं लोभकिट्टितया परिणमनाय गृह्णाति । तच्च संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य साधिकाष्टभागप्रमितं भवति । ततः क्रोधकिट्टितया परिणमनाय संख्येयगुणं दलं गृह्णाति । तच्च संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य किञ्चिन्न्यूनपञ्चाष्टभागमात्रं भवति ।

अथ मानकिट्टितया परिणमनाय गृहीतदलस्य प्रथमादिभेदेन तिस्रः संग्रहकिट्टीर्निर्वर्तयते । तत्र मानस्य तृतीयसंग्रहकिट्टौ स्तोकं दलं ददाति, तस्यास्तीव्राऽनुभागकत्वात् । ततो विशेषाधिकं द्वितीयसंग्रहकिट्टौ ददाति, मन्दानुभावकत्वात् । ततो विशेषाधिकं प्रथमसंग्रहकिट्टौ ददाति, मन्दतराऽनुभागकत्वात् । एवं मानकिट्टितया परिणमनाय गृहीतदलस्य त्रिभागत्रये विभजनाद् मानकिट्टितया परिणमनाय गृहीतदलस्याऽऽसन्नत्रिभागप्रमाणं दलं प्रत्येकं मानसंग्रहकिट्टौ ददाति । इत्थं कषायचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्याऽऽसन्नचतुर्विंशतिभागप्रमाणं दलं मानस्यैकैकसंग्रहकिट्टौ दीयते ।

सम्प्रतीदमेव त्रैराशिकेन साध्यते । तथाहि—यदि संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य किञ्चिन्न्यूनाष्टभागप्रमाणं दलं मानकिट्टितया परिणमनाय गृहीत्वा संग्रहकिट्टित्रये ददाति, तर्ह्येकस्यां संग्रहकिट्टौ संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीत-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

दलस्य कियद्भागमात्रं दलं ददाति ? इति **"प्रमाणमिच्छा च समानजाती, आद्यन्तयोस्तत्फलमन्यजातिः । मध्ये तदिच्छाहतमाद्यहृत् स्यादिच्छाफलं ।"** इति भास्करत्रैराशिककरणसूत्रेण मानस्य प्रत्येकं संग्रहकिट्टौ संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्यासन्नचतुर्विंशतिभागप्रमाणं दीयमानं दलिकं प्राप्यते ।

न्यासः--प्रमाणम् ३ । प्रमाणफलम् आसन्न $\frac{1}{8}$ । इच्छा १ । इच्छाफलम् आसन्न $\frac{1}{24}$ लब्धं मानैकसंग्रहकिट्टिदलम्।

एवं मायालोभयोरप्येकैकसंग्रहकिट्टौ संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्यासन्नचतुर्विंशतिभागप्रमाणं दलं प्रक्षिप्यते ।

अथ संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य किञ्चिन्न्यूनपञ्चाष्टभागप्रमाणं दलं संज्वलनक्रोधकिट्टितया परिणमनाय गृह्णाति । तत्र यत् किंचिन्न्यूनचतुरष्टभागप्रमाणं ($\frac{4}{8}$) दलं नोकषायतः क्रोधतया परिणतम्, तत् क्रोधस्य तृतीयसंग्रहकिट्टौ दीयते । शेषं किंचिन्न्यूनाष्टभागप्रमाणं दलं क्रोधस्य प्रथमद्वितीयतृतीयलक्षणासु तिसृषु संग्रहकिट्टिषु दीयते । तेन मानवत् क्रोधस्य द्वितीयसंग्रहकिट्टौ प्रथमसंग्रहकिट्टौ च संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्याऽऽसन्नचतुर्विंशतिभागप्रमाणं दलं प्रक्षिप्यते । एवं संज्वलनक्रोधस्य तृतीयसंग्रहकिट्टयामप्यासन्नचतुर्विंशतिभागप्रमाणं दलं प्रक्षिप्यते । ततः क्रोधतृतीयसंग्रहकिट्टयामासन्नचतुर्विंशतिभागप्रमाणं तथा प्राग् विहितं नोकषायतः परिणतं किंचिन्न्यूनचतुरष्टभागप्रमाणं दलं प्रक्षिप्यते । इत्थं क्रोधतृतीयसंग्रहकिट्टौ प्रक्षिप्यमाणदलं संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य त्रयोदशचतुर्विंशतिभागप्रमाणं ($\frac{1}{2}+\frac{1}{24}=\frac{13}{24}$) भवति ।

अथोपसंह्रियते—संज्वलनमान-क्रोध-माया-लोभानां किट्टितया परिणमनाय दलिकं यथोत्तरं विशेषाधिकक्रमेण गृह्णाति । गृहीत्वा च तृतीयसंग्रहकिट्टितो द्वितीयसंग्रहकिट्टौ विशेषाधिकं ददाति, ततोऽपि विशेषाधिकं प्रथमसंग्रहकिट्टौ ददाति, नोकषायतश्च पूर्वापूर्वस्पर्धकरूपक्रोधतया परिणतं दलं क्रोधतृतीयसंग्रहकिट्टौ ददाति । इत्थं मानतृतीयसंग्रहकिट्टि—द्वितीयसंग्रहकिट्टि-प्रथमसंग्रहकिट्टि—क्रोधद्वितीयसंग्रहकिट्टिप्रथमसंग्रहकिट्टि—मायातृतीयसंग्रहकिट्टि—द्वितीयसंग्रहकिट्टि—प्रथमसंग्रहकिट्टि—लोभतृतीयसंग्रहकिट्टि-द्वितीयसंग्रहकिट्टि-प्रथमसंग्रहकिट्टिषु यथाक्रमं निक्षिप्यमाणं विशेषाधिकं दलं भवदपि संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्याऽऽसन्नचतुर्विंशतिभागप्रमाणं भवति । क्रोधतृतीयसंग्रहकिट्टौ तु संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्यासन्न—त्रयोदशचतुर्विंशतिभागप्रमाणं दलं निक्षिप्यते । अतो लोभप्रथमसंग्रहकिट्टौ संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य निक्षिप्यमाणमासन्नैकचतुर्विंशतिभागप्रमाणदलतः क्रोधस्य तृतीयसंग्रहकिट्टौ प्रक्षिप्यमाणमासन्नत्रयोदशचतुर्विंशतिभागप्रमाणदलमासन्नत्रयोदशगुणलक्षणं संख्येयगुणं भवति । इत्थं लोभस्य प्रथमसंग्रहकिट्टितः क्रोधस्य तृतीयसंग्रहकिट्टौ दलं संख्येयगुणं भवति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदन्त्ववधेयम्—यद्यपि मानस्य प्रथमसंग्रहकिट्टिगतैकैकाऽवान्तरकिट्टिगतप्रदेशतः क्रोधद्वितीयसंग्रहकिट्टिगतैकैकाऽवान्तरकिट्टौ दलं विशेषहीनं **शततमगाथया** वक्ष्यते, तथापि मानप्रथमसंग्रहकिट्टिसकलाऽवान्तरकिट्टितः क्रोधद्वितीयसंग्रहकिट्टिनिखिलाऽवान्तरकिट्टीनां विशेषाधिकत्वस्य वक्ष्यमाणत्वाद् मानप्रथमसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसर्वप्रदेशतः क्रोधद्वितीयसंग्रहकिट्टिसमस्ताऽवान्तरकिट्टिगतसकलप्रदेशा विशेषाधिका भवन्ति ।

सम्प्रत्यवान्तरकिट्ट्यल्पबहुत्वमतिदिदिक्षुराह—'एव०' इत्यादि, 'एवम्' यथैकैकसंग्रहकिट्टिगतप्रदेशानामल्पबहुत्वं सार्धगाथात्रयेण प्रतिपादितम्, तथैव 'अवान्तरकिट्टीनाम्' एकैकसंग्रहकिट्टिगताऽवान्तरकिट्टीनामल्पबहुत्वं ज्ञातव्यम्, विशेषाभावात् । उक्तं च **कषायप्राभृतचूर्णौ—"जहा पदेसग्गेण विहासिदं, तहा *वग्गणग्गेण विहासिदव्वं ।"** इति । तथाहि—(१) मानस्य प्रथमसंग्रहकिट्ट्यामवान्तरकिट्टयः स्तोकाः, ताश्चाऽनन्ताः, एकैकस्यां संग्रहकिट्टावनन्तानामवान्तरकिट्टीनां प्राक् प्रतिपादितत्वात् । (२) ततो मानस्य द्वितीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका भवन्ति । आधिक्यं च पल्योपमाऽसंख्येयभागभाजितप्रथमसंग्रहकिट्टिगताऽवान्तरकिट्टिमात्रेण राशिना ज्ञातव्यम् । (३) ततो मानस्य तृतीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका बोद्धव्याः । (४) ततः क्रोधस्य द्वितीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका बोद्धव्याः । (५) ततः क्रोधस्य तृतीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका वक्तव्याः । (६) ततो मायायाः प्रथमसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका अभिधातव्याः । (७) ततो मायाया द्वितीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका अधिगन्तव्याः । (८) ततो मायायास्तृतीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका वाच्याः । (९) ततो लोभस्य प्रथमसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका ज्ञातव्याः । (१०) ततो लोभस्य द्वितीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका अवसेयाः । (११) ततो लोभस्य तृतीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका अभिधेयाः । (१२) ततोऽपि क्रोधस्य प्रथमसंग्रहकिट्ट्यामवान्तरकिट्टयः संख्येयगुणा निगदितव्याः ।

अत्राऽपि पूर्ववत् प्रथमसंग्रहकिट्टिरित्युक्ते किट्टिवेदकस्य प्रथमसंग्रहकिट्टिर्ज्ञातव्या । किट्टिकारकस्य तु तृतीयसंग्रहकिट्टिर्बोद्धव्या । एवं तृतीयसंग्रहकिट्टिरित्युक्ते किट्टिवेदकस्य तृतीयसंग्रहकिट्टिर्ज्ञातव्या, किट्टिकारकस्य तु प्रथमसंग्रहकिट्टिर्बोद्धव्या । तेन किट्टिकारकापेक्षयाल्पबहुत्वमित्थं भणनीयम्—

(१) मानस्य तृतीयसंग्रहकिट्टाववान्तरकिट्टयः स्तोकाः ।

(२) ततो मानस्य द्वितीयसंग्रहकिट्टाववान्तरकिट्टयो विशेषाधिका वर्तन्ते ।

(३) ततो मानस्य प्रथमसंग्रहकिट्टाववान्तरकिट्टयो विशेषाधिका भवन्ति ।

* अत्र वर्गणाशब्देनाऽवान्तरकिट्टयो ग्राह्याः, तासाम् अग्रं—समुदाय इति वर्गणाग्रम्, तेन ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

( ४ ) ततोऽपि क्रोधस्य द्वितीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका भवन्ति ।

( ५ ) ततोऽपि क्रोधस्य प्रथमसंग्रहकिट्टावान्तरकिट्टयो विशेषाधिका विद्यन्ते ।

( ६ ) ततो मायायास्तृतीयसंग्रहकिट्टाववान्तरकिट्टयो विशेषाधिका बोद्धव्याः ।

( ७ ) ततो मायाया द्वितीयसंग्रहकिट्टाववान्तरकिट्टयो विशेषाधिका भणनीयाः ।

( ८ ) ततो मायायाः प्रथमसंग्रहकिट्टाववान्तरकिट्टयो विशेषाधिका अभिधातव्याः ।

( ९ ) ततो लोभस्य तृतीयसंग्रहकिट्ट्यामवान्तरकिट्टयो विशेषाधिका ज्ञेयाः ।

(१०) ततो लोभस्य द्वितीयसंग्रहकिट्टाववान्तरकिट्टयो विशेषाधिका वाच्याः ।

(११) ततो लोभस्य प्रथमसंग्रहकिट्टाववान्तरकिट्टयो विशेषाधिका वक्तव्याः ।

(१२) ततोऽपि क्रोधस्य तृतीयसंग्रहकिट्टाववान्तरकिट्टयः संख्येयगुणा निगदितव्या इति । कथमेतदवसीयते ? इति चेत्, शृणुत–वक्ष्यमाणपरम्परोपनिधयाऽपि किट्टिषु दृश्यमानप्रदेशाग्रस्य केवलं विशेषहीनत्वस्य **शततमगाथया** वक्ष्यमाणत्वात् प्राक्प्रतिपादितं लोभस्य प्रथमसंग्रहकिट्टिगतप्रदेशत आसन्नत्रयोदशगुणं दलं गृह्णन् लोभतृतीयसंग्रहकिट्टिगतकिट्टित आसन्नत्रयोदशगुणलक्षणाः संख्यातगुणा अवान्तरकिट्टीर्निर्वर्तयति, अन्यथा परम्परोपनिधया विशेषहीनं दलं नोपपद्येत ॥९४-९५-९६-९७॥

संग्रहकिट्टिषु दीयमानं दलं प्ररूप्य सम्प्रत्यवान्तरकिट्टिषु दीयमानं दलं निरूरूपयिषुराह—

**लोहजहण्णगकिट्टिपहुडिकोहुकोसकिट्टिअंतासु ।**
**सव्वासु देइ दलं विसेसहीणकमेण खलु ॥ ९८ ॥**

लोभजघन्यकिट्टिप्रभृतिक्रोधोत्कृष्टकिट्ट्यन्तासु ।
सर्वासु ददाति दलं विशेषाधिकक्रमेण खलु ॥९९॥ इति पदसंस्कारः ।

**'लोह०'** इत्यादि, 'लोभजघन्यकिट्टिप्रभृतिक्रोधोत्कृष्टकिट्ट्यन्तासु' लोभप्रथमसंग्रहकिट्टिप्रथमा-ऽवान्तरकिट्टिप्रभृतिक्रोधतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टिपर्यवसानासु 'सर्वासु' सर्वाऽवान्तरकिट्टिषु 'दलं' प्रदेशाग्रं 'खलु' खलुशब्दो वाक्या-ऽलङ्कारे **"निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु" इत्यमरकोशवचनात्**, विशेषहीनक्रमेण ददाति । इदमुक्तं भवति–लोभप्रथमसंग्रहकिट्टेः प्रथमा-ऽवान्तरकिट्टौ प्रभूतं दलं ददाति, ततो-ऽनन्तभागेन हीनं द्वितीयावान्तरकिट्टौ ददाति, ततो-ऽप्यनन्तभागेन हीनं तृतीया-ऽवान्तरकिट्टौ ददाति । एवमनन्तभागहीनक्रमेण तावद् ददाति, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमा-ऽवान्तरकिट्टिः । उक्तं च **कषायप्राभृतचूर्णौ**–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पढमसमए किट्टीसु पदेसग्गस्स सेढिपरूवणं वत्तइस्सामो। तं जहा-लोभस्स जहण्णियाए किट्टीए पदेसग्गं बहुअं, विदियाए किट्टीए विसेसहीणं। एवमणंतरोवणिधाए विसेसहीणमणंतभागेण जाव कोहस्स चरिमकिट्टि त्ति।" इति।

## अथ गणितविभागः।

सम्प्रति गणितरीत्या दीयमानदलं दर्श्यते-किट्टिकरणाद्धाप्रथमसमये पूर्वापूर्वस्पर्धकेभ्यो-ऽसंख्येयभागमात्रदलमुत्कीर्योत्कीर्णदलस्याऽसंख्येयभागप्रमाणं दलं किट्टितया परिणमयति। शेषाऽसंख्येयबहुभागमात्रदलं पूर्वापूर्वस्पर्धकेषु ददाति। किट्टितया परिणमनाय गृहीतसकलदलिकतः प्रभूतं दलिकं लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ ददाति। तद्यथा–किट्टितया परिणमनाय गृहीतसकलदलं पदेन विभक्तव्यम्। लब्धं च मध्यमदलमिति व्यवह्रियते। किट्टिराशिश्च पदं वक्तव्यः। मध्यमदलं पुनरर्धीकृतैकोनपदन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां विभज्यते, तदैकचयदलं प्राप्यते। एकचयदलं तु द्वाभ्यां द्विगुणहानिभ्यां ताड्यते, तदा ताडितं दलं लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टौ दीयमानदलं भवति। ततो द्वितीया-ऽवान्तरकिट्टावेकचयेन हीनं ददाति। ततो द्वितीयावान्तरकिट्टितस्तृतीयावान्तरकिट्टयामेकचयेन हीनं ददाति। एवमेकचयहीनक्रमेण तावद् ददाति, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टिः।

असत्कल्पनया किट्टिकरणाद्धाप्रथमसमये चतुर्नवत्यधिकपञ्चविंशतिशतानि (२५९४) किट्टीर्निर्वर्तयति, किट्टितया च परिणमनाय द्वे-ऽब्जे सप्ताशीतिकोटयस्त्रयोनवतिलक्षाणि पञ्चाशीतिसहस्राणि पञ्चनवत्यधिकत्रिशतानि (२८७९३८५३९५) दलिकानि गृह्णाति, द्विगुणहानिश्च सप्तपञ्चाशदधिकषट्शताधिकपञ्चपञ्चाशत्सहस्रोत्तरपञ्चलक्षमात्रेति कल्प्यते।

अथ किट्टितया परिणमनाय गृहीतानि पञ्चनवत्यधिकत्रिशतोत्तरपञ्चाशीतिसहस्राधिकत्रयोनवतिलक्षोत्तरसप्ताशीतिकोटयधिकद्वयब्जसंख्यकानि (२८७९३८५३९५) दलिकानि चतुर्नवत्यधिकपञ्चविंशतिशतलक्षणेन किट्टिराशिना विभज्यन्ते, तदा मध्यमदलं लभ्यते, तत्पुनरर्धीकृतैकोनकिट्टिराशिन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां द्विकविभाजितपञ्चत्रिंशदधिकविंशतिसहस्रोत्तरद्वाविंशतिलक्षराशिनेत्यर्थः, विभज्यते, तदैकचयदलमेकं लभ्यते। तत् पुनर्द्वाभ्यां द्विगुणहानिभ्यां चतुर्दशाधिकत्रिशतोत्तरैकादशसहस्रयुक्तैकलक्षरूपाभ्यां (१११११३१४) गुण्यते, गुणने च कृते लोभप्रथमसंग्रहकिट्टिप्रथमा-ऽवान्तरकिट्टौ दीयमानं दलं चतुर्दशाधिकत्रिशतोत्तरैकादशसहस्राधिकैकलक्षमात्रं प्राप्यते।

न्यासः—

पदम् = निर्वर्त्यमानकिट्टिराशिः = २५९४
किट्टितया परिणमनाय गृहीतदलम् = २८७९३८५३९५
द्विगुणहानिः = ५५५६५७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

$$\text{मध्यमदलम्} = \frac{\text{किट्ट्यर्थं गृहीतदलम्}}{\text{पदम्}}$$

$$\text{अङ्कतो} \quad ,, \quad \frac{२८७९३८५३९५}{२५९४}$$

$$\text{एकचयदलम्} = \text{मध्यमदलम्} \div \left( \text{द्वे द्विगुणहानी} - \frac{\text{पदम्} - १}{२} \right)$$

$$\text{अङ्कत} \quad ,, \quad = \frac{२८७९३८५३९५}{२५९४} \div \left( २ \times ५५५६५७ - \frac{२५९४ - १}{२} \right)$$

$$\therefore \quad ,, \quad ,, \quad = \frac{२८७९३८५३९५}{२५९४} \div \left( ११११३१४ - \frac{२५९४ - १}{२} \right)$$

$$\therefore \quad ,, \quad ,, \quad = \frac{२८७९३८५३९५}{२५९४} \div \left( \frac{२२२२६२८ - २५९३}{२} \right)$$

$$\therefore \quad ,, \quad ,, \quad = \frac{२८७९३८५३९५}{२५९४} \div \frac{२२२००३५}{२}$$

$$\therefore \quad ,, \quad ,, \quad = \frac{२८७९३८५३९५}{२५९४} \times \frac{२२२००३५}{२}$$

$$\therefore \quad ,, \quad ,, \quad = \frac{५७५८७७०७९०}{५७५८७७०७९०}$$

$$\therefore \quad ,, \quad ,, \quad = १$$

तदेवमेकचयदलमेकं प्राप्तम् ।

$$\therefore \quad \text{लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ दीयमानं दलम् ।} = \text{एकचयदलम्} \times \text{द्वे द्विगुणहानी}$$

$$\therefore \quad \text{अङ्कतो} \quad ,, \quad = १ \times (२ \times ५५५६५७)$$

$$= १ \times ११११३१४$$

$$= ११११३१४$$

इत्थं लोभप्रथमसंग्रहकिट्टिप्रथमा-ऽवान्तरकिट्टौ चतुर्दशाधिकशतत्रयोत्तरैकादशसहस्राधिकैकादशलक्षप्रमितानि ( ११,११,३१४ ) दलिकानि ददाति । तत एकचयेन हीनानि त्रयोदशाधिकत्रिशतोत्तरैकादशसहस्राधिकैकादशलक्षमितानि ( ११,११,३१३ ) ददाति । एवमुत्तरोत्तरकिट्टावेकैकचयेन हीनानि दलिकानि तावद् ददाति, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमा-ऽवान्तरकिट्टिः ।

अथवा भणितप्रकारेणैकचयदलं ज्ञात्वा चयाः परिगणनीयाः । तद्यथा—क्रोधतृतीयसंग्रहकिट्ट्या द्विचरमा-ऽवान्तरकिट्ट्यामेकश्चयः प्रक्षिप्यते, त्रिचरमा-ऽवान्तरकिट्टौ द्वौ चयौ, एवं पश्चानुपूर्व्यैकोत्तरवृद्ध्या चयप्रक्षेपस्तावद् वाच्यः, यावद् लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिरिति कल्पयित्वा "सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या" इत्यनेन करणसूत्रेण सर्वे चयाः प्राप्तव्याः । तत एकचयदलं सर्वचयैस्ताडयितव्यम् । गुणनफलं च सर्वचयदलं भवति । तच्च किट्टितया परिणमनाय गृहीतदलस्या-ऽनन्ततमभागमात्रं भवति । अथ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किट्टितया परिणमनाय गृहीतदलतः सर्वचयदलं विशोध्य शेषं दलं किट्टिराशिना विभज्यैकैक-खण्डं सर्व्वकिट्टिषु ददाति। तथा चयदलिकत एकोनकिट्टिराशिप्रमाणांश्चयान् लोभप्रथमसंग्रह-किट्टिप्रथमाऽवान्तरकिट्टौ ददाति, द्वितीयावान्तरकिट्टौ द्व्यूनकिट्टिराशिप्रमाणांश्चयान् ददाति, तत एकैकचयेन हीनं तावद् ददाति, यावत् क्रोधतृतीयसंग्रहकिट्टिद्विचरमावान्तरकिट्टिः, तेन तस्या-मेकचयदलं ददाति। ततः क्रोधतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ चयदलतो दलिकं न प्रक्षि-पति, पूर्वोक्तमेकखण्डदलं तु प्रक्षिपत्येव। एवंक्रमेण दलिकप्रक्षेपे सति लोभप्रथमसंग्रहकिट्टिप्रथमा-वान्तरकिट्टौ दलं प्रभूतं निक्षिप्यते, एकोनकिट्टिराशिप्रमाणचययुतैकखण्डमात्रत्वात्, ततो द्वितीया-वान्तरकिट्टावेकचयेन हीनं निक्षिप्यते, द्व्यूनकिट्टिराशिप्रमाणचयसमन्वितैकखण्डप्रमितत्वात्। एवं तावद् वक्तव्यम्, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः।

एतदेवा-ऽसत्कल्पनया दर्श्यते—किट्टिकरणाद्धाप्रथमसमये किट्टिराशिः किट्टितया च परि-णमनाय गृहीतं दलमित्येतत् सर्वं पूर्ववत् कल्पनीयम्। एकचयदलं पूर्वोक्तरीत्यैकदलिकमात्रं साधनीयम्। सर्वचयराशिस्तु "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या।**" इत्यनेन श्री-भास्करकरणसूत्रेणैकविंशत्यधिकैकशतोत्तरत्रयःषष्टिसहस्राधिकत्रयस्त्रिंशल्लक्षसंख्यको(३३,६३,१२१) लभ्यते। तथाहि—एकोनकिट्टिषु चयप्रक्षेपात् पदमत्रैकोनकिट्टिराशिस्त्रयोनवत्यधिकपञ्चविंशति-शतमात्रमित्यर्थः, तदेकेन सहितं जातं चतुर्नवत्यधिकपञ्चविंशतिशतप्रमाणम् (२५९३+१=२५९४)। अथ चतुर्नवत्यधिकपञ्चविंशतिशतानि द्विकविभक्तत्रयोनवत्युत्तरपञ्चविंशतिशत-लक्षणेन पदार्धेन विभज्यन्ते, तदा सर्वचयराशिरेकविंशत्यधिकैकशतत्रयःषष्टिसहस्रोत्तरत्रयस्त्रिंशल्ल-क्षमात्रः (३३,६३,१२१) उपलभ्यते। स चैकचयदलेनैकसंख्यकेन गुण्यते, तदा सर्वचय-दलमेकविंशत्यधिकैकशतोत्तरत्रयःषष्टिसहस्राधिकत्रयस्त्रिंशल्लक्षप्रमितं (३३,६३,१२१) भवति।

अथोक्तसर्वचयदलं किट्टितया परिणमनाय गृहीतदलिकेभ्यः पञ्चनवत्यधिकत्रिशतोत्तरपञ्चाशी-तिसहस्राधिकत्रिनवतिलक्षोत्तरसप्ताशीतिकोटीसंयुक्तद्व्यब्जसंख्यकेभ्यो (२८७९३८५३९५) विशो-ध्यते, तदा चतुःसप्तत्यधिकद्विशतोत्तरद्वाविंशतिसहस्राधिकषष्टिलक्षसंयुक्तसप्ताशीतिकोट्यधिकद्व्यब्ज-प्रमाणानि (२८७९३८५३९५—३३६३१२१=२८७६०२२२७४) दलिकान्यवशिष्यन्ते, तानि किट्टिराशिना चतुर्नवत्युत्तरपञ्चविंशतिशतमानेन (२५९४) विभज्यते, तदैकखण्डमेक-विंशत्यधिकसप्तशतोत्तराष्टसहस्राधिकैकादशलक्षदलिकप्रमाणं (११०८७२१) प्राप्यते।

न्यास :—

कल्प्यते किट्टितया परिणनाय गृहीतं दलम् = २८७९३८५३९५

किट्टिराशिः = २५९४

द्विगुणहानिः = ५५५६५७

सर्वचयाः = (पदम्+१) × $\frac{\text{पदम्}}{२}$

अङ्कतः सर्वचयाः = ( २५९३+१ ) × $\frac{२५९३}{२}$

" = २५९४ × $\frac{२५९३}{२}$

= ३३६३१२१

एकचयदलम् = १ पूर्वोक्तकरणेना-ऽत्रा-ऽपि साधनीयम्

∴ सर्वचयदलम् = १ × ३३६३१२१

= ३३६३१२१

सर्वचयदलरहितं किट्टितया परिणमनाय गृहीतं दलम् = २८७९३८५३९५ — ३३६३१२१

= २८७६०२२२७४

एकखण्डदलम् = $\frac{\text{सर्वचयदलरहितं किट्टयर्थं गृहीतं दलम्}}{\text{किट्टिराशिः}}$

प्रकृते-ऽङ्कत " = $\frac{२८७६०२२२७४}{२५९४}$

= ११०८७२१

अथ लोभप्रथमसंग्रहकिट्टयाः प्रथमा-ऽवान्तरकिट्टावेकखण्डमेकविंशत्यधिकसप्ताशीतिशतोत्तरैकादशलक्षदलमितम् ( ११०८७२१ ) एकोनकिट्टिराशिप्रमाणांश्च त्रयोनवत्यधिकपञ्चविंशतिशतसंख्याकांश्चयान् ( २५९३ ) प्रक्षिपति, तेन तत्र दीयमानानि दलिकानि चतुर्दशाधिकशतत्रयोत्तरैकादशसहस्राधिकैकादशलक्षप्रमितानि [ ११०८७२१ + ( १ × २५९३ ) = ११११३१४ ] भवन्ति। ततो द्वितीया-ऽवान्तरकिट्टयामेकखण्डमेकविंशत्यधिकसप्ताशीतिशतोत्तरैकादशलक्षप्रदेशमात्रं ( ११०८७२१ ) प्रथमा-ऽवान्तरकिट्टयपेक्षया चैकोनचयान् द्विनवत्यधिकपञ्चविंशतिसंख्यकान् ( २५९२ ) प्रक्षिपति, तेन तत्र दीयमानदलिकानि त्रयोदशा-ऽधिकत्रिशतोत्तरैकादशसहस्राधिकैकादशलक्षाणि [ ११०८७२१ + ( १ × २५९२ ) = ११११३१३ ] भवन्ति। ततः परमेकैका-ऽवान्तरकिट्टयामेकखण्डदलं पूर्वपूर्वतश्चोत्तरोत्तरा-ऽवान्तरकिट्टावेकैकचयहान्या चयदलं तावद् ददाति, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमा-ऽवान्तरकिट्टिः। अनेन क्रमेण दलिकप्रक्षेपे सति पूर्वपूर्वा-ऽवान्तरकिट्टित उत्तरोत्तरा-ऽवान्तरकिट्टौ दीयमानदलान्येकचयेन हीनानि भवन्ति, तत्वतश्चैकचयदलस्यैकखण्डदला-ऽनन्ततमभागमात्रत्वात् सर्वाऽवान्तरकिट्टिषु दीयमानदलमनन्तभागहीनक्रमेण भवति। **गणितविभागः समाप्तः** ॥९८॥

अनन्तरोपनिधया किट्टिषु दलं प्ररूप्य सम्प्रति परम्परोपनिधया दलं निरूपयिषुराह—

**लोहस्स जहण्णगकिट्टित्तो कोहस्स जेट्ठकिट्टीए।**
**दलिअं परंपराअ वि दिज्जेइ विसेसहीणं हि ॥९९॥**

लोभस्य जघन्यकिट्टितः क्रोधस्य ज्येष्ठकिट्टौ।
दलिकं परम्परयाऽपि दीयते विशेषहीनं हि ॥९९॥ इति पदसंस्कारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'लोहस्स' इत्यादि, 'लोभस्य जघन्यकिट्टितः' संज्वलनलोभस्य प्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिगतदलतः 'क्रोधस्य' संज्वलनक्रोधस्य 'ज्येष्ठकिट्टौ' तृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ परम्परयाऽपि 'दलिकं' प्रदेशाग्रं विशेषहीनमेव हिशब्दस्य **"हि हेताववधारणे"** इत्यमरकोशवचनेना-ऽवधारणार्थकत्वात् 'दीयते' प्रक्षिप्यते । हीनत्वं चा-ऽनन्ततमभागेन बोध्यम् , किट्टिराशेरेकस्पर्धकवर्गणाऽनन्ततमभागमात्रत्वेनैकद्विगुणहानिगतस्थाना-ऽनन्ततमभागप्रमाणत्वात् । न्यगादि च कषायप्राभृतचूर्णौ—**"परंपरोवणिधाए जहण्णियादो लोभकिट्टीदो उक्कस्सियाए कोधकिट्टीए पदेसग्गं विसेसहीणमणंतभागेण ।"** इति ।

विवक्षितसमये यद् दलं दीयते, तद् दीयमानं दलं निगद्यते । विवक्षितसमये दीयमानदलेन सहितं प्राक्तनसत्तागतदलं दृश्यमानं दलमुच्यते । किट्टिषु दीयमानं प्राग् दलं दर्शितम् । सम्प्रति किट्टिषु दृश्यमानदलं निजिगदिषुराह —

**दलिअं तु दिस्समाणं लोहजहण्णाउ पहुडि कोहस्स ।**
**उक्कोसं किट्टिं जाव विसेसूणक्कमेणऽत्थि ॥१००॥**

दलिकं तु दृश्यमानं लोभजघन्यायाः प्रभृति क्रोधस्य ।
उत्कृष्टां किट्टिं यावद् विशेषोनक्रमेणाऽस्ति ॥१००॥ इति पदसंस्कारः ।

'दलिअं' इत्यादि, तत्र दृश्यमानं दलिकं तु 'लोभजघन्यायाः' लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टितः प्रभृति 'क्रोधस्य' संज्वलनक्रोधस्य 'उत्कृष्टां किट्टिं' तृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिं यावद् विशेषहीनक्रमेण 'अस्ति' विद्यते, किट्टिषु विशेषहीनक्रमेण दलिकस्य निक्षिप्तत्वात् पुरातनदलिकाभावाच्च ।

अथ किट्टिकरणाद्धाप्रथमसमये पूर्वापूर्वस्पर्धकेषु दलनिक्षेपविधिर्भण्यते—उत्कीर्णदलस्याऽसंख्येयभागप्रमाणं दलं किट्टिषु निक्षिपति, शेषबह्वसंख्येयभागप्रमाणं दलं पूर्वा-ऽपूर्वस्पर्धकेषु निक्षिपतीति प्रागुक्तम् । तत्र प्रथमाऽपूर्वस्पर्धकस्य प्रथमवर्गणायां क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ निक्षिप्तदलतो-ऽनन्तगुणहीनं दलं निक्षिपति, तत उत्तरोत्तरवर्गणायां विशेषहीनक्रमेण निक्षिपति ।

ननु क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ निक्षिप्तदलतोऽपूर्वस्पर्धकप्रथमवर्गणायामनन्तगुणहीनं दलं निक्षिपतीत्येतत् कथमवसीयते ? इति चेत्, उच्यते-क्रोधस्य तृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टावनन्ता-ऽपूर्वस्पर्धकप्रथमवर्गणाप्रदेशप्रमाणं दलं निक्षिप्या-ऽपूर्वस्पर्धकप्रथमवर्गणायां पुरातनसत्तागतदलस्याऽसंख्येयभागं प्रक्षिपति । तेन क्रोधस्य तृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिगतप्रदेशतोऽपूर्वस्पर्धकप्रथमवर्गणायामनन्तगुणहीनं प्रक्षिप्यत इति लब्धम् । तथाहि—अपूर्वस्पर्धक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमवर्गणागतदले सार्धद्विगुणहान्या गुणिते सत्तागतसकलदलं प्राप्यते, तत् सत्तागतदलमुत्कर्षणापकर्षणभागहारेण विभज्यैकभागमुत्किरति, तस्या-ऽसंख्येयभागप्रमाणं दलं किट्टिषु निक्षिपति। तेन बहुभागान् पृथक् स्थापयित्वैकभागं पूर्वोक्तविधिना विभज्यैकैकावान्तरकिट्टौ दलं निक्षिपति, तच्चाऽनन्तापूर्वस्पर्धकप्रथमवर्गणाप्रदेशप्रमाणं भवति। पृथक्स्थापितमुत्कीर्णदलबहुभागप्रमाणं दलं सार्धद्विगुणहान्या विभज्यैकभागमपूर्वस्पर्द्धकप्रथमवर्गणायां निक्षिपति। तच्च निक्षिप्यमाणं दलमपूर्वस्पर्द्धकपुरातनदलस्याऽसंख्येयभागप्रमाणं दलं भवति। तेन क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ निक्षिप्तदलतोऽनन्तगुणहीनं दीयमानं दलं प्रथमापूर्वस्पर्धकप्रथमवर्गणायां भवति। तथा च दृश्यमानमपि दलं क्रोधतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टिगतदलतोऽनन्तगुणहीनमपूर्वस्पर्द्धकप्रथमवर्गणायां भवति, क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टावनन्ताऽपूर्वस्पर्द्धकप्रथमवर्गणाप्रदेशप्रमाणस्य दलस्य निक्षिप्तत्वात्। इत्थं सत्कर्मणि दृश्यमानं दलं गोपुच्छाकारद्वयेन तिष्ठति, किट्टिविषयकगोपुच्छाकारदलं स्पर्धकविषयकगोपुच्छाकारदलं चेति *।

अन्ये तु किट्टिषु स्पर्धकेषु चैकगोपुच्छाकारेण दलं तिष्ठतीत्येवं मन्यमानाः क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ निक्षिप्यमाणप्रदेशतोऽपूर्वस्पर्धकप्रथमवर्गणायामसंख्येयगुणहीनं दलं प्रक्षिप्यते, अन्यथा किट्टिस्पर्धकयोरेकगोपुच्छाकारदलभङ्गः प्रसज्येतेति वदन्ति। एतेषां मतेन किट्टिकरणाद्धायाश्चरमसमयं परित्यज्य किट्टिकरणाद्धायाः शेषसमयेष्वेकसमयप्रबद्धदलसम्बन्ध्यनन्ततमभागप्रमाणमेव दलं किट्टितया परिणतं स्यात्। कथम्? इति चेत्, शृणुत—यद्युत्कीर्णदलस्या-ऽसंख्येयभागप्रमाणं दलं गृहीत्वा साधिकाऽपूर्वस्पर्धकप्रथमवर्गणागतदलप्रमाणामेकैकामवान्तरकिट्टिं कुर्यात्, तर्ह्यवान्तरकिट्टय एकप्रदेशद्विगुणहानिस्थानानामसंख्येयभागमात्रा भवेयुः, उत्कीर्णदला-ऽसंख्येयभागस्यैकद्विगुणहानिगतप्रदेशाऽसंख्येयभागमात्रत्वात्। तच्च नेष्यते, सूत्र एकस्पर्धकगतवर्गणाऽनन्तभागमात्राणामवान्तरकिट्टीनां प्ररूपितत्वात्। तेनैकस्पर्धकगतवर्गणाऽनन्ततमभागप्रमाणानामवान्तरकिट्टीनां निर्वृत्तय उत्कीर्णदलाऽनन्ततमभागप्रमाणं दलं ग्रहीतव्यम्। गृहीत्वा च साधिकाऽपूर्वस्पर्धकप्रथमवर्गणागतदलप्रमाणामेकैकां किट्टिं कुर्यात्। अनया रीत्या किट्टिनिर्वृत्तये गृहीतं दलमेकसमयप्रबद्धस्या-ऽनन्ततमभागमात्रं संभवति, असंख्येयसमयप्रबद्धप्रमाणोत्कीर्णदलाऽनन्ततमभागप्रमाणत्वात्। तेन चरमसमयं परित्यज्य शेषसमयेष्वनन्ततम-

---

*तथा चोक्तं जयधवलाकारैरपि—"कोहचरमकिट्टीए णिसित्तपदेसग्गादो अपुव्वफद्दयादिवग्गणाए णिवदमाणपदेसग्गमणंतगुणहीणं होदि। किं कारणं? कोधचरिमकिट्टीए अणंताओ अपुव्वफद्दयादिवग्गणाओ णिक्खिविय पुणो अपुव्वफद्दयवग्गणाए तत्थ पुव्वावट्ठिददव्वस्सासंखेज्जदिभागमेत्तं चेव णिक्खिवमाणस्स तदुवलद्धीए बाहाणुवलंभादो। एत्थ दोण्हं पि दव्वाणमोवट्टणं ठविय पयदत्थविसये सिस्साणं पडिबोहो कायव्वो। दिस्समाणदव्वं पि कोधचरमकिट्टीए बहुअं, अपुव्वफद्दयादिवग्गणाए अणंतगुणहीणमिदि दट्ठव्वं। तदो एत्थ दो गोपुच्छाओ जादाओ, किट्टीसु एया गोपुच्छा, पुव्वापुव्वफद्दएसु अण्णा गोपुच्छा त्ति।" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*

# यन्त्रकम्-१५ (चित्रम्-१५)

## किट्टिकरणाद्धाप्रथमसमये किट्टिप्ररूपणा चित्रेण दृश्यते




११  १०  ९  ८  ७  ६  ३  २  १  ५  ४  १२

सं ज्व ल न लो भः | सं ज्व ल न मा या | सं ज्व ल न मा नः | सं ज्व ल न क्रो धः

संकेतविवरणम्—

१ कि=प्रथमावान्तरकिट्टिः ।

२ कि=द्वितीयावान्तरकिट्टिः ।

३ कि=तृतीयावान्तरकिट्टिः ।

४-कि=चतुर्थावान्तरकिट्टिः ।

यद्यपि परमार्थतो-ऽवान्तरकिट्टयो-ऽनन्ता भवन्ति, किन्त्वसत्कल्पनया चतस्र एव दर्शिताः ।

१ अं=प्रथमावान्तरकिट्ट्यन्तरम् ।

२ अं=द्वितीयावान्तरकिट्ट्यन्तरम् ।

३ अं=तृतीयावान्तरकिट्ट्यन्तरम् ।

अवान्तरकिट्टीनामनन्तत्वादवान्तरकिट्ट्यन्तराण्यप्यनन्तानि भवन्ति, एकोना-ऽवान्तरकिट्टिराशेरवान्तरकिट्ट्यन्तरराशित्वात् । तेन प्रकृते त्रीण्यवान्तरकिट्ट्यन्तराणि भवन्ति ।

* (i) उत्तरोत्तरावान्तरकिट्टौ दलमेकैकचयेन हीनं हीनतरं दीयते ।

(ii) उत्तरोत्तरावान्तरकिट्टयामनुभागो-ऽनन्तगुणक्रमेण भवति ।

❀ यद्यपि लोभप्रथमसंग्रहकिट्टेः प्रथमावान्तरकिट्ट्यन्तरतो द्वितीयावान्तरकिट्ट्यन्तरमनन्तगुणमस्ति, तथापि चित्रे तुल्यं दर्शितम्, तावदवकाशस्याऽसम्भवात् । वस्तुतो-ऽनन्तगुणमेव । एवमग्रे-ऽपि ।

● अतः परं पूर्वस्पर्धकानि ।

ख-किट्टिवेदकाऽपेक्षया तृतीयसंग्रहकिट्टिः ।

क-किट्टिवेदकाऽपेक्षया प्रथमसंग्रहकिट्टिः ।

१-२-३-४......यथाक्रममेतैरङ्कैर्विशेषाधिकक्रमेण प्रदेशा अवान्तरकिट्टयश्च सूचिताः, नवरं द्वादशाङ्के न संख्येयगुणा ज्ञापिताः । इह चित्रे तु प्रभूतावकाशाभावात् तुल्या दर्शिताः ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

भागमात्रं दलं किट्टितया परिणतं स्यात्, असंख्येयसमयैरप्यनन्ततमभागस्यैव किट्टितया परिणतिसंभवात्। चरमसमये तु पूर्वापूर्वस्पर्धकेभ्यः सर्वदलं गृहीत्वा किट्टीर्निर्वर्तयति, तेन चरमसमयेऽनन्तबहुभागमात्रदलं किट्टितया परिणतं भवेत्।

न चाऽस्तु शेषसमयेषु किट्टितया परिणतं दलमनन्ततमभागमात्रमिति वाच्यम्, विरोधोपलम्भात्। तथाहि—किट्टिकरणाद्धाचरमसमये सर्वदलं किट्टितया परिणमयति। यद्यत्र द्विचरमसमयं यावत् किट्टितया परिणतं दलं सत्तागतदलाऽनन्ततममात्रं भवेत्, तर्हि द्विचरमसमयतश्चरमसमये किट्टितया परिणम्यमानं दलमनन्तगुणं भवेत्, सत्तागतसर्वदलस्य किट्टितया परिणम्यमानत्वात्। कषायप्राभृतचूर्णिकारादिभिस्त्वसंख्येयगुणक्रमणैव दलं प्रतिसमयं किट्टितया परिणमयतीत्युक्तम्, तथा च तद्ग्रन्थः–"**जं पदेसग्गं सव्वसमासेण पढमसमए किट्टीसु दिज्जदि, तं थोवं, विदियसमए असंखेज्जगुणं, तदियसमए असंखेज्जगुणं, एवं जाव चरिमादो त्ति असंखेज्जगुणं।**" इति। तेन सह विरोधः स्यात्। तस्मात् प्रथमविकल्प एव सङ्गतिं प्राञ्चति। पश्यन्तु पाठका यन्त्रकम्-१५।

## अथ गणितविभागः

**अथ निरुक्तपदार्थो-ऽसत्कल्पनयाऽङ्कतः प्रदर्श्यते**—संज्वलनचतुष्ककिट्टितया परिणमनायदलिकानि द्वे ऽब्जे सप्ताशीतिकोटयस्त्रिनवतिलक्षाणि पञ्चाशीतिसहस्राणि त्रिशतानि पञ्चनवतिश्च (२८७९३८५३९५) गृह्णाति। तस्य किञ्चिन्न्यूनाष्टभागप्रमाणानि दलिकानि चतुस्त्रिंशत्कोटयोऽष्टानवतिलक्षाण्यष्टादशशतानि त्रिंशच्च (३४,९८,०१,८३०) मानकिट्टितया परिणमयति, तानि स्तोकानि भवन्ति।

अथ संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलानां किञ्चिन्न्यूनाष्टभागप्रमाणानि दलिकानि षट्त्रिंशत्कोटयोऽष्टानवतिलक्षाण्यष्टानवतिसहस्राण्यष्टनवत्यधिकत्रिशतानि च (३६,९८,९८,३९८) मायाकिट्टितया परिणनाय गृह्णाति। तानि पूर्वतो विशेषाधिकानि भवन्ति। ततो विशेषाधिकानि सप्तसप्तत्यधिकैकादशसहस्रोत्तरा-ऽष्टात्रिंशत्कोटयो (३८,००,११,०७७) दलिकानि लोभकिट्टितया परिणमनाय गृह्णाति। तानि च संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य साधिकाष्टभागप्रमाणानि भवन्ति। ततः क्रोधकिट्टितया परिणमनाय संख्येयगुणान्येकाब्जं सप्तसप्ततिकोटयः षण्णवतिलक्षाणि चतुस्सप्ततिसहस्राणि नवतिश्च(१,७७,९६,७४,०९०) दलिकानि गृह्णाति। तानि च संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलस्य किञ्चिन्न्यूनपञ्चाष्टभागप्रमाणानि विद्यन्ते।

तत्र मानकिट्टितया परिणमनाय गृहीतदलस्य तिस्रः संग्रहकिट्टीर्निर्वर्तयति। मानस्य तृतीय-

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

संग्रहकिट्टौ तु स्तोकानि दलिकानि ददाति। तानि च संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीत-सकलदलानामासन्नचतुर्विंशतिभागप्रमाणान्येकादशकोटयश्चतुष्पञ्चाशल्लक्षाणि नवसप्ततिसहस्राणि षट्पञ्चाशदधिकशतं च (११,५४,७९,१५६) दलिकानि भवन्ति। ततो विशेषाधिकान्येकादश-कोटयः षट्षष्टिलक्षाणि पञ्चोत्तरपञ्चशतानि च (११,६६,००,५०५) दलिकानि मानस्य द्वितीय-संग्रहकिट्टौ ददाति, ततोऽपि विशेषाधिकान्येकादशकोटयः सप्तसप्ततिलक्षाणि द्वाविंशतिसहस्राण्येकोन-सप्तत्यधिकशतं च(११,७७,२२,१६९)दलानि प्रथमसंग्रहकिट्टौ ददाति। तथैव मायाकिट्टितया परि-णमनाय गृहीतदलिकेभ्यो द्वादशकोटय एकविंशतिलक्षाणि षट्सप्ततिसहस्राणि पञ्चनवत्यधिकत्रि-शतानि च (१२,२१,७६,३९५) दलानि मायातृतीयसंग्रहकिट्टौ ददाति। तानि च संज्वलन-चतुष्ककिट्टितया परिणमनाय गृहीतसकलदलानामासन्नचतुर्विंशतिभागप्रमाणानि भवन्ति। ततो विशेषाधिकानि द्वादशकोटयो द्वात्रिंशल्लक्षाणि नवनवतिसहस्राणि पञ्चपञ्चाशदधिकत्रिशतानि च (१२,३२,९९,३५५) दलिकानि मायाद्वितीयसंग्रहकिट्टौ ददाति। ततोऽपि विशेषाधिकानि द्वादशकोटयश्चतुश्चत्वारिंशल्लक्षाणि द्वाविंशतिसहस्राण्यष्टचत्वारिंशदधिकषट्शतानि च (१२,४४,-२२,६४८) दलानि मायाप्रथमसंग्रहकिट्टौ प्रक्षिपति।

लोभकिट्टितया परिणमनाय गृहीतसकलदलेभ्यः सप्तसप्तत्यधिकद्विशतोत्तरषट्चत्वारिंशत्सह-स्राधिकपञ्चपञ्चाशल्लक्षोत्तरद्वादशकोटयः (१२,५५,४६,२७७) दलानि लोभतृतीयसंग्रहकिट्टौ ददाति। तानि च संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलानामासन्नचतुर्विंशतिभाग-प्रमाणानि भवन्ति। ततो विशेषाधिकानि लोभद्वितीयसंग्रहकिट्टौ पञ्चचत्वारिंशदधिकद्विशतोत्तरस-प्ततिसहस्राधिकषट्षष्टिलक्षोत्तरद्वादशकोटयः (१२६६७०२४५) दलानि ददाति। ततोऽपि विशेषाधिकानि प्रथमसंग्रहकिट्टौ द्वादशकोटयः सप्तसप्ततिलक्षाणि चतुर्नवतिसहस्राणि पञ्चपञ्चाश-दुत्तरपञ्चशतानि च (१२७७९४५५५) दलानि ददाति।

संज्वलनक्रोधकिट्टितया परिणमनाय गृहीतदलेभ्यो नवत्यधिकचतुस्सप्ततिसहस्रोत्तरषण्णवति-लक्षाधिकसप्तसप्ततिकोट्युत्तरैकाब्जसंख्यकेभ्यः (१,७७,९६,७४,०९०) संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलिकानां किञ्चिन्न्यूनचतुरष्टभागप्रमाणान्येकाब्जमेकचत्वारिंशत्कोटयो नवनवतिलक्षाण्येकाशीतिसहस्राणि चत्वारिंशदधिकचतुश्शतानि च (१,४१,९९,८१,४४०) नोक-षायतः परिणतक्रोधदलिकानि तृतीयसंग्रहकिट्टौ ददाति। शेषाणि किञ्चिन्न्यूनाष्टभागप्रमाणानि पञ्चत्रिंशत्कोटयः षण्णवतिलक्षाणि द्विनवतिसहस्राणि पञ्चाशदधिकषट्शतानि च (३५,९६,९२,६५०) दलानि क्रोधस्य प्रथमसंग्रहकिट्टि-द्वितीयसंग्रहकिट्टि-तृतीयसंग्रहकिट्टिषु ददाति। तत्र क्रोधस्य द्वितीयसंग्रहकिट्ट्यामेकादशकोटयोऽष्टनवतिलक्षाणि सप्तनवतिसहस्राणि द्विचत्वारिंशदुत्तरचतुश्शतानि च (११,९८,९७,४४२) दलानि ददाति, ततो विशेषाधिकानि प्रथमसंग्रहकिट्टौ द्वादशकोटयो दशलक्षाण्येकोनविंशतिसहस्राणि त्रिंशदधिकचतुश्शतानि च (१२,१०,१९,४३०) दलानि ददाति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृतीयसंग्रहकिट्टौ त्वेकादशकोटयः सप्ताशीतिलक्षाणि पञ्चसप्ततिसहस्राण्यष्टासप्तत्युत्तरसप्तशतानि च (११,८७,७५,७७८) दलानि ददाति, तथा प्रागुक्तानि नोकषायपरिणतक्रोधदलिकान्येकाऽब्जमेकचत्वारिंशत्कोटयो नवनवतिलक्षाण्येकाशीतिसहस्राणि चत्वारिंशदुत्तरचतुश्शतानि च (१,४१,-९९,८१,४४०) प्रक्षिपति । तेन तृतीयसंग्रहकिट्ट्यामष्टादशाधिकद्विशतोत्तरसप्तपञ्चाशत्सहस्राधिकसप्ताशीतिलक्षाधिकत्रिपञ्चाशत्कोटयधिकमेकाब्जं ( १,५३,८७,५७,२१८ ) दीयमानानि दलानि जायन्ते ।

मानतृतीयसंग्रहकिट्टितया परिणमनाय गृहीतदलस्य चतुरधिकशतम् (१०४) अवान्तरकिट्टीर्निर्वर्तयति, मानद्वितीयसंग्रहकिट्टितया परिणमनाय गृहीतदलस्य पञ्चोत्तरशतम् (१०५) अवान्तरकिट्टीर्निर्वर्तयति, मानप्रथमसंग्रहकिट्टितया च परिणमनाय गृहीतदलस्य षडधिकशतम् (१०६) अवान्तरकिट्टीः करोति ।

एवं मायातृतीयसंग्रहकिट्टितया परिणमनाय गृहीतदलस्य दशाधिकशतम् (११०) अवान्तरकिट्टीर्निर्वर्तयति, मायाद्वितीयसंग्रहकिट्टितया परिणमनाय गृहीतदलस्यैकादशोत्तरशतम् (१११) अवान्तरकिट्टीर्निर्वर्तयति । मायाप्रथमसंग्रहकिट्टितया च परिणमनाय गृहीतदलस्य द्वादशाधिकं शतम् (११२) अवान्तरकिट्टीर्निर्वर्तयति ।

लोभतृतीयसंग्रहकिट्टितया परिणमनाय गृहीतदलस्य त्रयोदशाधिकशतम् (११३) अवान्तरकिट्टीर्निर्वर्तयति । लोभद्वितीयसंग्रहकिट्टितया परिणमनाय गृहीतदलस्य चतुर्दशोत्तरशतम् (११४) अवान्तरकिट्टीर्निर्वर्तयति। लोभप्रथमसंग्रहकिट्टितया च परिणमनाय गृहीतदलस्य पञ्चदशाधिकशतम् (११५) अवान्तरकिट्टीर्निर्वर्तयति ।

क्रोधद्वितीयसंग्रहकिट्टितया परिणमनाय गृहीतदलस्या-ऽष्टाधिकशतम् (१०८) अवान्तरकिट्टीर्निर्वर्तयति, क्रोधप्रथमसंग्रहकिट्टितया परिणमनाय गृहीतदलस्य नवोत्तरशतम् (१०९) अवान्तरकिट्टीर्निर्वर्तयति । क्रोधतृतीयसंग्रहकिट्टितया च परिणमनाय गृहीतदलस्य सप्ताशीत्युत्तराणि त्रयोदशशतान्यवान्तरकिट्टीर्निर्वर्तयति (१३८७), किट्टितया परिणमनाय गृहीतदलस्य प्रभूतत्वात् । इत्थं किट्टितया परिणमनाय गृहीतसर्वदलिकानां पञ्चनवत्यधिकत्रिशताधिकपञ्चाशीतिसहस्रोत्तरत्रिनवतिलक्षाधिकसप्ताशीतिकोटयधिकद्वयब्जमात्राणां (२,८७,९३,८५,३९५) चतुर्नवत्यधिकपञ्चविंशतिशतानि (२५९४) अवान्तरकिट्टीर्निर्वर्तयति ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**चतुर्नवतितमादिगाथानां वृत्तिमाश्रित्य द्वादशसंग्रहकिट्टीनां प्रदेशाग्रस्या-ऽवान्तरकिट्टीनां च यन्त्रकम्**

| | अवान्तरकिट्टयः | तदल्पबहुत्वम् | सकलदलानि | तदल्पबहुत्वम् |
|---|---|---|---|---|
| (१) मानस्य तृतीयसंग्रहकिट्टौ | १०४ | स्तोकाः | ११५४७९१५६ | स्तोकानि |
| (२) मानस्य द्वितीयसंग्रहकिट्टौ | १०५ | विशेषाधिकाः | ११६६००५०५ | विशेषाधिकानि |
| (३) मानस्य प्रथमसंग्रहकिट्टौ | १०६ | ,, | ११७७२२१६९ | ,, |
| (४) क्रोधस्य द्वितीयसंग्रहकिट्टौ | १०८ | ,, | ११९८९७४४२ | ,, |
| (५) क्रोधस्य प्रथमसंग्रहकिट्टौ | १०९ | ,, | १२१०१९४३० | ,, |
| (६) मायायास्तृतीयसंग्रहकिट्टौ | ११० | ,, | १२२१७६३९५ | ,, |
| (७) मायाया द्वितीयसंग्रहकिट्टौ | १११ | ,, | १२३२९९३५५ | ,, |
| (८) मायायाः प्रथमसंग्रहकिट्टौ | ११२ | ,, | १२४४२२६४८ | ,, |
| (९) लोभस्य तृतीयसंग्रहकिट्टौ | ११३ | ,, | १२५५४६२७७ | ,, |
| (१०) लोभस्य द्वितीयसंग्रहकिट्टौ | ११४ | ,, | १२६६७०२४५ | ,, |
| (११) लोभस्य प्रथमसंग्रहकिट्टौ | ११५ | ,, | १२७७९४५५५ | ,, |
| (१२) क्रोधस्य तृतीयसंग्रहकिट्टौ | १३८७ | संख्यगुणाः (किञ्चिन्न्यून-त्रयोदशगुणाः) | १५३८७५७२१८ (१४१९९८१४००+ ११८७७५७७८) | संख्यातगुणानि (ईषदूनत्रयो-दशगुणानि ।) |

अथाऽवान्तरकिट्टिषु दीयमानदलं भण्यते—

लोभप्रथमसंग्रहकिट्टितया परिणमनाय गृहीतदलिकेभ्यो लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टावेकादशलक्षाण्येकादशसहस्राणि त्रिशतानि चतुर्दश च (११,११,३१४) दलिकानि ददाति। तदानयनप्रकारस्तु प्राग्दर्शितः। तत एकचयेन हीनानि दलानि लोभप्रथमसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टयामेकादशलक्षाण्येकादशसहस्राणि त्रयोदशाधिकानि त्रिशतानि च (११,११,३१३) प्रक्षिपति, प्रागेकचयस्यैकपरमाणुत्वेन संस्तवात्, तत एकैकचयेन हीनं दलं तावद् ददाति, यावद् लोभप्रथमसंग्रहकिट्टिचरमा-ऽवान्तरकिट्टिः। तेन लोभप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ द्विशताधिकैकादशसहस्रोत्तरैकादशलक्षाणि (११,११,२००) दलानि ददाति। कथम् ? इति चेत्, उच्यते-यतिसंख्याकायामवान्तरकिट्टयां दलं प्राप्तुमिष्यते, एकोनतत्संख्यागुणितैकचयदलं प्रथमाऽवान्तरकिट्टिगतदलतो विशोध्याऽवशिष्यमाणदलं तस्यामवान्तरकिट्टौ दीयत इत्यनेन करणेन लोभप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टेः पञ्चदशाधिकशततमत्वेनैकोनतत्संख्यालक्षणचतुर्दशाधिकशतगुणितैकचयगतदललक्षणचतुर्दशाधिकशतदलैर्न्यूनानि प्रथमाऽवान्तरकिट्टिगतदलानि द्विशताधिकैकादशसहस्रोत्तरैकादशलक्षाणि (११,११,२००) दलानि प्रक्षिपति। एवमग्रेऽप्यनेन करणेन दलिकनिक्षेपो बोद्धव्यः।

अथ लोभद्वितीयसंग्रहकिट्टितया परिणमनाय गृहीतदलिकेभ्यो दलान्यादाय लोभप्रथमसंग्रहकिट्टि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमाऽवान्तरकिट्टित एकचयेन न्यूनानि दलानि नवनवत्यधिकशताधिकैकादशसहस्रोत्तरैकादशलक्षमितानि (११,११,१९९) ददाति। ततो लोभद्वितीयसंग्रहकिट्टिद्वितीयावान्तरकिट्टावष्टानवत्यधिकशतोत्तरैकादशसहस्रोत्तरैकादशलक्षाणि (११,११,१९८) दलिकानि ददाति। एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलानि तावत् प्रक्षिपति, यावद् लोभद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः। तेन लोभद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ षडशीत्युत्तरैकादशसहस्राधिकैकादशलक्षाणि (११,११,०८६) दलिकानि ददाति।

ततो लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टावेकचयेन न्यूनानि दलानि ददाति। तानि च पञ्चाशीत्यधिकैकादशसहस्रोत्तरैकादशलक्षमात्राणि (११,११,०८५) भवन्ति। ततो लोभतृतीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टौ चतुरशीत्यधिकैकादशसहस्रोत्तरैकादशलक्षाणि (११,११,०८४) दलानि ददाति। एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलिकानि तावद् ददाति, यावद् लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः। तेन लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ त्रयःसप्तत्युत्तरनवशताधिकदशसहस्राधिकान्येकादशलक्षाणि (१११०९७३) दलिकानि ददाति।

तत एकचयेन हीनानि मायायाः प्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ द्वासप्तत्यधिकनवशताधिकदशसहस्रोत्तरैकादशलक्षाणि (११,१०,९७२) दलिकानि ददाति। ततो मायाप्रथमसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टावेकचयेन हीनानि दलानि प्रक्षिपति। एवमनन्तरानन्तरेणैकैकचयेन हीनानि तावद् ददाति, यावद् मायाप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः। तेन मायाप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टावेकषष्ट्यधिकाष्टशतोत्तरदशसहस्राधिकान्येकादशलक्षाणि (११,१०,८६१) दलिकानि प्रक्षिपति।

तत एकचयेन हीनानि मायाया द्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ षष्ट्यधिकाष्टशतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,८६०) दलिकानि प्रक्षिपति, ततो मायाद्वितीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टावेकोनषष्ट्युत्तराष्टशताधिकदशसहस्राधिकैकादशलक्षाणि (११,१०,८५९) दलिकानि ददाति। एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलानि तावद् ददाति, यावन्मायाया द्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः। तेन मायाद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टौ पञ्चाशदधिकसप्तशतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,७५०) दलिकानि ददाति।

तत एकचयेन हीनानि मायातृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टावेकोनपञ्चाशदुत्तरसप्तशतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,७४९) दलिकानि ददाति। ततो मायातृतीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टावष्टाचत्वारिंशदुत्तरसप्तशताधिकदशसहस्रोत्तरैकादशलक्षाणि (११,१०७४८) दलिकानि निक्षिपति। एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलिकानि तावत् प्रक्षिपति, यावन्मायातृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः। तेन मायातृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ चत्वारिंशदधिकषट्शतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,६४०) दलिकानि प्रक्षिपति।

तत ऊर्ध्वं मानप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ नवत्रिंशदधिकषट्शताधिकदशसहस्रोत्तरै-

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

कादशलक्षाणि (११,१०,६३९) दलिकानि प्रक्षिपति । ततः परं मानप्रथमसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्ट्यामष्टात्रिंशदधिकषट्शतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,६३८) दलिकानि प्रक्षिपति, एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलिकानि तावद् ददाति, यावन्मानप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः । तेन मानप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ चतुस्त्रिंशदधिकपञ्चशतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,५३४) दलिकानि प्रक्षिपति ।

तत ऊर्ध्वं मानद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ त्रयस्त्रिंशदधिकपञ्चशतोत्तरदशसहस्रोत्तरैकादशलक्षाणि (११,१०,५३३) दलिकानि ददाति । एवमनन्तरानन्तरेणैकैकचयेन हीनानि तावद् निक्षिपति, यावन्मानद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः । तेन मानद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टावेकोनत्रिंशदधिकचतुःशताधिकदशसहस्रोत्तराण्येकादशलक्षाणि (१११०४२९) दलिकानि ददाति ।

तत ऊर्ध्वं मानतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टावष्टाविंशत्यधिकचतुःशतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,४२८) दलिकानि ददाति । ततः परं मानतृतीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टौ सप्तविंशत्यधिकचतुःशताधिकदशसहस्रोत्तरैकादशलक्षाणि (१११०४२७) दलिकानि ददाति । एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलिकानि तावद् ददाति, यावन्मानतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः । तेन मानतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ पञ्चविंशत्यधिकत्रिशताधिकदशसहस्रोत्तरैकादशलक्षाणि (११,१०,३२५) दलिकानि प्रक्षिपति ।

तत ऊर्ध्वं क्रोधप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ चतुर्विंशत्यधिकत्रिशतोत्तरदशसहस्रोत्तरैकादशलक्षाणि (११,१०,३२४) दलिकानि ददाति । ततः परं क्रोधप्रथमसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टौ त्रयोविंशत्यधिकत्रिशतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,३२३) दलिकानि ददाति । एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलानि तावत् प्रक्षिपति, यावत् क्रोधप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः । तेन क्रोधप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ षोडशोत्तरद्विशताधिकदशसहस्रोत्तरैकादशलक्षाणि (११,१०,२१६) दलिकानि प्रक्षिपति ।

ततः परं क्रोधद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ पञ्चदशाधिकशतद्वयोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,२१५) दलिकानि प्रक्षिपति । तत ऊर्ध्वं क्रोधद्वितीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टौ चतुर्दशाधिकशतद्वयोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,२१४) दलिकानि प्रक्षिपति । एवमनन्तरानन्तरेणैकैकचयेन हीनानि दलानि तावद् ददाति, यावत् क्रोधद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः । तेन क्रोधद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्ट्यामष्टोत्तरशताधिकदशसहस्राधिकैकादशलक्षाणि (११,१०,१०८) दलिकानि प्रक्षिपति । अत्र क्रोधद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ पञ्चदशाधिकद्विशतोत्तरदशसहस्राधिकैकादशलक्षाणि (११,१०,२१५) दलिकानि प्रक्षिप्यन्ते । मानस्य तु प्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ चतुस्त्रिंशदधिकपञ्चशतोत्तरदश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहस्राधिकैकादशलक्षाणि (११,१०,५३४) दलिकानि प्रक्षिप्तानि । किन्तु मानप्रथमसंग्रहकिट्टि-सकलाऽवान्तरकिट्टयः षडुत्तरशतं (१०६) भवन्ति, क्रोधद्वितीयसंग्रहकिट्टिसकलाऽवान्तरकिट्टयस्तु विशेषाधिका अष्टोत्तरशतं (१०८) भवन्ति । तेन मानप्रथमसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसर्व-दलिकेभ्यो नवषष्टियुक्तैकशताधिकद्वाविंशतिसहस्रोत्तरसप्तसप्ततिलक्षाधिकैकादशकोटिभ्यः (११,-७७,२२,१६९) क्रोधद्वितीयसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतानि दलानि द्वाचत्वारिंशदधिक-चतुःशतोत्तरसप्तनवतिसहस्राधिकाष्टनवतिलक्षाधिकैकादशकोट्यो (११,९८,९७,४४२) विशेषाधि-कानि भवन्ति ।

तत ऊर्ध्वं क्रोधतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ सप्ताधिकशतोत्तरदशसहस्राधिकै-कादशलक्षाणि (११,१०,१०७) प्रक्षिपति । ततः परं क्रोधतृतीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टौ षडधिकशतोत्तरदशसहस्राधिकान्येकादशलक्षाणि (११,१०,१०६) दलिकानि प्रक्षिपति । एवमनन्त-रानन्तरेणैककचयेन हीनानि दलिकानि तावत् प्रक्षिपति, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमाऽ-वान्तरकिट्टिः । तेन क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्ट्यामेकविंशत्यधिकसप्तशतोत्तराष्टसहस्रा-धिकैकादशलक्षाणि (११,०८,७२१) दलिकानि प्रक्षिपति ।

इत्थं लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टितः प्रभृत्यनन्तरानन्तरेणाऽनन्ततमभागेन हीनं दीयमानं दलं तावद् भवति, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः ।

प्रथमसमये किट्टिषु दृश्यमानदलस्य दीयमानदलतोऽनतिरेकादनन्तरोपनिधया दृश्यमान-दलमप्यनन्तरानन्तरेण विशेषहीनं भवति ।

परम्परोपनिधया-ऽपि दीयमानं दलमनन्ततमभागेनैव हीनं भवति । तथाहि-लोभप्रथमसंग्रहकिट्टि-प्रथमाऽवान्तरकिट्टौ चतुर्दशाधिकत्रिशतोत्तरैकादशसहस्राधिकान्येकादशलक्षाणि (११,११,३१४) दलानि दीयन्ते, क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ त्वेकविंशत्यधिकसप्तशतोत्तराष्टसहस्राधि-कान्येकादशलक्षाणि (११,०८,७२१) दलानि दीयन्ते । इह च किञ्चिदधिकचतुश्शतानामनन्तत्वेन परिकल्पनाद् लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टितः क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टा-वनन्ततमभागेन हीनं दीयते । एवं दृश्यमानमपि दलं परम्परोपनिधयाऽनन्ततमभागेन हीनं भवति, दीयमानतो दृश्यमानदलस्या-ऽनतिरेकात् ॥१००॥

एतत्सर्वं यन्त्रे सुबोधार्थं प्रदर्श्यते । इदन्त्ववसेयम्—समानाऽन्तराणां राशीनां योग इष्यमाण आदिधनेन सहितमन्त्यधनं गच्छार्धेन गुण्यते, गुणने च कृते सर्वधनं लभ्यते । यदुक्तं **श्रीनिशीथभाष्ये**–"**अंतिमधणमादिजुयं गच्छद्धगुणं तु सव्वधनं** ।" इति । इह प्रथमावान्तरकिट्टौ दीयमानदलान्यन्त्यधनम्, चरमावान्तरकिट्टौ दीयमानदलान्यादिधनम्, अवान्तरकिट्टिराशिश्च गच्छ इति । यथाऽसत्कल्पनया मानतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ दीयमानदलान्यष्टाविंशत्यधिकचतुश्शतोत्तरदशसहस्राधिकैकादशलक्षाणि ( १११०४२८ ) अन्त्य-

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

धनम्, मानतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ दीयमानदलानि पञ्चविंशत्यधिकत्रिशतोत्तरदशसहस्राधिकैकादशलक्षाणि (१११०३२५) आदिधनम्, गच्छश्च चतुरधिकं शतम् (१०४)। अनन्तरोक्तकरणमाश्रित्याष्टाविंशत्यधिकचतुश्शतोत्तरदशसहस्राधिकैकादशलक्षेषु तानि पञ्चविंशत्यधिकत्रिशतोत्तरदशसहस्रसंयुक्तैकादशलक्षाणि त्रिपञ्चाशदधिकसप्तशतयुक्तविंशतिसहस्रोत्तरद्वाविंशतिलक्षाणि (१११०४२८+१११०३२५=२२२०७५३) भवन्ति। तानि च गच्छार्धेन द्वापञ्चाशल्लक्षणेन गुण्यते, तदा मानतृतीयसंग्रहकिट्टौ दीयमानसर्वदलानि षट्पञ्चाशदधिकैकशतोत्तरैकोनाशीतिसहस्राधिकचतुष्पञ्चाशल्लक्षयुक्तैकादशकोट्यः (११५४७९१५६) प्राप्यन्ते। एवमुक्तकरणेन शेषसंग्रहकिट्टीनामपि प्रदेशा यन्त्रे प्रदर्शिताः।

## किट्टिकरणाद्धाप्रथमसमयेऽसत्कल्पनया दीयमानदलयन्त्रकम्—

### मानः

| | |
|---|---|
| तृतीयसंग्रहकिट्टावान्तरकिट्टयः | १०४ |
| द्वितीय ,, ,, ,, ,, | १०५ |
| प्रथम ,, ,, ,, ,, | १०६ |
| मानस्य सकलाऽवान्तरकिट्टयः | ३१५ |
| तृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ दलानि | १११०३२५ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०४२७ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०४२८ |

∴ तृतीयसंग्रहकिट्टिसकलावान्तरकिट्टिगतसकलदलानि

=(१११०३२५+१११०४२८)×$\frac{१०४}{२}$

=२२२०७५३×५२=११५४७९१५६

| | |
|---|---|
| द्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टौ दलानि | १११०४२९ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०५३२ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०५३३ |

∴ द्वितीयसंग्रहकिट्टिसकलावान्तरकिट्टिगतसकलदलानि

=(१११०४२९+१११०५३३)×$\frac{१०५}{२}$=११६६००५०५

| | |
|---|---|
| प्रथमसंग्रहकिट्टिचरमावान्तरकिट्टौ दलानि | १११०५३४ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०६३८ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०६३९ |

∴ प्रथमसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसकलदलानि

=(१११०५३४+१११०६३९)×$\frac{१०६}{२}$=११७७२२१६९

मानकिट्टितया परिणतानि सर्वदलानि

=(१११०३२५+१११०६३९)×$\frac{३१५}{२}$=३४९८०१८३०

### क्रोधः

| | |
|---|---|
| तृतीयसंग्रहकिट्टावान्तरकिट्टयः | १३८७ (१२८०+१०७) |
| द्वितीय ,, ,, ,, ,, | १०८ |
| प्रथम ,, ,, ,, ,, | १०९ |
| क्रोधस्य सकलावान्तरकिट्टयः | १६०४ |
| तृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ दलानि | ११०८७२१ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०१०६ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०१०७ |

∴ तृतीयसंग्रहकिट्टिसकलावान्तरकिट्टिगतदलानि

=(११०८७२१+१११०१०७)×$\frac{१३८७}{२}$=१५३८७५७२१८

| | |
|---|---|
| द्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टौ दलानि | १११०१०८ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०२१४ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०२१५ |

∴ द्वितीयसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसमस्तदलानि

=(१११०१०८+१११०२१५)×$\frac{१०८}{२}$=११९८९७४४२

| | |
|---|---|
| प्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ दलानि | १११०२१६ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०३२३ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०३२४ |

∴ प्रथमसंग्रहकिट्टिसकलावान्तरकिट्टिगतसर्वदलानि

=(१११०२१६+१११०३२४)×$\frac{१०९}{२}$=१२१०१९४३०

क्रोधकिट्टितया परिणतानि सर्वदलानि

=(११०८७२१+१११०३२४)×$\frac{१६०४}{२}$=१७७९६७४०९०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## किट्टिकरणाद्धाप्रथमसमये दीयमानदलयन्त्रकम्

| माया | | लोभः | |
|---|---|---|---|
| तृतीयसंग्रहकिट्टावान्तरकिट्टयः | ११० | तृतीयसंग्रहकिट्टाववान्तरकिट्टयः | ११३ |
| द्वितीय ,, ,, ,, ,, | १११ | द्वितीय ,, ,, ,, ,, | ११४ |
| प्रथम ,, ,, ,, ,, | ११२ | प्रथम ,, ,, ,, ,, | ११५ |
| मायायाः सकलाऽवान्तरकिट्टयः | ३३३ | लोभसकलाऽवान्तरकिट्टयः | ३४२ |
| तृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ दलानि | १११०६४० | तृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ दलानि | १११०९७३ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०७४८ | ,, ,, ,, द्वितीयाऽ ,, ,, ,, | ११११०८४ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०७४९ | ,, ,, ,, प्रथमाऽ ,, ,, ,, | ११११०८५ |
| ∴ तृतीयसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसकलदलानि | | ∴ तृतीयसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसकलदलानि | |
| =(१११०६४०+१११०७४९)× ११०/२ =१२२१७६३९५ | | =(१११०९७३+११११०८५)× ११३/२ =१२५५४६२७७ | |
| द्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ दलानि | १११०७५० | द्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ दलानि | ११११०८६ |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०८५९ | ,, ,, ,, द्वितीया ,, ,, ,, | ११११११९८ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०८६० | ,, ,, ,, प्रथमाऽ ,, ,, ,, | ११११११९९ |
| ∴ द्वितीयसंग्रहकिट्टिसकलावान्तरकिट्टिगतसर्वदलानि | | ∴ तृतीयसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसर्वदलानि | |
| =(१११०७५०+१११०८६०)× १११/२ =१२३२९९३५५ | | =(११११०८६+११११११९९)× ११४/२ =१२६६७०२४५ | |
| प्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ दलानि | १११०८६१ | प्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टौ दलानि | ११११२०० |
| ,, ,, ,, द्वितीया ,, ,, ,, | १११०९७१ | ,, ,, ,, द्वितीया ,, ,, ,, | ११११३१३ |
| ,, ,, ,, प्रथमा ,, ,, ,, | १११०९७२ | ,, ,, ,, प्रथमा ,, ,, ,, | ११११३१४ |
| ∴ प्रथमसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसर्वदलानि | | ∴ प्रथमसंग्रहकिट्टिसकलाऽवान्तरकिट्टिगतसकलदलानि | |
| =(१११०८६१+१११०९७२)× ११२/२ =१२४४२२६४८ | | =(११११२००+११११३१४)× ११५/२ =१२७७९४५५५ | |
| मायाकिट्टितया परिणतानि सर्वदलानि | | लोभकिट्टितया परिणतानि सर्वदलानि | |
| =(१११०६४०+१११०९७२)× ३३३/२ =३६९८९८३९८ | | =(१११०९७३+११११३१४)× ३४२/२ =३८००११०७७ | |

संज्वलनचतुष्ककिट्टितया परिणमनाय गृहीतसकलदलानि-

(१) मानकिट्टितया परिणमनाय गृहीतसकलदलानि= ३४९८०१८३०

(२) मायाकिट्टितया परिणमनाय गृहीतसकलदलानि= ३६९८९८३९८

(३) लोभकिट्टितया परिणमनाय गृहीतसकलदलानि= ३८००११०७७

(४) क्रोधकिट्टितया परिणमनाय गृहीतसकलदलानि=१७७९६७४०९०

∴ संज्वलचतुष्ककिट्टितया परिणमनाय गृहीतसर्वदलानि=२८७९३८५३९५

## ॥ गणितविभागः समाप्तः ॥

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

किट्टिकरणाद्धाप्रथमसमये किट्टिनिर्वृत्तिमभिधाय सम्प्रति किट्टिकरणाद्धाप्रथमसमयात् प्रभृति क्षपकस्य मोहनीयस्थितिरसयोरपवर्तनैव भवति, ततोऽन्यस्य तूद्वर्तनाऽपवर्तना चोभेऽपि भवत इति विख्यापयिषुराह—

**किट्टी कुणमाणो ओवट्टइ मोहस्स ठिइरसा णियमा ।**
**सो य न उव्वट्टइ ओवट्टइ उव्वट्टइ परो उ ॥१०१॥ (उपगीतिः)**

किट्टीः कुर्वाणोऽपवर्तयति मोहस्य स्थितिरसौ नियमाद् ।
स च नोद्वर्तयत्यपवर्तयत्युद्वर्तयति परस्तु ॥१०१॥ इति पदसंस्कारः ।

**'किट्टी'** इत्यादि, किट्टीः 'कुर्वाणः' निर्वर्तयन् प्रस्तुतत्वात् क्षपकः 'मोहस्य' मोहनीयस्य स्थितिरसौ नियमाद् अपवर्तयति, मोहनीयस्य सत्तागतस्थितिरसौ नियमतो ह्रासयतीत्यर्थः । 'स' किट्टिकरणाद्धावर्ती च क्षपको नोद्वर्तयति, मोहनीयस्य सत्तागतस्थितिरसौ न वर्धयतीत्यर्थः । किट्टिकारेतरस्य को विशेषः ? इत्यत आह-**'ओवट्टइ'** इत्यादि, तत्र 'परस्तु' किट्टिकरणाद्धाया अधस्ताद् वर्तमानो जीवस्तु तुर्वाक्यभेदे, मोहनीयस्य स्थितिरसावपवर्तयत्युद्वर्तयति च । उक्तं च **कषायप्राभृते**–

**"ओवट्टणमुव्वट्टण किट्टीवज्जेसु होदि कम्मेसु ।**
**ओव्वट्टणा च णियमा किट्टीकरणम्हि बोद्धव्वा ॥१॥"** इति

तथैव **कर्मप्रकृतावपि**—

**"आबंधा उक्कड्डइ सव्वहिमोकड्डणा ठिइरसाणं ।**
**किट्टीवज्जे उभयं, किट्टीसु ओव्वट्टणा एक्का ॥१॥"** इति ।

एवं **कषायप्राभृतचूर्णावप्युक्तम्–"खवगो किट्टीकरणप्पहुडि जाव संकमो, ताव ओकड्डगो पदेसग्गस्स ण उक्कड्डगो ।"** इति ।

अथ किट्टिकरणाद्धाया द्वितीयादिसमयेषु यद्भवति, तदभिधातुकाम आह—

**बीयाइखणेसु असंखगुणकमेणं दलं तु घेत्तूणं ।**
**कुणइ अहो संगहकिट्टीण अपुव्वा असंखगुणहीणा ॥१०२॥ (गीतिः)**

द्वितीयादिसमयेष्वसंख्यगुणक्रमेण दलं तु गृहीत्वा ।
करोत्यधः संग्रहकिट्टीनामपूर्वा असंख्यगुणहीनाः ॥१०२॥ इति पदसंस्कारः ।

**'बीयाइखणेसु'** इत्यादि, 'द्वितीयादिक्षणेषु' किट्टिकरणाद्धाया द्वितीयादिसमयेषु असंख्यगुणक्रमेण 'दलं' प्रदेशाग्रं तु 'गृहीत्वा' आदाय 'संग्रहकिट्टीनां' द्वादशानां संग्रहकिट्टीनामधः 'अपूर्वाः' अभिनवा अवान्तरकिट्टीः 'असंख्यगुणहीनाः' पूर्वसमयतोऽसंख्येयगुणहीनाः 'करोति'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्वर्तयति। अपूर्वत्वं च प्राक्तनसमये तादृशाऽनुभागकानामवान्तरकिट्टीनामदर्शनादवसेयम्, उत्तरोत्तरसमये-ऽनन्तगुणहीनरसत्वसंपादनात्। इदमुक्तं भवति-प्रतिसमयमनन्तगुणवृद्ध्या प्रवर्धमानायां विशुद्धौ प्रवर्त्तमानत्वात् किट्टिकरणाद्धायाः प्रथमसमयतो द्वितीयसमयेऽसंख्येयगुणं दलं गृहीत्वा प्रथमसमयतोऽसंख्येयगुणहीना अभिनवा अवान्तरकिट्टीर्निर्वर्तयति। उक्तं च कषाय-प्राभृतचूर्णौ-"**जं पदेसग्गं सव्वसमासेण पढमसमए किट्टीसु दिज्जदि, तं थोवं। विदियसमए असंखेज्जगुणं। ××× विदियसमए अण्णाओ किट्टीओ करेदि। पढमसमये णिव्वत्तिदकिट्टीणमसंखेज्जदिभागमेत्ताओ।**" इति। ताश्च अभिनवा अवान्तर-किट्टयो द्वादशसंग्रहकिट्टीनामधस्तात् क्रियन्ते। उक्तं च कषायप्राभृतचूर्णौ-"**एक्केक्किस्से संगहकिट्टीए हेट्ठा अपुव्वाओ किट्टीओ करेदि।**" इति। तद्यथा-संज्वलनक्रोधस्य तृतीय-संग्रहकिट्टिप्रथमाऽवान्तरकिट्टया अधस्ताद् द्वितीयसमयेऽनन्तगुणहीनानुभागकाः प्रथमसमयकृता-वान्तरकिट्टीनामसंख्येयभागमिता अपूर्वा अवान्तरकिट्टीः करोति, तथा द्वितीयसंग्रहकिट्टि-प्रथमावान्तरकिट्टया अधस्तात् प्रथमसमयकृतावान्तरकिट्टीनामसंख्येयभागप्रमाणा अपूर्वा अवान्तर-किट्टीर्निर्वर्तयति। एवं क्रोधद्वितीयसंग्रहकिट्टिप्रथमसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्टया अप्यधस्ताद-नन्तगुणहीनानुभागकाः प्रथमसमयकृतावान्तरकिट्टीनामसंख्येयभागप्रमाणा अभिनवा अवान्तरकिट्टी-र्निर्वर्तयति। एवमेव मानमायालोभानां स्वस्वप्रथमादिसंग्रहकिट्टीनामधस्तादनन्तगुणहीनाऽनुभागका अपूर्वा अवान्तरकिट्टीः करोति। यस्याः संग्रहकिट्टया अधस्ताद् या अपूर्वाऽवान्तरकिट्टयः क्रियन्ते, ता अपूर्वाऽवान्तरकिट्टयस्तत्संग्रहकिट्टिसम्बन्धिन्यो व्यपदिश्यन्ते। इत्थं प्रथमसमयतो द्वितीयसमयेऽ-संख्येयभागप्रमाणा मन्दतराऽनुभागका अवान्तरकिट्टय एकैकस्यां संग्रहकिट्टौ वर्धन्ते।

संज्वलनक्रोधस्य किट्टीनां विन्यासः—

| द्वितीयसमयकृता अपूर्वावान्तरकिट्टयः | प्रथमसमयकृताऽवान्तरकिट्टयः |
|---|---|
| ****** | ★★★★★★★★★★★★★प्रथमसंग्रहकिट्टिः। |
| ******** | ★★★★★★★★★★★★★★★★★द्वितीयसंग्रहकिट्टिः |
| ********** | ★★★★★★★★★★★★★★★★★★★★★तृतीयसंग्रहकिट्टिः |

परमार्थतः प्रथमसमयकृतावान्तरकिट्टितो द्वितीयसमयकृतावान्तरकिट्टयो-ऽसंख्येयगुणहीना भवन्ति। इह तु द्विगुणहीना दर्शिताः, द्विकस्याऽसंख्येयत्वेन परिकल्पनात्।

एवं मानमायालोभानामपि न्यासो द्रष्टव्यः।

ततस्तृतीयसमये द्वितीयसमयतोऽसंख्येयगुणं दलं गृहीत्वा द्वितीयसमयतोऽसंख्येयगुण-हीना अपूर्वा अवान्तरकिट्टीर्द्वादशसंग्रहकिट्टिसत्कस्वस्वप्रथमाऽवान्तरकिट्टया अधस्ताद् निर्वर्तयति। एवं प्रतिसमयमसंख्येयगुणक्रमेण दलं गृहीत्वाऽसंख्येयगुणहीना अपूर्वावान्तरकिट्टीस्तावन्निर्वर्तयति, यावत् किट्टिकरणाद्धायाश्चरमसमयः ॥१०२॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अथ किट्टिकरणाद्धाया द्वितीयादिसमयेष्ववान्तरकिट्टिषु दीयमानप्रदेशाग्रं दृश्यमानप्रदेशाग्रं च विभणिषुराह—

**देइ अपुव्वंतत्तो पुव्वादीए असंखभागूणं ।**
**पुव्वंताउ अपुव्वादीअ असंखंसउत्तरं दलिअं ॥१०३॥ (गीतिः)**
**सेसासु विसेसूणं तेणं तेवीसउट्टकूडाणि ।**
**होन्ते दीसइ दलिअं सव्वत्थ अणंतभागूणं ॥१०४॥**

ददात्यपूर्वान्तातः पूर्वादावसंख्यभागोनम् ।
पूर्वान्ताया अपूर्वादौ असंख्यांशोत्तरं दलिकम् ॥१०३॥
शेषासु विशेषोनं तेन त्रयोविंशत्युष्ट्रकूटानि ।
भवन्ति दृश्यते दलिकं सर्वत्र अनन्तभागोनम् ॥१०४॥इति पदसंस्कारः ।

**'देइ'** इत्यादि, 'बीयाइखणेसु' इति पूर्वतोऽनुवर्तते, किट्टिकरणाद्धाया द्वितीयादिसमयेषु 'अपूर्वान्तातः' अपूर्वास्ववान्तरकिट्टिषु या अन्ता-चरमाऽवान्तरकिट्टिः, ततः, चरमाऽपूर्वाऽवान्तर-किट्टित इत्यर्थः, 'पूर्वादौ' पूर्वास्ववान्तरकिट्टिषु या आदिः-प्रथमाऽवान्तरकिट्टिः, तस्याम्, प्रथम-पूर्वाऽवान्तरकिट्टयामित्यर्थः, 'असंख्यभागोनम्' असंख्येयभागहीनं दलिकं 'ददाति' निक्षिपति ।

**'पुव्वंताउ'** इत्यादि, 'पूर्वान्तायाः' पूर्वास्ववान्तरकिट्टिषु या अन्ता-चरमाऽवान्तरकिट्टिः, ततः, चरमपूर्वाऽवान्तरकिट्टित इत्यर्थः, 'अपूर्वादौ' पूर्वाऽवान्तरकिट्टिसमनन्तरं या अपूर्वाऽवान्तर-किट्टयोऽवतिष्ठन्ते, तासु या आदिः—प्रथमा-ऽवान्तरकिट्टिः, तस्याम्, प्रथमाऽपूर्वावान्तरकिट्टया-मित्यर्थः, 'असंख्यांशोत्तरम्' असंख्येयभागाधिकं दलिकं ददाति ।

**'सेसासु'** इत्यादि, 'शेषासु' उक्तेतरासु पूर्वापूर्वावान्तरकिट्टिषु 'विशेषोनं' विशेषहीनं दलिकं निक्षिपति । **'तेणं'** इत्यादि, 'तेन' उक्तदलनिक्षेपक्रमेण द्वितीयादिसमयेषु दीयमानदलस्य त्रयोविंशत्युष्ट्रकूटानि भवन्ति, न न्यूनाधिकाः ।

तथाहि-किट्टिकरणाद्धाया द्वितीयसमये संज्वलनलोभस्य प्रथमसंग्रहकिट्टिप्रथमाऽपूर्वावान्तर-किट्टौ सर्वप्रभूतं दलं ददाति । प्रथमसंग्रहकिट्टिप्रथमाऽपूर्वावान्तरकिट्टिश्च प्रथमसंग्रहकिट्टया अधस्तादनन्तगुणहीनाऽनुभागकासु तदानींतनास्वनन्तास्वपूर्वावान्तरकिट्टिषु सर्वमन्दानुभागका बोद्धव्या । एवमग्रेऽपि यथास्थानं भावनीयम् । ततः प्रथमसंग्रहकिट्टिद्वितीयापूर्वाऽवान्तरकिट्टौ विशेषहीनं दलं ददाति, हीनत्वं चाऽनन्ततमभागेन ज्ञातव्यम् । एवमनन्तरानन्तरेण तावद् वक्तव्यम्, यावद् लोभस्य प्रथमसंग्रहकिट्टिचरमाऽपूर्वावान्तरकिट्टिः । उक्तं च **कषायप्राभृतचूर्णौ**— **"लोभस्स जहण्णियाए किट्टीए पदेसग्गं बहुअं दिज्जदि, विदियाए किट्टीए विसेस-हीणमणंतभागेण, ताव अणंतभागहीणं, जाव अपुव्वाणं चरिमादो त्ति ।"** इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयसमयेन निर्वर्त्यमानलोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वावान्तरकिट्टौ दीयमानप्रदेशतः प्रथमसमयकृतलोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टावसंख्येयभागहीनं दलं ददाति । न्यगादि च कषायप्राभृतचूर्णौ—"**तदो पढमसमए णिव्वत्तिदाणं जहण्णियाए किट्टीए विसेसहीणमसंखेज्जदिभागेण ।**" इति । कथमेतदवसीयते ? इति चेद्, उच्यते—प्रतिसमयमनन्तगुणवृद्ध्या विशुद्धेः प्रवर्धमानत्वात् किट्टिकरणाद्धायाः प्रथमसमयतो द्वितीयसमयेऽसंख्येयगुणं दलमवान्तरकिट्टितया परिणमनाय गृह्णाति । अपूर्वाऽवान्तरकिट्टयस्त्वसंख्येयगुणहीना निर्वर्त्यन्ते । अथ प्रथमसमयकृतप्रथमावान्तरकिट्टौ यावद् दलं प्रथमसमयेऽदात्, यदि तावदेव दलं द्वितीयसमये चरमापूर्वान्तरकिट्टौ दद्यात्, तर्ह्यपूर्वावान्तरकिट्टिषु दीयमानं सकलं दलं द्वितीयसमये किट्टितया परिणमनाय गृहीतदलस्याऽसंख्येयभागप्रमाणं स्यात्, प्रथमसमयतो द्वितीयसमये निर्वर्त्यमानकिट्टीनामसंख्येयगुणहीनत्वात् किट्टितया च परिणमनाय गृहीतदलस्या-ऽसंख्येयगुणत्वात् । बह्वसंख्येयभागप्रमाणदलस्य तु निक्षेपो न स्यात् । न चैतामापत्तिमपाकर्तुं बह्वसंख्येयभागमात्रदलं यथाविभागं पूर्वावान्तरकिट्टिषु प्रक्षेप्स्यमिति वाच्यम्, यतस्तथाऽभ्युपगमे पूर्वसमयापेक्षया दलिकस्या-ऽसंख्येयगुणत्वेना-ऽपूर्वाऽवान्तरकिट्टौ दृश्यमानदलतः पूर्वावान्तरकिट्टौ दृश्यमानमपि दलमसंख्येयगुणं स्यात् । तच्च नेष्टम्, पूर्वापूर्वाऽवान्तरकिट्टिषु दृश्यमानदलिकस्यैकगोपुच्छाकारेण वक्ष्यमाणत्वात् । तेनैकैकपूर्वावान्तरकिट्टौ प्रथमसमये यावद् दलिकं प्रदत्तम्, ततोऽसंख्येयगुणं दलमेकैकपूर्वावान्तरकिट्टयामेकैकापूर्वावान्तरकिट्टौ च ददाति, किन्तु यावद् दलमेकैकापूर्वावान्तरकिट्टौ प्रक्षिप्यते, ततोऽसंख्येयभागेन हीनं दलमेकैकपूर्वावान्तरकिट्टौ दीयते । कुतः ? इति चेत्, उच्यते—पूर्वाऽवान्तरकिट्टयां पुरातनसत्तागतदलमसंख्येयभागप्रमाणं ध्रियते, तथा द्वितीयसमये केवलमपूर्वावान्तरकिट्टितः पूर्वाऽवान्तरकिट्टौ दलमनन्ततमभागेन हीनं तिष्ठति, दृश्यमानदलस्य विशेषहीनक्रमेण वक्ष्यमाणत्वात् । यद्येकैकापूर्वावान्तरकिट्टौ यावद् दलं ददाति, तावदेव दलमेकैकपूर्वावान्तरकिट्टयामपि दद्यात्, तर्ह्यपूर्वावान्तरकिट्टितः पूर्वावान्तरकिट्टौ दृश्यमानदलमसंख्येयभागाधिकं स्यात्, पूर्वाऽवान्तरकिट्टावसंख्येयभागप्रमाणस्य पुरातनदलस्य सद्भावात् । तच्च नाऽभिप्रेतम्, विशेषहीनदलस्य वक्ष्यमाणत्वात् । तेन लोभप्रथमसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टितः प्रथमसमयकृतलोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टयामसंख्येयभागहीनं दलं ददाति । एवमग्रेऽप्यपूर्वाऽवान्तरकिट्टीनां चरमापूर्वाऽवान्तरकिट्टितः पूर्वाऽवान्तरकिट्टीनां प्रथमपूर्वाऽवान्तरकिट्टौ दीयमानदलमसंख्येयभागेन हीनं वक्तव्यम् ।

लोभप्रथमसंग्रहकिट्टयाः प्रथमसमयकृतप्रथमाऽवान्तरकिट्टितो विशेषहीनं दलं प्रथमसमयकृतद्वितीयाऽवान्तरकिट्टौ ददाति । हीनत्वं चाऽनन्ततमभागेन ज्ञातव्यम् । ततोऽपि प्रथमसमयकृततृतीयाऽवान्तरकिट्टौ विशेषहीनं ददाति । एवं विशेषहीनक्रमेण तावद् ददाति, यावद् लोभप्रथमसंग्रहकिट्टयाः प्रथमसमयकृतचरमाऽवान्तरकिट्टिः । उक्तञ्च कषायप्राभृतचूर्णौ—"**तदो विदि-**

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

**याए अणंतभागहीणं। तेण परं पढमसमए णिव्वत्तिदासु लोभस्स पढमसंगहकिट्टीए किट्टीसु अणंतराणंतरेण अणंतभागहीणं दिज्जमाणगं जाव पढमसंगहकिट्टीए चरिमकिट्टि त्ति।** "इति।

लोभप्रथमसंग्रहकिट्टिसत्कप्रथमसमयकृतचरमाऽवान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमानप्रथमापूर्वाऽवान्तरकिट्टौ दलमसंख्येयभागेनाधिकं ददाति। उक्तञ्च कषायप्राभृतचूर्णौ–"**लोभस्स चेव विदियसमए विदियसंगहकिट्टीए तिस्से जहण्णियाए किट्टीए दिज्जमाणगं विसेसाहियमसंखेज्जदिभागेण।**" इति। कुतः? इति चेत्, उच्यते-यदि लोभप्रथमसंग्रहकिट्ट्याः प्रथमसमयकृतचरमाऽवान्तरकिट्टौ यावद्दलं ददाति, तावदेव लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमानप्रथमाऽपूर्वाऽवान्तरकिट्टौ प्रक्षिपेत्, तर्हि दृश्यमानदलमेकगोपुच्छाकारेण न तिष्ठेत्, अपि त्वसंख्येयभागेन हीनं तिष्ठेत्। तथाहि-लोभप्रथमसंग्रहकिट्ट्याः प्रथमसमयकृतचरमाऽवान्तरकिट्टौ निक्षिप्यमाणदलिकापेक्षयाऽसंख्येयभागमात्रं दलं पुरातनसत्तागतं विद्यते। अथ प्रथमसमयकृतप्रथमसंग्रहकिट्टिसत्कचरमाऽवान्तरकिट्टौ यावद्दलं दीयते, यदि तावन्मात्रमेव दलं लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमानप्रथमाऽपूर्वाऽवान्तरकिट्टौ प्रक्षिपेत्, तर्हि तत्र पुरातनसत्तागतदलस्याऽभावेन केवलं दीयमानदलसद्भावाल्लोभप्रथमसंग्रहकिट्ट्याः प्रथमसमयकृतचरमाऽवान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमानप्रथमाऽपूर्वाऽवान्तरकिट्टौ दृश्यमानं दलमसंख्येयभागेन हीनं स्यात्। न च तदिष्यते, पूर्वाऽपूर्वाऽवान्तरकिट्टीनां दृश्यमानं दलं यथोत्तरमनन्तभागेन हीनं भवदेकगोपुच्छाकारेण तिष्ठतीति स्वीकारात्। तेन लोभप्रथमसंग्रहकिट्ट्याः प्रथमसमयकृतचरमाऽवान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमानप्रथमाऽपूर्वाऽवान्तरकिट्टावसंख्येयभागेनाधिकं दलं ददाति, । एवमसंख्येयभागाधिके दलिके प्रक्षिप्ते दृश्यमानं दलं गोपुच्छाकारेण तिष्ठति। एवमन्यत्राऽपि यत्राऽसंख्येयभागेनाधिकं दलं प्रक्षिपति, तत्रेदं कारणं प्ररूपयितव्यम्। लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमानप्रथमाऽपूर्वान्तरकिट्टितो द्वितीयसमयनिर्वर्त्यमानद्वितीयाऽपूर्वाऽवान्तरकिट्टौ विशेषहीनं दलं ददाति, हीनत्वं चाऽनन्ततमभागेन ज्ञातव्यम्। एवमनन्तरानन्तरेण विशेषहीनं विशेषहीनं तावद् वक्तव्यम्, यावद् लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमान चरमाऽपूर्वाऽवान्तरकिट्टिः। उक्तं च कषायप्राभृतचूर्णौ—"**तेण परमणंतभागहीणं जाव अपुव्वाणं चरिमादो त्ति।**" इति।

लोभद्वितीयसंग्रहकिट्ट्या द्वितीयसमयनिर्वर्त्यमानचरमाऽपूर्वाऽवान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमसमयकृतप्रथमापूर्वाऽवान्तरकिट्टावसंख्येयभागेन हीनं ददाति। ततः परमनन्तरानन्तरेणाऽनन्तभागेन हीनं दलं तावद् ददाति, यावद् लोभद्वितीयसंग्रहकिट्टिप्रथमसमयकृतचरमाऽवान्तरकिट्टिः।

लोभद्वितीयसंग्रहकिट्टिप्रथमसमयकृतचरमपूर्वाऽवान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिद्वितीय-

Jain Education International                    For Private & Personal Use Only                    www.jainelibrary.org

समयनिर्वर्त्यमानप्रथमाऽपूर्वाऽवान्तरकिट्टौ दलमसंख्येयभागेनाऽधिकं दलं ददाति । ततः परमनन्तरानन्तरेणाऽनन्तभागेन हीनं तावद् ददाति, यावद् लोभतृतीयसंग्रहकिट्टिद्वितीयसमयनिर्वर्त्यमानचरमाऽपूर्वावान्तरकिट्टिः ।

लोभतृतीयसंग्रहकिट्टिद्वितीयसमयनिर्वर्त्यमानचरमाऽपूर्वाऽवान्तरकिट्टितः प्रथमसमयनिर्वर्त्तितलोभतृतीयसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टावसंख्येयभागेन हीनं दलं ददाति, ततः परमनन्तरानन्तरेणाऽनन्तभागेन हीनं तावद् ददाति, यावत् प्रथमसमयकृतलोभतृतीयसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टिः ।

प्रथमसमयकृतलोभतृतीयसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टितो द्वितीयसमयनिर्वर्त्यमानमायाप्रथमसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टौ दलमसंख्येयभागेनाऽधिकं ददाति । ततः परमनन्तरानन्तरेणाऽनन्तभागेन हीनं तावद् ददाति, यावद् द्वितीयसमयनिर्वर्त्यमान-मायाप्रथमसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टिः । उक्तं च कषायप्राभृतचूर्णौ **"तदो लोभस्स चरिमादो किट्टीदो मायाए जा विदियसमए जहण्णिया किट्टी, तिस्से दिज्जदि पदेसग्गं विसेसाहियमसंखेज्जदिभागेण, तदो पुणमणंतभागहीणं जाव अपुव्वाणं चरिमादो त्ति।"**

मायाप्रथमसंग्रहकिट्टिद्वितीयसमयनिर्वर्त्यमानचरमाऽपूर्वाऽवान्तरकिट्टितः प्रथमसमयकृतमायाप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टावसंख्येयभागेन हीनं दलं ददाति, ततः परमनन्तभागेन हीनं दलं तावद् ददाति, यावत् प्रथमसमयकृत-मायाप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः ।

एवं मायामानक्रोधानां यथाक्रमं यत्र यत्र पूर्वाऽवान्तरकिट्टिसमनन्तरमपूर्वाऽवान्तरकिट्टिः प्राप्यते, तत्र तत्र पूर्वाऽवान्तरकिट्टौ दत्तदलतोऽसंख्येयभागेनाधिकं दलं ददाति । यत्र यत्र पुनरपूर्वाऽवान्तरकिट्टिसमनन्तरं पूर्वाऽवान्तरकिट्टिः प्राप्यते, तत्र तत्राऽपूर्वाऽवान्तरकिट्टौ दत्तदलतोऽसंख्येयभागेन हीनं दलं ददाति । अन्यत्र सर्वपूर्वापूर्वाऽवान्तरकिट्टिषु क्रमेणाऽनन्तभागहीनं दलं ददाति । उक्तं च कषायप्राभृतचूर्णौ–**"एवं जम्हि जम्हि अपुव्वाणं जहण्णिया किट्टी, तम्हि तम्हि विसेसाहियमसंखेज्जदिभागेण, अपुव्वाणं चरिमादो असंखेज्जदिभागहीणं । XXX सेसेसु किट्टिट्ठाणेसु अणंतभागहीणं दिज्जमाणगस्स पदेसग्गस्स ।"** इति ।

एवंक्रमेण दलिकं निक्षिपन् द्वादशसु पूर्वाऽवान्तरकिट्टिस्थानेष्वसंख्येयभागेन हीनं दलं ददाति, अपूर्वावान्तरकिट्टयाः पूर्वाऽवान्तरकिट्टयाश्च द्वादशसन्धिदर्शनात् । एकादशसु चाऽपूर्वाऽवान्तरकिट्टिस्थानेष्वसंख्येयभागेनाधिकं दलं ददाति, पूर्वा-ऽवान्तरकिट्टयपूर्वा-ऽवान्तरकिट्टयोरेकादशसन्धिदर्शनात् । उक्तं च कषायप्राभृतचूर्णौ–**"एदेण कमेण विदियसमए णिक्खिवमाणगस्स पदेसग्गस्स बारससु किट्टिट्ठाणेसु असंखेज्जदिभागहीणं, एक्कारससु किट्टिट्ठाणेसु असंखेज्जदिभागुत्तरं दिज्जमाणगस्स पदेसग्गस्स"** । इति ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

इत्थं द्वितीयसमये दीयमानदलस्य द्वादशस्थानेष्वसंख्येयभागहीनत्वाद् एकादशस्थानेषु चाऽसंख्येयभागाधिकत्वात् तथा शेषेष्वनन्तस्थानेष्वनन्ततमभागेन न्यूनत्वाद् दीयमानदलस्यैष क्रम उष्ट्रकूटतुल्यो जातः । यथा उष्ट्रस्य पृष्ठं पश्चिमभाग उन्नतं भवति, ततः क्रमेण ईषन्निम्नतया तिष्ठत् स्थानविशेषे प्रभूतनिम्नं भवति, ततः क्रमेणेषन्निम्नतया तिष्ठत् पुनरुन्नतं भवति । ततः क्रमेणेषन्निम्नतया तिष्ठति । तथैवाऽत्रापि लोभप्रथमसंग्रहकिट्ट्याः प्रथमापूर्वावान्तरकिट्टौ दीयमानं दलं प्रभूतं भवति, ततोऽनन्तरानन्तरेणा-ऽनन्ततमभागेन हीनं भवद् अपूर्वावान्तरकिट्ट्याः पूर्वाऽवान्तरकिट्ट्याश्च सन्धौ सति लोभप्रथमसंग्रहकिट्ट्याः प्रथमपूर्वाऽवान्तरकिट्टावसंख्येयभागेन हीनं भूत्वाऽधो गच्छति । ततः क्रमेणाऽनन्ततमभागेन हीनं भवत् पूर्वाऽवान्तरकिट्ट्या अपूर्वावान्तरकिट्ट्याश्च सन्धौ सति लोभद्वितीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यामसंख्येयभागाधिकं भूत्वोन्नतं भवति । ततः क्रमेणा-ऽनन्तभागेन हीनं भवति । तेन दीयमानदलमुष्ट्रकूटतुल्यं जातम् । उक्तं च **कषायप्राभृतचूर्णौ–विदियसमये दिज्जमाणगस्स पदेसग्गस्स एसा उट्टकूडसेढी ।"** इति । इहोष्ट्रकूटशब्देन सादृश्याद् निम्नोन्नतस्थानानि बोध्यानि, तानि च सर्वसंख्यया त्रयोविंशतिर्भवन्ति । तेन दीयमानदलस्य त्रयोविंशतिरुष्ट्रकूटान्युपपद्यन्ते । न च कूटशब्दस्य शिखरवाचकत्वेनोष्ट्रकूटशब्देन सादृश्यात् केवलान्युन्नतस्थानानि कुतो न गृह्यन्ते ? इति वाच्यम्, यत उष्ट्रकूटशब्देन सादृश्यात् केवलेषून्नतस्थानेषु गृहीतेषूष्ट्रकूटान्येकादश स्युः, एकादशस्थानेष्वेवाऽसंख्येयभागाधिकदलिकप्रक्षेपात् । न च तदिष्टम्, **कषायप्राभृतचूर्ण्यादौ** त्रयोविंशत्युष्ट्रकूटानां प्रतिपादनात् । ननूष्ट्रकूटशब्देन निम्नोन्नतस्थानेषु गृहीतेषूष्ट्रकूटान्यनन्तानि स्युः, अनन्तावान्तरकिट्टिषु दीयमानदलस्यानन्तभागहीनत्वेन निम्नस्थानानामनन्तत्वादिति चेत्, न, यत इह यस्मिन् किट्टिस्थानेऽसंख्येयभागहीनं दलं दीयते, तन्निम्नतया विवक्षितम् । यत्र त्वनन्तभागहीनं दीयते, तत् सदपि निम्नं निम्नतया न विवक्ष्यते, यथा-ऽनुदरा कन्या । यथा द्वितीयसमये दीयमानदलस्य क्रमो दर्शितः, तथैव किट्टिकरणाद्धायाः शेषसमयेष्वपि बोद्धव्यः, विशेषाभावात् । यदुक्तं **कषायप्राभृतचूर्णौ–"जहा विदियसमए किट्टीसु पदेसग्गं, तहा सव्विस्से किट्टीकरणद्धाए दिज्जमाणगस्स पदेसग्गस्स तेवीसमुट्टकूडाणि ।"** इति । इत्थं किट्टिकरणाद्धायां द्वितीयादिसमयेष्वपि दीयमानदलस्य त्रयोविंशतिरुष्ट्रकूटानि भवन्ति ।

अथ किट्टिकरणाद्धाया द्वितीयादिसमयेषु दृश्यमानं दलं प्ररूपयति-**'दीसइ'** इत्यादि, तत्र **'सव्वत्थ'** त्ति 'सर्वत्र' सर्वपूर्वापूर्वाऽवान्तरकिट्टिषु 'अनन्तभागोनम्' अनन्ततमभागेन ऊनं-हीनं 'दलिकं' प्रदेशाग्रं दृश्यते, किट्टिकरणाद्धाया द्वितीयादिसमयेषु पूर्वापूर्वसर्वाऽवान्तरकिट्टिषु यथोत्तरं दृश्यमानं दलमनन्ततमभागेन हीयमानं भवदेकगोपुच्छाकारेण तिष्ठतीत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ— "दिस्समाणयं सव्वम्हि अणंतभागहीणं"।** इति । अयं भावः — किट्टिकरणाद्धाया द्वितीयादिसमयेष्वपि संज्वलनलोभप्रथमसंग्रहकिट्टिप्रथमा–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# यन्त्रकम्-१६ ( चित्रम्-१६)



## किट्टिकरणाद्धाया द्वितीयसमये दीयमानदलस्योष्ट्रकूटप्ररूपणा




सङ्केतस्पष्टीकरणम्—

क=लोभप्रथमसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्टौ प्रभूतं दलं दीयते ।

ख=लोभप्रथमसंग्रहकिट्टिद्वितीयाद्यपूर्वावान्तरकिट्टिषु विशेषहीनक्रमेण दलं दीयते।

ग=लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ लोभप्रथमसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टितोऽसंख्येयभागहीनं दलं दीयते। तेनाऽत्र प्रथम उष्ट्रकूटो भवति। स च १ इत्यनेन सूचितः।

घ=ततः परं लोभप्रथमसंग्रहकिट्टिद्विती यादिपूर्वावान्तरकिट्टिषु विशेषहीनक्रमेण दलं दीयते।

ङ=लोभद्वितीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्टौ लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितोऽसंख्येयभागाधिकं दलं दीयते। तेनाऽत्र द्वितीय उष्ट्रकूटो भवति। स च २ इत्यनेनाङ्केन सूचितः। इदृशाकार उष्ट्रो 'गोबी' (Gobi) इत्याख्ये वने दृश्यते।




१ किट्टिः ॥ २ किट्टिः ॥ ३ किट्टि ॥ १ किट्टिः ॥ २ किट्टिः ॥ ३ किट्टिः ॥ १ किट्टिः ॥ २ किट्टिः ॥ ३ किट्टिः ॥ १ किट्टिः ॥ २ किट्टिः ॥ ३ किट्टिः ॥

सं ज्व ल न लो भः ॥ सं ज्व ल न मा या ॥ सं ज्व ल न मा नः ॥ सं ज्व ल न क्रो धः ॥

संकेतस्पष्टीकरणम्—अ=द्वितीयसमये निर्वर्त्यमाना अपूर्वावान्तरकिट्टयः। पू=पूर्वावान्तरकिट्टयः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* अनेन चिह्नेन अपूर्वावान्तरकिट्टिषु दीयमानं दलं सूचितम् ,तच्च लोभप्रथमसंग्रहकिट्टयाः प्रथमापूर्वावान्तरकिट्टौ प्रभूतं भवति, द्वितीयापूर्वावान्तरकिट्टौ विशेषहीनम् , एवमुत्तरोत्तरापूर्वावान्तरकिट्टौ विशेषहीनं विशेषहीनं भवति ।

• • •=अनेन चिह्नेन पूर्वावान्तरकिट्टिषु पुरातनदलं सूचितम् ।

० ० ० अनेन चिह्नेन पूर्वावान्तरकिट्टिषु दीयमानं दलं सूचितम्, तत्र लोभप्रथमसंग्रहकिट्टयाश्चरमापूर्वावान्तरकिट्टौ यद् दलं दीयते, ततोऽसंख्येयभागेन हीनं लोभप्रथमसंग्रहकिट्टयाः प्रथमपूर्वावान्तरकिट्टौ दीयते, तत्र ( • • • ) अनेन चिह्नेन सूचितस्य पुरातनदलस्य सत्त्वात् । इह दीयमानदलस्य प्रथम उष्ट्रकूटः (१), तत उत्तरोत्तरपूर्वावान्तरकिट्टौ विशेषहीनक्रमेण दलं तावद् दीयते, यावल्लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः । ततो लोभद्वितीयसंग्रहकिट्टयाः प्रथमापूर्वावान्तरकिट्टावसंख्येयभागाधिकं दीयते, अत्र दीयमानदलस्य द्वितीय उष्ट्रकूटः, (२) ततो विशेषहीनक्रमेण दीयते । एवंक्रमेण द्वादशसंग्रहकिट्टयवान्तरकिट्टिषु दलिके प्रक्षिप्ते एकादशस्थानेष्वसंख्येयभागाधिकं दीयमानं दलं भवति, एकादशस्थानानि च २, ४, ६, इत्यादियुग्माङ्कैर्दर्शितानि, द्वादशस्थानेषु चाऽसंख्येयभागहीनं दीयमानं दलं भवति । द्वादशस्थानानि च १, ३, ५, इत्याद्योजोऽङ्कैः सूचितानि । अनया रीत्या दीयमानदलस्य त्रयोविंशतिरुष्ट्रकूटा भवन्ति । शेषस्थानेषु विशेषहीनक्रमेण दलं दीयते । चित्रेऽनेकान् उष्ट्रान् परिकल्प्य २३ उष्ट्रकूटा दर्शिताः, विशेषहानिश्च • • • अनेन चिह्नेन सूचिता ।



ऽवान्तरकिट्टौ दृश्यमानं दलं प्रभूतं भवति, ततोऽनन्तभागेन हीनं संज्वलनलोभप्रथमसंग्रहकिट्टि-द्वितीयाऽवान्तरकिट्टौ दृश्यमानं दलं विद्यते। एवमनन्तरानन्तरेण तावद् वक्तव्यम्, यावत् संज्वलनक्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः। न चा-ऽपूर्वाऽवान्तरकिट्टिषु यावद् दलं दीयते, तावदेव दृश्यमानं भवति। पूर्वाऽवान्तरकिट्टिषु पुनर्दीयमानदल-पुरातनसत्तागतदलयोः समुदायो दृश्यमानं दलं भवति। तेन चरमाऽपूर्वाऽवान्तरकिट्टितः प्रथमपूर्वाऽवान्तरकिट्टौ दृश्यमानं दलमधिकं कुतो न भवति? इति चेत्, उच्यते-एतत् समीचीनम्। किन्तु प्रथमपूर्वावान्तरकिट्टौ दीयमान-दलस्याऽसंख्येयभागप्रमाणं पुरातनसत्तागतं दलं तथा चरमाऽपूर्वाऽवान्तरकिट्टौ दीयमानदलतोऽ-संख्येयभागेन हीनं तस्यां दीयमानं दलमित्येतयोः समुदायस्य चरमाऽपूर्वाऽवान्तरकिट्टौ दीयमान-दलतोऽनन्तभागहीनत्वाच्चरमाऽपूर्वावान्तरकिट्टितः प्रथमपूर्वा-ऽवान्तरकिट्टावनन्तभागेन हीनं दलं दृश्यते। पश्यन्तु पाठका यन्त्रकम्-१६।

## —: अथ गणितविभागः :—

**अथोपर्युक्तार्थो गणितानुसारेण स्फुटीक्रियते**—प्रथमसमये यावतो दलिकस्या-ऽवान्तरकिट्टीः करोति, द्वितीयसमये ततोऽसंख्येयगुणं दलं गृहीत्वाऽभिनवा अवान्तरकिट्टीः कुर्वन् पूर्वाऽवान्तरकिट्टीरपि पुष्णाति, पूर्वाऽवान्तरकिट्टिष्वपि दलिकं ददातीत्यर्थः।

तत्र द्वितीयसमये किट्टितया परिणमनाय गृहीतसर्वदलं विभागचतुष्टये विभक्तव्यम्। तद्यथा-(१) अधस्तनशीर्षचयदलम्, (२) अधस्तनाऽवान्तरकिट्टिदलम्, (३) उभयचयदलम्, (४) मध्यमखण्डदलं चेति।

(१) **अधस्तनशीर्षचयदलम्**—किट्टिकरणाद्धाप्रथमसमयकृतायां सर्वजघन्याऽनुभागका-ऽवान्तरकिट्टौ दलं प्रभूतं विद्यते, ततो द्वितीयाऽवान्तरकिट्टौ विशेषहीनं विद्यते, ततोऽपि तृतीया-ऽवान्तरकिट्टौ विशेषहीनम्, एवंक्रमेण तावद् विद्यते, यावच्चरमाऽवान्तरकिट्टिः।

अथ द्वितीयसमये किट्टितया परिणमनाय गृहीतदलिकतो दलमादाय तेन क्रमेण प्रथमस-मयकृतद्वितीयाद्यवान्तरकिट्टयः पूरयितव्याः, येन सर्वा अप्यवान्तरकिट्टयः प्रदेशाग्रमाश्रित्य प्रथम-समयकृतप्रथमाऽवान्तरकिट्टिसदृशा भवेयुः। प्रथमसमयकृतद्वितीयाद्यवान्तरकिट्टीनां समीकरणार्थं यावद् दलमपेक्ष्यते, तावद् दलमधस्तनशीर्षचयदलमुच्यते। नन्वधस्तनशीर्षचयदलं कुतः कल्प्यते? इति चेत्, उच्यते-द्वितीयसमय एकैकस्यामवान्तरकिट्टावभिनवश्चय इष्यते, एकैका-वान्तरकिट्टौ प्रथमसमयतो द्वितीयसमयेऽसंख्येयगुणदलिकस्य प्रक्षेपात्। स च प्रथमसमयकृत-द्वितीयाद्यवान्तरकिट्टिषु प्रथमसमयकृतप्रथमाऽवान्तरकिट्टिसदृशासु कृतास्वेव सुज्ञो भवतीति हेतोः प्रदेशानाश्रित्य प्रथमसमयकृतद्वितीयाद्यवान्तरकिट्टयः प्रथमसमयकृतप्रथमाऽवान्तरकिट्टितुल्याः क्रियन्ते। तदेवमधस्तनशीर्षचयदलस्य कल्पना सार्थका।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२) **अधस्तनाऽवान्तरकिट्टिदलम्**–प्रथमसमयकृतद्वितीयाद्यवान्तरकिट्टिष्वधस्तनशीर्षचयदले प्रक्षिप्ते प्रथमसमयकृताः सर्वा अवान्तरकिट्टयस्तुल्यप्रदेशका भवन्ति । प्रदेशापेक्षया तत्सदृशाः प्रथमसमयकृताऽवान्तरकिट्टीनामसंख्येयभागप्रमिता अपूर्वाऽवान्तरकिट्टयः प्रथमसमयकृततत्तत्संग्रहकिट्टिप्रथमाऽवान्तरकिट्टया अधस्तात् स्थापयितव्याः । स्थापितायामेकैकस्यामवान्तरकिट्टौ यद्दलं भवति, तदधस्तनाऽवान्तरकिट्टिदलमुच्यते । तच्च सकलमपूर्वाऽवान्तरकिट्टिराशिगुणितप्रथमसमयकृतप्रथमाऽवान्तरकिट्टिगतदलप्रमाणं भवति ।

(३) **उभयचयदलम्**–अधस्तनशीर्षचयदलिकेऽधस्तनाऽवान्तरकिट्टिदलिके च प्रक्षिप्ते सर्वाः पूर्वाऽपूर्वा अवान्तरकिट्टयः समानदलिका जायन्ते । तासां दलिकं गोपुच्छाकारं कर्तुं चरमाऽवान्तरकिट्टयामेकचयमात्रं दलं प्रक्षिपति, द्विचरमाऽवान्तरकिट्टौ द्वौ चयौ, त्रिचरमाऽवान्तरकिट्टौ त्रींश्चयान् प्रक्षिपति, एवंक्रमेण द्वितीयसमयनिर्वर्त्यमानप्रथमापूर्वाऽवान्तरकिट्टौ पूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति । एकचयमितं दलमुभयचयदलमुच्यते, पूर्वापूर्वस्वभयास्ववान्तरकिट्टिषु प्रक्षिप्यमाणत्वात् । सर्वाऽवान्तरकिट्टिषु निक्षिप्तानां सर्वचयानां दलं सर्वोभयचयदलं भवति । न चोभयचयः कुतः कल्प्यते ? इति वाच्यम्, यतः सर्वाः पूर्वाऽपूर्वाऽवान्तरकिट्टयः प्रदेशापेक्षया सत्कर्मणि समाना न विद्यन्ते, किन्तु गोपुच्छाकारेण, पूर्वापूर्वाऽवान्तरकिट्टिषु दृश्यमानदलस्य गोपुच्छाकारेण प्रतिपादित्वात् । किञ्च किट्टिकरणाद्धायाः प्रथमसमयेऽवान्तरकिट्टिषु यश्चय आसीत्, द्वितीयसमये स एव न भवति, किन्त्वसंख्येयगुणो भवति । कथमेतदवसीयते ? इति चेत्, उच्यते-प्रथमसमयकृताऽवान्तरकिट्टिषु यद् दलमासीत्, तत् तथा रचितमासीत् यथाऽवान्तरकिट्टय एकद्विगुहानिस्थानमात्रा अभविष्यंश्चेत्, प्रथमाऽवान्तरकिट्टित एकद्विगुणहानिस्थानेषु गतेषु दलिकमर्धमभविष्यत् । अत्र च द्वितीयसमये प्रथमसमयकृतसर्वोत्कृष्टप्रदेशकाऽवान्तरकिट्टितोऽसंख्येयगुणं दलमपूर्वाऽवान्तरकिट्टौ ददाति, वक्ष्यमाणैकमध्यमखण्डस्यैकाऽधस्तनाऽवावान्तरकिट्टिदलतोऽसंख्येयगुणत्वात् । अभिनवावान्तरकिट्टयस्तु पूर्वसमयतोऽसंख्येयभागमात्रा एव निर्वर्त्यन्ते, तासु च दलिकनिक्षेपं तथा करोति, यथैकद्विगुणहानिस्थानमात्राः किट्टयो-ऽभविष्यंश्चेत्, द्वितीयसमयनिर्वर्त्यमानप्रथमावान्तरकिट्टित एकद्विगुणहानिस्थानेषु गतेषु दलमर्धमभविष्यत् । एवं प्रथमसमयतो द्वितीयसमययेकैकापूर्वावान्तरकिट्टौ निक्षिप्यमाणदलस्याऽसंख्येयगुणत्वाद् द्वितीयसमये चयोऽसंख्येयगुणो भवेत्, अन्यथा प्रथमसमये यावांश्चय आसीत्, तावानेव चयो द्वितीयसमयेऽपि भवेत्, तर्ह्येकद्विगुणहानिस्थानानि पूर्वसमयापेक्षयाऽसंख्येयगुणानि कल्पयितव्यानि । तच्च नेष्टम्, एकद्विगुणहानिस्थानानां नैयत्यात् । एवं प्रथमसमयतो द्वितीयसमये चयस्याऽसंख्येयगुणत्वादुभयचयः कल्प्यते । तत्र क्रोधतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टावेकमुभयचयम्, द्विचरमाऽवान्तरकिट्टौ द्वा उभयचयौ, त्रिचरमाऽवान्तरकिट्टौ त्रीनुभयचयान् प्रक्षिपति, एवमेकोत्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृद्ध्या तावत् प्रक्षिपति, यावद् लोभप्रथमसंग्रहकिट्टिप्रथमाऽपूर्वावान्तरकिट्टिः । तेन लोभप्रथमसंग्रहकिट्टिप्रथमाऽपूर्वान्तरकिट्टौ सर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणानुभयचयान् प्रक्षिपति ।

**मध्यमखण्डदलम्**–द्वितीयसमये किट्टितया परिणमनाय गृहीतदलत उपर्युक्तदलत्रयं विशोध्याऽवशिष्टदले पूर्वापूर्वाऽवाऽन्तरकिट्टिराशिना विभक्ते लब्ध एकभागो मध्यमखण्डमुच्यते । तच्चैकैकस्यां पूर्वावान्तरकिट्टयामपूर्वावान्तरकिट्टौ च दीयते । सर्वासामवान्तरकिट्टीनां मध्यमखण्डदलं सर्वमध्यमखण्डदलमुच्यते । ननूपर्युक्तदलत्रयस्य प्रक्षेपादेव सर्वावान्तरकिट्टिषु दलिकं गोपुच्छाकारेण जातम्, तर्हि मध्यमखण्डं कुतः परिकल्प्यते ? इति चेत्, शृणुत-प्रथमसमयकृताऽवान्तर-किट्टीनामसंख्येयभागमिता एव द्वितीयसमयेऽपूर्वा अवान्तरकिट्टयो निर्वर्त्यन्ते, दलिकं च किट्टितया परिणमनाय प्रथमसमयतोऽसंख्येयगुणं गृह्यते । उपर्युक्तविभागत्रये च यद् दलं दत्तम्, तत् किट्टितया परिणमनाय गृहीतदलिकस्याऽसंख्येयभागकल्पं भवति, अधस्तनाऽवान्तरकिट्टिदल-वर्जशेषदलिकस्याऽनन्ततमभागमात्रत्वे सत्यधस्तनाऽवान्तरकिट्टिदलिकस्याऽसंख्येयभागप्रमाणत्वात् । किट्टितया परिणमनाय गृहीतसकलदलत उपर्युक्तदलत्रयं विशोध्य शेषं दलं तथा दातव्यम्, यथा गोपुच्छाकारेण रचितदलं न व्याहन्येत । अतः शेषदलं पूर्वापूर्वाऽवान्तरकिट्टिराशिना खण्डयते, खण्डने च कृते प्राप्यमाणमेकखण्डं मध्यमखण्डमुच्यते । तच्चैकैकावान्तरकिट्टौ दीयते ।

**अथोपर्युक्तदलिकचतुष्टयस्याऽल्पबहुत्वमभिधीयते**–(१) सर्वाधस्तनशीर्षचयदलं सर्वस्तोकम्, उपरितनपदानां प्रभूतत्वात् । (२) ततोऽसंख्येयगुणं सर्वोभयचयदलम् । कथमेतदवसीयते ? इति चेत्, उच्यते–प्रथमसमयेऽवान्तरकिट्टिषु यावद् दलिकमासीत्, ततोऽसंख्येयगुणं दलिकमवान्तरकिट्टिषु द्वितीयसमये भवति । चयस्य च सत्तागतदलिकानुसारित्वात् प्रदेशापेक्षया पौर्वसमयिकचयत इदानीन्तनचयोऽसंख्येयगुणो जायते । तेन सर्वाधस्तनशीर्षचयदलतः सर्वोभयचयदलमसंख्येयगुणं भवति । (३) ततः सर्वाऽधस्तनावान्तरकिट्टिदलिकमनन्तगुणं भवति । कथम्? इति चेत्, उच्यते–एकस्यामेव प्रथमसमयकृताऽवान्तरकिट्टौ दलं सर्वाऽधस्तनशीर्षचयदलतोऽनन्तगुणं भवति, प्रथमसमयकृतप्रथमावान्तरकिट्टावेकद्विगुणहानिमात्रचयानां सद्भावात् सर्वाधस्तनशीर्षचयानां चैकद्विगुणहान्यनन्ततमभागप्रमाणत्वात् । तथा सर्वाऽधस्तनशीर्षचयदलतः सर्वोभयचयदलं केवलमसंख्येयगुणं भवति । तेन सर्वोभयचयदलतोऽपि प्रथमसमयकृतैकावान्तरकिट्टिदलमनन्तगुणं भवति । एकाऽधस्तनावान्तरकिट्टिदलं च प्रथमसमयकृतप्रथमावान्तरकिट्टिप्रदेशमात्रं भवति । तेनैकाधस्तनावान्तरकिट्टिदलमपि सर्वोभयचयदलतोऽनन्तगुणं भवति । तथैकाधस्तनावान्तरकिट्टिदलिकस्य सर्वोभयचयदलतो-ऽनन्तगुणत्वात् सर्वाऽधस्तनावान्तरकिट्टिदलिकं सर्वोभयचयदलतोऽनन्तगुणं सुतरां सिध्यति । (४) ततोऽपि सर्वमध्यमखण्डदलमसंख्येयगुणं भवति । कथमेतदवबुध्यते ? इति चेत्, शृणुत–पूर्वोक्तदलिकत्रिके प्रदत्ते सत्यवशिष्यमाणं दलं किट्टितया परिण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनाय गृहीतदलस्य बह्वसंख्येयभागकल्पं भवति, त्रिभागत्रयेऽसंख्येयभागमात्रस्यैव दलिकस्य प्रक्षिप्तत्वात् । अतः सर्वाऽधस्तनाऽवान्तरकिट्टिदलतोऽसंख्येयगुणं सर्वमध्यमखण्डदलं भवति ।

**(१) अधस्तनशीर्षचयदलस्य गणनविधिः**—प्रथमसमयकृतप्रथमाऽवान्तरकिट्टावधस्तनशीर्षचयदलं न ददाति । प्रथमसमयकृतद्वितीयावान्तरकिट्टयामेकमधस्तनशीर्षचयं प्रक्षिपति । प्रथमसमयकृततृतीयाऽवान्तरकिट्टौ द्वावधस्तनशीर्षचयौ प्रक्षिपति, चतुर्थाऽवान्तरकिट्टौ त्रीनधस्तनशीर्षचयान् प्रक्षिपति, एवंक्रमेण प्रथमसमयकृतचरमाऽवान्तरकिट्टावेकोनावान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति । अथ प्रक्षिप्यमाणाः सर्वाधस्तनशीर्षचयाः "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल संकलिताख्या** ।" इति श्रीभास्कराचार्योक्तकरणसूत्रेण सङ्कलयितव्याः । पदं चात्रैकोनप्रथमसमयकृतावान्तरकिट्टिराशिर्बोध्यम् । ततः प्रथमसमयकृतावान्तरकिट्टिसत्कैकचयगतदले सर्वाधस्तनशीर्षचयैर्गुणिते सर्वाधस्तनशीर्षचयदलं प्राप्यते ।

न्यासः—सर्वाधस्तनशीर्षचयदलम् = सर्वाधस्तनशीर्षचयाः × प्रथमसमयकृतकिट्टिसत्कैकचयदलम्

**(२) अधस्तनाऽवान्तरकिट्टिदलगणनविधिः**—अपूर्वाऽवान्तरकिट्टिराशिना प्रथमसमयकृतप्रथमाऽवान्तरकिट्टिगतदले गुणिते सर्वाऽधस्तनाऽवान्तरकिट्टिदलं प्राप्यते ।

न्यासः—अधस्तनाऽवान्तरकिट्टिदलम्=अपूर्वाऽवान्तरकिट्टिराशिः × प्रथमसमयकृतप्रथमाऽवान्तरकिट्टिदलम्

**(३) उभयचयदलगणनविधिः**—समयद्विकेन किट्टितया परिणमनाय गृहीतदलं पदेन विभज्यते, तदा लब्धिर्मध्यमदलं भवति । मध्यमदलं चार्धीकृतैकोनपदन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां भज्यते, तदैकोभयचयदलं प्राप्यते । पदं चात्र प्रथमसमय-द्वितीयसमयकृताऽवान्तरकिट्टिराशिर्वक्तव्यम् ।

$$\text{न्यासः—मध्यमदलम्} = \frac{\text{समयद्विकेन किट्टितया परिणमनाय गृहीतदलम्}}{\text{पदम्}}$$

$$\text{एकोभयचयदलम्} = \frac{\text{मध्यमदलम्}}{\text{द्वे द्विगुणहानी} - \frac{\text{पदम्} - १}{२}}$$

अथ चरमपूर्वाऽवान्तरकिट्टावेक उभयचयो दीयते, द्विचरमपूर्वाऽवान्तरकिट्टौ द्वा उभयचयौ दीयेते, त्रिचरमपूर्वाऽवान्तरकिट्टौ त्रय उभयचया दीयन्ते, एवंक्रमेण द्वितीयसमयनिर्वर्त्यमानप्रथमावान्तरकिट्टौ सर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणा उभयचयाः प्रक्षिप्यन्ते । ते च सर्वे "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या** ।" इत्यनेन करणेन सङ्कलयितव्याः । पदं चाऽत्र सर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिर्ज्ञातव्यम् ।

$$\text{न्यासः—सर्वोभयचयाः} = (\text{पदम्} + १) \times \frac{\text{पदम्}}{२}$$

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोभयचयदलं सर्वोभयचयैर्गुण्यते, तदा सर्वोभयचयदलं प्राप्यते

न्यासः--सर्वोभयचयदलम्=(पदम्+१) × $\frac{\text{पदम्}}{२}$ × एकोभयचयदलम्

**(४) अथ मध्यमखण्डदलगणनविधिः**—द्वितीयसमये किट्टितया परिणमनाय गृहीतदलतो-ऽधस्तनशीर्षचयादिदलत्रयं विशोध्य शेषं दलं सर्वमध्यमखण्डदलं भवति। तच्च सर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिना विभज्यते, तदैकमध्यमखण्डं प्राप्यते।

**अपूर्वा-ऽवान्तरकिट्टिषु दीयमानं दलम्**—सर्वाऽपूर्वाऽवान्तरकिट्टिष्वेकैकं मध्यमखण्डमेकैकं चाऽधस्तनाऽवान्तरकिट्टिदलं च दीयते। उभयचयास्तु विषमा दीयन्ते। तथाहि-लोभप्रथमाऽपूर्वाऽवान्तरकिट्टौ सर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणा उभयचया दीयन्ते। द्वितीयाऽपूर्वावान्तरकिट्टावेकोनसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणा उभयचया दीयन्ते। एवं लोभप्रथमसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यपेक्षया विवक्षिताऽपूर्वाऽवान्तरकिट्टिर्यतिसंख्याका किट्टिर्भवति, एकोनतत्संख्यान्यून सर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणा उभयदलचयास्तस्यामपूर्वाऽवान्तरकिट्टौ दीयन्ते, अधस्तनशीर्षचयदलं त्वपूर्वावान्तरकिट्टौ न दीयते।

**पूर्वावान्तरकिट्टिषु दीयमानं दलम्**—सर्वपूर्वाऽवान्तरकिट्टिष्वेकैकं मध्यमखण्डं दीयते। तथा लोभप्रथमसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यपेक्षया यतिसंख्याका विवक्षितपूर्वाऽवान्तरकिट्टिर्भवति, एकोनतत्संख्यान्यूनसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणा उभयचयाः, तथा प्रथमपूर्वावान्तरकिट्ट्यपेक्षया यतिसंख्याका विवक्षितपूर्वाऽवान्तरकिट्टिर्भवति, एकोनतत्संख्यामिता अधस्तनशीर्षचयास्तस्यां पूर्वाऽवान्तरकिट्टौ दीयन्ते। एवं प्रथमापूर्वाऽवान्तरकिट्टावधस्तनशीर्षचयदलं न ददाति, तथा सर्वासु पूर्वाऽवान्तरकिट्टिष्वधस्तनाऽवान्तरकिट्टिदलं न ददाति।

**दृश्यमानदलम्**—अपूर्वाऽवान्तरकिट्टौ यावद्दीयमानं दलं भवति, तावदेव दृश्यमानं भवति, पुरातनदलसत्कर्माभावात्। पूर्वाऽवान्तरकिट्टौ पुनर्दीयमानं दलं पुरातनसत्तागतदलं चेत्येतयोः समुदायो दृश्यमानं दलं भवति।

**अथाधस्तनशीर्षचयदलादीनवलम्ब्य दीयमानं दलं विमृश्यते**—लोभस्य प्रथमसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टावेकमध्यमखण्डमेकाधस्तनाऽवान्तरकिट्टिदलं सर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणाश्चोभयचयाः प्रक्षिप्यन्ते।

लोभप्रथमसंग्रहकिट्टिद्वितीयाऽपूर्वाऽवान्तरकिट्टौ पुनरेकमध्यमखण्डमेकाऽधस्तनावान्तरकिट्टिदलम्, एकोनसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणाश्चोभयचया निक्षिप्यन्ते। ततस्तृतीयाऽपूर्वाऽवान्तरकिट्टौ द्व्यूनसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणा उभयचया एकमध्यमखण्डमेकाधस्तनाऽवान्तरकिट्टिदलं च निक्षिप्यन्ते, एवमनन्तरानन्तरेण लोभप्रथमसंग्रहकिट्टितृतीयाद्यपूर्वाऽवान्तर-

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

किट्टिष्वेकैकेन न्यूना उभयचयाः प्रक्षिप्यन्ते । एकोभयचयदलस्यैकाऽवान्तरकिट्टिगतदलानन्तभागमात्रत्वाल्लोभप्रथमसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टिप्रभृतिचरमाऽपूर्वाऽवान्तरकिट्टिपर्यवसानास्वपूर्वाऽवान्तरकिट्टिषु दीयमानं दलं पूर्वपूर्वतोऽनन्ततमभागेन हीनं भवति ।

ततः परं लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टावेकमध्यमखण्डं लोभप्रथमसंग्रहकिट्टिसर्वाऽपूर्वाऽवान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिमिताश्चोभयचया दीयन्ते, अधस्तनाऽवान्तरकिट्टिदलमधस्तनशीर्षचयदलं च तस्यां न दीयते । इत्थं लोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टौ दीयमानं दलमेकाधस्तनाऽवान्तरकिट्टिदलेनैकेन चोभयचयेन हीनं भवति । तत्रैकाधस्तनाऽवान्तरकिट्टिदलमसंख्येयभागप्रमितं भवति, एकमध्यमखण्डदलस्यैकाधस्तनावान्तरकिट्टिदलतोऽसंख्येयगुणत्वात् । एकोभयचयगतदलं च लोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वावान्तरकिट्टौ दीयमानसकलदलस्याऽनन्ततमभागप्रमाणं भवति । तेन लोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टौ दत्तदलतोऽसंख्येयभागेनाऽनन्ततमभागेन च हीनं दलं लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टौ दीयते, अनन्ततमभागस्य चाऽसंख्येयभागेऽन्तर्गतत्वाद् लोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टावसंख्येयभागेन हीनं दलं दीयते ।

ततः परं लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वाऽवान्तरकिट्टावेकमध्यमखण्डमेकाधिकलोभप्रथमसंग्रहकिट्टयपूर्वाऽवान्तरकिट्टिराशिन्यून-सर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणा उभयचया एकाधस्तनशीर्षचयदलं च दीयन्ते । अत्र लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टित एकोभयचयेन हीनमेकाधस्तनशीर्षचयेन चाऽधिकं दीयमानं दलं जातम् । तेन लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वाऽवान्तरकिट्टावेकाधस्तनशीर्षचयगतदलन्यूनोभयचयेन हीनं दलं दीयते । उभयचयगतदलस्य लोभप्रथमसंग्रहकिट्टिप्रथमाऽपूर्वावान्तरकिट्टौ दत्तदलानन्ततमभागमात्रत्वादेकाधस्तनशीर्षचयन्यूनोभयदलचयगतदलमप्यनन्ततमभागमात्रं भवति । इत्थं लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वाऽवान्तरकिट्टावनन्तभागेन हीनं दीयमानं दलं भवति । एवमनन्तरानन्तरेण तावद् वक्तव्यम्, यावद् लोभप्रथमसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टिः । तेन लोभप्रथमसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टावेकमध्यमखण्डमेकोनलोभप्रथमसंग्रहकिट्टिपूर्वाऽपूर्वाऽवान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणा उभयचया एकोनलोभप्रथमसंग्रहकिट्टिपूर्वाऽवान्तरकिट्टिराशिप्रमाणाश्चाऽधस्तनशीर्षचयाः प्रक्षिप्यन्ते ।

इदन्त्ववधेयम्-यद्यप्युत्तरोत्तराऽपूर्वावान्तरकिट्टावुत्तरोत्तरपूर्वाऽवान्तरकिट्टौ चाऽनन्ततमभागेन हीनं दलं दीयते, तथाप्यपूर्वाऽवान्तरकिट्टिषु हीयमानोऽनन्ततमभाग उभयचयप्रमाणो भवति, पूर्वाऽवान्तरकिट्टिषु तु हीयमानोऽनन्ततमभाग एकाऽधस्तनशीर्षचयन्यूनोभयचयमात्रो भवति ।

**लोभस्य प्रथमसंग्रहकिट्टौ दीयमानदलं विमृश्य लोभद्वितीयसंग्रहकिट्टौ दीयमानं दलं चिन्त्यते**—लोभद्वितीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यामेकमध्यमखण्डमेकाधस्तनावान्तरकिट्टिदलं लोभप्रथमसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणाश्चोभयचयाः प्रक्षिप्यन्ते। इत्थं लोभप्रथमसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टितो द्वितीयसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टावेकोभयचयेनैकोनलोभप्रथमसंग्रहकिट्टिसर्वपूर्वाऽवान्तरकिट्टिराशिप्रमिताऽधस्तनशीर्षचयैश्च हीनमेकाधस्तनाऽवान्तरकिट्टिदलेन पुनरधिकं दलं दीयते। अत्रोभयचयगतदलं लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टौ दत्तदलस्याऽनन्ततमभागमात्रं भवति। तथैव चरमपूर्वावान्तरकिट्टौ दत्ताऽधस्तनशीर्षचयगतदलमप्यनन्ततमभागमात्रं भवति। तथोभयोः कलापोऽप्यनन्ततमभागमात्रमेव भवति। अधस्तनावान्तरकिट्टिदलं त्वसंख्येयभागमात्रं भवति, अधस्तनावान्तरकिट्टिदलतो दीयमानमध्यमखण्डदलस्याऽसंख्येयगुणत्वात्। तेन लोभप्रथमसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टौ दत्तदलतो लोभद्वितीयसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टावसंख्येयभागेनाधिकमनन्ततमभागेन च हीनं दलं दीयते, अनन्ततमभागस्य स्वल्पत्वेन तस्मिन् व्यवकलितेऽपि लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टावसंख्येयभागेनाधिकं दलं दीयते।

लोभद्वितीयसंग्रहकिट्टिद्वितीयापूर्वावान्तरकिट्टावेकमध्यमखण्डमेकाधस्तनावान्तरकिट्टिदलमेकाधिकलोभप्रथमसंग्रहकिट्टिपूर्वापूर्वकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणाश्चोभयचयाः प्रक्षिप्यन्ते। तेन लोभद्वितीयसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिद्वितीयाऽपूर्वाऽवान्तरकिट्टावेकोभयचयेन हीनं दलं दीयते। एकोभयचयदलस्य चाऽनन्तरपूर्ववर्त्यवान्तरकिट्टौ दत्तदलाऽनन्ततमभागमात्रत्वादनन्तरपूर्ववर्त्यवान्तरकिट्टौ दत्तदलतो-ऽनन्ततमभागेन हीनं दलं दीयते। एवमनन्तरानन्तरेण तावद् वक्तव्यम्, यावद् लोभद्वितीयसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टिः।

ततः परं लोभद्वितीयसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्ट्यां लोभप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणाधस्तनशीर्षचयन्यूनैकोभयचयाऽधिकैकाधस्तनावान्तरकिट्टिदलमात्रेणाऽसंख्येयभागेन हीनं दीयते, यतो लोभद्वितीयसंग्रहकिट्टिचरमापूर्वावान्तरकिट्ट्यामेकमध्यमखण्डमेकोनलोभप्रथमसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिद्वितीयसंग्रहकिट्ट्यपूर्वावान्तरकिट्टिराशिविरहितसर्वावान्तरकिट्टिराशिप्रमाणानुभयचयांश्च प्रक्षिपति स्म, लोभद्वितीयसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्ट्यां त्वेकं मध्यमखण्डं लोभप्रथमसंग्रहकिट्टिपूर्वापूर्वाऽवान्तरकिट्टिद्वितीयसंग्रहकिट्ट्यपूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् लोभप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणाधस्तनशीर्षचयांश्च निक्षिपति।

ततः परं लोभप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिवदनन्तरानन्तरेणैका-ऽधस्तनशीर्षचयन्यूनैको-

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

भयचयमात्रेणाऽनन्ततमभागेन हीनं दलं तावद् दीयते, यावद् लोभद्वितीयसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टिः ।

ततः परं लोभतृतीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यां लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टित एकोनलोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणाधस्तनशीर्षचययुक्तैकोभयचयदलन्यूनैकाधस्तनाऽवान्तरकिट्टिदलमात्रेणाऽसंख्येयभागेनाधिकं दलं दीयते । यतो लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्ट्यामेकं मध्यमखण्डमेकोनलोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् एकन्यूनलोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणानधस्तनशीर्षचयांश्च प्रक्षिपति स्म, तृतीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्टौ त्वेकं मध्यमखण्डं लोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणानुभयचयांस्तथैकाधस्तनावान्तरकिट्टिदलं प्रक्षिपति ।

ततः परं लोभप्रथमसंग्रहकिट्ट्यपूर्वावान्तरकिट्टिवदुत्तरोत्तरावान्तरकिट्ट्यामेकोभयचयप्रमाणेनाऽनन्ततमभागेन हीनं प्रदेशाग्रं तावद् दीयते, यावद् लोभतृतीयसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टिः ।

ततः परं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्ट्यां लोभतृतीयसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणाऽधस्तनशीर्षचयन्यूनैकोभयचयाधिकैकाधस्तनावान्तरकिट्टिदलप्रमाणेनाऽसंख्येयभागेन हीनं दलिकं प्रक्षिप्यते, यतो लोभतृतीयसंग्रहकिट्टिचरमापूर्वावान्तरकिट्ट्यामेकं मध्यमखण्डं लोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराश्येकोनलोभतृतीयसंग्रहकिट्ट्यपूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणानुभयचयानेकाधस्तनावान्तरकिट्टिदलं चादात्, लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ त्वेकं मध्यमखण्डं लोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिलोभतृतीयसंग्रहकिट्ट्यपूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् लोभप्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिमात्राधस्तनशीर्षचयाँश्च प्रक्षिपति ।

ततः परं लोभप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिवदुत्तरोत्तरावान्तरकिट्ट्यामधस्तनशीर्षचयन्यूनोभयचयप्रमाणेना-ऽनन्ततमभागेन हीनं दलिकं तावद् ददाति, यावद् लोभतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः। अनयैव रीत्या माया-मान-क्रोधानां संग्रहकिट्ट्यवान्तरकिट्टिषु दीयमानदलस्य क्रमो वाच्यः । इदमत्रावधेयम्— यथा लोभप्रथमसंग्रहकिट्ट्यामपूर्वावान्तरकिट्ट्याः पूर्वावान्तरकिट्ट्याश्च सन्धौ सति चरमाऽपूर्वावान्तरकिट्टितः प्रथमपूर्वावान्तरकिट्ट्यां दलिकमुभयचयाधिकाधस्तनावान्तरकिट्टिदलप्रमाणेनाऽसंख्येयभागेन हीनं दीयते, न तथा शेषास्वेकादशसंग्रहकिट्टिषु, किन्तु किञ्चिन्न्यूनैकाधस्तनावान्तरकिट्टिदलप्रमाणेना-ऽसंख्येयभागेन हीनं दीयते, तत्र प्रथमपूर्वावान्तरकिट्ट्यामधस्तनशीर्षचयानामपि प्रक्षेपात् । तथा सर्वत्र पूर्वावान्तरकिट्ट्या अपूर्वावान्तरकिट्ट्याश्च सन्धौ सति पूर्ववर्तिसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टित उत्तरवर्तिसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यां दलं

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

किञ्चिन्न्यूनैकाधस्तनावान्तरकिट्टिदलप्रमाणेनाऽसंख्येयभागेनाधिकं दीयते। शेषास्वनन्तासु पूर्वावान्तरकिट्टिषु यथोत्तरमेकाधस्तनशीर्षचयन्यूनोभयचयमात्रेणाऽनन्तभागेना-ऽपूर्वावान्तरकिट्टिषु च यथोत्तरमुभयचयप्रमाणेनाऽनन्ततमभागेन न्यूनं दलिकं दीयते। तथाऽपूर्वावान्तरकिट्ट्याः पूर्वावान्तरकिट्ट्याश्च सन्धिस्थानानि द्वादश, पूर्वावान्तरकिट्ट्यपूर्वावान्तरकिट्ट्योश्च सन्धिस्थानान्येकादश भवन्ति। तेन दीयमानदलिकमाश्रित्यासंख्येयभागहानिस्थानानि द्वादश, असंख्येयभागवृद्धिस्थानानि चैकादश भवन्ति। तथा दीयमानदलिकापेक्षयाऽनन्तभागहानिस्थानान्यनन्तानि भवन्ति, पूर्वापूर्वावान्तरकिट्टीनामनन्तत्वात्।

**अथाऽधस्तनशीर्षचयादिदलिकमाश्रित्य पूर्वापूर्वावान्तरकिट्टिषु दृश्यमानं दलं दर्श्यते**—अपूर्वाऽवान्तरकिट्टिषु दृश्यमानं दलं दीयमानदलतो नाऽतिरिणक्ति। तेन दीयमानदलवल्लोभप्रथमसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टिप्रभृतिलोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तर-किट्टिपर्यवसानास्वपूर्वाऽवान्तरकिट्टिष्वनन्तरानन्तरेणाऽनन्तभागेन हीनं दृश्यमानं दलं भवति।

लोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टावपि दृश्यमानं दलमनन्ततमभागेन हीनं भवति। कथमेतदवसीयते? इति चेत्, शृणुत-लोभप्रथमसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टावेकमध्यमखण्डमेकोनलोभप्रथमसंग्रहकिट्ट्यपूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणा उभयचया एकाधस्तनावान्तरकिट्टिदलं चेत्येतेषां व्रातं दीयमानं दलं भवति, तदेव च दृश्यमानं दलं भवति। लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टौ त्वेकमध्यमखण्डं लोभप्रथमसंग्रहकिट्ट्यपूर्वाऽवान्तरकिट्टिराशिन्यूनसर्वाऽवान्तरकिट्टिराशिमात्राश्च उभयचया दीयन्ते, पुरातनसत्तागतं पुनर्दलमेकाऽधस्तनाऽवान्तरकिट्टिदलप्रमाणं विद्यते। तेन दृश्यमानं दलं लोभप्रथमसंग्रहकिट्टिचरमाऽपूर्वाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टावेकोभयचयेन हीनं भवति, अधस्तनावान्तरकिट्टिदलस्थाने पुरातनसत्तागतदलस्य भावात्। एकोभयचयस्य चाऽनन्ततमभागप्रमाणत्वादनन्ततमभागेन हीनं दृश्यमानं दलं जायते।

लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टावेकमध्यमखण्डमेकाधिकलोभप्रथमसंग्रहकिट्ट्यपूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणा उभयचया एकाधस्तनशीर्षचयदलं चेत्येतद् दीयमानदलं भवति। अथ निरुक्तावान्तरकिट्टौ पुरातनसत्तागतदलस्यैकाऽधस्तनशीर्षचयदलन्यूनाऽधस्तनावान्तरकिट्टिदलमात्रत्वात् पुरातनसत्तागतदलं दीयमानदलं चेत्येतयोः समुदायो दृश्यमानदलमेकमध्यमखण्डमेकाधिकलोभप्रथमसंग्रहकिट्ट्यपूर्वाऽवान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिमात्रा उभयचया एकाधस्तनशीर्षचयदल-पुरातनसत्तागतदलयोः कलापोऽधस्तनावान्तरकिट्टिदलप्रमाणश्चेत्येतेषां समुदायो भवति। तेन लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वाऽवान्तरकिट्टौ दृश्यमानं दलमेकोभयचयेन हीनं तिष्ठति।

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

**न्यासः—**

सङ्केतसूचिः—

(१) एकमध्यमखण्डम् =म (५) लोभप्रथमसंग्रहकिट्टिपूर्वान्तरकिट्टिराशिः=पू
(२) एकाधस्तनावान्तरकिट्टिदलम् =अ (६) उभयचयाः =उ
(३) सर्वावान्तरकिट्टिराशिः =स (७) अधस्तनशीर्षचयाः =अध
(४) लोभप्रथमसंग्रहकिट्टयपूर्वावान्तरकिट्टिराशिः =अपू (८) पुरातनसत्तागतदलम् =पु

लोभप्रथमसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टौ दृश्यमानं दलम्
= म + { स—(अपू—१) }उ+ अ
= म + { स—अपू + १ }उ+ अ
लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टयां दृश्यमानं दलम्
= म + (स—अपू) उ + पु
= म + (स—अपू) उ + अ ∵ प्रथमपूर्वावान्तरकिट्टिगतपुरातनदलमधस्तनावान्तरकिट्टिदलतुल्यम्
∴ लोभप्रथमसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टौ दृश्यमानं दलमेकोभयचयेन हीनं तिष्ठति ।
तथा लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टौ दृश्यमानं दलम्
=म+{ स—(अपू+१) }उ+१अध+पु
=म+{ स—अपू—१ } उ + अ ∵ पुरातनसत्तागतदलमेकाधस्तनशीर्षचयेन न्यूनमधस्तनावान्तरकिट्टिदलप्रमाणम्
∴ लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टयां दृश्यमानं दलमुभयचयेन हीनं भवति

**ततः परमुत्तरोत्तरावान्तरकिट्टौ दृश्यमानं दलमेकोभयचयेन हीनं तावद् वक्तव्यम्, यावद् लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः । इह यद्यपि पूर्वपूर्वत उत्तरोत्तरावान्तरकिट्टौ दीयमानदलमेकाधस्तनशीर्षचयन्यूनैकोभयचयेन हीनं भवति, तथाप्युत्तरोत्तरावान्तरकिट्टयामेकोभयचयेन हीनं दलं दृश्यमानं भवति, पूर्वसमयकृतास्ववान्तरकिट्टिषु यथोत्तरं पुरातनसत्तागतदलस्यैकैकाधस्तनशीर्षचयेन हीनत्वात् ।**

**न्यासः—** सङ्केतसूचिः पूर्ववद् बोध्या ।

| | |
|---|---|
| प्राक्तनपूर्वावान्तरकिट्टितो निक्षेपमाश्रित्योत्तरपूर्वावान्तरकिट्टौ हीयमानं दलम् | = १उ—१अध |
| ,, ,, किट्टितः पुरातनसत्तामाश्रित्योत्तरपूर्वावान्तरकिट्टौ ,, ,, | = १अध |
| ∴ ,, ,, किट्टित उत्तरोत्तरपूर्वावान्तरकिट्टौ हीयमानं दलम् | = १अध+१उ—१अध |
| ∴ ,, ,, ,, ,, ,, ,, ,, ,, | = १उ |

**अथ लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्टयां दृश्यमानं दलमेकोभयचयेन हीनं भवति । कथम् ? इति चेत्, उच्यते—लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टयामेकमध्यमखण्डमेकोनलोभप्रथमसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिमात्रा उभयचया एकोनलोभप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिमात्राश्चाऽध-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## किट्टिकरणाद्धाद्वितीयसमये दीयमानदलप्ररूपणा




सङ्केतस्पष्टीकरणम्—

अपू=अपूर्वावान्तरकिट्टयः, ताश्च तत्तत्संग्रहकिट्टया अधस्तात् निर्वर्त्यन्ते, परमार्थतोऽनन्ताः पूर्वावान्तरकिट्टीनाञ्चासंख्येयभागप्रमाणा भवन्ति, इह द्वे एव दर्शिते, प्रभूतावकाशाभावात् ।

पू=पूर्वावान्तरकिट्टयः, ताश्च किट्टिकरणप्रथमसमये निर्वर्त्यन्ते । परमार्थतोऽनन्ता अपूर्वावान्तरकिट्टितश्चाऽसंख्येयगुणा भवन्ति, इहाऽसत्कल्पनयाऽपूर्वावान्तरकिट्टिभ्यां तुल्ये द्वे एव दर्शिते, प्रभूतावकाशाभावात् ।

०=अनेन चिह्नेन अधस्तानावान्तरकिट्टिदलं सूचितम्, तच्च लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलप्रमाणं भवति । अधस्तनावान्तरकिट्टिदलमेकैकस्यामपूर्वावान्तरकिट्टौ ददाति ।

---अनेन चिह्नेन मध्यमखण्डदलं सूचितम्, तच्च सर्वासु पूर्वापूर्वावान्तरकिट्टिषु ददाति, परमार्थत एकमध्यमखण्डदलं लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलतोऽसंख्येयगुणं भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

△ अनेन चिह्नेनोभयचयदलं सूचितम्, लोभप्रथमसंग्रहकिट्टयाः प्रथमापूर्वावान्तरकिट्टौ पूर्वापूर्वावान्तरकिट्टिराशिप्रमाणान् अनन्तान् असत्कल्पनया त्वष्टचत्वारिंशद् (४८) उभयचयान् प्रक्षिपति। ततो यथोत्तरमेकैकेन हीनानुभयचयान् प्रक्षिपति। तेषु प्रक्षिप्तेषु सर्वा अवान्तरकिट्टयः प्रदेशापेक्षया गोपुच्छाकारेण संस्थिता भवन्ति।

...अनेन चिह्नेन पूर्वावान्तरकिट्टिषु पुरातनसत्तागतदलं सूचितम्, तच्चोत्तरोत्तरपूर्वावान्तरकिट्टौ विशेषहीनक्रमेण भवति।

× अनेन चिह्नेन अधस्तनशीर्षचयदलं सूचितम्, लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टयामेकाधस्तनशीर्षचयं प्रक्षिपति, तत एकोत्तरवृद्धयाऽधस्तनशीर्षचयान् पूर्वावान्तरकिट्टिषु तावन् प्रक्षिपति, यावन् क्रोधतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः, तेनाऽसत्कल्पनया क्रोधतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टौ त्रयोविंशतिमधस्तनशीर्षचयान् प्रक्षिपति। अधस्तनशीर्षचयदले प्रक्षिप्ते सर्वाः पूर्वावान्तरकिट्टयो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिप्रदेशतुल्यप्रदेशका भवन्ति।

**दीयमानदलनिरूपणम्—**

लोभप्रथमसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्टौ दीयमानम् ०। △इत्यनेन सूचितं दलं प्रभूतं भवति। ततो विशेषहीनक्रमेण दीयमानमनन्तास्वपूर्वावान्तरकिट्टिषु भवति, इह द्वे एवाऽपूर्वावान्तरकिट्टी परिकल्पिते, तेनैकस्यामपूर्वावान्तरकिट्टौ विशेषहीनं दीयमानं दलं भवति। ततोऽसंख्येयभागहीनम्। △ इत्यनेन सूचितं दीयमानं दलं लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ भवति, ततो विशेषहीनम् ×। △ इत्यनेन सूचितं दीयमानं दलं लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टौ भवति। एवं क्रमेणाऽग्रेऽपि दलिकनिक्षेपो वक्तव्यः।

दृश्यमानं दलं तूत्तरोत्तरावान्तरकिट्टौ विशेषहीनक्रमेण भवति।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

स्तनशीर्षचया इत्येतावन्ति दीयमानदलिकानि तथैकोनलोभप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणावस्तनशीर्षचयदलन्यूनाऽधस्तनावान्तरकिट्टिदलमात्राणि पुरातनसत्तागतदलानीत्येतेषां समुदायो दृश्यमानं दलं भवति । लोभद्वितीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यां त्वेकं मध्यमखण्डमेकाधस्तनावान्तरकिट्टिदलं लोभप्रथमसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वावान्तरकिट्टिराशिप्रमाणाश्चोभयचया इत्येतेषां व्रातो दृश्यमानं दलं भवति । तेन लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यां दृश्यमानं दलमेकेनोभयचयेन हीनं सम्पद्यते ।

न्यासः—सङ्केतसूचिः पूर्ववद् बोद्धव्या ।

लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टौ दृश्यमानं दलम्

=म+{ स—(अपू+पू—१) }-उ+( पू--१) अध+पु

=म+{ स—(अपू+पू--१) }-उ+(पू--१) अध+अ--(पू--१) अध ∵ पु=अ--(पू--१) अध

=म+{ स—(अपू+पू—१) }-उ+अ

=म+{ स—अपू—पू+१ }-उ+अ

लोभद्वितीयसंग्रहप्रथमापूर्वावान्तरकिट्टौ तु दृश्यमानं दलम्

=म+{ स—( अपू+पू ) }-उ+अ

म+{ स—अपू--पू ) }-उ+अ

∴ लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमापूर्वावान्तरकिट्ट्यामुभयचयेन हीनं दृश्यमानं दलं भवति ।

ततः परं लोभप्रथमसंग्रहकिट्टिवल्लोभद्वितीयसंग्रहकिट्टावप्युत्तरोत्तराऽवान्तरकिट्टावेकैकोभयचयेन न्यूनं न्यूनतरं दलं तावद् दृश्यते, यावल्लोभद्वितीयसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टिः ।

ततो लोभद्वितीयसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमाऽपूर्वाऽवान्तरकिट्टावेकोभयचयेन न्यूनं दृश्यमानं दलं भवति । तच्च पूर्ववद् भावनीयम् ।

ततः परं पूर्ववत् सर्वाऽवान्तरकिट्टिषु यथोत्तरमेकैकोभयचयेन हीनं हीनतरं दृश्यमानं दलं तावद् वक्तव्यम्, यावत् क्रोधतृतीयसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टिः ।

इत्थं द्वादशसंग्रहकिट्टिसर्वाऽवान्तरकिट्टयः प्रदेशाग्रमाश्रित्य पूर्वपूर्वतोऽनन्ततमभागेन न्यूना न्यूनतरास्तिष्ठन्ति, गोपुच्छाकारेण विद्यन्त इत्यर्थः । पश्यन्तु पाठका यन्त्रकम्–१७॥ इति ॥१०४॥

किट्टिषु दीयमानं दृश्यमानं च दलं निरूप्य सम्प्रति नरकगत्यादिमध्यात् कतिषु मार्गणासु बद्धप्रदेशाग्रं किट्टिकारकाणां किट्टिवेदकानां च किट्टिषु नियमतो वा भजनया वा विद्यते ? इति परप्रश्नं समाधातुकाम आदौ यासु मार्गणासु बद्धकर्मदलं नियमतः सत्तायां विद्यते, ताः संगृह्य प्राह—

**नरतिरियइगपणिंदितसदुओरालियसरीरजोगेसु ।**
**मणवयजोगचउक्के नपुंचउकसायमग्गणासुं य ॥१०५॥ (गीतिः)**

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

**णाणाणाणदुगाविरइसामइअचक्खुदुगछलेसासु ।**
**भवमिच्छुवसमवेयगखाइअसम्मेसु सण्णिइयरासु ॥१०६॥ (गीतिः)**
**आहारम्मि य बद्धपएसा होअन्ति णियमत्तो ।**
**किट्टीकाराणं किट्टिवेअगाणं य संतम्मि ॥१०७॥ (उपगीतिः)**

नरतिर्यगेकेन्द्रियपञ्चेन्द्रियत्रसद्वयौदारिकशरीरयोगेषु ।
मनोवचोयोगचतुष्के नपुंचतुष्कषायमार्गणासु च ॥१०५॥
ज्ञानाऽज्ञानद्विकाऽविरतिसामायिकचक्षुर्द्विकषट्लेश्यासु ।
भव्यमिथ्यात्वोपशमवेदकक्षायिकसम्यक्त्वेषु संज्ञीतरयोः ॥१०६॥
आहारे च बद्धप्रदेशा भवन्ति नियमतः ।
किट्टिकाराणां किट्टिवेदकानां च सत्तायाम् ॥१०७॥ इति पदसंस्कारः ।

**'नर०'** इत्यादिना नरप्रभृतिमार्गणास्थानेषु बद्धकर्मप्रदेशाः किट्टिकाराणां किट्टिवेदकानां च सत्तायां नियमतो वर्तन्त इति सूचितम् । इह विशेषनिर्देशाभावेऽपि मनुष्यादिमार्गणासु बद्धमोहनीयदलस्यैव प्ररूपणाऽवसेया, किट्टिप्ररूपणायाः प्रस्तुतत्वात् किट्टिषु च मोहनीयप्रदेशाग्रस्यैव भावात् । अत्र चेयं मार्गणास्थानप्रतिपादिका गाथा—

**"गइइंदिए य काए जोए वेए कसायनाणे य ।**
**संजमदंसणलेसा भवसम्मे सन्निआहारे । ॥१॥"**

तत्र गतिश्चतुर्धा, नरक-तिर्यग्-नर-देवगतिभेदात् । इन्द्रियं पञ्चधा, स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्रभेदात् । इन्द्रियग्रहणेन च तदुपलक्षिता एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रिया ग्राह्याः । कायः षोढा, पृथिव्यप्तेजोवायुवनस्पतित्रसकायभेदात् । योगः पञ्चदशविधः, सत्यमनोयोगोऽसत्यमनोयोगः सत्यासत्यमनोयोगोऽसत्यामृषमनोयोगः सत्यवाग्योगोऽसत्यवाग्योगः सत्यासत्यवाग्योगोऽसत्यामृषवाग्योगो वैक्रियकाययोगो वैक्रियमिश्रकाययोग आहारककाययोग आहारकमिश्रकाययोग औदारिककाययोग औदारिकमिश्रकाययोगः कार्मणकाययोगश्चेति । वेदस्त्रिविधः, स्त्रीपुरुषनपुंसकवेदभेदात् । कषायश्चतुर्धा, क्रोध-मान-माया-लोभभेदात् । ज्ञानं पञ्चधा, मतिज्ञान-श्रुतज्ञाना-ऽवधिज्ञान-मनःपर्यायज्ञान-केवलज्ञानभेदात् । ज्ञानग्रहणेन चाज्ञानमपि तत्प्रतिपक्षभूतमुपलक्ष्यते । तच्च त्रिविधम्, मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानभेदात् । इत्थं ज्ञानमार्गणास्थानमष्टधा । संयमः=चारित्रम्, स च पञ्चधा, सामायिकसंयमः छेदोपस्थापनसंयमः परिहारविशुद्धिकसंयमः सूक्ष्मसम्परायसंयमो यथाख्यातसंयमश्चेति, संयमग्रहणेन तद्देशभूतस्तत्प्रतिपक्षभूतश्च यथाक्रमं देशसंयमोऽसंयमश्चोपलक्ष्यत इति संयममार्गणास्थानं सप्तधा । दर्शनं चतुर्विधम्, चक्षुरचक्षुरवधिकेवलदर्शनभेदात् । लेश्या षड्विधा, कृष्ण-नील-कापोत-तेजः-पद्म-शुक्ललेश्याभेदात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भव्यः=सिद्धिगमनयोग्यः, भव्यग्रहणेन तत्प्रतिपक्षभूतोऽभव्योऽपि ग्राह्यः। तेन भव्यमार्गणास्थानं द्विविधं बोद्धव्यम्। सम्यक्त्वं त्रिविधम्, क्षायिकौपशमिकक्षायोपशमिकभेदात्। सम्यक्त्वग्रहणेन तत्प्रतिपक्षभूतं मिश्रं सास्वादनं मिथ्यात्वं च गृह्यते। इत्थं सम्यक्त्वमार्गणास्थानं षोढा। संज्ञी विशिष्टस्मरणादिरूपमनोविज्ञानसहितेन्द्रियपञ्चकसमन्वितः, तत्प्रतिपक्षभूत एकेन्द्रियादिरूपोऽसंज्ञी। सोऽपि संज्ञिग्रहणेन सूचितः। इत्थं संज्ञिमार्गणास्थानं द्विविधम्। आहारयति=गृह्णात्योजआहार-लोमाहार-कवलाहाराणामन्यतममित्याहारः, आहारक इत्यर्थः, आहारकग्रहणेन तत्प्रतिपक्षभूतमनाहारकमार्गणास्थानमपि ग्राह्यम्। तेनाऽऽहारकमार्गणास्थानं द्विविधम्।

इत्थं चतुर्दशमूलमार्गणास्थानानामेतान्युत्तरमार्गणास्थानानि चतुःसप्ततिर्भवन्ति। ग्रन्थान्तरे तानि द्वाषष्टिरुक्तानि, अत्र तु योगमार्गणाया उत्तरमार्गणास्थानानां पञ्चदशानां भावितत्वाद् द्वादशभिरधिकान्यभिहितानि। मार्गणानां विशेषप्रतिपत्तये त्वस्मद्गुरुचरणकृत-**मार्गणाद्वारविवरणा**ख्यग्रन्थोऽवलोकनीयः, तत्र विस्तरेण मार्गणानां व्याख्यातत्वात्।

अथ प्रकृतमनुसरामः—नरादयः कृतद्वन्द्वाः सप्तम्या निर्दिष्टाः। नरः-मनुष्यगतिः, तिर्यग्-तिर्यग्गतिः,इन्द्रियशब्दः प्रत्येकं सम्बध्यते,"**द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते।**" इति न्यायात्। ततश्चायमर्थः–एकेन्द्रियः, पञ्चेन्द्रियः, त्रसः-त्रसकायः, द्वयौदारिकशरीरयोगौ-औदारिककाययोगौदारिकमिश्रकाययोगलक्षणौ च,तत इतरेतरद्वन्द्वसमासः,तेषु, '**मणवयजोगचउक्के**' त्ति चतुष्कपदं प्रत्येकं सम्बध्यते, मनोयोगचतुष्के=सत्या-ऽसत्यसत्यासत्याऽसत्यामृषलक्षणे, वचोयोगचतुष्के=सत्याऽसत्यसत्यासत्याऽसत्यामृषलक्षणे च '**नपुंचउकसायमग्गणासु य**' त्ति 'नपुंचतुष्कषायमार्गणासु च' नपुंसकवेदमार्गणायां क्रोध-मान-माया-लोभलक्षणचतुष्कषायमार्गणासु, चकारः समुच्चयार्थः, '**णाणा०**' इत्यादि, द्विकशब्दः प्रत्येकं सम्बध्यते। ततश्चायमर्थः–ज्ञानद्विकं=मतिज्ञानश्रुतज्ञानलक्षणम्, अज्ञानद्विकं मत्यज्ञान-श्रुताज्ञानलक्षणम्, अविरतिः, सामायिकः, चक्षुर्द्विकं–चक्षुर्दर्शनाऽचक्षुर्दर्शनलक्षणम्, षड्लेश्याः कृष्णनीलकापोततेजःपद्मशुक्ललेश्यारूपाः, तत इतरेतरद्वन्द्वसमासः, तासु, '**भव०**' इत्यादि, भव्यो=भव्यमार्गणास्थानम्, मिथ्यात्वं=मिथ्यात्वमार्गणास्थानम्, अतः परं सम्यक्त्वपदं प्रत्येकं योज्यम्, उपशमसम्यक्त्वम्=औपशमिकसम्यक्त्वम्, वेदकसम्यक्त्वं=क्षायोपशमिकसम्यक्त्वापरपर्यायम्, क्षायिकसम्यक्त्वम्, तत इतरेतरद्वन्द्वसमासः, तेषु, '**सण्णिइयरासु**' त्ति 'संज्ञीतरयोः' संज्ञ्यसंज्ञिनोः 'आहारे' आहारकमार्गणास्थान इत्यर्थः, चकारः समुच्चयार्थः, सर्वसंख्यया द्वाचत्वारिंशन्मार्गणास्थानेषु (४२) '**बद्धपएसा**' इत्यादि, 'बद्धप्रदेशाः' बद्धमोहनीयकर्मप्रदेशाः, '**किट्टिकाराणां**' किट्टीः कुर्वते-निर्वर्तयन्त इति किट्टिकाराः "**कर्मणोऽण्**" (सिद्धहेम० ५-१-७२) इति सूत्रेण कर्तरि अण्प्रत्ययः, तेषाम्,'**किट्टिवेयगाणं**' ति, वेदयन्ति-अनुभवन्तीति वेदकाः, "**णकतृचौ**" (सिद्धहेम० ५-१-४८) इति सूत्रेण कर्तरि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णकप्रत्ययः, किट्टीनां वेदकाः=किट्टिवेदकाः, अत्र **"कर्मजा तृचा च"** (सिद्धहेम०-३-१-८३) इति सूत्रेण षष्ठीसमासे प्रतिषिद्धेऽपि याजकादेराकृतिगणत्वात् **"याजकादिभिः"** (सिद्धहेम०३-१-७८) इत्यनेन षष्ठीसमासः। यद्वा कर्मणोऽविवक्षायां वेद्यवेदकभावलक्षणसम्बन्धमात्रे किट्टिशब्दात् **"शेषे"** (सिद्धहेम० २-२-८१) इत्यनेन षष्ठी विभक्तिः। ततः सम्बन्धषष्ठ्याः **"षष्ठ्ययत्नाच्छेषे"** (सिद्धहेम० ३-१-७६) इत्यनेन सूत्रेण समासः, तेषाम्, चकारः समुच्चयार्थः, **'संतम्मि'** त्ति गाथायां निर्देशो भावप्रधानः, तस्मात् **'संतम्मि'** इत्यनेन सत्ता व्याख्येया, सत्तायां भवन्ति।

भावार्थः पुनरयम्–विवक्षितकाले बद्धकर्मदलिकमुद्वर्तनाकरणेनोपर्युपरि गत्वोत्कृष्टतः कर्माऽवस्थानकालं यावत् सत्तायां विद्यते। ततः परमवश्यमेव निर्जीर्णं भवति, तथा विवक्षितकाले बद्धकर्मदलिकमुद्वर्तनाकरणेनोपर्युपरि गत्वा जघन्यतोऽपि पल्योपमाऽसंख्येयभागोनकर्माऽवस्थानकालं यावद् नियमतः सत्कर्मणि तिष्ठति, वक्ष्यमाणनिर्लेपनस्थानानां केवलं पल्योपमाऽसंख्येयभागमात्रत्वात्। अयं नियमो-ऽश्रेण्यपेक्षया द्रष्टव्यः, क्षपकश्रेणौ बद्धकर्मप्रदेशाग्रस्याऽन्तर्मुहूर्तकालेनाऽपि निर्जरणात्, उपशान्तमोहादिभिश्च बद्धकर्मणः समयमात्रेण निर्जरणात्।

नन्वन्तःकोटिकोटिसागरोपमाद्यल्पस्थितिकं बद्धकर्मदलिकं जघन्यतोऽपि यावत् पल्योपमाऽसंख्येयभागोनकर्मावस्थानकालं कथं तिष्ठेत्? इति चेत्, उच्यते-बन्धकालेऽल्पस्थितिकं यत् कर्म बद्धम्, तस्य बन्धावलिकायां व्यतिक्रान्तायामुद्वर्तनाकरणेन कतिपयानि दलिकानि यथासम्भवमुपरितनस्थितिषूद्वर्तयति जीवः। उद्वर्तितदलिकेषूदयावलिकयाऽप्राप्तेषु पुनः कतिपयानि दलिकान्युपरितनासु स्थितिषूद्वर्तयति। एवंविधया पुनः पुनरुद्वर्तितानि दलिकानि पल्योपमाऽसंख्येयभागोनकर्माऽवस्थानकालमवश्यमेव सत्तायां विद्यन्ते। यद्यपि कर्मावस्थानकालेऽपवर्तनासंक्रमादीन्यपि भवन्ति, तथापि विवक्षितसमये बद्धदलिकमुद्वर्तनाकरणमाहात्म्यात् पल्योपमाऽसंख्येयभागन्यूनकर्मावस्थानकालमवश्यं तिष्ठति। ततः परं सर्वात्मना निर्जरितुमर्हति।

अथ मनुष्यगतौ बद्धमोहनीयदलं क्षपकस्य सत्तायां नियमतोऽवतिष्ठते। कथमेतदवसेयम्? इति चेत्, उच्यते-मनुष्यगतावेव क्षपकश्रेणेः संभवात् तद्भवे च बद्धकर्मदलस्य कर्माऽवस्थानकालस्याऽनतिक्रान्तत्वात् सर्वेषां क्षपकाणां सत्कर्मणि मनुष्यगतौ बद्धदलं नियमतो विद्यते।

इदमत्राऽवधेयम्–मनुष्यगतौ बद्धमोहनीयदलं सत्तायां जघन्यतोऽनन्तस्कन्धमात्रं भवति। तच्च स्तोकम्। ततोऽसंख्येयगुणं मनुष्यगतौ बद्धमोहनीयदलमुत्कृष्टतो विद्यते। तत्र पूर्वं कर्मावस्थानकाले मनुष्यत्वेनाऽपरिणम्य गत्यन्तरत आगतस्याऽथवा सकृन्मनुष्यत्वेनोत्पद्य क्रमेण कालं कृत्वा गत्यन्तरे कर्माऽवस्थानकालं ततोऽपि वाऽधिकं कालं व्यतिक्रम्य तत आगतस्य यथासंभवं क्षपितकर्मांशलक्षणयुक्तस्य शीघ्रं क्षपणोद्यतस्य सत्कर्मणि मनुष्यगतौ बद्धकर्मदलं जघन्यं संभवति। तथा कर्मावस्थानकाले गुणितकर्मांशविधिना यथासंभवमनेकवारं मनुष्यत्वेनोत्पद्य चिरेण क्षपकश्रेणिमारोहतो जीवस्य सत्तायां मनुष्यगतौ बद्धकर्मण उत्कृष्टप्रदेशाग्रं विद्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा तिर्यग्गतौ बद्धमोहनीयदलं क्षपकाणां सत्कर्मणि नियमतो वर्तते, तिर्यग्गतौ मोहनीयं बद्ध्वा ततो निर्गत्य शेषगतित्रये कर्माऽवस्थानकालस्याऽनतिक्रान्तत्वेन सर्वथा तस्य विनाशाऽदर्शनात् । तथाहि–तिर्यग्गतौ कर्मदलं बद्ध्वा ततो निर्गत्य शेषगतित्रय उत्कृष्टतः सागरोपमशतपृथक्त्वकालं भ्राम्यति । ततः परं क्षपकश्रेणिमप्राप्तो जन्तुरवश्यमेव तिर्यग्गत्यामुत्पद्यते, यतस्तिर्यग्गतेरुत्कृष्टतोऽप्यन्तरं साधिकसागरोपमशतपृथक्त्वमस्ति। तथा चोक्तं **जीवसमासवृत्ता अन्तरद्वारे श्रीमन्मलधारगच्छीयहेमचन्द्रपादैः–"तावत्तिर्यग्गतेर्निर्गत्य शेषगतित्रये पर्यटतां पुनरपि तिर्यक्त्वप्राप्तौ जघन्यतोऽन्तमुहूर्तमुत्कृष्टतस्तु सातिरेकसागरोपमशतपृथक्त्वमन्तरं भवति, सातिरेकत्वं चाल्पत्वेनेहानुक्तमपि स्वयमेव द्रष्टव्यम् ।"** इति। इत्थं क्षपकश्रेणौ वर्तमानो जन्तुः सागरोपमशतपृथक्त्वतः प्राक् तिर्यग्गतावश्यमेवाऽऽसीत् । तेन तिर्यग्गतौ बद्धदलमिदानीं तस्य जन्तोः सत्कर्मणि विद्यत एव, तत्र बद्धकर्मणः कर्माऽवस्थानकालस्य व्यतिक्रान्ताभावात् । उक्तं च **कषायप्राभृतचूर्णौ—"एदस्स खवगस्स दुगदिसमज्जिदं कम्मं णियमा अत्थि । तं जहा-तिरिक्खगदिसमज्जिदं च मणुसगदिसमज्जिदं च ।"**इति।

इदमत्रावसेयम्–तिर्यग्गतौ बद्धदलं सत्कर्मणि जघन्यतोऽनन्तस्कन्धमात्रं भवति। तच्च स्तोकम् । ततस्तिर्यग्गतौ बद्धदलं सत्कर्मण्युत्कृष्टतोऽसंख्येयगुणं विद्यते । तत्रैकेन्द्रियभवे क्षपितकर्मांशलक्षणेन कर्माऽवस्थानकालं परिपाल्य ततो निर्गत्य शेषगतिषु साधिकसागरोपमशतपृथक्त्वकालं परिभ्रम्य क्षपकश्रेणिं प्रतिपद्यमानस्य जन्तोः सत्तायां तिर्यग्गतौ बद्धकर्मदलं जघन्यतो विद्यते । तथा तिर्यग्गतावेव गुणितकर्मांशलक्षणयुक्तो यः कर्माऽवस्थानकालं व्यतिक्रमयन् प्रभूतं कर्मदलिकमुपचिनोति। स तिर्यग्गतितो निर्गत्य मनुष्यगतौ यदि शीघ्रं क्षपकश्रेणिमारभते, तर्हि तस्य जीवस्य सत्तायां तिर्यग्गतौ बद्धकर्मदलिकमुत्कृष्टं तिष्ठति । एवमग्रेऽपि यथासंभवं वक्तव्यम् ।

एकेन्द्रियमार्गणायां बद्धदलं क्षपकस्य सत्कर्मणि नियमतो विद्यते, यत एकेन्द्रियस्योत्कृष्टमप्यन्तरं सातिरेकसागरोपमसहस्रद्वयप्रमाणं समस्ति। उक्तं च **जीवसमासेऽन्तरद्वारे—"एगिंदियाण तसकालो \" इति**। तथैव **तट्टीकायामपि–"पृथिव्याद्येकेन्द्रियाणां जीवानां तद्भावं परिहृत्याऽन्यत्रोत्पन्नानां पुनरप्येकेन्द्रियत्वप्राप्तौ जघन्यतोऽन्तमुहूर्तमुत्कृष्टतस्तु त्रसकालोऽन्तरं भवति । स चेहैव ग्रन्थे पूर्वं कालद्वारे त्रसजीवकालाभिधानप्रक्रमे निर्दिष्टः सातिरेकसागरोपमसहस्रद्वयलक्षणोऽवगन्तव्यः ।"** इति । एतेन क्षपक उत्कृष्टतः सातिरेकसागरोपमसहस्रद्वयात् पूर्वमवश्यमेवैकेन्द्रियत्वेनासीत् । अतस्तत्र बद्धकर्मदलस्य कर्मावस्थानकालो नाऽतिक्रान्तः। तेन क्षपकस्यैकेन्द्रियभवे बद्धदलं सत्कर्मणि नियमतो विद्यते ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अथ पञ्चेन्द्रियमार्गणास्थाने बद्धदलं क्षपकस्य सत्कर्मणि विद्यते, क्षपकश्रेणेः पञ्चेन्द्रियत्वाऽविनाभावित्वात् ।

एवं त्रसकाये बद्धकर्मदलं क्षपकस्य सत्कर्मणि नियमतो विद्यते, क्षपकश्रेणेस्त्रसत्वाऽविनाभावित्वात् । उक्तं च **कषायप्राभृतचूर्णौ–"तसकाइयं समज्जिदं णियमा अत्थि ।"**इति।

औदारिककाययोगमार्गणायामौदारिकमिश्रकाययोगमार्गणायां चतसृषु मनोयोगमार्गणासु चतसृषु च वचनयोगमार्गणासु बद्धदलं क्षपकस्य सत्कर्मणि नियमेन विद्यते, चरमभवेऽपि निरुक्तदशयोगानां दर्शनात् । उक्तं च **कषायप्राभृते**—

**"ओरालिए सरीरे ओरालियमिस्सए च जोगे दु ।**
**चदुविधमणवचिजोगे च अभज्जा×××××॥१॥"** इति ।

तथैव **तच्चूर्णावपि–"ओरालियेण ओरालियमिस्सयेण चउव्विहेण मणजोगेण चउव्विहेण वचिजोगेण बद्धाणि अभज्जाणि ।"** इति ।

तथा नपुंसकवेदमार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो विद्यते, उत्कृष्टतोऽपि नपुंसकवेदाऽन्तरस्य साधिकसागरोपमशतपृथक्त्वमात्रत्वात् । उक्तं च **कषायप्राभृते—"×××णवुंसयए सम्मत्ते । कम्माणि अभज्जाणि××।"** इति । तथैव **तच्चूर्णावपि–"×××णवुंसयवेदेण च एवंभावभूदेण बद्धाणि णियमा अत्थि ।"** इति ।

क्रोध-मान-माया-लोभरूपचतुष्कषायमार्गणासु बद्धप्रदेशाग्रं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो वर्तते, मनुष्यभवेऽप्यन्तर्मुहूर्ततः परं कषायोदयपरावृत्तिदर्शनात् । उक्तं च **कषायप्राभृतचूर्णौ—कोहमाणमायालोभोवजुत्तेहिं बद्धाणि अभजियव्वाणि ।"**इति ।

मतिज्ञानमार्गणायां श्रुतज्ञानमार्गणायां च बद्धदलं नियमतो विद्यते, चरमभवेऽपि मतिज्ञानश्रुतज्ञानयोर्दर्शनात् । तथा मत्यज्ञानमार्गणायां श्रुताज्ञानमार्गणायां च बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो वर्तते, मिथ्यात्वसहचरितत्वात् । उक्तं च **कषायप्राभृतचूर्णौ—"सुदणाणे अण्णाणे, मदिणाणे अण्णाणे, एदेसु उवजोगेसु पुव्वबद्धाणि णियमा अत्थि ।"** इति । अत्र मत्यज्ञानश्रुताज्ञानयोर्हेतुभावना तु तयोर्मिथ्यात्वसहचरितत्वाद् वक्ष्यमाणमिथ्यात्ववत् कार्या ।

अविरतिमार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो विद्यते, वर्तमानभवेऽपि जघन्यतः साधिकवर्षाष्टकं यावदविरतिमार्गणायाः प्रवृत्तत्वात् ।

सामायिकसंयममार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमेन वर्त्तते, संयममृते क्षपकश्रेणेरसंभवात् शेषसंयमानामपि सामायिकसंयमपूर्वकत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्षुर्दर्शनमार्गणायामचक्षुर्दर्शनमार्गणायां च बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो भवति, वर्तमानभवेऽप्यनयोर्मार्गणयोः क्षपकस्य नियमतो दर्शनात् । न्यगादि च **कषायप्राभृते**–"**कम्माणि अभज्जाणि दु अणगारअचक्खुदंसणुवजोगे ।**" इति ।

कृष्णादिषट्लेश्यामार्गणासु बद्धप्रदेशाग्रं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो विद्यते, वर्तमानमनुष्यभवेऽपि लेश्याया अन्तर्मुहूर्तकालेन परावृत्तेः । उक्तं च **कषायप्राभृतचूर्णौ**—"**छसु लेसासु सादेण असादेण च बद्धाणि अभज्जाणि ।**" इति ।

भव्यमार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो वर्तते, भव्यस्यैव क्षपकश्रेण्यारोहणात् ।

मिथ्यात्वमार्गणायां बद्धदलं नियमेन किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि विद्यते । कथमेतदवसीयते, ? इति चेत् , उच्यते-संसारस्थो जन्तुर्मिथ्यात्वरहितदशायामुत्कृष्टतः साधिके द्वे षट्षष्ठी सागरोपमाणां स्थातुमर्हति, यतो मिथ्यात्वोत्कृष्टान्तरं तावन्मात्रम् । उक्तं च **पञ्चसंग्रहाऽन्तरद्वारे श्रीमन्मलयगिरिसूरिपादैः**–"**मिथ्यादृष्टेः परित्यक्तमिथ्यात्वस्य भूयस्तद्भावप्रतिपत्तावुत्कृष्टमन्तरं द्वे षट्षष्टी अतराणां-सागरोपमाणाम् । कथं द्वे षट्षष्ठी सागरोपमाणाम् ? इति चेत्, उच्यते–कश्चिन्मिथ्यादृष्टिः सम्यक्त्वमासाद्य षट्षष्टिसागरोपमाणि यावत् सम्यक्त्ववानवतिष्ठते, ततस्तदनन्तरमन्तरालेऽन्तर्मुहूर्तकालं सम्यङ्मिथ्यात्वमनुभूय भूयोऽपि षट्षष्टिसागरोपमाणि यावत् सम्यक्त्वमनुभवति । तत एतदनन्तरं कोऽपि महात्मा मुक्तिपदवीमासादयति, कोऽपि पुनरधन्यो मिथ्यात्वं प्रतिपद्यते, तत्र यो मिथ्यात्वं प्रतिपद्यते, तस्य मिथ्यात्वपरिभ्रंशकालादारभ्य भूयो मिथ्यात्वं प्रतिपद्यमानस्याऽन्तरं द्वे षट्षष्टो सागरोपमाणां भवतः । नन्वेवं सम्यङ्मिथ्यात्वसम्बन्धिनाऽन्तर्मुहूर्तेनाधिके द्वे षट्षष्टो सागरोपमाणां प्राप्येते, तत्कथमधिकृतसूत्रे ते परिपूर्णे उक्ते ? उच्यते, स्तोकत्वात्तदन्तर्मुहूर्तं न विवक्षितमित्यदोषः ।**"इति । इत्थं मिथ्यात्वोत्कृष्टाऽन्तरस्य कर्माऽत्रस्थानकालतो न्यूनत्वाद् मिथ्यात्वमार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमेन वर्तते । उक्तं च **कषायप्राभृते**–"**××मिच्छत्तणवुंसए च सम्मते, कम्माणि अभज्जाणि×××।**" इति ।

औपशमिकसम्यक्त्वमार्गणायां बद्धदलं क्षपकस्य सत्कर्मणि नियमेन विद्यते । कथमेतदवसीयते ? इति चेत्, उच्यते—**कार्मग्रन्थिकाऽभिप्रायेण** षड्विंशतिसत्कर्मा जीव औपशमिकसम्यक्त्वं लब्ध्वैव यथाक्रमं क्षायोपशमिकसम्यक्त्व-क्षायिकसम्यक्त्वेऽश्नुते । तथोत्कृष्टतो मोहनीयस्य षड्विंशतिप्रकृतिस्थानस्याऽन्तरं साधिके सागरोपमाणां द्वे षट्षष्टी प्रोक्तम् । तथा चात्र

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

**कषायप्राभृतचूर्णिः—"छव्वीसविहत्तीए केवडीयमन्तरं ? जहण्णेणं पलिदोवमस्स असंखेज्जदिभागो। उक्कस्सेण बे छावट्ठिसागरोपमाणि सादिरेयाणि।"** इति। तदेवं षड्विंशतिप्रकृतिस्थानविरहस्य सागरोपमसातिरेकषट्षष्टिद्वयप्रमाणत्वात् षड्विंशतिसत्ताकस्य च जीवस्यौपशमिकसम्यक्त्वेन विना क्षायोपशमिकसम्यक्त्व-क्षायिकसम्यक्त्वयोरलाभात् क्षपकश्रेणिमारूढेन जीवेन सागरोपमसातिरेकषट्षष्टिद्वयकालाभ्यन्तरयौपशमिकसम्यक्त्वमवश्यमेव लब्धम्। सातिरेकयोश्च द्वयोः षट्षष्ट्योः सागरोपमाणां कर्मावस्थानकालतो न्यूनत्वादौपशमिकसम्यक्त्वमार्गणायां बद्धप्रदेशाः क्षपकस्य सत्कर्मणि नियमतो भवन्ति।

क्षायोपशमिकसम्यक्त्वमार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमेन विद्यते। कथमेतदवसीयते? इति चेत्, उच्यते—क्षायिकसम्यक्त्वस्योत्कृष्टतोऽपि कालः सातिरेकत्रयस्त्रिंशत्सागरोपमप्रमाणो भवति, यत एकविंशतिप्रकृत्यात्मकसत्तास्थानकोत्कृष्टकालः सातिरेकत्रयस्त्रिंशत्सागरोपममात्रः। अभ्यधायि च **कषायप्राभृतचूर्णौ—"एक्कावीसाए विहत्ती केवचिरं कालादो ? जहण्णेण अंतोमुहुत्तं, उक्कस्सेण तेत्तीसं सागरोवमाणि सादिरेयाणि।"** इति। क्षायिकसम्यक्त्वस्य च क्षपकश्रेणावश्यंभावित्वात् क्षायिकसम्यक्त्वतश्च प्राक् क्षायोपशमिकसम्यक्त्वस्य नियमेन दर्शनात् तथा कर्माऽवस्थानकालस्य साधिकत्रयस्त्रिंशत्सागरोपमतोऽधिकत्वात् क्षायोपशमिकसम्यक्त्वमार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमतो विद्यते।

क्षायिकसम्यक्त्वमार्गणायां बद्धदलं नियमेन क्षपकस्य सत्कर्मणि विद्यते, क्षायिकसम्यक्त्वमृते क्षपकश्रेणेरसंभवात्।

संज्ञिमार्गणायां बद्धदलं नियमेन किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि विद्यते, संज्ञिन एव क्षपकश्रेणिप्रतिपत्तेः।

असंज्ञिमार्गणायामपि बद्धदलं नियमेन किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि विद्यते। कथमेतदवसीयते? इति चेत्, उच्यते—संज्ञिन उत्कृष्टतः कायस्थितिः सातिरेकसागरोपमशतपृथक्त्वप्रमाणा लक्ष्यते। न्यगादि च **श्रीप्रज्ञापनासूत्रे कायस्थितिद्वारे—"सण्णीणं भंते ! पुच्छा, गो० ! ज० अंतो० उ० सागरोवमसतपुहुत्तं सातिरेगं,।"** इति। अयं भावः—कश्चित् जन्तुर्भूयो भूयः संज्ञिषूत्पद्यते, तदा सातिरेकसागरोपमशतपृथक्त्वकालं यावत्। ततः परमवश्यमेवाऽसंज्ञिषूत्पद्यते। तेनोत्कृष्टसंज्ञिकायस्थितेरर्वाग् नियमतोऽयं क्षपकोऽसंज्ञित्वेनासीत्। इत्थं संज्ञिसत्काया: कायस्थितेः कर्माऽवस्थानकालतो न्यूनत्वादसंज्ञिमार्गणायां बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि नियमेन विद्यते।

आहारकमार्गणायां बद्धदलं नियमेन किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि विद्यते। सुगममेतत्, आहारकाणामेव क्षपकश्रेण्यारम्भात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च किट्टिकरणाद्धायां किट्टिवेदकमाश्रित्य प्ररूपणाऽसंगतेति वाच्यम् , प्रकृतप्ररूपणामाश्रित्य किट्टिकारतः किट्टिवेदकं प्रति विशेषाभावेन तस्या अदुष्टत्वात् ॥ १०५-१०६-१०७ ॥

अथ यासु मार्गणासु बद्धकर्मदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि विकल्पेन विद्यते, ताः संगृह्य प्राह–

**निरयसुरविगलपुढवीजलानलपवणवणस्सईसु तह ।**
**वेउव्वाहारगदुगकम्मणजोगित्थिपुरिसवेएसुं ॥१०८॥(गीतिः)**
**ओहिविहंगमणेसु तह देसविरइपरिहारछेएसुं ।**
**ओहिगदंसणमिस्सासायणणाहारगेसु भयणाए ॥१०९॥ (गीतिः)**

निरयसुरविकलपृथिवीजलाऽनलपवनवनस्पतिषु तथा ।
वैक्रियाहारकद्विककार्मणयोगस्त्रीपुरुषवेदेषु ॥१०८॥
अवधिविभङ्गमनस्सु तथा देशविरतिपरिहारच्छेदेषु ।
अवधिदर्शनमिश्रास्वादनानाहारकेषु भजनया ॥१०९॥इति पदसंस्कारः ।

**'निरय०'** इत्यादि, बद्धप्रदेशाः किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणीति पूर्वतोऽनुवर्तते, तच्च यथास्थानं योजनीयम्। निरयादयः कृतद्वन्द्वा निर्दिष्टाः। भजनयेति सर्वत्र सम्बध्यते । तथाहि-निरये-नरकगतौ सुरे-देवगतौ च बद्धप्रदेशाः किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि 'भजनया' विभाषया विद्यन्ते, कस्यचित् क्षपकस्य सत्कर्मणि विद्यन्ते, कस्यचित् पुनर्न विद्यन्त इत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ—"देवगदिसमज्जिदं च णिरयगदिसमज्जिदं च भजियव्वं ।"** इति । भावार्थः पुनरयम्–देवगतौ नरकगतौ वाऽगत्वा **मरुदेव्यादिवत्** तिर्यग्गतित आगत्य मनुष्यगतौ क्षपकश्रेणिं प्रतिपन्नस्य सत्कर्मणि देवगतौ नरकगतौ वा बद्धकर्मदलं न विद्यत एव । यद्वा देवगतिं नरकगतिं वा गत्वाऽपि तत्र च कर्मदलं बद्ध्वा ततो निर्गत्य शेषगतित्रये वा तिर्यग्गतौ वा कर्माऽवस्थानकालं ततोऽपि वाऽधिकं कालं व्यतिक्रम्य मनुष्यगता आगतस्य क्षपकस्य सत्कर्मण्येकमपि दलं देवगतौ नरकगतौ वा बद्धं न विद्यते, कर्माऽवस्थानकालतः परं बद्धकर्मदलस्य सत्कर्मण्यदर्शनात् ।

यः कश्चिज्जन्तुर्देवगतौ नरकगतौ वा समुत्पद्य कर्माऽवस्थानकालाभ्यन्तरे मनुष्यो भूत्वा क्षपकश्रेणिमारोहति । तस्य निरुक्तगतिबद्धदलं सत्कर्मणि विद्यते, यतो निरुक्तगतिबद्धदलस्य कर्माऽवस्थानकालो नातिक्रान्तः ।

इदन्त्ववधेयम्—देवगतौ वा नरकगतौ वा बद्धकर्मदलं जघन्येनैककर्मपरमाणुः सत्कर्मणि वर्तते, उत्कृष्टतस्त्वनन्तकर्मदलिकानि । इदमत्राऽल्पबहुत्वम्–( १ ) देवगतौ वा नरकगतौ वा बद्धकर्मदलं सत्कर्मणि जघन्यतः स्तोकम् , उत्कृष्टतस्त्वनन्तगुणम् ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

'विगल' त्ति विकलेषु-द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियलक्षणमार्गणास्थानेषु बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि विभाषया तिष्ठति । कथमेतदवगन्तव्यम् ? इति चेत्, उच्यते—द्वीन्द्रियादितयाऽनुत्पद्यैकेन्द्रियत आगतस्य क्षपकश्रेणिं प्रतिपन्नस्य जन्तोः सत्कर्मणि द्वीन्द्रियादिमार्गणासु बद्धकर्मदलं न विद्यते, अथवा विकलेन्द्रियतयोत्पद्यैकेन्द्रियभवेषु कर्माऽवस्थानकालं ततोऽपि वाऽधिककालं व्यतिक्रम्य क्षपकश्रेणिमारूढस्य सत्कर्मणि द्वीन्द्रियादिमार्गणासु बद्धदलं न विद्यते । यः पुनर्द्वीन्द्रियादितया समुत्पद्य कर्माऽवस्थानकालाभ्यन्तरे मनुष्यगतौ क्षपकश्रेणिं प्रतिपद्यते, तस्य सत्कर्मणि द्वीन्द्रियादिमार्गणासु बद्धकर्मदलमुपलभ्यते, कर्माऽवस्थानकालस्याऽनतिक्रान्तत्वात् ।

'पुढवी' त्ति पृथिवीकाये बद्धदलं किट्टिकाराणां किट्टिवेदकानां च सत्कर्मणि भजनया विद्यते । तद्यथा—यः कश्चिज्जन्तुः पृथिवीकायमगत्वाऽथवा गत्वाऽप्यन्यत्राऽप्कायादिषु कर्माऽवस्थानकालं परिपाल्य मनुष्यगतौ क्षपकश्रेणिं समारोहति, तस्य सत्कर्मणि पृथिवीकायमार्गणायां बद्धदलं न विद्यते, यः पुनः पृथिवीकायं गत्वा कर्माऽवस्थानकालाभ्यन्तरे मनुष्यगतौ क्षपकश्रेणिमारोहति, तस्य सत्कर्मणि पृथिवीकायमार्गणायां बद्धदलं नियमेन विद्यते । 'जलानलपवण' त्ति 'जले' अप्कायमार्गणायाम् 'अनले' तेजःकायमार्गणायां 'पवने' वायुकायमार्गणायां च बद्धदलं क्षपकस्य सत्कर्मणि विभाषया वर्तते । भावना तु पृथिवीकायवत् कार्या । 'वनस्पतौ' वनस्पतिकायमार्गणायां च बद्धकर्मदलं क्षपकस्य सत्कर्मणि भजनया भवति । कथमेतदवगम्यते ? इति चेत्, शृणुत—वनस्पतिकायतो निर्गतस्याऽन्यत्र पृथिवीकायादौ कर्माऽवस्थानकालं यावत् प्रोष्य मनुष्यगतौ क्षपकश्रेणिं प्रतिपन्नस्य सत्कर्मणि वनस्पतिकाये बद्धदलं न विद्यते, यतो वनस्पतिकाये बद्धकर्मदलस्य कर्माऽवस्थानकालोऽतिक्रान्तः । यः पुनर्वनस्पतिकायतो निर्गत्य कर्माऽवस्थानकालाभ्यन्तरे क्षपकश्रेणिं समारोहति, तस्य सत्कर्मणि वनस्पतिकाये बद्धदलं नियमेन विद्यते, बद्धकर्मदलसम्बन्धिकर्माऽवस्थानकालस्याऽनतिक्रान्तत्वात् । अभिहितं च **कषायप्राभृतचूर्णौ—"पुढविकाइय-आउकाइय-तेउकाइय-वाउकाइय-वणप्फदिकाइएसु एत्तो एक्केक्केण काएण समज्जिदं भजियव्वं ।"** इति । 'तथा' तथाशब्दः समुच्चये, 'वेउव्वाहारगदुगकम्मण०' इत्यादि, द्विकशब्दः प्रत्येकं सम्बध्यते, वैक्रियद्विकं=वैक्रियकाययोगतन्मिश्रकाययोगलक्षणम् आहारकद्विकम्=आहारककाययोगाऽऽहारकमिश्रयोगलक्षणं कार्मणकाययोगः पुरुषवेदः स्त्रीवेदश्च, तेषु, बद्धदलं क्षपकसत्कर्मणि भजनया विद्यते, निरुक्तमार्गणास्थानेष्वगत्वाऽथवा गत्वाऽपि कर्माऽवस्थानकालं ततोऽधिकं कालं वा प्रतिपक्षमार्गणास्थानेषूषित्वा क्षपकश्रेणिं समारूढस्य सत्कर्मणि निरुक्तमार्गणासु बद्धकर्मदलं न विद्यते । तत्र गत्वा कर्माऽवस्थानकालाभ्यन्तरे क्षपकश्रेणिमारूढस्य तु तत्र बद्धदलं सत्कर्मणि नियमतो विद्यते । व्याहारि च **कषायप्राभृतचूर्णौ—"सेसजोगेसु बद्धाणि भज्जाणि।×××इत्थीए पुरिसेण सम्मामिच्छाइट्ठिणा च एवंभावभूदेण बद्धाणि भज्जाणि ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'ओहिविहंगमणस्सु'**त्ति, तत्र **'ओहि'** त्ति अवधिज्ञाने, न तु त्ववधिदर्शनमार्गणायाम्, विभङ्गसाहचर्यात्, विभङ्गज्ञाने, **'भीमो भीमसेनः'** इति न्यायेन मनःशब्दाद् मनःपर्यायज्ञाने च, न तु मनोयोगे, तत्रा-ऽभजनयोक्तत्वात्, बद्धदलं विभाषया क्षपकस्य सत्कर्मणि विद्यते। निरुक्तमार्गणास्थानत्रये कर्माऽवस्थानकालाभ्यन्तरेऽवश्यंभाविगमनविरहात्। उक्तं च **कषाय-प्राभृतचूर्णौ—"ओहिणाणे अण्णाणे मणपज्जवणाणे एदेसु तिसु उवजोगेसु पुव्वबद्धाणि भजियव्वाणि।"** इति।

**'तह देस'** त्ति तथा देशविरतिमार्गणायाम् **'परिहार'** त्ति पदैकदेशेन पदसमुदायस्य गम्यत्वात् परिहारविशुद्धिकसंयममार्गणायां छेदे-छेदोपस्थापनसंयममार्गणायां च बद्धदलं क्षपकस्य सत्कर्मणि विभाषया विद्यते। कथमेतदवबुध्यते? इति चेत्, उच्यते-निरुक्तमार्गणास्थानान्यप्राप्या-ऽथवा प्राप्याऽपि कर्माऽवस्थानकालमविरत्यादिमार्गणासु व्यतिक्रम्य क्षपकश्रेणिमधिगतस्य जन्तोः सत्कर्मणि निरुक्तमार्गणासु बद्धदलं न विद्यते, यस्तु निरुक्तमार्गणास्थानानि समधिगत्य कर्माऽवस्थानकालाभ्यन्तरे क्षपकश्रेणिमारोहति, तस्य सत्कर्मणि देशविरत्यादिमार्गणासु बद्धदलं नियमेन विद्यते।

**'ओहिग०'** इत्यादि, तत्र **'ओहिग'** त्ति अवधिदर्शनमार्गणायाम्, **'मिस्स'** त्ति मिश्रमार्गणायां च बद्धदलं क्षपकस्य सत्कर्मणि भजनया विद्यते, कर्माऽवस्थानकालाभ्यन्तर एतयोर्मार्गणास्थानयोः प्राप्तौ नियमाभावात्। उक्तं च **कषायप्राभृते—"अह ओहिदंसणे पुण उवजोगे होंति भज्जाणि। XXX मिस्सगे भज्जा।"** इति।

**'आसायण'** त्ति आस्वादनसम्यक्त्वमार्गणायां बद्धदलं विभाषया सत्कर्मणि विद्यते, कर्माऽवस्थानकालाभ्यन्तरे निरुक्तमार्गणाया लाभे नियमानुपलम्भात्।卐

अनाहारके-अनाहारकमार्गणायां बद्धदलं सत्कर्मणि भजनया विद्यते, संसारावस्था-यामनाहारकमार्गणाया विग्रहगतावेव लाभाद् विग्रहगतेश्चोत्कृष्टान्तरस्याऽसंख्येयोत्सर्पिण्यवस-र्पिणीकालमात्रत्वेन कर्मावस्थानकालाभ्यन्तरे प्रकृतमार्गणाया अवश्यंभावविरहात्।

इत्थं सप्तविंशतिमार्गणास्थानेषु बद्धदलं प्रस्तुतक्षपकसत्कर्मणि विभाषया वर्तते, कर्मावस्थान-काले निरुक्तमार्गणागमननियमाभावात् ॥१०८-१०९॥

अथ येषु पञ्चमार्गणास्थानेषु बद्धदलं नियमतः सत्कर्मणि न विद्यते, तान्यभिधित्सुराह—

---

卐 तथा चोक्तं जयधवलाकारैरपि-"सासणसम्माइट्ठिणा च बद्धाणि भयणिज्जाणि त्ति एसो वि अत्थो एत्थ वक्खाणेयव्वो, मिस्सणिद्देसस्सेदस्स देसामासयभावेण पवुत्तिअब्भुवगमादो।" इति।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**केवलदुगअभवियसुहुमअहक्खायेसु णियमत्तो ।**
**बद्धपएसा णत्थि य संते संभवअभावत्तो ॥११०॥ (उपगीतिः)**

केवलद्विकाऽभव्यसूक्ष्मयथाख्यातेषु नियमतः ।
बद्धप्रदेशा न सन्ति च सत्तायां संभवा-ऽभावात् ॥११०॥ इति पदसंस्कारः ।

**'केवलदुग०'** इत्यादि, कृतद्वन्द्वाः सप्तम्या निर्दिष्टाः केवलद्विकादयः । तत्र 'केवलद्विके' केवलज्ञानकेवलदर्शनलक्षणे बद्धप्रदेशाः किट्टिकारगणां किट्टिवेदकानां च सत्तायां नियमतो 'न सन्ति' न भवन्ति । अयम्भावः-जीवः सयोगिगुणस्थानकं लब्ध्वैव केवलज्ञानं केवलदर्शनं च प्राप्नोति, अनेन क्षपकेण तु न कदापि सयोगिगुणस्थानकमासादितम् । किञ्च सयोगिगुणस्थानके मोहनीयबन्धसंभवोऽपि नास्ति, अनिवृत्तिबादरसम्परायचरमसमये तद्विच्छेदात् । अतो-ऽनयोर्द्वयोर्मार्गणयोर्बद्धदलं सत्कर्मणि नियमतो न विद्यते ।

**'अभविय'** त्ति अभव्यमार्गणायां बद्धप्रदेशाः क्षपकस्य सत्कर्मणि नियमतो न विद्यन्ते, अभव्यस्य सिद्धिगमनाऽयोग्यत्वेन क्षपकश्रेणिप्रतिपत्त्यसंभवात् ।

**'सुहुम'** त्ति **"भीमो भीमसेनः"** इति न्यायात् सूक्ष्मसम्परायसंयममार्गणायां बद्धदलं क्षपकस्य सत्कर्मणि नियमेन न विद्यते, संभवाभावात् । न च कर्माऽवस्थानकालाभ्यन्तरयुपशमश्रेणिमारुह्य सूक्ष्मसम्परायगुणस्थानकमासादितवतो जीवस्य निरुक्तमार्गणायां बद्धदलं सत्कर्मणि कुतो न संभवति ? इति वाच्यम्, मोहनीयदलस्येष्टत्वेन सूक्ष्मसम्परायमार्गणायां मोहनीयस्य बन्धाभावात् । एवमग्रेऽपि ।

यथाख्याते—यथाख्यातसंयममार्गणायां बद्धदलं सत्कर्मणि नियमेन न विद्यते । कुतः ? इति चेत्, उच्यते—यथाख्यातसंयम उपशान्तमोहादिगुणस्थानकेषु प्राप्यते । न च तत्र मोहनीयबन्धोऽस्ति, तेन तत्र बद्धदलं क्षपकस्य सत्कर्मणि न भवति ।

ननु निरुक्तपञ्चमार्गणासु बद्धप्रदेशाः सत्कर्मणि कुतो न विद्यन्ते ? इत्यत आह–**'संभवअभावत्तो'** त्ति सम्भवाभावात् । सुगममेतद् व्याख्यातत्वात् ॥११०॥

चतुर्दशमार्गणानामुत्तरमार्गणास्थानेषु बद्धदलं सत्कर्मणि चिन्तयित्वा सम्प्रति येषु सातोदयादिस्थानेषु बद्धमोहनीयदलं नियमतः क्षपकस्य सत्तायां विद्यते, तानि सङ्गृह्य प्राह—

**सायासायेसुं पज्जत्तापज्जत्तगेसुं च ।**
**एगिंदियाण च असंखिज्जेसु भवेसु णियमत्तो ॥१११॥(उपगीतिः)**

सातासातयोः पर्याप्तापर्याप्तकयोश्च ।
एकेन्द्रियाणाञ्चाऽसंख्येयेषु भवेषु नियमतः ॥१११॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'सायासायेसु"** इत्यादि, 'बद्धपएसा संतम्मि' इति पदद्वयं पूर्वतोऽनुवर्तते । 'सातासातयोः' सातोदयस्थानेऽसातोदयस्थाने च 'पर्याप्ताऽपर्याप्तकयोश्च पर्याप्तजीवभेदे-ऽपर्याप्तजीवभेदे चैकेन्द्रियाणामसंख्येयेषु भवेषु च बद्धप्रदेशाः क्षपकस्य सत्तायां नियमतो विद्यन्ते । कथमेतदवसीयते ? इति चेत्, उच्यते–मनुष्यतिर्यक्ष्वन्तर्मुहूर्तकालेन सातासातोदययोः परावृत्तेः क्षपकश्रेणिप्रतिपत्तेश्च मनुष्यगतावेवोपलम्भात् साताऽसातयोर्बद्धदलिकं किट्टिकारस्य किट्टिवेदकस्य च क्षपकस्य सत्कर्मणि नियमेन विद्यते । तद्भवेऽपि पर्याप्तत्वात् पर्याप्तजीवभेदे बद्धदलं क्षपकस्य सत्कर्मणि नियमेन विद्यते । अपर्याप्तसम्बन्ध्युत्कृष्टविरहस्य कर्मावस्थानकालतः संख्येयगुणहीनत्वादपर्याप्तजीवभेदे बद्धदलं क्षपकस्य सत्कर्मणि नियमेन विद्यते । उक्तं च **कषायप्राभृतचूर्णौ—पज्जत्तेण अपज्जत्तेण मिच्छाइट्ठिणा सम्माइट्ठिणा णवुंसयवेदेण च एवंभावभूदेण बद्धाणि णियमा अत्थि ।"×××सादेण असादेण च बद्धाणि अभज्जाणि ।"** इति ।

नन्वेकेन्द्रियाणामसंख्येयेषु भवेषु बद्धदलं नियमतः क्षपकस्य सत्कर्मणि विद्यतइत्येतत् कथमवसीयते ? इति चेत्, उच्यते--त्रसकायस्य कायस्थितिरुत्कृष्टतोऽपि संख्यातवर्षाधिकसागरोपमद्विसहस्रप्रमाणाऽभिहिता । यदुक्तं श्रीप्रज्ञापनासूत्रे **कायस्थितिपदे-"तसकाइए णं भंते ! तसकाइए कालओ केवचिरं होइ ? गोयमा ! जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवासब्भहियाइं ।"** इति । तथैव **जीवसमासवृत्तावपि–"द्विगुणं च सातिरेकसागरोपमसहस्रं त्रसानां कायस्थितिः, द्विगुणेन च संख्येयवर्षाधिकसागरोपमसहस्रद्वयमवगन्तव्यम् ।"** इति । एकेन्द्रियस्य तूत्कृष्टतो भवस्थितिः संख्येयाऽऽवलिकाप्रमाणा भवति। अथ जघन्यतो भवानां लाभाय संख्येयवर्षाधिकसागरोपमसहस्रद्वयलक्षणत्रसकायकायस्थितिन्यूनजघन्यकर्माऽवस्थानकाल एकेन्द्रियभवप्रमाणाभिः संख्येयावलिकाभिर्विभक्तव्यः, विभक्ते च पल्योमा-ऽसंख्येयभागप्रमाणा एकेन्द्रियभवाः प्राप्यन्ते । इत्थं जघन्यतोऽपि पल्योपमा-ऽसंख्येयभागप्रमाणेष्वेकेन्द्रियभवेषु बद्धदलं क्षपकस्य सत्कर्मणि नियमतो विद्यते, निरुक्तभवेषु बद्धदलिकसम्बन्धिकर्माऽवस्थानकालस्याऽनतिक्रान्तत्वात् । उत्कृष्टतः पुनः साधिकवर्षाष्टकन्यूनकर्माऽवस्थानकालेऽन्तर्मुहूर्तकालेन विभक्ते यल्लभ्यते, तन्मात्रेष्वेकेन्द्रियभवेषु बद्धदलं क्षपकस्य सत्कर्मणि वर्तते ॥१११॥

सम्प्रति यावत्सु त्रसभवेषु बद्धदलं सत्कर्मणि विद्यते, तावतस्त्रसभवान् व्याहरन् लिङ्गकर्मशिल्पादिषु बद्धदलं भजनया सत्तायां प्राह—

**एगुत्तरवुड्ढीए संखतसभवेसु बद्धदलमत्थि ।**
**संतम्मि सव्वलिंगेसु कम्मसिप्पगुरुठिइरसेसु वा ॥११२॥ ( गीतिः )**

एकोत्तरवृद्धया संख्यत्रसभवेषु बद्धदलमस्ति ।
सत्तायां सर्वलिङ्गेषु कर्मशिल्पगुरुस्थितिरसेषु वा ॥११२॥ इति पदसंस्कारः ।

**'एगुत्तरवुड्ढीए'** इत्यादि, एकोत्तरवृद्धया 'सङ्ख्यत्रसभवेषु' सङ्ख्यामर्हन्तीति संख्याः, **'दण्डादेर्यः'** (सिद्धहेम०६-४-१६८) इति सूत्रेण यप्रत्ययः, संख्येया इत्यर्थः, तेषु त्रसभवेषु बद्धदलं क्षपकस्य सत्तायाम् 'अस्ति' भवति । तद्यथा—यः कश्चिज्जीव एकेन्द्रियतो निर्गत्य मनुष्यत्वेन समुत्पन्नो **मरुदेव्यादिवत्** क्षपकश्रेणिमारोहति, तस्य जीवस्य सत्तायामेकस्मिंस्त्रसभवे बद्धदलं विद्यते । यः कश्चिज्जीव एकेन्द्रियतो निर्गत्य त्रसत्वेनोत्पद्यते, ततो मृत्वा मनुष्यत्वेनोत्पन्नः क्षपकश्रेणिं प्रतिपद्यते । तस्य जीवस्य सत्कर्मणि त्रसभवद्वये बद्धदलं वर्तते । एवं त्रिषु चतुर्षु यावत् तत्प्रायोग्यसंख्यातेषु निरन्तरत्रसभवेषु बद्धदलं सत्कर्मणि विद्यते, संख्येयवर्षाधिकसागरोपमसहस्रद्वयलक्षणकायस्थितौ निरन्तरं संख्येयत्रसभवेभ्योऽधिकानामसंभवात् । उक्तं च **कषायप्राभृते—**

**"एइंदियभवग्गहणेहिं असंखेज्जेहिं णियमसा बद्धं ।**
**एगादेगुत्तरियं संखेज्जेहि य तसभवेहिं ॥१॥"** इति ।

न च कर्माऽवस्थानकालाभ्यन्तरेऽसंख्येया अपि त्रसभवा संभवन्ति, कर्माऽवस्थानकालेऽसंख्येयवारान् यावद् देशविरतिप्राप्तेः, देशविरतेश्च त्रसभव एव लाभादिति वाच्यम्, अत्र नैरन्तर्येणैकाधिकक्रमेण त्रसभवानां व्याख्यानात्, असंख्येयवारान् यावद् देशविरतिप्राप्तेस्तु स्थावरभवैरन्तरयित्वा निर्दिष्टत्वात् ।

अथ लिङ्गादिषु बद्धदलं सत्कर्मणि भजनया दर्शयति—**'सव्वलिंगेसु'** इत्यादि, सर्वलिङ्गेषु बद्धदलं क्षपकस्य सत्कर्मणि 'वा' विभाषया विद्यते, लिङ्गशब्देनाऽत्र तापस-परिव्राजक-यत्यादिद्रव्यलिङ्गानां ग्रहणं कर्तव्यम् । तत्र यो जन्तुः कर्माऽवस्थानकालाभ्यन्तरे तापसलिङ्गमप्रतिपद्य क्षपकश्रेणिमारोहति, तस्य सत्कर्मणि तल्लिङ्गे बद्धदलं न विद्यते, येन कर्माऽवस्थानकालाभ्यन्तरे तापसलिङ्गं प्रतिपद्य क्षपकश्रेणिः प्रतिपन्ना, तस्य सत्कर्मणि तल्लिङ्गे बद्धं दलं नियमतो विद्यते । एवं **मरुदेव्यादिवद्** भवचक्रे कर्माऽवस्थानकालाभ्यन्तरे यतिलिङ्गमप्रतिपद्य यः क्षपकश्रेणिं प्रतिपद्यते, तस्य सत्कर्मणि यतिलिङ्गे बद्धदलं न विद्यते, यः पुनर्यतिलिङ्गं कर्माऽवस्थानकालाभ्यन्तरे प्रतिपद्य क्षपकश्रेणिमारोहति, तस्य सत्कर्मणि निरुक्तलिङ्गे बद्धदलं नियमतो विद्यते । एवं शेषलिङ्गेषु भजना भावनीया । यदभ्यधायि **कषायप्राभृतचूर्णौ—"सव्वलिंगेसु भज्जाणि ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'कम्म०'** इत्यादि, कर्मादयः कृतद्वन्द्वाः सप्तम्या निर्दिष्टाः, तत्र कर्मसु–अङ्गारप्रभृतिलक्षणेषु बद्धदलं क्षपकस्य सत्कर्मणि विभाषया विद्यते। अयं भावः–ये य आरम्भा अग्निविराधनारूपाः, ते तेऽङ्गारकर्मोच्यन्ते। तद्यथा–काष्ठदाहेनाङ्गारनिष्पादनं भ्राष्ट्रकरणाद्यनेकविधमङ्गारकर्म। उक्तं च **योगशास्त्रे–"अङ्गारभ्राष्ट्रकरणं कुम्भायःस्वर्णकारिता ठठारत्वेष्टकाविति ह्यङ्गारजीविका।"** इति। एवं शेषाणां कर्मणां व्याख्यानं ग्रन्थान्तरादवसेयम्। एवंप्रकारेष्वङ्गारादिषु कर्मसु बद्धदलं क्षपकस्य सत्कर्मणि विभाषया विद्यते, कर्माऽवस्थानकालाभ्यन्तर एतेषामवश्यंभावनियमानुपलम्भात्। शिल्पेषु बद्धदलं क्षपकस्य सत्कर्मणि विभाषया विद्यते। तत्र शील्यत इति शिल्पम्, **पम्पाशिल्पादयः** (उणादि० ३००) इति साधुः, नृत्यादिकलेति यावत्। उक्तं चाऽ**भिधानचिन्तामणौ–"शिल्पं कला विज्ञानं च।"** इति। कर्माऽवस्थानकालाभ्यन्तरे शिल्पानि शिक्षितवतः क्षपकस्य सत्कर्मणि शिल्पेषु बद्धदलं विद्यते, कर्माऽवस्थानकालाभ्यन्तरेऽशिक्षितवतस्तु न विद्यते। उक्तं च **कषायप्राभृतचूर्णौ–"कम्म-सिप्पेसु भज्जाणि।"** इति।

गुरुस्थितिरसयोः– उत्कृष्टस्थित्यामुत्कृष्टरसे च बद्धदलं क्षपकस्य सत्कर्मणि विभाषया विद्यते। अत्र मुग्धश्चोदक आह–ननूत्कृष्टस्थितिमुत्कृष्टानुभागं च क्षपको न बध्नाति, तर्हि विभाषयाऽपि सत्कर्मण्युत्कृष्टस्थित्यामुत्कृष्टाऽनुभागे च बद्धदलं कथं संभवति? इति, अत्रोच्यते–उत्कृष्टस्थितिबन्धकाले बद्धं कर्मदलमुत्कृष्टस्थितौ बद्धदलमुच्यते, एवमुत्कृष्टाऽनुभागबन्धकाले बद्धं कर्मदलमुत्कृष्टानुभागे बद्धदलमभिधीयते, तच्च क्षपकस्य सत्कर्मणि भजनया विद्यते, येन क्षपकेण कर्मा-ऽवस्थानकालाभ्यन्तर उत्कृष्टस्थितिबन्धकाल उत्कृष्टाऽनुभागबन्धकाले च कर्मदलं बद्धम्, तस्य सत्कर्मण्युत्कृष्टस्थित्यामुत्कृष्टाऽनुभागे च बद्धदलं विद्यते, येन क्षपकेण कर्माऽवस्थानकालाभ्यन्तरे सर्वत्रैवा-ऽनुत्कृष्टस्थितिरनुत्कृष्टाऽनुभागश्चाऽबध्यत। तस्य सत्कर्मण्युत्कृष्टस्थित्यामुत्कृष्टानुभागे च बद्धदलं न विद्यते, संभवविरहात्। यदुक्तं **कषायप्राभृतचूर्णौ–"उक्कस्सट्ठिदिबद्धाणि उक्कस्सअणुभागबद्धाणि च भजिदव्वाणि।"** इति। इहोत्कृष्टस्थित्यनुभागौ मोहनीयस्यैव गृह्येते, तस्यैव प्रस्तुतत्वात्। यद्यपि सप्तानामपि कर्मणामुत्कृष्टस्थितिग्रहणे न कश्चिद् दोषः, तथाप्युत्कृष्टानुभागः शुभानां ग्रहीतुं न शक्यते, शुभानां गोत्र-वेदनीय-नामरूपाणां कर्मणामुत्कृष्टानुभागस्य क्षपकसूक्ष्मसम्परायचरमसमये बन्धसद्भावेन किट्टिकरणाद्धायां तदसम्भवात् ॥११२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## चतुर्दशमार्गणानामुत्तरमार्गणासु बद्धदलस्य भजनीयाऽभजनीया च सत्ता (गाथा:-१०५-१०६-१०७-१०८-१०९-११०)

| | १ गतिः | २ इन्द्रियम् | ३ कायः | ४ योगः | ५ वेदः | ६ कषायः | ७ ज्ञानम् | ८ संयमः | ९ दर्शनम् | १० लेश्या | ११ भव्यः | १२ सम्यक्त्वम् | १३ संज्ञी | १४आहारकः | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| यासु बद्धदलं सत्तायां नियमतो विद्यते, ताः— | मनुष्यः तिर्यग् | एकेन्द्रियः पञ्चे न्द्रियः | त्रसकायः | ४मनोयो० ४वचो ,, १औदारिकः १तन्मिश्रः | नपुंसकः | ४ कषायाः | मतिज्ञानम् श्रुत ,, मत्य ,, श्रुता ,, | अविरतिः सामायिकः | चक्षुदर्शनम् अचक्षुर्दनम् | ६ लेश्याः | भव्यः | मिथ्यात्वम् औपशमि० क्षायोपशमिकम् क्षायिकम् | संज्ञी असंज्ञी | आहारकः | |
| सर्वसंख्यया | २ | २ | १ | १० | १ | ४ | ४ | २ | २ | ६ | १ | ४ | २ | १ | ४२ |
| यासु बद्धदलं सत्तायां विभाषया वर्तते, ताः— | नरकः सुरः | द्वीन्द्रियः त्रीन्द्रियः चतुरिन्द्रियः | पृथिवीकायः अप्कायः तेजःकायः वायुकायः वनस्पति० | वैक्रियः तन्मिश्रः आहारकः तन्मिश्रः कार्मणः | स्त्रीवेदः पुरुषवेदः | | अवधि० मनःपर्या० विभङ्गज्ञानम् | देशविरतिः परिहार० छेदोप० | अवधिदर्शनम् १ | | | मिश्रमार्गणा सास्वादनम् | | अनाहारकः | |
| | २ | ३ | ५ | ५ | २ | | ३ | ३ | | | | २ | | १ | २७ |
| यासु बद्धदलं सत्तायां नियमतो न विद्यते, ताः— | | | | | | | केवलज्ञानम् | सूक्ष्मसं० यथाख्या० | केवलदर्शनम् | | अभव्यः | | | | |
| | | | | | | | १ | २ | १ | | १ | | | | ५ |

सातसातादिषु बद्धदलिकस्य भजनीयाऽभजनीया च सत्ता (गाथा-१११-११२) 

| यत्र बद्धदलिकस्य सत्ता नियमात् भवति— | यत्र बद्धदलिकस्य सत्ता विकल्पेन भवति— |
|---|---|
| (१) सातवेदनीयोदयः | (१) सर्वलिङ्गानि |
| (२) असातवेदनीयोदयः | (२) अङ्गारादिकर्माणि |
| (३) पर्याप्तजीवभेदः | (३) शिल्पम् |
| (४) अपर्याप्तजीवभेदः | (४) उत्कृष्टस्थितिः |
| (५) असंख्येया एकेन्द्रियभवाः | (५) उत्कृष्टानुभागः |

एकतः प्रभृति संख्येयेषु त्रसभवेषु बद्धदलिकस्य सत्ता भवति (गाथा—११२)

साम्प्रतं मनुष्यगत्यादिमार्गणासु सातोदयादिस्थानेषु च बद्धदलं सत्कर्मणि नियमतो यद् विद्यते, तत् सर्वकिट्टिषु प्रक्षिप्तं भवतीत्येतदभिधातुकाम आह—

खवगाणं संते णियमत्तो कहियदलिअं तु वट्टेइ ।
सव्वट्ठिईसु तह सव्वासु किट्टीसु णियमेणं ॥११३॥

क्षपकाणां सत्तायां नियमतः कथितदलिकं तु वर्तते ।
सर्वस्थितिषु तथा सर्वासु किट्टिषु नियमेन ॥११३॥ इति पदसंस्कारः ।

'**खवगाणं**' इत्यादि, 'क्षपकाणां' किट्टिकाराणां किट्टिवेदकानां चेत्यर्थः, **सत्तायां नियमतः** '**कथितदलिकं**' मनुष्यगत्यादिमार्गणासु सातोदयादिस्थानेषु च बद्धत्वेन कथितं प्रदेशाग्रं तु '**सर्वस्थितिषु**' मोहनीयस्य जघन्यस्थितितः प्रभृत्युत्कृष्टस्थितिं यावत् सर्वस्थितिस्थानेषु तथा सर्वासु किट्टिषु लोभप्रथमाऽवान्तरकिट्टित आरभ्य क्रोधचरमाऽवान्तरकिट्टिं यावत् सर्वावान्तरकिट्टिषु '**नियमेन**' अभजनया वर्तते । उक्तं च **कषायप्राभृते**—

**"एदाणि पुव्वबद्धाणि होंति सव्वेसु ट्ठिदिविसेसेसु ।**
**सव्वेसु चाणुभागेसु णियमसा सव्वकिट्टीसु ॥१॥**इति ।

यासु मार्गणासु बद्धकर्मदलिकं भजनया भवति, तासु बद्धदलं जघन्यत एकस्थित्यामेकावान्तरकिट्टौ च विद्यते, तत एकोत्तरवृद्धिक्रमेणोत्कृष्टतः सर्वस्थितिषु सर्वावान्तरकिट्टिषु च विद्यत इत्यपि ज्ञातव्यम् ॥११३॥

किट्टिकरणाद्धायां वर्तमानो जीव किं स्पर्धकानि वेदयते? उत किट्टीरप्यनुभवति? इत्याशङ्काव्युदासाय प्राह—

किट्टीकरणे पुव्वापुव्वाइं फड्डगाणि अणुहवइ ॥
पढमट्ठिईअ आवलिगासेसाए समत्ताद्धा ॥११४॥

किट्टिकरणे पूर्वापूर्वाणि स्पर्धकान्यनुभवति ।
प्रथमस्थित्यामावलिकाशेषायां समाप्ताद्धा ॥११४॥ इति पदसंस्कारः ।

'**किट्टी०**' इत्यादि, '**किट्टिकरणे**' किट्टिकरणाद्धायां वर्तमानः क्षपकः '**पूर्वापूर्वाणि स्पर्धकानि**' पूर्वस्पर्धकान्यपूर्वस्पर्धकानि च '**अनुभवति**' वेदयते, किट्टीस्तु न वेदयते । यदभिहितं **कषायप्राभृतचूर्णौ**—**"किट्टीओ करेंतो पुव्वफद्दयाणि अपुव्वफद्दयाणि च वेदेदि, किट्टीओ ण वेदयदि ।"** इति । यथाऽश्वकर्णकरणाद्धायामपूर्वस्पर्धकानि कुर्वाणः क्षपकः पूर्वस्पर्धकैः सहाऽपूर्वस्पर्धकान्यपि वेदयति स्म, तथा किट्टिकरणाद्धायां किट्टीर्निर्वर्तयन् किट्टीर्न वेदयति, किन्तु किट्टिकरणाद्धायामपि पूर्ववत् पूर्वापूर्वस्पर्धकानि वेदयतीति फलितार्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रति किट्टिकरणाद्धायाः समाप्तिमभिधत्ते-'पढमट्ठिईअ' इत्यादि, 'प्रथमस्थितौ' पूर्वापूर्वस्पर्धकतया विद्यमानस्य संज्वलनक्रोधस्य प्रथमस्थित्यामावलिकाशेषायां 'समत्तद्धा' त्ति अद्धा=प्रस्तुतत्वात् किट्टिकरणाद्धा समाप्ता भवति । निगदितं च **कषायप्राभृतचूर्णौ-"किट्टीकरणद्धा णिट्ठायदि पढमट्ठिदोए आवलियाए सेसाए ।"** इति॥११४॥

अथ किट्टिकरणाद्धाचरमसमये स्थितिबन्धं व्याजिहीर्षुराह

**किट्टिकरणस्स चरिमे बंधो मोहस्स चउमासा ।**
**अंतोमुहुत्तअहिया पराण संखियसहस्सवासाइं ॥११५॥(उद्गीतिः)**

किट्टिकरणस्य चरमे बन्धो मोहस्य चतुर्मासाः ।
अन्तर्मुहूर्ताधिकाः परेषां संख्यसहस्रवर्षाणि॥११५॥ इति पदसंस्कारः ।

**'किट्टि०** इत्यादि,**'किट्टिकरणस्य'** किट्टिकरणाद्धायाः'चरमे' चरमसमये'मोहस्य' संज्वलनचतुष्कस्य प्रत्येकं'बन्धः' स्थितिबन्धोऽन्तर्मुहूर्ताधिकाश्चतुर्मासा भवति । व्याहारि च **कषायप्राभृतचूर्णौ-"किट्टीकरणद्धाए चरिमसमए संजलणाणं ठिदिबंधो चत्तारि मासा अंतोमुहुत्तब्भहिया ।"** इति।

ननु गाथायां चतुर्मासा इति समस्तनिर्देशोऽसाधुः, यतो**"विशेषणं विशेष्येणैकार्थं कर्मधारयश्च"** ( सिद्धहेम०३-१-९६ ) इति सूत्रेण कर्मधारयसमाससिद्धौ **'संख्या समाहारे च द्विगुश्चानाम्न्ययम्"** ( सिद्धहेम०३-१-९९ ) इत्येतत्सूत्रारम्भो नियमार्थः । नियमाकारश्चायम्--संख्यावाचि परेण नाम्ना समाहारसंज्ञातद्धितोत्तरपद एव समस्यते, नाऽन्यथा । तेन चत्वारो मासा इति चतुर्मासा इति समासो **'विशेषणं विशेष्येणैकार्थं कर्मधारयश्च"** ( सिद्धहेम०३-१-९९ ) इत्यनेन सूत्रेणाऽपि न भवेत्, यथाऽष्टौ प्रवचनमातर इति चेत्, मैवम् , चतुःसंख्यका मासा इति मध्यमपदलोपाच्चतुर्मासाः । अयं भावः—आदौ चतुरशब्दस्य संख्याशब्देन सह बहुव्रीहिसमासः, ततश्चतुःसंख्यकशब्दस्य मासशब्देन कर्मधारयसमासो मध्यमपदलोपश्चेति न कश्चिद् दोषः । अश्वकर्णकरणाद्धायाश्चरमसमये योऽष्टवर्षप्रमाणः स्थितिबन्ध आसीत् ,स प्रतिस्थितिबन्धाद्धं हीनो हीनतरो भवन् किट्टिकरणाद्धाचरमसमयेऽन्तर्मुहूर्ताधिकचतुर्मासप्रमाणो भवतीत्यर्थः ।

**'पराण'** इत्यादि, 'परेषां' मोहनीयवर्जानां ज्ञानावरणादीनां षण्णां स्थितिबन्धः संख्यसहस्रवर्षाणि भवति । उक्तं च **कषायप्राभृतचूर्णौ—"सेसाणं कम्माणं ठिदिबंधो संखेज्जाणि वस्ससहस्साणि ।"** इति । अश्वकर्णकरणाद्धाचरमसमये यः संख्येयवर्षसहस्रप्रमाणः स्थितिबन्धः शेषकर्मणामासीत्, स संख्येयगुणेन हीनो हीनतरो भवन्निदानीमपि संख्येयवर्षसहस्रमात्रो भवति, संख्येयसहस्राणां संख्येयभेदत्वादित्यर्थः ॥११५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ किट्टिकरणाद्धाचरमसमये स्थितिसत्त्वं निगदितुकाम आह

**ठिइसंतं मोहस्सऽडवासा अंतोमुहुत्तअब्भहिआ।**
**घाईण संखवरिससहस्साणि असंखवच्छराऽन्नाणं ॥११६॥(गीतिः)**

स्थितिसत्त्वं मोहस्याष्टवर्षा अन्तर्मुहूर्ताभ्यधिकाः।
घातिनां संख्यवर्षसहस्राण्यसंख्यवत्सरा अन्येषाम् ॥११६॥ इति पदसंस्कारः।

**'ठिइसंतं'** इत्यादि, तत्र 'मोहस्य' संज्वलनचतुष्कस्य स्थितिसत्त्वम् 'अन्तर्मुहूर्ताऽभ्यधिकाः' अन्तर्मुहूर्तकालेनाऽधिका अष्टवर्षा भवति, अश्वकर्णकरणाद्धाचरमसमये मोहनीयकर्मणो यत् स्थितिसत्त्वं संख्यातवार्षिकं भवति स्म, तत् संख्येयसहस्रस्थितिघातैर्घातितं सदिदानीमन्तर्मुहूर्ताधिकाष्टवर्षप्रमाणं जायत इत्यर्थः। उक्तं च कषायप्राभृतचूर्णौ–' **चेव किट्टीकरणद्धाए चरिमसमये मोहणीयस्स ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि हाइदूण अट्ठवस्सिगमंतोमुहुत्तब्भहियं जादं।"** इति।

'घाईण' इत्यादि, 'घातिनां' मोहनीयस्योक्तत्वाद् मोहनीयवर्जशेषघातिकर्मणां ज्ञानावरण-दर्शनावरणाऽन्तरायलक्षणानां त्रयाणां कर्मणां स्थितिसत्त्वं किट्टिकरणाद्धाचरमसमये संख्यवर्षसहस्राणि भवति। उक्तं च कषायप्राभृतचूर्णौ—**"तिण्हं घादिकम्माणं ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि।"** इति।

**'असंख०'** इत्यादि, तत्र 'अन्येषाम्' अघातिकर्मणां=नाम-गोत्र-वेदनीयानां स्थितिसत्त्वम् 'असंख्यवत्सराः' असंख्येयानि वर्षसहस्राणि भवतीत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ— "णामागोदवेदणीयाणं ठिदिसंतकम्ममसंखेज्जाणि वस्ससहस्साणि।"** इति। घातित्रयस्याऽघातित्रयस्य चाऽश्वकर्णकरणाद्धाचरमसमयेऽनुक्रमं संख्येयवर्षसहस्रप्रमितमसंख्येयवर्षप्रमाणं च यत् स्थितिसत्त्वमासीत्, तत् प्रतिस्थितिघातकालेन हीनं भवत् संख्यातेषु स्थितिघातेषु गतेष्वपि यथाक्रमं संख्येयसहस्रवर्षमात्रमसंख्येयवर्षसहस्रप्रमितं चैव विद्यत इत्यर्थः ॥११६॥

**समाप्तः किट्टिकरणाद्धाख्यः पञ्चमोऽधिकारः।**

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

# किट्टिकरणाद्धाचरमसमयमाश्रित्य चित्रम्




↑ एतच्चिह्नमुपरितनीं स्थितिं सूचयति।

० ० ० एतानि शून्यानि कर्मदलिकानि सूचयन्ति ।

१= आवलिकाप्रमाणा प्रथमस्थितिः, तस्यां च पूर्वापूर्वस्पर्धकानि।

२= किट्टिकरणाद्धायाश्चरमसमयः ।

(अ) तदानीं मोहनीयस्य स्थितिबन्धोऽन्तर्मुहूर्ताधिकाश्चत्वारो मासाः (गाथा-११५)

(ब) तदानीं शेषकर्मणां स्थितिबन्धः संख्येयानि वर्षसहस्राणि । (गाथा-११५)

(स) तदानीं मोहनीयस्य स्थितिसत्त्वमन्तर्मुहूर्ताधिकाष्टवर्षप्रमितम् । (गाथा-११६)

(द) तदानीं घातिकर्मणां स्थितिसत्त्वं संख्यातवार्षिकम् (गाथा-११६)

(न) तदानीमघातिकर्मणां स्थितिसत्त्वमसंख्येयवर्षप्रमितं भवति । (गाथा-११६)

३= तदानीं समयोनद्व्यावलिकाबद्धनूतनदलमावलिकामात्रप्रथमस्थितिगतं च दलं वर्जयित्वा शेषं सर्वं मोहनीयदलं किट्टितया परिणमयति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ "यथोद्देशं निर्देशः" इति न्यायेन क्रमप्राप्तं षष्ठमधिकारं किट्टिवेदनाद्धाख्यं विवर्णयिषुराह—

**तत्तो य कोहपढमं ओकड्ढित्तु करेइ पढमठिइं।**
**वेयइ बंधो मोहस्स उ चउमासा पराण पुव्वुत्तो ॥११७॥(गीतिः)**

ततश्च क्रोधप्रथमामपकृष्य करोति प्रथमस्थितिम्।
वेदयति बन्धो मोहस्य तु चतुर्मासा परेषां पूर्वोक्तः ॥११७॥इति पदसंस्कारः।

'तत्तो' इत्यादि, 'ततश्च' किट्टिकरणाद्धाचरमसमयाच्चाऽनन्तरं क्षपकः' क्रोधप्रथमां' क्रोधप्रथमसंग्रहकिट्टिमपकृष्य प्रथमस्थितिं 'करोति' निर्वर्तयति 'वेदयति' अनुभवति च। अत्र चशब्दाभावेऽपि चशब्दार्थः समुच्चयः प्रतीयते। यथा—

**अहरहर्नयमानो गामश्वं पुरुषं पशुम्।**
**वैवस्वतो न तृप्यति सुराया इव दुर्मदी ॥१॥**

इत्यत्र चशब्दमन्तरेणाप्येकस्यां नयनक्रियायां गवादीनां समुच्चीयमानतया समुच्चयप्रतीतिरस्त्येव, तथा प्रस्तुतेऽपि क्षपकलक्षण एकस्मिन् कर्तरि करण-वेदनक्रिययोः समुच्चयश्चशब्दं विनाऽपि प्रतीयत इति भावः। उक्तं च **सप्ततिकाचूर्णौ**–"**किट्टीकरणद्धाए निट्ठिदाए कोहेण पडिवण्णो सेकाले पढमकिट्टीदलियं बिदियठिदिगयं उक्कड्ढेत्तु पढमठितियं करेइ वेदेइ य।**" इति।

इदमत्रहृदयम्–किट्टिकरणाद्धायां क्रोधादीनां या प्रभूताऽनुभागका तृतीया संग्रहकिट्टिरासीत्, सा किट्टिवेदकस्य प्रथमा संग्रहकिट्टिर्ज्ञातव्या, एवं किट्टिकारस्य या प्रथमा संग्रहकिट्टिरासीत्, सा किट्टिवेदकस्य तृतीया संग्रहकिट्टिर्बोद्धव्या, पश्चानुपूर्व्या संग्रहकिट्टीनां वेदनात्। न च किट्टिकरणाद्धायां या प्रथमसंग्रहकिट्टिरासीत्, सैवाऽत्र ग्रहीतव्या, विपर्यासस्य गौरवादिति वाच्यम्, विरोधोपलम्भात्। तथाहि–वक्ष्यत **एकविंशत्यधिकशततमया** (१२१) गाथया क्रोधादीनां वेद्यमानायाः संग्रहकिट्टया असंख्येयबहुभागा बध्यन्ते वेद्यन्ते चेति। तत्र बन्ध उदयश्चाऽनुभागमाश्रित्य प्रतिसमयमनन्तगुणहीनक्रमेण प्रवर्तेते। तेन किट्टिकारस्य या प्रभूतानुभागका तृतीया संग्रहकिट्टिः, सैवादौ वेदयितव्या, अन्यथा प्रथमसंग्रहकिट्टिवेदनाद्धायां पूर्णायामनन्तरसमये द्वितीयसंग्रहकिट्टिं वेदयंस्तस्या बह्वसंख्येयभागान् बध्नीत वेदयेच्च। तथा च सति तात्कालिकौ बन्धोदयावनुभागमाश्रित्य पूर्वसमयतोऽनन्तगुणौ प्रसज्येताम्, किट्टिकारस्य प्रथमसंग्रहकिट्टितो द्वितीयसंग्रहकिट्टया अनन्तगुणत्वात्। न च तदिष्यते,प्रतिसमयमनन्तगुणविशुद्धया प्रवर्धमानस्य किट्टिवेदकस्य बन्धोदययोरनुभागमाश्रित्याऽनन्तगुणहीनत्वात्। न चाऽत्रादौ तृतीयसंग्रहकिट्टिं वेदयतीत्युच्यतामिति वाच्यम्, पूर्वमहर्षिभिः **कषायप्राभृतचूर्णिकार-सप्ततिकाचूर्णिकारादिभिः** प्रथमं प्रथमसंग्रहकिट्टिं वेदयति, ततो द्वितीयां ततस्तृतीयामित्युक्तत्वाद् इति दिग्।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अथ किट्टिवेदनाद्धायाः प्रथमसमये द्वितीयस्थितिगतक्रोधप्रथमसंग्रहकिट्टितः प्रदेशाग्रं समाकृष्य प्रथमस्थितिं करोति । वेदनकालस्य पश्चानुपूर्व्या विशेषाधिकत्वेन वक्ष्यमाणत्वात् क्रोध-वेदनकालस्य साधिकत्रिभागे क्रोधप्रथमसंग्रहकिट्टिवेदनकालतश्चाऽऽवलिकयाऽधिककाले क्रोधप्रथम-संग्रहकिट्टयाः प्रथमस्थितिं करोति । तत्र दलनिक्षेपविधिश्चाऽयम्–उदयनिषेके स्तोकं दलं प्रक्षिपति, ततोऽनन्तरनिषेकेऽसंख्येयगुणं प्रक्षिपति । ततोऽप्यसंख्येयगुणं तृतीयनिषेके प्रक्षिपति । एवम-संख्येयगुणक्रमेण तावत् प्रक्षिपति, यावत् क्रोधप्रथमसंग्रहकिट्टिवेदनकालत आवलिकयाऽधिकां स्थितिं प्राप्नोति । ततो द्वितीयस्थितिगतप्रथमनिषेकेऽसंख्येयगुणं दलिकं प्रक्षिपति । तत ऊर्ध्वं विशेष-हीनक्रमेण प्रक्षिपति । यस्मिन् समये क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितिं करोति, तस्मिन्नेव समये क्रोधप्रथमसंग्रहकिट्टिं वेदयत्यपि ।

अथ किट्टिवेदनाद्धाप्रथमसमये स्थितिबन्धं भणति-'बंधो' इत्यादि, 'बन्धः' स्थितिबन्धः 'मोह-स्य' मोहनीयकर्मणस्तु 'चउमासाः' चातुर्मासिको भवति, प्राक्तनसमये योऽन्तर्मुहूर्त्ताऽधिकचातुर्मा-सिको जायते स्म, स इदानीमन्तर्मुहूर्त्तेन हीनो भूत्वा चातुर्मासिको जायत इत्यर्थः। 'परेषां' ज्ञानाव-रण-दर्शनावरणा-ऽन्तराय-नाम-गोत्र-वेदनीयरूपाणां कर्मणां बन्धः पूर्वोक्तो भवति, **पञ्चदशाधिक-शततमगाथया** शेषकर्मणां संख्येयवर्षसहस्राणि यः स्थितिबन्धः प्रोक्तः, स किट्टिवेदनप्रथमसमये-ऽपि संख्येयसहस्रवर्षाणि भवति, किन्तु पूर्वतः संख्येयगुणहीनो भवतीत्यर्थः। उक्तं च **कषायप्रा-भृतचूर्णौ**-"**किट्टीणं पढमसमयवेदगस्स संजलणाणं ठिदिबंधो चत्तारि मासा, णाम-गोदवेदणीयाणं चेव घादिकम्माणं ठिदिबंधो संखेज्जाणि वस्ससहस्साणि।**" इति ।।११७।।

किट्टिवेदनाद्धाप्रथमसमये प्रथमस्थितिमुक्त्वा सम्प्रति प्रथमस्थितौ द्वितीयस्थितौ च दलि-कावस्थानं प्ररूपयिषुः संग्रहगाथां भणति—

## वेइज्जमाणकिट्टीअ दलमसंखगुणणाअ पढमठिईए ।
## चरिमणिसेगा बीयपढमे असंखगुणमुवरि तु विसेसूणं ॥११८॥ (गीतिः)

वेद्यमानकिट्टया दलमसंख्यगुणनया प्रथमस्थितौ ।
चरमनिषेकाद् द्वितीयप्रथमेऽसंख्यगुणमुपरि तु विशेषोनम् ॥११८॥ इति पदसंस्कारः

'**वेइज्ज०**' इत्यादि, 'वेद्यमानकिट्टयाः' या संग्रहकिट्टिर्वेद्यते, तस्याः 'प्रथमस्थितौ' आदिम-स्थितौ 'दलं' प्रदेशाग्रम् 'असंख्यगुणनया' असंख्येयगुणकारेण भवतीति शेषः, असंख्येयगुणक्रमेण प्रथमस्थितौ दलिकस्य प्रक्षिप्तत्वात्, वेद्यमानसंग्रहकिट्टया उदयनिषेके स्तोकं दलं भवति, ततो द्वितीयनिषेकेऽसंख्येयगुणं भवति, ततोऽपि तृतीयनिषेकेऽसंख्येयगुणं भवति, एवमसंख्येयगुण-क्रमेण तावद् वक्तव्यम् , यावद् वेद्यमानसंग्रहकिट्टिप्रथमस्थितेश्चरमनिषेक इत्यर्थः ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**'चरिमणिसेगा'** इत्यादि, 'चरमनिषेकात्' वेद्यमानसंग्रहकिट्टिप्रथमस्थितेश्चरमनिषेकतो 'द्वितीयप्रथमे' वेद्यमानसंग्रहकिट्टिद्वितीयस्थितिप्रथमनिषेके दलिकमसंख्येयगुणं भवति, प्रथमस्थितेर्यश्चरमनिषेकः, तस्योपर्यन्तरकरणं परित्यज्य द्वितीयस्थितेर्यः प्रथमनिषेकः, तस्मिन् प्रथमस्थितिचरमनिषेकतोऽसंख्येयगुणं दलं भवतीत्यर्थः। कथमेतदवसीयते? इति चेत्, उच्यते—वेद्यमानसंग्रहकिट्टिप्रदेशसत्कर्मणोऽसंख्येयभागमात्रं दलं द्वितीयस्थितितः संख्यातगुणहीनायां प्रथमस्थितौ यथाविभागं प्रक्षिप्तम्, सत्तागतदलाऽसंख्येयभागस्योत्कीर्णत्वात्। द्वितीयस्थितौ तु बहुसंख्येयभागमात्रदलं द्वितीयस्थितेः संख्येयावलिकामात्रत्वेन प्रथमस्थितितः संख्यातगुणायां विशेषहीनक्रमेण तिष्ठति। तेन प्रथमस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेकेऽसंख्येयगुणं दलं भवति। किञ्च प्रथमस्थितिं कुर्वता प्रथमस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेकेऽसंख्येयगुणं दलिकं प्रक्षिप्तम्, तेनाऽपि सिध्यति—प्रथमस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेकेऽसंख्येयगुणं दलं भवतीति।

अथ द्वितीयस्थितेर्द्वितीयादिनिषेकेषु दलिकावस्थानं दर्शयति—**'उवरि'** इत्यादि' 'उपरितु' वेद्यमानसंग्रहकिट्टिद्वितीयस्थितिप्रथमनिषेकस्योपरि तु 'विशेषोनं' विशेषहीनक्रमेण दलिकं भवति। इदमुक्तं भवति—वेद्यमानसंग्रहकिट्टिद्वितीयस्थितेः प्रथमनिषेकतो द्वितीयस्थितिद्वितीयनिषेके विशेषहीनं दलिकं भवति, ततोऽपि तृतीयनिषेके विशेषहीनं दलमवतिष्ठते, एवं विशेषहीनक्रमेण तावद्वक्तव्यम्, यावद् वेद्यमानसंग्रहकिट्टिद्वितीयस्थितेश्चरमनिषेकः। यदुक्तं **कषायप्राभृतचूर्णौ—"जं किट्टिं वेदयदे, तिस्से उदयट्ठिदीए पदेसग्गं थोवं, विदियाए ट्ठिदीए पदेसग्गमसंखेज्जगुणं। एवमसंखेज्जगुणं जाव पढमट्ठिदीए चरिमट्ठिदि त्ति। तदो विदियट्ठिदीए जा आदिट्ठिदी, तिस्से असंखेज्जगुणं, तदो सव्वत्थ विसेसहीणं।"** इति।

इयं तु संग्रहगाथा। संग्रहगाथा नाम संक्षेपगाथा, सर्वासां वेद्यमानकिट्टीनां दलिकावस्थानस्यैकयैव गाथया कथनात्। प्रकृते तु क्रोधप्रथमसंग्रहकिट्ट्या वेद्यमानत्वात् क्रोधप्रथमसंग्रहकिट्ट्याः प्रथमस्थितौ दलिकमसंख्येयगुणक्रमेण तिष्ठति, ततः प्रथमस्थितेश्चरमनिषेकतो द्वितीयस्थितेः प्रथमनिषेके-ऽसंख्येयगुणं तिष्ठति, ततो विशेषहीनक्रमेण तावद्वक्तव्यम्, यावत् क्रोधप्रथमसंग्रहकिट्टिद्वितीयस्थितेश्चरमनिषेकः। अयमर्थो यथास्थानं क्रोधद्वितीयादिवेद्यसंग्रहकिट्टिप्ररूपणावसरे भावनीयः।

अवेद्यमानसंग्रहकिट्ट्यास्तु प्रथमस्थित्यभावाद् द्वितीयस्थितिप्रथमनिषेकतः प्रभृति चरमनिषेकं यावत् प्रदेशाग्रं विशेषहीनक्रमेण तिष्ठति। तदेवं दर्शितं संग्रहकिट्टिष्वनन्तरोपनिधया दलिकावस्थानम्। सम्प्रति परम्परोपनिधया तत् प्रतिपाद्यते, सर्वासां वेद्यमानाऽवेद्यमानसंग्रहकिट्टीनां द्वितीयस्थितेश्चरमनिषेकतः प्रथमनिषेकेऽसंख्येयभागाधिकं दलं भवति, स्थितिसत्कर्मणो

Jain Education International      For Private & Personal Use Only      www.jainelibrary.org

वर्षपृथक्त्वमात्रत्वात्। इदमुक्तं भवति–द्वितीयस्थितिनिषेकेषु प्रदेशाग्रं विशेषहीनं तेन क्रमेण तिष्ठति, येन प्रथमनिषेकतः पल्योपमाऽसंख्येयभागे गते प्रदेशाग्रं द्विगुणहीनं भवेत्। अत्र तु स्थितिसत्कर्मणो वर्षपृथक्त्वमात्रत्वाच्चरमनिषेकः पल्योपमाऽसंख्येयभागस्याऽसंख्येयभाग एव गते प्राप्यते, तेन द्वितीयस्थितिप्रथमनिषेकगतप्रदेशाग्रतो द्वितीयस्थितिचरमनिषेकगतप्रदेशाग्रे विशोधिते शेषोऽसंख्येयभागः प्राप्यते, स च वर्षपृथक्त्वसमयभाजितपल्योपमाऽसंख्येयभागप्रमाणनिषेकभागहारेण द्वितीयस्थितिप्रथमनिषेकं विभज्य यल्लभ्यते, तन्मात्रो भवति। यदुक्तं **कषायप्राभृते—**

**"विदियट्ठिदिआदिपदा सुद्धं पुण होदि उत्तरपदं दु।**
**सेसो असंखेज्जदिमो भागो तिस्से पदेसग्गे ॥१॥"** इति।

तथैव **तच्चूर्णावपि–"विदियाए ट्ठिदीए उक्कस्सिगाए पदेसग्गं तिस्से चेव जहण्णिगादो ट्ठिदीदो सुद्धं सुद्धसेसं पलिदोवमस्स असंखेज्जदिभागपडिभागियं।"** इति ॥११८॥

किट्टिवेदनाद्धायाः प्रथमसमये स्थितिषु दलिकावस्थानं प्ररूप्य सम्प्रति वेद्यमानसंग्रहकिट्ट्यास्तदितरासां च प्रथमस्थितौ द्वितीयस्थितौ चाऽनुभागावस्थानं प्रतिपिपादयिपुराह—

**वेइज्जमाणकिट्टीए सव्वठिईसु होन्ति सव्वा किट्टी।**
**नवरं उदये खलु मज्झिमाऽत्थि सव्वा पराण बिइयठिईए ॥११९॥**
**(आर्यागीतिः)**

वेद्यमानकिट्ट्याः सर्वस्थितिषु भवन्ति सर्वाः किट्टयः।
नवरमुदये खलु मध्यमाः सन्ति सर्वाः परासां द्वितीयस्थितौ ॥११९॥ इति पदसंस्कारः।

**'वेइज्ज०'** इत्यादि, **'वेद्यमानकिट्ट्याः'** वेद्यमानसंग्रहकिट्ट्याः **'सर्वस्थितिषु'** सर्वेषु प्रथमस्थितिनिषेकेषु द्वितीयस्थितिनिषेकेषु च सर्वाः **'किट्टयो'** अवान्तरकिट्टयो भवन्ति। सामान्येनाऽभिधायाऽपवादं दर्शयति–**'नवरं'** इत्यादि, नवरम् **'उदये'** उदयनिषेके खलु **'मध्यमाः'** असंख्येयभागप्रमाणास्तीव्रानुभागका मन्दानुभागकाश्च वर्जयित्वा शेषा अवान्तरकिट्टयः **'सन्ति'** विद्यन्ते, असंख्येयभागप्रमाणाऽवान्तरकिट्टीनां मध्यमावान्तरकिट्टिरूपेण परिणतत्वात्। इदमुक्तं भवति-वेद्यमानसंग्रहकिट्ट्याः सर्वा अवान्तरकिट्टयो द्वितीयस्थितेरेकैकनिषेके भवन्ति, एकैकस्या अवान्तरकिट्ट्याः प्रदेशास्तस्मिंस्तिष्ठन्तीत्यर्थः। न च कश्चिद् द्वितीयस्थितिनिषेकस्तादृशोऽस्ति, यस्मिन् कस्याश्चिदवान्तरकिट्ट्याः प्रदेशा न भवेयुः। प्रथमस्थितौ त्वयं विशेषः–द्वितीयस्थितिगतसर्वाऽवान्तरकिट्टिभ्यः प्रदेशाग्रमुत्कीर्योदयसमयादारभ्य प्रथमस्थितिचरमनिषेकं यावदेकैकाऽवान्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किट्टिप्रदेशान् प्रक्षिपति, किन्तूदयसमयेऽसंख्येयभागप्रमाणानां तीव्रानुभागकानां मन्दानुभागकानां चाऽवान्तरकिट्टीनां प्रदेशान् मध्यमावान्तरकिट्टिस्वरूपेण परिणमयति। एवं किट्टिवेदनाद्धाद्वितीयादिसमयेष्वप्युदये प्रविष्टानामसंख्येयभागप्रमाणानामवान्तरकिट्टीनां प्रदेशान् मध्यमावान्तरकिट्टिस्वरूपेण परिणमयति, तेनोदयनिषेके सर्वा अवान्तरकिट्टयो न भवन्ति, किन्तु बह्वसंख्येयभागप्रमाणा मध्यमा भवन्ति, शेषप्रथमस्थितिनिषेकेषु तु वेद्यमानसंग्रहकिट्टिसर्वावान्तरकिट्टयो भवन्ति।

न चोदयसमयेऽनुभागह्रासोऽसिद्ध इति वाच्यम्, **कषायप्राभृतचूर्णिकारादीनां** वचनप्रामाण्येन तस्य सिद्धत्वात्। उक्तं च **कषायप्राभृतचूर्णिकारैः**–"**तदो तिस्से उदयावलियाए उदयसमयं मोत्तूण सेसेसु समएसु जा संगहकिट्टी वेदिज्जमाणिगा, तिस्से अंतरकिट्टीओ सव्वाओ ताव धरिज्जंति, जाव ण उदयं पविट्ठाओ त्ति। उदयं जाधे पविट्ठाओ, ताधे चेव तिस्से संगहकिट्टीए अग्गकिट्टिमादिं कादूण उवरि असंखेज्जदिभागो जहण्णियं किट्टिमादिं कादूण हेट्ठा असंखेज्जदिभागो च मज्झमकिट्टीसु परिणमति।**" इति।

अथाऽवेद्यमानसंग्रहकिट्टीनामनुभागावस्थानं प्ररूपयिषुराह–'**सव्वा**' इत्यादि, तत्र 'परासां' वेद्यमानसंग्रहकिट्टितोऽन्यासामवेद्यमानसंग्रहकिट्टीनामित्यर्थः, 'द्वितीयस्थितौ' द्वितीयस्थितिगतसर्वनिषेकेषु 'सर्वाः' अवेद्यमानसंग्रहकिट्टिसर्वावान्तरकिट्टयो भवन्ति, एकैकावान्तरकिट्टयाः प्रदेशा द्वितीयस्थितिगतैकैकनिषेके तिष्ठन्तीत्यर्थः। प्रथमस्थितेरभावात् प्रथमस्थितावद्वेद्यमानसंग्रहकिट्टयवान्तरकिट्टयो न भवन्ति।

इयं तु संग्रहगाथा। तेन प्रकृते क्रोधप्रथमसंग्रहकिट्टया वेद्यमानत्वात् क्रोधप्रथमसंग्रहकिट्टयाः सर्वाऽवान्तरकिट्टयः सर्वेषु द्वितीयस्थितिनिषेकेषूदयनिषेकं च वर्जयित्वा सर्वेषु प्रथमस्थितिनिषेकेषु भवन्ति, उदयनिषेके पुनर्बह्वसंख्येयभागप्रमाणा मध्यमा अवान्तरकिट्टयो भवन्ति। अवेद्यमानानां क्रोधद्वितीयादिसंग्रहकिट्टीनां द्वितीयस्थितिसर्वनिषेकेषु सर्वा अवान्तरकिट्टयो भवन्ति। एवं शेषसंग्रहकिट्टिवेदनप्ररूपणावसरेऽप्ययमर्थो भावनीयः। यदुक्तं **कषायप्राभृतचूर्णौ**–"**कोधस्स पढमसंगहकिट्टिं वेदेंतस्स तिस्से संगहकिट्टीए एक्केक्का किट्टी विदियट्ठिदीसु सव्वासु पढमट्ठिदीसु च उदयवज्जासु एक्केक्का किट्टी सव्वासु ट्ठिदीसु। उदयट्ठिदीए पुण वेदिज्जमाणियाए संगहकिट्टीए जाओ किट्टीओ, तासिमसंखेज्जा भागा। सेसाणमवेदिज्जमाणिगाणं संगहकिट्टीणमेक्केक्का किट्टी सव्वासु विदियट्ठिदीसु, पढमट्ठिदीसु णत्थि।**" इति ॥११९॥

अथ किट्टिवेदनाद्धाप्रथमसमये मोहनीयस्य स्थितिसत्त्वमनुभागसत्त्वं चाभिधातुकामः प्राह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ठिइसंतं मोहस्स वरिसट्ठगं देसघाइ रससंतं ।**
**णवरं समयूणावलियाए कोहस्स सव्वघाइ भवे ॥१२०॥ (गीतिः)**

स्थितिसत्त्वं मोहस्य वर्षाष्टकं देशघाति रससत्त्वम् ।
नवरं समयोनावलिकायां क्रोधस्य सर्वघाति भवेत् ॥१२०॥इति पदसंस्कारः ।

'**ठिइसंतं**' इत्यादि, तत्र 'मोहस्य' किट्टिवेदनाद्धाप्रथमसमये संज्वलनक्रोध-मान-माया-लोभात्मकमोहनीयस्य स्थितिसत्त्वं वर्षाष्टकं भवति, प्राक्तनसमयेऽन्तर्मुहूर्त्ताधिकान्यष्टौ वर्षाणि यत् स्थितिसत्त्वमासीत्, तत् किट्टिवेदनकालप्रथमसमयेऽष्टवार्षिकं जायत इत्यर्थः । शेषकर्मणां तु स्थिति-सत्त्वं पूर्ववदवसेयम्। तथाहि-मोहनीयवर्जघातित्रयस्य स्थितिसत्त्वं संख्येयसहस्रवर्षप्रमाणमघातित्रयस्य चाऽसंख्येयानि वर्षाणि भवति । किन्तु पूर्वत एकस्थितिखण्डेन हीनं भवति । उक्तं च कषाय-प्राभृतचूर्णौ–"**किट्टीकरणे णिट्ठिदे किट्टीणं पढमसमयवेदगस्स णामागोदवेदणी-याणं ठिदिसंतकम्ममसंखेज्जाणि वस्साणि, मोहणीयस्स ठिदिसंतकम्ममट्ठ वस्साणि । तिण्हं घादिकम्माणं ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि ।**" इति।

अथ मोहनीयस्या-ऽनुभागसत्त्वं भणति–'**देसघाइ**' इत्यादि, तत्र संज्वलनक्रोध-मान-माया-लोभात्मकमोहस्य 'रससत्त्वम्' अनुभागसत्त्वं देशघाति भवति । तत्राऽपि द्विसमयोनद्व्यावलिका-बद्धनूतनाऽनुभागः सत्कर्मणि स्पर्धकरूपेण विद्यते, किट्टिकरणकाले किट्टिरूपेण बन्धाभावात् शेषः सर्वोऽनुभागः किट्टिस्वरूपो वर्तते । यदभ्यधायि **कषायप्राभृतचूर्णौ–"संजलणाणं जे दो आवलियबंधा दुसमयूणा, ते देसघादी, तं पुण फद्दयगदं । सेसं किट्टिगदं ।**" इति । क्रोधस्यानुभागसत्तायामपवादं दर्शयति–'**णवरं**' इत्यादि, नवरं 'समयोनावलिकायां' एकसमय-न्यूनोदयावलिकायां 'क्रोधस्य' संज्वलनक्रोधस्य रससत्त्वं सर्वघाति भवति, तत्र पुरातनाऽनुभाग-सत्कर्मणो विद्यमानत्वेन सर्वघातित्वे विरोधाभावात् । यत् प्रत्यपादि **कषायप्राभृतचूर्णौ– "अणुभागसंतकम्मं कोहसंजलणस्स जं संतकम्मं समयूणाए उदयावलियाए छद्दिदल्लिगाए तं सव्वघादि ।**" इति । भावार्थः पुनरयम्–किट्टिकरणाद्धाया द्विचरमसमयं यावत् किट्टितया परिणतसकलप्रदेशाग्रतः स्पर्धकगतसकलप्रदेशाग्रमसंख्येयगुणं भवति, स्पर्धकगत-गतसकलप्रदेशसत्कर्मणोऽसंख्येयभागमात्रस्य दलस्य किट्टितया परिणतत्वात् । किट्टिकरणाद्धा-चरमसमये तु स्पर्धकगतं सर्वं दलं किट्टितया परिणमयति, नवरं क्रोधस्य विमुच्यमानप्रथमस्थिति-चरमाऽऽवलिकामात्रस्थितिगतं संज्वलनचतुष्कस्य च समयोनाऽऽवलिकाद्वयेन बद्धनूतनदलगतमनु-भागसत्कर्म किट्टितया न परिणमयति, उदयावलिकागतत्वाद् नूतनबद्धत्वाच्च ।

किट्टिवेदनाद्धायाः प्रथमसमये क्रोधस्य प्राङ्मुक्ताऽऽवलिकायाः प्रथमनिषेकगतं दलं संक्रमेण किट्टितया परिणम्यते । तेन किट्टिवेदनाद्धायाः प्रथमसमये क्रोधस्य समयोन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विमुच्यमानावलिकागतमनुभागसत्कर्म स्पर्धकस्वरूपेण सर्वघाति विद्यते, उदयावलिकायां प्राक्तनाऽनुभागस्य सद्भावेन सर्वघातित्वसंभवात् । तथा संज्वलनचतुष्कस्य द्विसमयोनाऽऽवलिकाद्वयबद्धनूतनदलगता-ऽनुभागसत्कर्म स्पर्धकरूपेण देशघाति विद्यते, किट्टिकरणाद्धायां देशघातिस्पर्धकानां बन्धात् । शेषं सर्वमनुभागसत्कर्म किट्टिगतं भवति ॥१२०॥

एतर्हि किट्टिवेदनाद्धाप्रथमसमये किट्टीनां बन्धं वेदनं चाऽभिधित्सुराह—

**कोहाइपढमसंगहकिट्टीए बहुअसंखभागमिआ ।**
**मज्झिमकिट्टी बज्झंते वेइज्जंति कोहपढमाए ॥१२१॥(गीतिः)**

क्रोधादिप्रथमसंग्रहकिट्ट्या बहुसङ्ख्यभागमिताः ।
मध्यमकिट्टयो बध्यन्ते वेद्यन्ते क्रोधप्रथमायाः ॥१२१॥ इति पदसंस्कारः ।

'**कोहाइ०**' इत्यादि, किट्टिवेदनाद्धाप्रथमसमये 'क्रोधादिप्रथमसंग्रहकिट्ट्याः' क्रोध-मान-माया-लोभ-लक्षणानां संज्वलनकषायाणां प्रथमसंग्रहकिट्ट्याः 'बहुसङ्ख्यभागमिताः' बहुसंख्येयभाग-प्रमाणाः 'मध्यमकिट्टयो' मध्यमावान्तरकिट्टयो बध्यन्ते, क्रोधादीनां शेषसंग्रहकिट्टीनामवान्तर-किट्टयो न बध्यन्ते । क्रोधप्रथमायाः'संज्वलनक्रोधप्रथमसंग्रहकिट्ट्या बहुसंख्येयभागप्रमाणा मध्यम-किट्टयो 'वेद्यन्ते' अनुभूयन्ते, शेषाः संग्रहकिट्टयो न वेद्यन्ते । प्रतिपादितं च **श्रीकषायप्राभृत-चूर्णौ—"ताहे कोहस्स पढमाए संगहकिट्टीए असंखेज्जा भागा उदिण्णा, एदिस्से चेव कोहस्स पढमाए संगहकिट्टीए असंखेज्जा भागा बज्झंति, सेसाओ दो संगह-किट्टीओ ण बज्झंति, ण वेदिज्जंति । ×××किट्टीणं पढमसमयवेदगस्स माणस्स पढमाए संगहकिट्टीए किट्टीणमसंखेज्जा भागा बज्झंति, सेसाओ संगहकिट्टीओ ण बज्झंति, एवं मायाए, एवं लोभस्स वि ।"** इति ।

भावार्थः पुनरयम्—किट्टिवेदनाद्धायाः प्रथमसमयेऽपूर्वस्पर्धकानि न बध्नाति, किन्तु सर्वज-घन्याऽवान्तरकिट्टिपर्यवसानास्तत्तत्कषायप्रथमसंग्रहकिट्ट्यवान्तरकिट्टीनामेकासंख्येयभागप्रमाणा अध-स्तनीर्मन्दानुभागका अवान्तरकिट्टीस्तथा सर्वोत्कृष्टावान्तरकिट्टिपर्यवसाना असंख्येयभागप्रमाणा उप-रितनीः प्रभूतानुभागका अवान्तरकिट्टीर्वर्जयित्वा शेषा मध्यमाः संज्वलनचतुष्टयस्य प्रथमसंग्रहकि-ट्ट्यवान्तरकिट्टीर्बध्नाति, तत्तदवान्तरकिट्टिगतानुभागतो हीनानुभागका अधिकानुभागकाश्चावान्तर-किट्टीर्न बध्नातीत्यर्थः । एवं क्रोधस्य प्रथमसंग्रहकिट्टिसत्कावान्तरकिट्टीनामसंख्येयभागप्रमाणा अध-स्तनीर्मन्दानुभागका असंख्येयभागमात्रीश्चोपरितनीः प्रभूतानुभागका अवान्तरकिट्टीर्मुक्त्वा शेषा मध्यमाऽवान्तरकिट्टीर्वेदयति । इदन्त्ववधेयम्—क्रोधप्रथमसंग्रहकिट्ट्या बध्यमानाऽवान्तरकिट्टयो वेद्यमानाऽवान्तरकिट्टितो विशेषहीना भवन्ति, बन्धत उदयस्याऽनन्तगुणत्वेन बध्यमानाऽवान्तर-किट्टितो वेद्यमानाऽवान्तरकिट्टीनां विशेषाधिकत्वस्य वक्ष्यमाणत्वात् ॥१२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org




सङ्केतस्पष्टीकरणम्—

१=क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमय उदयसमयादारभ्याऽसंख्येयगुणक्रमेण स्ववेदनकालत आवलिकाधिकायां स्थितौ दलं प्रक्षिप्य प्रथमस्थितिं करोति। (गाथा–११७)

२=क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितिः, सा च क्रोधकिट्टिवेदनकालस्य साधिकत्रिभागमाना प्रथमसंग्रहकिट्टिवेदनकालतश्चाऽऽवलिकयाऽधिका। (गाथा–११७)

३=क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धा

(अ) क्रोधप्रथमसंग्रहकिट्टिवेदनप्रथमसमये संज्वलनचतुष्कस्य स्थितिबन्धश्चत्वारो मासाः। (गा०-११७)

(ब) तदानीं शेषकर्मणां स्थितिबन्धः संख्येयवर्षसहस्राणि भवति (गाथा—११७)

४=क्रोधप्रथमसंग्रहकिट्टिदलमुदयसमयादारभ्य प्रथमस्थितिचरमसमयं यावदसंख्येयगुणक्रमेणाऽवतिष्ठते। (गाथा—११८)

५=द्वितीयस्थितिप्रथमनिषेकः, तस्मिंश्च प्रथमस्थितिचरमनिषेकतोऽसंख्येयगुणं दलमवतिष्ठते (गाथा—११८), ततः परं विशेषहीनक्रमेण भवति।

६=द्वितीयस्थितिगतक्रोधप्रथमसंग्रहकिट्टिसर्वावान्तरकिट्टिभ्यः प्रदेशा आकृष्य प्रथमस्थितौ प्रक्षिप्यन्ते। (गाथा—११९)

७=असंख्येयभागप्रमाणास्तीव्रानुभागका अवान्तरकिट्टयस्तथा

८=असंख्येयभागप्रमाणा मन्दानुभागका अवान्तरकिट्टयो मध्यमावान्तरकिट्टिस्वरूपेण परिणताः। एवं प्रतिसमयमुदयसमये मध्यमावान्तरकिट्टिस्वरूपेण परिणमन्ति। (गाथा—११९)

क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमये मोहनीयस्य स्थितिसत्त्वमष्टवर्षप्रमितं भवति। (गाथा—१२०)

९=क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमये समयोनावलिकागतमनुभागसत्त्वं सर्वघाति भवति। (गा०-१२०)

१०=उदयसमये स्पर्धकगतानुभागः संक्रमेण किट्टितया परिणतः। (गाथा—१२०)

११=क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमये द्विसमयोनावलिकाद्वयबद्धनूतनदलं देशघातिस्पर्धकगतं तिष्ठति। क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमयतः प्रभृति क्रोध-मान-माया-लोभानां प्रथमसंग्रहकिट्टेर्बहुसंख्येयभागप्रमाणा अवान्तरकिट्टयो बध्यन्ते। (गाथा—१२१)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतमध उपरि च विमुच्यमानाऽवान्तरकिट्टीनां मध्यमाऽवान्तरकिट्टीनां चाऽल्पबहुत्वं वक्तुकाम आह–

**कोहपढमाअ हेट्ठिमणुभया थोवा तओ हविज्जन्ति**
**अहिआ हेट्ठिमुदिण्णा तत्तो उवरिल्लअणुभया अहिआ ॥१२२॥(गीतिः)**
**तत्तो उवरिमुदिण्णा विसेसअहिया हवन्ति तत्तो वि ।**
**होन्ति असंखेज्जगुणा उभयाउ अवन्तरा किट्टी ॥१२३॥**

क्रोधप्रथमाया अधस्तनानुभय्यः* स्तोकास्ततो भवन्ति ।
अधिका अधस्तनोदीर्णास्तत उपरितनानुभय्योऽधिकाः ॥१२२॥
तत उपरितनोदीर्णा विशेषाधिका भवन्ति ततोऽपि ।
भवन्त्यसंख्येयगुणा उभय्यो-ऽवान्तराः किट्टयः ॥१२३॥ इति पदसंस्कारः ।

'कोह०' इत्यादि,इह खल्वधस्तनीरसंख्येयभागप्रमाणा अवान्तरकिट्टीरुपरितनीश्चाऽसंख्येयभागप्रमाणा अवान्तरकिट्टीर्विमुच्य शेषा अवान्तरकिट्टयो बध्यन्ते, तथैवाऽधस्तनीरसंख्येयभागप्रमिता उपरितनीश्चा-ऽसंख्येयभागप्रमाणा अवान्तरकिट्टीः परित्यज्य शेषा अवान्तरकिट्टयो वेद्यन्ते । किन्तु बध्यमानावान्तरकिट्टितो वेद्यमानावान्तरकिट्टयो विशेषाधिका भवन्ति । तत्र या अवान्तरकिट्टयो न बध्यन्ते, नापि स्वरूपतो वेद्यन्ते, ता अनुभय्य उच्यन्ते । यद्यपि सर्वकिट्टिगतदलमाकृष्य प्रथमस्थितिं करोति, तथापि कियतीश्चिदुपरितन्योऽधस्तन्यश्चावान्तरकिट्टय उदयनिषेके मध्यमावान्तरकिट्टिस्वरूपेण परिणमन्ति। तत्र मध्यमावान्तरकिट्टिरूपेण परिणता मन्दानुभागका अधस्तनाऽनुभय्यो-ऽवान्तरकिट्टय उच्यन्ते, तीव्राऽनुभागकास्तूपरितनाऽनुभय्योऽवान्तरकिट्टयो निगद्यन्ते । अधस्तन्यो मन्दानुभागका या अवान्तरकिट्टयः केवलं वेद्यन्ते, न बध्यन्ते,ता अधस्तनोदीर्णा अवान्तरकिट्टयो व्यवह्रियन्ते । उपरितन्यस्तीव्रानुभागका या अवान्तरकिट्टयः केवलं वेद्यन्ते,न बध्यन्ते,ता उपरितनोदीर्णा अवान्तरकिट्टयो व्यपदिश्यन्ते । या मध्यमा अवान्तरकिट्टयो बध्यन्ते वेद्यन्ते च,ता उभय्योऽवान्तरकिट्टय उच्यन्ते । अथ गाथोक्ताऽल्पबहुत्वं व्याख्यायते–'क्रोधप्रथमायाः' क्रोधप्रथमसंग्रहकिट्ट्या अधस्तनाऽनुभय्योऽवान्तराः किट्टयः 'स्तोकाः' अल्पा भवन्ति, ताश्च क्रोधप्रथमसंग्रहकिट्टिसर्वावान्तरकिट्टीनामसंख्येयभागप्रमाणा मन्दानुभागका न बध्यन्ते, नापि स्वस्वरूपेण वेद्यन्ते । 'ततः' अधस्तनानुभयावान्तरकिट्टितो 'अधिकाः' विशेषाधिका अधस्तनोदीर्णा अवान्तरकिट्टयो भवन्ति,ताश्चावान्तरकिट्टयः केवलमनुभूयन्ते,न बध्यन्ते । 'ततः' अधस्तनोदीर्णावान्तरकिट्टित उपरितनानुभय्यो वान्तरकिट्टयो 'अधिकाः' विशेषाधिका भवन्ति, ताश्च तीव्रानुभागका अवान्तरकिट्टयो न बध्यन्ते, नापि स्वस्वरूपेण वेद्यन्ते । 'ततः' उपरितनानुभयावान्तरकिट्टित उपरितनोदीर्णा अवान्तरकिट्टयो

★ अयं प्रयोगः सिद्धहेमव्याकरणाद्यनुसारेण बोध्यः। पाणिनीया हि उभयशब्दाद् ङीप्रत्ययं नेच्छन्ति, ततस्तन्मतानुसारेणाऽधस्तनानुभया इति प्रयोगो भवेत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषाधिका भवन्ति, ताश्चावान्तरकिट्टयः केवलं वेद्यन्ते, न बध्यन्ते । 'ततोऽपि' उपरितनोदीर्णावान्तरकिट्टितोऽपि, उभय्यः=या अवान्तरकिट्टयो बध्यन्ते वेद्यन्ते च, ताः, असंख्येयगुणा भवन्ति, उपरितनोदीर्णाऽवान्तरकिट्टीनां क्रोधप्रथमसंग्रहकिट्टिगतसकलाऽवान्तरकिट्टयसंख्येयभागप्रमाणत्वात्, एतासां च क्रोधप्रथमसंग्रहकिट्टिगतसकलाऽवान्तरकिट्टिबहुसंख्येयभागप्रमाणत्वात् । गुणकारश्चात्र पल्योपमाऽसंख्येयभागमात्रः । उक्तं च **कषायप्राभृतचूर्णौ–"पढमाए संगहकिट्टीए हेट्ठदो जाओ किट्टीओ ण बज्झंति, ण वेदिज्जंति, ताओ थोवाओ । जाओ किट्टीओ वेदिज्जंति, ण बज्झंति, ताओ विसेसाहियाओ । तिस्से चेव पढमाए संगहकिट्टीए उवरि जाओ किट्टीओ ण बज्झंति, ण वेदिज्जंति, ताओ विसेसाहियाओ । उवरि जाओ वेदिज्जंति, ण बज्झंति, ताओ विसेसाहियाओ । मज्झे जाओ किट्टीओ बज्झंति च वेदिज्जंति च, ताओ असंखेज्जगुणाओ ।"** इति ॥१२२-१२३॥

अथ किट्टिवेदनाद्धाप्रथमसमयात्प्रभृति मोहनीयस्याऽनुभागाऽपवर्तनामुत्कृष्टानुभागबन्धोदयाल्पबहुत्वं च व्याजिहीर्षुराह—

**मोहस्सऽणुभागाण अणुसमयोवट्टणा गुरू किट्टी ।**
**गोमुत्तियाअ उदये बंधेऽणुखणं अणंतगुणहीणा ॥१२४॥ (गीतिः)**

मोहस्याऽनुभागानामनुसमयाऽपवर्तना गुरुः किट्टिः ।
गोमूत्रिकयोदये बन्धेऽनुक्षणमनन्तगुणहीना ॥१२४॥ इति पदसंस्कारः ।

**'मोहस्स०'** इत्यादि, 'मोहस्य' किट्टिवेदनाद्धाप्रथमसमयतः प्रभृति मोहनीयकर्मणोऽनुभागानामनुसमयापवर्तना भवतीत्युपस्कारः । निरूपितं च **कषायप्राभृतचूर्णौ–"किट्टीणं पढमसमयवेदगप्पहुडि मोहणीयस्स अणुभागाणमणुसमयोवट्टणा ।"** इति । अयम्भावः–पूर्वं किट्टिकरणाद्धायां किट्टीः कुर्वतः क्षपकस्य रसघातोऽन्तर्मुहूर्तकालेन भवति स्म, इतः प्रभृति संग्रहकिट्टिभेदेन यो द्वादशविधः किट्टिस्वरूपोऽनुभागोऽस्ति, तस्य समये समयेऽनन्तगुणहान्या घातो भवति, स घातोऽनुसमयापवर्तना व्यपदिश्यते । ज्ञानावरणादिकर्मणां तु पूर्ववदन्तर्मुहूर्तकालेनाऽनुभागघातो जायते । तथा सर्वासामपि स्थितिघातः पूर्ववत् प्रवर्तते ।

'गुरू' इत्यादि, 'गुरुः किट्टिः' किट्टिवेदनाद्धायाः प्रथमसमयतः प्रभृत्युत्कृष्टावान्तरकिट्टिर्गोमूत्रिकयोदये बन्धे च 'अनुक्षणं' प्रतिसमयमनन्तगुणहीना भवति । इदमुक्तं भवति-किट्टिवेदनाद्धायाः प्रथमसमये क्रोधप्रथमसंग्रहकिट्ट्या या अनन्ता मध्यमा अवान्तरकिट्टय उदयन्ति, तासु या सर्वोत्कृष्टाऽवान्तरकिट्टिः, सा प्रभूताऽनुभागका भवति । ततः किट्टिवेदनाद्धायाः प्रथम एव समये क्रोधप्रथमसंग्रहकिट्ट्या या अनन्ता मध्यमा अवान्तरकिट्टयो बध्यन्ते, तासु या सर्वोत्कृष्टाऽवान्तरकिट्टिः, साऽनन्तगुणहीना भवति । ततो द्वितीयसमय उदययुत्कृष्टाऽवान्तरकिट्टिरनन्तगुणहीना भवति । ततो-

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

ऽपि द्वितीय एव समये बन्धयुत्कृष्टाऽवान्तरकिट्टिरनन्तगुणहीना भवति। ततोऽपि तृतीयसमय उदय उत्कृष्टाऽवान्तरकिट्टिरनन्तगुणहीना भवति। ततस्तृतीयस्मिन्नेवसमये बन्ध उत्कृष्टाऽवान्तर-किट्टिरनन्तगुहीना भवति। एवं गोमूत्रिकया तावद्वक्तव्यम्, यावत् किट्टिवेदनाद्धायाश्चरमसमयः। तत्र गोः=बलिवर्दः, तस्या-ऽध्वनि गच्छतो वक्रतयेतस्ततः पतिता गोमूत्रधारा गोमूत्रिका निगद्यते, यथा गोमूत्रिका वक्राकारेण वामभागतो दक्षिणभागे दक्षिणभागतश्च वामभागे पतति, तथोत्कृष्टावान्तरकिट्टिरप्यनन्तगुणहीनत्वेनोदयतो बन्धे बन्धतश्चोदये तिष्ठति। तेनाऽनन्तगुणहीन-क्रमो गोमूत्रिकोपमया दर्शितः। प्रत्यपादि च **कषायप्राभृतचूर्णौ– "पढमसमयकिट्टीवे-दगस्स कोहकिट्टी उदये उक्कस्सिया बहुगी, बंधे उक्कस्सिया अणंतगुणहीणा। बिदियसमये उदये उक्कस्सिया अणंतगुणहीणा, बंधे उक्कस्सिया अणंतगुणहीणा। एवं सव्विस्से किट्टीवेदगद्धाए।"** इति ॥१२४॥

**गोमूत्रिकया बन्धोदयावान्तरकिट्टीनामुत्कृष्टरसमाश्रित्य चित्रम्**




सङ्केतस्पष्टीकरणम्—

ज=जघन्यावान्तरकिट्टिः।

उ=उत्कृष्टावान्तरकिट्टिः।

←=एतच्चिह्नमनन्तगुणहीनतामावेदयति।

१=बध्यमानावान्तरकिट्टयः स्तोकाः।

२=बध्यमानावान्तरकिट्टित उदयमानावान्तरकिट्टयो विशेषाधिकाः।

३=एवमग्रेऽपि बन्धोदययोर्गोमूत्रिकयाऽनन्तगुणहीनक्रमेण तत्तत्समयोत्कृष्टावान्तरकिट्टिर्वाच्या।

अथ किट्टिवेदनाद्धायां बन्धोदयजघन्यावान्तरकिट्ट्यल्पबहुत्वमवान्तरकिट्टिघातं च वक्तु-कामः प्राह—

## गोमुत्तीअ पडिखणं बंधे उदये अणंतगुणहीणा।
## हस्सा णासइ संगहकिट्टीणुवरिमअसंखंसं ॥१२५॥

गोमूत्रिकया प्रतिक्षणं बन्धयुदयेऽनन्तगुणहीना।
हस्वा नाशयति संग्रहकिट्टीनामुपरितनाऽसंख्यांशम् ॥१२५॥इति पदसंस्कारः।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

'**गोमुत्तीअ**' इत्यादि, गोमूत्रिकया 'प्रतिक्षणं' प्रतिसमयं बन्ध उदये च अनन्तगुणहीना 'ह्रस्वा' जघन्या-ऽवान्तरकिट्टिर्भवति । इदमुक्तं भवति–किट्टिवेदनाद्धायाः प्रथमसमये क्रोधस्य या मध्यमा अवान्तरकिट्टयो बध्यन्ते, तासु या सर्वजघन्याऽनुभागकाऽवान्तरकिट्टिर्भवति, सा प्रभूताऽनुभागका भवति, ततः किट्टिवेदनाद्धायाः प्रथम एव समये क्रोधस्य या मध्यमा अवान्तरकिट्टय उदयन्ति, तासु या सर्वजघन्यानुभागकावान्तरकिट्टिः साऽनन्तगुणहीना भवति । ततः किट्टिवेदनाद्धाया द्वितीयसमये बन्धे सर्वजघन्याऽवान्तरकिट्टिरनन्तगुणहीना भवति, ततोऽपि द्वितीय एव समय उदये सर्वजघन्याऽवान्तरकिट्टिरनन्तगुणहीना भवति, एवं गोमूत्रिकया तावद्वक्तव्यम्, यावत् किट्टिवेदनाद्धायाश्चरमसमयः । यथा गोमूत्रिका वक्राकारेण वामभागतो दक्षिणभागे पतति, दक्षिणभागतश्च वामभागे प्रपतति, तथा जघन्याऽवान्तरकिट्टिरप्यनन्तगुणहीनत्वेन बन्धत उदययुदयतश्च बन्धेऽवतिष्ठते । तेना-ऽनन्तगुणहीनक्रमो गोमूत्रिकोपमया दर्शितः । न्यगादि च **कषायप्राभृतचूर्णौ**—"**पढमसमए बंधे जहण्णिया किट्टी तिव्वाणुभागा, उदये जहण्णिया किट्टीअणंतगुणहीणा । विदियसमये बंधा जहण्णिया किट्टी अणंतगुणहीणा, उदये जहण्णिया अणंतगुणहीणा । एवं सव्विस्से किट्टीवेदगद्धाए समये समये णिव्वग्गणाओ जहण्णियाओ वि य ।**" इति ।

**गोमूत्रिकया बन्धोदयावान्तरकिट्टीनां जघन्यरसमाश्रित्य चित्रम्**




संकेतस्पष्टीकरणम्––

ज=जघन्यावान्तरकिट्टिः ।

उ=उत्कृष्टावान्तरकिट्टिः ।

←=एतच्चिह्नमनन्तगुणहीनतामावेदयति ।

१=एवमग्रेऽपि बन्धोदयो गोमूत्रिकयाऽनन्तगुणहीनक्रमेण तत्तत्समयजघन्यावान्तरकिट्टिर्वक्तव्या ।

अथाऽनन्तरोक्तगाथया प्रतिपादितायाः मोहनीयाऽनुभागानामनुसमयापवर्तनायाः फलं दर्शयति–'**णासइ**' इत्यादि, तत्र 'संग्रहकिट्टीनां' द्वादशानां संग्रहकिट्टीनामुपरितनाऽसङ्ख्यांशं 'नाशयति' विघातयति, किट्टिवेदनाद्धाप्रथमसमये द्वादशसंग्रहकिट्टीनां तीव्रानुभागका असंख्येयभागप्रमाणा अनन्ता अवान्तरकिट्टीरपवर्त्य मन्दानुभागकाऽवान्तरकिट्टिस्वरूपेण स्थापयतीति तात्पर्यम् । अत्रापि च **कषायप्राभृतचूर्णौ**—"**किट्टीणं पढमसमयवेदगो बारसण्हं पि संगह-**

**किट्टीणमग्गमादिं कादूण एक्केक्किस्से संगहकिट्टीए असंखेज्जदिभागं विणासेइ।"** इति।

एवं द्वितीयादिसमयेष्वप्यसंख्येयभागप्रमाणास्तीव्रानुभागका अवान्तरकिट्टीर्घातयति ॥१२५॥

ननु कस्याः संग्रहकिट्ट्या दलं कुत्र संक्रमयति, ?किं सर्वत्र, उताऽस्ति तत्र कश्चिद् विशेषः ? इति पृष्ट उत्तरयति—

**संगहकिट्टीण दलं हेट्ठे संकामए ण उण उप्पिं।**
**संकामइ तास दलं तावं जाव सगहेट्ठिमा पढमा ॥१२६॥ (गीतिः)**

संग्रहकिट्टीनां दलमधस्तात् संक्रमयति न पुनरुपरि।
संक्रमयति तासां दलिकं तावद् यावत् स्वाधस्तना प्रथमा ॥१२६॥ इति पदसंस्कारः।

'**संगह०**' इत्यादि, किट्टिवेदकः 'संग्रहकिट्टीनां' द्वादशानां संग्रहकिट्टीनां 'दलं' प्रदेशाग्रमधस्तात् संक्रमयति, न पुनरुपरि। नन्वधस्तात् किं सर्वत्र संक्रमयति ? उताऽस्ति कश्चित् विशेषः ? इत्यत आह-'**संकामइ**' इत्यादि, तत्र 'तासां' द्वादशसंग्रहकिट्टीनां दलं तावत् संक्रमयति, यावत् स्वाधस्तना 'प्रथमा' प्रथमसंग्रहकिट्टिः, न ततोऽप्यधस्तात्। अत्र तत्तत्कषायस्य द्वितीयस्यां तृतीयस्यां च संग्रहकिट्टावपवर्तनासंक्रमेण दलं सङ्क्रमयति, परप्रथमसंग्रहकिट्टौ तु यथाप्रवृत्तसंक्रमेण, बध्यमानप्रकृतीनां परप्रकृतौ यथाप्रवृत्तसंक्रमसद्भावात्। तद्यथा-क्रोधप्रथमसंग्रहकिट्ट्याः प्रदेशाग्रं क्रोधस्य द्वितीयसंग्रहकिट्टौ तथा तृतीयसंग्रहकिट्ट्यामपवर्तनासंक्रमेण मानस्य च प्रथमसंग्रहकिट्टौ यथाप्रवृत्तसंक्रमेण संक्रमयति, न ततोऽप्यधस्तान्मानद्वितीयादिसंग्रहकिट्टिषु। क्रोधस्य द्वितीयसंग्रहकिट्टिप्रदेशाग्रमपवर्तनासंक्रमेण क्रोधस्य तृतीयसंग्रहकिट्टौ मानस्य च प्रथमसंग्रहकिट्टौ यथाप्रवृत्तसंक्रमेण संक्रमयति, न ततोऽधस्तात्। क्रोधस्य तृतीयसंग्रहकिट्ट्या दलं यथाप्रवृत्तसंक्रमेण मानस्य प्रथमसंग्रहकिट्टावेव संक्रमयति, नान्यत्र। एवं मानस्य प्रथमसंग्रहकिट्ट्याः प्रदेशाग्रमपवर्तनासंक्रमेण मानस्य द्वितीयसंग्रहकिट्टौ तथा तृतीयसंग्रहकिट्टौ मायायाश्च प्रथमसंग्रहकिट्टौ यथाप्रवृत्तसंक्रमेण संक्रमयति, नान्यत्र। मानस्य द्वितीयसंग्रहकिट्ट्या दलमपवर्तनासंक्रमेण मानस्य तृतीयसंग्रहकिट्टौ मायायाश्च प्रथमसंग्रहकिट्टौ यथाप्रवृत्तसंक्रमेण संक्रमयति। मानस्य तृतीयसंग्रहकिट्टिदलं यथाप्रवृत्तसंक्रमेण मायायाः प्रथमसंग्रहकिट्ट्यामेव संक्रमयति।

मायायाः प्रथमसंग्रहकिट्ट्या दलमपवर्तनासंक्रमेण मायाया द्वितीयसंग्रहकिट्टौ तथा तृतीयसंग्रहकिट्टौ लोभस्य च प्रथमसंग्रहकिट्टौ यथाप्रवृत्तसंक्रमेण संक्रमयति, न ततोऽधस्तात्। मायाया द्वितीयसंग्रहकिट्ट्याः प्रदेशाग्रमपवर्तनासंक्रमेण मायायास्तृतीयसंग्रहकिट्टौ लोभस्य च प्रथमसंग्रहकिट्ट्यां यथाप्रवृत्तसंक्रमेण संक्रमयति। मायातृतीयसंग्रहकिट्ट्याः प्रदेशाग्रं यथाप्रवृत्तसंक्रमेण लोभप्रथमसंग्रहकिट्टावेव संक्रमयति।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

लोभस्य प्रथमसंग्रहकिट्टयाः प्रदेशाग्रमपवर्तनासंक्रमेण लोभस्य द्वितीयसंग्रहकिट्टौ तृतीयसंग्रहकिट्टौ च संक्रमयति। लोभस्य द्वितीयसंग्रहकिट्टया दलमपवर्तनासंक्रमेण लोभस्य तृतीयसंग्रहकिट्टावेव संक्रमयति। लोभतृतीयसंग्रहकिट्टयाः प्रदेशाग्रमन्यत्र कुत्रचिदपि न संक्रमयति, आनुपूर्वीसंक्रमसद्भावात् किट्टि वेदकानां च मोहनीयस्योद्वर्तनाभावात् ॥१२६॥

अथ संक्रम्यमाणप्रदेशनियमं दर्शयति—

**जं संगहकिट्टिं अणुहवए तयणंतराअ इयरत्तो।**
**संकामइ दलिअं संखगुणं अप्पबहुअं भणिमो ॥१२७॥**

यां संग्रहकिट्टिमनुभवति तदनन्तरायामितरतः।
संक्रमयति दलिकं संख्यगुणमल्पबहुत्वं भणामः ॥१२७॥इति पदसंस्कारः।

'जं' इत्यादि, यां संग्रहकिट्टिमनुभवति, तदनन्तरायां संग्रहकिट्टौ 'इतरतः' इतरसंग्रहकिट्टौ संक्रम्यमाणप्रदेशाग्रतः संख्यगुणं 'दलिकं' प्रदेशाग्रं संक्रमयति। शेषासु संग्रहकिट्टिषु संक्रम्यमाणदलस्य प्रमाणं वक्ष्यमाणाऽल्पबहुत्वेन व्यक्तीभविष्यति। अथाऽल्पबहुत्वं प्रतिजानीते—'अप्प०' इत्यादि, 'अल्पबहुत्वं' संक्रम्यमाणप्रदेशानां स्तोकबहुत्वं 'भणामः' निरूपयामः। क्रोधद्वितीयादिसंग्रहकिट्टीनां कति प्रदेशान् मानप्रथमादिसंग्रहकिट्टिषु संक्रमयतीति शङ्कासम्बन्धिनिर्णयप्रतिपादनपरमल्पबहुत्वं प्ररूपयाम इत्यर्थः ॥१२७॥

साम्प्रतं प्रतिज्ञातमेव प्राह—

**कोहबिइयतइयत्तो माणगपढमाअ माणगतिगत्तो।**
**मायापढमाए मायाअ तिगत्तो य लोहपढमाए ॥१२८॥ (गीतिः)**
**लोहपढमाउ तब्बिइयाए ताउ चिअ तइयाए।**
**संकामेइ पएसा विसेसअहिअकमेण तत्तो वि ॥१२९॥ (उद्गीतिः)**
**कोहपढमाउ माणपढमाअ संखेज्जगुणिआ तो।**
**तइयाअ विसेसहिआ तो संखगुणा च कोहबिइयाए ॥१३०॥(उद्गीतिः)**

क्रोधद्वितीयतृतीयाभ्यां मानप्रथमायां मानत्रिकात्।
मायाप्रथमायां मायायास्त्रिकाच्च लोभप्रथमायाम् ॥१२८॥

लोभप्रथमायास्तद्द्वितीयस्यां तस्या एव तृतीयस्याम्
संक्रमयति प्रदेशान् विशेषाधिकक्रमेण ततोऽपि ॥१२९॥

क्रोधप्रथमाया मानप्रथमायां संख्येयगुणितांस्ततः।
तृतीयस्यां विशेषाधिकांस्ततः संख्यगुणांश्च क्रोधद्वितीयस्याम् ॥१३०॥इति पदसंस्कारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'कोहबिइयतइयत्तो'** इत्यादि, 'क्रोधद्वितीयतृतीयाभ्यां' क्रोधस्य द्वितीयसंग्रहकिट्टितः तृतीयसंग्रहकिट्टितश्च 'मानप्रथमायां' मानस्य प्रथमसंग्रहकिट्टौ, ततोऽपि 'मानत्रिकात्' मानस्य प्रथमसंग्रहकिट्टितो द्वितीयसंग्रहकिट्टितस्तृतीयसंग्रहकिट्टितश्च 'मायाप्रथमायां' मायाप्रथमसंग्रहकिट्टौ, ततोऽपि 'मायायास्त्रिकाच्च' मायायाः प्रथमसंग्रहकिट्टितो द्वितीयसंग्रहकिट्टितस्तृतीयसंग्रहकिट्टितश्च 'लोभप्रथमायां' लोभस्य प्रथमसंग्रहकिट्टौ, ततोऽपि 'लोभप्रथमायाः' लोभस्य प्रथमसंग्रहकिट्टितः 'तद्द्वितीयस्यां' लोभद्वितीयसंग्रहकिट्टौ 'तस्या एव' लोभप्रथमसंग्रहकिट्टित एव पञ्चम्यन्ततत्पदेन लोभप्रथमसंग्रहकिट्ट्याः परामर्शात्, 'तृतीयस्यां' लोभस्य तृतीयसंग्रहकिट्टौ विशेषाधिकक्रमेण प्रदेशान् संक्रमयति। **'तत्तो वि'** इत्यादि, 'ततोऽपि' लोभप्रथमसंग्रहकिट्टौ संक्रम्यमाणेभ्यः प्रदेशेभ्योऽपि 'क्रोधप्रथमायाः' क्रोधस्य प्रथमसंग्रहकिट्टितः 'मानप्रथमायां' मानस्य प्रथमसंग्रहकिट्टौ 'संख्येयगुणितान्' संख्येयगुणान् प्रदेशान् संक्रमयति। 'ततः' क्रोधप्रथमसंग्रहकिट्टित एव 'तृतीयस्यां' क्रोधतृतीयसंग्रहकिट्टौ विशेषाधिकान् प्रदेशान् संक्रमयति। 'ततः' क्रोधप्रथमसंग्रहकिट्टित एव 'क्रोधद्वितीयस्यां' क्रोधस्य द्वितीयसंग्रहकिट्टौ संख्यगुणाँश्च प्रदेशान् संक्रमयति।

इदमुक्तं भवति–किट्टिवेदकाद्धायाः प्रथमसमये क्रोधस्य द्वितीयसंग्रहकिट्ट्याः प्रदेशाग्रं यथाप्रवृत्तसंक्रमेण मानस्य प्रथमसंग्रहकिट्टौ सर्वस्तोकं संक्रमयति। ततो विशेषाधिकं क्रोधस्य तृतीयसंग्रहकिट्ट्या दलं यथाप्रवृत्तसंक्रमेण मानस्य प्रथमसंग्रहकिट्टौ संक्रमयति, मन्दानुभागकायां संग्रहकिट्टौ प्रदेशाग्रस्याधिकत्वेन पूर्वपदापेक्षया संक्रम्यमाणदलस्याधिक्यस्य न्याय्यत्वात्। ततोऽपि विशेषाधिकं मानस्य प्रथमसंग्रहकिट्ट्याः प्रदेशाग्रं यथाप्रवृत्तसंक्रमेण मायायाः प्रथमसंग्रहकिट्टौ संक्रमयति। ननु चतुर्नवतितमप्रभृतिगाथासु मानस्य प्रथमसंग्रहकिट्टौ प्रदेशाग्रं स्तोकं भवति, ततो विशेषाधिकं मानस्य द्वितीयसंग्रहकिट्टौ भवति। ततो विशेषाधिकं मानस्य तृतीयसंग्रहकिट्टौ प्रदेशाग्रं भवति। ततो विशेषाधिकं क्रोधस्य द्वितीयसंग्रहकिट्टौ दलं भवति, ततोऽपि विशेषाधिकं दलं क्रोधस्य तृतीयसंग्रहकिट्टौ भवतीति स्तोकबहुत्वमुक्तम्। अत्र पुनः प्रदेशसंक्रमप्ररूपणाऽवसरे मानतृतीयसंग्रहकिट्टितोऽपि विशेषाधिकप्रदेशकायाः क्रोधद्वितीयसंग्रहकिट्ट्याः प्रदेशाग्रं यथाप्रवृत्तसंक्रमेण मानप्रथमसंग्रहकिट्टौ स्तोकं संक्रमयति। ततस्तत्रैव क्रोधतृतीयसंग्रहकिट्ट्या दलं विशेषाधिकं यथाप्रवृत्तसंक्रमेण संक्रम्य ततो विशेषाधिकं मानस्य प्रथमसंग्रहकिट्ट्या दलं यथाप्रवृत्तसंक्रमेण मायायाः प्रथमसंग्रहकिट्टौ संक्रमयति। इदं च नोपपद्यते, अल्पतरप्रदेशसत्ताकमानप्रथमसंग्रहकिट्ट्या अधिकं दलं मायाप्रथमसंग्रहकिट्टौ संक्रमयति बहुप्रदेशसत्ताकक्रोधतृतीयसंग्रहकिट्ट्याश्च दलं स्तोकं मानप्रथमसंग्रहकिट्टौ संक्रमयतीति युक्तिविरोधात्, इति चेत्, मैवम्, तथास्वाभाव्यात् कुत्रचित् प्रदेशसंक्रम आधारानुरूपो भवति, कुत्रचिदाधेयाऽनुरूपो भवति, क्वचित् पुनरुभयानुरूपो भवति। अत्राऽऽधारानुरूपः प्रदेशसंक्रमः प्रवर्तते। तेन क्रोधतृतीयसंग्रहकिट्टिसंक्रम्यमाणदलपतद्ग्रहरूपाऽऽधारमानप्रथमसंग्रहकिट्टिप्रदेशसत्कर्मापेक्षया मानप्रथमसंग्रहकिट्टिसंक्र-

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

म्यमाणदलपतद्ग्रहलक्षणाधारमायाप्रथमसंग्रहकिट्टिप्रदेशसत्कर्मणो विशेषाधिकत्वात् प्रदेशसंक्रमो विशेषाधिकः सिध्यति। किञ्च पूर्वमहर्षिवचनप्रामाण्यादप्यत्रावुपपद्यते, आगमोपपत्तिगम्यत्वात् तत्त्वस्य। यदुक्तमध्यात्मोपनिषदि—

"अनर्थायैव नार्थाय जातिप्रायाश्च युक्तयः।
हस्ती हन्तीति वचने प्राप्ताप्राप्तविकल्पवत् ॥१॥
ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः।
कालेनैतावता प्राज्ञैः कृतः स्यात् तेषु निश्चयः ॥२॥
आगमोपपत्तिश्च सम्पूर्णं दृष्टिलक्षणम्।
अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ॥३॥" इति।

एवमग्रेऽपि लोभप्रथमसंग्रहकिट्टिदलं लोभद्वितीयसंग्रहकिट्टौ संक्रम्यमाणदलतो लोभतृतीयसंग्रहकिट्टौ विशेषाधिकं संक्रम्यते तथा क्रोधप्रथमसंग्रहकिट्टिप्रदेशाग्रं मानप्रथमसंग्रहकिट्टयां संक्रम्यमाणदलतः क्रोधतृतीयसंग्रहकिट्टौ विशेषाधिकं संक्रम्यत इति वक्ष्यते, तत्राऽपीत्थमेव भावनीयम्।

अथ मायायाः प्रथमसंग्रहकिट्टौ मानस्य प्रथमसंग्रहकिट्टयाः संक्रम्यमाणप्रदेशतो मानस्य द्वितीयसंग्रहकिट्टया दलं यथाप्रवृत्तसंक्रमेण मायायाः प्रथमसंग्रहकिट्टौ विशेषाधिकं संक्रमयति, ततो मायाप्रथमसंग्रहकिट्टौ संक्रम्यमाणमानद्वितीयसंग्रहकिट्टिप्रदेशाग्रतो मानस्य तृतीयसंग्रहकिट्टया दलं यथाप्रवृत्तसंक्रमेण मायायाः प्रथमसंग्रहकिट्टौ विशेषाधिकं संक्रमयति। ततो मायायाः प्रथमसंग्रहकिट्टिदलं यथाप्रवृत्तसंक्रमेण लोभस्य प्रथमसंग्रहकिट्टौ विशेषाधिकं संक्रमयति। ततो मायाया द्वितीयसंग्रहकिट्टिप्रदेशाग्रं यथाप्रवृत्तसंक्रमेण लोभस्य प्रथमसंग्रहकिट्टौ विशेषाधिकं संक्रमयति। ततो विशेषाधिकं मायायास्तृतीयसंग्रहकिट्टया दलिकं यथाप्रवृत्तसंक्रमेण लोभस्य प्रथमसंग्रहकिट्टौ संक्रमयति। ततो लोभस्य प्रथमसंग्रहकिट्टयाः प्रदेशाग्रमपवर्तनासंक्रमेण लोभस्य द्वितीयसंग्रहकिट्टौ विशेषाधिकं संक्रमयति, सर्वत्र प्रदेशसत्कर्मणो विशेषाधिकत्वात्।

ननु क्रोधद्वितीयादिसंग्रहकिट्टीनां दलं मानादीनां प्रथमसंग्रहकिट्टौ यथाप्रवृत्तसंक्रमेण संक्रमयति, अत्र पुनर्लोभप्रथमसंग्रहकिट्टया दलं लोभद्वितीयसंग्रहकिट्टौ परप्रकृत्यभावादपवर्तनासंक्रमेण संक्रमयति, तर्हि यथाप्रवृत्तसंक्रमभागहारत उत्कर्षणापकर्षणभागहारस्याऽसंख्येयगुणहीनत्वाद् यथाप्रवृत्तसंक्रमेण संक्रम्यमाणदलतोऽपवर्तनासंक्रमेण संक्रम्यमाणदलमसंख्येयगुणं स्यात्, विशेषाधिकं कुत उच्यते? इति चेत्, भण्यते-एतत्समीचीनं भागहारविवक्षया, किन्तु नाऽत्र भागहारो विवक्षितः, अपि तु विशोधिमाहात्म्याद् यथाप्रवृत्तसंक्रमभागहार उत्कर्षणापकर्षणभागहाराऽनुसारेण प्रवर्तते। कथमेतदवसीयते? इति चेत्, उच्यते—अनेनाऽल्पबहुत्वेनाऽस्मिन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकरण उत्कर्षणापकर्षणभागहारानुसारेण यथाप्रवृत्तसंक्रमभागहारः प्रवर्तत इति सिध्यति । तस्माद् मायातृतीयसंग्रहकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रदेशसत्कर्मणो विशेषाधिकत्वेन पूर्वपदतो लोभप्रथमसंग्रहकिट्ट्याः प्रदेशाग्रं लोभस्य द्वितीयसंग्रहकिट्टौ विशेषाधिकं संक्रमयति, अन्यथाऽसंख्येयगुणं स्यात् ।

लोभद्वितीयसंग्रहकिट्टौ संक्रम्यमाणलोभप्रथमसंग्रहकिट्टिदलतोऽपि लोभस्य प्रथमसंग्रहकिट्ट्या एव दलं लोभस्य तृतीयसंग्रहकिट्टौ विशेषाधिकं संक्रमयति, ततः क्रोधप्रथमसंग्रहकिट्ट्याः प्रदेशाग्रं मानस्य प्रथमसंग्रहकिट्टौ संख्येयगुणं संक्रमयति, लोभप्रथमसंग्रहकिट्टिप्रदेशसत्कर्मतः क्रोधप्रथमसंग्रहकिट्टिप्रदेशसत्कर्मणस्त्रयोदशगुणत्वेन क्रोधप्रथमसंग्रहकिट्टिसंक्रम्यमाणप्रदेशाग्रस्य संख्यातगुणत्वोपलम्भात् ।

ततः क्रोधप्रथमसंग्रहकिट्टेः प्रदेशाग्रं क्रोधस्यैव तृतीयसंग्रहकिट्टौ विशेषाधिकं संक्रमयति ।

ततोऽपि क्रोधस्य प्रथमसंग्रहकिट्ट्या दलं क्रोधस्य द्वितीयसंग्रहकिट्टौ संख्येयगुणं संक्रमयति । कथमेतदवसीयते ? इति चेत्, उच्यते—प्राक्तनपतद्ग्रहतोऽस्य पतद्ग्रहस्य विशेषहीनत्वेऽपि वेद्यमानसंग्रहकिट्टिसमनन्तरसंग्रहकिट्टौ संक्रम्यमाणदलस्य संख्येयगुणतायाः **सप्तविंशत्यधिकशततमगाथयोक्तत्वात्** पूर्वपदतः संख्येयगुणं क्रोधप्रथमसंग्रहकिट्टिदलं क्रोधद्वितीयसंग्रहकिट्टौ संक्रमयति । प्रत्यपादि च **कषायप्राभृतचूर्णौ**—"**पढमसमयकिट्टीवेदगस्स कोहस्स विदियकिट्टीदो माणस्स पढमसंगहकिट्टीए संकमदि पदेसग्गं थोवं । कोहस्स तदियकिट्टीदो माणस्स पढमाए संगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । माणस्स पढमादो संगहकिट्टीदो मायाए पढमकिट्टीए संकमदि पदेसग्गं विसेसाहियं । माणस्स विदियादो संगहकिट्टीदो मायाए पढमसंगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । माणस्स तदियादो संगहकिट्टीदो मायाए पढमसंगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । मायाए पढमसंगहकिट्टीदो लोभस्स पढमसंगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । मायाए विदियादो संगहकिट्टीदो लोभस्स पढमाए संगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । मायाए तदियादो संगहकिट्टीदो लोभस्स पढमाए संगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । लोभस्स पढमकिट्टीदो लोभस्स चेव विदियसंगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । लोभस्स चेव पढमसंगहकिट्टीदो तस्स चेव तदियसंगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं । कोहस्स पढमसंगहकिट्टीदो माणस्स पढमसंगहकिट्टीए संकमदि पदेसग्गं संखेज्जगुणं । कोहस्स चेव पढमसंगहकिट्टीदो कोहस्स चेव तदियसंगहकिट्टीए संकमदि पदेसग्गं विसेसाहियं ।**

**कोहस्स पढम(संगह)किट्टीदो कोहस्स चेव विदियसंगहकिट्टीए संकमदि पदेसग्गं संखेज्जगुणं।"** इति। पश्यन्तु पाठका यन्त्रकम्-१८।

## अथ गणितविभागः।

विवक्षितसंग्रहकिट्टितो यद्दलं संक्रमेणा-ऽन्यसंग्रहकिट्टिं गच्छति, तद् व्ययदलं व्यपदिश्यते। अन्यसंग्रहकिट्टितः संक्रमेण विवक्षितसंग्रहकिट्टौ यद्दलमागच्छति, तद् आयदलमुच्यते। तत्र क्रोधप्रथमसंग्रहकिट्टावन्यसंग्रहकिट्टितो दलं नागच्छति, तेन तस्यामायदलं न भवति, लोभतृतीयसंग्रहकिट्टितश्चाऽन्यां संग्रहकिट्टिं दलं न गच्छति, तेन तस्यां व्ययदलं न भवति।

किट्टिकरणाद्धायां द्वादशसंग्रहकिट्टीनां सर्वाऽवान्तरकिट्टयः प्रदेशाग्रमाश्रित्य गोपुच्छाकारेण तिष्ठन्ति स्म, सर्वमन्दानुभागकलोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टित आरभ्य सर्वतीव्राऽनुभागकां क्रोधप्रथमसंग्रहकिट्टिचरमावान्तरकिट्टिं यावत् सर्वाऽवान्तरकिट्टयोऽनन्ततमभागहीनक्रमेण तिष्ठन्ति स्मेत्यर्थः। अथ किट्टिवेदनाद्धाप्रथमसमयतः प्रभृति द्वादशसंग्रहकिट्टिदलस्य गमनागमनदर्शनात् पौर्वसमयिकः स्वस्थानगोपुच्छाकारो विनश्यति। तत्र स्वस्थानगोपुच्छाकारो नाम प्रदेशापेक्षयैकचयहान्या विवक्षितसंग्रहकिट्टिसम्बन्ध्युत्तरोत्तराऽवान्तरकिट्टया अवस्थानम्। तथा पञ्चविंशत्युत्तरशततमगाथया द्वादशसंग्रहकिट्टयु परितनाऽसंख्येयभागमात्रावान्तरकिट्टिनाशस्याभिहितत्वात् परस्थानगोपुच्छाकारो विनश्यति। परस्थानगोपुच्छकारो नाम विवक्षितसंग्रहकिट्टिचरमाऽवान्तरकिट्टितस्तदनन्तरोपरितनसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ दलस्यैकचयेन हीनतयाऽवस्थानम्। किट्टिवेदनाद्धायाः प्रथमसमय उभयोः स्वस्थानपरस्थानगोपुच्छाकारयोर्नाशो जायते। तदेवं स्वस्थानगोपुच्छाकारः संक्रमतो व्ययदलेन विनश्यति, परस्थानगोपुच्छाकारश्चैकैकसंग्रहकिट्टयु परितनाऽसंख्येयभागमात्रीणामवान्तरकिट्टीनां घाततो प्रणश्यति। न च स्वस्थानगोपुच्छाकारः संक्रमतो व्ययदलेन नष्ट आयदलेन पुनः कुतो न विरच्यते? इति वाच्यम्, आयव्ययदलयोः समानत्वाभावात्। तथाहि—कस्याञ्चित् संग्रहकिट्टयामायदलतो व्ययदलमधिकं भवति, कस्यांचिद्धीनं भवति, परस्यां पुनरायदलमेव न भवति, तेनाऽऽयदलेन स्वस्थानगोपुच्छाकारः पुनर्न विरच्यते।

**अथ स्वस्थानगोपुच्छाकाररचना भण्यते—**

एकैकसंग्रहकिट्टेरुपरितना असंख्येयभागप्रमाणा या अवान्तरकिट्टयोऽनुसमयाऽपवर्तनया घात्यन्ते, तासां दलं घातदलमुच्यते। घात्यमानाश्चाऽवान्तरकिट्टयो घाताऽवान्तरकिट्टयो व्यवह्रियन्ते। अथ घातदलतो व्ययदलप्रमाणं दलं गृहीत्वा तत्तत्संग्रहकिट्टीनां घाताऽवान्तरकिट्टिरहितासु सर्वास्ववान्तरकिट्टिषु व्ययदले दत्ते तत्तत्संग्रहकिट्टिसर्वावान्तरकिट्टिष्वेकगोपुच्छाकारेण दलं दृश्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादशसंग्रहकिट्टीनां संक्रम्यमाणप्रदेशानाश्रित्य चित्रम्



संकेतस्पष्टीकरणम्—

...... अनेन चिह्नेन विवक्षितसंग्रहकिट्टितोऽनन्तरसंग्रहकिट्टौ दलं संक्रामतीति सूचितम् ( गाथा १२६ )

०००० अनेन चिह्नेन प्रथमसंग्रहकिट्टितो तृतीयसंग्रहकिट्टौ दलं संक्रामतीति सूचितम्, तथा मायाद्वितीयसंग्रहकिट्टितो लोभप्रथमसंग्रहकिट्टयामपि संक्रम्यमाणदलमनेनैव चिह्नेन सूचितम्। (गाथा-१२६) 卐

★ अनेन चिह्नेन प्रथमसंग्रहकिट्टितोऽनन्तरकषायप्रथमसंग्रहकिट्टौ दलं संक्रामतीति सूचितम्। (गाथा—१२६)

– – – अनेन चिह्नेन द्वितीयसंग्रहकिट्टितोऽनन्तरकषायप्रथमसंग्रहकिट्टौ दलं संक्रामतीति सूचितम्, तथा मायाप्रथमसंग्रहकिट्टितो मायातृतीयसंग्रहकिट्टावपि संक्रम्यमाणदलमनेनैव चिह्नेन सूचितम्। ❀

१,२,३……एतैरङ्कैर्यथाक्रमं सङ्क्रम्यमाणदलं विशेषाधिकं सूचितम् । नवरं दशमाङ्कत एकादशाङ्कः संख्येयगुणं सूचयति, तथैव द्वादशाङ्कतस्त्रयोदशाङ्कोऽपि संख्येयगुणं सूचयति (गाथा –१२८, १२९, १३०) ।

क=असंख्येयभागप्रमाणास्तीव्रानुभागका अवान्तरकिट्टयोऽनुसमयापवर्तनया नाश्यन्ते । (गाथा–१२५) ताश्च △ इत्यनेन चिह्नेन दर्शिताश्चित्रे ।

ख=असंख्येयभागप्रमाणमन्दानुभागका अवान्तरकिट्टयो नोदयन्ति,

ग=असंख्येयभागप्रमिताश्च तीव्रानुभागका अवान्तरकिट्टयो नोदयन्ति, ताश्च ००० इत्यनेन चिह्नेन सूचिताः (गाथा-१२१) ।

घ=बहुसंख्येयभागप्रमाणमध्यमावान्तरकिट्टय उदयन्ति (गाथा–१२१) ।

卐 इह चित्रकारस्य स्खलना जाता, अन्यथा मायाद्वितीयसंग्रहकिट्टितो लोभप्रथमसंग्रहकिट्टौ संक्रम्यमाणं दलम् – – – इत्यनेन चिह्नेन दर्शयितव्यम् ।

❀ इहाऽपि चित्रकारस्य स्खलना जाता, अन्यथा मायाप्रथमसंग्रहकिट्टितो मायातृतीयसंग्रहकिट्टौ संक्रम्यमाणं दलम् ००० इत्यनेन चिह्नेन दर्शयितव्यम् '



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अथ परस्थानगोपुच्छाकाररचना निगद्यते—**

लोभस्य तृतीयसंग्रहकिट्ट्या उपरितनास्वसंख्येयभागमात्रीष्ववान्तरकिट्टिषु घातितासु तत्संग्रहकिट्टिचरमाऽवान्तरकिट्टिगतदलतस्तदनन्तरसंग्रहकिट्टिप्रथमाऽवान्तरकिट्ट्यामेकाधिकघाताऽवान्तरकिट्टिराशिप्रमाणचयैर्हीनं दलं जायते। कथमेतदवसीयते ? इति चेत्, उच्यते— लोभतृतीयसंग्रहकिट्टेरुपरितनानामसंख्येयभागप्रमितानामवान्तरकिट्टीनां घातात् प्राग् लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टितो द्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ दलमेकचयेन हीनं विद्यते स्म। अथोपरितनास्ववान्तरकिट्टिषु घातितास्विदानीं या लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः, ततो द्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ दलमेकाधिकघाताऽवान्तरकिट्टिराशिप्रमाणचयैर्हीनं विद्यते, असंख्येयभागप्रमाणाऽवान्तरकिट्टीनां घातितत्वात्। तेन लोभद्वितीयसंग्रहकिट्ट्या घातदलतो घाताऽवान्तरकिट्टिराशिप्रमाणचयान् लोभद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ प्रक्षिपति। प्रक्षिप्तेषु च घाताऽवान्तरकिट्टिराशिप्रमाणचयेषु लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्ट्यामेकचयेन हीनं दलं दृश्यते। ततो लोभद्वितीयसंग्रहकिट्टिद्वितीयाद्यवान्तरकिट्टिषु तृतीयसंग्रहकिट्टिघाताऽवान्तरकिट्टिराशिप्रमाणांश्चयांस्तावत् प्रक्षिपति, यावल्लोभद्वितीयसंग्रहकिट्टिघातिताऽवशेषाऽवान्तरकिट्टिषु चरमाऽवान्तरकिट्टिः। इत्थं लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टित आरभ्य लोभद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिं यावद् दलं गोपुच्छाकारेण सम्पद्यते।

अथ लोभद्वितीयसंग्रहकिट्ट्या घातिताऽवशेषासु या चरमाऽवान्तरकिट्टिः, ततो लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टावेकाधिकलोभतृतीयसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिघाताऽवान्तरकिट्टिराशिप्रमाणचयैर्हीनं दलं विद्यते। किं कारणम् ? इति चेत् ? उच्यते—द्वितीयसंग्रहकिट्टेरुपरितनानामवान्तरकिट्टीनां घातात् प्राग् लोभद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिसत्कप्रथमाऽवान्तरकिट्ट्यामेकचयेन हीनं दलं विद्यते स्म। सम्प्रति लोभद्वितीयसंग्रहकिट्टेरुपरितना असंख्येयभागप्रमिता अवान्तरकिट्टयो घात्यन्ते, तेन लोभद्वितीयसंग्रहकिट्टेर्घातितावशेषावान्तरकिट्टिषु या चरमाऽवान्तरकिट्टिः, तदपेक्षयैकाधिकलोभद्वितीयसंग्रहकिट्टिघाताऽवान्तरकिट्टिराशिप्रमाणचयैर्हीनं दलं लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टौ जायते। तथा लोभद्वितीयसंग्रहकिट्टेर्लोभतृतीयसंग्रहकिट्ट्याश्च परस्थानगोपुच्छाकाररचनायै तृतीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणचयानां द्वितीयसंग्रहकिट्ट्यवान्तरकिट्टिषु प्रक्षिप्तत्वात् तावद्भिरपि चयैर्हीनं दलं लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ सम्पद्यते। इत्थं लोभद्वितीयसंग्रहकिट्टेर्घातितावशेषाऽवान्तरकिट्टिषु या चरमाऽवान्तरकिट्टिः, ततो लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ दलमेकाधिकद्वितीयसंग्रहकिट्टितृतीयसंग्रहकिट्टिघाताऽवान्तरकिट्टिराशिप्रमाणचयैर्हीनं जायते। तेन लोभप्रथमसंग्रहकिट्टिघातदलतो दलं गृहीत्वा लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ लोभद्वितीयसंग्रहकिट्टितृतीयसंग्रह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किट्टिघाताऽवान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति। चयेषु च प्रक्षिप्तेषु लोभद्वितीयसंग्रहकिट्टि-चरमाऽवान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमाऽवान्तरकिट्ट्यामेकचयेन न्यूनं दलं जायते। ततः परं लोभप्रथमसंग्रहकिट्टिद्वितीयाद्यवान्तरकिट्टिषु लोभद्वितीयसंग्रहकिट्टि–तृतीयसंग्रहकिट्टि-घाताऽवान्तरकिट्टिप्रमाणांश्चयांस्तावत् प्रक्षिपति, यावल्लोभप्रथमसंग्रहकिट्ट्या घातिताऽवशेषावान्त-किट्टिषु चरमाऽवान्तरकिट्टिः।

एवमग्रेऽपि विवक्षितसंग्रहकिट्ट्या अधस्ताद् यावत्यः संग्रहकिट्टयो व्यतिक्रामन्ति, तावत्संग्रह-किट्टीनां घाताऽवान्तरकिट्टिराशिप्रमाणांश्चयान् विवक्षितसंग्रहकिट्टिघातदलतो विवक्षितसंग्रह-किट्टिप्रथमावान्तरकिट्टिप्रभृतिचरमाऽवान्तरकिट्टिपर्यवसानास्ववान्तरकिट्टिषु प्रक्षिपति। तथाहि–मायातृतीयसंग्रहकिट्ट्या अवान्तरकिट्टिषु स्वघातदलतो लोभसंग्रहकिट्टित्रयघाताऽवान्तरकिट्टिराशि-प्रमाणांश्चयान् प्रक्षिपति। मायाया द्वितीयसंग्रहकिट्ट्यवान्तरकिट्टिषु स्वघातदलतो लोभसंग्रहकिट्टित्र-यस्य मायातृतीयसंग्रहकिट्ट्याश्च घाताऽवान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति। मायाप्रथमसंग्रह-किट्ट्यवान्तरकिट्टिषु स्वघातदलतो लोभसंग्रहकिट्टित्रयस्य मायासंग्रहकिट्टिद्वयस्य च घाताऽवान्तर-किट्टिराशिप्रमाणांश्चयान् प्रक्षिपति।

मानतृतीयसंग्रहकिट्ट्यवान्तरकिट्टिषु स्वघातदलतो लोभसंग्रहकिट्टित्रयस्य मायासंग्रह-किट्टित्रयस्य च घाताऽवान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति। मानद्वितीयसंग्रहकिट्ट्यवान्तर-किट्टिषु घातदलतो लोभसंग्रहकिट्टित्रयस्य मायासंग्रहकिट्टित्रयस्य मानतृतीयसंग्रहकिट्ट्याश्च घाताऽवान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति। एवंक्रमेण घातदलतो मानप्रथमसंग्रहकिट्ट्यवा-न्तरकिट्टिषु संग्रहकिट्ट्यष्टकस्य, क्रोधतृतीयसंग्रहकिट्ट्यवान्तरकिट्टिषु संग्रहकिट्टिनवकस्य, क्रोध-द्वितीयसंग्रहकिट्ट्यवान्तरकिट्टिषु संग्रहकिट्टिदशकस्य, क्रोधप्रथमसंग्रहकिट्ट्यवान्तरकिट्टिषु संग्रह-किट्ट्येकादशकस्य घाताऽवान्तरकिट्टिराशिप्रमितांश्चयान् प्रक्षिपति।

अनेन क्रमेण घातदले प्रक्षिप्ते लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टितः प्रभृति क्रोध-प्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टिं यावत् सर्वा अवान्तरकिट्टयः प्रदेशाग्रमाश्रित्यैकगोपुच्छाकारेण तिष्ठन्ति। **(पश्यन्तु पाठका यन्त्रकम्–१९)**

आयदलस्य निक्षेपविधिरग्रे संक्रमतो निर्वर्त्यमानावान्तरकिट्टीनां प्ररूपणाऽवसरे वक्ष्यते, आयदलस्य संक्रमदलतोऽनतिरेकेण संक्रमदलतोऽवान्तरकिट्टीनां निर्वृत्तेः।

स्वस्थानगोपुच्छाकाररचनायै परस्थानगोपुच्छाकाररचनायै च यद् दलं प्रक्षिप्तम्, तत् सर्वं सर्वघातदला-ऽसंख्येयभागमात्रं भवति। तथा-ऽवेद्यमानसंग्रहकिट्टिषु संक्रमदलतोऽपूर्वा-ऽवान्तरकिट्टीर्निर्वर्तयन् संक्रमदलतः पूर्वापूर्वावान्तरकिट्टिष्वधस्तनशीर्षचयादिभेदेन दलं प्रक्षेप्स्यति। वेद्यमानसंग्रहकिट्टौ त्वायदलाभावेन संक्रमाऽपूर्वावान्तरकिट्टीरनिर्वर्तयन् तत्पूर्वावान्तरकिट्टिषु वक्ष्यमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोभसंग्रहकिट्टित्रयपरस्थानगोपुच्छाकाररचनाप्रदर्शनार्थं चित्रम्



लोभतृतीयसंग्रहकिट्टिः लोभद्वितीयसंग्रहकिट्टिः लोभप्रथमसंग्रहकिट्टिः

## अनुसमयापवर्तनया घाते जाते-ऽवान्तरकिट्टीनां स्थापना



लोभतृतीयसंग्रहकिट्टिः लोभद्वितीयसंग्रहकिट्टिः लोभप्रथमसंग्रहकिट्टिः

## परस्थानगोपुच्छाकाररचना



लोभतृतीयसंग्रहकिट्टिः लोभद्वितीयसंग्रहकिट्टिः लोभप्रथमसंग्रहकिट्टिः

**संक्षेपतो विवेचनम्**

(१) (अ) इह परमार्थत एकैकसंग्रहकिट्टयामवान्तरकिट्टयो-ऽनन्ता भवन्ति, किन्त्वसत्कल्पनया लोभतृतीय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संग्रहकिट्टौ द्वाविंशतिः (२२) अवान्तरकिट्टयः परिकल्पिताः, लोभद्वितीयसंग्रहकिट्टौ विंशतिः (२०), लोभप्रथमसंग्रहकिट्टौ चाष्टादश (१८) ।

(ब) किट्टिवेदनाद्धाप्रथमसमयेऽनुभागापवर्तनयैकैकसंग्रहकिट्टया द्वेऽवान्तरकिट्टी घात्येते, परमार्थतस्तु सर्वावान्तरकिट्टीनामसंख्येयभागप्रमाणा अवान्तरकिट्टयो घात्यन्ते ।

(२) अवान्तरकिट्टीनां घाते जाते लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ एकाधिकलोभतृतीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणैश्चयैर्हीनं दलं जायते, इह त्वसत्कल्पनया द्वेऽवान्तरकिट्टी घातिते, तेन त्रिभिश्चयैर्हीनं दलं लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ भवति, यतो या विंशतितमावान्तरकिट्टिरासीत्, सैवाऽधुना चरमावान्तरकिट्टिर्भवति । तद्द्योतनाय चित्रे लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ त्रयोदश (१३) शून्यानि दर्शितानि, लोभद्वितीयसंग्रहप्रथमावान्तरकिट्टौ च दश (१०) । एवं लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टावपि बोध्यम् ।

(३) (अ) लोभद्वितीयसंग्रहकिट्टिघातदलतो दलमादाय लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ लोभतृतीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणांश्चयान् असत्कल्पनया तु द्वौ चयौ प्रक्षिपति, ततः परं सर्वासु लोभद्वितीयसंग्रहकिट्टिद्वितीयाद्यवान्तरकिट्टिषु प्रक्षिपति, तद्द्योतनाय चित्रस्योपरितने भागे •• बिन्दुद्वयं दर्शितम् । दलप्रक्षेपे जाते लोभतृतीयसंग्रहकिट्टितः प्रभृति लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टिं यावत् सर्वा अवान्तरकिट्टय एकगोपुच्छाकारेण भवन्ति ।

(ब) लोभद्वितीयसंग्रहकिट्टयवान्तरकिट्टिषु दलिकप्रक्षेपे जाते लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टौ परमार्थत एकाधिकलोभतृतीयसंग्रहकिट्टि-द्वितीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणचयैरसत्कल्पनया तु पञ्चभिश्चयैर्हीनं दलं भवति, तद्द्योतनाय चित्रे लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टौ बिन्दुद्वयसहितशून्यानि द्वादश (१२), लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टौ तु सप्त (७) । अथ लोभप्रथमसंग्रहकिट्टिप्रथमावान्तरकिट्टौ लोभतृतीयसंग्रहकिट्टि-द्वितीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणांश्चयान् असत्कल्पनया तु चतुश्चयान् प्रक्षिपति । ततः परं सर्वासु लोभप्रथमसंग्रहकिट्टयवान्तरकिट्टिषु तावतश्चयान् प्रक्षिपति । प्रक्षिप्तेषु च तेषु लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिप्रभृतिलोभप्रथमसंग्रहकिट्टिचरमावान्तरकिट्टिपर्यवसानाः सर्वावान्तरकिट्टय एकगोपुच्छाकारेण भवन्ति ।

गोपुच्छाकाररचनायां सम्पन्नायां शेषघातदलं विशेषहीनक्रमेण दीयते । यथा लोभस्य तिस्रः संग्रहकिट्टीः स्थापयित्वा प्ररूपणा दर्शिता, तथैव शेषकषायाणामपि संग्रहकिट्टीरुपर्युपरि स्थापयित्वा दर्शयितव्या ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णाऽधस्तनशीर्षचयादिरूपं यद् दलं दास्यति, तत् सर्वं सर्वघातदलाऽसंख्येयभागमात्रमेव भविष्यति, तच्च घातदलत एव दास्यति । तेन तद् दलं पृथक् स्थापयितव्यम् । तन्निक्षेपविधिस्त्वग्रे **सप्तत्रिंशदधिकशततमगाथायाष्टीकायां** वक्ष्यते ।

अनन्तरोक्तदलत्रयमपि सर्वघातदला-ऽसंख्येयभागमात्रं भवति । सर्वघातदलतश्चोपर्युक्तदलत्रयं विशोध्य शेषसर्वघातदलं लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टितः प्रभृति क्रोधप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टिं यावद् घाताऽवान्तरकिट्टिरहितासु सर्वास्ववान्तरकिट्टिषु विशेषहीनक्रमेण निक्षेपणीयम् । निक्षेपविधिश्चेत्थं द्रष्टव्यः—शेषघातदलं विभागद्वये विभजनीयम् । तत्राऽऽद्यो विभाग उत्तरदलम्, द्वितीयस्त्वादिदलम् ।

**अथोत्तरदलं दश्यते**—शेषघातदले पदेन विभक्ते मध्यमदलं प्राप्यते । ततो मध्यमदलमर्धीकृतैकोनपदन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां भज्यते, तदैकचयदलं प्राप्यते । पदं चात्र घातरहितानां सर्वाऽवान्तरकिट्टीनां राशिर्वक्तव्यम् । ततः क्रोधस्य प्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टावेकं चयं प्रक्षिपति । क्रोधप्रथमसंग्रहकिट्टिद्विचरमाऽवान्तरकिट्टौ द्वौ चयौ प्रक्षिपति, एवं पश्चानुपूर्व्यैकोत्तरवृद्ध्या चयान् ददल्लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ पदप्रमाणांश्चयान् प्रक्षिपति । "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल संकलिताख्या ।**" इत्यनेन करणेन चयान् सङ्कलय्य घातरहितानां सर्वाऽवान्तरकिट्टिषु प्रक्षिपति । सङ्कलितचयैश्च गुणितमेकचयगतदलं सर्वोत्तरदलं सम्पद्यते ।

न्यासः—

$$\text{मध्यमदलम्} = \frac{\text{शेषघातदलम्}}{\text{पदम्}}$$

$$\therefore\ \text{एकचयगतदलम्} = \frac{\text{मध्यमदलम्}}{\text{२ द्विगुण हानी} - \frac{(\text{पद}-१)}{२}}$$

$$\text{सर्वचयाः} = \frac{(\text{पद}+१)\times\text{पदम्}}{२}$$

$$\text{सर्वोत्तरदलम्} = \text{सर्वचयाः}\times\text{एकचयगतदलम्}$$

**अथाऽऽदिदलं प्रदश्यते**—शेषघातदलत उत्तरदलं विशोध्याऽवशिष्टदलमादिदलमुच्यते, आदिदलं च पदेन भज्यते, तदैकमादिदलखण्डं प्राप्यते । आदिदलखण्डं घातरहितासु सर्वाऽवान्तरकिट्टिषु ददाति ।

न्यासः—

$$\text{आदिदलम्} = \text{शेषघातदलम्} - \text{उत्तरदलम्}$$

$$\text{एकमादिदलखण्डम्} = \frac{\text{आदिदलम्}}{\text{पदम्}}$$

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ निक्षेपक्रमो भण्यते—क्रोधस्य प्रथमसंग्रहकिट्टिचरमा-ऽवान्तरकिट्ट्यामादिदलत एकमादिदलखण्डमुत्तरदलतश्चैकचयं ददाति । क्रोधप्रथमसंग्रहकिट्टिद्विचरमाऽवान्तरकिट्ट्यामादिदलत एकमादिदलखण्डमुत्तरदलतश्च द्वौ चयौ प्रक्षिपति । एवं पश्चानुपूर्व्या घातरहितसर्वाऽवान्तरकिट्टिष्वेकोत्तरवृद्ध्या चयानेकैकं चादिदलखण्डं तावद् ददाति, यावल्लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टिः । एवंक्रमेण दले प्रक्षिप्ते शेषसर्वघातदलं परिसमाप्तं भवति, सर्वाऽवान्तरकिट्टयश्चैकगोपुच्छाकारेण सम्पद्यन्ते । **समाप्तो गणितविभागः** ॥१२८-१२९-१३०॥

संक्रमदलाऽल्पबहुत्वं गाथात्रयेणोक्तम् । सम्प्रति संक्रमदलतोऽवान्तरकिट्टीः केन विधिना निर्वर्तयतीति वक्तव्यम् । तत्राऽपि संक्रमदलतोऽवान्तरकिट्टिनिवृत्तेरर्वाग् बन्धप्रदेशतो-ऽवान्तरकिट्टिनिर्वृत्तिः प्रतिपादनीया, संक्रमावान्तरकिट्टिनिर्वृत्तिप्ररूपणायामुपयोगित्वात् तस्याः । तेन बन्धप्रदेशादपूर्वाऽवान्तरकिट्टीनां निर्वृत्तिं प्रतिपिपादयिषुराह—

**बंधपएसा णिव्वत्तए अपुव्वा अवन्तरा किट्टी ।**
**पढमाण चउण्ह अवंतरकिट्टीअंतरेसुं तु ॥१३१॥**

बन्धप्रदेशाद् निर्वर्तयत्यपूर्वा अवान्तराः किट्टीः ।
प्रथमानां चतसृणामवान्तरकिट्ट्यन्तरेषु तु ॥१३१॥ इति पदसंस्कारः ।

**'बंधपएसा'** इत्यादि, 'बन्धप्रदेशाद्' जात्यामेकवचनम्, बन्धप्रदेशेभ्यः 'चतसृणां' क्रोधमानमायालोभसम्बन्धिनीनां चतुःसंख्याकानां 'प्रथमानाम्' आद्यसंग्रहकिट्टीनामवान्तरकिट्ट्यन्तरेषु तु 'अपूर्वा' अभिनवा अवान्तराः किट्टीर्निर्वर्तयति, न तु वक्ष्यमाणसंक्रमदलवत् संग्रहकिट्टीनामधस्तादपि । कथमेतदवसीयते ? इति चेत्, उच्यते-चतसृणां प्रथमसंग्रहकिट्टीनां मध्यमा एवाऽवान्तरकिट्टयो बध्यन्ते, न तु संग्रहकिट्टिसर्वजघन्यावान्तरकिट्टिर्नापि ततो हीना । तेन संग्रहकिट्ट्या अधस्ताद् बन्धदलादपूर्वाऽवान्तरकिट्टयो न निर्वर्त्यन्ते ॥१३०॥

ननु बन्धप्रदेशतोऽपूर्वाऽवान्तरकिट्टीः किं सर्वाऽवान्तरकिट्ट्यन्तरेषु निर्वर्तयति ? उतास्ति कश्चिद् विशेषः ? इति, उच्यते—न तावत् सर्वेष्ववान्तरकिट्ट्यन्तरेषु । अथ यतिष्ववान्तरकिट्ट्यन्तरेषु गतेष्वपूर्वा अवान्तरकिट्टीर्निर्वर्तयति, तदभिधित्सुराह—

**गंतूण असंखगुणिअपल्लपढमवग्गमूलठाणाणि ।**
**एगिगबंधअपुव्वं किट्टिं खलु किट्टिअंतरे कुणइ ॥१३२॥ (गीतिः)**

गत्वाऽसंख्यगुणितपल्यप्रथमवर्गमूलस्थानानि ।
एकैकबन्धाऽपूर्वां किट्टिं खलु किट्ट्यन्तरे करोति ॥१३२॥ इति पदसंस्कारः ।

**'गंतूण'** इत्यादि, तत्र 'असंख्यगुणितपल्यप्रथमवर्गमूलस्थानानि' असंख्येयपल्योपमप्रथमवर्गमूलमात्राण्यवान्तरकिट्ट्यन्तराणि 'गत्वा' उल्लङ्घ्य 'किट्ट्यन्तरे' अवान्तरकिट्ट्यन्तर एकैकबन्धाऽपूर्वाऽ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वान्तरकिट्टिं खलु 'करोति' निर्वर्तयति। भावार्थः पुनरयम्—उपरितनमधस्तनं चाऽसंख्येयभागं मुक्त्वा शेषा अवान्तरकिट्टयो बध्यन्ते। तत्र जघन्यावान्तरकिट्ट्या द्वितीयावान्तरकिट्ट्याश्च यदन्तरं भवति, तत् प्रथममवान्तरकिट्ट्यन्तरमुच्यते । द्वितीयावान्तरकिट्ट्यास्तृतीयावान्तरकिट्ट्याश्चान्तरं द्वितीयमवान्तर-किट्ट्यन्तरमभिधीयते,एवमग्रेऽपि वक्तव्यम्। तत्र प्रथमावान्तरकिट्ट्यन्तरे बन्धदलतोऽपूर्वावान्तरकिट्टिं न निर्वर्तयति। द्वितीयेऽप्यवान्तरकिट्ट्यन्तरे बन्धदलतोऽपूर्वाऽवान्तरकिट्टिं न निर्वर्तयति । एवं प्रथमा-दवान्तरकिट्ट्यन्तरादसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणान्यवान्तरकिट्ट्यन्तराणि गत्वा बन्धदलत एका-मपूर्वाऽवान्तरकिट्टिं निर्वर्तयति, ततः पुनरसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणान्यवान्तरकिट्ट्यन्तराणि व्यतिक्रम्य द्वितीयामपूर्वाऽवान्तरकिट्टिं निर्वर्तयति । ततोऽप्यसंख्येयपल्योपमप्रथमवर्गमूलमात्रा-वान्तरकिट्ट्यन्तराण्युल्लङ्घ्य तृतीयामपूर्वाऽवान्तरकिट्टिं निर्वर्तयति । एवंक्रमेण तावद्वक्तव्यम्, यावद् बन्धप्रदेशतो निर्वर्त्यमानचरमाऽपूर्वाऽवान्तरकिट्टिः, सा चोपरितनानामसंख्यातपल्योपम-प्रथमवर्गमूलप्रमाणानां बन्धे वर्तमानानामवान्तरकिट्टीनामधस्तान्निर्वर्त्यते । उक्तं च **कषायप्राभृत-चूर्णौ—"किट्टीअंतराणि अंतरट्ठदाए असंखेज्जाणि पलिदोवमपढमवग्गमूलाणि, ए-त्तियाणि किट्टीअंतराणि गंतूण अपुव्वा किट्टी णिव्वत्तिज्जदि । पुणो वि एत्ति-याणि किट्टीअंतराणि गंतूण अपुव्वा किट्टी णिव्वत्तिज्जदि ।"** इति । अनया रीत्या बन्धपूर्वाऽवान्तरकिट्ट्यसंख्येयभागमात्र्यो बन्धापूर्वावान्तरकिट्टयो निर्वर्त्यन्ते ।

न्यासः— $\text{निर्वर्त्यमानबन्धापूर्वावान्तरकिट्टयः} = \dfrac{\text{बन्धपूर्वावान्तरकिट्टिराशिः}}{\text{असंख्यातपल्योपमप्रथमवर्गमूलानि}}$

## अथ गणितविभागः ।

लोभस्य किट्टितया परिणतं दलं सार्धद्विगुणहानिगुणितैकसमयप्रबद्धप्रमाणं भवति । एकद्विगुणहानिश्चाऽसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणाऽस्ति । निरुक्तदलस्य च तिस्रः संग्रह-किट्टयो निर्वर्तिताः । तत एकैकसंग्रहकिट्टौ सार्धद्विगुणहानित्रिभागगुणितैकसमयप्रबद्धप्रमाणं सकलाऽवान्तरकिट्टितया दलं परिणतं भवति। यदि सार्धद्विगुणहानित्रिभागगुणितैकसमयप्रबद्धप्रमाणेन दलेनैकैकसंग्रहकिट्टौ सकलाऽवान्तरकिट्टयो निर्वर्तिताः, तर्ह्येकसमयप्रबद्धप्रमाणेन दलेन कति बन्धा-ऽपूर्वाऽवान्तरकिट्टयो निर्वर्त्येरन् ? इति त्रैराशिकेन साधनीया बन्धाऽपूर्वावान्तरकिट्टयः ।

असत्कल्पनया (१) द्विगुणहानिः=षोडश (१६) कल्प्यताम् ।

∴सार्धद्विगुणहानिः=चतुर्विंशतिः (२४)।

(२) एकसमयप्रबद्धदलम्='अ' कल्प्यताम्

∵लोभसंग्रहकिट्टितया परिणतं दलम्=एकसमयप्रबद्धम्×सार्धद्विगुणहानिः

∴प्रकृते लोभसंग्रहकिट्टितया परिणतं दलम्=२४×अ=२४ अ

अतो लोभस्यैकसंग्रहकिट्टितया परिणतं दलम्=२४ अ÷३=८ अ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोभस्यैकसंग्रहकिट्टितया परिणतदलस्य '८ अ' इत्यस्य द्वासप्ततिरवान्तरकिट्टयो निर्वर्तिता इति कल्प्यताम् ।

'८ अ' इत्यनेन द्वासप्ततिः (७२) अवान्तरकिट्टयो निर्वर्त्यन्ते, तर्हि 'अ' इत्यनेन कत्यवान्तरकिट्टयो निर्वर्त्येरन् ? **"प्रमाणमिच्छा च समानजाती, आद्यन्तयोस्तत्फलमन्यजातिः । मध्ये तदिच्छाहतमाद्यहृत् स्यादिच्छाफलम् ।"** इति श्रीभास्करकरणसूत्रेण प्राप्तव्यो बन्धापूर्वावान्तरकिट्टिराशिः । तद्यथा–अत्र प्रमाणम्='८ अ', इच्छा='अ', प्रमाणफलम्=७२ । तत इच्छाहतं फलमिदम्–७२×अ=७२ अ, तच्च '८ अ' इति आद्येन–प्रमाणेन हृत् इच्छाफलम्= ७२ अ÷८ अ=९ । अत एकसमयप्रबद्धेन नव (९) बन्धाऽपूर्वावान्तरकिट्टयो निर्वर्त्यन्ते । ताश्च परमार्थतः सार्धप्रदेशद्विगुणहानित्रिभागभाजितैकसंग्रहकिट्टयवान्तरकिट्टिप्रमिताः सत्यः पूर्वाऽवान्तरकिट्टयसंख्येयभागप्रमाणा भवन्ति ।

अथ नव (९) बन्धाऽपूर्वाऽवान्तरकिट्टिभिरेकसंग्रहकिट्टिसकलपूर्वाऽवान्तरकिट्टयोऽन्तर्यन्ते, तर्ह्येकबन्धाऽपूर्वाऽवान्तरकिट्टयाः कति पूर्वाऽवान्तरकिट्टयोऽन्तर्येरन् ? इति त्रैराशिकेनाऽन्तरं साधनीयम् । प्रमाणमत्र ९, प्रमाणफलम् ७२, इच्छा १ । **'प्रमाणमिच्छा०'** इत्यनन्तरोक्त**भास्कर**वचनेन इच्छागुणितं प्रमाणफलमिदम्–७२×१=७२, तच्च ९ इति प्रमाणेन भक्तव्यम्, तदा इच्छाफलमिदम्–$\frac{७२}{९}$=८ । तच्च सार्धद्विगुणहानित्रिभागमात्रम्, चतुर्विंशतेः सार्धद्विगुणहानित्वेन परिकल्पनात् । अष्टाविति च राशिरसंख्येयपल्योपमप्रथमवर्गमूलकल्पो भवति, सार्धद्विगुणहान्या त्रिभागमात्रत्वात् । तेनैकैकाऽपूर्वावान्तरकिट्टिरसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणावान्तरकिट्टयन्तराणि गत्वा गत्वा निर्वर्त्यते । एवं मायामानक्रोधानां प्रथमसंग्रहकिट्टावपि प्ररूपयितव्यम्, नवरं लोभप्रथमसंग्रहकिट्टितः क्रोधप्रथमसंग्रहकिट्टौ त्रयोदशगुणं दलं स्थापयित्वा प्ररूपणा विधेया ॥१३२॥

**॥ समाप्तो गणितविभागः ॥**

अथ बन्धदलतः पूर्वाऽपूर्वावान्तरकिट्टिषु दलनिक्षेपविधिं विभणिषुराह—

**बंधादिपुव्वकिट्टीअ पएसग्गं बहुं देई ।**
**तत्तो विसेसहीणकमेण जा हेट्ठिमा अपुव्वाए ॥१३३॥ (उद्गीतिः)**
**तत्तो अपुव्वकिट्टीअ अणंतगुणं तओ देई ।**
**पुव्वाअ अणंतगुणूणं एवं जाव बंधचरिमकिट्टी ॥१३४॥ (उद्गीतिः)**

बन्धादिपूर्वकिट्टौ प्रदेशाग्रं बहु ददाति ।
ततो विशेषहीनक्रमेण यावदधस्तनाऽपूर्वस्याः ॥ १३३ ॥
ततोऽपूर्वकिट्टा अनन्तगुणं ततो ददाति ।
पूर्वस्यामनन्तगुणोनमेवं यावद् बन्धचरमकिट्टिः ॥ १३४ ॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'बंधादि०' इत्यादि. 'बन्धादिपूर्वकिट्टौ' बन्धप्रथमपूर्वाऽवान्तरकिट्टौ प्रदेशाग्रं 'बहु' प्रभूतं ददाति । इदमुक्तं भवति—चतसृणां प्रथमसंग्रहकिट्टीनामधस्तनमुपरितनं चाऽसंख्येयभागं परित्यज्य शेषा मध्यमा अवान्तरकिट्टीर्बध्नाति । अथ मध्यमाऽवान्तरकिट्टिस्वरुपेण यमनुभागं बध्नाति, स पूर्वाऽवान्तरकिट्टिस्वरुपोऽपूर्वान्तरकिट्टिस्वरुपश्च भवति । तत्र बन्धे या सर्वजघन्याऽनुभागकाऽवान्तरकिट्टिः, तस्यां प्रभूतं प्रदेशाग्रं बन्धदलतो ददाति । 'तत्तो' इत्यादि, ततः परं बन्धद्वितीयादिपूर्वाऽवान्तरकिट्टिषु विशेषहीनक्रमेण तावद् ददाति, यावद् 'अपूर्वस्याः' बन्धापूर्वाऽवान्तरकिट्टया 'अधस्तना' अधस्तनबन्धपूर्वावान्तरकिट्टिः, अन्यथैकगोपुच्छाकारभङ्गः प्रसज्येत । जघन्यबन्धपूर्वाऽवान्तरकिट्टित आरभ्याऽसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणासु बन्धपूर्वाऽवान्तरकिट्टिष्वनन्ततमभागहीनक्रमेण प्रदेशाग्रं ददाति, प्रथमादवान्तरकिट्टयन्तरादसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणेष्ववान्तरकिट्टयन्तरेषु गतेषु सत्सु बन्धाऽवान्तरकिट्टिनिर्वृत्तिदर्शनादिति भावः । 'तत्तो' इत्यादि, 'ततः' बन्धप्रथमाऽपूर्वान्तरकिट्टितः प्राग् या बन्धपूर्वाऽवान्तरकिट्टिस्तत इत्यर्थः, 'अपूर्वकिट्टौ' बन्धप्रथमापूर्वावान्तरकिट्टयामनन्तगुणं प्रदेशाग्रं ददाति । 'ततः' बन्धप्रथमापूर्वाऽवान्तरकिट्टितः पूर्वस्यां बन्धावान्तरकिट्टौ 'अनन्तगुणोनम्' अनन्तगुणहीनं प्रदेशाग्रं ददाति ।

सम्प्रत्यतिदिदिक्षुराह-'एवं' इत्यादि,'एवं' यथा बन्धपूर्वावान्तरकिट्टिषु विशेषहीनक्रमेण दलिकं ददाति, यावदपूर्वकिट्टिरप्राप्ता भवति । ततोऽपूर्वावान्तरकिट्टयामनन्तगुणं दलिकं ददाति, ततः पूर्वावान्तरकिट्टावनन्तगुणहीनं ददाति, तथैव तावदभिधातव्यम्, यावद् 'बन्धचरमकिट्टिः' बन्धचरमपूर्वावान्तरकिट्टिः । भावार्थः पुनरयम्—बन्धपूर्वावान्तरकिट्टिषु यथोत्तरमनन्तभागेन हीनं ददाति । बन्धपूर्वावान्तरकिट्टितोऽनन्तरायां बन्धाऽपूर्वावान्तरकिट्टयामनन्तगुणं दलं प्रक्षिपति, ततोऽनन्तरायां बन्धपूर्वावान्तरकिट्टावनन्तगुणहीनं दलं ददाति, ततो बन्धपूर्वाऽवान्तरकिट्टिषु यथोत्तरमनन्तभागेन हीनं दलिकं ददाति। एवंक्रमेण तावद्वक्तव्यम्, यावद् बन्धचरमपूर्वावान्तरकिट्टिः। उक्तञ्च कषायप्राभृतचूर्णौ—"**बज्झमाणयस्स पदेसग्गस्स णिसेगसेढिपरूवणं वत्तइस्सामो—तत्थ जहण्णियाए किट्टीए बज्झमाणियाए बहुअं । विदियाए किट्टीए विसेसहीणमणंतभागेण, तदियाए विसेसहीणमणंतभागेण । चउत्थीए विसेसहीणं । एवमणंतरोवणिधाए ताव विसेसहीणं जाव अपुव्वकिट्टिमपत्तो त्ति । अपुव्वाए किट्टीए अणंतगुणं । अपुव्वादो किट्टीदो जा अणंतरकिट्टी, तत्थ अणंतगुणहीणं, तदो पुणो अणंतभागहीणं । एवं सेसासु सव्वासु ।**" इति॥१३४॥

बन्धप्रदेशतोऽवान्तरकिट्टिनिर्वृत्तिं विस्तरतोऽभिधाय संक्रमदलतोऽवान्तरकिट्टिनिर्वृत्तिं व्याचिख्यासुराह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुणए वज्जिय कोहपढमं तु एगारसाण हेट्ठम्मि ।**
**तह ऽवंतरकिट्टीअंतरेसु संकमदला अपुव्वाओ ॥१३५॥ [ गीतिः ]**

करोति वर्जयित्वा क्रोधप्रथमां त्वेकादशानामधस्तात्
तथाऽवान्तरकिट्टयन्तरेषु संक्रमदलादपूर्वाः ॥१३५॥ इति पदसंस्कारः ।

'कुणए' इत्यादि, तत्र 'क्रोधप्रथमां' क्रोधप्रथमसंग्रहकिट्टिं तु वर्जयित्वा शेषाणामेकादशानां संग्रहकिट्टीनामधस्तात् तथैकादशानां संग्रहकिट्टीनामवान्तरकिट्टयन्तरेषु 'संक्रमदलात्' संक्रमप्रदेशाग्राद् 'अपूर्वाः' अपूर्वाऽवान्तरकिट्टीः करोति । उक्तं च **कषायप्राभृतचूर्णौ**–**"जाओ संकामिज्जमाणियादो पदेसग्गादो अपुव्वाओ किट्टीओ णिव्वत्तिज्जंति, ताओ दुसु ओगासेसु । तं जहा–किट्टीअंतरेसु च संगहकिट्टीअंतरेसु च ।"** इति । अत्र क्रोधस्य प्रथमसंग्रहकिट्टिं वर्जयित्वा शेषाणामेकादशानां संग्रहकिट्टीनामधस्ताद् योऽवकाशः, स संग्रहकिट्टयन्तरं ज्ञातव्यः । तथा क्रोधप्रथमसंग्रहकिट्टिं वर्जयित्वा शेषैकादशसंग्रहकिट्टीनां संलग्नयोर्द्वयोः स्वस्वावान्तरकिट्टयोर्मध्ये योऽवकाशः, सोऽवान्तरकिट्टयन्तरं वाच्यः । न च संक्रमदलतः क्रोधप्रथमसंग्रहकिट्टया अधस्तात् तथा क्रोधप्रथमसंग्रहकिट्टेरवान्तरकिट्टयन्तरेष्वपूर्वा अवान्तरकिट्टयः कुतो न निर्वर्त्यन्त इति वक्तव्यम्, तस्या विनाश्यमानत्वेन तत्र संक्रमाऽपूर्वावान्तरकिट्टिनिर्वर्तनाऽभावात् । तदेवं क्रोधप्रथमसंग्रहकिट्टौ बन्धप्रदेशत एवाऽपूर्वा अवान्तरकिट्टयो निर्वर्त्यन्ते । मान-माया-लोभानां च प्रथमसंग्रहकिट्टौ बन्धप्रदेशतः संक्रमप्रदेशतश्चाऽपूर्वावान्तरकिट्टयो निर्वर्त्यन्ते । क्रोधादीनां शेषास्वष्टासु संग्रहकिट्टिषु केवलं संक्रमप्रदेशत एवाऽपूर्वावान्तरकिट्टयो निर्वर्त्यन्त इति फलितार्थः । इदन्त्ववधेयम्-बन्धप्रदेशतः क्रोधादिप्रथमसंग्रहकिट्टीनामवान्तरकिट्टयन्तरेषु निर्वर्त्यमाना अपूर्वावान्तरकिट्टयः स्तोका भवन्ति, एकसमयप्रबद्धप्रदेशाग्रेण तासां निर्वृत्तेः । ततोऽसंख्येयगुणाः संक्रमप्रदेशतः क्रोधादीनां द्वितीयाद्येकादशसंग्रहकिट्टीनामधस्तात् क्रोधादीनां चैकादशसंग्रहकिट्टयवान्तरकिट्टयन्तरेषु निर्वर्त्यमाना अपूर्वा अवान्तरकिट्टयो भवन्ति, संक्रमप्रदेशाग्रस्याऽसंख्येयसमयप्रबद्धमात्रत्वात् । अभ्यधायि च **कषायप्राभृतचूर्णौ**–**"बज्झमाणयादो थोवाओ णिव्वत्तेदि । संकामिज्जमाणयादो असंखेज्जगुणाओ ।"** इति ॥१३५॥

साम्प्रतं संक्रमदलतो निर्वर्त्यमानाऽपूर्वावान्तरकिट्टीनामल्पबहुत्वमभिधत्ते—

**संकमओ णिव्वत्तिज्जमाणकिट्टीसु संगहंतरजत्तो ।**
**होंति अवंतरकिट्टीअंतरजाओ असंखगुणिआऽपुव्वा ॥१३६॥ (आर्यागीतिः)**

संक्रमतो निर्वर्त्यमानकिट्टिषु संग्रहान्तरजाभ्यः ।
भवन्त्यवान्तरकिट्टयन्तरजा असंख्यगुणिता अपूर्वाः ॥१३६॥

'संकमओ' इत्यादि, 'संक्रमतः' संक्रमदलतो निर्वर्त्यमानकिट्टिषु 'संग्रहान्तरजाभ्यः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संग्रहकिट्ट्यन्तरजाभ्योऽपूर्वावान्तरकिट्टिभ्योऽवान्तरकिट्ट्यन्तरजाः **'असंखगुणिलाऽपुव्वा'** त्ति **"शेषं संस्कृतवत् सिद्धम्"** (सिद्धहेम० ८-४-४४८) इति प्राकृतलक्षणदर्शनाद् आकारोऽकारेण सह दीर्घो जातः, विश्लेषे चाऽकारः प्राप्तः, तेन 'असंखगुणिआ अपुव्वा' त्ति 'असंख्यगुणिताः' असंख्येयगुणा अपूर्वाः– अपूर्वावान्तरकिट्टयो 'भवन्ति' जायन्ते। उक्तं च **कषायप्राभृतचूर्णौ—"जाओ संगहकिट्टीअंतरेसु, ताओ थोवाओ। जाओ किट्टीअंतरेसु, ताओ असंखेज्जगुणाओ।"** इति। अयं भावः—किट्टिवेदनाद्धायाः प्रथमसमये संक्रमदलतः क्रोधप्रथमसंग्रहकिट्टिं वर्जयित्वैकादशसंग्रहकिट्टीनामधस्तात् तथा तासामेवैकादशसंग्रहकिट्टीनामवान्तरकिट्ट्यन्तरेष्वपूर्वा अवान्तरकिट्टयो निर्वर्त्यन्त इति प्रागुक्तम्। तत्र क्रोधप्रथमसंग्रहकिट्टिं परित्यज्यैकादशसंग्रहकिट्टीनामधस्ताद् योऽवकाशः, स संग्रहकिट्ट्यन्तरम्। तत्र या अपूर्वा अवान्तरकिट्टयो जायन्ते, ताः संग्रहकिट्ट्यन्तरजा उच्यन्ते। तथा क्रोधप्रथमसंग्रहकिट्टिं विहायैकादशसंग्रहकिट्टीनामवान्तरकिट्ट्यन्तरेषु या अपूर्वा अवान्तरकिट्टयो जायन्ते, ता अवान्तरकिट्ट्यन्तरजा व्यपदिश्यन्ते। तत्रैकादशसंग्रहकिट्ट्यन्तरेषु यावत्संक्रमदलिकतोऽपूर्वावान्तरकिट्टीर्निर्वर्तयति, ततोऽसंख्येयगुणं संक्रमदलिकमादायैकादशसंग्रहकिट्टीनामवान्तरकिट्ट्यन्तरेष्वपूर्वावान्तरकिट्टीर्निष्पादयति। तेन संग्रहकिट्ट्यन्तरोत्पन्नापूर्वावान्तरकिट्टितोऽवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टयोऽसंख्येयगुणा भवन्ति।

संग्रहकिट्ट्यन्तरजा अपूर्वावान्तरकिट्टयो निरन्तरं तिष्ठन्ति, न तु पूर्वावान्तरकिट्टिभिर्व्यवहिताः, तत्र पूर्वावान्तरकिट्टीनामभावात्।

अवान्तरकिट्ट्यन्तरोत्पन्नास्त्वपूर्वावान्तरकिट्टयो न निरन्तरमवतिष्ठन्ते, अपि तु विवक्षितसंग्रहकिट्ट्याः सर्वजघन्यपूर्वावान्तरकिट्टितः पल्योपमप्रथमवर्गमूलाऽसंख्येयभागे गते सति। तथाहि—विवक्षितसंग्रहकिट्ट्याः प्रथमपूर्वावान्तरकिट्टि-द्वितीयपूर्वान्तरकिट्ट्योर्यदन्तरं भवति, तत् प्रथममवान्तरकिट्ट्यन्तरम्। तत्र संक्रमदलतोऽपूर्वावान्तरकिट्टिं न निर्वर्तयति, एवं द्वितीयेऽवान्तरकिट्ट्यन्तरेऽप्यपूर्वावान्तरकिट्टिं न निर्वर्तयति। एवंक्रमेण पल्योपमप्रथमवर्गमूलाऽसंख्येयभागमात्राण्यवान्तरकिट्ट्यन्तराणि व्यतिक्रम्याऽवान्तरकिट्ट्यन्तरयेकामपूर्वाऽवान्तरकिट्टिं निर्वर्तयति। ततः पुनः पल्योपमप्रथमवर्गमूलाऽसंख्येयभागमितान्यवान्तरकिट्ट्यन्तराणि गत्वैकामपूर्वऽवान्तरकिट्टिं निर्वर्तयति, ततः पुनः पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणान्यवान्तरकिट्ट्यन्तराण्युल्लङ्घ्यैकामपूर्वाऽवान्तरकिट्टिं निर्वर्तयति। एवं तावद्वक्तव्यम्, यावत् संक्रमप्रदेशाग्रतो निर्वर्त्यमाना चरमाऽपूर्वावान्तरकिट्टिः। न चाऽवान्तरकिट्ट्यन्तरेषु पल्योपमवर्गमूलाऽसंख्येयभागमात्राणि स्थानानि गत्वैकैकाऽपूर्वाऽवान्तरकिट्टिर्निर्वर्त्यत इत्येतत्कथमवसीयते? इति वाच्यम्, अग्रिमगाथया दलनिक्षेपविधानावसरे पल्योपमप्रथमवर्गमूलाऽसंख्येयभागमात्रस्याऽन्तरस्य प्रतिपादयिष्यमाणत्वात्।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

## अथ गणितविभागः ।

सम्प्रति द्वात्रिंशदधिकशततमगाथोक्तबन्धापूर्वावान्तरकिट्टीनामेतद्गाथोक्तसंक्रमापूर्वावान्तरकिट्टीनां चान्तरादिकं गणितरीत्या प्रदर्श्यते—एकसमयप्रबद्धदलमसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणसार्धद्विगुणहान्या गुणयितव्यम्, गुणने च कृते लोभस्य किट्टितया परिणतं दलं लभ्यते, तत्पुनस्त्रिकेण भाजितं सदेकसंग्रहकिट्टिसकलाऽवान्तरकिट्टितया परिणतं दलं भवति । ततः सार्धद्विगुणहानित्रिभागगुणितैकसमयप्रबद्धदलमुत्कर्षणापकर्षणभागहारेण भज्यते, तदैकैकसंग्रहकिट्टेरुत्कीर्णदलं प्राप्यते । सम्प्रति तूत्कीर्णदलेन निर्वर्त्यमानाऽपूर्वावान्तरकिट्टीनां प्रमाणमिष्यत इतिकृत्वा सार्धद्विगुणहानित्रिभागगुणितैकसमयप्रबद्धदलेनैकैकसंग्रहकिट्टौ यदि सकलाऽवान्तरकिट्टयो निर्वर्तिताः, तर्हुत्कीर्णदलेन कियत्योऽपूर्वाऽवान्तरकिट्टयो निर्वर्त्येरन् ? इति त्रैराशिकेन साधनीयाः संक्रमदलतो निर्वर्त्यमाना अपूर्वावान्तरकिट्टयो लोभप्रथमसंग्रहकिट्टौ । असत्कल्पनया—

(१) एकद्विगुणहानिः=१६ ∴ सार्धद्विगुणहानिः =२४ ।

(२) एकसमयप्रबद्धदलम्='अ'

(३) लोभप्रथमसंग्रहकिट्टौ निर्वर्तिता अवान्तरकिट्टयः=७२ ।

(४) उत्कर्षणापकर्षणभागहारः=४ ।

(५) असंख्येयपल्योपमप्रथमवर्गमूलानि च=८ इति कल्प्यताम् ।

∴ लोभत्रिसंग्रहकिट्टितया परिणतं दलम्=२४×अ=२४ अ

∴ लोभप्रथमसग्रहकिट्टितया ,, ,, =२४ अ÷३=८ अ, तस्य च ७२ अवान्तरकिट्टयो निर्वर्तिताः ।

∵ उत्कर्षणापकर्षणभागहारः=४

∴ लोभप्रथमसंग्रहकिट्टित उत्कीर्णदलम्=८ अ÷४=२

'८अ' इत्यनेन द्वासप्ततिः (७२) अवान्तरकिट्टयो निर्वर्तिताः, तर्हि '२ अ' इत्यनेन कियत्योऽपूर्वाऽवान्तरकिट्टयो निर्वर्त्येरन् ? **प्रमाणमिच्छा च समानजातो आद्यन्तयोस्तत्फलमन्यजातिः । मध्ये तदिच्छाहतमाद्यहृत् स्यादिच्छाफलं ।**" इति श्रीभास्करवचनेन साध्याः । तथाहि—प्रमाणम्=८अ, प्रमाणफलम्=७२, इच्छा=२ अ, इच्छाहतमिदम्-७२×२अ=१४४अ, आद्येन—प्रमाणेन हृत् इच्छाफलम्=१४४ अ÷८ अ=१८ । एवमष्टादश (१८) अपूर्वाऽवान्तरकिट्टय उत्कीर्णदलतो निर्वर्त्यन्ते, ताश्च परमार्थत उत्कर्षणापकर्षणभागहारभाजितैकसंग्रहकिट्टिगताऽवान्तरकिट्टिप्रमाणा भवन्ति । उत्कर्षणापकर्षणभागहारस्य पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणत्वात् संक्रमदलतो निर्वर्त्यमाना अपूर्वावान्तरकिट्टयो लोभस्यैकसंग्रहकिट्टौ पल्योपमप्रथमवर्गमूलाऽसंख्येयभागभाजितैकसंग्रहकिट्टिगतावान्तरकिट्टिप्रमाणा भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यासः—

लोभप्रथमसंग्रहकिट्टौ सर्वाः संक्रमापूर्वान्तरकिट्टयः $= \frac{\text{तत्संग्रहकिट्टिगता-ऽवान्तरकिट्टयः}}{\text{पल्योपमप्रथमवर्गमूलासंख्यभागः}}$

यद्यपि **द्वात्रिंशदधिकशततमगाथायाष्टीकायां** बन्धापूर्वावान्तरकिट्टिराशिर्गणितरीत्या दर्शितः, तथापीह संक्रमापूर्वान्तरकिट्टिराशिना सह तुलनां कर्तुं पुनः प्रदर्श्यते । एवमन्तरमपि ।

लोभस्य बन्धदलम् 'अ', एकसमयप्रबद्धत्वात् । बन्धदलतो-ऽनन्ततमभागमात्रं दलं पृथक् स्थापयित्वा शेषं बन्धापूर्वावान्तरकिट्टित्वेन परिणमयति । स्थूलदृष्ट्या 'अ' इति दलं बन्धाऽपूर्वावान्तरकिट्टितया परिणमयति, अनन्ततमभागस्याविवक्षणात् । यदि '८अ' इत्यनेन दलेन द्वासप्ततिः(७२) अवान्तरकिट्टयो निर्वर्तिताः, तर्हि 'अ' इत्यनेन कत्यवान्तरकिट्टयो निर्वर्त्येरन् ? इति त्रैराशिकेन नव (९) अवान्तरकिट्टयः साध्यन्ते । ताश्च परमार्थतोऽसंख्येयपल्योपमप्रथमवर्गमूल-भाजितलोभप्रथमसंग्रहकिट्टिगतावान्तरकिट्टिप्रमाणा भवन्ति । तेन बन्धाऽपूर्वावान्तरकिट्टितो-ऽसंख्येयगुणाः संक्रमाऽपूर्वावान्तरकिट्टयो निर्वर्त्यन्त इति सिध्यति, उत्कर्षणापकर्षणभागहारतो-ऽसंख्येयपल्योपमप्रथमवर्गमूलानामसंख्येयगुणत्वात् ।

अथा-ऽन्तरं साध्यते—अष्टादशसंक्रमाऽपूर्वावान्तरकिट्टिभिरेकसंग्रहकिट्टिसर्वपूर्वावान्तरकिट्टयो द्वासप्ततिसंख्याका अन्तर्यन्ते, तर्ह्येकसंक्रमाऽपूर्वावान्तरकिट्टया कति पूर्वावान्तरकिट्टयोऽन्तरयितव्याः ? इति त्रैराशिकेन साधनीयमन्तरम् । तद्यथा—प्रमाणमत्र १८, प्रमाणफलम् ७२, इच्छा १ । "**प्रमाणमिच्छा०**" इति **श्रीभास्कर**वचनेनेच्छागुणितं प्रमाणफलमिदम्—$७२ \times १ = ७२$, तच्च १८इति प्रमाणेन भक्तव्यम्, तदा इच्छाफलम् $\frac{७२}{१८} = ४$, तच्च परमार्थत उत्कर्षणापकर्षणभागप्रमाणं भवत् पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमितं भवति ।

यद्यपि प्रथमतोऽन्ततश्चाऽसंख्येयभागं विहाय पूर्वावान्तरकिट्टय एकैकबन्धापूर्वावान्तरकिट्टया व्यवधीयन्ते, तथापि स्थूलदृष्ट्या सर्वपूर्वावान्तरकिट्टयो व्यवधीयन्त इति कल्प्यते, असंख्येयभागस्या-विवक्षणात् । यदि नवभिर्बन्धापूर्वावान्तरकिट्टिभिरेकसंग्रहकिट्टिसर्वपूर्वावान्तरकिट्टयो द्वासप्ततिसं-ख्याका अन्तर्यन्ते, तर्ह्येकया बन्धापूर्वावान्तरकिट्टया कियत्यः पूर्वावान्तरकिट्टयो व्यवधातव्याः ? इति त्रैराशिकेन व्यवधीयमानाः पूर्वावान्तरकिट्टयः साध्याः ।

न्यासः—प्रमाणम्=९, प्रमाणफलम्=७२, इच्छा=१, इच्छाफलम्$= \frac{७२}{९} = ८$

असत्कल्पनया-ऽष्टौ (८) परमार्थतस्त्वसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणाः पूर्वावान्तरकिट्टीरति-क्रम्यैकां बन्धाऽपूर्वावान्तरकिट्टिं निर्वर्तयति, संक्रमाऽपूर्वावान्तरकिट्टिस्त्वसत्कल्पनया चतस्रः (४) परमार्थतः पुनः पल्योपमप्रथमवर्गमूला-ऽसंख्येयभागप्रमाणाः पूर्वाऽवान्तरकिट्टीरुल्लङ्घ्य निर्वर्त्यन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन संक्रमापूर्वावान्तरकिट्टीनामन्तरं स्तोकतरं भवति, बन्धापूर्वावान्तरकिट्ट्यन्तरतोऽसंख्येयगुणहीनं भवतीत्यर्थः ॥१३६॥

## ॥ गणितविभागः समाप्तः ॥

अथ संक्रमप्रदेशाग्रतो निर्वर्त्यमानापूर्वावान्तरकिट्टिषु दलनिक्षेपमतिदेशेन भणति—

**संगहअंतरजासु णिखेवो किट्टिकरणव्व बंधव्व ।**
**परजासु पल्लमूलासंखंसो अंतरं णवरं ॥१३७॥**

संग्रहान्तरजासु निक्षेपः किट्टिकरणवद् बन्धवद् ।
परजासु पल्यमूलासंख्यांशोऽन्तरं नवरम् ॥१३७॥इति पदसंस्कारः ।

**'संगह०'** इत्यादि, 'संग्रहान्तरजासु' संग्रहकिट्ट्यन्तरजास्वपूर्वाऽवान्तरकिट्टिषु 'निक्षेपः' दलनिक्षेपः किट्टिकरणवद् बोद्धव्य इति शेषः । 'परजासु' अवान्तरकिट्ट्यन्तरजास्वपूर्वावान्तरकिट्टिषु 'बन्धवद्' बन्धाऽपूर्वाऽवान्तरकिट्टिवद् दलनिक्षेपो बोद्धव्य । सामान्येनाऽतिदिश्याऽन्तरविषयकमपवादमाह—**'पल्ल'** इत्यादि, तत्र नवरं 'पल्यमूलासंख्यांशः' पल्योपमप्रथमवर्गमूलाऽसंख्येयभागमात्रमन्तरं ज्ञेयम् । बन्धापूर्वावान्तरकिट्टिदलनिक्षेपेऽन्तरमसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणमासीत् । इह तु पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणं ज्ञातव्यमिति भावः । यदभ्यधायि **कषायप्राभृतचूर्णौ–"जाओ संगहकिट्टीअंतरेसु, तासिं जहा किट्टीकरणे अपुव्वाणं णिव्वत्तिज्जमाणियाणं किट्टीणं विधी, तहा कायव्वो । जाओ किट्टीअंतरेसु, तासिं जहा बज्झमाणएण पदेसग्गेण अपुव्वाणं णिव्वत्तिज्जमाणियाणं किट्टीणं विधी, तहा कायव्वो । णवरि थोवदरगाणि किट्टीअंतराणि गंतूण संछुब्भमाणपदेसग्गेण अपुव्वा किट्टी णिव्वत्तिज्जमाणिगा दिस्सदि । ताणि किट्टीअंतराणि पगणणादो पलिदोवमवग्गमूलस्स असंखेज्जदिभागो ।"** इति ।

भावार्थः पुनरयम्–संग्रहकिट्ट्यन्तरजास्वपूर्वावान्तरकिट्टिषु किट्टिकरणसदृशो यो दलनिक्षेप उक्तः । तत्र सादृश्यार्थ उष्ट्रकूटाकारापेक्षया बोध्यः, अन्यथा सादृश्यं न संभवति, । तथाहि–किट्टिकरणाद्धायां प्रतिसमयमवान्तरकिट्टितयाऽसंख्येयगुणक्रमेण दलं परिणम्यते स्म, तेन पूर्वावान्तरकिट्टिगतदलत उत्तरोत्तरसमयेऽसंख्येयगुणं दलं किट्टितया परिणम्यते स्म । तथाऽपूर्वावान्तरकिट्टिषु यथोत्तरमनन्ततमभागेन हीनं दलिकं ददच्चरमाऽपूर्वावान्तरकिट्टितः प्रथमपूर्वावान्तरकिट्टावसंख्येयभागेन हीनं दलं ददाति स्म, ततोऽनन्तभागेन हीनं हीनतरं ददच्चरमपूर्वाऽवान्तरकिट्टितः प्रथमाऽपूर्वावान्तरकिट्टावसंख्येयभागेनाऽधिकं दलं ददाति स्म । किट्टिवेदनाद्धायां पुनस्तादृशो दलनिक्षेपो न संभवति । कुतः ? इति चेत्, उच्यते-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

किट्टिकरणाद्धायाश्चरमसमये मोहनीयसर्वदलस्य किट्टितया परिणतत्वात् किट्टिवेदनाद्धायाश्च प्रथमसमये पूर्वसत्तागतदलाऽसंख्येयभागमात्रदलस्योत्करणात् पूर्वाऽवान्तरकिट्टिगतदलिकापेक्षयाऽसंख्येयभागप्रमाणं दलमपूर्वाऽवान्तरकिट्टितया परिणमनायोत्किरति, एवं द्वितीयादिसमयेष्वपि। यद्यपि प्रतिसमयं किट्टिवेदनाद्धायामप्यसंख्येयगुणं दलमुत्किरति, तथाप्युत्कीर्यमाणं सर्वं दलं पूर्वसत्तागतसर्वदलासंख्येयभागप्रमाणं भवति। तेन किट्टिवेदनाद्धायाः प्रथमसमये संग्रहकिट्ट्यन्तरोत्पन्नास्ववान्तरकिट्टिषु या चरमापूर्वावान्तरकिट्टिः, तस्यां निक्षिप्यमाणदलतोऽसंख्येयगुणहीनं प्रथमपूर्वावान्तरकिट्टौ दलं निक्षिपति, अन्यथा पूर्वापूर्वाऽवान्तरकिट्टीनां दृश्यमानं दलमेकगोपुच्छाकारेण न स्यात्। एवं चरमपूर्वावान्तरकिट्टितोऽसंख्येयगुणं प्रथमायां संग्रहकिट्ट्यन्तरोत्पन्नायामवान्तरकिट्टौ निक्षिपति, अन्यथा दृश्यमानदलस्य गोपुच्छाकारभङ्गः प्रसज्येत। इहोष्ट्रकूटापेक्षया तु सादृश्यार्थः सूपपद्यते, असंख्येयगुणहानेरसंख्येयगुणवृद्धेश्चोपलम्भेन निम्नोन्नतत्वोपलम्भात्। तथाऽवान्तरकिट्ट्यन्तरजास्वपूर्वाऽवान्तरकिट्टिषु बन्धाऽपूर्वावान्तरकिट्टिसदृशो यो दलिकनिक्षेपः प्रतिपादितः। तत्र सादृश्यार्थोऽन्तरापेक्षया ज्ञातव्यः। यथा बन्धाऽपूर्वावान्तरकिट्टिषु पूर्वाऽवान्तरकिट्टीरन्तरयित्वाऽन्तरयित्वा दलं प्रक्षिपति, तथाऽवान्तरकिट्ट्यन्तरजासु संक्रमापूर्वऽवान्तरकिट्टिष्वपि पूर्वाऽवान्तरकिट्टीरन्तरयित्वाऽन्तरयित्वा दलं प्रक्षिपति, न तु नैरन्तर्येण, अन्यथा सादृश्यं न संभवति। तद्यथा—यथा बन्धजघन्यपूर्वावान्तरकिट्टितो यथोत्तरमनन्तभागेन हीनं हीनतरं दलिकं ददत्संख्येयपल्योपमप्रथमवर्गमूलप्रमाणबन्धपूर्वाऽवान्तरकिट्टिषु गतासु बन्धपूर्वावान्तरकिट्टितो बन्धाऽपूर्वावान्तरकिट्टावनन्तगुणं दत्त्वा तदनन्तरबन्धपूर्वाऽवान्तरकिट्टावनन्तगुणहीनं दलं ददाति स्म, तथा संग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टितः संक्रमजघन्यपूर्वाऽवान्तरकिट्टावसंख्येयगुणहीनं दलं दत्त्वा संक्रमद्वितीयादिपूर्वाऽवान्तरकिट्टिष्वनन्तभागेन हीनं हीनतरं दलिकं ददत् पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणासु पूर्वाऽवान्तरकिट्टिषु गतासु न संक्रमाऽपूर्वाऽवान्तरकिट्टावनन्तगुणं दलं दत्त्वाऽनन्तरसंक्रमपूर्वावान्तरकिट्टावनन्तगुणहीनं ददाति, अपि तु संक्रमाऽपूर्वावान्तरकिट्टावसंख्यातगुणं दलं दत्त्वाऽनन्तरसंक्रमपूर्वावान्तरकिट्ट्यामसंख्यातगुणहीनं ददाति, अन्यथा संक्रमपूर्वावान्तरकिट्टितोऽवान्तरकिट्ट्यन्तरजायां संक्रमाऽपूर्वावान्तरकिट्टौ दृश्यमानदलस्याऽनन्तगुणत्वप्रसङ्गेन गोपुच्छाकारभङ्गः प्रसज्येत। अतो बन्धवदित्यत्र सादृश्यार्थोऽन्तरापेक्षया बोध्यः। तेन किट्टिवेदनाद्धाप्रथमसमये दलिकनिक्षेप इत्थं प्ररूपयितव्यः—सर्वमन्दाऽनुभागका या लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टिः, तस्या अधस्तात् किट्टिवेदको लोभतृतीयसंग्रहकिट्ट्यन्तरे या अपूर्वावान्तरकिट्टीर्निर्वर्तयति, तासु या सर्वजघन्याऽनुभागकाऽवान्तरकिट्टिः, तस्यां प्रभूतं दलिकं ददाति। ततो द्वितीयस्यां लोभतृतीयसंग्रहकिट्ट्यन्तरजायामपूर्वावान्तरकिट्टावनन्तभागेन हीनं दलं ददाति, ततोऽनन्तरानन्तरेण विशेषहीनक्रमेण दलं तावद् ददाति, यावल्लोभतृतीयसंग्रहकिट्ट्यन्तरजचरमाऽपूर्वावान्तरकिट्टिः। लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकि-

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

ट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टावसंख्यातगुणहीनं दलं ददाति, ततो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टयामनन्ततमभागेन हीनं दलं ददाति। एवंक्रमेण तावद् ददाति, यावत् पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणा लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टयो व्यतिक्रामन्ति, ततोऽनन्तरायां संक्रमतो निर्वर्त्यमानायां लोभतृतीयसंग्रहकिट्टयाः प्रथमायामवान्तरकिट्टयन्तरजायां संक्रमाऽपूर्वावान्तरकिट्टावसंख्यातगुणं दलं निक्षिपति। ततोऽनन्तरायां लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टावसंख्येयगुणहीनं दलं ददाति। तत उत्तरोत्तरस्यां लोभतृतीयसंग्रहकिट्टिपूर्वाऽवान्तरकिट्टयामनन्तभागेन हीनं दलं ददाति। यत्र च पूर्वावान्तरकिट्टया अपूर्वावान्तरकिट्टयाश्च सन्धिर्भवति, तत्र पूर्वाऽवान्तरकिट्टितोऽपूर्वावान्तरकिट्टावसंख्येयगुणं दत्त्वाऽपूर्वाऽवान्तरकिट्टितोऽनन्तरपूर्वावान्तरकिट्टावसंख्येयगुणहीनं दलं ददाति। शेषाऽवान्तरकिट्टिष्वनन्ततमभागेन हीनं दलं ददाति। एवंक्रमेण ददल्लोभतृतीयसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टयन्तरजायां प्रथमायामपूर्वावान्तरकिट्टावसंख्येयगुणं दलं ददाति। ततो विशेषहीनक्रमेण तावद् ददाति, यावल्लोभद्वितीयसंग्रहकिट्टयन्तरजा चरमाऽपूर्वावान्तरकिट्टिः। ततो लोभद्वितीयसंग्रहकिट्टयन्तरजचरमाऽपूर्वावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टयामसंख्यातगुणहीनं दलं ददाति। ततः परं यथोत्तरमनन्तभागेन हीनं हीनतरं ददाति। नवरं पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणासु पूर्वाऽवान्तरकिट्टिषु गतासु यत्र यत्र पूर्वाऽवान्तरकिट्टेरवान्तरकिट्टयन्तरजायाश्चाऽपूर्वाऽवान्तरकिट्टेः सन्धिर्जायते, तत्र तत्र पूर्वाऽवान्तरकिट्टितोऽपूर्वावान्तरकिट्टावसंख्येयगुणं दलं दत्त्वाऽपूर्वावान्तरकिट्टितोऽनन्तरपूर्वावान्तरकिट्टावसंख्यातगुणहीनं ददाति।

ततो लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टयन्तरजायां प्रथमायामपूर्वावान्तरकिट्टयामसंख्यातगुणं दलं ददाति। तत उत्तरोत्तराऽपूर्वावान्तरकिट्टौ विशेषहीनं दलं तावद् ददाति, यावल्लोभप्रथमसंग्रहकिट्टयन्तरजा चरमाऽपूर्वावान्तरकिट्टिः। ततो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टावसंख्यातगुणहीनं दलं निक्षिपति। ततः परमनन्तरानन्तरेण सर्वत्र विशेषहीनक्रमेण दलं तावद् ददाति, यावल्लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः। नवरं पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणासु पूर्वाऽवान्तरकिट्टिषु गतासु यत्र यत्र पूर्वावान्तरकिट्टेरपूर्वाऽवान्तरकिट्टेश्च सन्धिर्भवति, तत्र तत्र पूर्वावान्तरकिट्टितोऽपूर्वावान्तरकिट्टावसंख्येयगुणं दलं दत्त्वाऽपूर्वावान्तरकिट्टितोऽनन्तरपूर्वाऽवान्तरकिट्टावसंख्येयगुणहीनं दलं प्रक्षिपति।

ततो लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितो मायातृतीयसंग्रहकिट्टयन्तरजायां मायाप्रथमाऽपूर्वावान्तरकिट्टयामसंख्यातगुणं दलं ददाति। ततः सर्वत्र लोभवद् वक्तव्यम्।

अयम्भावः—यथा लोभसंग्रहकिट्टित्रये दलनिक्षेप उक्तः, तथैव मायामानयोः संग्रहकिट्टित्रये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किट्टिवेदनाद्धायां सङ्क्रमदलतो बन्धदलतश्च पूर्वापूर्वावान्तरकिट्टिषु दलिकप्रक्षेपः




सङ्केतस्पष्टीकरणम्—

*=अनेन चिह्नेन तत्तत्संग्रहकिट्टया अधः संक्रमदलतो निर्वर्त्यमानास्वपूर्वावान्तरकिट्टिषु दीयमानं दलं दर्शितम् । असत्कल्पनया लोभस्य तृतीयसंग्रहकिट्टया अधस्तात् पूर्वावान्तरकिट्टयश्चतस्रो निर्वर्त्यन्ते, द्वितीयसंग्रहकिट्टया अधस्तात् तिस्रः (३), प्रथमसंग्रहकिट्टयाश्चाऽधस्ताद् द्वे (२)। परमार्थतस्त्वनन्ता अधस्तन्योऽपूर्वावान्तरकिट्टयो निर्वर्त्यन्ते, अवान्तरकिट्टयन्तरेषु च निर्वर्त्यमानापूर्वावान्तरकिट्टितोऽसंख्येयगुणहीना निर्वर्त्यन्ते ।

....=अनेन चिह्नेन पूर्वावान्तरकिट्टिषु पुरातनसत्तागतदलं सूच्यते । परमार्थतः पूर्वावान्तरकिट्टयो-ऽप्यनन्ताः, असत्कल्पनया तृतीयसंग्रहकिट्टौ २०, द्वितीयसंग्रहकिट्टौ १८, प्रथमसंग्रहकिट्टौ १६ ।

---=अनेन चिह्नेन पूर्वावान्तरकिट्टिषु संक्रमदलतो दीयमानं दलं सूचितम् ।

○○○○=अनेन चिह्नेनाऽवान्तरकिट्टयन्तरेषु निर्वर्त्यमानास्वपूर्वावान्तरकिट्टिषु दीयमानं दलं सूचितम्, ताश्चाऽपूर्वावान्तरकिट्टयोऽसत्कल्पनया लोभस्य तृतीयसंग्रहकिट्टौ ९, द्वितीयसंग्रहकिट्टौ ८, प्रथमसंग्रहकिट्टौ च ५, परमार्थतस्त्वनन्ताः, पूर्वावान्तरकिट्टीनां चाऽसंख्येयभागप्रमाणाः । एकैका चाऽपूर्वावान्तरकिट्टिर्द्वयोः पूर्वावान्तरकिट्टयोरन्तरे निर्वर्त्यते, तथा पल्योपमप्रथमवर्गमूलाऽसंख्येयभागमात्रेष्ववान्तरकिट्टयन्तरेषु गतेषु निर्वर्त्यते, असत्कल्पनया तु द्वयोरवान्तरकिट्टयन्तरयोर्व्रजितयोर्निर्वर्त्यते ।

●●●●= अनेन चिह्नेन बन्धपूर्वावान्तरकिट्टिषु दीयमानं दलं सूचितम्, असत्कल्पनया बन्धपूर्वावान्तरकिट्टयः १५ कल्पिताः, वस्तुतो-ऽनन्ताः । अत्रेदमवधेयम्-लोभप्रथमसंग्रहकिट्टौ बन्धजघन्यपूर्वावान्तरकिट्टया उपरि बन्धोत्कृष्टपूर्वावान्तरकिट्टयाश्चाऽधस्ताद् संक्रमदलतोऽवान्तरकिट्टयन्तरेषु

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

निर्वर्त्यमाना अपूर्वावान्तरकिट्टयोऽपि बन्धपूर्वावान्तरकिट्टित्वेन गृह्यन्त इति ।

△ अनेन चिह्नेन बन्धापूर्वावान्तरकिट्टौ दीयमानं दलं सूचितम् , असत्कल्पनया द्वे बन्धाऽपूर्वावान्तरकिट्टी, वस्तुतोऽनन्ता बन्धापूर्वावान्तरकिट्टयः, असंख्येयपल्योपमप्रथमवर्गमूलप्रमाणासु च बन्धपूर्वावान्तरकिट्टिषु गतास्वेकैका बन्धापूर्वावान्तरकिट्टिर्निर्वर्त्यते, इह त्वसत्कल्पनया पञ्चसु बन्धपूर्वावान्तरकिट्टिषु गतासु निर्वर्त्यते ।

बन्धदलिकनिक्षेपः—

चित्रे लोभप्रथमसंग्रहकिट्टौ या षष्ठावान्तरकिट्टिः, सा लोभप्रथमसंग्रहकिट्टया बन्धप्रथमपूर्वावान्तरकिट्टिः, तस्यां प्रभूतं दलिकं ददाति, तच्च● इत्यनेन चिह्नेन सूचितम् , ततो विशेषहीनक्रमेणाऽसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणासु असत्कल्पनया पञ्चसु बन्धपूर्वावान्तरकिट्टिषु तावद् ददाति, यावद् बन्धापूर्वावान्तरकिट्टया अधस्तनी बन्धपूर्वावान्तरकिट्टिः, असत्कल्पनया तु दशमी । ततोऽनन्तगुणं दलिकं बन्धप्रथमापूर्वावान्तरकिट्टौ ददाति, तच्च △ इत्यनेन चिह्नेन सूचितम् । तदनन्तरं बन्धपूर्वावान्तरकिट्टयामसत्कल्पनया लोभप्रथमसंग्रहकिट्टया द्वादशयामवान्तरकिट्टयामनन्तगुणहीनं दलं ददाति, तच्च ● इत्यनेन चिह्नेन सूचितम् , ततो विशेषहीनं ददाति । एवंक्रमेणाग्रेऽपि बन्धदलिकनिक्षेपो वक्तव्यः ( गाथा १३३-१३४)

'किट्टिकरणद्ध' इत्यस्योष्ट्रकूटाकारापेक्षया संक्रमदलिकप्रक्षेपः—

लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नायां प्रथमापूर्वावान्तरकिट्टौ प्रभूतं दलिकं ददाति, तच्च * इत्यनेन चिह्नेन सूचितम् , ततो विशेषहीनक्रमेण तावद् ददाति, यावल्लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नचरमापूर्वावान्तरकिट्टिः, असत्कल्पनया लोभतृतीयसंग्रहकिट्टयाश्चतुर्थ्यवान्तरकिट्टिः । ततोऽसंख्येयगुणहीनं दलिकं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ चित्रे तु पञ्चमावान्तरकिट्टौ ददाति, तच्च - - - इत्यनेन चिह्नेन सूचितम् , तदेवमत्र दलनिक्षेपस्योष्ट्रकूटाकारः । ततो विशेषहीनक्रमेण तावद् ददाति, यावत् पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणा लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टयो व्यतिक्रामन्ति । इह तु चित्रे प्रभूतावकाशाभावात् तावत्योऽवान्तरकिट्टयो न दर्शिताः, किन्तु द्वे एव पूर्वावान्तरकिट्टी दर्शिते ।

ततः सङ्क्रमदलतो निर्वर्त्यमानायां लोभतृतीयसंग्रहकिट्टयाः प्रथमायामवान्तरकिट्टयन्तरोत्पन्नापूर्वावान्तरकिट्टयामसंख्येयगुणं दलिकं प्रक्षिपति, तच्च ० ० ० इत्यनेन चिह्नेन दर्शितम् । ततोऽनन्तरायां पूर्वावान्तरकिट्टयां चित्रे षष्ठमावान्तरकिट्टावसंख्येयगुणहीनं दलिकं ददाति, तच्च- - - इत्यनेन चिह्नेन सूचितम् । ततो विशेषहीनक्रमेण पल्योपमप्रथमवर्गमूलासंख्येयभागप्रमाणासु पूर्वावान्तरकिट्टिषु दलिकं प्रक्षिपति, ततः पुनर्लोभतृतीयसंग्रहकिट्टेर्द्वितीयस्यामवान्तरकिट्टयन्तरोत्पन्नायामपूर्वावान्तरकिट्टावसंख्येयगुणं दलिकं प्रक्षिपति, ततस्तदनन्तरायां पूर्वावान्तरकिट्टावसंख्येयगुणहीनं दलं प्रक्षिपति । ततो विशेषहीनक्रमेण पल्योपमप्रथमवर्गमूलासंख्येयभागप्रमाणासु पूर्वावान्तरकिट्टिषु प्रक्षिपति । तदेवं 'बन्धद्ध' इत्यस्य सादृश्यार्थोऽन्तरापेक्षया बोध्यः । एवमग्रेऽपि दलिकप्रक्षेपो वाच्यः ।

**'किट्टिकरणद्ध'** इत्यस्य नैरन्तर्यापेक्षया सङ्क्रमदलिकप्रक्षेपः—

लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नायां प्रथमायामपूर्वावान्तरकिट्टौ प्रभूतं दलिकं ददाति, ततो द्वितीयस्यां विशेषहीनम्, ततोऽपि तृतीयस्यां विशेषहीनम्, **'किट्टिकरणद्ध'** इत्यत्र सादृश्यार्थो नैरन्तर्यापेक्षया ज्ञेयः । लोभतृतीयसंग्रहकिट्टिचरमापूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टयाः प्रथमपूर्वावान्तरकिट्टावनन्तगुणहीनं दलं ददाति, ततो विशेषहीनक्रमेण पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणासु पूर्वावान्तरकिट्टिषु ददाति, ततोऽनन्तगुणं दलं लोभतृतीयसंग्रहकिट्टयाः प्रथमायामवान्तरकिट्टयन्तरोत्पन्नायामपूर्वावान्तरकिट्टौ ददाति । ततस्तदनन्तरपूर्वावान्तरकिट्टयामनन्तगुणहीनं दलं प्रक्षिपति, ततो विशेषहीनक्रमेण प्रक्षिपति । एवमग्रेऽपि दलिकप्रक्षेपो वाच्यः ।

एवं शेषकषायाणामपि संग्रहकिट्टीनां चित्रं दर्शयितव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोधस्य च तृतीयसंग्रहकिट्टि-द्वितीयसंग्रहकिट्टयोर्दलनिक्षेपो वक्तव्यः। क्रोधप्रथमसंग्रहकिट्टौ तु संक्रमदलतोऽपूर्वावान्तरकिट्टयो न निर्वर्त्यन्ते ।

**अथ प्रकारान्तरेण दलिकनिक्षेपविधिर्व्याख्यायते**—संग्रहकिट्टयन्तरजायाश्चरमाऽपूर्वावान्तरकिट्टेः प्रथमपूर्वाऽवान्तरकिट्टेश्च सन्धौ सति संग्रहकिट्टयन्तरजचरमाऽपूर्वाऽवान्तरकिट्टितः प्रथमपूर्वावान्तरकिट्टयामनन्तगुणहीनं दलं ददाति ।'किट्टिकरणवद्' इत्यत्र सादृश्यार्थश्च नैरन्तर्यापेक्षया बोध्यः, यथा किट्टिकरणाद्धायामेकैकसंग्रहकिट्टयपूर्वावान्तरकिट्टिषु निरन्तरं दलमनन्तभागेन हीनं ददाति, तथैव किट्टिवेदनाद्धायां संग्रहकिट्टेरधस्तात् निर्वर्त्यमानासु संग्रहकिट्टयन्तरजास्वपूर्वावान्तरकिट्टिषु यथोत्तरं निरन्तरमनन्ततमभागेन हीनं हीनतरं दलं ददाति ।

पूर्वाऽवान्तरकिट्टेरवान्तरकिट्टयन्तरजायाश्चाऽपूर्वावान्तरकिट्टेः सन्धौ सति पूर्वावान्तरकिट्टितोऽवान्तरकिट्टयन्तरजायामपूर्वावान्तरकिट्टयामनन्तगुणं दलं ददाति, अपूर्वावान्तरकिट्टितोऽनन्तरपूर्वाऽवान्तरकिट्टयामनन्तगुणहीनं दलं ददाति । 'बन्धवद्' इत्यत्र सादृश्यार्थश्च प्राग्वदन्तरापेक्षया बोद्धव्यः ।

अनेन विकल्पेन दलनिक्षेपविधिरित्थं प्ररूपयितव्यः—लोभतृतीयसंग्रहकिट्टिप्रथमाऽपूर्वावान्तरकिट्टेरधस्ताद् या अपूर्वाऽवान्तरकिट्टय उत्पद्यन्ते, तासु या सर्वजघन्याऽनुभागका भवति, तस्यां प्रभूतं दलिकं ददाति । ततो द्वितीयस्यां लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नायामपूर्वावान्तरकिट्टौ विशेषहीनं दलं प्रक्षिपति । ततोऽनन्तरानन्तरेण विशेषहीनं दलं तावद् ददाति, यावल्लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टिः ।

लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टावनन्तगुणहीनं दलं ददाति । ततः परमनन्तरानन्तरेणाऽनन्तभागेन हीनं तावद् ददाति, यावत् संक्रमाऽपूर्वावान्तरकिट्टिरप्राप्ता भवति ।

ततः पूर्वावान्तरकिट्टितः संक्रमाऽपूर्वावान्तरकिट्टावनन्तगुणं दलं ददाति । ततोऽनन्तगुणहीनं दलं पूर्वावान्तरकिट्टौ ददाति । ततः परं सर्वत्र यथोत्तरमनन्तभागेन हीनं दलं ददाति । नवरं यत्र यत्र पूर्वावान्तरकिट्टेरपूर्वावान्तरकिट्टेश्च सन्धिर्जायते, तत्र तत्र पूर्वावान्तरकिट्टितो-ऽपूर्वावान्तरकिट्टावनन्तगुणं दलं ददाति, अपूर्वावान्तरकिट्टितश्चानन्तरपूर्वावान्तरकिट्टयामनन्तगुणहीनं दलं ददाति । एवं लोभस्य द्वितीयसंग्रहकिट्टिप्रथमसंग्रहकिट्टयोर्मायामानयोः संग्रहकिट्टित्रये क्रोधस्य च तृतीयसंग्रहकिट्टिद्वितीयसंग्रहकिट्टयोर्दलनिक्षेपो वक्तव्यः, विशेषाभावात् । इत्थं यथागमं व्याख्यानद्वयं दर्शितम् , तत्त्वं तु केवलिनो विदन्ति । पश्यन्तु पाठका यन्त्रकम्—२० ।

## ❀ अथ गणितविभागः ❀

अथ संक्रमदलस्य बन्धदलस्य चाऽधस्तनशीर्षचयदलादिभिः प्ररूपणा क्रियते—अन्यसंग्रहकिट्टितो विवक्षितसंग्रहकिट्टिं संक्रमतो यद् दलं गच्छति, तद् आयदलमिति प्राक् परिभाषितम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन संक्रमदलमेवाऽऽयदलं भवति, न तद्व्यतिरिक्तम् । क्रोधप्रथमसंग्रहकिट्टिं च परित्यज्यैकादशसंग्रहकिट्टिष्वायदलतोऽधस्तनशीर्षचयादिदलं ददाति, क्रोधप्रथमसंग्रहकिट्टौ तु क्रोधप्रथमसंग्रहकिट्टिघातदलतो ददाति । एवमग्रेऽपि वेद्यमानसंग्रहकिट्टयामायदलाभावेन घातदलतोऽधस्तनशीर्षचयादिदलं ददाति ।

(१) **अधस्तनशीर्षचयदलम्**–लोभस्य तृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ प्रभूतं दलं विद्यते स्म, ततो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टयामेकचयेन हीनं दलम्, ततोऽप्येकचयेन हीनं लोभतृतीयसंग्रहकिट्टितृतीयपूर्वावान्तरकिट्टौ विद्यते स्म । एवंक्रमेण तावद् विद्यते स्म, यावत् क्रोधप्रथमसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः ।

**अथ किट्टिवेदनाद्धायाः प्रथमसमये सर्वपूर्वावान्तरकिट्टयस्तेन क्रमेण पूरयितव्याः, येन सर्वपूर्वावान्तरकिट्टयः प्रदेशानाश्रित्य लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितुल्या भवेयुः ।** ततो लोभप्रथमसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टयामेकचयं ददाति, लोभतृतीयसंग्रहकिट्टितृतीयपूर्वावान्तरकिट्टौ द्वौ चयौ प्रक्षिपति । एवमेकोत्तरवृद्ध्या चयांस्तावत् प्रक्षिपति, यावत् क्रोधद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः । एते च दीयमानचया अधस्तनशीर्षचया उच्यन्ते ।

अनेन क्रमेणैकादशसंग्रहकिट्टीनां पूर्वावान्तरकिट्टिषु दीयमाना अधस्तनशीर्षचयाः "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या**" इति करणसूत्रेण सङ्कलयितव्याः । पदं चात्र रूपोनैकादशसंग्रहकिट्टिसर्वपूर्वाऽवान्तरकिट्टिराशिर्ज्ञातव्यम् ।

एकचयगतदलमेकादशानां संग्रहकिट्टीनामधस्तनशीर्षचयैर्गुण्यते, तदैकादशसंग्रहकिट्टीनां सर्वाऽधस्तनशीर्षचयदलं प्राप्यते ।

न्यासः—एकादशसंग्रहकिट्टीनामधस्तनशीर्षचयाः $=(\text{पदम्}+१)\times\frac{\text{पदम}}{२}$

एकादशसंग्रहकिट्टीनां सर्वाधस्तनशीर्षचयदलम् $=(\text{पदम्}+१)\times\frac{\text{पदम्}}{२}\times$ एकचयगतदलम्

एकादशसंग्रहकिट्टिपूर्वाऽवान्तरकिट्टिषु देयं सर्वाऽधस्तनशीर्षचयदलमायदलतो दातुं पृथक् स्थापयितव्यम् ।

अथ क्रोधप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टयामेकादशसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति । तत एकोत्तरवृद्ध्या चयाँस्तावत् प्रक्षिपति, यावत् क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः । अनेन क्रमेण क्रोधप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिषु दीयमानाश्चयाः "**व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनं मुखयुग्दलितं तत् । मध्यधनं पदसंगुणितं तत् सर्वधनं गणितं च तदुक्तम् ॥१॥**" इत्यनेन करणसूत्रेण संकलयितव्याः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र मुखम्=आदिधनम् , तच्चैकादशसंग्रहकिट्टिपूर्वान्तरकिट्टिराशिप्रमाणचयाः, अन्त्यधनं द्वादशसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणचयाः, चयश्चैको ज्ञातव्यः, एकोत्तरवृद्ध्या चयानां दर्शनात् । पदं च क्रोधप्रथमसंग्रहकिट्टिपूर्वाऽवान्तरकिट्टिराशिर्बोद्धव्यम् ।

न्यासः—अन्त्यधनम्=(पदम्−१)×चयः+आदिधनम्

$$\text{मध्यमधनम्}=\frac{\text{अन्त्यधनम्}+\text{आदिधनम्}}{२}$$

सर्वधनम्= मध्यमधनम्×पदम्

∴ वेद्यमानक्रोधप्रथमसंग्रहकिट्टेः सर्वाधस्तनशीर्षचयाः=मध्यमधनम्×पदम्

सर्वाऽधस्तनशीर्षचयैर्गुणितमेकचयगतदलं क्रोधप्रथमसंग्रहकिट्टेः सर्वाऽधस्तनशीर्षचयदलं जायते । तच्च घातदलतो दातुं पृथक् स्थापयितव्यम् ।

न्यासः— क्रोधप्रथमसंग्रहकिट्ट्याः सर्वाधस्तनशीर्षचयदलम्=तत्सर्वाधस्तनशीर्षचयाः×एकचयदलम्

(२) **अधस्तनाऽपूर्वावान्तरकिट्टिदलम्**—पूर्वावान्तरकिट्टिष्वधस्तनशीर्षचयदले यथायोग्यं प्रक्षिप्ते सर्वाः पूर्वावान्तरकिट्टयः प्रदेशापेक्षया सदृशा जायन्ते । एकादशसंग्रहकिट्टीनामधस्ताद् या अपूर्वावान्तरकिट्टयो निर्वर्त्यन्ते, ताः प्रदेशाग्रमाश्रित्य लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितुल्याः स्थापयितव्याः । स्थापितासु चैकैकस्यामवान्तरकिट्टौ यद् दलं भवति, तदधस्तनाऽपूर्वावान्तरकिट्टिदलमुच्यते, एकाधस्तनाऽपूर्वावान्तरकिट्टिदलमेकादशसंग्रहकिट्ट्यन्तरजाऽपूर्वावान्तरकिट्टिराशिना गुण्यते, तदा सर्वाऽधस्तनाऽपूर्वावान्तरकिट्टिदलं लभ्यते । तच्चाऽऽयदलतो दातुं पृथक् स्थापयितव्यम् । वेद्यमानक्रोधप्रथमसंग्रहकिट्ट्या अधस्तादपूर्वाऽवान्तरकिट्टयो न निर्वर्त्यन्ते संक्रमदलाभावात् **उक्तकिट्टिराशिस्त्ववान्तरकिट्ट्यन्तरे**ऽजाताऽपूर्वावान्तरकिट्टिराशितोऽसंख्येयगुणहीनः ।

(३) **अवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिदलम्**—अवान्तरकिट्ट्यन्तरेषु या अपूर्वाऽवान्तरकिट्टयो निर्वर्त्यन्ते, तासामेकैकाऽपूर्वावान्तरकिट्टौ लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिगतप्रदेशतुल्यं प्रदेशाग्रं प्रक्षेप्तव्यम् । एकस्यामपूर्वावान्तरकिट्टौ यद् दलं प्रक्षिप्यते, तदेकाऽवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिदलमुच्यते । तच्चैकादशसंग्रहकिट्टीनां सर्वाऽवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिराशिना गुण्यते, तदा सर्वाऽवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिदलं लभ्यते । एतत्सर्वमायदलतो दातुं पृथक् स्थापयितव्यम् । अवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टीनां राशिश्चैकादशसंग्रहकिट्टिपूर्वावान्तरकिट्टीनामसंख्येयभागप्रमितो ज्ञातव्यः, यतः पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणासु पूर्वावान्तरकिट्टिषु गतास्वेकैकाऽपूर्वाऽवान्तरकिट्टिर्निर्वर्त्यते । क्रोधप्रथमसंग्रहकिट्टौ त्ववान्तरकिट्ट्यन्तरेष्वपूर्वाऽवान्तरकिट्टयः संक्रमदलतो न निर्वर्त्यन्ते, तत्र संक्रमदलाभावात् ।

(४) **उभयचयदलम्**—पूर्वोक्तदलत्रये यथायोग्यं प्रक्षिप्ते संक्रमपूर्वाऽपूर्वावान्तरकिट्टये

बन्धपूर्वावान्तरकिट्टयश्च समानदलिका जायन्ते, तासां दलिकं गोपुच्छाकारं कर्तुं क्रोधप्रथमसंग्रहकिट्टेश्चरमपूर्वावान्तरकिट्टयामेकं चयं प्रक्षिपति। असौ च प्रक्षिप्यमाणश्चय उभयचय उच्यते, द्विचरमपूर्वावान्तरकिट्टौ द्वा उभयचयौ प्रक्षिपति। एवंक्रमेण पश्चानुपूर्व्या लोभतृतीयसंग्रहकिट्टिप्रथमाऽपूर्वावान्तरकिट्टौ बन्धसंक्रमसर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् प्रक्षिपति। नवरं बन्धपूर्वावान्तरकिट्टिष्वनन्तभागदलन्यूनानुभयचयान् प्रक्षिपति, बन्धमध्यमखण्डबन्धचयरूपेण तावद्दलस्य प्रक्षेप्स्यमानत्वात् तथा बन्धाऽपूर्वावान्तरकिट्टिषूभयचयस्थाने वक्ष्यमाणबन्धापूर्वान्तरकिट्टिचयान् बन्धदलतो दास्यति। नन्वेकोभयचयः कियद्दलप्रमाणो भवति ? इति चेत्, उच्यते– मोहनीयसत्तागतसर्वदलं पदेन विभज्यते, तदा मध्यमदलं प्राप्यते। तत्पुनरर्धीकृतैकोनपदन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां विभज्यते, तदैक उभयचयः प्राप्यते। पदं चात्र बन्धसंक्रमसर्वपूर्वापूर्वावान्तरकिट्टिराशिर्ज्ञातव्यम्।

न्यासः—

$$\text{मध्यमदलम्} = \frac{\text{मोहनीयसर्वदलम्}}{\text{पदम्}}$$

$$\text{एक उभयचयः} = \frac{\text{मध्यमदलम्}}{\text{द्विगुणहानिद्वयम्} - \frac{(\text{पदम्} - १)}{२}}$$

सम्प्रति क्रोधप्रथमसंग्रहकिट्टौ प्रक्षिप्यमाणमुभयचयदलं प्रदर्श्यते—क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टयामेकमुभयचयं प्रक्षिपति, क्रोधप्रथमसंग्रहकिट्टिद्विचरमपूर्वावान्तरकिट्टौ द्वा उभयचयौ प्रक्षिपति। एवंक्रमेण क्रोधप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ क्रोधप्रथमसंग्रहकिट्टिसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् प्रक्षिपति। अनेन क्रमेण क्रोधप्रथमसंग्रहकिट्टौ प्रक्षिप्यमाणा उभयचयाः **"सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या।"** इति **श्रीभास्कर**करणसूत्रेण सङ्कलयितव्याः। पदं चाऽत्र क्रोधप्रथमसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिर्ज्ञातव्यम्।

क्रोधप्रथमसंग्रहकिट्टिसर्वोभयचयैरेकोभयचयदलं गुण्यते, तदा क्रोधप्रथमसंग्रहकिट्टिसर्वोभयदलं प्राप्यते। उभयचयदलं च पूर्वावान्तरकिट्टिषु घातदलतो दीयते, बन्धाऽपूर्वावान्तरकिट्टिषु तु बन्धदलतो दीयते। बन्धदलतश्च बन्धापूर्वावान्तरकिट्टिषु किञ्चिन्न्यूनोभयचयदलं यद् दीयते, तद् बन्धपूर्वावान्तरकिट्टिचयदलमिति परिभाषिष्यामहे। तच्च वक्ष्यमाणप्रकारेण संकल्य्य सर्वोभयचयदलतो विशोधयितव्यम्। विशोधिते च तस्मिन् शेषतः पुनरनन्तभागप्रमाणदलं विशोधयितव्यम्, पूर्वापूर्वबन्धावान्तरकिट्टिषु बन्धमध्यमखण्डबन्धचयदलस्वरूपेणाऽनन्तभागप्रमाणदलस्य दायिष्यमाणत्वात्। शुद्धशेषमुभयचयदलं घातदलतो दातव्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यासः—

क्रोधप्रथमसंग्रहकिट्टौ निक्षिप्यमाणाः सर्वोभयचयाः = (पदम्+१) × $\frac{\text{पदम्}}{२}$

,, ,, ,, सर्वोभयचयदलम् = सर्वोभयचयाः × एकोभयचयदलम्

,, ,, ,, घातदलतो दातव्यमुभयचयदलम्

=सर्वोभयचयदलम्—बन्धापूर्वावान्तरकिट्टिचयदलम्—( बन्धमध्यमखण्डम्+बन्धचयदलम् )

**अथैकादशसंग्रहकिट्टीनामुभयचयदलमुच्यते**—क्रोधद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्ट्यामेकाधिकक्रोधप्रथमसंग्रहकिट्टिसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् प्रक्षिपति। क्रोधद्वितीयसंग्रहकिट्टिद्विचरमपूर्वाऽवान्तरकिट्टौ द्व्यधिकक्रोधप्रथमसंग्रहकिट्टिसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् निक्षिपति। एवं पश्चानुपूर्व्यैकोत्तरवृद्ध्या चयान् पूर्वाऽपूर्वावान्तरकिट्टिषु तावद् ददाति, यावल्लोभतृतीयसंग्रहकिट्टिप्रथमाऽपूर्वावान्तरकिट्टिः। एकादशसंग्रहकिट्टिषु **"व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनं मुखयुग् दलितं तत्। मध्यधनं पदसङ्गुणितं तत् सर्वधनं गणितं तदुक्तम्॥१॥"** इति गणितकरणसूत्रेण सङ्कलयितव्याः प्रक्षिप्यमाणोभयचयाः। मुखम्=आदिधनम्, तच्चात्रैकाधिकक्रोधप्रथमसंग्रहकिट्टिसर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणा उभयचयाः। अन्त्यधनं द्वादशसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणा उभयचयाः, लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ तावतां चयानां प्रक्षेपात्। पदमेकादशसंग्रहकिट्टिपूर्वापूर्वाऽवान्तरकिट्टिराशिर्ज्ञातव्यम्। चयश्चैको बोद्धव्यः, एकोत्तरवृद्धेः।

एकादशसंग्रहकिट्टीनामुभयचयैरेकोभयचयदलं गुण्यते, तदैकादशसंग्रहकिट्टिसर्वोभयचयदलं प्राप्यते, तच्च वक्ष्यमाणेन मानमायालोभप्रथमसंग्रहकिट्टिबन्धापूर्वावान्तरकिट्टिचयदलेन क्रोधवर्जकषायत्रयबन्धपूर्वाऽपूर्वावान्तरकिट्टिषु च निक्षेप्स्यमानबन्धमध्यमखण्डबन्धचयदलेन न्यूनं वक्तव्यम्, तावद्दलस्य बन्धदलतो दास्यमानत्वात्।

न्यासः—

अन्त्यधनम् = (पदम्—१) × चयः + आदिधनम्

मध्यमधनम्= $\frac{\text{अन्त्यधनम्} + \text{आदिधनम्}}{२}$

∴ एकादशकिट्टीनां सर्वोभयचयाः=मध्यमधनम् × पदम्

∴ एकादशसंग्रहकिट्टिषु प्रक्षिप्यमाणं सर्वोभयचयदलम्

= एकादशसंग्रहकिट्टीनां सर्वोभयचयाः×एकोभयचयदलम्

आयदलतो निक्षिप्यमाणं सर्वोभयचयदलम्

= सर्वोभयचयदलम्—क्रोधवर्जकषायत्रयप्रथमसंग्रहकिट्टिबन्धापूर्वावान्तरकिट्टिचयदलम्

—( क्रोधवर्जकषायत्रयबन्धमध्यमखण्डम् + क्रोधवर्जकषायत्रयबन्धचयदलम् )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४) **मध्यमखण्डदलम्**-एकादशसंग्रहकिट्टीनामधस्तनशीर्षचयदलमधस्तनाऽपूर्वाऽवान्तरकिट्टिदलमवान्तरकिट्ट्यन्तरोत्पन्नापूर्वावान्तरकिट्टिदलमुभयचयदलञ्चेति चतुर्विधं दलमायदलतो विशोध्य शेषमायदलं मध्यमखण्डदलमुच्यते, तच्चैकादशसंग्रहकिट्टिबन्धापूर्वावान्तरकिट्टिराशिरहितपूर्वाऽपूर्वाकिट्टिराशिना विभज्यते, तदैकमध्यमखण्डदलं प्राप्यते। तच्च य आचार्या अपूर्वावान्तरकिट्टितस्तदनन्तरपूर्वाऽवान्तरकिट्टौ निक्षिप्यमाणं दलमसंख्यातगुणहीनं मन्यन्ते, तेषां मतेन लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिगतदलाऽसंख्येयभागप्रमाणं भवति । ये पुनरपूर्वावान्तरकिट्टितस्तदनन्तरपूर्वावान्तरकिट्टौ निक्षिप्यमाणं दलमनन्तगुणहीनं स्वीकुर्वन्ति, तेषामभिप्रायेण लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिगतदलाऽनन्ततमभागमात्रं भवति । इदं च मध्यमखण्डमेकैकमेकादशसंग्रहकिट्टीनां बन्धापूर्वावान्तरकिट्टिरहितासु सर्वपूर्वापूर्वाऽवान्तरकिट्टिष्वविशेषेण दातव्यम् । निरुक्तैकमध्यमखण्डदलं क्रोधप्रथमसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिना गुण्यते, तदा क्रोधप्रथमसंग्रहकिट्टिसर्वमध्यमखण्डदलं प्राप्यते । तच्च घातदलतो दातव्यम् । एकैकमध्यमखण्डदलं च क्रोधप्रथमसंग्रहकिट्टिसर्वपूर्वावान्तरकिट्टिष्वविशेषेण दातव्यम्। **त्रिंशदधिकशततम**गाथायाष्टीकायां पृथक्स्थापितघातदलात् क्रोधप्रथमसंग्रहकिट्टौ यथायोग्यमधस्तनशीर्षचयदलमुभयचयदलं मध्यमखण्डदलं चेति दलत्रये प्रक्षिप्ते पृथक्स्थापितं घातदलं परिसमाप्तं भवति । शेषासु संग्रहकिट्टिषु यथायोग्यं पञ्चविधे दलिके प्रक्षिप्ते सर्वमायदलं परिसमाप्तं भवति ।

अथ **बन्धदलं बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलादिभिर्विविच्यते—**

किट्टिवेदनाद्धायाः प्रथमसमये मोहनीयस्य बन्धत आगतं दलं बन्धदलमुच्यते । मोहनीयैकसमयप्रबद्धदलं मानादिषु विभजति । तत्र माने स्तोकं दलं ददाति । ततो विशेषाधिकं क्रोधे ददाति, ततो मायायां विशेषाधिकं ददाति, ततोऽपि विशेषाधिकं लोभे ददाति । इदं च बन्धदलं प्रथमसंग्रहकिट्टावेव दीयते, तस्या एव बध्यमानत्वात् । सम्प्रति बन्धदलं विभागचतुष्टये स्थापयितव्यम्– (१) बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डम् (२) बन्धाऽपूर्वावान्तरकिट्टिचयदलम्, (३) बन्धचयदलम् (४) बन्धमध्यमखण्डदलं चेति । तत्र सर्वबन्धदलतोऽनन्ततमभागमात्रं दलं बन्धमध्यमखण्डार्थं बन्धचयदलार्थं च पृथक्स्थापयितव्यम्, शेषबह्वनन्तभागप्रमाणदलं बन्धाऽपूर्वावान्तरसमानखण्डदले बन्धाऽपूर्वावान्तरकिट्टिचयदले च विभजति ।

(१) **बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलम्**–बन्धदलतश्चतुस्संग्रहकिट्टीनामवान्तरकिट्ट्यन्तरेषु या अपूर्वाऽवान्तरकिट्टय उत्पद्यन्ते, तासु बन्धदलतः प्रागुक्तैकसंक्रममध्यमखण्डाधिकं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिगतदलं दातव्यम्, तच्चैकं बन्धापूर्वावान्तरकिट्टिसमानखण्डमुच्यते । सर्वबन्धाऽपूर्वावान्तरकिट्टिराशिना च संक्रममध्यमखण्डाधिकलोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिगतदलं गुण्यते, तदा सर्वबन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलं प्राप्यते ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

(२) **बन्धापूर्वावान्तरकिट्टिचयदलम्**-क्रोधादीनां प्रथमसंग्रहकिट्टेरसंख्येयभागप्रमाणा अधस्तनीरुपरितनीश्चाऽवान्तरकिट्टीर्विमुच्य शेषाः प्रथमसंग्रहकिट्ट्यवान्तरकिट्टयो बध्यन्ते, तत्राऽपि तत्तत्कषायबन्धचरमपूर्वान्तरकिट्टेरधस्तादसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणा बन्धपूर्वावान्तरकिट्टी-रुल्लङ्घ्य बन्धचरमाऽपूर्वावान्तरकिट्टिर्निर्वर्त्यते। ततः परं पुनरसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणा बन्धपूर्वावान्तरकिट्टीर्व्यतिक्रम्य बन्धद्विचरमापूर्वावान्तरकिट्टिर्निर्वर्त्यते । ततः पुनरसंख्येयपल्योपम-प्रथमवर्गमूलप्रमाणा बन्धपूर्वावान्तरकिट्टीरुल्लङ्घ्य बन्धत्रिचरमापूर्वावान्तरकिट्टिर्निर्वर्त्यते । एवं पश्चानुपूर्व्या तावद् निर्वर्त्यते, यावत् तत्तत्कषायबन्धप्रथमापूर्वावान्तरकिट्टिः । तेन क्रोधप्रथमसं-ग्रहकिट्टिचरमपूर्वावान्तरकिट्टित आरभ्य पश्चानुपूर्व्या यतिसंख्याका क्रोधप्रथमसंग्रहकिट्टिबन्धचर-माऽपूर्वावान्तरकिट्टिर्भवति, तत्संख्याका बन्धापूर्वाऽवान्तरकिट्टिचयाः क्रोधप्रथमसंग्रहकिट्टिबन्धचर-माऽपूर्वावान्तरकिट्टौ प्रक्षेप्तव्याः । ततोऽसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणैर्बन्धापूर्वावान्तरकिट्टि-चयैरधिका बन्धापूर्वावान्तरकिट्टिचया बन्धद्विचरमापूर्वावान्तरकिट्टौ प्रक्षेपणीयाः । ततोऽप्यसंख्येय-पल्योपमप्रथमवर्गमूलप्रमाणैरधिका बन्धत्रिचरमापूर्वावान्तरकिट्टौ प्रक्षेप्तव्याः । एवंक्रमेण तावत् प्रक्षेप्तव्याः, यावत् क्रोधप्रथमसंग्रहकिट्टिबन्धप्रथमापूर्वावान्तरकिट्टिः, अन्यथा दृश्यमानं दलं बन्ध-पूर्वापूर्वावान्तरकिट्टिष्वेकगोपुच्छाकारेण न स्यात्। तथाहि-बन्धपूर्वावान्तरकिट्टिषु संक्रमदलतोऽधस्त-नशीर्षचयदले प्रक्षिप्ते बन्धपूर्वाऽवान्तरकिट्टयः प्रदेशानाश्रित्य लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वा-वान्तरकिट्टिप्रदेशतुल्या जायन्ते स्म। ततः पुनस्तास्वेकं संक्रममध्यमखण्डं यथायोग्यं चोभयचयाः प्रक्षिप्यन्ते।एकैकस्यां बन्धाऽपूर्वावान्तरकिट्टौ तु संक्रममध्यमखण्डाधिकलोभतृतीयसंग्रहकिट्टिप्रथमा-ऽपूर्वावान्तरकिट्टिगतप्रदेशप्रमाणमेव दलमेकबन्धापूर्वाऽवान्तरकिट्टिसमानखण्डदलं प्रक्षिप्तम् । यदि बन्धाऽपूर्वावान्तरकिट्टिचया न प्रक्षिप्येरन्, तर्हि बन्धपूर्वावान्तरकिट्टितो बन्धाऽपूर्वावान्तरकिट्टौ दृश्य-मानं दलं बन्धपूर्वाऽवान्तरकिट्टौ प्रक्षिप्तैरुभयचयैर्न्यूनं स्यात्। न च तदिष्यते, दृश्यमानदलस्य गोपुच्छाकारेण निरूपयिष्यमाणत्वात् । तेन पूर्वाऽपूर्वावान्तरकिट्टिषु दलिकं गोपुच्छाकारं कर्तुं क्रोध-प्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टित आरभ्य पश्चानुपूर्व्या यतिसंख्याका क्रोधप्रथमसंग्रहकिट्टि-बन्धचरमाऽपूर्वावान्तरकिट्टिर्भवति, तत्संख्यका बन्धापूर्वावान्तरकिट्टिचयास्तत्र निक्षिप्यन्ते । ततः परमसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणा बन्धपूर्वाऽवान्तरकिट्टीर्व्यतिक्रम्य बन्धद्विचर-माऽपूर्वावान्तरकिट्टिः प्राप्यते, तेन बन्धचरमाऽपूर्वावान्तरकिट्ट्यपेक्षयाऽसंख्येयपल्योपमप्रथम-वर्गमूलप्रमाणैरधिका बन्धाऽपूर्वावान्तरकिट्टिचया बन्धद्विचरमाऽपूर्वावान्तरकिट्टौ प्रक्षिप्यन्ते । एवं पश्चानुपूर्व्यैकैकस्यां बन्धाऽपूर्वावान्तरकिट्टावसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणैरधिका अधि-कतरा बन्धाऽपूर्वावान्तरकिट्टिचयास्तावत् प्रक्षिप्यन्ते, यावत् क्रोधस्य बन्धप्रथमाऽपूर्वा-वान्तरकिट्टिः । "व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनं मुखयुग्दलितं तत् । **मध्यधनं पदसंगुणितं तत् सर्वधनं गणितं च तदुक्तम् ॥१॥**" इति गणितकरण-

सूत्रेण क्रोधप्रथमसंग्रहकिट्टिबन्धाऽपूर्वावान्तरकिट्टिचयाः सङ्कलयितव्याः । मुखं चात्र क्रोधप्रथम-संग्रहकिट्टिचरमपूर्वावान्तरकिट्टिप्रभृतिक्रोधबन्धचरमाऽपूर्वावान्तरकिट्टिपर्यवसानाऽवान्तरकिट्टिराशि-प्रमाणा बन्धाऽपूर्वावान्तरकिट्टिचयाः, अन्त्यधनं क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिप्रभृति-तद्बन्धप्रथमापूर्वावान्तरकिट्टिपर्यवसानावान्तरकिट्टिराशिमात्रबन्धापूर्वावान्तरकिट्टिचयाः, चयश्चाऽ-संख्येयपल्योपमप्रथमवर्गमूलप्रमाणबन्धाऽपूर्वावान्तरकिट्टिचयाः, पदं तु क्रोधप्रथमसंग्रहकिट्टेर-वान्तरकिट्ट्यन्तरेषु जायमानानामपूर्वावान्तरकिट्टीनां राशिर्ज्ञेयम् ।

एकबन्धाऽपूर्वाऽवान्तरकिट्टिचयगतदलं क्रोधप्रथमसंग्रहकिट्टेः सर्वैर्बन्धाऽपूर्वावान्तरकिट्टि-चयैर्गुण्यते, तदा क्रोधप्रथमसंग्रहकिट्टिसर्वबन्धाऽपूर्वावान्तरकिट्टिचयदलं प्राप्यते ।

न्यासः—अन्त्यधनम्=(पदम्--१)×चयः ❀ +मुखम्

$$\text{मध्यमधनम्}=\frac{\text{अन्त्यधनम्+मुखम्}}{२}$$

क्रोधप्रथमसंग्रहकिट्टेः सर्वे बन्धापूर्वावान्तरकिट्टिचयाः=मध्यमधनम् × पदम्

क्रोधप्रथमसंग्रहकिट्टेः सर्वेषां बन्धापूर्वावान्तरकिट्टिचयानां दलम्

= एकबन्धापूर्वावान्तरकिट्टिचयदलम् × सर्वे बन्धापूर्वावान्तरकिट्टिचयाः

एवं मानस्य प्रथमसंग्रहकिट्टिबन्धचरमाऽपूर्वावान्तरकिट्टौ क्रोधचरमपूर्वावान्तरकिट्टित आरभ्य मानप्रथमसंग्रहकिट्टिबन्धचरमाऽपूर्वावान्तरकिट्टिं यावत् यावत्योऽवान्तरकिट्ट्यो व्यतिक्रामन्ति, तावन्तो बन्धापूर्वाऽवान्तरकिट्टिचयाः प्रक्षेप्तव्याः । ततः क्रोधवदसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणै-रधिका अधिकतराः पश्चानुपूर्व्योत्तरोत्तरबन्धाऽपूर्वावान्तरकिट्टौ प्रक्षेप्तव्याः । ते च "व्येकपदघ्न०" इत्यादि करणसूत्रेण सङ्कलयितव्याः । मुखं चाऽत्र क्रोधचरमपूर्वावान्तरकिट्टिप्रभृतिमानप्रथमसंग्रह-किट्टिबन्धचरमाऽपूर्वावान्तरकिट्टिपर्यवसानावान्तरकिट्टिराशिप्रमाणा बन्धाऽपूर्वावान्तरकिट्टिचयाः, अन्त्यधनं क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिप्रभृतिमानप्रथमसंग्रहकिट्टिबन्धप्रथमापूर्वावान्तर-किट्टिपर्यवसानावान्तरकिट्टिराशिप्रमाणा बन्धापूर्वावान्तरकिट्टिचयाश्चयश्चासंख्येयपल्योपमप्रथमवर्ग-मूलप्रमाणबन्धापूर्वावान्तरकिट्टिचयाः, पदन्तु मानप्रथमसंग्रहकिट्टिबन्धाऽपूर्वावान्तरकिट्टीनां राशिर्ज्ञातव्यम् । एकबन्धाऽपूर्वाऽवान्तरकिट्टिचयगतदलं मानप्रथमकिट्टेः सर्वैर्बन्धापूर्वावान्तरकिट्टि-चयैर्गुण्यते, तदा मानप्रथमसंग्रहकिट्टिसर्वबन्धाऽपूर्वावान्तरकिट्टिचयदलं प्राप्यते ।

न्यासः—अन्त्यधनम्=(पदम्--१) × चयः★ + मुखम्

$$\text{मध्यमधनम्}=\frac{\text{अन्त्यधनम्+मुखम्}}{२}$$

---

❀ अत्र चयः=असंख्येयपल्योपमप्रथमवर्गमूलप्रमाणबन्धाऽपूर्वावान्तरकिट्टिचयाः ।

★ अत्राऽपि चयः=असंख्यातपल्योपमप्रथमवर्गमूलप्रमाणबन्धापूर्वावान्तरकिट्टिचयाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानप्रथमसंग्रहकिट्टेः सर्वे बन्धापूर्वावान्तरकिट्टिचयाः=मध्यमधनम्×पदम्
मानप्रथमसंग्रहकिट्टिसर्वबन्धापूर्वाऽवान्तरकिट्टिचयदलम्
=एकबन्धापूर्वावान्तरकिट्टिचयगतदलम्×सर्वे मानप्रथमसंग्रहकिट्टिबन्धापूर्वावान्तरकिट्टिचयाः ।

एवं मायालोभयोरपि प्रथमसंग्रहकिट्टेः सर्वबन्धापूर्वावान्तरकिट्टिचयदलं प्रापणीयम् । नवरं मायायाः प्रथमसंग्रहकिट्टेः सर्वबन्धापूर्वावान्तरकिट्टिचयानां प्राप्तये मुखं क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिप्रभृतिमायाप्रथमसंग्रहकिट्टिबन्धचरमापूर्वावान्तरकिट्टिपर्यवसानावान्तरकिट्टिराशिप्रमाणा बन्धाऽपूर्वावान्तरकिट्टिचयाः, अन्त्यधनं क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिप्रभृतिमायाप्रथमसंग्रहकिट्टिबन्धप्रथमापूर्वावान्तरकिट्टिपर्यवसानावान्तरकिट्टिराशिमात्रा बन्धापूर्वावान्तरकिट्टिचयाः, पदं तु मायाप्रथमसंग्रहकिट्टिबन्धापूर्वावान्तरकिट्टिराशिर्ज्ञातव्यम् ।

लोभस्य प्रथमसंग्रहकिट्टौ सर्वबन्धाऽपूर्वाऽवान्तरकिट्टिचयानामवाप्तये तु मुखं क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिप्रभृतिलोभप्रथमसंग्रहकिट्टिबन्धचरमाऽपूर्वावान्तरकिट्टिपर्यवसानावान्तरकिट्टिराशिप्रमाणा बन्धा-ऽपूर्वाऽवान्तरकिट्टिचयाः, अन्त्यधनं क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिप्रभृतिलोभप्रथमसंग्रहकिट्टिबन्धप्रथमापूर्वावान्तरकिट्टिपर्यवसानावान्तरकिट्टिराशिप्रमाणा बन्धाऽपूर्वावान्तरकिट्टिचयाः, पदन्तु लोभस्य प्रथमसंग्रहकिट्टिबन्धाऽपूर्वावान्तरकिट्टिराशिर्ज्ञातव्यम् ।

ततश्चतुर्णामपि क्रोधादीनां प्रथमसंग्रहकिट्टेर्बन्धाऽपूर्वावान्तरकिट्टिचयदलं सङ्कलयितव्यम् । सङ्कलितश्च सर्वबन्धाऽपूर्वावान्तरकिट्टिचयदलं भवति। नन्वेकबन्धापूर्वावान्तरकिट्टिचयदलं कियद्भवति ? इति चेद्, उच्यते—संक्रमदलप्ररूपणाप्रस्तावे यदेकोभयचयदलं प्राक् साधितम्, तदनन्तभागेन न्यूनमेकबन्धाऽपूर्वावान्तरकिट्टिचयदलं भवति, [redacted] । बन्धाऽवान्तरकिट्टिष्वेव तस्य प्रक्षेपात् बन्धपदमुपात्तम्, तत्राऽप्यपूर्वास्वेव निक्षेपादपूर्वपदोपादानम् ।

(३) बन्धचयदलम्—बन्धदलस्य योऽनन्ततमभागो बन्धमध्यमखण्डार्थं बन्धचयदलार्थं च पृथक्स्थापित आसीत्, स पदेन विभक्तव्यः । विभक्ते च मध्यमदलं लभ्यते, तच्चैकोनपदार्धन्यूनद्विगुणहानिद्वयेन विभज्यते, तदैकबन्धचयगतदलं प्राप्यते । पदं त्वत्र संज्वलनचतुष्कस्य बन्धपूर्वापूर्वावान्तरकिट्टिराशिर्ज्ञातव्यम् ।

न्यासः —
$$\text{मध्यमदलम्} = \frac{\text{अनन्ततमभागमात्रं बन्धदलम्}}{\text{पदम्}}$$
$$\text{एकबन्धचयगतदलम्} = \frac{\text{मध्यमदलम्}}{\text{द्विगुणहानिद्वयम्} - \frac{(\text{पदम्}-१)}{२}}$$

क्रोधप्रथमसंग्रहकिट्टेर्बन्धचरमपूर्वावान्तरकिट्टावेकबन्धचयं ददाति,क्रोधप्रथमसंग्रहकिट्टेर्बन्धद्विचर-

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

मपूर्वावान्तरकिट्टौ द्वौ बन्धचयौ ददाति । एवमेकोत्तरवृद्धिक्रमेण बन्धचयान् बन्धपूर्वावान्तरकिट्टिषु तावद् ददाति, यावल्लोभप्रथमसंग्रहकिट्टिबन्धजघन्यपूर्वावान्तरकिट्टिः । ते च बन्धचयाः **"सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या ।"** इति गणितकरणसूत्रेण सङ्कलयितव्याः । पदं त्वत्र क्रोधमानमायालोभानां बध्यमानपूर्वापूर्वाऽवान्तरकिट्टिराशिर्बोद्धव्यम् ।

एकबन्धचयगतदलं सर्वबन्धचयैर्गुण्यते, तदा सर्वबन्धचयदलं प्राप्यते ।

न्यासः —

सर्वबन्धचयाः $= (\text{पदम्} + १) \times \frac{\text{पदम्}}{२}$

सर्वबन्धचयदलम् = एकबन्धचयगतदलम् × सर्वबन्धचयाः ।

(४) **बन्धमध्यमखण्डदलम्**—प्रागुक्ताद् बन्धदलाऽनन्ततमभागप्रमाणदलात् सर्वबन्धचयदलं विशोध्य शेषबन्धदलं बन्धमध्यमखण्डदलं भवति, तच्च बध्यमानपूर्वापूर्वावान्तरकिट्टिराशिना विभज्यते, तदैकं बन्धमध्यमखण्डं प्राप्यते । तच्चैकैकं बन्धमध्यमखण्डं सर्वासु बन्धपूर्वापूर्वावान्तरकिट्टिष्वविशेषेण दातव्यम् । एकबन्धमध्यमखण्डदलं चैकबन्धापूर्वावान्तरकिट्टिसमानखण्डदलस्यानन्ततमभागकल्पं भवति ।

बध्यमानपूर्वावान्तरकिट्टिषु संक्रमोभयचयदलं बध्यमानाऽपूर्वावान्तरकिट्टिषु च बन्धाऽपूर्वावान्तरकिट्टिचयदलं येना-ऽनन्ततमभागेन हीनं प्राक्षिप्यत, सोऽनन्ततमभागो बन्धमध्यमखण्डे यथायोग्यं च बन्धचयदले प्रक्षिप्ते परिपूर्यते ।

**अथ बन्धदलस्य संक्रमदलस्य घातदलस्य च निक्षेपविधिर्भण्यते**—तृतीयसंग्रहकिट्टिर्द्वितीयसंग्रहकिट्टिश्च न बध्येते, तेन तत्र पञ्चविधसंक्रमदलत एव दलिकं यथासंभवं दीयते । प्रथमसंग्रहकिट्टौ तु बन्धदलतः संक्रमदलतश्च दलिकं यथायोग्यं दीयते, वेद्यमानसंग्रहकिट्टौ च बन्धदलतो घातदलतश्च यथायोग्यं दलं प्रक्षिप्यते ।

तथाहि—लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्ना या सर्वप्रथमाऽपूर्वावान्तरकिट्टिः, तस्यां संक्रमदलत एकाऽधस्तनाऽपूर्वावान्तरकिट्टिदलमेकमध्यमखण्डं सर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् ददाति । ततो लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नद्वितीयाऽपूर्वावान्तरकिट्टौ संक्रमदलत एकाधस्तनाऽपूर्वावान्तरकिट्टिदलमेकमध्यमखण्डमेकोनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् ददाति । इत्थं लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नद्वितीयाऽपूर्वावान्तरकिट्ट्यामनन्ततमभागरूपेणैकोभयचयेन हीनं ददाति । ततः परं लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नतृतीयाद्यपूर्वाऽवान्तरकिट्टिषु संक्रमदलत एकैकाधस्तनाऽपूर्वावान्तरकिट्टिदलमेकैकमध्यमखण्डमेकोत्तरहान्या चोभयचयाँस्तावत् प्रक्षिपति, यावत् तृतीयसंग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टिः । इत्थं लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टि

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

यावत् पूर्वपूर्वत उत्तरोत्तरावान्तरकिट्टौ दीयमानं दलमनन्तभागस्वरूपेणैकैकोभयचयेन हीनं भवति।

ततो लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ संक्रमदलत एकमध्यमखण्डं लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् प्रक्षिपति। तदेवं लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टावेकाऽधस्तनाऽपूर्वावान्तरकिट्टिदलेनैकोभयचयेन च हीनं दलं ददाति। इत्थञ्च लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ दीयमानदलमसंख्येयगुणहीनं भवति, मध्यमखण्डतोऽधस्तनाऽपूर्वावान्तरकिट्टिदलस्याऽसंख्येयगुणत्वात्, येषां मतेन पुनर्लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलाऽनन्ततमभागप्रमाणं मध्यमखण्डं भवति, तेषां मतेन दीयमानदलमनन्तगुणहीनं वक्तव्यम्। एवमग्रेऽपि। ततः परं लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वाऽवान्तरकिट्टौ संक्रमदलादेकमध्यमखण्डमेकाधस्तनशीर्षचयमेकाधिकलोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् प्रक्षिपति। तेन लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टौ दीयमानं दलमेकाधस्तनशीर्षचयेनाऽधिकमेकोभयचयेन च हीनं भवति। इत्थं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्ट्यामेकाधस्तनशीर्षचयदलन्यूनोभयचयदलेन हीनं ददाति। एकोभयचयदलस्य प्राक्तनपूर्वावान्तरकिट्टिपतितदलिकाऽनन्ततमभागमात्रत्वे सत्यधस्तनशीर्षचयस्योभयचयदलतोऽपि हीनत्वाल्लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टौ दीयमानं दलमनन्तभागेन हीनं भवति। एवमग्रेऽपि यथासंभवं भावनीयम्।

तत ऊर्ध्वं लोभतृतीयसंग्रहकिट्टितृतीयादिपूर्वावान्तरकिट्टिषु पल्योपमप्रथमवर्गमूलाऽसंख्येयभागप्रमाणासु संक्रमदलत एकोत्तरवृद्ध्याऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकमध्यमखण्डं च तावत् प्रक्षिपति, यावल्लोभतृतीयसंग्रहकिट्टौ संक्रमदलतो निर्वर्त्यमानाऽवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिरप्राप्ता भवति। ततो लोभतृतीयसंग्रहकिट्ट्यवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टौ संक्रमदलत एकावान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिदलमेकं मध्यमखण्डं लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्ताऽवान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् प्रक्षिपति। इत्थं प्राक्तनपूर्वावान्तरकिट्टितोऽस्यामवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टौ दीयमानदलमसंख्येयगुणं भवति, लोभतृतीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वावान्तरकिट्टिराशिप्रमाणाऽधस्तनशीर्षचयगतदलयुक्तैकमध्यमखण्डगतदलत एकाऽवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिदलस्याऽसंख्येयगुणत्वात्, येषां मतेन पुनर्लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलाऽनन्तभागप्रमाणं मध्यमखण्डं भवति, तेषां मतेन दीयमानदलमनन्तगुणं जायते। ततोऽनन्तरायामुपरितन्यां लोभतृतीयसंग्रहकिट्टिपूर्वाऽवान्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किट्टयामेकं मध्यमखण्डं लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नप्रथमाऽपूर्वाऽवान्तरकिट्टिप्रभृतिव्यतिक्रान्त-पूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् लोभतृतीयसंग्रहकिट्टि-प्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वावान्तरकिट्टिराशिप्रमाणांश्चाऽधस्तनशीर्षचयान् प्रक्षिपति । इत्थं प्राक्तनाऽवान्तरकिट्टयन्तरोत्पन्नाऽपूर्वावान्तरकिट्टितोऽस्यां लोभतृतीयसंग्रहकिट्टिपूर्वाऽवान्तर-किट्टौ दीयमानदलमसंख्येयगुणहीनं जायते, अस्यां पूर्वावान्तरकिट्टौ निक्षिप्यमाणदलादधस्तन-शीर्षचयसहितमध्यमखण्डलक्षणादवान्तरकिट्टयन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिदलस्याऽसंख्येयगुणत्वात् । येषां मतेन पुनरवान्तरकिट्टयन्तरोत्पन्नापूर्वावान्तरकिट्टिदलं निक्षिप्यमाणाधस्तनशीर्षचयमध्यमखण्ड-दलतोऽनन्तगुणं भवति, तेषां मतेनाऽनन्तगुणहीनं जायते । तत उत्तरोत्तरावान्तरकिट्टयामेकोत्तर-वृद्धयाऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकं च मध्यमखण्डं तावत् प्रक्षिपति, यावल्लोभ-तृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः, नवरं पल्योपमप्रथमवर्गमूलाऽसंख्येयभागे गते यत्र यत्रा-वान्तरकिट्टयन्तरेऽपूर्वावान्तरकिट्टिं निर्वर्तयति, तत्र तत्राऽधस्तनशीर्षचयान् न प्रक्षिपति, किन्तु तत्स्थानेऽवान्तरकिट्टयन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिदलं ददाति । इत्थं पूर्वावान्तरकिट्टितोऽवान्तर-किट्टयन्तरोत्पन्नाऽपूर्वावान्तरकिट्टावसंख्येयगुणं दीयमानं दलं भवति, हेतुस्तु प्राग्वद् भावनीयः । मतान्तरेण त्वऽनन्तगुणं भवति । तथाऽवान्तरकिट्टयन्तरोत्पन्नाऽपूर्वावान्तरकिट्टितः पूर्वाऽवान्तरकि-ट्टावसंख्येयगुणहीनं दीयमानं दलं भवति, मतान्तरेण त्वनन्तगुणहीनं भवति ।

ततो लोभद्वितीयसंग्रहकिट्टयन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टौ संक्रमदलादेकाऽधस्तनाऽपूर्वा-वान्तरकिट्टिदलमेकं मध्यमखण्डं लोभतृतीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावा-न्तरकिट्टिराशिप्रमाणांश्चोभयचयान् प्रक्षिपति । इदं च दीयमानं दलं लोभतृतीयसंग्रहकिट्टिचरम-पूर्वावान्तरकिट्टितोऽसंख्येयगुणं भवति, मतान्तरेण त्वनन्तगुणं भवति । ततो लोभद्वितीयसंग्रहकि-ट्टयन्तरोत्पन्नद्वितीयाद्यपूर्वावान्तरकिट्टिष्वेकैकमध्यमखण्डमेकैकाधस्तनाऽपूर्वावान्तरकिट्टिदलमेकोत्तर-हान्या चोभयचयांस्तावत् प्रक्षिपति, यावल्लोभद्वितीयसंग्रहकिट्टयन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टिः । तेन लोभद्वितीयसंग्रहकिट्टयन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टितः प्रभृति लोभद्वितीयसंग्रहकिट्टयन्तरो-त्पन्नचरमाऽपूर्वावान्तरकिट्टिं यावत् सर्वास्वपूर्वाऽवान्तरकिट्टिष्वेकैकोभयचयेन हीनं प्रक्षिप्यमाणं दलं भवति, उभयचयस्य चाऽनन्ततमभागमात्रत्वेनाऽनन्ततमभागेन हीनं दीयमानं दलं भवति ।

ततः परं लोभद्वितीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ संक्रमदलत एकं मध्यमखण्डं लोभ-तृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणानधस्तनशीर्षचयान् लोभतृतीयसंग्रहकिट्टिपूर्वापूर्वावान्तर-किट्टिलोभद्वितीयसंग्रहकिट्टयन्तरजाऽपूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्चो-भयचयान् प्रक्षिपति । इत्थं लोभद्वितीयसंग्रहकिट्टयन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टितो लोभद्वितीय-संग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ दीयमानं दलमसंख्यातगुणहीनं भवति, हेतुस्तु प्राग्वद् भावनीयः, मतान्तरेण त्वनन्तगुणहीनम् । ततः परं लोभद्वितीयसंग्रहकिट्टेः पूर्वावान्तरकिट्टिष्ववान्तरकिट्टय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तरोत्पन्नाऽपूर्वावान्तरकिट्टिषु च दीयमानं दलं लोभतृतीयसंग्रहकिट्टिवत् तावद् वक्तव्यम्, यावल्लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः ।

तत ऊर्ध्वं लोभप्रथमसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टौ संक्रमदलत एकाधस्तनाऽपूर्वावान्तरकिट्टिदलमेकं मध्यमखण्डं लोभतृतीयसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वाऽपूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् प्रक्षिपति । इदं च लोभप्रथमसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टौ दीयमानं दलं लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितोऽसंख्येयगुणं भवति, मतान्तरेण त्वनन्तगुणम् । हेतुस्तु प्राग्वत् प्रपञ्चनीयः । ततः परमेकोत्तरहान्योभयचयानेकैकाधस्तनाऽपूर्वावान्तरकिट्टिदलमेकैकं च मध्यमखण्डं तावद् ददाति, यावल्लोभप्रथमसंग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टिः ।

ततः परं लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टितः प्रभृति दलं दातुमुपक्रमते । तत्र लोभप्रथमसंग्रहकिट्टेर्वध्यमानत्वेन चतुर्विधबन्धदलात् पञ्चविधसंक्रमदलाच्च पूर्वापूर्वावान्तरकिट्टिषु दलं यथायोग्यं ददाति । किन्त्वसंख्येयभागप्रमाणा मन्दानुभागका असंख्येयभागमिताश्च तीव्रानुभागका या अवान्तरकिट्टयो न बध्यन्ते, तासु केवलं संक्रमदलत एव दलं ददाति । तथा बन्धाऽपूर्वावान्तरकिट्टिषु केवलं बन्धदलत एव दलं ददाति, । तद्यथा—लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ संक्रमदलत एकं मध्यमखण्डं लोभतृतीयसंग्रहकिट्टिद्वितीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणानधस्तनशीर्षचयान् लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् प्रक्षिपति । इत्थं लोभप्रथमसंग्रहकिट्ट्यन्तरोत्पन्नचरमाऽपूर्वावान्तरकिट्टितो लोभप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ दीयमानं दलमसंख्येयगुणहीनं भवति, मतान्तरेण त्वनन्तगुणहीनम् । हेतुस्तु प्राग्वत् प्ररूपयितव्यः । ततः परं लोभप्रथमसंग्रहकिट्ट्याः पूर्वावान्तरकिट्टिषु संक्रमतश्च निर्वर्त्यमानाऽपूर्वावान्तरकिट्टिषु लोभतृतीयसंग्रहकिट्टिवद् दलं तावत् प्रक्षिपति, यावल्लोभप्रथमसंग्रहकिट्टेर्जघन्या बन्धपूर्वावान्तरकिट्टिरप्राप्ता भवति । ततो लोभप्रथमसंग्रहकिट्टिसत्कायां जघन्यायां बन्धपूर्वावान्तरकिट्टौ संक्रमदलत एकमध्यमखण्डं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वावान्तरकिट्टिराशिप्रमाणानधस्तनशीर्षचयान् लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमापूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वाऽपूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणोभयचयदलं चैकोभयचयदलाऽनन्ततमभागेन हीनं प्रक्षिपति, बन्धमध्यमखण्डबन्धचयदलरूपेणैकोभयचयदला-ऽनन्ततमभागमात्रस्य दलस्य बन्धदलतः प्रक्षिप्यमाणत्वात् । बन्धदलतः पुनरेकं बन्धमध्यमखण्डं सर्वबन्धपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्च बन्धचयान् ददाति ।

ततः परं बन्धदलत एकैकं बन्धमध्यमखण्डमेकोत्तरहान्या च बन्धचयान् प्रक्षिपन् संक्रमद-

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

लतो लोभतृतीयसंग्रहकिट्टिवत् तावत् प्रक्षिपति, यावदसंख्यातपल्योपमप्रथमवर्गमूलमात्रबन्ध-पूर्वाऽवान्तरकिट्टिषु गतासु लोभप्रथमसंग्रहकिट्टिबन्धप्रथमाऽपूर्वावान्तरकिट्टितः प्राक्तनी लोभ-प्रथमसंग्रहकिट्टिबन्धपूर्वावान्तरकिट्टिः, नवरमुभयचयदलमनन्ततमभागेन हीनं ददाति, तावद्दल-स्य बन्धचयबन्धमध्यमखण्डरूपेण प्रक्षेपात् । ततो लोभप्रथमसंग्रहकिट्टयवान्तरकिट्टयन्तरोत्पन्न-बन्धप्रथमाऽपूर्वावान्तरकिट्टौ बन्धदलत एकं बन्धापूर्वावान्तरकिट्टिसमानखण्डं लोभतृतीयसंग्रहकि-ट्टयन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वाऽपूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्त-रकिट्टिराशिप्रमाणान् बन्धाऽपूर्वावान्तरकिट्टिचयान् लोभप्रथमसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तर-किट्टिप्रभृतिव्यतिक्रान्तबन्धपूर्वावान्तरकिट्टिराशिन्यूनसर्वबन्धपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणान् बन्ध-चयानेकं च बन्धमध्यमखण्डं ददाति । तस्यां संक्रमदलतो दलिकं न ददाति । इत्थं प्राक्तनपूर्वाऽ-वान्तरकिट्टौ दीयमानबन्धदलतोऽस्यामपूर्वाऽवान्तरकिट्टौ दीयमानं बन्धदलमनन्तगुणं भवति, बन्धमध्यमखण्डबन्धचयदलत एकबन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलस्याऽनन्तगुणत्वात् ।

ततः परमनन्तरायां लोभप्रथमसंग्रहकिट्टि[illegible]पूर्वावान्तरकिट्टौ संक्रमदलतो लोभतृतीयसंग्रहकिट्टि-प्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वाऽवान्तरकिट्टिराशिप्रमाणानधस्तनशीर्षचयाननन्ततमभागेन हीनं लोभतृतीयसंग्रहकिट्टयन्तरोत्पन्नप्रथमापूर्वाऽवान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वाऽपूर्वावान्तरकिट्टि-राशिन्यूनसर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणोभयचयगतदलमेकं च मध्यमखण्डं बन्धदलतः पुनरेकं बन्धमध्यमखण्डं लोभप्रथमसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबन्धपूर्वा-पूर्वावान्तरकिट्टिराशिन्यूनसर्वबन्धपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्च बन्धचयान् प्रक्षिपति । इत्थं प्राक्तनबन्धाऽपूर्वावान्तरकिट्टौ निक्षिप्तदलतोऽस्यां पूर्वावान्तरकिट्टौ निक्षिप्यमाणबन्धदलमनन्त-गुणहीनं जायते, बन्धमध्यमखण्डबन्धचयदलस्य बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलतोऽनन्तगुण-हीनत्वात् ।

ततः परं संक्रमदलत एकोत्तरहान्योभयचयानेकोत्तरवृद्धया चाऽधस्तनशीर्षचयानेकैकं च मध्यमखण्डं बन्धदलतः पुनरेकोत्तरहान्या बन्धचयानेकैकं च बन्धमध्यमखण्डं तावद् ददाति, यावल्लोभप्रथमसंग्रहकिट्टिबन्धचरमपूर्वावान्तरकिट्टिः, नवरं यत्र यत्र संक्रमदलतोऽपूर्वाऽवान्तर-किट्टिं निर्वर्तयति, तत्र तत्र संक्रमदलतोऽधस्तनशीर्षचयदलस्थानेऽवान्तरकिट्टयन्तरोत्पन्नाऽपूर्वा-वान्तरकिट्टिदलं ददाति, तथाऽसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणासु बन्धपूर्वाऽवान्तरकिट्टिषु गतासु यत्र यत्र बन्धदलतोऽपूर्वावान्तरकिट्टिं निर्वर्तयति, तत्र तत्रोभयचयस्थाने बन्ध-दलतो बन्धाऽपूर्वावान्तरकिट्टिचयानधस्तनशीर्षचयस्थाने च बन्धदलतो बन्धाऽपूर्वावान्तरकिट्टिसमान-खण्डदलं ददाति, संक्रममध्यमखण्डं तु तत्र न प्रक्षिपति ।

ततो लोभप्रथमसंग्रहकिट्टिबन्धचरमपूर्वावान्तरकिट्टया उपरितनपूर्वावान्तरकिट्टेरारभ्य लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिं यावत् पूर्वापूर्वावान्तरकिट्टिष्वधस्तनाऽपूर्वावान्तरकिट्टि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दलं वर्जयित्वा शेषसंक्रमदलचतुष्टयं लोभतृतीयसंग्रहकिट्टिवद् यथायोग्यं प्रक्षिपति ।

यथा लोभस्य संग्रहकिट्टित्रये प्रक्षिप्यमाणदलस्य विधिरभिहितः, तथैव मायामानयोः संग्रहकिट्टित्रये क्रोधस्य तृतीयसंग्रहकिट्टौ द्वितीयसंग्रहकिट्टौ च दलनिक्षेपविधिर्भणितव्यः, विशेषाभावात्। अनेन विधिना क्रोधद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिं यावद् दले प्रक्षिप्ते सर्वं संक्रमदलं परिसमाप्तं भवति ।

**अथ क्रोधप्रथमसंग्रहकिट्टौ दलनिक्षेपविधिरभिधीयते**—क्रोधप्रथमसंग्रहकिट्टौ संक्रमदलं न भवति, तेन तस्यां संक्रमदलतः संग्रहकिट्ट्यन्तरेऽवान्तरकिट्ट्यन्तरे चाऽपूर्वावान्तरकिट्टीर्न निर्वर्तयति। किन्तु पृथक्स्थापितघातदलतो यथायोग्यमधस्तनशीर्षचयान् मध्यमखण्डमुभयचयांश्च ददाति । चतुर्विधबन्धदलाच्च यथायोग्यं बन्धदलं ददाति। तथाहि—क्रोधप्रथमसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ घातदलत एकं मध्यमखण्डं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वावान्तरकिट्टिराशिप्रमाणानधस्तनशीर्षचयान् लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् प्रक्षिपति । ततः परं घातदलत एकैकमध्यमखण्डमेकोत्तरहान्योभयचयानेकोत्तरवृद्ध्या चाऽधस्तनशीर्षचयान् पूर्वावान्तरकिट्टिषु तावत् प्रक्षिपति, यावत् क्रोधप्रथमसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तरकिट्टिरप्राप्ता भवति ।

ततः क्रोधप्रथमसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तरकिट्टौ घातदलत एकोभयचयस्याऽनन्तभागेन हीनं लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वापूर्वाऽवान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणोभयचयदलं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वावान्तरकिट्टिप्रमाणानधस्तनशीर्षचयानेकं च मध्यमखण्डं प्रक्षिपति, बन्धदलतश्चैकं बन्धमध्यमखण्डं लोभप्रथमसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबन्धपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वबन्धपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्च बन्धचयान् प्रक्षिपति ।

ततः परं घातदलत एकोत्तरवृद्ध्याऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकं च मध्यमखण्डं बन्धदलत पुनरेकैकं बन्धमध्यमखण्डमेकोत्तरहान्या च बन्धचयाँस्तावत् प्रक्षिपति, यावत् क्रोधप्रथमसंग्रहकिट्टिबन्धचरमपूर्वाऽवान्तरकिट्टिः, नवरमसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणासु बन्धपूर्वावान्तरकिट्टिषु गतासु यत्र यत्र बन्धदलतोऽपूर्वावान्तरकिट्टिं निर्वर्तयति, तत्र तत्रोभयचयस्थाने बन्धदलतो बन्धाऽपूर्वावान्तरकिट्टिचयानधस्तनशीर्षचयस्थाने च बन्धदलतो बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलं ददाति, घातदलतश्च मध्यमखण्डं न प्रक्षिपति । अनेन क्रमेण क्रोधप्रथमसंग्रहकिट्टिबन्धचरमपूर्वावान्तरकिट्टिं यावद् बन्धदले प्रक्षिप्ते सर्वं बन्धदलं परिसमाप्तं भवति ।

ततः क्रोधप्रथमसंग्रहकिट्टिचरमबन्धपूर्वावान्तरकिट्टेरनन्तरायामुपरितन्यां क्रोधप्रथमसंग्रह-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

किट्टिपूर्वावान्तरकिट्टौ घातदलत एकं मध्यमखण्डं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिप्रभृति-व्यतिक्रान्तपूर्वावान्तरकिट्टिराशिप्रमाणानधस्तनशीर्षचयान् लोभतृतीयसंग्रहकिट्ट्यन्तरोत्पन्नप्रथमाऽ-पूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वापूर्वावान्तरकिट्टिराशिन्यूनसर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणां-श्चोभयचयान् प्रक्षिपति । ततः परं घातदलत एकोत्तरवृद्ध्याऽधस्तनशीर्षचयानेकोत्तरहान्योभयचया-नेकैकं च मध्यमखण्डं तावत् प्रक्षिपति, यावत् क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः । अनेन विधिना क्रोधप्रथमसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टिं यावद् घातदले प्रक्षिप्ते सर्वघातदलं परिसमाप्तं भवति ।

इह दीयमानदलस्याऽनन्तान्युष्ट्रकूटानि भवन्ति । तथाहि–यथोष्ट्रकूटं निम्नमुन्नतं च भवति, तथैवेह दीयमानं दलमपि कुत्रचित् प्रभूतं भवति, क्वचित् स्तोकं भवति, कुत्रचित्पुनरधिकं भवति, पुनः क्वचिद्धीनं भवति, अत्रान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टीनाञ्चाऽनन्तत्वाद् दीयमानदल-स्याऽनन्तान्युष्ट्रकूटानि किट्टिवेदनाद्धाप्रथमसमये भवन्ति । यथा किट्टिवेदनाद्धायाः प्रथमसमये दलनिक्षेपविधिरभिहितः, तथैव किट्टिवेदनाद्धाद्वितीयादिसमयेष्वप्यभिधातव्यः । पश्यन्तु पाठका यन्त्रकम्–२१ ।

## ॥ गणितविभागः समाप्तः ॥

दृश्यमानदलं तु सर्वपूर्वापूर्वावान्तरकिट्टिष्वनन्ततमभागेन हीनं भवति ॥१३७॥

तदेवं प्रतिपादितो दलिकनिक्षेपविधिः । साम्प्रतं संक्रमवशात् क्रोधादिप्रथमसंग्रहकिट्टे-र्बद्धदलं कदा द्वादशसंग्रहकिट्टिषु भवति ? इति परशङ्काव्युदासाय प्राह—

**पंचमआलीए कोहबद्धदलिअं तु सव्वकिट्टीसु ।**
**माणादीण वि बद्धदलिअं जहासंभवं णेयं ॥१३८॥**

पञ्चमाऽऽवलिकायां क्रोधबद्धदलिकं तु सर्वकिट्टिषु ।
मानादीनामपि बद्धदलिकं यथासंभवं ज्ञेयम् ॥१३८॥ इति पदसंस्कारः ।

'**पंचम०**' इत्यादि, तत्र 'क्रोधबद्धदलिकं' क्रोधप्रथमसंग्रहकिट्टिबद्धदलं तु बन्धसमयात् परं पञ्चमाऽऽवलिकायां'सर्वकिट्टिषु' संक्रमेण द्वादशसंग्रहकिट्टिषु भवतीति शेषः । इदमत्र हृदयम्–क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमये यत् क्रोधप्रथमसंग्रहकिट्टिदलं बध्नाति, तदावलिकां यावत् तदवस्थं तिष्ठति, बन्धावलिकागतकर्मणः सकलकरणाऽयोग्यत्वेनाऽपवर्तनासंक्रमपरप्रकृतिसंक्रम-योरभावात् । ततो द्वितीयाऽऽवलिकाप्रथमसमये क्रोधस्य संग्रहकिट्टित्रये मानस्य च प्रथमसंग्रहकिट्टौ संक्रमयति, न ततोऽधस्तनीषु, कस्याश्चित् संग्रहकिट्टेर्दलं स्वाधस्तनप्रथमसंग्रहकिट्टिं यावत् संक्रम-यति, न ततोऽधस्तादित्युक्तत्वात् । इत्थं किट्टिवेदनाद्धाप्रथमसमयबद्धक्रोधप्रथमसंग्रह–किट्टिदलं द्वितीयाऽऽवलिकायां क्रोधसंग्रहकिट्टित्रये मानस्य च प्रथमसंग्रहकिट्टौ भवति । आव-

## किट्टिवेदनाद्धाप्रथमसमये गणितरीत्या पूर्वापूर्वावान्तरकिट्टिषु दलिकप्रक्षेपः




लोभस्य तृतीयसंग्रहकिट्टिः । द्वितीयसंग्रहकिट्टिः । प्रथमसंग्रहकिट्टिः

सङ्केतस्पष्टीकरणम्—

ध=संग्रहकिट्टीनामधस्ताद् निर्वर्त्यमाना अपूर्वावान्तरकिट्टयः, ताश्च लोभस्य तृतीयसंग्रहकिट्टौ चतस्रः (४), द्वितीयसंग्रहकिट्टौ तिस्रः (३), प्रथमसंग्रहकिट्टयाश्च द्वे (२), वस्तुतोऽनन्ताः, अवान्तरकिट्टयन्तरोत्पन्नापूर्वावान्तरकिट्टितश्चाऽसंख्येयगुणहीनाः ।

पू=पूर्वावान्तरकिट्टयः, ताश्चाऽसत्कल्पनया लोभस्य तृतीयसंग्रहकिट्टौ २०, द्वितीयसंग्रहकिट्टौ १८, प्रथमसंग्रहकिट्टौ १६ ।

नू=अवान्तरकिट्टयन्तरेषु संक्रमदलतो निर्वर्त्यमाना अपूर्वावान्तरकिट्टयः, ताश्च तृतीयसंग्रहकिट्टौ नव(९), द्वितीयसंग्रहकिट्टयामष्टौ (८),प्रथमसंग्रहकिट्टौ च पञ्च (५) । वस्तुतोऽनन्ताः पूर्वावान्तरकिट्टीनां चाऽसंख्येयभागप्रमाणाः । एकैका चापूर्वावान्तरकिट्टिः पल्योपमप्रथमवर्गमूलासंख्येयभागप्रमाणेष्ववान्तरकिट्टयन्तरेषु गतेषु निर्वर्त्यते, असत्कल्पनया तु द्वयोरवान्तरकिट्टयन्तरयोरत्र जितयोर्निर्वर्त्यते ।

ब=बन्धपूर्वावान्तरकिट्टयः, ताश्चाऽसत्कल्पनया पञ्चदश ( १५ ) वस्तुतो-ऽनन्ताः । इह प्रथमसंग्रहकिट्टौ बन्धप्रथमपूर्वावान्तरकिट्टया उपरि निर्वर्त्यमानसंक्रमापूर्वावान्तरकिट्टयोऽपि बन्धपूर्वावान्तरकिट्टित्वेन बोध्याः ।

ब अ=बन्धापूर्वावान्तरकिट्टयः, वस्तुतोऽनन्ताः, इह त्वसत्कल्पनया द्वे बन्धापूर्वावान्तरकिट्टी कल्पिते, एकैका च बन्धापूर्वावान्तरकिट्टिः पञ्चसु बन्धपूर्वावान्तरकिट्टिषु गतासु निर्वर्त्यते । वस्तुतस्त्वसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणासु गतासु निर्वर्त्यते ।

✳=अनेन चिह्नेन अधस्तनापूर्वावान्तरकिट्टिदलं सूचितम्, तच्च लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलप्रमाणं भवति, अधस्तनापूर्वावान्तरकिट्टिदलं च संग्रहकिट्टीनामधस्ताद् निर्वर्त्यमानास्वपूर्वावान्तरकिट्टिषु प्रक्षिपति ।

- - -=अनेन चिह्नेन मध्यमखण्डदलं सूचितम्, एकमध्यमखण्डदलं च लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलस्याऽसंख्येयभागप्रमाणं मतान्तरेण

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

△=अनेन चिह्नेन उभयचयदलं सूचितम्, लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ कषायचतुष्कपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् प्रक्षिपति, तत एकैकेन हीनान् प्रक्षिपति ।

×=अनेन चिह्नेन अधस्तनशीर्षचयदलं सूचितम्, लोभतृतीयसंग्रहकिट्ट्या द्वितीयपूर्वावान्तरकिट्टावेकमधस्तनशीर्षचयं प्रक्षिपति, तृतीयस्यां द्वौ, चतुर्थ्यां त्रीन्, एवमेकोत्तरवृद्ध्याऽधस्तनशीर्षचयान् प्रक्षिपति, तेन लोभप्रथमसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टावेकोनलोभसंग्रहकिट्टित्रयपूर्वावान्तरकिट्टिराशिप्रमाणाननन्तानधस्तनशीर्षचयान्, असत्कल्पनया तु चतुष्पञ्चाशत्तमपूर्वावान्तरकिट्टौ त्रिपञ्चाशदधस्तनशीर्षचयान् निक्षिपति ।

• • •=अनेन चिह्नेन पूर्वावान्तरकिट्टिषु पुरातनदलं सूचितम्, तच्चोत्तरोत्तरपूर्वावान्तरकिट्टौ विशेषहीनक्रमेण भवति ।

० ० ०=अनेन चिह्नेन अवान्तरकिट्ट्यन्तरोत्पन्नापूर्वावान्तरकिट्टिदलं सूचितम्, तच्च लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलप्रमाणं भवति। अवान्तरकिट्ट्यन्तरोत्पन्नापूर्वावान्तरकिट्टिदलं चावान्तरकिट्ट्यन्तरेषु निर्वर्त्यमानास्वपूर्वावान्तरकिट्टिषु प्रक्षिपति ।

१=बन्धचययुक्तबन्धमध्यमखण्डम्, लोभप्रथमसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तरकिट्टौ कषायचतुष्कबन्धपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणान् बन्धचयान् प्रक्षिपति, तत एकैकेन हीनान् हीनतरान् बन्धचयान् प्रक्षिपति, तथा बन्धमध्यमखण्डं सर्वासु बन्धपूर्वापूर्वावान्तरकिट्टिष्वविशेषेण निक्षिपति । एतत्सर्वमनेन चिह्नेन सूचितम् ।

२=बन्धापूर्वावान्तरकिट्टिचयदलम्, लोभप्रथमसंग्रहकिट्टिबन्धप्रथमापूर्वावान्तरकिट्टौ लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टिप्रभृतिव्यतिक्रान्तावान्तरकिट्टिराशिन्यूनसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणान् बन्धापूर्वावान्तरकिट्टिचयान् प्रक्षिपति । ततोऽसंख्येयपल्योपमप्रथमवर्गमूलराशिप्रमाणैर्हीनान्, असत्कल्पनया तु षड्भिर्हीनान् बन्धाऽपूर्वावान्तरकिट्टिचयान् प्रक्षिपति । अनेन क्रमेणाऽनन्तासु बन्धापूर्वावान्तरकिट्टिषु बन्धापूर्वावान्तरकिट्टिचयदलप्रक्षेपो वक्तव्यः । इह तु द्वे एव बन्धापूर्वावान्तरकिट्टी कल्पिते, तेन द्वयोरेव दर्शितः ।

+अनेन चिह्नेन बन्धापूर्वावान्तरकिट्टिसमानखण्डदलं सूचितम्, तच्च संक्रमध्यमखण्डाधिकलोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलप्रमाणं भवति । बन्धापूर्वावान्तरकिट्टिसमानखण्डदलं चैकैकबन्धापूर्वावान्तरकिट्टौ दीयते । संक्रमदलतो दीयमानदलम्—

लोभतृतीयसंग्रहकिट्ट्या अधस्तान् निर्वर्त्यमानायां प्रथमापूर्वावान्तरकिट्टौ दीयमानदलम् ( ∗।△ ) इत्येतैश्चिह्नैः सूचितं प्रभूतं भवति । द्वितीयापूर्वावान्तरकिट्टावेकचयेन हीनं भवति, ततो विशेषहीनक्रमेण तावद् वक्तव्यम्, यावल्लोभतृतीयसंग्रहकिट्ट्या अधस्ताद् निर्वर्त्यमाना चरमापूर्वावान्तरकिट्टिः । लोभतृतीयसंग्रहकिट्ट्या अधस्ताद् निर्वर्त्यमानचरमापूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ दीयमानम् ( । △ ) इत्याभ्यां सूचितं दलमसङ्ख्येयगुणहीनं भवति, मतान्तरेण त्वनन्तगुणहीनं भवति, तत्र ( • • • ) इत्यनेन चिह्नेन सूचितस्य पुरातनदलस्य सत्त्वात् । ततो विशेषहीनं विशेषहीनं दलम् (×।△) इत्येतैः सूचितं पल्योपमप्रथमवर्गमूलासंख्येयभागप्रमाणासु लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिषु दीयते, असत्कल्पनया त्वेकस्यामवान्तरकिट्टौ दीयते, ततो लोभतृतीयसंग्रहकिट्ट्या अवान्तरकिट्ट्यन्तरोत्पन्नप्रथमापूर्वावान्तरकिट्टौ दीयमानम् (०।△) इत्येतैः सूचितं दलमसंख्येयगुणं मतान्तरेण त्वनन्तगुणं भवति, तत्र ( ० ० ० ) इत्यनेन सूचितदलस्याऽपि प्रक्षेपात् । ततोऽनन्तर-पूर्वावान्तरकिट्टौ दीयमानम् ( × । △ ) इत्येतैः सूचितदलमसंख्येयगुणहीनं मतान्तरेण त्वनन्तगुणहीनं भवति, तत्र (••••) इत्यनेन सूचितस्य पुरातनदलस्य सत्त्वात् । एवमग्रेऽपि ।

बन्धदलतो दीयमानदलम्—लोभप्रथमसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तरकिट्टौ दीयमानम् १ इत्यनेन सूचितं दलं प्रभूतं भवति, ततो विशेषहीनक्रमेणाऽसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणासु असत्कल्पनया तु पञ्चसु बन्धपूर्वावान्तरकिट्टिषु दीयमानं दलं भवति । ततोऽनन्तरायां बन्धप्रथमापूर्वावान्तरकिट्टौ दीयमानम् + १ २ इत्येतैः सूचितं दलमनन्तगुणं भवति, तदनन्तरबन्धपूर्वावान्तरकिट्टौ दीयमानम् १ इत्यनेन सूचितमनन्तगुणहीनं भवति । एवमग्रेऽपि वक्तव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिकां यावत् संग्रहकिट्टिचतुष्टययेव तिष्ठति, संक्रमावलिकागतकर्मणः सकलकरणायोग्यत्वात् । ततः परं क्रोधप्रथमसंग्रहकिट्टितो मानप्रथमसंग्रहकिट्टयामागतं दलं तत्संक्रमाऽऽवलिकायां पूर्णायां तृतीयाऽऽवलिकायाः प्रथमसमये मानस्य शेषसंग्रहकिट्टिद्वये मायायाश्च प्रथमसंग्रहकिट्टौ संक्रमयति, न ततोऽधस्तात् , हेतुस्तुपूर्ववद् भावनीयः । तेन तृतीयाऽऽवलिकायां किट्टिवेदनाद्धाप्रथमसमयबद्धक्रोधप्रथमसंग्रहकिट्टिदलं संग्रहकिट्टिसप्तके भवति । ततः परं यत् किट्टिवेदनाद्धाप्रथमसमयबद्धक्रोधप्रथमसंग्रहकिट्टिदलं मायायाः प्रथमसंग्रहकिट्टिं संप्राप्तम् , तत् संक्रमाऽऽवलिकायां व्यतिक्रान्तायां चतुर्थाऽऽवलिकाप्रथमसमये मायायाः शेषसंग्रहकिट्टिद्वये लोभस्य च प्रथमसंग्रहकिट्टौ संक्रमयति, न ततोऽधस्तात्, हेतुस्तु पूर्ववद् बोद्धव्यः । इत्थं किट्टिवेदनाद्धाप्रथमसमयबद्धक्रोधप्रथमसंग्रहकिट्टिदलं चतुर्थावलिकायां दशसु संग्रहकिट्टिषु भवति । ततः परं यत् किट्टिवेदनाद्धाप्रथमसमयबद्धक्रोधप्रथमसंग्रहकिट्टिदलं लोभप्रथमसंग्रहकिट्टिं संप्राप्तम्, तत् संक्रमाऽऽवलिकायामतिक्रान्तायां पञ्चमाऽऽवलिकाप्रथमसमये लोभस्य द्वितीयसंग्रहकिट्टौ तृतीयसंग्रहकिट्टौ चापवर्तनासंक्रमेण संक्रमयति, आनुपूर्वीसंक्रमदर्शनात् । एवं किट्टिवेदनाद्धाप्रथमसमयबद्धक्रोधप्रथमसंग्रहकिट्टिदलं पञ्चमाऽऽवलिकायां द्वादशसु संग्रहकिट्टिषु भवति । उक्तञ्च **कषायप्राभृते—**

> **"जा चावि बज्झमाणो आवलिया होदि पढमकिट्टीए ।**
> **पुव्वावलिया णियमा अणंतरा चदुसु किट्टीसु ॥१॥**
> **तदिया सत्तसु किट्टीसु चउत्थो दससु होइ किट्टीसु ।**
> **तेण परं सेसाओ भवंति सव्वासु किट्टीसु ॥२॥"** इति ।

तथैव तच्चूर्णावपि–**"जं पदेसग्गं बज्झमाणयं कोधस्स, तं पदेसग्गं सव्वं बंधावलियं कोहस्स पढमसंगहकिट्टीए दीसइ । तदो आवलियादिक्कंतं तिसु वि कोहकिट्टीसु दीसइ, माणस्स च पढमकिट्टीए । एवं विदियावलिया चदुसु किट्टीसु दीसइ । तदो जं पदेसग्गं कोहादो माणस्स पढमकिट्टीए गदं, तं पदेसग्गं तदो आवलियाए पुण्णाए माणस्स विदियतदियासु मायाए च पढमसंगहकिट्टीए संकमदि । एवं तदिया आवलिया सत्तसु किट्टीसु त्ति भण्णइ । जं कोहपदेसग्गं संछुब्भमाणयं मायाए पढमकिट्टीए संपत्तं, तं पदेसग्गं तत्तो आवलियादिक्कंतं मायाए विदियतदियासु च किट्टीसु लोभस्स च पढमकिट्टीए संकमदि । एवं चउत्थो आवलिया दससु किट्टीसु त्ति भण्णइ । जं कोह–पदेसग्गं संछुब्भमाणं लोभस्स पढमकिट्टीए संपत्तं, तदो आवलियादिक्कंतं लोभस्स विदियतदियासु किट्टीसु दीसइ । एवं पंचमो आवलिया सव्वासु किट्टीसु त्ति भण्णइ ।"** इति ।

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

अथाऽतिदिदिक्षुराह—'**माणादीण**' इत्यादि, 'मानादीनामपि' मान–माया–लोभानामपि 'बद्धदलिकं' प्रथमसंग्रहकिट्टिबद्धप्रदेशाग्रं सर्वसंग्रहकिट्टिषु यथासंभवं 'ज्ञेयं' ज्ञातव्यम्। तद्यथा—मानप्रथमसंग्रहकिट्टिबद्धप्रदेशाग्रं चतुर्थावलिकायां नवस्वपि संग्रहकिट्टिषु भवति, मायायाः प्रथमसंग्रहकिट्टिबद्धप्रदेशाग्रं तृतीयावलिकायां षट्स्वपि संग्रहकिट्टिषु भवति, लोभप्रथमसंग्रहकिट्टिबद्धदलिकं द्वितीयावलिकायां तिसृषु संग्रहकिट्टिषु भवति। भावना तु सुगमा ॥१३८॥

प्राग् **एकविंशत्यधिकशततमगाथायां** मध्यमाऽवान्तरकिट्टयो वेद्यन्त इत्युक्तम्। तत्रोदयस्थितौ कति समयप्रबद्धाः प्रक्षिप्ता भवन्ति ? कति चाक्षिप्ता भवन्ति ? एवं कति भवबद्धा उदयस्थितौ निक्षिप्ता भवन्ति ? इति परशङ्कां व्यपनुनुदिषुराह—

**उदयठिईए छण्हं आवलियाणं हवन्ति अच्छूढा।**
**समयपबद्धा छूढा सेसा तह सव्वभवबद्धा ॥१३९॥**

उदयस्थितौ षण्णामावलिकानां भवन्त्यक्षिप्ताः।
समयप्रबद्धाः क्षिप्ताः शेषास्तथा सर्वभवबद्धाः ॥१३९॥ इति पदसंस्कारः।

'**उदयठिईए**'इत्यादि, 'उदयस्थितौ' किट्टिवेदकैः स्वोदयनिषेके षण्णामावलिकानां समयप्रबद्धा 'अक्षिप्ता' उदीरणाकरणेनाऽनिक्षिप्ता भवन्ति। कथमेतदवसीयते ? इति चेत्, भण्यते—अन्तरकरणे निष्पादिते ये कर्मप्रदेशा बध्यन्ते, ते नियमत आवलिकाषट्काऽभ्यन्तरे नोदयन्ति, किन्तु षट्स्वावलिकासु व्यतिक्रान्तास्वेव, तेन षडावलिकासमयप्रबद्धा उदयस्थित्यामुदीरणाकरणेन न प्रक्षिप्यन्ते। न केवलं किट्टिवेदकैः स्वोदयस्थितौ षडावलिकासमयप्रबद्धा अक्षिप्ता भवन्ति, किन्त्वन्तरकरणनिष्पादनतः षट्स्वावलिकासु गतासु सर्वैः क्षपकैः स्वोदयस्थितौ षडावलिकासमयप्रबद्धा न क्षिप्यन्ते। यदभ्यधायि **कषायप्राभृतचूर्णौ**—"**जत्तो पाए अंतरं कदं, तत्तो पाए समयपबद्धो छसु आवलियासु गदासु उदीरिज्जदि। अंतरादो कदादो तत्तो छसु आवलियासु गदासु तेण परं छण्हमावलियाणं समयप्रबद्धा उदये अछुद्धा भवंति।**" इति। इदमुक्तं भवति–अन्तरकरणसमाप्तिप्रथमसमय एकावलिकासमयप्रबद्धा उदयस्थित्यामक्षिप्ता भवन्ति, बन्धावलिकागतकर्मणः सकलकरणाऽयोग्यत्वेना-ऽऽवलिकाबद्धकर्मण उदयाभावात्। अन्तरकरणसमाप्तिद्वितीयसमयेऽप्येकावलिकासमयप्रबद्धा उदयस्थितावक्षिप्ता भवन्ति, अन्तरकरणसमाप्तेरधस्ताद् बद्धकर्मण आवलिकां यावत्सकलकरणाऽयोग्यत्वेनावलिकायां व्यतिक्रान्तायां क्रमेणोदीरणाप्रयोगेणोदयात्। एवंक्रमेणा-ऽन्तरकरणसमाप्तिप्रथमसमयतः प्रभृत्यावलिकाचरमसमयं यावदावलिकासमयप्रबद्धा उदयेऽक्षिप्ता भवन्ति। ततः परं समयाधिकावलिकासमयप्रबद्धा उदयेऽक्षिप्ता भवन्ति, अन्तरकरणसमाप्तिप्रथमसमयबद्धप्रदेशाग्रस्यावलिकाषट्के गत उदीरणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवनात् । तदुपरितनसमये द्विसमयाधिकावलिकासमयप्रबद्धा उदयेऽक्षिप्ता भवन्ति, तदुपरितनसमये त्रिसमयाधिकावलिकासमयप्रबद्धा उदयेऽक्षिप्ता भवन्ति, एवमेकैकसमयवृद्ध्या तावद्वक्तव्यम्, यावदन्तरकरणसमाप्तितः समयोनावलिकाषट्कस्य चरमसमयः । तदानीं हि समयोनषडावलिकासमयप्रबद्धा उदयेऽक्षिप्ता भवन्ति । तदनन्तरसमये षण्णामावलिकानां समयप्रबद्धा उदयनिषेकेऽक्षिप्ता भवन्ति, तत उर्ध्वं सर्वत्र षण्णामावलिकानां समयप्रबद्धा उदयस्थितौ अक्षिप्ता भवन्ति ।

'छूढा' इत्यादि, तत्र 'शेषाः' षडावलिकानां समयप्रबद्धान् वर्जयित्वा शेषाः सर्वे समयप्रबद्धास्तथा सर्वभवबद्धा उदयस्थितौ 'क्षिप्ता' उदीरणाकरणेन प्रक्षिप्ता भवन्ति । अयम्भावः—यदि कर्मावस्थानकालाभ्यन्तरे संचितयत्समयप्रबद्धस्यैकोऽपि कर्मपरमाणुरुदये प्रक्षिप्यते, तर्हि स समयप्रबद्ध उदये क्षिप्त इति व्याख्यानात् षडावलिकानां समयप्रबद्धान् परित्यज्य शेषाः सर्वे समयप्रबद्धा उदये वर्तन्ते । एवं यदि कर्माऽवस्थानकालाभ्यन्तर विवक्षित एकस्मिन् भवे बद्धानां समयप्रबद्धानामेकसमयप्रबद्धस्यैकोऽपि कर्मपरमाणुरुदये प्रक्षिप्यते, तर्हि विवक्षितभवबद्ध उदये निक्षिप्त इति व्याख्यानात् सर्वे भवबद्धा उदये प्रक्षिप्ता भवन्ति । उक्तं च **कषायप्राभृतचूर्णौ—"भवबद्धा पुण णियमा सव्वे उदये संछुद्धा भवंति ।"** इति । इत्थं समयप्रबद्धा उदयस्थितौ प्रक्षिप्ता अप्रक्षिप्ताश्च भवन्ति, भवप्रबद्धाः पुनः सर्वे उदयस्थितौ प्रक्षिप्ता भवन्ति ॥१३९ ॥

उदयस्थितौ समयप्रबद्धा भवबद्धाश्च प्ररूपिताः, सम्प्रति क्षपकस्यैकस्यां स्थितौ समयप्रबद्धशेषकाणि भवबद्धशेषकाणि च प्रतिपादनीयानि । इह तावदेकस्मिन् समये बद्धः प्रदेशपिण्डः समयप्रबद्ध उच्यते, तत्र कर्माऽवस्थानकालाभ्यन्तरे यथासंभवं वेदितस्य यस्य समयप्रबद्धस्य वेदितशेषं यत्प्रदेशाग्रं सत्कर्मणि भवति, अनन्तरसमये चोदयस्थितिं वर्जयित्वा शेषासु स्थितिषु तस्य समयबद्धस्यैकोऽपि प्रदेशो न वर्तिष्यति, उदयस्थितिं त्वपकर्षेण प्राप्स्यति, तत्प्रदेशाग्रं समयप्रबद्धस्य शेषकं व्यपदिश्यते । उक्तं च **कषायप्राभृतचूर्णौ—"जं समयपबद्धस्स वेदिदसेसगं पदेसग्गं दिस्सइ, तम्मि अपरिसेसिदम्मि एगसमएण उदयमागदम्मि तस्स समयपबद्धस्स अण्णो कम्मपदेसो वा णत्थि, तं समय–पबद्धसेसगं णाम ।"** इति । न च कर्माऽवस्थानकालाभ्यन्तरे समयप्रबद्धस्य वेदितशेषमुदये वर्तमानं प्रदेशाग्रं समयप्रबद्धशेषकं कुतो नोच्यते ? इति वाच्यम् , यतस्तथाविधे व्याख्यान एकस्यामेवोदयस्थितौ शेषकस्याऽवस्थानस्वीकारप्रसङ्गः स्यात् । न चेदमिष्यते, अनेकासु स्थितिषु समयप्रबद्धशेषकस्य वक्ष्यमाणत्वात् । समयप्रबद्धस्य जघन्यतः शेषकमेकं दलं भवति, द्वे वा दले शेषके भवतः, त्रीणि वा दलानि शेषकाणि भवन्ति । एवंक्रमेणोत्कृष्टतोऽनन्तकर्मदलिकानि शेषकाणि भवन्ति । एवं भवबद्धशेषकाण्यपि व्याख्येयानि । न्यगादि च

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

**कषायप्राभृतचूर्णौ**–"**एवं चेव भवबद्धसेसयं** ।" इति । तथाहि-एकस्मिन् भवे बद्धः प्रदेशसमूहो भवबद्ध उच्यते । तत्र कर्माऽवस्थानकालाभ्यन्तरे यथासंभवं वेदितस्य यस्य भवबद्धस्य वेदितशेषं यत्प्रदेशाग्रं सत्कर्मणि विद्यते, अनन्तरसमये चोदयस्थितिं मुक्त्वा शेषासु स्थितिषु तस्य भवबद्धस्यैकमपि दलं न वर्त्स्यते, उदयस्थितिं त्वपकर्षेण प्राप्स्यति, तत्प्रदेशाग्रं भवबद्ध-शेषकमुच्यते ।जघन्यतो भवबद्धशेषकमेकं भवति, उत्कृष्टतस्त्वनन्तानि भवबद्धशेषकाणि भवन्ति । नन्वेकस्थितौ कतीनां समयप्रबद्धानां भवबद्धानां च शेषकाणि विद्यन्ते ? इति परप्रश्नं समाधातु-कामः प्राह—

**एगठिईअ इगाहियकमेण खलु समयभवपबद्धाणं**
**होज्जन्ति सेसगाइं जेट्ठाउ पलियअसंखभागस्स ॥१४०॥ (गीतिः)**

एकस्थितावेकाधिकक्रमेण खलु समयभवप्रबद्धानाम् ।
भवन्ति शेषकाणि ज्येष्ठात् पल्यासंख्यभागस्य ॥१४०॥ इति पदसंस्कारः ।

"**एगठिईअ**" इत्यादि, 'एकस्थितौ' क्षपकस्यैकस्यां स्थिता एकाधिकक्रमेण 'ज्येष्ठात्' उत्कृष्टतः पल्याऽसंख्यभागस्य' पल्योपमाऽसंख्यातभागमात्राणां '**समयभवपबद्धाणं**'ति "**द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते** ।" इति न्यायात् समयप्रबद्धानां भवबद्धानां च शेषकाणि भवन्ति । खलुर्वाक्यालङ्कारे । अयं भावः-क्षपकस्यैकस्यां स्थितौ जघन्यत एकसमयप्रबद्धस्यैकस्मात् प्रभृत्य-नन्तानि कर्मपरमाणुरूपाणि शेषकाणि विद्यन्ते । एवमेकस्यां स्थितौ द्वयोर्वा समयप्रबद्धयोः शेषकाणि भवन्ति, त्रयाणां वा समयप्रबद्धानां शेषकाणि वर्तन्ते । एवमेवैकोत्तरवृद्ध्या समयप्रबद्धानां शेषकाणि तावद् वाच्यानि,यावदेकस्थित्यामुत्कृष्टतः पल्योपमाऽसंख्येयभागप्रमितानां समयप्रबद्धानां शेषकाणि। उक्तं च **कषायप्राभृतचूर्णौ क्षपकप्ररूपणाऽवसरे**–"**एक्कम्हि ट्ठिदिविसेसे कदिण्हं समयपबद्धाणं सेसाणि होज्जासु ? एक्कस्स वा समयपबद्धस्स, दोण्हं वा, तिण्हं वा, एवं गंतूण उक्कस्सेण पलिदोवमस्स असंखेज्जदिभागमेत्ताणं समयपबद्धाणं** ।" इति ।

तथा क्षपकस्यैकस्थितौ जघन्यत एकस्य भवप्रबद्धस्य शेषकाणि भवन्ति, द्वयोर्वा भवप्रबद्धयोः शेषकाणि विद्यन्ते,एवमेकोत्तरवृद्ध्योत्कृष्टतः पल्योपमाऽसंख्यातभागप्रमाणानां भवप्रबद्धानां शेषकाण्ये-कस्यां स्थितौ विद्यन्ते । उक्तं च **कषायप्राभृतचूर्णौ क्षपकप्रस्तावे**–"**भवबद्धसेसयाणि वि एक्कम्हि ठिदिविसेसे एक्कस्स वा भवबद्धस्स, दोण्हं वा, तिण्हं वा, एवं गंतूण उक्कस्सेण पलिदोवमस्स असंखेज्जदिभागमेत्ताणं भवबद्धाणं** ।" इति । एवमक्षपकस्याऽप्ये-कस्यां स्थितौ समयप्रबद्धशेषकाणि भवप्रबद्धशेषकाणि च प्ररूपयितव्यानि,विशेषाभावात् । न्यगादि च **कषायप्राभृतचूर्णावक्षपकप्ररूपणाऽवसरे**—"**एक्कम्हि ठिदिविसेसे एक्कस्स वा**

**समयपबद्धस्स सेसयं दोण्हं वा तिण्हं वा उक्कस्सेण पलिदोवमस्स असंखेज्जदि-भागमेत्ताणं समयपबद्धाणं। एवं चेव भवबद्धसेसाणि।"** इति। इदमत्राऽवधेयम्-क्षपकस्याऽक्षपकस्य चैकस्थितावुत्कर्षेण भवप्रबद्धतोऽसंख्येयगुणानां समयप्रबद्धानां शेषकाणि भवन्ति ॥१४०॥

तदेवं दर्शितमेकस्यां स्थित्यामेकसमयप्रबद्धतः प्रभृत्युत्कृष्टतः पल्योपमासंख्येयभागमात्राणां समयप्रबद्धानां शेषकाणामवस्थानम्। तत्र किमेकसमयप्रबद्धशेषकविशिष्टाः स्थितयः स्तोका भवन्ति? आहोस्वित् पल्योपमाऽसंख्येयभागमात्राणां समयप्रबद्धानां शेषकैर्विशिष्टा स्थितयः? इत्यादिके पृष्टेऽल्पबहुत्वं प्राह—

इगसमयपबद्धस्स तु सेसेण ठिई जुआऽप्पगाऽणेगाणं।
होन्ति असंखगुणा पल्लअसंखंसपमिआण च असंखंसा ॥१४१॥

**(आर्यागीतिः)**

एकसमयप्रबद्धस्य तु शेषेण स्थितयो युता अल्पका अनेकेषाम्।
भवन्त्यसंख्यगुणाः पल्या-ऽसंख्यांशप्रमितानां चाऽसंख्यांशाः ॥ १४१ ॥ इति पदसंसकरः।

**'इग०'** इत्यादि, एकसमयप्रबद्धस्य तु 'शेषेण' शेषकेण 'युताः' मिश्रिता अविरहिता इत्यर्थः, स्थितयः 'अल्पकाः' स्तोका भवन्ति। क्षपकस्य वर्षपृथक्त्वमात्रस्थितिष्वेकसमयप्रबद्धशेषकेणाऽविरहिताः स्थितय आवलिकाऽसंख्येयभागप्रमिता भवन्त्योऽपि सर्वस्तोका भवन्तीत्यर्थः। **'णेगाणं'** इत्यादि, ततो 'अनेकेषां' द्विप्रभृतितत्प्रायोग्याऽसंख्यातपर्यवसानानां समयप्रबद्धानां शेषकेणाऽविरहिताः स्थितयोऽसंख्यगुणा भवन्ति, एकसमयप्रबद्धशेषकयुक्तस्थितितोऽनेकसमयप्रबद्धशेषकाऽविरहितस्थितीनामसंख्यातगुणत्वस्य न्याय्यत्वात्। ननूत्कृष्टतोऽनेकसमयप्रबद्धशेषकेणाविरहिताः कति स्थितयो भवन्ति? इत्यत आह—**'पल्ल०'** इत्यादि, 'पल्योपमाऽसंख्यांशप्रमितानां' पल्योपमाऽसंख्येयभागप्रमितानां समयप्रबद्धानां शेषकेणाऽविरहिताः स्थितयो 'असंख्यांशाः' क्षपकस्य वर्षपृथक्त्वमात्रस्थितेर्बह्वसंख्येयभागमात्र्यो भवन्ति, तेन शेषाणां तत्प्रायोग्याऽनेकसमयप्रबद्धानां शेषकेणाऽविरहिताः स्थितय आवलिकाऽसंख्येयभागप्रमाणा भवन्त्यः सकलस्थितीनामसंख्येयभागमात्र्यो भवन्ति। उक्तं च **कषायप्राभृतचूर्णौ—"जाओ ताओ अविरहिदट्ठिदीओ, ताओ एगसमयपबद्धसेसएण अविरहिदाओ थोवाओ। अणेगाणं समयपबद्धाणं सेसएण अविरहिदाओ असंखेज्जगुणाओ। पलिदोवमस्स असंखेज्जदि-भागमेत्ताणं समयपबद्धाणं सेसएण अविरहिदाओ असंखेज्जा भागा।"** इति। अत्र मुग्धचोदको भणति-नन्वेकसमयप्रबद्धस्य शेषकेणा-ऽविरहिताः स्थितयः स्तोकाः, ततो द्वयोः समयप्रबद्धयोः शेषकेणा-ऽविरहिता विशेषाधिकाः, ततोऽपि त्रयाणां समयप्रबद्धानां शेषकेणाऽविरहिता विशेषाधिकाः। एवंक्रमेणाऽऽवलिकाऽसंख्येयभागे च गते द्विगुणा इत्यादिक्रमेण पल्यो-

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

पमाऽसंख्येयभागप्रमाणानां समयप्रबद्धानामल्पबहुत्वं कुतो न भण्यते ? इति, अत्रोच्यते—क्षपकस्य वर्षपृथक्त्वतोऽधिकाः स्थितयो न संभवन्ति । यद्येकसमयप्रबद्धतः प्रभृत्येकोत्तरवृद्ध्या पल्योपमाऽसंख्येयभागप्रमाणानां समयप्रबद्धानां शेषकमाश्रित्य स्थानानि प्ररूपयिष्यन्त, तर्हि तानि वर्षपृथक्त्वप्रमाणस्थितितोऽसंख्यातगुणान्यभविष्यन् । न चाऽस्तु वर्षपृथक्त्वतोऽसंख्येयगुणानि स्थानानीति वाच्यम्, वर्षपृथक्त्वतोऽधिकस्थितेरसंभवेन ततोऽधिकतराणां स्थानानामभावात् । इत्थमेकोत्तरवृद्धया समयप्रबद्धानां शेषकेणाऽविरहितानां स्थितीनां प्ररूपणा न संभवति, अतो यथासंभवमनेकसमयप्रबद्धशेषकेणाऽविरहिताः स्थितय एकसमयप्रबद्धशेषकेणाऽविरहितस्थितितोऽसंख्यातगुणा वाच्याः, ततोऽसंख्येयगुणाः पल्योपमाऽसंख्येयभागमात्रसमयप्रबद्धशेषकेणाऽविरहिताः स्थितयः ॥ १४१ ॥

अथैकसमयप्रबद्धस्यैकभवप्रबद्धस्य च शेषकाणि जघन्यत उत्कृष्टतश्च कतिषु स्थितिषु तिष्ठन्ति ? इति पृष्टे प्राह—

**खणभवपबद्धसेसाणि इगठिईए इगाहिअकमेणं ।**
**समयाहिअउदयावलियं वज्जिय सव्वगठिईसु ॥१४२॥**

क्षणभवप्रबद्धशेषाण्येकस्थितावेकाधिकक्रमेण ।
समयाधिकोदयावलिकां वर्जयित्वा सर्वस्थितिषु ॥१४२॥ इतिपदसंस्कारः ।

'खण०' इत्यादि, 'क्षणभवप्रबद्धशेषाणि' इत्युक्त एकसमयप्रबद्धस्यैकभवप्रबद्धस्य च शेषकाणीत्यर्थो ग्राह्यः । न चैकशब्दोऽनुक्तोऽपि कुतो गृह्यते ? इति वाच्यम्, **"व्याख्यानतो विशेषप्रतिपत्तिः ।"** इति न्यायाश्रयणात् । तत्रैकसमयप्रबद्धस्यैकभवप्रबद्धस्य च शेषकाण्येकस्थितौ वर्तन्त इति शेषः, एकाधिकक्रमेण समयाधिकोदयावलिकां वर्जयित्वा 'सर्वस्थितिषु' अन्तरकरणे दलिकाभावात् क्षपकस्य सर्वेषु प्रथमस्थितिनिषेकेषु द्वितीयस्थितिनिषेकेषु च वर्तन्ते । इदमुक्तं भवति-एकसमयप्रबद्धस्यैकभवप्रबद्धस्य च शेषकाणि जघन्यत एकस्यां स्थितौ वर्तन्ते, द्वयोर्वा स्थित्योर्वर्तन्ते, तिसृषु वा स्थितिषु वर्तन्ते, एवमेकोत्तरवृद्धयोत्कृष्टतः समयाधिकोदयावलिकां परित्यज्य शेषासु क्षपकस्य वर्षपृथक्त्वमात्रप्रथमस्थितियुक्तद्वितीयस्थितिष्वेकसमयप्रबद्धशेषकाण्यवतिष्ठन्ते । न च समयाधिकावलिकायामेकसमयप्रबद्धस्य शेषकाणि कुतो न वर्तन्ते ? इति वाच्यम्, तेषां लक्षणभङ्गप्रसङ्गात् । तथाहि–उदयस्थितौ समयप्रबद्धस्य शेषकाणि न संभवन्ति, अनन्तरसमये निर्लेपयिष्यमाणानां कर्मप्रदेशानां शेषकत्वेन व्युत्पादनात्, उदयस्थितौ च तात्कालिकनिर्लेपनदर्शनेन शेषकत्वव्युत्पत्तौ विरोधस्योद्भवनात् । न च तथाप्युदयावलिकाया उपरितनप्रथमस्थितौ समयप्रबद्धशेषकाणि संभवन्तीति वाच्यम्, अनन्तरसमये तस्याः स्थितेरुदयावलिकायां प्रविश्यमाणत्वादुदयावलिकागतकर्मणश्च सकलकरणाऽयोग्यत्वेनाऽनन्तरसमययुदयावलिकागतकर्मदलानामपर्षणेनोदयस्थितौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षेपाऽयोगात् । एवमुदयावलिकागततृतीयादिस्थितिष्वपि न संभवति । ननूदयस्थितेरुपरितना याऽनन्तरा द्वितीयस्थितिः, तस्यां कुतो न संभवन्ति ? इति चेत्, उच्यते—अपकर्षणेनाऽनन्तरसमययुदयस्थितौ निश्शेषतो निर्लेपयिष्यमाणाः कर्मप्रदेशाश्शेषकत्वेन व्युत्पादिताः, अनन्तरद्वितीयस्थितिगतप्रदेशास्तूदयस्थितावपकर्षणेन न प्रक्षिप्यन्ते, किन्तु स्वभावतोऽधस्तनस्थितिक्षयेनोदयस्थितौ प्रविशन्ति । यद्वा व्याख्यानतो **विशेषप्रतिपत्तिरि**ति न्यायेनोदयस्थितेरनन्तरोपरितनस्थितावप्येकसमयप्रबद्धस्य शेषकाणि तिष्ठन्तीत्यभ्युपगन्तव्यम् । एवमेकभवप्रबद्धशेषकाण्यपि निरूपणीयानि । उक्तश्च **कषायप्राभृतचूर्णौ—"समयपबद्धसेसयमेक्कम्मि ठिदिविसेसे, दोसु वा, तीसु वा, एगादिएगुत्तरमुक्कस्सेण विदियट्ठिदीए सव्वासु ट्ठिदीसु पढमट्ठिदीए च समयाहियउदयावलियं मोत्तूण सेसासु सव्वासु ट्ठिदीसु**××××××।" इति । एवमेकभवप्रबद्धशेषकेषु ग्रन्थान्तरसंवादो द्रष्टव्यः ।

क्षपकस्यैकसमयप्रबद्धस्य शेषकाण्युत्कर्षतो वर्षपृथक्त्वस्थितिषु दृश्यन्ते, अधिकस्थितेरभावात् । अक्षपकस्य त्वधिकास्वपि स्थितिषु दृश्यन्ते । तथाहि–एकसमयप्रबद्धशेषकाणि जघन्यत एकस्यां स्थितौ तिष्ठन्ति, यद्वा द्वयोः स्थित्योस्तिष्ठन्ति, यद्वा तिसृषु स्थितिष्ववतिष्ठन्ते । एवमेकोत्तरवृद्ध्योत्कृष्टतोऽक्षपकस्य पल्योपमाऽसंख्येयभागप्रमाणासु स्थितिष्वेकसमयप्रबद्धशेषकाणि वर्तन्ते । उक्तश्च **कषायप्राभृतचूर्ण्यामक्षपकप्रस्तावे–"समयपबद्धसेसयमेक्किस्से ठिदीए होज्ज, दोसु तीसु वा, उक्कस्सेण पलिदोवमस्स असंखेज्जदिभागेसु** ।" इति ॥१४२॥

तदेवमभिहितम्–विवक्षितैकसमयभवप्रबद्धशेषकाणि जघन्यत एकस्यां स्थितौ वर्तन्ते, उत्कृष्टतश्च समयाधिकोदयावलिकावर्जसर्वस्थितिष्विति । तत्र किमेकस्यां स्थित्यां येषां समयप्रबद्धानां शेषकाणि विद्यन्ते, ते प्रभूता भवन्ति ? उत द्व्यादिस्थितिषु येषां समयप्रबद्धानां शेषकाण्यवतिष्ठन्ते, ते प्रभूताः ? इति परशङ्काव्यपनोदाय प्राह—

## जाणं समयपबद्धाणं सेसाणिगठिईअ ते थोवा ।
## दोसु अहिआ आवलिअसंखंसे उ दुगुणा य जवमज्झं ॥१४३॥ (गीतिः)

येषां समयप्रबद्धानां शेषाण्येकस्थितौ ते स्तोकाः ।
द्वयोरधिका आवलिकाऽसंख्यांशे तु द्विगुणाश्च यवमध्यम् ॥१४३॥ इति पदसंस्कारः ।

'जाणं' इत्यादि, येषां समयप्रबद्धानां 'शेषाणि' शेषकाण्येकस्थितावतिष्ठन्ते, ते समयप्रबद्धाः स्तोका भवन्ति । तद्यथा–यस्य समयप्रबद्धस्य शेषकाण्येकस्यामेव स्थितावतिष्ठन्ते, तस्यैका शलाका ग्रहीतव्या । ततः पुनरप्यन्यस्यैकस्य समयप्रबद्धस्य शेषकाण्यन्यस्यामेकस्यां स्थितौ विद्य-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

न्ते, तस्य द्वितीयैका शलाका ग्रहीतव्या । एवं यस्य समयप्रबद्धस्य शेषकाण्येकैकस्थिता- ववतिष्ठन्ते, तस्य तस्यैकैका शलाका ग्रहीतव्या, गृहीताश्च सर्वाः शलाकाः स्तोका भवन्ति । 'दोसु' इत्यादि, 'द्वयोः' ततो येषां समयप्रबद्धानां शेषकाणि द्वयोः स्थित्योरवतिष्ठन्ते, ते 'अधिकाः' विशेषाधिकाः, यस्य यस्य समयप्रबद्धस्य शेषकाणि स्थितिद्वये विद्यन्ते, तस्य तस्यैकैका शलाका ग्रहीतव्या, गृहीताश्च सर्वाः शलाकाः पूर्वपदतो विशेषाधिका भवन्तीत्यर्थः । ततो येषां समयप्रबद्धानां शेषकाणि तिसृषु स्थितिष्ववतिष्ठन्ते, ते समयप्रबद्धा विशेषाधिका भवन्ति । एव- मेकोत्तरवृद्धयापन्नस्थितिषु समयप्रबद्धा विशेषाधिकक्रमेण गच्छन्ति । 'आवलिकाऽसंख्यांशे तु' आवलिकाऽसंख्येयभागे गते तु द्विगुणाः समयप्रबद्धा भवन्ति । चकारः समुच्चयार्थको भिन्नक्रमश्च, ततश्चायमर्थः—यवमध्यं चाऽऽवलिकाऽसंख्यांशे=प्रथमस्थानतः प्रभृत्यावलिकाऽसंख्यातभाग- प्रमाणद्विगुणवृद्धिस्थानाऽतिक्रमे यवमध्यं प्राप्यत इति भावः ।

इदमत्र तात्पर्यम्—येषां समयप्रबद्धानां शेषकाण्येकस्यां स्थितौ वर्तन्ते, ते समयप्रबद्धाः स्तोकाः, ततो येषां समयप्रबद्धानां द्वयोः स्थित्योर्वर्तन्ते, ते विशेषाधिकाः, ततो येषां समय- प्रबद्धानां शेषकाणि तिसृषु स्थितिषु वर्तन्ते, ते विशेषाधिका भवन्ति । एवं विशेषाधिकक्रमेणाऽऽ- वलिकाऽसंख्येयभागमात्रेषु स्थानेषु गतेषु प्रथमस्थानतः समयप्रबद्धा द्विगुणा भवन्ति, इदञ्च प्रथमं द्विगुणवृद्धिस्थानम् । ततः पुनरेतावत्सु स्थानेषु गतेषु समयप्रबद्धा द्विगुणा भवन्ति, इदञ्च द्वितीयं द्विगुणवृद्धिस्थानम् , ततः पुनरेतावत्सु स्थानेषु गतेषु समयप्रबद्धा द्विगुणा भवन्ति । इदञ्च तृतीयं द्विगुणवृद्धिस्थानम् । अनेन क्रमेणाऽऽवलिकाऽसंख्येयभागमात्रेषु द्विगुणवृद्धिस्था- नेषु गतेषु यवमध्यं प्राप्यते । अथ किं नाम यवमध्यम् ? इति चेत् , उच्यते—यथा यवाख्यधान्य- विशेषः प्रारम्भभागतो विशेषाधिकक्रमेण तावद्वर्धते, यावत् तस्य मध्यस्थानम् । ततो विशेषहीनक्रमेण तावद्धीयते, यावत् तस्य पर्यन्तभागः, तथैवैकोत्तरवृद्धयापन्नस्थितिषु समयप्रबद्धा विशेषाधिकक्रमेण तावद् वर्धन्ते, यावदावलिकाऽसंख्येयभागमात्राणि स्थानानि । तत एकोत्तरवृद्धयापन्नस्थितिषु समयप्रबद्धा गच्छन्ति, यावच्चरमस्थानम् । तत उपमयेह यवमध्यमुच्यते ।

ततो यवमध्यस्यावलिकाऽसंख्येयभागप्रमाणस्थितिलक्षणस्योपर्येकोत्तरवृद्धयापन्नस्थितिषु समयप्र- बद्धा विशेषहीनक्रमेण गच्छन्ति । यवमध्यत आवलिकाऽसंख्येयभागप्रमाणस्थानेषु गतेषु द्विगुणहीनाः समयप्रबद्धा भवन्ति, ततः पुनरेतावत्सु स्थानेष्वतीतेषु समयप्रबद्धा द्विगुणहीनाः सम्पद्यन्ते । एवंक्रमेण यवमध्यस्योपरि तावद् गच्छन्ति, यावद् वर्षपृथक्त्वमात्रस्थानेषु गतेषु चरमस्थानं प्राप्यते, मध्ये चाऽसंख्येयद्विगुणहानिस्थानानि व्यतिक्रामन्ति । उक्तं च कषायप्राभृतचूर्णौ—

**"समयपबद्धस्स एक्केक्कस्स सेसगमेक्किस्से ठिदीए, ते समयपबद्धा थोवा । जे दोसु ठिदीसु, ते समयपबद्धा विसेसाहिया । आवलियाए असंखेज्जदिभागे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दुगुणा। आवलियाए असंखेज्जदिभागे जवमज्झं। तदो हायमाणट्ठाणाणि वासपुधत्तं।**" इति। एवं भवप्रबद्धानामपि यवमध्यादिप्ररूपणा कर्तव्या, विशेषाभावात्।

अक्षपकस्याऽप्येकादिस्थितिषु समयप्रबद्धानामवस्थानक्रमः क्षपकवज्ज्ञातव्यः, नवरं पल्योपमाऽसंख्येयभागे गते द्विगुणवृद्धिस्थानं द्विगुणहानिस्थानं वा भवति, एवं पल्योपमाऽसंख्येयभागमात्रेषु द्विगुणवृद्धिस्थानेषु गतेष्वक्षपकस्य यवमध्यं जायते, क्षपकस्य त्वावलिकाऽसंख्येयभागे संजातम्। तथाहि—येषां समयप्रबद्धानां शेषकाण्यक्षपकस्यैकस्यामेव स्थितौ भवन्ति, ते समयप्रबद्धाः स्तोकाः। ततो येषां समयप्रबद्धानां शेषकाण्यक्षपकस्य द्वयोः स्थित्योरवतिष्ठन्ते, ते समयप्रबद्धा विशेषाधिका भवन्ति। एवमेकोत्तरवृद्ध्यापन्नस्थितिषु समयप्रबद्धा विशेषाधिकक्रमेण गच्छन्ति। पल्योपमाऽसंख्येयभागमात्रस्थानेषु गतेषु समयप्रबद्धा द्विगुणवृद्धा भवन्ति। इदं चाद्यं द्विगुणवृद्धिस्थानम्। ततः पुनरेतावत्सु स्थानेषु गतेषु समयप्रबद्धा द्विगुणा भवन्ति। इदं द्वितीयं द्विगुणवृद्धिस्थानम्। एवंक्रमेण पल्योपमाऽसंख्येयभागप्रमाणेषु द्विगुणवृद्धिस्थानेषु गतेषु सत्सु यवमध्यं प्राप्यते। यवमध्यस्थाने पल्योपमाऽसंख्येयभागप्रमाणस्थितिलक्षणे सर्वप्रभूताः समयप्रबद्धा भवन्ति। ततो यवमध्यस्योपर्येकोत्तरवृद्ध्यापन्नस्थितिषु समयप्रबद्धा विशेषहीनक्रमेण गच्छन्ति। पल्योपमाऽसंख्येयभागे च गते द्विगुणहीनाः समयप्रबद्धा भवन्ति। ततः पुनः पल्योपमाऽसंख्यातभागेऽतीते समयप्रबद्धा द्विगुणहीना भवन्ति। एवंक्रमेण यवमध्यस्याधस्तनस्थानतोऽसंख्यातगुणेषु स्थानेषु गतेषु चरमस्थानं प्राप्यते। तत्र नानाद्विगुणवृद्धिहानिस्थानानि स्तोकानि भवन्ति। ततो द्विगुणहान्योरन्तरालवर्तीनि स्थानान्यसंख्येयगुणानि। एवं भवबद्धा अपि प्ररूपयितव्याः, विशेषाभावात्। उक्तञ्चेदमेव भङ्ग्यन्तरेण **कषायप्राभृतचूर्णौ**। तथा च तद्ग्रन्थः—"**समयपबद्धसेसयाणि एक्कम्हि ट्ठिदिविसेसे जाणि, ताणि थोवाणि। दोसु ठिदिविसेसेसु विसेसाहियाणि। तिसु ठिदिविसेसेसु विसेसाहियाणि। पलिदोवमस्स असंखेज्जदिभागे जवमज्झं। णाणंतराणि थोवाणि, एगंतरमसंखेज्जगुणं। एवं भवबद्धसेसयाणि।**" इति। चूर्णिसूत्राणामयं भावः—एकस्य समयप्रबद्धस्य भवबद्धस्य च वेदितशेषः कर्मप्रदेशोऽनन्तरसमययुदयस्थितिं प्राप्तो निश्शेषं निर्लेपयिष्यमाणो यथासंख्यं समयप्रबद्धशेषकं भवबद्धशेषकं चोच्यते। तत्राऽक्षपकस्यैकस्यां स्थितौ वर्तमानस्य समयप्रबद्धशेषकस्यैका शलाका ग्रहीतव्या। पुनरन्यसमयप्रबद्धशेषकस्यैकस्यां स्थिताववतिष्ठमानस्य द्वितीया शलाका ग्रहीतव्या। एवमेकस्थित्यामवतिष्ठमानानां समयप्रबद्धशेषकाणामेकैका शलाका ग्रहीतव्या। तथा द्वयोः स्थित्योर्यत्समयप्रबद्धशेषकं विद्यते, तस्यैका शलाका ग्रहीतव्या। पुनरन्यसमयप्रबद्धशेषकं यद् द्वयोः स्थित्योर्विद्यते, तस्य द्वितीया शलाका ग्रहीतव्या। एवं द्वयोः स्थित्योरवतिष्ठमानानां समयप्रबद्धशेषकाणामेकैका शलाका ग्रहीतव्या। एवंक्रमेणैकोत्तरवृद्ध्यापन्नस्थितिष्ववतिष्ठमानानां समयप्रबद्धशेषकाणामेकैका

शलाका ग्रहीतव्या। तत्रैकस्थित्यामवतिष्ठमानानां समयप्रबद्धशेषकाणां गृहीताः सर्वाः शलाकाः स्तोका भवन्ति। ततो द्वयोः स्थित्योरवतिष्ठमानानां समयप्रबद्धशेषकाणां गृहीताः सर्वाः शलाका विशेषाधिका भवन्ति। एवं विशेषाधिकक्रमेण पल्योपमाऽसंख्येयभागप्रमाणस्थानेषु गतेषु शलाका प्रथमस्थानापेक्षया द्विगुणा भवन्ति, इदञ्च प्रथमं द्विगुणवृद्धिस्थानम्। ततः पुनरेतावत्सु स्थानेषु व्रजितेषु शलाका द्विगुणा भवन्ति, इदञ्च द्वितीयं द्विगुणवृद्धिस्थानम्। एवंक्रमेण पल्योपमाऽसंख्येयभागप्रमाणेषु द्विगुणवृद्धिस्थानेषु व्रजितेषु यवमध्यं लभ्यते। तस्योपरि शलाका हीयमाना गच्छन्ति। पल्योपमाऽसंख्येयभागप्रमाणेषु च स्थानेषु गतेषु द्विगुणहीनाः शलाका भवन्ति। ततः पुनः पल्योपमाऽसंख्येयभागमात्रेषु स्थानेषु गतेषु शलाका द्विगुणहीना भवन्ति। एवंक्रमेण द्विगुणवृद्धिस्थानतोऽसंख्यगुणेषु द्विगुणहानिस्थानेषु गतेषु सत्सु चरमस्थानं प्राप्यते। तत्र नानाद्विगुणवृद्धिहानिस्थानानि स्तोकानि, द्विगुणवृद्धिहानिस्थानानां सर्वाः सम्पिण्डिताः शलाकाः स्तोका भवन्तीत्यर्थः, ततो विवक्षितस्थानतो यावत्सु स्थानेषु गतेषु द्विगुणवृद्धिस्थानं प्राप्यते, तान्येकान्तरसंज्ञकान्यसंख्येयगुणानि भवन्ति। एवमेव भवबद्धशेषकाणि निरवशेषं प्ररूपयितव्यानि, विशेषाभावात्। पश्यन्तु पाठका यन्त्रकम्–२२ ॥१४३॥

सम्प्रति समयप्रबद्धशेषकाणां भवबद्धशेषकाणां चाधारभूता अनाधारभूताश्च सामान्यस्थितीरसामान्यस्थितीश्च प्ररूपयिषुराह—

## सेसाणि जट्ठिईए सा सामण्णा परा असामण्णा।
## एगा इगाहिअकमा निरंतराऽऽवलिअसंखभागमिआ ॥१४४॥ (गीतिः)

शेषाणि यत्स्थितौ सा सामान्या पराऽसामान्या।
एकैकाधिकक्रमाद् निरन्तरा आवलिकाऽसंख्यभागमिताः ॥१४४॥इति पदसंस्कारः।

'**सेसाणि**' इत्यादि 'शेषाणि' समयप्रबद्धशेषकाणि भवबद्धशेषकाणि च 'यत्स्थितौ' यस्यां स्थितौ विद्यन्ते "**यत्राऽन्यत् क्रियापदं न श्रूयते तत्राऽस्तिर्भवन्तीपरः प्रयुज्यते**" इति न्यायदर्शनेन अस्तिना च भवतिर्विद्यतिरित्यादीनां ग्रहणाद् विद्यन्त इति क्रियापदाभिधानम्, सा शेषकाणामाधारभूता सामान्या स्थितिरुच्यते, तत्र समयभवप्रबद्धशेषकाख्यकर्मप्रदेशानामितरेषां च कर्मप्रदेशानां साधारणत्वेनावस्थानात्। 'परा' सामान्यतोऽन्या, यस्यां स्थितौ समयप्रबद्धशेषकाणि भवबद्धशेषकाणि च न विद्यन्ते, सा असामान्या स्थितिरुच्यत इत्यर्थः। समयप्रबद्धशेषकाणां भवबद्धशेषकाणां चाऽऽधारभूताः स्थितयः सामान्याः, तेषामनाधारभूताः स्थितयोऽसामान्या व्यपदेष्टव्या इति संक्षेपार्थः। उक्तञ्च **कषायप्राभृतचूर्णौ**—"**एक्कम्हि ठिदिविसेसे जम्हि**

Jain Education International For Private & Personal Use Only www.jainelibrary.org




एतच्चिह्नसूचितानि विवक्षितसमयप्रबद्धस्य शेषकाण्येकस्यां स्थितौ वर्तन्ते (गाथा १४२) ।

अनेन चिह्नेन सूचितानि विवक्षितसमयप्रबद्धस्य शेषकाणि द्वयोः स्थित्योरवतिष्ठन्ते ।

एतच्चिह्नसूचितानि विवक्षितसमयप्रबद्धस्य शेषकाणि तिसृषु स्थितिष्ववतिष्ठन्ते । यद्यपि विवक्षितसमयप्रबद्धशेषकाण्यधिकाधिकतराधिकतमासु स्थितिषु चिह्नान्तरैर्दर्शयितव्यानि, तथापीहाऽत्रकाशाभावाद् न दर्शितानि ।

एतच्चिह्नसूचितानि विवक्षितसमयप्रबद्धशेषकाणि समयाधिकोदयावलिकावर्जसर्वस्थितिषु वर्तन्ते ।

एतच्चिह्नसूचितस्थित्यां पल्योमा-ऽसंख्येयभागप्रमाणसमयप्रबद्धानां शेषकाणि विद्यन्ते ( गाथा १४० ) । असत्कल्पनया इदृशाः स्थितयः ७२ ।

.....=बिन्दवः शेषकतो भिन्नानि कर्मदलिकानि सूचयन्ति ।

ए=एकसमयप्रबद्धशेषकयुक्ताः स्थितयः ।

अने=अनेकसमयप्रबद्धशेषकयुक्ताः स्थितयः ।

अल्पबहुत्वम्-एकसमयप्रबद्धशेषकयुक्ताः स्थितयः स्तोकाः गाथा १४१), असत्कल्पनया चित्रे (२) स्थिती दर्शिते । ततोऽनेकसमयप्रबद्धशेषकयुक्ताः स्थितयो-ऽसंख्यगुणाः (गाथा १४१), असत्कल्पनया चित्रे १२ स्थितयो दर्शिताः । ततश्चित्रे कृष्णसमचतुरस्रप्रतरात्मकचिह्नेन सूचिताः पल्योपमाऽसंख्येयभागमात्रसमयप्रबद्धशेषकयुक्ताः स्थितयोऽसंख्यगुणाः, असत्कल्पनया चित्रे ७२ स्थितयो दर्शिताः ।

उ=समयाधिकोदयावलिका, यस्यां समयप्रबद्धशेषकाणि न विद्यन्ते । (गाथा-१४२) ।

अ=एतदक्षरसूचितस्थित्यां विवक्षितैकसमयप्रबद्धस्य शेषकाणि विद्यन्ते (गाथा १४०) ।

ब= ,, ,, ,, विवक्षितद्विसमयप्रबद्धशेषकाणि वर्तन्ते ।

स= ,, ,, ,, ,, त्रि ,, ,, ,, ,, ।

ड= ,, ,, ,, ,, चतुः,, ,, ,, ,, ।

क=प्रस्तुतचित्रं तं क्षपकमाश्रित्य दर्शितम्, यस्य क्षपकस्योत्कृष्टत एकसमयप्रबद्धशेषकाणि समयाधिकोदयावलिकावर्जासु सर्वासु स्थितिष्ववतिष्ठन्ते । तेन प्रस्तुतचित्रे वक्ष्यमाणस्वरूपाः सामान्यस्थितय एव दर्शिताः । नानाजीवेषु पुनः केषाञ्चित् क्षपकाणां सामान्यस्थितयो निरन्तरा न भवन्ति, किन्तु समयप्रबद्धशेषकविरहिताभिरसामान्यस्थितिभिरन्तरिता भवन्ति । ताश्च वक्ष्यन्ते गाथाद्वयेन ( १४४-१४५ ) ।

△ एतच्चिह्नेन सूचितशेषकाण्येकस्यां स्थितौ येषां समयप्रबद्धानाम्, ते स्तोकाः, ( गाथा १४३ ) असत्कल्पनया चित्रे ८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

★=एतच्चिह्नेन सूचितशेषकाणि द्वयोः स्थित्योर्येषां समयप्रबद्धानाम्, ते विशेषाधिकाः, असत्कल्पनया १२।

❀=एतच्चिह्नसूचितशेषकाणि तिसृषु स्थितिषु येषां समयप्रबद्धानाम्, ते विशेषाधिकाः, असत्कल्पनया १६।

येषां समयप्रबद्धानां शेषकाणि चतसृषु स्थितिषु वर्तन्ते, ते विशेषाधिकाः, असत्कल्पनया २४, चित्रे त्ववकाशाभावाद् न दर्शिताः, एवमग्रेऽपि।

येषां समयप्रबद्धानां शेषकाणि पञ्चसु स्थितिषु वर्तन्ते, ते विशेषाधिकाः, असत्कल्पनया ३२।

येषां समयप्रबद्धानां शेषकाणि षट्सु स्थितिषु वर्तन्ते, ते विशेषहीनाः, असत्कल्पनया २४।

येषां समयप्रबद्धानां शेषकाणि सप्तसु स्थितिषु वर्तन्ते, ते विशेषहीनाः, असत्कल्पनया १६।

येषां समयप्रबद्धानां शेषकाण्यष्टसु स्थितिषु वर्तन्ते; ते विशेषहीनाः, असत्कल्पनया १२।

येषां समयप्रबद्धानां शेषकाणि नवसु स्थितिषु वर्तन्ते, ते विशेषहीनाः, असत्कल्पनया ८।

येषां समयप्रबद्धानां शेषकाणि दशसु स्थितिषु वर्तन्ते, ते विशेषहीनाः, असत्कल्पनया ६।

येषां समयप्रबद्धानां शेषकाण्येकादशसु स्थितिषु वर्तन्ते, ते विशेषहीनाः, असत्कल्पनया ४।

येषां समयप्रबद्धानां शेषकाणि द्वादशसु स्थितिषु वर्तन्ते, ते विशेषहीनाः, असत्कल्पनया ३।

येषां समयप्रबद्धानां शेषकाणि त्रयोदशसु स्थितिषु वर्तन्ते, ते विशेषहीनाः, असत्कल्पनया २।

| | | | | | |
|---|---|---|---|---|---|
| ययोः | समयप्रबद्धयोः | शेषकाणि | त्रयोदशस्थितिषु, | तौ | २ |
| येषां | समयप्रबद्धानां | ,, | द्वादश ,, | ते | ३ |
| ,, | ,, | ,, | एकादश ,, | ,, | ४ |
| ,, | ,, | ,, | दश ,, | ,, | ६ |
| ,, | ,, | ,, | नव ,, | ,, | ८ |
| ,, | ,, | ,, | अष्ट ,, | ,, | १२ |
| ,, | ,, | ,, | सप्त ,, | ,, | १६ |
| ,, | ,, | ,, | षट् ,, | ,, | २४ |
| ,, | ,, | ,, | पञ्च ,, | ,, | ३२ |
| ,, | ,, | ,, | चतुः ,, | ,, | २४ |
| ,, | ,, | ,, | त्रि ,, | ,, | १६ |
| ,, | ,, | ,, | द्वयोः स्थित्योः, | ते | १२ |
| ,, | ,, | ,, | एकस्थितौ, | ते | ८ |




इहाऽऽवलिकाऽसंख्येयभागः समयद्वयप्रमाणः कल्पितः, तेन प्रथमस्थानतः स्थानद्वये गते द्विगुणाः समयप्रबद्धाः षोडश (१६) भवन्ति। पुनः स्थानद्वये गते समयप्रबद्धा द्वात्रिंशत् (३२) भवन्ति। आवलिकाऽसंख्येयभागमात्रेषु द्विगुणवृद्धिस्थानेषु गतेष्वसत्कल्पनया द्वितीयद्विगुणवृद्धिस्थाने यवमध्यं लभ्यते। यवमध्यस्योपर्येकोत्तरवृद्धयाऽनन्तस्थितिषु समयप्रबद्धा विशेषहीनक्रमेण तावद् गच्छन्ति, यावद् वर्षपृथक्त्वस्थानेष्वसत्कल्पनयाऽष्टमस्थाने चरमस्थानं प्राप्यते। यवमध्यत उपर्यावलिकाऽसंख्येयभागप्रमाणस्थानेषु गतेष्वसत्कल्पनया स्थानद्वये गते द्विगुणहीनाः समयप्रबद्धाः षोडश (१६) भवन्ति, पुनरेतावत्सु स्थानेषु गतेषु समयप्रबद्धा द्विगुणहीना भवन्ति। एवं क्रमेण तावद्वाच्याः, यावच्चरमस्थानम्।

**समयपबद्धसेसयमत्थि, सा ट्ठिदी सामण्णा त्ति णादव्वा। जम्मि णत्थि, सा ट्ठिदी असामण्णा त्ति णादव्वा।**" इति।

अथ जघन्यत उत्कृष्टतश्च निरन्तरं कियत्योऽसामान्यस्थितयो भवन्ति ? इति परप्रश्नमुत्तरयितुं भणति–'**एगा**' त्ति 'एका' जघन्यत एकाऽसामान्या स्थितिर्भवति, न च जघन्यतः सामान्या स्थितिरेका भवतीत्यर्थोऽत्र कुतो न गृह्यते ? इति वाच्यम्, प्रत्यासत्त्याऽसामान्यस्थितेरेव ग्रहणसंभवात्। '**इगादिअकमा**' इत्यादि, तत एकाधिकक्रमाद् 'निरन्तराः' सामान्यस्थितिभिरनन्तरिता उत्कृष्टतः क्षपकस्याऽऽवलिकाऽसंख्येयभागमिता असामान्यस्थितयो भवन्ति, न ततोऽधिकाः। अयम्भावः–द्वयोः पार्श्वयोरेकस्यामनेकासु वा सामान्यस्थितिषु सतीषु मध्ये जघन्यत एकाऽसामान्यस्थितिर्भवति, पुनर्द्वयोः पार्श्वयोरेकस्यामनेकासु वा सामान्यस्थितिषु सतीषु मध्ये द्वेऽसामान्यस्थिती निरन्तरं भवतः। पुनर्द्वयोः पार्श्वयोरेकस्यामनेकासु वा सामान्यस्थितिषु सतीषु मध्ये तिस्रोऽसामान्यस्थितयो निरन्तरं भवन्ति, एवमेकोत्तरवृद्ध्योत्कृष्टतो निरन्तरं क्षपकस्याऽऽवलिकाऽसंख्येयभागप्रमिता असामान्याः स्थितयो भवन्ति, न ततोऽधिकाः, आवलिकाऽसंख्येयभागे च गते नियमतः सामान्यस्थितीनां सद्भावात्। उक्तञ्च **कषायप्राभृतचूर्णौ—"एवमसामण्णाओ ट्ठिदीओ एक्का वा दो वा उक्कस्सेण अणुबद्धाओ आवलियाए असंखेज्जदिभागमेत्तीओ।**" इति।

अत्र चोदक आह–ननु **द्वाचत्वारिंशदुत्तरशततम**गाथायां जघन्यत एकस्थितौ समयप्रबद्धशेषकाणि भवप्रबद्धशेषकाणि च विद्यन्त इत्युक्तम्। ततः पारिशेष्यात् क्षपकस्य भवसमयप्रबद्धशेषकै रहिता भवसमयप्रबद्धानामनाधारभूता असामान्याः स्थितयो निरन्तरमुत्कृष्टतो वर्षपृथक्त्वमात्र्यः संभवन्ति, क्षपकस्य वर्षपृथक्त्वमात्रस्थितिकत्वात्, आवलिकाऽसंख्येयभागप्रमाणा एव उत्कृष्टतः कुतो निरूप्यते ? इति, अत्रोच्यते-नैष दोषः, **द्वाचत्वारिंशदधिकशततमगाथायां** ह्येकसमयप्रबद्धस्यैकभवप्रबद्धस्य च शेषकमाश्रित्य तथा प्ररूपितम्, अत्र तु नानासमयप्रबद्धानां नानाभवबद्धानां चापि शेषकाण्याश्रित्य निरन्तरमावलिकाऽसंख्येयभागमिता एव उत्कृष्टतोऽसामान्यस्थितयो भवन्तीति प्ररूप्यते। अयं भावः–जघन्यत एकसमयप्रबद्धस्यैकभवप्रबद्धस्य च शेषकाण्येकस्यां स्थितौ वर्तन्ते, शेषासु स्थितिषु निरुक्तसमयप्रबद्धस्य निरुक्तभवप्रबद्धस्य च शेषकाणि न विद्यन्त इत्युक्तं **द्वाचत्वारिंशदधिकशततमगाथायाम्**, न तत्र यथासंभवं नानाभवसमयप्रबद्धशेषकाणामनेकस्थितिष्ववस्थानस्य निषेधः प्रतिपादितः। असामान्यस्थितयस्त्वेकभवसमयप्रबद्धनानाभवसमयप्रबद्धानां शेषकाणामभाव एव व्यपदिश्यन्ते। इत्थं विवक्षितैकसमयप्रबद्धस्य शेषकाणां जघन्यत एकस्थितौ सद्भावेन शेषासु स्थितिषु तदभावेऽपि यथासंभवं विवक्षितभवसमयप्रबद्धतो भिन्नैकभवसमयप्रबद्धनानाभवसमयप्रबद्धानां शेषकाणामप्रतिषेधादुत्कृष्टतो वर्षपृथक्त्वमात्र्योऽसामान्यस्थितयो न लभ्यन्ते, किन्तूत्कृष्टतो निरन्तरमावलिकाऽसंख्येयभागप्रमाणा एव प्राप्यन्ते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्षपकस्य तूत्कृष्टतो निरन्तरं पल्योपमाऽसंख्येयभागमिता असामान्याः स्थितयो वर्तन्ते, न त्वावलिकाऽसंख्येयभागप्रमाणाः। उक्तञ्च कषायप्राभृतचूर्णावक्षपकप्ररूपणाऽवसरे— **असामण्णाओ ट्ठिदीओ एक्का वा दो वा तिण्णि वा, एवमणुबद्धाओ उक्कस्सेण पलिदोवमस्स असंखेज्जदिभागो।**" इति। इदमुक्तं भवति–उभयोः पार्श्वयोरेकस्यामनेकासु वा सामान्यस्थितिषु सतीषु मध्ये जघन्यत एकाऽसामान्यस्थितिर्भवति, पुनर्द्वयो पार्श्वयोरेकस्यामनेकासु वा सामान्यस्थितिषु सतीषु मध्ये द्वेऽसामान्यस्थिती भवतः। एवंक्रमेण द्वयोः पार्श्वयोरेकस्यामनेकासु वा सामान्यस्थितिषु सतीषु मध्ययुत्कृष्टतः पल्योपमाऽसंख्येयभागमिता असामान्यस्थितयो भवन्ति ॥१४४॥

अथ निरन्तराऽसामान्यस्थितीनामल्पबहुत्वं व्याजिहीर्षुराह—

**एक्केक्केणं थोवा ताअ कमेणं विसेसअहिआओ।**
**आवलिअसंखभागे दुगुणा तह होइ जवमज्झं ॥१४५॥**

एकैकेन स्तोकास्ताः क्रमेण विशेषाधिकाः।
आवलिकाऽसङ्ख्यभागे द्विगुणास्तथा भवति यवमध्यम् ॥१४३॥ इति पदसंस्कारः।

'एक्केक्केण' इत्यादि (१) 'एकैकेन' एकैकरूपेण स्तोकाः, काः ? इत्याह–'**ताअ**' त्ति ताः–असामान्यस्थितयः, तच्छब्देन प्रत्यासत्त्याऽसामान्यस्थितेः परामर्शात् '**कमेणं**' इत्यादि, क्रमेण विशेषाधिका असामान्यस्थितयो भवन्ति, द्विकेन विशेषाधिका भवन्ति, त्रिकेण विशेषाधिका भवन्ति, एवमेकोत्तरवृद्ध्यावत्ताऽसामान्यस्थितयो विशेषाधिका विशेषाधिका भवन्तीत्यर्थः।

'**आवलि०**'इत्यादि, 'आवलिका-ऽसंख्यभागे' आवलिकाऽसंख्येयभागे गतेऽसामान्यस्थितयो द्विगुणा भवन्ति। आवलिकाऽसंख्येयभागप्रमाणेषु च द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते। तदेव प्राह–'**तह**' इत्यादि, तथा यवमध्यं भवति, आवलिकाऽसंख्येयभागमात्रेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यत इत्यर्थः। उक्तञ्च कषायप्राभृतचूर्णौ—"**एक्केक्केण असामण्णाओ थोवाओ, दुगेण विसेसाहियाओ, तिगेण विसेसाहियाओ। आवलियाए असंखेज्जदिभागे दुगुणाओ। आवलियाए असंखेज्जदिभागे जवमज्झं।**" इति। भावार्थः पुनरयम्–क्षपकस्य स्थितिसत्कर्म वर्षपृथक्त्वप्रमितं भवति। तत्र द्वयोः पार्श्वयोरेका वाऽनेका वा सामान्यस्थितयो भवन्ति, मध्ये चैकाऽसामान्यस्थितिर्विद्यते, तस्या एका शलाका ग्रहीतव्या। पुनर्द्वयोः पार्श्वयोरेकस्यामनेकासु वा सामान्यस्थितिषु सतीषु मध्येऽन्यैकाऽसामान्यस्थितिर्वर्तते, तस्या द्वितीयैका शलाकाऽऽदातव्या। एवंक्रमेणैकैकाऽसामान्यस्थितेरेकैका शलाका ग्रहीतव्या। एवमुभयोः पार्श्वयोरेकाऽनेका वा सामान्यस्थितयो भवन्ति, मध्ये च निरन्तरं द्वेऽसामान्यस्थिती

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवतः, तयोरेका शलाका ग्रहीतव्या। ततः पुनर्द्वयोः पार्श्वयोरेकाऽनेका वा सामान्यस्थितयो भवन्ति, मध्ये च निरन्तरमन्ये द्वे-ऽसामान्यस्थिती भवतः, तयोर्द्वितीयैका शलाका ग्रहीतव्या। उक्तरीत्याऽसामान्यस्थितिद्विकानामेकैका शलाका ग्रहीतव्या। एवमेकोत्तरवृद्ध्याऽऽवलिकाऽसंख्येयभागमात्रीणामसामान्यस्थितीनामेकैका शलाका ग्रहीतव्या। तत्रैकैकरूपेण या असामान्यस्थितयो भवन्ति, तासां गृहीताः सर्वाः शलाकाः स्तोका भवन्ति, ताश्च शलाका आवलिकाऽसंख्येयभागप्रमाणा भवन्ति। ततो द्विकरूपेण या असामान्यस्थितयः, तासां गृहीताः सर्वाः शलाका विशेषाधिका भवन्ति, आधिक्यं चावलिकाऽसंख्येयभागेन प्रथमपदगतशलाकाः खण्डयित्वैकखण्डेन बोध्यम्, आवलिकाऽसंख्येयभागे गते द्विगुणवृद्धिकथनात्। ततस्त्रिकस्वरूपेण विद्यमानानामसामान्यस्थितीनां सर्वाः शलाका विशेषाधिका भवन्ति। ततश्चतुष्करूपेण विद्यमानानामसामान्यस्थितीनां सर्वाः शलाकाः विशेषाधिका भवन्ति। एवमेकोत्तरवृद्ध्यापन्ननिरन्तराऽसामान्यस्थितीनां शलाका विशेषाधिकक्रमेण तावद् गच्छन्ति, यावद् यवमध्यम्। प्रथमस्थानात आवलिकाऽसंख्येयभागमात्रेषु विशेषाधिकस्थानेषु गतेषु निरन्तरा-ऽसामान्यस्थितीनां गृहीताः सर्वाः शलाकाः प्रथमस्थानापेक्षया द्विगुणा भवन्ति, इदं चाऽऽद्यं द्विगुणवृद्धिस्थानम्। ततः पुनरावलिकाऽसंख्येयभागमात्रेषु स्थानेषु व्रजितेषु प्रथमद्विगुणवृद्धिस्थानतोऽसामान्यस्थितीनां शलाका द्विगुणा भवन्ति, प्रथमस्थानतश्च चतुर्गुणाः, इदं च द्वैतीयीकं द्विगुणवृद्धिस्थानम्। ततः पुनरावलिकाऽसंख्येयभागप्रमाणेषु स्थानेषु गतेषु द्वितीयद्विगुणवृद्धिस्थानतो निरन्तराऽसामान्यस्थितीनां शलाका द्विगुणा भवन्ति, इदं च तृतीयं द्विगुणवृद्धिस्थानम्। एवंक्रमेणाऽऽवलिकाऽसंख्येयभागमात्रेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते। यवमध्येऽपि निरन्तरावलिकाऽसंख्येयभागप्रमाणाऽसामान्यस्थितीनां सर्वाः शलाका आवलिकाऽसंख्येयभागप्रमाणा एव भवन्ति। ततो यवमध्यस्योपर्येकोत्तरक्रमेण वृद्धानां निरन्तरा-ऽसामान्यस्थितीनां शलाका विशेषहीनक्रमेण गच्छन्ति, आवलिकाऽसंख्येयभागमात्रेषु च स्थानेषु गतेषु शलाका द्विगुणहीना भवन्ति, इदं च प्रथमं द्विगुणहानिस्थानम्। ततः पुनरेतावत्सु स्थानेषु गतेषु निरन्तराऽसामान्यस्थितीनां शलाका द्विगुणहीना भवन्ति, इदं च द्वितीयं द्विगुणहानिस्थानम्। एवंक्रमेणाऽसंख्यातेषु द्विगुणहानिस्थानेषु गतेषु प्रथमस्थानगतनिरन्तराऽसामान्यस्थितीनां शलाकाभिः समानाः शलाकाः प्राप्यन्ते, ततोऽप्युपर्येकोत्तरक्रमेण वृद्धानां निरन्तराऽसामान्यस्थितीनां शलाका हीयमाना गच्छन्ति, यावच्चरमस्थानस्य शलाकाः प्राप्यन्ते। ताश्चाऽऽवलिकाऽसंख्येयभागप्रमाणा भवन्त्यः सर्वस्तोका भवन्ति। तथा सर्वाण्यपि स्थानान्यावलिकाऽसंख्येयभागमात्राणि भवन्ति। असत्कल्पनया निरन्तरैकैकाऽसामान्यस्थितीनां शलाकाः सर्वसंख्ययाऽष्टौ, ततो विशेषाधिका निरन्तराऽसामान्यस्थितिद्विकानां शलाका द्वादश, ततो विशेषाधिका निरन्तराऽसामान्यस्थितित्रिकाणां शलाकाः षोडश, ततो विशेषाधिका निरन्तराऽसामान्यस्थितिचतुष्काणां शलाका चतुर्विंशतिः, ततो विशेषाधिका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरन्तराऽसामान्यस्थितिपञ्चकानां शलाका द्वात्रिंशत् । अत्र चाऽसत्कल्पनया यवमध्यमम् । ततो विशेषहीना निरन्तराऽसामान्यस्थितिषट्कानां शलाकाश्चतुर्विंशतिः, ततो विशेषहीना निरन्तराऽसामान्यस्थितिसप्तकानां शलाकाः षोडश, ततो विशेषहीना निरन्तराऽसामान्यस्थित्यष्टकानां शलाका द्वादश, ततो विशेषहीना निरन्तराऽसामान्यस्थितिनवकानां शलाका अष्टौ, ततो विशेषहीना निरन्तराऽसामान्यस्थितिदशकानां शलाकाः षट् । ततो विशेषहीना निरन्तराऽसामान्यस्थित्येकादशकानां शलाकाश्चतस्रः । ततो विशेषहीना निरन्तरा-ऽसामान्यस्थितिद्वादशकानां शलाकास्तिस्रः, ततो विशेषहीना निरन्तराऽसामान्यस्थितित्रयोदशकानां शलाके द्वे । परमार्थतो द्विगुणवृद्धिस्थानान्तरमावलिकाऽसंख्येयभागमात्रम्, असत्कल्पनया पुनः स्थानद्वयमात्रं परिकल्पितम् । तेन प्रथमस्थानतः स्थानद्वये गते शलाका द्विगुणा षोडश भवन्ति, ततः पुनः स्थानद्वये गते द्विगुणा द्वात्रिंशद् । अत्र चाऽसत्कल्पनया यवमध्यम्, यतः परमार्थत आवलिकाऽसंख्येयभागमात्रेषु द्विगुण-वृद्धिस्थानेषु गतेषु सत्सु यवमध्यं प्राप्यते, असत्कल्पनया पुनर्द्विगुणवृद्धिस्थानद्वये गते यवमध्यं लभ्यते । यवमध्यस्योपरि स्थानद्वये गते शलाका द्विगुणहीनाः षोडश भवन्ति, ततः पुनः स्थानद्वये गते शलाका द्विगुणहीना अष्टौ भवन्ति, ततः पुनः स्थानद्वये गते शलाका द्विगुणहीनाश्चतस्रो भवन्ति । एवमग्रेऽपि । निरन्तरा-ऽसामान्यस्थितित्रयोदशकानां परमार्थतस्त्वावलिकाऽसंख्येयभाग-प्रमाणानामसामान्यस्थितीनां शलाकाश्चरमस्थानम् ।

यवमध्यस्य चित्रम्




Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्षपकस्याऽप्यसामान्यस्थितीनां प्ररूपणैवमेव कर्तव्या, नवरं पल्योपमाऽसंख्येयभागमात्रेषु स्थानेषु द्विगुणवृद्धिर्द्विगुणहानिर्वा भवति, न त्वावलिकाऽसंख्येयभागप्रमितेषु स्थानेषु गतेषु। एवं पल्योपमाऽसंख्येयभागमात्रेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते, तथा सर्वाणि स्थानानि पल्योपमाऽसंख्येयभागमितानि भवन्ति ।

(२) अथवा 'एक्केक्केण थोवा' इत्यादीनामक्षरैरेकैकेन सामान्यस्थितिस्थानकेनाऽन्तरितानामसामान्यस्थितीनां शलाकाः स्तोका भवन्तीत्याद्यर्थो व्याख्येयः । तथाहि–द्वयोः पार्श्वयोरेकैका सामान्यस्थितिर्विद्यते, मध्ये चैकाऽसामान्यस्थितितः प्रभृति यावत्योऽसामान्यस्थितयो भवन्ति, तासां सर्वासामेका शलाका ग्रहीतव्या। पुनरन्यत्र द्वयोः पार्श्वयोरेकैका सामान्यस्थितिर्भवति, मध्ये चैका वाऽनेका वा यावत्योऽसामान्यस्थितयो भवन्ति, तासां द्वितीयैका शलाका ग्रहीतव्या । एवमेकैकया सामान्यस्थित्याऽन्तरितानामसामान्यस्थितीनामेकैका शलाका ग्रहीतव्या। तत उभयोः पार्श्वयोर्द्वे द्वे सामान्यस्थिती भवतः, मध्ये च यावत्योऽसामान्यस्थितयो भवन्ति, तासामेका शलाका ग्राह्या। पुनरन्यत्रोभयतोऽन्ये द्वे द्वे सामान्यस्थिती भवतः, मध्ये च यावत्योऽसामान्यस्थितयो विद्यन्ते, तासां द्वितीयैका शलाका ग्रहीतव्या । एवं द्वाभ्यां द्वाभ्यां सामान्यस्थितिभ्यामन्तरितानामसामान्यस्थितीनामेकैका शलाका ग्रहीतव्या । इत्थमेकोत्तरक्रमेण वृद्धाभिः सामान्यस्थितिभिरन्तरितानामसामान्यस्थितीनामेकैका शलाका ग्रहीतव्या ।

तत्रैकैकया सामान्यस्थित्याऽन्तरितानामसामान्यस्थितीनां संपिण्डिताःसर्वाः शलाकाः स्तोका भवन्ति, द्वाभ्यां द्वाभ्यां सामान्यस्थितिभ्यामन्तरितानामसामान्यस्थितीनां गृहीताः सर्वाः शलाका विशेषाधिका भवन्ति। आधिक्यं चाऽधस्तनशलाका आवलिकाऽसंख्येयभागेन खण्डयित्वैकखण्डेन ज्ञातव्यम्, आवलिकाऽसंख्येयभागे गते द्विगुणवृद्धेः । ततोऽपि तिसृभिस्तिसृभिः सामान्यस्थितिभिरन्तरितानामसामान्यस्थितीनां गृहीताः सर्वाः शलाका विशेषाऽधिका भवन्ति । एवमावलिकाऽसंख्येयभागप्रमाणेषु स्थानेषु गतेषु तत्रत्यस्थानेऽसामान्यस्थितीनां गृहीताः सर्वाः शलाकाः प्रथमस्थानतो द्विगुणा भवन्ति, इदं च प्रथमं द्विगुणवृद्धिस्थानम्। ततः पुनरावलिकाऽसंख्येयभागप्रमाणेषु स्थानेषु गतेषु तत्रत्यस्थानेऽसामान्यस्थितीनां शलाका द्विगुणा भवन्ति, इदं च द्वितीयं द्विगुणवृद्धिस्थानम्। एवंक्रमेणाऽऽवलिकाऽसंख्येयभागप्रमाणेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते। ततो यवमध्यस्योपरि विशेषहीनक्रमेण शलाका गच्छन्ति । यवमध्यतश्चावलिकाऽसंख्येयभागमात्रेषु स्थानेषु गतेषु शलाका द्विगुणहीना भवन्ति । इदं चाद्यं द्विगुणहानिस्थानम्। ततः पुनरावलिकाऽसंख्येयभागप्रमाणेषु स्थानेषु गतेषु तत्रत्यस्थानेऽसामान्यस्थितीनां शलाका द्विगुणहीना भवन्ति, इदं च द्वितीयं द्विगुणहानिस्थानम् । एवंक्रमेण यवमध्यस्याधस्तनद्विगुणवृद्धिस्थानतोऽसंख्येयगुणेषु द्विगुणहानिस्थानेषु गतेषु चरमस्थानं प्राप्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्षपकस्याऽप्येकसामान्यस्थितितः प्रभृत्येकोत्तरक्रमेण वृद्धाभिः सामान्यस्थितिभिरन्तरितानामसामान्यस्थितीनां निरूपणं क्षपकवत् कर्तव्यम् , नवरं पल्योपमाऽसंख्येयभागे गतेऽसामान्यस्थितीनां शलाका द्विगुणवृद्धा द्विगुणहीना वा भवन्ति, पल्योपमाऽसंख्येयभागे च गते यवमध्यं प्राप्यत इति वक्तव्यम् ।

(३) यद्विवेदं व्याख्यानान्तरं कर्तव्यम्—'**एक्केक्केणं**' इत्यादि, एकैकेन स्तोकाः । काः ? ताः= सामान्यस्थितयः, "**विचित्रा सूत्राणां शैली**" इति न्यायेन व्यवहितस्याऽपि **चतुश्चत्वारिंशदधिकशततम**गाथोक्तसामान्यस्थितिपदस्य तच्छब्देन परामर्शात् । इदमत्र हृदयम्—उभयोः पार्श्वयोरेका वाऽनेका वा–ऽसामान्यस्थितयो भवन्ति, मध्ये चैकसामान्यस्थितिर्विद्यते, तस्या एका शलाका ग्रहीतव्या । ततः पुनरुभयोः पार्श्वयोरेका वाऽनेका वा ऽसामान्यस्थितयो भवन्ति, मध्ये चाऽन्यैका सामान्यस्थितिर्भवति, तस्या द्वितीयैका शलाका ग्रहीतव्या । एवमसामान्यस्थितीनां मध्ये स्थिताया एकैकस्याः सामान्यस्थितेरेकैका शलाका ग्रहीतव्या । एवमेव द्वयोः पार्श्वयोरेका वाऽनेका वाऽसामान्यस्थितयो भवन्ति, मध्ये च निरन्तरे द्वे सामान्यस्थिती भवतः, तयोरेका शलाका ग्रहीतव्या । पुनरन्यत्र द्वयोः पार्श्वयोरेका वाऽनेका वाऽसामान्यस्थितयो भवन्ति, मध्ये च निरन्तरेऽन्ये द्वे सामान्यस्थिती भवतः, तयोरेका द्वितीया शलाका ग्रहीतव्या । एवं निरन्तरसामान्यस्थितिद्विकानामेकैका शलाका ग्राह्या । ततो निरन्तरसामान्यस्थितित्रिकाणामेकैका शलाका ग्राह्या । ततो निरन्तरसामान्यस्थितिचतुष्काणामेकैका शलाका ग्रहीतव्या । एवमेकोत्तरक्रमेण वृद्धानां निरन्तरसामान्यस्थितीनामेकैका शलाका ग्रहीतव्या ।

तत्रैकैकरूपेण विद्यमानानां सामान्यस्थितीनां गृहीताः सर्वाः शलाकाः स्तोकाः । '**कमेणं**' इत्यादि, द्विकरूपेण विद्यमानानां सामान्यस्थितीनां शलाका विशेषाधिका भवन्ति । आधिक्यं चाऽधस्तनशलाका आवलिकाऽसंख्येयभागेन विभज्यैकखण्डेन ज्ञातव्यम् , आवलिकाऽसंख्येयभागे गते द्विगुणवृद्धेः । ततोऽपि त्रिकरूपेण स्थितानां सामान्यस्थितीनां गृहीताः सर्वाः शलाका विशेषाधिका भवन्ति । एवमेकोत्तरवृद्धिक्रमेण निरन्तरं स्थितानां सामान्यस्थितीनां शलाका विशेषाधिकक्रमेण गच्छन्ति । आवलिकाऽसंख्येयभागमात्रेषु च स्थानेषु गतेषु तत्रत्यस्थानस्य शलाकाः प्रथमस्थानतो द्विगुणवृद्धा भवन्ति, इदं चाद्यं द्विगुणवृद्धिस्थानम् । ततः पुनरेतावत्सु स्थानेषु गतेषु तत्रत्यस्थाने निरन्तरसामान्यस्थितीनां शलाका द्विगुणा भवति, इदं च द्वितीयं द्विगुणवृद्धिस्थानम् । एवंक्रमेणाऽऽवलिकाऽसंख्येयभागप्रमितेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते । अथ यवमध्यस्योपर्येकोत्तरक्रमेण वृद्धानां निरन्तरसामान्यस्थितीनां शलाका विशेषहीनक्रमेण गच्छन्ति । यवमध्यस्य चोपर्यावलिकाऽसंख्येयभागप्रमाणेषु स्थानेषु गतेषु तत्रत्यस्थाने निरन्तरसामान्यस्थितीनां शलाका द्विगुणहीनाः, अर्धा भवन्तीत्यर्थः । इदं च प्रथमं द्विगुणहानिस्था-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नम् । ततः पुनरेतावत्सु स्थानेषु गतेषु निरन्तरसामान्यस्थितीनां शलाका द्विगुणहीनाः, इदं च द्वितीयं द्विगुणहानिस्थानम् । एवंक्रमेणाऽसंख्यातेषु द्विगुणहानिस्थानेषु गतेषु चरमस्थानं प्राप्यते ।

अक्षपकस्याऽप्यसामान्यस्थितिभिरन्तरितानामेकादिनिरन्तरसामान्यस्थितीनां शलाकाः क्षपकवत् प्ररूपयितव्याः, नवरं पल्योपमाऽसंख्येयभागे गते शलाकानां द्विगुणवृद्धत्वं द्विगुणहीनत्वं च वाच्यम्, पल्योपमाऽसंख्येयभागे च व्रजिते यवमध्यं वक्तव्यम्, न त्वावलिकाऽसंख्येयभागे ।

(४) अथवा 'एक्केक्केण थोवा' इत्याद्यक्षरैरेकैकेनाऽसामान्यस्थितिस्थानेनाऽन्तरितानां क्षपकस्य सामान्यस्थितीनां शलाकाः स्तोका भवन्तीत्याद्यर्थो व्याख्येयः । तथाहि—द्वयोः पार्श्वयोरेकैकाऽसामान्यस्थितिर्विद्यते, मध्ये चैकसामान्यस्थितितः प्रभृति यावत्यः सामान्यस्थितयो विद्यन्ते,तासामेका शलाका ग्रहीतव्या । ततः पुनर्द्वयोः पार्श्वयोरन्यैकैकाऽसामान्यस्थितिर्विद्यते, मध्ये च यावत्यः सामान्यस्थितयो वर्तन्ते, तासां द्वितीयैका शलाका ग्राह्या । एवमेकैकयाऽसामान्यस्थित्याऽन्तरितानां सामान्यस्थितीनामेकैका शलाका ग्राह्या । ततः पुनर्द्वयोः पार्श्वयोर्द्वे द्वेऽसामान्यस्थिती भवतः, मध्ये च यावत्यः सामान्यस्थितयस्तिष्ठन्ति, तासामेका शलाका ग्रहीतव्या । पुनर्द्वयोः पार्श्वयोरन्ये द्वेऽसामान्यस्थिती भवतः, मध्ये च यावत्यः सामान्यस्थितयो वर्तन्ते, तासां द्वितीयैका शलाका ग्रहीतव्या । एवं द्वाभ्यां द्वाभ्यामसामान्यस्थितिभ्यामन्तरितानां सामान्यस्थितीनामेकैका शलाका ग्रहीतव्या । एवमेकोत्तरक्रमेण वृद्धाभिरसामान्यस्थितिभिरन्तरितानां सामान्यस्थितीनामेकैका शलाका ग्रहीतव्या ।

तत्रैकैकयाऽसामान्यस्थित्याऽन्तरितानां सामान्यस्थितीनां गृहीताः सर्वाः शलाकाः स्तोका भवन्ति । ततो द्वाभ्यां द्वाभ्यामसामान्यस्थितिभ्यामन्तरितानां सामान्यस्थितीनां संगृहीताः सर्वाः शलाका विशेषाधिका भवन्ति । आधिक्यं चाधस्तनशलाका आवलिकाऽसंख्येयभागेन खण्डयित्वैकखण्डेन बोद्धव्यम् । ततस्तिसृभिस्तिसृभिः सामान्यस्थितिभिरन्तरितानां सामान्यस्थितीनां संगृहीताः सर्वाः शलाका विशेषाधिका भवन्ति । एवमावलिकाऽसंख्येयभागप्रमाणेषु स्थानेषु गतेषु तत्रत्यस्थानस्य गृहीताः सर्वाः शलाकाः प्रथमस्थानतो द्विगुणा भवन्ति,इदं चाद्यं द्विगुणवृद्धिस्थानम् । ततः पुनरावलिकाऽसंख्येयभागप्रमाणेषु स्थानेषु व्रजितेषु तत्रत्यस्थानस्य गृहीताः सर्वाः शलाका द्विगुणा भवन्ति, इदं च द्वितीयं द्विगुणवृद्धिस्थानम् । एवंक्रमेणा-ऽऽवलिकाऽसंख्येयभागप्रमाणेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते । ततो यवमध्यस्योपरि विशेषहीनक्रमेण शलाका गच्छन्ति । यवमध्यतश्चावलिकाऽसंख्येयभागे गते शलाका द्विगुणहीना भवन्ति । ततः पुनरावलिकाऽसंख्येयभागे गते शलाका द्विगुणहीना भवन्ति ।एवंक्रमेण यवमध्यस्याऽधस्तनद्विगुणवृद्धिस्थानतोऽसंख्येयगुणेषु द्विगुणहानिस्थानेषु गतेषु चरमस्थानं प्राप्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्षपकस्याप्यसामान्यस्थितिभिरन्तरितानां सामान्यस्थितीनां प्ररूपणा क्षपकवद्विधेया, नवरं पल्योपमाऽसंख्येयभागे द्विगुणावृद्धा द्विगुणहीना वा सामान्यस्थितीनां शलाका भवन्ति। पल्योपमाऽसंख्येयभागे च गते यवमध्यं प्राप्यते, न त्वावलिकाऽसंख्येयभाग इति वक्तव्यम्। तथाहि–एकैकयाऽसामान्यस्थित्याऽन्तरितानां सामान्यस्थितीनां शलाकाः स्तोकाः, ततो द्वाभ्यां द्वाभ्यामसामान्यस्थितिभ्यामन्तरितानां सामान्यस्थितीनां शलाका विशेषाधिका भवन्ति। एवं पल्योपमाऽसंख्येयभागमात्रेषु स्थानेषु गतेषु प्रथमस्थानतः शलाका द्विगुणवृद्धा भवन्ति, एवंक्रमेण पल्योपमासंख्येयभागमात्रेषु द्विगुणवृद्धिस्थानेषु गतेषु द्वयोः पार्श्वयोः पल्योपमाऽसंख्येयभागप्रमिताभिरसामान्यस्थितिभिरन्तरितानां सामान्यस्थितीनां शलाका यवमध्यमुत्पादयति। ततो यवमध्यस्योपर्येकोत्तरवृद्ध्यापन्नाऽसामान्यस्थितिभिरन्तरितानां सामान्यस्थितीनां शलाका विशेषहीनक्रमेण गच्छन्ति। यवमध्यतश्च पल्योपमासंख्येयभागे गते शलाका द्विगुणहीना भवन्ति। ततः पुनः पल्योपमाऽसंख्येयभागे गते शलाका द्विगुणहीना भवन्ति। एवंक्रमेण तावद्वक्तव्यम्, यावद्यवमध्यस्याऽधस्तनस्थानतोऽसंख्यातगुणेषु स्थानेषु गतेषु चरमस्थानं प्राप्यते। चरमस्थाने च पल्योपमाऽसंख्येयभागप्रमाणाऽसामान्यस्थितिभिरन्तरितानां सामान्यस्थितीनां शलाकाः सर्वस्तोका भवन्ति।

अत्राऽक्षपकस्य नानाद्विगुणवृद्धिहानिस्थानानि स्तोकानि भवन्ति। ततो द्वयोर्द्विगुणवृद्ध्योर्द्विगुणहान्योर्वाऽन्तरे यानि स्थानानि, तान्यसंख्येयगुणानि ज्ञातव्यानि। उक्तञ्च **कषायप्राभृतचूर्णावक्षपकप्रस्तावे–"सामण्णट्ठिदीओ एक्कंतरिदाओ थोवाओ, दुअंतरिदा विसेसाहिया। एवं गंतूण पलिदोवमस्स असंखेज्जदिभागे [जवमज्झं]। णाणागुणहाणिसलागाणि थोवाणि, एक्कंतरमसंखेज्जगुणं।"** इति। इदमुक्तं भवति–प्रथमस्थानतः पल्योपमाऽसंख्येयभागमात्रेषु स्थानेषु गतेषु प्रथमं द्विगुणवृद्धिस्थानं प्राप्यते, तस्यैका शलाका ग्रहीतव्या, ततः पुनस्तावन्मात्रेषु स्थानेषु गतेषु द्वितीयं द्विगुणवृद्धिस्थानं लभ्यते। तस्यैका द्वितीया शलाका ग्रहीतव्या, एवमेकैकस्य द्विगुणवृद्धिस्थानस्यैकैका शलाका ग्राह्या। तथा यवमध्यस्योपरि पल्योपमाऽसंख्येयभागे गत एकैकं द्विगुणहानिस्थानं प्राप्यते। तस्यैकैका शलाका ग्रहीतव्या। तत्र द्विगुणवृद्धिहानिस्थानानां सम्पिण्डिताः सर्वाः शलाकाः स्तोका भवन्ति। ततो द्वयोर्द्विगुणवृद्ध्योर्द्विगुणहान्योर्वाऽन्तरे यानि स्थानानि, तान्यसंख्येयगुणानि भवन्ति, विवक्षितस्थानतो यावत्सु स्थानेषु गतेष्वेकं द्विगुणवृद्धिस्थानं द्विगुणहानिस्थानं वा प्राप्यते, तावन्ति द्वयोर्द्विगुणहान्योर्द्विगुणवृद्ध्योर्वाऽपान्तरालवर्तीन्येकान्तरसंज्ञकानि स्थानानि भवन्ति, तानि च पूर्वतोऽसंख्येयगुणानि भवन्तीत्यर्थः ॥१४५॥

अथ क्षपकतोऽक्षपकस्य योऽविशेषः, तं विभणिषुरन्यच्च प्रतिजिज्ञासुराह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**संपइ अभव्वपाउग्गे आवलियाअसंखभागट्ठाणे ।**
**पल्लासंखंसो त्ति विसेसो णेयो इआणि भणिमो अण्णं ॥१४६॥**

**(आर्यागीतिः)**

सम्प्रत्यभव्यप्रायोग्य आवलिकाऽसंख्यभागस्थाने ।
पल्याऽसंख्यांश इति विशेषो ज्ञेय इदानीं भणामोऽन्यत् ॥१४६॥ इति पदसंस्कारः ।

**'संपइ'** इत्यादि, सम्प्रति 'अभव्यप्रायोग्ये' अभव्यप्रायोग्यविषये, यत्र भव्यसिद्धिकानामभव्यसिद्धिकानां च स्थितिबन्धानुभागबन्धादिपरिणामाः सदृशा भवन्ति, सोऽभव्यप्रायोग्यविषयः, तत्र, आवलिकाऽसंख्यभागस्थाने 'पल्याऽसंख्यांशः' पल्योपमाऽसंख्येयतमभाग इति 'विशेषः' अनन्तरोक्तगाथाषट्के यथासम्भवं विशेषो 'ज्ञेयो' बोध्यः, शेषं तु क्षपकवदभव्यप्रायोग्येऽपि बोध्यम् । एतत्सर्वं यथास्थानं तत्रैवाऽस्माभिर्भावितम्, अतो नेह पुनः प्रपञ्च्यते ।

न च क्षपकाधिकारेऽक्षपकाणां प्ररूपणाऽसङ्गतेति वाच्यम्, यतो भव्यजनानां शङ्काव्युदासाय ग्रन्थकृदन्यानपि पदार्थान् अधिकारान्तरेऽपि प्ररूपयति, अन्यथा लक्षणैकचक्षुषो विद्वज्जना अपि संशय्याना भवेयुः—क्षपकस्य समयप्रबद्धादिकमवलम्ब्य यावती प्ररूपणा कृता, अक्षपकस्य किं तावत्येव सम्भवति ? उताऽस्ति कश्चित् तत्र विशेषः ? इति ।

सम्प्रत्यभव्यप्रायोग्येऽन्यत् प्रतिपिपादयिषुः प्रतिजानीते—'इआणि' इत्यादि, इदानीम् 'अन्यत्' समयप्रबद्धादीनां सम्बन्ध्यन्यद् निर्लेपनस्थानादिकं 'भणाम': प्रतिपादयिष्यामः ॥१४६॥

सम्प्रति प्रतिज्ञातं निर्वाहयन्नादौ तावत् समयप्रबद्धानां निर्लेपनस्थानान्यभिधित्सुराह—

**णिल्लेवणठाणाइं पल्लस्स असंखभागमेत्ताणि ।**
**अण्णे भणंति कम्मअवट्ठाणस्स उ असंखंसा ॥१४७॥**

निर्लेपनस्थानानि पल्यस्याऽसंख्यभागमात्राणि ।
अन्ये भणन्ति कर्माऽवस्थानस्य त्वसंख्यांशान् ॥१४७॥ इति पदसंस्कारः ।

**'णिल्लेवणठाणाइं'** इत्यादि, निर्लेपनस्थानानि 'पल्यस्य' पल्योपमस्याऽसंख्यभागमात्राणि । इदमुक्तं भवति—तत्र विवक्षितैकसमयेन विवक्षितैकभवेन च बद्धकर्मप्रदेशा बन्धाऽऽवलिकायां व्यतिक्रान्तायां सान्तरं निरन्तरं चाऽनुभूयमाना यस्मिन् समये सर्वे निःशेषतोऽनुभूयन्ते, स यथाक्रमं निरुक्तसमयप्रबद्धस्य निरुक्तभवप्रबद्धस्य च निर्लेपनस्थानमुच्यते, तदानीमेव निःशेषतो निर्लेपनात् । तत्राऽपि विवक्षितकर्माऽवस्थानकालस्य प्रथमसमये यो बद्धः कर्मप्रदेशसमूहः, स बन्धावलिकायां व्यतिक्रान्तायां सान्तरं निरन्तरं चोदयेनाऽनुभूयमानोऽपि बन्धसमयतः प्रभृति कर्माऽवस्थानकालस्य बहूनसंख्येयभागान् यावद् न निश्शेषत उदयेनाऽनुभूयते । कर्माऽवस्थानकालस्य तु पल्योपमाऽसंख्येयभागमात्रे काले शेषे सति यस्मिन् समय उदयेन सर्वथा निर्लेप्यते, स समयः प्रथमं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्लेपनस्थानम् । अथवा तस्मिन्ननिर्लेप्य तदुपरितनसमये निःशेषत उदयेन निर्लेप्यते, स द्वितीयं निर्लेपनस्थानम् । यद्वा तस्मिन्ननिर्लेप्य तदुपरितनसमये निःशेषत उदयेन निर्लेप्यते, स तृतीयं निर्लेपनस्थानम् । एवंक्रमेणैकोत्तरवृद्ध्या तावद्वक्तव्यम्, यावत् कर्माऽवस्थानकालस्य चरमसमयः । एवंक्रमेण सर्वसंख्यया निर्लेपनस्थानानि पल्योपमाऽसंख्येयभागप्रमाणानि भवन्त्य-प्यसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणानि भवन्ति ।

यद्वा विवक्षितकर्माऽवस्थानकालस्य प्रथमसमयेऽनेकैर्जीवैर्यो बद्धः कर्मप्रदेशसमूहः, स बन्धा-वलिकाऽतिक्रमे सान्तरं निरन्तरं चोदयेनानुभूयमानोऽपि बन्धसमयतः प्रभृति कर्मावस्थानकालस्य बहूनसंख्येयभागान् यावन्न निःशेषत उदयेनाऽनुभूयते, कर्माऽवस्थानकालस्य तु जघन्यतः पल्यो-पमाऽसंख्येयभागमात्रे काले शेषे सति यस्मिन् समये केनचिज्जीवेन निरुक्तसमयप्रबद्ध उदयेन निःशेषं निर्लेप्यते, स समयः प्रथमं निर्लेपनस्थानम् । द्वितीयस्मिन् समय इतरेण जीवेन निरुक्त-समयप्रबद्धो निर्लेप्यते, स द्वितीयं निर्लेपनस्थानम् , तृतीयसमयेऽपरेण जीवेन निरुक्तसमय-प्रबद्धो निर्लेप्यते, स तृतीयं निर्लेपनस्थानम् । एवंक्रमेण तावद् वाच्यम् , यावत् कर्माऽवस्था-नकालस्य चरमसमयः । इत्थमपि निर्लेपनस्थानानि पल्योपमाऽसंख्येयभागप्रमितानि भवन्ति, विशेषपरिमाणतः पुनरसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणानि भवन्ति ।

'अण्णे' त्ति 'अन्ये' अपर आचार्यपादाः 'भणन्ति' प्रतिपादयन्ति । किम् ? इत्यत आह–'**कम्म०**' इत्यादि, कर्माऽवस्थानकालस्य तु 'असंख्यांशान्' बहुसंख्यभागमात्राणि निर्लेपनस्थानानि । इदमुक्तं भवति–विवक्षितकर्माऽवस्थानकालस्य प्रथमसमये यो बद्धः कर्मप्रदेशसमुदायः, स बन्धावलिकायां व्यतिक्रान्तायां यथासंभवमनुभूयमानोऽपि बन्धसमयतः प्रभृति पल्योपमाऽसंख्येयभागं यावद् न निःशेषतो निर्लेप्यते, बन्धसमयतस्तु पल्योपमा-ऽ-संख्येयभागे गते यस्मिन् समये निःशेषत उदयेन निर्लेप्यते, स समयः प्रथमं निर्लेप-नस्थानम् । अथवा तदुपरितनसमययुदयेन सर्वथा निर्लेप्यते, स द्वितीयं निर्लेपनस्थानम् , यद्वा तदुपरितनसमय उदयेन सर्वथा निर्लेप्यते, स तृतीयं निर्लेपनस्थानम् । एवमेकसमयोत्तरवृद्ध्या तावद् वक्तव्यम् , यावत् कर्माऽवस्थानकालस्य चरमसमयः ।

यद्वा कर्माऽवस्थानकालस्य प्रथमसमयेऽनेकैर्जीवैर्यो बद्धः कर्मप्रदेशसमूहः, स बन्धाव-लिकायामपगतायां यथासंभवमनुभूयमानोऽपि बन्धसमयात् प्रभृति पल्योपमाऽसंख्येयभागं यावद् न निश्शेषतो निर्लेप्यते, तत एकेन जीवेन बन्धसमयतः पल्योपमाऽसंख्येयभागे व्यतीते यस्मिन् समये निरुक्तसमयप्रबद्धो निर्लेप्यते, स समयः प्रथमं निर्लेपनस्थानम् । द्वितीयसमयेऽन्येन जीवेन निरुक्तसमयप्रबद्धो निर्लेप्यते, स द्वितीयं निर्लेपनस्थानम् । तृतीयसमयेऽपरेण निर्लेप्यते, स तृतीयं निर्लेपनस्थानम् । एवमेकसमयोत्तरवृद्ध्या तावद् वाच्यम् ,

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

यावत् कर्माऽवस्थानकालचरमसमयः । तेन कर्माऽवस्थानकालस्य बहुसंख्येयभागप्रमाणानि समयप्रबद्धस्य निर्लेपनस्थानानि । उक्तं च **कषायप्राभृतचूर्णौ—"तत्थ पुव्वं गमणिज्जा णिल्लेवणट्ठाणाणमुवदेसपरूवणा । एत्थ दुविहो उवदेसो । एक्केण उवदेसेण कम्मट्ठिदीए असंखेज्जा भागा णिल्लेवणट्ठाणाणि । एक्केण उवएसेण पलिदोवमस्स असंखेज्जदिभागो । जो पवाइज्जइ उवएसो, तेण उवदेसेण पलिदोवमस्स असंखेज्जदिभागो, असंखेज्जाणि वग्गमूलाणि णिल्लेवणट्ठाणाणि ।"** इति ।

असत्कल्पनया कर्मावस्थानकालः सहस्रसमयमात्रः (१०००) कल्प्यते । पल्योपमाऽसंख्येयभागश्च पञ्चाशत्समयप्रमाणः (५०) परिकल्प्यते ।

प्रथममतेन कश्चिज्जीवः कर्मावस्थानकालप्रथमसमये प्रदेशाग्रं बद्ध्वैकपञ्चाशदधिकनवशततमसमये (९५१) सर्वथा निर्लेपयति, तेन स समयो जघन्यनिर्लेपनस्थानम् । यद्वा द्विपञ्चाशदधिकनवशततमसमये (९५२) सर्वात्मना निर्लेपयति, तेन स द्वितीयनिर्लेपनस्थानम् । यद्वा त्रिपञ्चाशदधिकनवशततमसमये (९५३) सर्वथा निर्लेपयति, तेन स तृतीयनिर्लेपनस्थानम् । एवंक्रमेण पञ्चाशद् (५०) निर्लेपनस्थानानि लभ्यन्ते । परमार्थतस्तु तानि पल्योपमाऽसंख्येयभागमात्राणि भवन्त्यप्यसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणानि भवन्ति ।

वक्ष्यमाणभवबद्धस्य जघन्यनिर्लेपनस्थानं तु पञ्चपञ्चाशदधिकनवशततमे (९५५) समये प्राप्यते, समयप्रबद्धस्य जघन्यनिर्लेपनस्थानादूर्ध्वमन्तर्मुहूर्तप्रमाणस्थानेषु गतेषु तस्य लभ्यमानत्वादन्तर्मुहूर्तकालस्य च चतुस्समयप्रमाणत्वकल्पनात् ।

द्वितीयमतेन तु कर्मावस्थानकालप्रथमसमयबद्धप्रदेशाग्रमेकपञ्चाशत्तमे (५१) समये सर्वथा निर्लेप्यते, तेन स समयो जघन्यनिर्लेपनस्थानम्, यद्वा द्विपञ्चाशे (५२) समये सर्वात्मना निर्लेप्यते, तेन स द्वितीयं निर्लेपनस्थानम् । एवंक्रमेण पञ्चाशदुत्तरनवशतानि (९५०) निर्लेपनस्थानानि लभ्यन्ते, परमार्थतस्तानि कर्मावस्थानकालबहुसंख्येयभागप्रमाणानि भवन्ति ॥१४७॥

तदेवं भणितानि निर्लेपनस्थानानि, अथैकजीवमाश्रित्याऽतीतकाले जघन्यनिर्लेपनस्थानप्रभृत्युत्कृष्टनिर्लेपनस्थानपर्यवसानेषु निर्लेपनस्थानेषु निर्लेपितानां समयप्रबद्धानां निर्लेपनकालमनन्तरोपनिधया परम्परोपनिधया चाऽभिधातुकाम आह—

**जीवस्स जहण्णगणिल्लेवणठाणे अईअकालम्मि ।**
**णिल्लेवियाण समयपबद्धाणाऽप्पो गओ कालो ॥१४८॥**
**तत्तो बीये अहिओ तत्तो तइये विसेसऽहिओ ।**
**पलिओवमस्स य असंखेज्जंसे होअए दुगुणो ॥१४९॥ (उपगीतिः)**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ठाणअसंखंसे जवमज्झं पल्लस्स छेदणअसंखंसो ।**
**णाणागुणहाणी तो असंखगुणमंतरं दुगुणहाणीणं ॥१५०॥(आर्यागीतिः)**

जीवस्य जघन्यनिर्लेपनस्थानेऽतीतकाले ।
निर्लेपितानां समयप्रबद्धानामल्पो गतः कालः ॥१४८॥
ततो द्वितीयेऽधिकस्ततस्तृतीये विशेषाधिकः ।
पल्योपमस्य चाऽसंख्येयांशे भवति द्विगुणः ॥१४९॥
स्थानाऽसंख्यांशे यवमध्यं पल्यस्य च्छेदनाऽसंख्यांशः ।
नानागुणहानयस्ततोऽसंख्यगुणमन्तरं द्विगुणहान्योः ॥१५१॥ इति पदसंस्कारः ।

**'जीवस्स'** इत्यादि, तत्र **'अईअकालम्मि'** त्ति अतीतकाले 'जीवस्य' एकवचननिर्देशाद् एकजीवस्य जघन्यनिर्लेपनस्थाने निर्लेपितानां समयप्रबद्धानाम् 'अल्पः' स्तोकः कालो 'गतो' व्यतिक्रान्तः । भावार्थः पुनरयम्—असंख्येयपल्योपमप्रथमवर्गमूलप्रमाणानि निर्लेपनस्थानानि पूर्वमुक्तानि । तत्र यत् प्रथमं निर्लेपनस्थानम्, तत्र पुनः पुनः स्थित्वा समयप्रबद्धान् निर्लेपयत एकजन्तोरतीतकालाभ्यन्तरे योऽनन्तसमयप्रमाणः कालो व्यतिक्रान्तः, स सम्पिण्डितः स्तोको भवति ।

**'तत्तो'** इत्यादि, ततो द्वितीये निर्लेपनस्थाने **'अधिको'**विशेषाधिकः कालो व्यतिक्रान्तः, जघन्यनिर्लेपनस्थानतो द्वितीयस्मिन् निर्लेपनस्थाने पुनः पुनः स्थित्वा समयप्रबद्धान् निर्लेपयत एकजन्तोरतीतकालाभ्यन्तरे व्यतिक्रान्तः कालो विशेषाधिको भवतीत्यर्थः । आधिक्यं च पूर्वोक्तनिर्लेपनकालं पल्योपमाऽसंख्येयभागेन भक्त्वैकभागेन ज्ञातव्यम्, पल्योपमाऽसंख्येयभागे गते द्विगुणवृद्धिस्थानस्य वक्ष्यमाणत्वात् । 'ततः' अतीतकालेऽयेकजीवस्य द्वितीयनिर्लेपनस्थाने निर्लेपितसमयप्रबद्धानां व्यतिक्रान्तकालतस्तृतीयस्मिन् निर्लेपनस्थाने निर्लेपितसमयप्रबद्धानां व्यतिक्रान्तकालो विशेषाधिको भवति । उक्तं च **कषायप्राभृतचूर्णौ–"अदीदे काले एगजीवस्स जहण्णए णिल्लेवणट्ठाणे णिल्लेविदपुव्वाणं समयपबद्धाणमेसो कालो थोवो, समयुत्तरे विसेसाहिओ ।"** इति ।

एवमनन्तरोपनिधया विशेषाधिकक्रमेण तावद् वक्तव्यम्, यावद् यवमध्यमप्राप्तं भवति, यवमध्यस्योपरि विशेषहीनक्रमेण तावद् वक्तव्यम्, यावदुत्कृष्टनिर्लेपनस्थानम् ।

अथ परम्परोपनिधया भणति–**'पलिओव०'** इत्यादि, 'पल्योपमस्य चाऽसंख्यांशे' असंख्येयपल्योपमप्रथमवर्गमूलमात्रेषु च स्थानेषु गतेषु प्रस्तुतकालो द्विगुणो भवति, । उक्तं च **कषायप्राभृतचूर्णौ–"पलिदोवमस्स असंखेज्जदिभागमेत्ते दुगुणो ।"** इति । इदमत्र हृदयम्–जघन्यनिर्लेपनस्थानात् पल्योपमासंख्येयभागमात्रेषु निर्लेपनस्थानेषु गतेषु तत्रत्यनिर्लेपनस्थानेऽतीतकालेऽयेकजीवस्य निर्लेपितसमयप्रबद्धानां व्यतिक्रान्तकालो जघन्यनिर्लेपनस्थानव्यतिक्रान्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालतो द्विगुणो भवति। ततः पुनः पल्योपमाऽसंख्येयभागमात्रनिर्लेपनस्थानेषु गतेषु तत्रत्य-निर्लेपनस्थाने व्यतिक्रान्तः कालो द्विगुणो भवति। एवंक्रमेण द्विगुणवृद्धिस्थानानि तावद्वक्तव्यानि, यावद् यवमध्यम्। ततः पल्योपमाऽसंख्येयभागप्रमाणनिर्लेपनस्थानातिक्रमे प्राप्यमाणनिर्लेपन-स्थाने व्यतिक्रान्तकालो द्विगुणहीनो भवति। ततः पुनरेतावत्स्थानातिक्रमे निर्लेपनस्थाने व्यति-क्रान्तकालो द्विगुणहीनो भवति। एवं द्विगुणहानिस्थानानि तावद् वाच्यानि, यावत् सर्वोत्कृष्टं निर्लेपनस्थानम्।

**'ठाणअसंखंसे'** इत्यादि, 'स्थानाऽसंख्यांशे' निर्लेपनस्थानानामसंख्येयतमे भागे यव-मध्यं भवति। यदभ्यधायि **कषायप्राभृतचूर्णौ–"ठाणाणमसंखेज्जदिभागे जवमज्झं।"** इति। इदमुक्तं भवति–निर्लेपनस्थानानामेकसंख्येयतमभागेऽसंख्यातद्विगुणवृद्धिस्थानेषु व्रजितेषु सत्सु यवमध्यं प्राप्यते, तस्योपर्यसंख्येयतमेषु बहुषु भागेषु निर्लेपनकालो हीयमानो गच्छति। तेन वृद्धिस्थानतो हानिस्थानान्यसंख्येयगुणानि भवन्ति।

अथ नानाद्विगुणहानिस्थानानि कियन्ति भवन्ति? इत्यत आह–**'पल्लस्स'** इत्यादि, 'पल्यस्य' पल्योपमस्य 'छेदनाऽसंख्यांशः' अर्धच्छेदनकानामसंख्येयभागमात्राणि 'नानागुणहानयो' नानाद्विगुणहानिस्थानानि भवन्ति। भावार्थः पुनरयम्—पल्योपमगतसमया द्विकेन पुनः पुनस्तावच्छिद्यन्ते, यावदेकसमयः, तत्र यतिकृत्वो विभज्यन्ते, तत्संख्याप्रमाणानि पल्योपमस्या-र्धच्छेदनकानि भवन्ति, यथा षट्पञ्चाशदुत्तरद्विशतयोरर्धच्छेदनकान्यष्टौ। पल्योपमस्यार्धच्छेदन-कानां चाऽसंख्येयभागे यावन्त्यर्धच्छेदनकानि प्राप्यन्ते, तावन्ति नानाद्विगुणहानिस्थानानि भवन्ति। तथाहि—यवमध्यस्योपरि पल्योपमाऽसंख्येयभागे गत एकं द्विगुणहानिस्थानं प्राप्यते, पुनस्तावत्सु स्थानेषु गतेष्वेन्यदेकं द्विगुणहानिस्थानं प्राप्यते, एवंक्रमेण यवमध्य-स्योपरितनानि द्विगुणहानिस्थानानि तावद् वक्तव्यानि, यावच्चरमस्थानम्। तथा यवमध्यस्याऽधः पल्योपमाऽसंख्येयभागे गत एकं द्विगुणहानिस्थानं प्राप्यते, पुनः पल्योपमाऽसंख्येयभागे गतेऽन्य-देकं द्विगुणहानिस्थानं लभ्यते, एवंक्रमेण तावद्वक्तव्यम्, यावत् प्रथमस्थानम्। पूर्वं तूर्ध्वारोहणेन प्रतिपादितम्, तेन यवमध्यस्याऽधस्तनानि स्थानानि द्विगुणवृद्धिस्थानानि प्रोक्तानि, सम्प्रति त्वधस्तनस्थानान्यधोऽवतरणेन प्रतिपाद्यन्ते, तेन द्विगुणहानिस्थानान्यभिधीयन्ते। एतानि सर्वाणि यवमध्यस्योपरितनान्यधस्तनानि च द्विगुणहानिस्थानानि नानाद्विगुणहानिस्थानानि व्यप-दिश्यन्ते। तानि पुनः सर्वेषु निर्लेपनस्थानेषु द्विगुणहान्येकाऽन्तरस्थानैर्विभक्तेष्वेकखण्डप्रमाणानि भवन्ति, परिमाणतः पुनः पल्योपमार्धच्छेदनकाऽसंख्येयभागमात्राणि। विवक्षितस्थानतो यावत्सु स्थानेषु गतेषु निर्लेपितसमयप्रबद्धानां कालोऽर्धो भवति, तावन्ति स्थानानि द्विगुणहान्यन्तरमुच्यन्ते। अथाऽल्पबहुत्वमभिधत्ते-**'तो'** इत्यादि, 'ततः' नानाद्विगुणहानिस्थानेभ्यो 'असंख्यगुणम्' असंख्येय-गुणं द्विगुणहान्योरन्तरम्, द्वयोर्द्विगुणहान्योरेकाऽपान्तराले यानि स्थानानि, तानि नानाद्विगुणहानि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानतोऽसंख्येयगुणानि भवन्तीत्यर्थः । न्यगादि च **कषायप्राभृतचूर्णौ–"णाणागुणहाणिट्ठाणंतराणि थोवाणि, एयगुणहाणिट्ठाणंतरमसंखेज्जगुणं ।"** इति ॥१४८-१४९-१५०॥

तदेवं निरूपित एकजीवमाश्रित्याऽतीतकाले जघन्यादिनिर्लेपनस्थानेषु निर्लेपितसमयप्रबद्धानां निर्लेपनकालः, सम्प्रति तमतिदिदिक्षुराह—

**एवं भवबद्धाण परं लहु णिल्लेवणट्ठाणं ।**
**गंतुं असंखठाणाणुप्पिं एगत्थ दोण्ह जवमज्झं ॥१५१॥**

एवं भवबद्धानां परं लघु निर्लेपनस्थानम् ।
गत्वाऽसंख्यस्थानानामुपर्येकत्र द्वयोर्यवमध्यम् ॥१५१॥ इति पदसंस्कारः ।

'एवं' इत्यादि, 'एवम्' एवंशब्दः सादृश्यार्थकः, यथाऽतीतकालयेकजीवस्य जघन्यादिनिर्लेपनस्थानेषु निर्लेपितानां समयप्रबद्धानां व्यतिक्रान्तः कालो निरूपितः, तथैव भवबद्धानां निरूपणीय इति गम्यते । सामान्येनातिदिश्य विशेषं दर्शयति–**'परं'** इत्यादि,' परं' नवरं 'लघु' प्रस्तुतत्वाद् भवबद्धानां जघन्यं निर्लेपनस्थानम् 'असंख्यस्थानानामुपरि गत्वा' समयप्रबद्धानां जघन्यनिर्लेपनस्थानतः परमसंख्येयस्थानानि गत्वा लभ्यत इति शेषः । उक्तं च **कषायप्राभृतचूर्णौ— "भवबद्धाणं णिल्लेवणट्ठाणं जहण्णगं समयपबद्धस्स णिल्लेवणट्ठाणाणं जहण्णादो असंखेज्जाओ ट्ठिदीओ अब्भुस्सरियूण ।"** इति ।

तथाहि–एकस्मिन् भवे सञ्चितानां समयप्रबद्धानां समूहो भवबद्ध उच्यते । स च बन्धावलिकायां व्यतिक्रान्तायां सान्तरं निरन्तरं चानुभूयमानः कर्माऽवस्थानकालस्य बहुष्वसंख्येयतमभागेषु गतेषु यस्मिन् समये सर्वथा निर्लेप्यते, स समयो भवबद्धस्य जघन्यं निर्लेपनस्थानम् , अन्येन जीवेन तदुपरितनसमये निःशेषतोऽनुभूयते, स द्वितीयं निर्लेपनस्थानम् । एवंक्रमेण तावद्वक्तव्यम् , यावत्कर्माऽवस्थानकालस्य चरमसमयः । एतानि सर्वाणि निर्लेपनस्थानान्यसंख्येयपल्योपमप्रथमवर्गमूलमात्राणि भवन्ति । तत्र भवबद्धानां जघन्यनिर्लेपनस्थानं समयप्रबद्धानां जघन्यनिर्लेपनस्थानतोऽसंख्येयानां निर्लेपनस्थानानामुपरि प्राप्यते । कथमेतदवसीयते ? इति चेत् , शृणुत–तिरश्चि मनुष्ये वोत्पद्य जघन्यतोऽन्तर्मुहूर्तप्रमाण आयुषि कर्मप्रदेशांस्तावत् बध्नाति, यावद् आयुर्न समाप्नोति । तस्मिन्नन्तर्मुहूर्तप्रमाणे मनुष्यस्य तिरश्चो वा भवे सञ्चिताः समयप्रबद्धा अन्तर्मुहूर्तसमयमात्रा भवन्ति । एतावत्समयप्रबद्धानां समूह एकभवबद्ध उच्यते । तस्य भवस्य प्रथमसमयेन बद्धकर्मप्रदेशा बन्धावलिकायां व्यतिक्रान्तायां सान्तरं निरन्तरं चाऽनुभूयमानाः कर्माऽवस्थानकालस्याऽसंख्येयतमेषु बहुषु भागेषु गतेषु यस्मिन् समये निःशेषतो निर्लेप्यन्ते, स समयः समयप्रबद्धस्य जघन्यं निर्लेपनस्थानं भवति । तदानीं च प्रथमसमयोननिरुक्तभवबद्धा न निःशेषतो निर्लेपिताः । ततः क्रमेण समयोनाऽन्तर्मुहूर्तप्रमाणाः समयप्रबद्धा यस्मिन् समये निःशेषतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्जरिष्यन्ति, स समयो निरुक्तभवबद्धस्य जघन्यं निर्लेपनस्थानमिति कृत्वोभयोर्जघन्यं निर्लेपनस्थानमेकत्र न प्राप्यते, किन्तु समयप्रबद्धजघन्यनिर्लेपनस्थानस्योपर्यन्तर्मुहूर्तसमयप्रमाणेषु निर्लेपनस्थानेषु गतेषु भवबद्धस्य जघन्यं निर्लेपनस्थानं प्राप्यते। न च यस्मिन् समये भवप्रथमसमयप्रबद्धो निर्लेप्यते, तस्मिन्नेव समये शेषाः समयप्रबद्धाः कुतो युगपन्न निर्लेप्यन्ते, भवबद्धसमयप्रबद्धयोरेकत्र जघन्यनिर्लेपनस्थानलाभसंभवात् ? इति वाच्यम्, प्रथमसमयप्रबद्धस्य जघन्यनिर्लेपनस्थानतः प्रभृति समयोत्तरक्रमेण निर्लेप्यमानानां समयप्रबद्धानां स्वस्वजघन्यनिर्लेपनस्थानतोऽर्वाग् निर्लेपनप्रसङ्गादन्तर्मुहूर्तप्रमाणभवद्वितीयादिसमयसंगृहीतसमयप्रबद्धानां च जघन्यकर्माऽवस्थानकालतः कर्माऽवस्थानकालस्य न्यूनत्वप्रसङ्गात् ।

इह समयप्रबद्धवदतीतकाल एकजीवस्य जघन्यनिर्लेपनस्थानादिषु निर्लेपितभवबद्धानां निर्लेपनकालोऽनन्तरोपनिधया परम्परोपनिधया च भावनीयः, तत्रोभयोर्भवबद्धसमयप्रबद्धयोर्यवमध्यमेकत्र भवति, न तु जघन्यनिर्लेपनस्थानस्य भेदाद् यवमध्यमन्यत्र भवतीत्यर्थः। उक्तं च कषायप्राभृतचूर्णौ--"**जम्हि चेव समयपबद्धणिल्लेवणट्ठाणाणं जवमज्झं, तम्हि चेव भवबद्धणिल्लेवणट्ठाणाणं जवमज्झं।**" इति। तदेव प्राह—'**एगत्थ**' इत्यादि, तत्र 'द्वयोः' भवबद्ध-समयप्रबद्धयोरेकत्र यवमध्यं भवति।

भावार्थः पुनरयम्—भवबद्धानां यज्जघन्यं निर्लेपनस्थानं भवति, तत्र पुनः पुनः स्थित्वा भवबद्धान् निर्लेपयत एकजन्तोरतीतकालाभ्यन्तरे योऽनन्तसमयप्रमाणः कालो व्यतिक्रान्तः, स समुदितः स्तोकः, ततो भवबद्धस्य द्वितीये निर्लेपनस्थाने भवबद्धान् निर्लेपयतो जन्तोरतीतकाले व्यतिक्रान्तः कालो विशेषाधिकः। एवमनन्तरानन्तरेण विशेषाधिकस्तावद् वक्तव्यः, यावद् यवमध्यम्। यवमध्यस्योपरि विशेषहीनक्रमेण तावद् वक्तव्यम्, यावच्चरमनिर्लेपनस्थानम्। जघन्यनिर्लेपनस्थानतः पल्योपमाऽसंख्येयभागे गते व्यतिक्रान्तः कालो द्विगुणो भवति, ततः पुनः पल्योपमासंख्येयभागे गते व्यतिक्रान्तः कालो द्विगुणो भवति। एवंक्रमेण द्विगुणवृद्धिस्थानानि तावद्वक्तव्यानि, यावद् यवमध्यम्। यवमध्यस्योपरि निरुक्तक्रमेण द्विगुणहानिस्थानानि तावद्वक्तव्यानि, यावच्चरमनिर्लेपनस्थानम्। यत्र च समयप्रबद्धानां यवमध्यं प्राप्यते स्म, तत्रैव भवबद्धानां यवमध्यं प्राप्यते। न च समयप्रबद्धानां जघन्यनिर्लेपनस्थानतोऽन्तर्मुहूर्तप्रमाणानि निर्लेपनस्थानान्युल्लङ्घ्य भवबद्धानां जघन्यनिर्लेपनस्थानस्य लाभादुभयोर्यवमध्यमेकत्र कथं प्राप्यते, युक्तिविरोधाद् ? इति वाच्यम्, **पूर्वमहर्षिभिस्तथैवोक्तत्वा**दतीन्द्रियपदार्थेषु च केवलयुक्तेरप्राधान्यात्।

तदेवं समयप्रबद्धानां जघन्यनिर्लेपनस्थानं पूर्वं प्राप्यते, ततोऽन्तर्मुहूर्तप्रमितानि निर्लेपनस्थानानि गत्वा भवबद्धस्य जघन्यनिर्लेपनस्थानं प्राप्यते, समयप्रबद्धप्ररूपणाऽवसरे प्रोक्तयवमध्यं त्वेकत्र प्राप्यते। तेन भवबद्धयवमध्यस्याधस्तननिर्लेपनस्थानतः समयप्रबद्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यवमध्यस्याऽधस्तननिर्लेपनस्थानान्यन्तर्मुहूर्तप्रमाणैर्निर्लेपनस्थानैरधिकानि भवन्ति। यवमध्यस्याधस्तननिर्लेपनस्थानतोऽसंख्येयगुणानि यवमध्यस्योपरि निर्लेपनस्थानानि गत्वा समयप्रबद्धानां भवबद्धानां चैकत्र चरमनिर्लेपनस्थानं प्राप्यत इति फलितार्थः ॥१५१॥

अथाऽतीतकालाभ्यन्तरयेकादिप्रदेशाग्रेण ये समयप्रबद्धा निर्लेपिताः, तान् विस्तरत आविश्चिकीर्षुराह—

**एगपएसेण अईएऽप्पा णिल्लेविया तु समयपबद्धा।**
**कमसो अहिया ठाणअसंखंसे च दुगुणा तहा जवमज्झं १५२(आर्यागीतिः)**
**णाणंतराणि पल्लस्स छेदणअसंखभागमेत्ताणि।**
**तो एगअंतरमणंतगुणं भणियं सुअम्मि खलु ॥१५३॥**

एकप्रदेशेनाऽतीतेऽल्पा निर्लेपितास्तु समयप्रबद्धाः।
क्रमशोऽधिकाः स्थानाऽसंख्यांशे च द्विगुणास्तथा यवमध्यम् ॥ १५२ ॥
नानान्तराणि पल्यस्यच्छेदनाऽसंख्यभागमात्राणि।
तत एकान्तरमनन्तगुणं भणितं श्रुते खलु ॥ १५३ ॥ इति पदसंस्कारः।

'एग०' इत्यादि, अतीतकाले पूर्वोक्ताऽसंख्यातपल्योपमप्रथमवर्गमूलमात्रनिर्लेपनस्थानेषु यत्र वा तत्र वा कदाचिदेकैकेन प्रदेशेन शेषीभूतेन समयप्रबद्धा निर्लेपिताः, कदाचित् द्वाभ्यां द्वाभ्यां प्रदेशाभ्यां निर्लेपिताः, कदाचित्पुनस्त्रिभिस्त्रिभिः प्रदेशैर्निर्लेपिताः, एवं क्रमेणोत्कृष्टतोऽनन्तप्रदेशैः शेषीभूतैः समयप्रबद्धा निर्लेपिताः। तत्र 'अतीते' अतीतकाले पूर्वोक्तनिर्लेपनस्थानेषु यत्र वा तत्र वा 'एकप्रदेशेन' एकैकेन कर्मप्रदेशेन शेषीभूतेन निर्लेपितास्तु समयप्रबद्धाः सर्वे मिलित्वाऽनन्तराशिका भवन्तोऽपि 'अल्पाः' स्तोकाः, उपरितनानामधिकत्वप्रतिपादनात्। **'कमसो अहिया'** त्ति क्रमशो 'अधिका' विशेषाधिकाः। अयं भावः—ततो द्वाभ्यां द्वाभ्यां कर्मप्रदेशाभ्यां शेषीभूताभ्यां निर्लेपिताः समयप्रबद्धा विशेषाधिका वाच्याः। ततस्त्रिभिस्त्रिभिः कर्मप्रदेशैः शेषीभूतैर्निर्लेपिताः समयप्रबद्धा विशेषाधिका अभिधातव्याः। एवं विशेषाधिकक्रमेणाऽनन्तानि स्थानानि वक्तव्यानि। यदुक्तं **कषायप्राभृतचूर्णौ—"अदीदे काले जे समयपबद्धा एक्केण पदेसग्गेण णिल्लेविदा, ते थोवा। वेहिं पदेसेहिं विसेसाहिया, एवमणंतरोवणिधाए अणंताणि ट्ठाणाणि विसेसाहियाणि।"** इति। एवमनन्तरान्तरेण विशेषाधिकक्रमेण 'स्थानाऽसंख्यांशे' स्थानानाम्=अनन्तराशिकानां सर्वेषां स्थानानामसंख्येयतमे भागे च गते निर्लेपिताः समयप्रबद्धा 'द्विगुणा' द्विगुणवृद्धा भवन्ति। इदमुक्तं भवति—जघन्यस्थानतः सकलस्थानानामसंख्येयतमे भागे गते समयप्रबद्धा द्विगुणवृद्धा भवन्ति। ततः पुनस्तावन्मात्रेषु स्थानेषु गतेषु निर्लेपिताः समयप्रबद्धा द्विगुणवृद्धा भवन्ति। ततः पुनस्तावन्मात्रेषु स्थानेषु व्रजितेषु समयप्रबद्धा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विगुणवृद्धा भवन्ति । एवं सर्वस्थानानामसंख्येयभागे गते यवमध्यमपि प्राप्यते, तद्व्याजिहीर्षुराह-'तहा जवमज्झं' ति 'तथा' एवं यवमध्यम्, यथा स्थानानामसंख्येयभागे समयप्रबद्धा द्विगुणा भवन्ति, तथैव यवमध्यमपि स्थानानामसंख्येयतमे भागे प्राप्यत इत्यर्थः । इदमत्र हृदयम्-एकपरमाणुत आरभ्य एकसमयेनोत्कृष्टतो निर्लेप्यमानानेकसमयप्रबद्धाऽसंख्येयभागप्रमाणानन्तपरमाणून् यावदेकोत्तरक्रमेण यावन्ति स्थानानि लभ्यन्ते, तावतामभव्येभ्योऽनन्तगुणानां सिद्धानां चाऽनन्तभागमात्राणां स्थानानासंख्येयतमभागे यवमध्यं भवति । यद्यपि द्विगुणवृद्धिस्थानमपि स्थानानामसंख्येयतमभागे प्राप्यते, एवं यवमध्यमपि, तथाप्यसंख्यातेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं लभ्यते, भाजकस्याऽसंख्येयत्वेनासंख्येयभेदत्वात् । यवमध्यस्योपरि द्विगुणवृद्धिस्थानतोऽसंख्यगुणानि द्विगुणहानिस्थानानि भवन्ति । ननु स्थानानामसंख्येयभागे यवमध्यमुक्तम्, तदत्र कः प्रतिभागः ? इति चेत्, उच्यते-पल्योपमासंख्येयभागमात्रः । उक्तं च **कषायप्राभृतचूर्णौ**-"**ठाणाणं पलिदोवमस्स असंखेज्जदिभागपडिभागे जवमज्झं** ।"इति । भावार्थः पुनरयम्-सकलानि स्थानानि पल्योपमाऽसंख्येयभागेन विभक्तव्यानि । ततो लब्धैकभागप्रमाणानि स्थानान्युल्लङ्घ्य यवमध्यं प्राप्यते, तस्योपरि विशेषहीनक्रमेण निर्लेपिताः समयप्रबद्धा भवन्ति, यवमध्यतश्च स्थानानामसंख्येयतमभागे गते द्विगुणहीना भवन्ति, पुनस्तावत्प्रमाणेषु स्थानेषु व्रजितेषु द्विगुणहीना भवन्ति, एवं द्विगुणहीना द्विगुणहीनास्तावदभिधातव्याः, यावच्चरमस्थानम् ।

अथ नानाद्विगुणहानिस्थानानि वक्तुकामोऽभिधत्ते-'**णाणंतराणि**' इत्यादि, 'नानान्तराणि' नानाप्रकाराणि अन्तराणि-द्विगुणवृद्धिद्विगुणहानिरूपाणि मध्यगतानि स्थानानि, अयं भावः-एकैकेन प्रदेशेन शेषीभूतेन निर्लेपिताः समयप्रबद्धाः स्तोका भवन्ति,ततो द्वाभ्यां द्वाभ्यां प्रदेशाभ्यां शेषीभूताभ्यां निर्लेपिता विशेषाधिका भवन्ति, एवं विशेषाधिकक्रमेणाऽनन्तेषु स्थानेषु गतेषु द्विगुणवृद्धा भवन्ति, इदं चाद्यं द्विगुणवृद्धिस्थानम्, तस्यैका शलाका स्थाप्या, ततः पुनस्तावत्सु स्थानेषु व्यतिक्रान्तेषु पुनर्द्विगुणवृद्धा भवन्ति, इदं च द्वितीयं द्विगुणवृद्धिस्थानम्, तस्यैका शलाका स्थाप्या । एवंक्रमेण यावन्ति द्विगुणवृद्धिस्थानानि लभ्यन्ते, तावत्यः शलाकाः स्थाप्याः, ततो यवमध्यस्योपरि विशेषहीनक्रमेणाऽनन्तेषु स्थानेषु गतेषु समयप्रबद्धा द्विगुणहीना भवन्ति, इदं च प्रथमं द्विगुणहानिस्थानम्, तस्यैका शलाका स्थापयितव्या । ततः पुनस्तावन्मात्रेषु स्थानेषु गतेषु द्वितीयं द्विगुणहानिस्थानम्,तस्य द्वितीयैका शलाका स्थाप्या । एवंक्रमेण यावन्ति द्विगुणहानिस्थानानि भवन्ति,तावत्यश्शलाकाः स्थाप्याः । द्विगुणवृद्धिस्थानानां स्थापितसर्वशलाका द्विगुणहानिस्थानानां च स्थापितसर्वशलाका मिलित्वा यावत्यः शलाका भवन्ति, तावन्ति नानान्तराणि भवन्ति । तानि प्रमाणतः कति भवन्ति ? इत्यत आह-'**पल्लस्स**' इत्यादि, 'पल्यस्य' पल्योपमस्य 'छेदनकाऽसंख्यभागमात्राणि' अर्धच्छेदनकानामसंख्येयभागप्रमाणानि भवन्ति । उक्तं च **कषायप्राभृतचूर्णौ**-"**अंतराणि अंतरट्ठिदाए पलिदोवमच्छेदणाणं पि असंखेज्जदिभागो** ।" इति । '**तो**'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, 'ततो' नानाद्विगुणहानिस्थानेभ्य 'एकान्तरमनन्तगुणं' द्वयोर्द्विगुणवृद्धयोर्द्विगुणहान्योर्वैकस्मिन्नन्तराले यानि स्थानानि, तान्यनन्तगुणानि 'श्रुते' कषायप्राभृतचूर्ण्यादिलक्षणे 'खलु' निश्चयेन 'भणितं' प्ररूपितानि । तथाहि—नानागुणहानिस्थानानि पल्योपमाऽर्धच्छेदनकानामप्यसंख्येयभागप्रमाणानि भवन्ति । तानि स्तोकानि, ततो द्वयोर्द्विगुणवृद्धयोर्द्विगुणहान्योर्वैकाऽपान्तरालवर्तीनि स्थानान्यनन्तगुणानि भवन्ति । यदभिहितं कषायप्राभृतचूर्णौ—**णाणंतराणि थोवाणि । एक्कंतरमणंतगुणं** ।" इति । ननु तेषामनन्तगुणत्वं कुतः सिध्यति ? इति चेद्, शृणुत—सकलानि स्थानान्यनन्तानि भवन्ति, तानि च नानाद्विगुणहानिस्थानलक्षणपल्योपमार्धच्छेदनकाऽसंख्येयभागेन विभज्यन्ते, तदेकभागमात्राणि द्वयोर्द्विगुणवृद्धयोर्द्विगुणहान्योर्वैकाऽन्तरालवर्तीनि स्थानानि प्राप्यन्ते, तानि चाऽनन्तानि, अनन्तराशेः पल्योपमार्धच्छेदनकाऽसंख्येयभागेन विभाजितत्वात् । इह नानागुणहानिस्थानानि स्तोकानि, असंख्येयत्वात् । तेभ्यो द्वयोर्द्विगुणवृद्धयोर्द्विगुणहान्योर्वैकाऽपान्तरालवर्तीनि स्थानान्यनन्तगुणानि, प्रमाणतोऽनन्तत्वात् । एवं भवबद्धानामपि यवमध्यादिप्ररूपणा कर्तव्या, विशेषाभावात् ॥ १५३ ॥

अथ समयप्रबद्धानां भवबद्धानां च निरन्तरनिर्लेपनकालं प्ररूपयति—

**एगसमइयोऽणुसमयणिल्लेवणकालगो पहूओऽईओ ।**
**आलिअसंखंसे दुगुणूणो आवलिअसंखभागो जेट्ठो ॥१५४॥ (आर्यागीतिः)**

एकसामयिकोऽनुसमयनिर्लेपनकालः प्रभूतोऽतीतः ।
आवलिकाऽसंख्यांशे द्विगुणोन आवलिकाऽसंख्यभागो ज्येष्ठः ॥१५४॥ इति पदसंस्कारः ।

'एग०' इत्यादि, एकसामयिकोऽनुसमयनिर्लेपनकालः प्रभूतो 'अतीतो' व्यतिक्रान्तः । एतदुक्तं भवति—अनुसमयनिर्लेपनकालो नाम समयप्रबद्धानां भवबद्धानां वा निरन्तरनिर्लेपनकालः । स च जघन्यत एकसमयप्रमाणो भवति । उभयोः पार्श्वयोस्ते स्थिती उदितः, ययोः समयप्रबद्धा वा भवबद्धा वा न निर्लेप्यन्ते, मध्ये चैकस्यामुदयमानस्थित्यामेकसमयमात्र्यां निर्लेप्यन्ते, स एकसामयिकोऽनुसमयनिर्लेपनकाल उच्यते, एवमुभयोः पार्श्वयोस्ते स्थिती अनुभूयेते, ययोः समयप्रबद्धा भवबद्धा वा न निर्लेप्यन्ते, मध्ये च द्वयोर्निरन्तरस्थित्योर्निर्लेप्यन्ते, स द्विसामयिकोऽनुसमयनिर्लेपनकाल उच्यते, एवमेकोत्तरवृद्ध्या निरन्तरमनुसमयनिर्लेपनकाल उत्कृष्टत आवलिकाऽसंख्येयभागप्रमाणो लभ्यते ।

तत्रैकस्याऽक्षपकस्याऽतीतकाल एकसामयिकः समयप्रबद्धानां भवबद्धानां वाऽनुसमयनिर्लेपनकालः प्रभूतो 'अतीतो' व्यतिक्रान्तः, अक्षपकस्याऽतीतकाले द्वयोः पार्श्वयोरनिर्लेपनस्थित्योरुदयो जातः, मध्ये चैका निर्लेपनस्थितिरुदेति स्म, पुनः कदाचिद् द्वयोः पार्श्वयोरनिर्लेपनस्थित्योरुदयो जातः, मध्ये चैका निर्लेपनस्थितिरुदेति स्म । एवं पुनः पुनर्लब्धः समुदितोऽ-

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

ऽनन्तसमयप्रमाण एकसामयिकोऽनुसमयनिर्लेपनकालः प्रभूतः । ततो द्विसामयिकोऽनुसमयनिर्लेपनकालो विशेषहीनः, ततस्त्रिसामयिकोऽनुसमयनिर्लेपनकालो विशेषहीनः । एवंक्रमेण'**आलिअसंखंसे**' त्ति'आवलिकाऽसंख्यांशे' आवलिकाऽसंख्येयभागे 'द्विगुणोनो' द्विगुणहीनः । इदमुक्तं भवति–प्रथमस्थानत आवलिकाऽसंख्येयभागमात्रेषु स्थानेषु गतेष्वेकसामयिकनिर्लेपनकालतो द्विगुणहीनो ज्ञेयः, ततः पुनरावलिकाऽसंख्येयभागमात्रेषु स्थानेषु गतेषु द्विगुणहीनो बोध्यः । ततः पुनरेतावत्सु स्थानेषु गतेषु द्विगुणहीनो ज्ञेयः । एवंक्रमेण तावद्वाच्यम्, यावच्चरमस्थानम् । नानाद्विगुणहानिस्थानान्यावलिकाऽसंख्येयभागमात्राणि भवन्ति, सकलस्थानानामप्यावलिकाऽसंख्येयभागमात्रत्वात् ।

क्षपकस्याऽपीत्थमेवाऽनुसमयनिर्लेपनकालः प्ररूपयितव्यः । तथाहि–एकसामयिकः समयप्रबद्धानां भवबद्धानां वाऽनुसमयनिर्लेपनकालः प्रभूतः, स चाऽतीतकाले नानाक्षपकापेक्षयाऽनन्तसमयप्रमाणः, एकक्षपकं त्वाश्रित्याऽऽवलिकाऽसंख्येयभागप्रमाणो ज्ञातव्यः, ततो विशेषहीनो द्विसामयिकः समयप्रबद्धानां भवबद्धानां वाऽनुसमयनिर्लेपनकालः, सोऽपि नानाक्षपकापेक्षयाऽनन्तसमयप्रमाणः, एकक्षपकं तु प्रतीत्याऽऽवलिकाऽसंख्येयभागप्रमाणः । एवं विशेषहीनक्रमेण गच्छन्नावलिकाऽसंख्येयभागिकोऽनुसमयनिर्लेपनकालो द्विगुणहीनो भवति । स च नानाक्षपकापेक्षयाऽनन्तसमयप्रमाणः, एकक्षपकाऽपेक्षया त्वावलिकाऽसंख्येयभागप्रमाणः । प्रत्यपादि च **कषायप्राभृतचूर्णौ**–"**खवगस्स वा अक्खवगस्स वा समयपबद्धाण भवबद्धाणं अणुसमयणिल्लेवणकालो एगसमइओ बहुगो । दुसमइओ विसेसहीणो । एवं गंतूण आवलियाए असंखेज्जदिभागे दुगुणहीणो ।**" इति । ततः पुनरावलिकाऽसंख्येयभागे गते द्विगुणहीनो भवति । नानाद्विगुणहानिस्थानान्यावलिकाऽसंख्येयभागमात्राण्यवसेयानि, सर्वेषां स्थानानामावलिकाऽसंख्येयभागमात्रत्वात् ।

अथोत्कृष्टोनुसमयनिर्लेपनकालं भणति–'**आव०**' इत्यादि, तत्र' ज्येष्ठः' उत्कृष्टः क्षपकस्याक्षपकस्य वाऽनुसमयनिर्लेपनकाल आवलिकाऽसंख्येयभागो ज्ञातव्यः, नाधिकः । उक्तं च **कषायप्राभृतचूर्णौ**–"**उक्कस्सओ वि अणुसमयणिल्लेवणकालो आवलियाए असंखेज्जदिभागो ।**" इति ॥१५४॥

अथाऽनिर्लेपनस्थितिभिरन्तरितनिर्लेपनस्थितीनामुदयेन निर्लेपितानां समयप्रबद्धानां भवबद्धानां चाऽल्पबहुत्वमक्षपकस्याऽतीतकालमाश्रित्याऽभिधित्सुराह—

**एगसमयंतरेणं अप्पा णिल्लेवियक्खणपबद्धा ।**
**कमसो अहिआ दुगुणा पल्लासंखेज्जभागम्मि ॥१५५॥**

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**जवमज्झं ठाणअसंखेज्जइभागे तहेव भवबद्धा ।**
**गुरु णिल्लेवणअंतरमसंखभागो उ पल्लस्स ॥१५६॥**

एकसमयान्तरेणाऽल्पा निर्लेपितक्षणप्रबद्धाः ।
क्रमशोऽधिका द्विगुणाः पल्याऽसंख्येयभागे ॥१५५॥
यवमध्यं स्थानाऽसंख्येयतमभागे तथैव भवबद्धाः खलु ।
गुरु निर्लेपनान्तरमसंख्यभागस्तु पल्यस्य ॥१५६॥ इति पदसंस्कारः ।

**'एग०'** इत्यादि, एकसमयान्तरेण 'निर्लेपितक्षणप्रबद्धाः' निर्लेपितसमयप्रबद्धाः 'अल्पाः' स्तोकाः । इदमुक्तं भवति–अक्षपकस्याऽतीतकाले द्वयोः पार्श्वयोरेकैकाऽनिर्लेपनस्थितिरुदेति, मध्ये चैकस्यां वाऽनेकासु चोदयमानासु निर्लेपनस्थितिषु यावन्तः समयप्रबद्धा निर्लेपिताः, ते गणयितव्याः, ततः पुनर्द्वयोः पार्श्वयोरेकैकाऽनिर्लेपनस्थितिरुदेति, मध्ये चोदयमानासु निर्लेपनस्थितिषु यावन्तः समयप्रबद्धा निर्लेपिताः, ते गणयितव्याः । एवं पुनः पुनरेकैकाऽनिर्लेपनस्थित्यन्तरेण निर्लेपिताः सर्वे समुदिताः समयप्रबद्धाः स्तोका भवन्ति, ते च नानाकर्माऽवस्थानकालाऽपेक्षयाऽनन्ताः, एककर्माऽवस्थानकालं त्वाश्रित्याऽसंख्येया भवन्ति ।

**'कमसो'** इत्यादि, क्रमशो 'अधिकाः' विशेषाधिका भवन्ति । इदमुक्तं भवति-एकसमयान्तरेण निर्लेपितसमयप्रबद्धतोऽतीतकाले द्विसमयान्तरेण निर्लेपिताः समयप्रबद्धा विशेषाधिका भवन्ति । तथाहि–अतीतकाले द्वयोः पार्श्वयोर्द्वे द्वेऽनिर्लेपनस्थिती उदितः, मध्ये चैकस्यामनेकासु चोदयमानासु निर्लेपनस्थितिषु निर्लेपिताः समयप्रबद्धा विशेषाधिका भवन्ति, ते च नानाकर्माऽवस्थानकालापेक्षयाऽनन्ताः, एककर्माऽवस्थानकालं त्वाश्रित्याऽसंख्येयाः । एवमग्रेऽपि वक्तव्यम् । आधिक्यं चैकसमयान्तरेण निर्लेपितसमयप्रबद्धान् पल्योपमाऽसंख्येयभागेन भक्त्वैकखण्डेन ज्ञातव्यम्, पल्योपमाऽसंख्येयभागे गते द्विगुणत्वात् । ततो द्विसमयान्तरेण निर्लेपितसमयप्रबद्धतस्त्रिसमयान्तरेण निर्लेपिताः समयप्रबद्धा विशेषाधिकाः, ततश्चतुस्समयान्तरेण निर्लेपितसमयप्रबद्धा विशेषाधिकाः । एवंक्रमेण पल्योपमाऽसंख्येयभागे गते द्विगुणा भवन्ति । तदेवाह—**'दुगुणो'** इत्यादि, तत्र'पल्यासंख्येयभागे' पल्योपमस्याऽसंख्येयभागे गते 'द्विगुणाः' द्विगुणवृद्धा भवन्ति । अयम्भावः—अतीतकाले द्वयोः पार्श्वयोः पल्योपमाऽसंख्येयभागमात्र्योऽनिर्लेपनस्थितय उदयन्ति, मध्ये चोदयमानासु निर्लेपनस्थितिषु निर्लेपिताः समयप्रबद्धा एकसमयान्तरेण निर्लेपितसमयप्रबद्धतो द्विगुणा भवन्ति । ते च नानाकर्माऽवस्थानकालापेक्षयाऽनन्ताः, एककर्माऽवस्थानकालं त्वाश्रित्याऽसंख्येया भवन्ति । ततः पुनः पल्योपमाऽसंख्येयभागे गते निर्लेपिताः समयप्रबद्धा द्विगुणा भवन्ति । एवमसंख्यातेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते, तदभिधित्सुराह–**'जवमज्झं'** इत्यादि, यवमध्यं 'स्थानाऽसंख्येयतमभागे' सर्वस्थानानामसंख्येयतमे भागे गते भवतीति शेषः । भावार्थः पुनरयम्–सकलानि स्थानानि

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

पल्योपमाऽसंख्येयभागप्रमाणानि भवन्ति, उत्कृष्टतो निर्लेपनान्तरस्य पल्योपमाऽसंख्येयभाग-प्रमाणत्वस्य वक्ष्यमाणत्वात् । तत्र सकलस्थानानामसंख्येयतमभागमात्रेषु स्थानेषु गतेषु यवमध्यं प्राप्यते । ततो यवमध्यस्योपरि समयोत्तरक्रमेण वृद्धसमयान्तरेण निर्लेपितसमयप्रबद्धा विशेषहीना विशेषहीना भवन्ति, पल्योपमाऽसंख्येयभागे च गते द्विगुणहीना भवन्ति । ततः पुनः पल्योपमासंख्येयभागे व्रजिते द्विगुणहीना भवन्ति । एवंक्रमेणाऽसंख्येयद्विगुणहानिस्थानेषु गतेषु चरमस्थानं प्राप्यते ।

'**तद्देव**' इत्यादि, 'तथैव' यथैकसमयाद्यन्तरेण निर्लेपितसमयप्रबद्धा विशेषाधिकक्रमेण निरूपिताः,पल्योपमाऽसंख्येयभागे च गते द्विगुणा दर्शिताः, तथैव भवबद्धा अपि बोध्याः, स्थानानां चाऽसंख्येयतमभागे यवमध्यं ज्ञातव्यम् । यदभ्यधायि **कषायप्राभृतचूर्णौ–"अखवगस्स एगसमएण अंतरेण णिल्लेविदा समयपबद्धा वा भवबद्धा वा थोवा, दुसमएण अंतरेण णिल्लेविदा विसेसाहिया, एवं गंतूण पलिदोवमस्स असंखेज्जदिभागे दुगुणा । ठाणाणमसंखेज्जदिभागे जवमज्झं ।"** इति ।

अथ चरमस्थानस्य स्पष्टप्रतिपत्तये भणति–'**गुरु**' इत्यादि, 'गुरु' उत्कृष्टं निर्लेपनाऽन्तर-मसंख्यभागस्तु पल्यस्य भवति, उत्कृष्टतोऽप्यक्षपकस्याऽनिर्लेपनस्थितयः पल्योपमाऽसंख्येय-भागप्रमाणा एव निरन्तरमुदयन्ति, एताभ्योऽधिका अनिर्लेपनस्थितयो न संभवन्तीत्यर्थः । तथा चोक्तं **कषायप्राभृतचूर्णौ–"उक्कस्सं पि णिल्लेवणंतरं पलिदोवमस्स असंखेज्जदि-भागो ।" इति ।**

क्षपकस्य तूत्कृष्टतोऽप्यनिर्लेपनस्थितय आवलिकाऽसंख्येयभागमिता निरन्तरमुदयन्ति, ताभ्योऽधिकाः, तेन क्षपकस्योत्कृष्टं निर्लेपनाऽन्तरमावलिकाऽसंख्येयभागप्रमितं भवति ॥१५५-१५६॥

अथैकसमयेन निर्लेप्यमानभवसमयप्रबद्धान् निर्लेपितभवसमयप्रबद्धानां चाल्पबहुत्वं व्याजि-हीर्षुराह—

**समयम्मि पहुडि इगओ पल्लासंखंसखणभवपबद्धा ।**
**णिल्लेविज्जन्ति इगेगेणं णिल्लेविया थोवा ॥१५७॥**
**कमसो अहिआ पल्लअसंखंसम्मि दुगुणा तहा जवमज्झं ।**
**णाणंतरेहि एगंतरछेयणयाइ खलु असंखगुणाइं ॥१५८॥ (आर्यागीतिः)**

समये प्रभृत्येकतः पल्यासंख्यांशक्षणभवप्रबद्धाः ।
निर्लेप्यन्त एकैकेन निर्लेपिताः स्तोकाः ॥ १५७ ॥
क्रमशो-ऽधिकाः पल्याऽसंख्यांशे द्विगुणास्तथा यवमध्यम् ।
नानान्तरेभ्य एकान्तरच्छेदनकानि खल्वसंख्यगुणानि ॥ १५८ ॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'समये'** इत्यादि, 'समये' एकवचननिर्देशाद् एकस्मिन् समये 'एकः' प्रत्यासत्त्या एकसमयबद्धादेकभवप्रबद्धाच्च प्रभृति पल्यासंख्यांशक्षणभवप्रबद्धाः' पल्योपमाऽसंख्येयभागप्रमाणाः समयप्रबद्धा भवप्रबद्धाश्च निर्लेप्यन्ते। इदमुक्तं भवति-एकस्मिन् समय एकः समयप्रबद्धो भवबद्धो वा निर्लेप्यते, एवमेकस्मिन् समये द्वौ समयप्रबद्धौ भवबद्धौ वा निर्लेप्यतः, एवमेकोत्तरवृद्ध्या तावद् वक्तव्यम् , यावदेकस्मिन् समये पल्योपमाऽसंख्यातभागप्रमिताः समयप्रबद्धा भवबद्धा वा निर्लेप्यन्ते। उक्तं च **कषायप्राभृतचूर्णौ—"एक्केण समएण णिल्लेविज्जंति समयपबद्धा वा भवबद्धा वा एक्को वा, दो वा तिण्णि वा उक्कस्सेण पलिदोवमस्स असंखेज्जदिभागो।"** इति।

**'इगेगेण'** इत्यादि, अतीतकालेऽयेकस्मिन् समयेऽकैकेन निर्लेपिताः 'स्तोकाः' अल्पाः समयप्रबद्धा भवप्रबद्धा वा भवन्ति। क्रमशो 'अधिकाः' विशेषाधिका भवन्ति। इदमत्र हृदयम्—एकसमये एकसमयप्रबद्ध एकभवप्रबद्धो वा निर्लेपितः, अन्यस्मिन्नेकसमये पुनरेकसमयप्रबद्ध एकभवप्रबद्धो वा निर्लेपितः। अनेन क्रमेणाऽतीतकाल एकैकसमयप्रबद्धा एकैकभवप्रबद्धा वा यावन्तो निर्लेपिताः, ते सर्वेऽनन्तराशिप्रमाणा भवन्तोऽपि स्तोका भवन्ति। तत एकसमये द्विद्विसमयप्रबद्धा द्विद्विभवप्रबद्धा वाऽतीतकाले निर्लेपिता विशेषाधिका भवन्ति, आधिक्यं च प्रागुक्तपदं पल्योपमाऽसंख्येयभागेन खण्डयित्वैकखण्डप्रमाणेन ज्ञातव्यम्। ततोऽप्येकसमये निर्लेपिता स्त्रित्रिसमयप्रबद्धास्त्रित्रिभवप्रबद्धा वा विशेषाधिका भवन्ति। यदत्रादि **कषायप्राभृतचूर्णौ—"एक्केक्केण णिल्लेविज्जंति, ते थोवा, दोण्णि णिल्लेविज्जंति विसेसाहिया। तिण्णि णिल्लेविज्जंति विसेसाहिया।"** इति। एवं विशेषाधिकक्रमेण गच्छन्तः पल्योपमाऽसंख्येयतमभागे गते द्विगुणा भवन्ति, इदश्च प्रथमं द्विगुणवृद्धिस्थानम्। ततः पुनः पल्योपमा-ऽसंख्येयभागे गते द्वितीयं द्विगुणवृद्धिस्थानं लभ्यते। ततः पुनः पल्योपमा-ऽ-संख्येयभागे गते तृतीयं द्विगुणवृद्धिस्थानं प्राप्यते। एवंक्रमेण पल्योपमाऽसंख्येयभागप्रमाणेषु द्विगुणवृद्धिस्थानेषु व्रजितेषु यवमध्यं प्राप्यते। तदेव दर्शयति—**'पल्ल०'** इत्यादि, 'पल्यासंख्यांशे' पल्योपमाऽसंख्येयभागे गते 'द्विगुणाः' एकस्मिन् समये निर्लेपिता समयप्रबद्धा भवप्रबद्धा वा द्विगुणा भवन्ति, 'तथा यवमध्यं' पल्योपमाऽ-संख्येयभागे च गते यवमध्यं भवतीति शेषः। अयम्भावः—प्रथमस्थानतः पल्योपमाऽसंख्येयभागे गत एकसमये निर्लेपितेभ्य एकैकसमयप्रबद्धेभ्य एकैकभवप्रबद्धेभ्यश्च यथाक्रमं तत्प्रायोग्यपल्योपमाऽसंख्येयभागमिता एकसमये निर्लेपिताः समयप्रबद्धा भवप्रबद्धाश्च द्विगुणा भवन्ति। उक्तं च **कषायप्राभृतचूर्णौ—"एवं गंतूण पलिदोवमस्स असंखेज्जदिभागे दुगुणा।"** इति। ततः पुनः पल्योपमाऽसंख्येयभागे गते द्वितीयं द्विगुणवृद्धिस्थानं लभ्यते। ततः पुनः पल्योपमाऽसंख्येयभागे व्यतिक्रान्ते तृतीयं द्विगुणवृद्धिस्थानं प्राप्यते। एवमसंख्यातेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं जायते। यवमध्यस्योपरि विशेषहीनक्रमेण वक्तव्याः, पल्यो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पमाऽसंख्येयभागे च गते द्विगुणहीना निगदितव्याः । एवं द्विगुणहीना द्विगुणहीनास्तावदभिधातव्याः, यावद् यवमध्यस्याऽधस्तनस्थानेभ्यो-ऽसंख्यातगुणेषु स्थानेषु गतेषु चरमस्थानं प्राप्यते ।

अथाऽल्पबहुत्वमभिधत्ते–'णाणंतरेहि' इत्यादि, 'नानान्तरेभ्यो' नानाप्रकारेभ्योऽन्तरेभ्यो द्विगुणवृद्धिहानिरूपेभ्यो मध्यगतेभ्यः स्थानेभ्यो नानाद्विगुणवृद्धिहानिस्थानेभ्य इत्यर्थः, 'एकान्तरच्छेदनकानि' द्वयोर्द्विगुणहान्योर्द्विगुणवृद्धयोर्वैकाऽन्तरे स्थितानां स्थानानामर्धच्छेदनकान्यसंख्यगुणानि भवन्ति । न्यगादि च कषायप्राभृतचूर्णौ–"णाणंतराणि थोवाणि, एक्कंतरच्छेदणाणि वि असंखेज्जगुणाणि ।" इति । इदन्त्ववधेयम्–नानाद्विगुणवृद्धिहानिस्थानेभ्यो द्विगुणहानिस्थानाऽन्तरार्धच्छेदनकानामप्यसंख्येयगुणत्वाद् द्वयोर्द्विगुणहान्योर्द्विगुणवृद्धयोर्वैकाऽपान्तरालवर्तीनि स्थानानि सुतरामसंख्यातगुणानि सिध्यन्ति । तानि च पल्योपमप्रथमवर्गमूला-ऽसंख्येयभागमितानि, अनन्तरवक्ष्यमाणगाथाद्वय एकसमयेन निर्लेपितसमयप्रबद्धतः पल्योपमप्रथमवर्गमूलस्या-ऽसंख्येयगुणत्वेन वक्ष्यमाणत्वात् ॥१५७-१५८॥

अथाऽक्षपकस्य त्रयोदशपदानामल्पबहुत्वमभिधातुकाम आह—

**जेट्ठोऽणुसमयणिल्लेवणकालोऽप्पो तओ इगे समये ।**
**णिल्लेविया उ भवबद्धा तत्तो य समयपबद्धा ॥१५९॥**
**तो खणपबद्धसेसयरहियठिई ताउ वग्गमूलं य ।**
**पल्लस्स तो पएसगुणहाणिठाणंतरं तत्तो ॥१६०॥**
**भवबद्धाणं णिल्लेवणठाणाइं कमा असंखगुणाइं ।**
**समयपबद्धाणं णिल्लेवणठाणाणि उण विसेसऽहिआइं ॥१६१॥**
**(आर्यागीतिः)**

**अणुसमयअवेयणकालोऽसंखगुणो उ खणपबद्धस्स ।**
**अंतो कम्मठिईए तोऽणुसमयवेयणअनेहो ॥१६२॥**
**ताउ अवेयणकालो सव्वो तो सव्वगो उ वेयणकालो ।**
**कमसो य असंखगुणो तो कम्मठिई विसेसअहिआ होज्जा ॥१६३॥**
**(आर्यागीतिः)**

ज्येष्ठोऽनुसमयनिर्लेपनकालोऽल्पस्ततः एकस्मिन् समये ।
निर्लेपितास्तु भवबद्धास्तेभ्यश्च समयप्रबद्धाः ॥१५९॥
तेभ्यः क्षणप्रबद्धशेषक-रहितस्थितयस्ताभ्यो वर्गमूलञ्च ।
पल्यस्य ततः प्रदेशगुणहानिस्थानान्तरं ततः ॥१६०॥

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

भवबद्धानां निर्लेपनस्थानानि क्रमादसंख्यगुणानि ।
समयप्रबद्धानां निर्लेपनस्थानानि पुनर्विशेषाधिकानि ॥१६१॥
अनुसमयाऽवेदनकालोऽसंख्यगुणस्तु क्षणप्रबद्धस्य ।
अन्तः कर्मस्थित्यास्ततोऽनुसमयवेदनाऽनेहाः ॥१६२॥
तस्मादवेदनकालः सर्वस्ततः सर्वस्तु वेदनकालः ।
क्रमशश्चाऽसंख्यगुणस्ततः कर्मस्थितिर्विशेषाधिका भवति ॥१६३॥ इति पदसंस्कारः ।

**'जेट्ठो'** इत्यादि, 'ज्येष्ठः' उत्कृष्टोऽनुसमयनिर्लेपनकालो 'अल्पः' स्तोकः, स च समयप्रबद्धानां भवप्रबद्धानां वा ग्राह्यः, स पुनः प्रमाणत आवलिकाऽसंख्येयभागमात्रो भवति । **'कमा असंखगुणाइं'** ति 'क्रमादसंख्यगुणानि' वक्ष्यमाणानि षट्पदानि क्रमादसंख्येयगुणानि वक्तव्यानि । तद्यथा—**'तओ'** इत्यादि, 'ततः' उत्कृष्टाऽनुसमयनिर्लेपनकालत एकस्मिन् समये निर्लेपितास्तु भवबद्धा असंख्येयगुणा भवन्ति, पल्योपमाऽसंख्येयभागप्रमाणत्वात् । न चाऽयं हेतुरसिद्ध इति वाच्यम् , एकस्मिन् समय उत्कृष्टतः पल्योपमाऽसंख्येयभागमात्राणां भवबद्धानां निर्लेपनस्य प्राक्प्ररूपितत्वात् ।

**'तत्तो य'** इत्यादि, तेभ्यश्चैकसमये निर्लेपितभवबद्धेभ्य एकस्मिन् समये निर्लेपिताः समयप्रबद्धा असंख्येयगुणा भवन्ति । एतेऽपि पल्योपमऽसंख्येयभागप्रमाणा भवन्ति, किन्त्वेकस्मिन् भवबद्धे निर्लेप्यमानेऽसंख्येयसमयप्रबद्धा निर्लेप्यन्ते, जघन्यतोऽप्येकभवबद्धेऽन्तर्मुहूर्तमात्राणां समयप्रबद्धानां संभवात् । तेन पूर्वपदतोऽसंख्यातगुणमिदं पदं सिध्यति । **'तो'** इत्यादि, 'तेभ्यः' एकस्मिन् समये निर्लेपितसमयप्रबद्धतः 'क्षणप्रबद्धशेषक-रहितस्थितयः' समयप्रबद्धशेषकैर्विरहिता असामान्यलक्षणा निरन्तराः स्थितयोऽसंख्यातगुणा भवन्ति, एता अपि पल्योपमाऽसंख्येयभागप्रमाणाः, किन्त्वेकसमये निर्लेपितसमयप्रबद्धतोऽसंख्येयगुणाः पल्योपमप्रथमवर्गमूलस्य चाऽसंख्येभागमात्र्यो भवन्ति, एताभ्यो वर्गमूलस्याऽसंख्येयगुणत्वात् । एतासां पल्योपमा-ऽसंख्येयभागमात्रत्वं च **चतुश्चत्वारिंशदधिकशततम**गाथायाष्टीकायामसामान्यस्थितिप्ररूपणावसरे प्राक्प्रतिपादितम् ।

**'ताउ'** इत्यादि, 'ताभ्यः' समयप्रबद्धशेषकविरहिताभ्यः स्थितिभ्यः 'पल्यस्य' पल्योपमस्य 'वर्गमूलं' प्रथमवर्गमूलमसंख्यातगुणं भवति, सुगममेतद् । ततः प्रदेशगुणहानिस्थानान्तरमसंख्येयगुणम् , असंख्यातपल्योपमप्रथमवर्गमूलप्रमाणत्वात् । तथाहि—बन्धसमयेऽबाधाकालादूर्ध्वं प्रथमस्थितिस्थाने यद् दलं निषिञ्चति, ततो विशेषहीनं दलं द्वितीयस्थितिस्थाने निषिञ्चति । ततोऽपि विशेषहीनं तृतीयस्थितिस्थाने निषिञ्चति । एवं विशेषहीनक्रमेण तावद् निषिञ्चति, यावच्चरमस्थितिस्थानम् । तत्र प्रथमस्थानतः पल्योपमाऽसंख्येयभागमात्रेषु स्थानेषु गतेषु प्रथमस्थानापेक्षया दलं द्विगुणहीनं भवति । ततः पुनरेतावत्सु स्थानेषु गतेषु दलं द्विगुणहीनं भवति । एवं तावद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाच्यम् , यावच्चरमस्थानम् । इह विवक्षितस्थानतो यावत्सु स्थानेषु गतेषु दलं द्विगुणहीनं भवति, तावन्ति स्थानानि प्रदेशद्विगुणहानिस्थानान्तरमुच्यन्ते, तच्चाऽसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणम्। यदुक्तं पञ्चसंग्रहटीकायाम्—"**एकस्मिन् द्विगुणहान्योरन्तरे यानि निषेकस्थानानि, तानि असंख्येयगुणानि, तेषामसंख्येयानि पल्योपमवर्गमूलानि परिमाणं इति कृत्वा** ।" इति । ततो भवबद्धानां निर्लेपनस्थानान्यसंख्येयगुणानि भवन्ति । एतान्यप्यसंख्यातपल्योपमप्रथमवर्गमूलप्रमितानि प्राक्प्ररूपितानि, किन्तु पूर्वतोऽसंख्येयगुणानि बोद्धव्यानि । ततः पुनः समयप्रबद्धानां निर्लेपनस्थानानि विशेषाधिकानि भवन्ति, आधिक्यं चाऽन्तमुहूर्तसमयराशिमात्रेण ज्ञातव्यम् । कथमेतदवगन्तव्यम् ? इति चेत् , उच्यते-समयप्रबद्धानां जघन्यनिर्लेपनस्थानतोऽन्तर्मुहूर्तप्रमाणानि निर्लेपनस्थानान्युल्लङ्घ्य भवबद्धानां जघन्यं निर्लेपनस्थानं प्राप्यते, चरमनिर्लेपनस्थानं त्वेकत्र । तेन भवबद्धनिर्लेपनस्थानतः समयप्रबद्धनिर्लेपनस्थानान्यन्तर्मुहूर्तप्रमाणनिर्लेपनस्थानैरधिकानि भवन्ति । ततः कर्मस्थित्या अन्तर्-मध्ये कर्मावस्थानकालाभ्यन्तर इत्यर्थः, 'क्षणप्रबद्धस्य' एकवचननिर्देशाद् एकसमयप्रबद्धस्याऽनुसमयाऽवेदनकालस्तु तुशब्दस्य भिन्नक्रमत्वेनाऽत्र योजनाद्, 'असंख्यगुणः' असंख्येयगुणो भवति । कर्माऽवस्थानकालस्य प्रथमसमये सञ्चितसमयप्रबद्धस्य बन्धावलिकायां व्यतिक्रान्तायां पल्योपमाऽसंख्येयभागप्रमाणं निरन्तरवेदनकालं व्यतिक्रम्य यत्र वा तत्र वा कर्माऽवस्थानकालाभ्यन्तरे निरन्तरमवेदनकाल उत्कृष्टतोऽसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणो लभ्यते, उद्वर्तनाऽपवर्तनाबलेनोत्कृष्टतो निरन्तरमेतावतां निरुक्तसमयप्रबद्धविशिष्टनिषेकाणां शून्यत्वसम्पादनात् । स च निरुक्तसमयप्रबद्धस्याऽनुसमयावेदनकाल उच्यते, परिमाणतश्चाऽसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणो भवति, किन्तु पूर्वपदतोऽसंख्येयगुणो भवतीति ज्ञाप्यतेऽनेनाल्पबहुत्वेन ।

अथ वक्ष्यमाणानां त्रयाणां पदानामसंख्येयगुणत्वं भवतीति प्रकटयितुकामः प्राह—'**तो**' 'इत्यादि, 'खणपबद्धस्स' इत्यनुवर्तते, 'ततः' कर्मावस्थानकालाभ्यन्तरे निरन्तरावेदनकालतः 'अनुसमयवेदनानेहा' अनेहःशब्दः कालवाचकः, **यदुक्तमभिधानचिन्तामणौ—"स्यात् कालः समयो दिष्टानेहसौ सर्वमूषकः** ।" इति । कर्माऽवस्थानकालाभ्यन्तरयेकसमयप्रबद्धस्य निरन्तरवेदनकालोऽसंख्यगुणो भवतीत्यर्थः । एकस्मिन् समये बद्धप्रदेशसमूहो बन्धावलिकायां व्यतिक्रान्तायामसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणं कालं निरन्तरं वेद्यते, तावान् कालः समयप्रबद्धस्याऽनुसमयवेदनकाल उच्यते, स चाऽ-संख्यातपल्योपमप्रथमवर्गमूलमात्रो भवन् पूर्वतोऽसंख्यातगुणो भवति ।

'**ताउ**' इत्यादि, 'तस्मात्' कर्माऽवस्थानकालाभ्यन्तर एकसमयप्रबद्धस्य निरन्तरवेदनकालात् सर्वोऽवेदनकालोऽसंख्यगुणो भवति । अयं भावः—एकसमयप्रबद्धो बन्धावलिकाऽतिक्रमेऽसंख्यातपल्योपमप्रथमवर्गमूलमात्रं कालं यावन्निरन्तरं वेद्यते, ततः कदाचिद् वेद्यते, कदाचिन्न वेद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र कर्माऽवस्थानकालाभ्यन्तरे सान्तरनिरन्तरस्वरूपेण यावन्तं कालं न वेद्यते, समुदितस्तावान् कालः सर्वाऽवेदनकालो भण्यते, पूर्वपदतश्चाऽसंख्यातगुणो भवति। सोऽप्यसंख्यातपल्योपमप्रथम-वर्गमूलमात्रो भवति।

'तो' इत्यादि, 'ततः' कर्माऽवस्थानकालाभ्यन्तरयेकसमयप्रबद्धस्य सर्वाऽवेदनकालतः 'सर्वस्तु वेदनकालः' कर्माऽ-वस्थानकालाभ्यन्तर एकसमयप्रबद्धस्य सर्वो वेदनकालोऽसंख्यगुणो भवति। इदमुक्तं भवति–एकसमयप्रबद्धो बन्धावलिकायां व्यतिक्रान्तायां निरन्तरं पल्योपमाऽसंख्येयभागं यावद् वेद्यते, तत एकसमयतः प्रभृति समयोत्तरवृद्धिक्रमेणोत्कर्षतः पल्योपमाऽसंख्येयभागं यावन्न वेद्यते। ततः पुनर्निरुक्तसमयप्रबद्धः समयोत्तरवृद्धिक्रमेणोत्कृष्टतो निरन्तरं पल्योपमाऽसंख्येयभागं यावद् वेद्यते। ततः पुनरेकादिसमयैरन्तरयित्वा वेद्यते, एवं कर्माऽवस्थानकालाभ्यन्तरे यावन्तं कालं निरुक्तसमयप्रबद्धो वेद्यते, समुदितस्तावान् कालः सर्ववेदनकाल उच्यते, पूर्वपदतश्चाऽसंख्यातगुणो भवति, स च कर्माऽवस्थानकालस्य बह्वसंख्येयभागप्रमाणो बोद्धव्यः, पूर्वपदस्य पल्योपमाऽसंख्येयभागमात्रत्वेन कर्माऽवस्थानकालाऽसंख्येयभागमात्रत्वात् , अस्माच्च पदात् कर्मावस्थानकालस्य विशेषाधिकत्वात्।

'तो' इत्यादि, 'ततः' कर्माऽवस्थानकालाभ्यन्तरे समयप्रबद्धस्य सर्ववेदनकालात् 'कर्मस्थितिः' कर्माऽवस्थानकाललक्षणा स्थितिर्विशेषाधिका भवति। निरुक्तसमयप्रबद्धस्य सर्ववेदनकालः सर्वाऽवेदनकालश्चोभौ मिलित्वा कर्माऽवस्थानकालो भवतः। अथ निरुक्तसमयप्रबद्ध-सर्वावेदनकालस्य सर्ववेदनकालाऽसंख्येयभागप्रमाणत्वात् कर्माऽवस्थानकालः सर्ववेदनकालतः सर्वाऽवेदककालेन विशेषाधिको भवति। प्रत्यपादि च कषायप्राभृतचूर्णौ–"अप्पाबहुअं– **(१) सव्वत्थोवमणुसमयणिल्लेवणकंडयमुक्कस्सयं। (२) जे एगसमएण णिल्लेविज्जंति भवबद्धा, ते असंखेज्जगुणा। (३) समयपबद्धा एगसमएण णिल्लेविज्जंति असंखेज्जगुणा। (४) समयपबद्धसेसएण विरहिदाओ णिरंतराओ ट्ठिदीओ असंखेज्जगुणाओ। (५) पलिदोवमवग्गमूलमसंखेज्जगुणं। (६) णिसेगगुणहाणिट्ठाणंतरमसंखेज्जगुणं। (७) भवबद्धाणं णिल्लेवणट्ठाणाणि असंखेज्जगुणाणि। (८) समयपबद्धाणं णिल्लेवणट्ठाणाणि विसेसाहियाणि। (९) समयपबद्धस्स कम्मट्ठिदीए अंतो अणुसमयअवेदगकालो असंखेज्जगुणो। (१०) समयपबद्धस्स कम्मट्ठिदीए अंतो अणुसमयवेदगकालो असंखेज्जगुणो। (११) सव्वो अवेदगकालो असंखेज्जगुणो। (१२) सव्वो वेदगकालो असंखेज्जगुणो। (१३) कम्मट्ठिदी विसेसाहिया।"** इति॥ १५९–१६०–१६१–१६२–१६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अभव्यप्रायोग्यप्ररूपणामाश्रित्य यन्त्रकम्

(१) निर्लेपनस्थानानि

(अ) निर्लेपनस्थानानि पल्योपमाऽसंख्येयभागप्रमितानि भवन्ति। ( गाथा–१४७ )

(ब) मतान्तरेण तु कर्माऽवस्थानकालबद्धसंख्येयभागमात्राणि भवन्ति। ( गाथा–१४७ )

(२) एकजीवमाश्रित्य निर्लेपनस्थानेषु निर्लेपितसमयप्रबद्धानां व्यतिक्रान्तकालाल्पबहुत्वम्—

(१) अतीतकाले जघन्यनिर्लेपनस्थाने निर्लेपितसमयप्रबद्धानां व्यतिक्रान्तः कालोऽल्पः। (गाथा–१४८–१४९)

(२) ततोऽतीतकाले द्वितीयनिर्लेपनस्थाने निर्लेपितसमयप्रबद्धानां व्यतिक्रान्तः कालो विशेषाधिकः।

(३) ततोऽतीतकाले तृतीयनिर्लेपनस्थाने निर्लेपितसमयप्रबद्धानां व्यतिक्रान्तकालो विशेषाधिकः।

एवं विशेषाधिकक्रमेण तावद्वक्तव्यम्, यावद् यवमध्यम्।

यवमध्यस्योपरितन उत्तरोत्तरनिर्लेपनस्थाने व्यतिक्रान्तः कालो विशेषहीनक्रमेण तावद्गच्छति, यावदुत्कृष्टनिर्लेपनस्थानम्।

परम्परोपनिधया तु जघन्यनिर्लेपनस्थानतः पल्योपमाऽसंख्येयभागे गते व्यतिक्रान्तकालो द्विगुणो भवति। ततः पुनः पल्योपमाऽसंख्येयभागे गते व्यतीतः कालो द्विगुणो भवति। एवं तावद्वाच्यम्, यावद् यवमध्यम्। तस्योपरि पल्योपमाऽसंख्येयभागे गते द्विगुणहीनो भवति, ततः पुनः पल्योपमाऽसंख्येयभागे गते द्विगुणहीनो भवति। एवं तावद्वक्तव्यम्, यावदुत्कृष्टनिर्लेपनस्थानम्।

(३) अल्पबहुत्वम्—

(१) नानाद्विगुणहानयः स्तोकाः, ताश्च पल्योपमाऽर्धच्छेदनकाऽसंख्येयभागप्रमाणाः। ( गाथा--१५० )

(२) ताभ्यो द्विगुणहान्यन्तरमसंख्येयगुणम्।

(४) एकजीवमाश्रित्य भवबद्धाऽपेक्षया प्ररूपणम्—

समयप्रबद्धवद् भवबद्धानप्याश्रित्य वक्तव्यम्, नवरं समयप्रबद्धस्य जघन्यनिर्लेपनस्थानतोऽन्तर्मुहूर्तप्रमाणेषु स्थानेषु गतेषु भवबद्धस्य जघन्यनिर्लेपनस्थानं प्राप्यते। ( गाथा-१५१ )

(५) एकादिप्रदेशैर्निर्लेपितभवसमयप्रबद्धानामल्पबहुत्वम्—

(१) एकप्रदेशेन निर्लेपिताः समयप्रबद्धाः स्तोका भवन्ति। ( गाथा--१५२)

(२) द्वाभ्यां प्रदेशाभ्यां निर्लेपिताः समयप्रबद्धा विशेषाधिका भवन्ति।

(३) त्रिभिः प्रदेशैर्निर्लेपिताः समयप्रबद्धा विशेषाधिका भवन्ति।

एवं विशेषाऽधिकक्रमेण तावद्वक्तव्यम्, यावद् यवमध्यम्। यवमध्यस्योपर्येकोत्तरवृद्धयापन्नप्रदेशैर्निर्लेपितसमयप्रबद्धा विशेषहीनक्रमेण तावद् गच्छन्ति, यावच्चरमस्थानम्।

अथ परम्परोपनिधयाऽल्पबहुत्वम्—

एकप्रदेशेन निर्लेपितसमयप्रबद्धतः सकलस्थानासंख्येयभागे गते निर्लेपितसमयप्रबद्धा द्विगुणा भवन्ति, ततः पुनस्तावत्स्थानेषु गतेषु निर्लेपितसमयप्रबद्धा द्विगुणा भवन्ति। एवं तावद्वक्तव्यम्, यावद् यवमध्यम्।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

यवमध्यस्योपरि सकलस्थानाऽसंख्येयभागे गते द्विगुणहीना भवन्ति, पुनस्तावन्मात्रेषु स्थानेषु गतेषु द्विगुणहीना भवन्ति । एवं तावद्वक्तव्यम्, यावच्चरमस्थानम् ।

एवं भवबद्धा अपि बोध्याः ।

(६) अल्पबहुत्वम्—

(१) तत्र नानाऽन्तराणि स्तोकानि । ( गाथा--१५३ )

(२) तत एकान्तरमनन्तगुणम् ।

(७) अतीतकालयेकजीवमाश्रित्याऽनुसमयनिर्लेपनकालाल्पबहुत्वम्—

(१) एकसामयिकोऽनुसमयनिर्लेपनकालः सर्वप्रभूतः । ( गाथा--१५४ )

(२) ततो द्विसामयिकोऽनुसमयनिर्लेपनकालो विशेषहीनः ।

(३) ततस्त्रिसामयिकोऽनुसमयनिर्लेपनकालो विशेषहीनः ।

(४) ततश्चतुःसामयिकोऽनुसमयनिर्लेपनकालो विशेषहीनः ।

एवं तावद्वक्तव्यम्, यावदावलिकाऽसंख्येयभागः ।

परम्परोपनिधयाऽल्पबहुत्वम्—एकसामयिकाऽनुसमयनिर्लेपनकालत आवलिकाऽसंख्येयभागे गतेऽनुसमयनिर्लेपनकालो द्विगुणहीनो भवति । ततः पुनरावलिकाऽसंख्येयभागे गते द्विगुणहीनो भवति । एवं तावद्वक्तव्यम्, यावच्चरमस्थानम् ।

(८) एकादिसमयान्तरेण निर्लेपितभवसमयप्रबद्धानामल्पबहुत्वम्—

(१) एकसमयान्तरेण निर्लेपितसमयप्रबद्धाः स्तोकाः ( गाथा--१५५--१५६ )

(२) ततो द्विसमयान्तरेण निर्लेपितसमयप्रबद्धा विशेषाऽधिकाः ।

(३) ततस्त्रिसमयान्तरेण निर्लेपितसमयप्रबद्धा विशेषाऽधिकाः ।

एवमेकोत्तरवृद्ध्यापन्नसमयान्तरेण निर्लेपिताः समयप्रबद्धा विशेषाधिकक्रमेण तावद्वक्तव्याः, यावद् यवमध्यम् ।

ततो यवमध्यस्योपर्येकोत्तरवृद्ध्यापन्नसमयान्तरेण निर्लेपितसमयप्रबद्धा विशेषहीनक्रमेण गच्छन्ति, यावच्चरमस्थानम् ।

तत्र प्रथमस्थानतः पल्योपमा-ऽसंख्येयभागमात्रस्थानेषु गतेष्वेकं द्विगुणवृद्धिस्थानं प्राप्यते । पुनस्तावन्मात्रेषु स्थानेषु गतेषु द्विगुणवृद्धिस्थानं लभ्यते । एवमग्रेऽपि । सर्वस्थानानाञ्चाऽसंख्येयभागे यवमध्यं प्राप्यते । तत एकोत्तरवृद्ध्यापन्नसमयान्तरेण निर्लेपिताः समयप्रबद्धा विशेषहीनक्रमेण गच्छन्ति, पल्योपमासंख्येयभागमात्रस्थानेषु च गतेषु द्विगुणहीना भवन्ति, पुनस्तावन्मात्रेषु स्थानेषु गतेषु द्विगुणहीनाः । एवं तावद् वाच्यम्, यावच्चरमस्थानम् ।

एवं भवबद्धा अपि बोध्याः ।

(९) एकसमये निर्लेपितभवसमयप्रबद्धाः--

एकसमये जघन्यत एकसमयप्रबद्धो एकभवबद्धो वा निर्लेप्यते । उत्कृष्टतः पुनरेकसमये पल्यो-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

पमाऽसंख्येयभागमिताः समयप्रबद्धा भवप्रबद्धा वा निर्लेप्यन्ते। (गाथा--१५७)

अनन्तरोपनिधयाऽल्पबहुत्वम्—

(१) एकसमय एकैकेन निर्लेपिताः समयप्रबद्धाः स्तोकाः।

(२) तत एकसमये द्वाभ्यां द्वाभ्यां निर्लेपिताः समयप्रबद्धा विशेषाधिकाः।

(३) तत एकसमये त्रिभिस्त्रिभिर्निर्लेपिताः समयप्रबद्धा विशेषाधिकाः।

एवमेकोत्तरवृद्ध्या निर्लेपिताः समयप्रबद्धा विशेषाधिकक्रमेण तावद् वाच्याः, यावद् यवमध्यम्। यवमध्यस्योपरि विशेषहीनक्रमेण तावद्वाच्यम्, यावच्चरमस्थानम्।

परम्परोपनिधयाऽल्पबहुत्वम्—एकसमयेकैकेन निर्लेपितेभ्यः समयप्रबद्धेभ्यो भवबद्धेभ्यो वैकसमये निर्लेपिताः पल्योपमाऽसंख्येयभागमात्राः समयप्रबद्धा भवबद्धा वा द्विगुणा भवन्ति। ततः पुनः पल्योपमाऽसंख्येयभागे गते द्विगुणा भवन्ति। ततः पुनः पल्योपमाऽसंख्येयभागे गते द्विगुणा भवन्ति। एवं क्रमेणाऽसंख्येयेषु द्विगुणवृद्धिस्थानेषु गतेषु यवमध्यं प्राप्यते। यवमध्यस्योपरि पल्योपमाऽसंख्येयभागे गते द्विगुणहीना भवन्ति, ततः पुनः पल्योपमाऽसंख्येयभागे गते द्विगुणहीना भवन्ति, एवं तावद्वाच्यम्, यावच्चरमस्थानम्।

(१०) अल्पबहुत्वम् (गाथा--१५९-१६३)

(१) अनुसमयनिर्लेपनकालः स्तोकः।

(२) तत एकसमयेन निर्लेप्यमाना भवबद्धा असंख्यगुणाः।

(३) तत एकसमयेन निर्लेप्यमानाः समयप्रबद्धा असंख्यगुणाः।

(४) ततः समयप्रबद्धशेषक-विरहिता निरन्तरस्थितयोऽसंख्येयगुणाः।

(५) ततः पल्योपमस्य वर्गमूलमसंख्येयगुणम्।

(६) ततः प्रदेशगुणहानिस्थानान्तरमसंख्येयगुणम्

(७) ततो भवबद्धानां निर्लेपनस्थानान्यसंख्येयगुणानि।

(८) ततः समयप्रबद्धानां निर्लेपनस्थानानि विशेषाधिकानि।

(९) ततः कर्माऽवस्थानकालाभ्यन्तरे समयप्रबद्धस्याऽनुसमयाऽवेदनकालोऽसंख्यगुणः।

(१०) ततः कर्माऽवस्थानकालाभ्यन्तरे समयप्रबद्धस्याऽनुसमयवेदनकालोऽसंख्यगुणः।

(११) ततः कर्माऽवस्थानकालाभ्यन्तरे समयप्रबद्धस्य सर्वोऽवेदनकालोऽसंख्येयगुणः।

(१२) ततः कर्माऽवस्थानकालाभ्यन्तरे समयप्रबद्धस्य सर्ववेदनकालोऽसंख्येयगुणः।

(१३) ततः कर्माऽवस्थानकालो विशेषाधिकः।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

**पञ्चविंशत्यधिकशततम**गाथायां द्वादशसंग्रहकिट्टीनामुपरितनीरसंख्येयभागप्रमाणा अवान्तरकिट्टीर्घातयतीत्युक्तम् । अथ क्रोधप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः केन क्रमेण कति च द्विचरमसमयं यावद् घातिता भवन्ति ? इति शङ्कामपनेतुमाह--

**जा दुचरिमसमयमसंखगुणूणकमेण कोहपढमाए।**
**नट्ठा किट्टी पढमखणाबंधअसंखभागपमिया ता ॥१६४॥ (गीतिः)**

यावद् द्विचरमसमयमसंख्यगुणोनक्रमेण क्रोधप्रथमायाः।
नष्टाः किट्टयः प्रथमक्षणाऽबन्धाऽसंख्यभागप्रमितास्ताः ॥१६४॥ इति पदसंस्कारः।

**'जा'**इत्यादि,यावद् 'द्विचरमसमयं' क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाया उपान्त्यसमयम् 'असंख्यगुणोनक्रमेण' असंख्येयगुणहीनक्रमेण 'क्रोधप्रथमायाः' क्रोधप्रथमसंग्रहकिट्टयाः 'किट्टयः' अवान्तरकिट्टयो 'नष्टाः' नाशं प्राप्ताः। परिमाणतः सर्वेविनष्टावान्तरकिट्टयः कति भवन्ति ? इत्यत आह—'**पढम०**' इत्यादि, 'प्रथमक्षणाबन्धाऽसंख्यभागप्रमिताः'क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमयवर्तिबन्धविरहिताऽवान्तरकिट्टयसंख्येयभागप्रमाणाः 'ताः' क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमयप्रभृतिद्विचरमसमयपर्यवसानेषु समयेषु विनष्टाः समुदिताः सर्वा अवान्तरकिट्टयो भवन्ति। इदमुक्तं भवति—किट्टिवेदनाद्धाप्रथमसमये क्रोधप्रथमसंग्रहकिट्टया उपरितन्योऽसंख्येयभागमिता अवान्तरकिट्टयोऽनुसमया-ऽपवर्तनावलेन विनाशयति, ताश्च प्रभूता भवन्ति। प्रथमसमयतो द्वितीये समयेऽसंख्येयगुणहीना विनाशयति,ततोऽपि तृतीयसमयेऽसंख्येयगुणहीना विनाशयति। न चोत्तरोत्तरसमये विशुद्धेरनन्तगुणत्वादवान्तरकिट्टीनां नाशोऽसंख्येयगुणहीनक्रमेण कुतो जायते ? इति वाच्यम्, तथास्वाभाव्यात्। ततोऽपि चतुर्थसमयेऽसंख्येयगुणहीना अवान्तरकिट्टीर्नाशयति। एवमसंख्येयगुणहीनक्रमेण तावद्वक्तव्यम्, यावत्क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाया द्विचरमसमयः। चरमसमये तु समयोनावलिकाद्वयबद्धनूतनावान्तरकिट्टीरावलिकामात्रप्रथमस्थितिगताऽवान्तरकिट्टीश्च वर्जयित्वा निखिलाः क्रोधप्रथमसंग्रहकिट्टयवान्तरकिट्टयो नाश्यन्ते, तेन यावद् द्विचरमसमय इत्युक्तम्। यदत्रादि **कषायप्राभृतचूर्णौ**—"**किट्टीओ जाओ पढमसमये विणासिज्जंति, ताओ बहुगीओ। जाओ विदियसमये विणासिज्जंति, ताओ असंखेज्जगुणहीणाओ। एवं ताव दुचरिमसमयअविणट्ठकोहपढमसंगहकिट्टी त्ति।**" इति।

क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमये यावत्यः क्रोधप्रथमसंग्रहकिट्टेरवान्तरकिट्टयो न बध्यन्ते, तासामसंख्येयभागप्रमिता एवाऽवान्तरकिट्टयः क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाद्विचरमसमयं यावद् विनाशिताः। उक्तं च **कषायप्राभृतचूर्णौ**—"**एदेण सव्वेण तिचरिमसमयमेत्तीओ सव्वकिट्टीसु पढम(विदिय)समयवेदगस्स कोधस्स पढमकिट्टीए अबज्झमाणियाणं किट्टीणमसंखेज्जदिभागो।**" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा क्रोधप्रथमसंग्रहकिट्ट्या अवान्तरकिट्टीनां विनाशक्रमो दर्शितः, तथैव शेषाणामप्येकादशसंग्रहकिट्ट्यवान्तरकिट्टीनां प्रतिसमयं विनाशक्रमस्तावदवगन्तव्यः, यावत्स्वस्ववेदनकालस्य द्विचरमसमयः ॥ १६४ ॥

पूर्वोक्तविधानेन क्रोधप्रथमसंग्रहकिट्टिं वेदयन् क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायां समयाऽधिकाऽऽवलिकाशेषायां च प्रवर्तमानपदार्थान् निरूपयिषुः संग्रहगाथया सर्वासां संग्रहकिट्टीनां स्वस्वप्रथमस्थितौ द्व्यावलिकाशेषायां समयाधिकावलिकाशेषायां च प्रवर्तमानपदार्थान् दर्शयति---

**वेइज्जंताइठिईअ दुआवलिसेसयाअ आगालो ।**
**छिण्णो खणुत्तरावलिसेसाअ जहण्णुदीरणाऽन्तुदओ ॥१६५॥ (गीतिः)**

वेद्यमानादिस्थितौ द्व्यावलिकाशेषायामागालः ।
छिन्नः क्षणोत्तराऽऽवलिकाशेषायां जघन्योदीरणाऽन्तोदयः ॥१६५॥ इति पदसंस्कारः ।

'वेइज्ज०' इत्यादि, 'वेद्यमानादिस्थितौ' या संग्रहकिट्टिर्वेद्यते, तस्याः प्रथमस्थितौ द्व्यावलिकाशेषायामागालः 'छिन्नो' व्यवच्छिन्नो भवति, तथा 'क्षणोत्तरावलिकाशेषायां' वेद्यमानसंग्रहकिट्टिप्रथमस्थितौ समयाधिकाऽऽवलिकाशेषायां 'जघन्योदीरणा' जघन्यस्थित्युदीरणा 'अन्तोदयः' चरमोदयश्च जायते । अथाऽस्याः संग्रहगाथाया अर्थः प्रस्तुतमनुसृत्य परिभाव्यते—क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायां प्रागुक्तस्वरूप आगालो व्यवच्छिद्यते । समयाधिकावलिकाशेषायां च क्रोधस्य जघन्यस्थित्युदीरणा भवति । तथाहि—क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितौ समयाधिकाऽऽवलिकाशेषायां प्रथमस्थितिचरमनिषेकत उदये दलं प्रक्षिपतः क्षपकस्य क्रोधस्य जघन्या स्थित्युदीरणा जायते । न च द्वितीयस्थितित उदीरणा कुतो न जायते ? इति वाच्यम्, प्रथमस्थितेरावलिकाद्वये शेष आगालस्य व्यवच्छिन्नत्वात् । तथा क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायां क्रोधप्रथमसंग्रहकिट्ट्याश्चरमोदयो भवति । ततः परं तस्या उदयो न प्रवर्तते, क्रोधद्वितीयसंग्रहकिट्ट्या उदयात् । उक्तं च कषायप्राभृतचूर्णौ—**"कोहस्स पढमकिट्टिं वेदयमाणस्स जा पढमट्ठिदी, तिस्से पढमट्ठिदीए समयाहियाए आवलियाए सेसाए एदम्हि समये जो विही, तं विहिं वत्तइस्सामो । तं जहा–ताधे चेव कोहस्स जहण्णगो ठिदिउदीरगो । कोहपढमकिट्टीए चरिमसमयवेदगो जादो ।"** इति । एवमग्रेऽपि वेद्यमानक्रोधद्वितीयादिसंग्रहकिट्टीनां प्ररूपणा यथावसरं कर्तव्या ॥ १६५ ॥

अथ क्रोधप्रथमसंग्रहकिट्टिवेदनचरमसमये सत्तानां कर्मणां स्थितिबन्धं व्याजिहीर्षुराह—

**अंतोमुहुत्तहीणा बंधो मोहस्स सयदिणा घाईणं ।**
**अंतोमुहुत्तहीणा दसवासा संखवासपमिओऽन्नाणं ॥१६६॥ (आर्यागीतिः)**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्तर्मुहूर्तहीना बन्धो मोहस्य शतदिना घातिनाम् ।
अन्तर्मुहूर्तहीना दशवर्षाः सङ्ख्यवर्षप्रमितोऽन्येषाम् ॥ १६६ ॥ इति पदसंस्कारः ।

**'अंतो०'** इत्यादि, तत्र क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितौ समयाधिकाऽऽवलिकाशेषायां 'मोहस्य' संज्वलनचतुष्कस्य 'बन्धः' स्थितिबन्धः अन्तर्मुहूर्तहीनाः शतदिना भवति । उक्तं च कषायप्राभृतचूर्णौ—**"चदुसंजलणाणं ठिदिबंधो बे मासा चत्तालीसं च दिवसा अंतोमुहुत्तूणा ।"** इति । भावार्थः पुनरयम्—किट्टिवेदनाद्धाप्रथमसमये संज्वलनचतुष्कस्य स्थितिबन्धो यश्चातुर्मासिक आसीत्, स क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमयेऽन्तर्मुहूर्त्तन्यून-शतदिवसमात्रो जायते । इत्थं क्रोधप्रथमसंग्रहकिट्टिवेदनकाले स्थितिबन्धस्याऽन्तर्मुहूर्ताधिक-विंशतिदिनैर्हानिर्जाता । युक्तियुक्तैषा, त्रैराशिकेन साधितत्वात् । तथाहि—क्रोधवेदनाद्धायाश्चरम-समये स्थितिबन्धो द्वैमासिको भविष्यति, यः क्रोधप्रथमसंग्रहकिट्टिवेदनप्रथमसमये चातुर्मासिक आसीत् । तेन क्रोधसंग्रहकिट्टित्रयवेदनकाले द्विमासप्रमितो मोहस्य स्थितिबन्धो हीयते ।

यदि क्रोधसंग्रहकिट्टित्रयवेदनकाले स्थितिबन्धो द्विमासप्रमाणो हीयते, तर्ह्येकस्याः क्रोधसंग्र-हकिट्ट्या वेदनकाले कियान् स्थितिबन्धो हीयेत ? इति त्रैराशिकमवलम्ब्य प्रमाणफलमिच्छया गुणयित्वा प्रमाणेन विभज्यते, तदा स्थितिबन्धस्य हानिर्लभ्यते । प्रमाणमत्रसंग्रहकिट्टित्रिकवेदन-कालः, प्रमाणफलं मासद्विकमिच्छा चैकसंग्रहकिट्टिवेदनकालः । तेन प्रमाणफलं षष्टिदिवसलक्षण-मिच्छयैकलक्षणया गुण्यते, तदा षष्टिर्लभ्यते, सा पुनस्त्रिकरूपेण प्रमाणेन विभज्यते, तदा लब्धा विंशतिर्दिवसाः ।

| न्यासः— | प्रमाणम् | प्रमाणफलम् | इच्छा | इच्छाफलम् |
|---|---|---|---|---|
| | ३ । | २ मासौ । | १ । | २० दिवसाः |

इत्थं त्रैराशिकेन विंशतिदिनमितः स्थितिबन्धः क्रोधस्यैकैकसंग्रहकिट्टिवेदनकाले परिहा-तव्यः, किन्तु क्रोधद्वितीयसंग्रहकिट्टिकालतस्तृतीयसंग्रहकिट्टिवेदनकालतश्च क्रोधप्रथमसंग्रहकिट्टि-वेदनकालस्य विशेषाधिकत्वस्य वक्ष्यमाणत्वादन्तर्मुहूर्ताधिकविंशतिदिनप्रमाणो हीयते क्रोधप्रथम-संग्रहकिट्टिवेदनकाले । क्रोधस्य द्वितीयसंग्रहकिट्टिवेदनकाले तृतीयसंग्रहकिट्टिवेदनकाले च यथा-संभवमन्तर्मुहूर्तन्यूनविंशतिदिनैः स्थितिबन्धो हीयते ।

**'घाईणं'** इत्यादि, 'घातिकर्मणां' मोहनीयस्योक्तत्वाज्ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणा-मित्यर्थः, स्थितिबन्धोऽन्तर्मुहूर्तहीना दशवर्षा भवति । किट्टिवेदनाद्धाप्रथमसमये यः स्थिति-बन्धः संख्यातवार्षिक आसीत्, स इदानीमन्तर्मुहूर्तन्यूनदशवर्षप्रमाणो जायत इत्यर्थः । प्रति-पादितं च कषायप्राभृतचूर्णौ–**"तिण्हं घादिकम्माणं ठिदिबंधो दसवस्साणि अंतो-मुहुत्तूणाणि ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'संख०'** इत्यादि, तत्र 'अन्येषां' नाम-गोत्र-वेदनीयलक्षणानामघातिकर्मणां स्थितिबन्धः 'संख्यवर्षप्रमितः' संख्यातसहस्रवर्षमात्रो भवति । किट्टिवेदनाद्धाप्रथमसमये-ऽघातिकर्मणां स्थितिबन्धः संख्यातवार्षिकोऽभवत् , ततः संख्यातेषु स्थितिबन्धेषु गतेषु क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमयेऽपि संख्यातसहस्रवर्षप्रमाण एव भवति, नवरमसौ किट्टिवेदनाद्धाप्रथमसमयबन्धतः संख्येयगुणहीनो भवति । ॥१६६॥

अथ क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये सप्तानामपि कर्मणां स्थितिसत्त्वमभिधत्ते—

**संतं मोहस्संतोमुहुत्तहीणअडमाससहिअछद्दा ।**
**घाइअघाईण कमा संखासंखवरिसा णेयं ॥१६७॥**

सत्त्वं मोहस्याऽन्तर्मुहूर्तहीनाऽष्टमासाधिकषडब्दाः ।
घात्यघातिनां क्रमात् सङ्ख्याऽसङ्ख्यवर्षा ज्ञेयम् ॥१६७॥

**'संतं'** इत्यादि, तत्र क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये 'मोहस्य' संज्वलनचतुष्कस्य 'सत्त्वं' स्थितिसत्त्वम् 'अन्तर्मुहूर्तहीनाष्टमासाधिकषडब्दाः' अन्तर्मुहूर्तन्यूनाष्टमासाधिकषड्वर्षा भवति । अत्राऽब्दशब्दो हि वर्षवाचकः, **"स संपर्यनूद्भ्यो वर्षं हायनोऽब्दं समा शरत्"** इति हेमीयवचनात् । **"अब्दो वर्षे दरस्त्रासे"** इति लिङ्गानुशासनवचनाच्च पुंस्त्वम् । भावार्थः पुनरयम्-किट्टिवेदनाद्धाप्रथमसमये संज्वलनचतुष्कस्य यत् स्थितिसत्त्वमष्टवार्षिकमासीत्, तत् क्रोधप्रथमसंग्रहकिट्टिवेदनचरमसमयेऽन्तर्मुहूर्तन्यूनाऽष्टमासाऽधिकषड्वर्षप्रमितं भवति । इत्थमन्तर्मुहूर्ताधिकषोडशमासैः क्रोधप्रथमसंग्रहकिट्टिवेदनकाले मोहनीयस्थितिसत्त्वस्य हानिर्जाता । सा च युक्तियुक्ता, त्रैराशिकेन साधितत्वात् । तथाहि-क्रोधवेदनाद्धायाश्चरमसमये स्थितिसत्त्वं चतुर्वर्षप्रमितं भविष्यति, यत् क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमयेऽष्टवार्षिकमासीत् । तदेवं क्रोधसंग्रहकिट्टित्रयवेदनकाले स्थितिघातैश्चतुर्वर्षमात्रं स्थितिसत्त्वं घात्यते । यदि क्रोधसंग्रहकिट्टित्रयवेदनकाले चतुर्वर्षप्रमितं स्थितिसत्त्वं घात्यते, तह्येकस्याः क्रोधप्रथमसंग्रहकिट्टेर्वेदनकाले कियत् स्थितिसत्त्वं घात्येत ? इति प्रमाणफलमिच्छया गुणयित्वा प्रमाणेन विभज्यते, तदेच्छाफलं चतुर्मासाधिकवर्षप्रमाणं प्राप्यते ।

| न्यासः— प्रमाणम् | प्रमाणफलम् | इच्छा | इच्छाफलम् |
|---|---|---|---|
| ३ । | ४ वर्षाणि । | १ । | चतुर्मासाधिकवर्षः । |

इत्थं त्रैराशिकेन चतुर्मासाधिकवर्षप्रमाणं स्थितिसत्त्वं क्रोधप्रथमसंग्रहकिट्टिवेदनकाले घातयितव्यम् , परं क्रोधद्वितीयसंग्रहकिट्टिवेदनकालतस्तृतीयसंग्रहकिट्टिवेदनकालतश्च क्रोधप्रथमसंग्रहकिट्टिवेदनकालस्य विशेषाधिकत्वस्य वक्ष्यमाणत्वात् तत्रा-ऽन्तर्मुहूर्ताधिकषोडशमासप्रमाणं स्थितिसत्त्वं घात्यते । शेषयोस्तु द्वयोः संग्रहकिट्ट्योर्वेदनकाले यथायोग्यमन्तर्मुहूर्तन्यूनषोडशमासप्रमितं स्थितिसत्त्वं घातयिष्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'घाइअघाईण'** इत्यादि, 'घात्यघातिनां' ज्ञानावरणदर्शनावरणाऽन्तरायाणां नाम-गोत्र-वेदनीयानां च कर्मणां स्थितिसत्त्वं क्रमेण सङ्ख्याऽसङ्ख्यवर्षा भवति । किट्टिवेदनाद्धाप्रथमसमये घातिकर्मणां सङ्ख्यातवर्षमितमघातिकर्मणां चाऽसङ्ख्यातवर्षमितं स्थितिसत्त्वमासीत्, ततः क्रोधप्रथमसंग्रहकिट्टिवेदनकाले संख्यातेषु स्थितिघातेष्वतिक्रान्तेष्वपि घातित्रयस्य स्थितिसत्त्वं संख्यातवर्षाण्यघातित्रयस्य चा-ऽसंख्यातवर्षाणि विद्यते, किन्तु यथाक्रमं संख्येयगुणहीनमसंख्येयगुणहीनं च भवतीत्यर्थः । उक्तञ्च **कषायप्राभृतचूर्णौ–"घादिकम्माणं ठिदिसंतकम्मं संखेज्जाणि वस्साणि, सेसाणं कम्माणं ठिदिसंतकम्ममसंखेज्जाणि वस्साणि ।"** इति ।

क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये क्रोधप्रथमसंग्रहकिट्टेरुदयसमयाधिकावलिकागतं समयोनद्व्यावलिकाबद्धं च नूतनं दलं वर्जयित्वा शेषं क्रोधप्रथमसंग्रहकिट्टिसर्वदलं गृहीत्वाऽसंख्येयभागप्रमाणदलं क्रोधद्वितीयसंग्रहकिट्टितृतीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिषु मानप्रथमसंग्रहकिट्टिपूर्वापूर्वाऽवान्तरकिट्टिषु च यथासंभवं संक्रमयति। शेषबहुसंख्येयभागप्रमाणदलतः क्रोधद्वितीयसंग्रहकिट्टेरधस्तादपूर्वाऽवान्तरकिट्टीर्निर्वर्तयति । इत्थं क्रोधप्रथमसंग्रहकिट्टेर्बहुसंख्येयभागकल्पं दलं संज्वलनक्रोधद्वितीयसंग्रहकिट्टौ संक्रमयति । क्रोधप्रथमसंग्रहकिट्टिसकलदलस्य च त्रयोदशचतुर्विंशतिभागप्रमाणत्वात् क्रोधद्वितीयसंग्रहकिट्टौ दलं मोहनीयसकलदलस्य चतुर्दशचतुर्विंशतिभागमात्रं ( $\frac{14}{24}$ ) जायते । इत्थं क्रोधद्वितीयसंग्रहकिट्टौ दलमितरसंग्रहकिट्ट्यपेक्षया चतुर्दशगुणं भवति । इतरसंग्रहकिट्टीनां प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमाणत्वात् । एवमवान्तरकिट्टयोऽपि वक्तव्याः ।

ननु यद्यत्र बहुसंख्येयभागप्रमितदलमधस्तना-ऽपूर्वाऽवान्तरकिट्टितया परिणम्येत, तर्हि क्रोधद्वितीयसंग्रहकिट्टेरवान्तरकिट्ट्यन्तरोत्पन्ना-ऽपूर्वावान्तरकिट्टिषु दीयमानसर्वदलतो-ऽसंख्येयगुणं क्रोधद्वितीयसंग्रहकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिषु दीयमानसर्वदलं स्यात् । तथाऽभ्युपगमे च प्रागुक्तं यत् **षट्त्रिंशदुत्तरशततम**गाथायाष्टीकायां संग्रहकिट्ट्यन्तरोत्पन्ना-ऽपूर्वावान्तरकिट्टिषु निक्षिप्तसर्वदलतो-ऽवान्तरकिट्ट्यन्तरोत्पन्नापूर्वावान्तरकिट्टिष्वसंख्येयगुणं दलं दीयत इति, तेन सह विरोधः स्यादिति, मैवम्, प्राक् सर्वदलस्याऽसंख्येयभागमात्रं दलमपूर्वावान्तरकिट्टितया परिणमयति स्म । इदानीं तु क्रोधप्रथमसंग्रहकिट्टिप्रतिबहुदलं द्वितीयसंग्रहकिट्टितया परिणमयति। तेनाऽवान्तरकिट्ट्यन्तरेषु निर्वर्त्यमानास्वपूर्वावान्तरकिट्टिषु दीयमानदलतोऽसंख्येयगुणं दलं क्रोधद्वितीयसंग्रहकिट्ट्यन्तरे निर्वर्त्यमानास्वपूर्वावान्तरकिट्टिषु दीयमानं भवति। पूर्ववत् क्रोधद्वितीयसंग्रहकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिषु दीयमानदलतोऽवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिष्वसंख्येयगुणदलनिक्षेपाभ्युपगमे त्वेकैकस्मिन्नवान्तरकिट्ट्यन्तरे त्रयोदशाऽपूर्वाऽवान्तरकिट्टयो निष्पादयितव्याः, द्वितीयसंग्रहकिट्टिपुरातनसत्तागतदलतस्त्रयोदशगुणत्वात्क्रोधप्रथमसंग्रहकिट्टिदलस्य । एकैकस्मिन्नन्तरे त्रयोदशाऽपूर्वावान्तरकिट्टिनिर्वृत्त्यभ्युपगमे तु पूर्वापूर्वावान्तरकिट्टिषु दलनिक्षेप इत्थं प्रसज्येत–

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाद्विचरमसमयं यावत् क्रोधसंग्रहकिट्टीनां दलिकापेक्षया-ऽवस्थानम्




क्रोधतृतीयसंग्रहकिट्टिः क्रोधद्वितीयसंग्रहकिट्टिः क्रो ध प्र थ म सं ग्र ह कि ट्टिः

क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये समयोनद्वयावलिकाबद्धनूतनदलमुदयावलिकागतं च दलं वर्जयित्वा सर्वदलस्य बहुसंख्येयभागमात्रदलं क्रोधद्वितीयसंग्रहकिट्टितया परिणमयति । तेन क्रोधद्वितीयसंग्रहकिट्टिसकलदलं चतुर्दशचतुर्विंशतिभागप्रमाणं $(\frac{१४}{२४})$ जायते । एवं क्रोधद्वितीयसंग्रह-किट्टया अवान्तरकिट्टयो-ऽपि चतुर्दशचतुर्विंशतिभागप्रमाणाः सम्पद्यन्ते । तेनोपरि दर्शितचित्रतो-ऽस्मिंश्चित्रे क्रोधद्वितीयकिट्टयायाम एकचतुर्विंशति-भागेनाऽधिको दर्शितः ।




क्रोधतृतीयसंग्रहकिट्टिः क्रो ध द्वि ती य सं ग्र ह कि ट्टिः

क्रोधद्वितीयसंग्रहकिट्टिपूर्वाऽवान्तरकिट्टितोऽपूर्वाऽवान्तरकिट्टावसंख्येयगुणं दलं दत्त्वा यथोत्तरं द्वादशस्ववान्तरकिट्ट्यन्तरोत्पन्ना-ऽपूर्वावान्तरकिट्टिषु विशेषहीनं दद्यात् । ततः पुनः पूर्वाऽवान्तरकिट्ट्यामसंख्येयगुणहीनं प्रक्षिपेत् । ततो-ऽपूर्वा-ऽवान्तरकिट्टावसंख्येयगुणं प्रक्षिपेत् । ततः परं यथोत्तरं द्वादशस्ववान्तरकिट्ट्यन्तरोत्पन्नापूर्वावान्तरकिट्टिषु विशेषहीनं दलं दद्यादिति स्वीकर्तव्यम्, अन्यथैकगोपुच्छाकारभङ्गः प्रसज्येत । न च कुत्रचिदपि ग्रन्थेऽनेन प्रकारेण दलनिक्षेपविधिर्भणितः, तेन क्रोधद्वितीयसंग्रहकिट्टेरवान्तरकिट्ट्यन्तरोत्पन्ना-ऽपूर्वाऽवान्तरकिट्टिषु दीयमानदलतः क्रोधद्वितीयसंग्रहकिट्ट्यन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिष्वसंख्येयगुणं दलं दीयमानं भवति । दीयमानदलस्य चा-ऽसंख्येयगुणत्वात् क्रोधद्वितीयसंग्रहकिट्टेरवान्तरकिट्ट्यन्तरोत्पन्नाऽपूर्वाऽवान्तरकिट्टितः क्रोधद्वितीयसंग्रहकिट्ट्यन्तरेऽसंख्येयगुणा अपूर्वाऽवान्तरकिट्टयो निर्वर्त्यन्ते । एवमग्रेऽपि तत्तत्संग्रहकिट्टिवेदनकालचरमसमये यथायोग्यं भावनीयम् । पश्यन्तु पाठका यन्त्रकम्–२३ ।

शेषसंग्रहकिट्टिप्रदेशसंक्रमस्तु पूर्ववद् भणितव्यः, विशेषाभावात् ॥१६७॥

**पञ्चषष्ट्यधिकशततमषट्षष्ट्यधिकशततमरूपगाथाद्वयं समाश्रित्य यन्त्रकम्—**

(१) क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितेरावलिकाद्वये शेष आगालो व्यवच्छिद्यते । (गाथा-१६५)

(२) यदा क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितेः समयाधिकावलिका शेषा भवति, तदा

(क) क्रोधस्य जघन्यस्थित्युदीरणा । (गाथा-१६५)

(ख) क्रोधप्रथमसंग्रहकिट्टेश्चरमोदयः । (गाथा-१६६)

(ग) संज्वलनचतुष्कस्य बन्धोऽन्तर्मुहूर्तन्यूनशतदिवसाः ।

(घ) शेषघातित्रयस्य स्थितिबन्धोऽन्तर्मुहूर्तन्यूनदशवर्षाः ।

(ङ) अघातिकर्मणां स्थितिबन्धः संख्यातवार्षिकः ।

(च) संज्वलनचतुष्कस्य स्थितिसत्त्वमन्तर्मुहूर्तन्यूनाष्टमासाधिकषड्वर्षाः । (गाथा-१६७)

(छ) शेषघातिकर्मणां स्थितिसत्त्वं संख्यातवार्षिकम् ।

(ज) नामगोत्रवेदनीयानां स्थितिसत्त्वमसंख्येयवर्षप्रमितम् ।

(झ) क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाद्विचरमसमयं यावत् क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमयबन्धविरहिताऽवान्तरकिट्टीनामसंख्येयभागमात्र्योऽवान्तरकिट्टयो नाश्यन्ते, चरमसमये तूदयसमयाधिकावलिकागतं समयोनद्व्यावलिकाबद्धनूतनं च दलं वर्जयित्वा शेषं सर्वं क्रोधप्रथमसंग्रहकिट्टिप्रतिबद्धदलं यथासंभवं क्रोधद्वितीयसंग्रहकिट्टितृतीयसंग्रहकिट्टिमानप्रथमसंग्रहकिट्टितया परिणमयति ।

क्रोधप्रथमसंग्रहकिट्टिचरमोदयं परिपाल्य क्षपको यत्करोति, तदाह—

**सेकाले ओकड्ढित्तु बिइयकिट्टिं कुणेइ पढमठिइं ।**
**ताहे च एव वेयइ बीयं कोहस्स किट्टिं तु ॥१६८॥**

अनन्तरकालेऽपकृष्य द्वितीयकिट्टिं करोति प्रथमस्थितिम् ।
तदानीं चैव वेदयति द्वितीयां क्रोधस्य किट्टिं तु ॥१६८॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'सेकाले'** इत्यादि, 'अनन्तरकाले' क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धासमाप्तेरनन्तरसमय इत्यर्थः, 'द्वितीयकिट्टिं' क्रमप्राप्तत्वात् क्रोधद्वितीयसंग्रहकिट्टिमपकृष्य द्वितीयस्थितिस्थितक्रोध-द्वितीयसंग्रहकिट्टिगतप्रदेशाग्रमुत्कीर्येत्यर्थः, उदयसमयादारभ्य द्वितीयसंग्रहकिट्टिवेदनकालत आवलिकयाऽधिकासु स्थितिष्वसंख्येयगुणक्रमेण निक्षिपन् 'प्रथमस्थितिं' प्रत्यासत्त्या क्रोध-द्वितीयसंग्रहकिट्ट्याः प्रथमस्थितिं करोति । उक्तञ्च **कषायप्राभृतचूर्णौ**—**"से काले कोहस्स विदियकिट्टीए पदेसग्गमोकड्डियूण कोहस्स पढमट्ठिदिं करेदि"** । इति । अष्टादशा-ऽधिकशततमैकोनविंशत्युत्तरशततमगाथोक्तं स्थितिषु वेद्यमाना-ऽवेद्यमानसंग्रहकिट्टीनां प्रदेशावस्थानमनुभागाऽ-वस्थानं चाऽत्रापि भावनीयम् ।

**'ताहे'** इत्यादि, तदानीं चैव क्रोधद्वितीयसंग्रहकिट्टिप्रथमस्थितिकरणसमयेव 'द्वितीयां किट्टिं' क्रोधस्य द्वितीयां संग्रहकिट्टिं तु 'वेदयति' अनुभवति । उक्तं च **कषायप्राभृतचूर्णौ**—**"ताधे कोहस्स विदियकिट्टीवेयगो ।"** तथैव **सप्ततिकाचूर्णावपि**—**"तम्मि समए बितियकिट्टीओ दलियं उक्कड्डिउं पढमठितिं करेइ वेदेइ य ।"** इति ॥ १६८ ॥

अथ क्रोधद्वितीयसंग्रहकिट्टिवेदनप्रथमसमये क्रोधप्रथमसंग्रहकिट्टेः कियद् दलं सत्कर्मणि विद्यते ? इति जिज्ञासायां संग्रहगाथया कथयति—

## वेइज्जमाणकिट्टीअ पढमसमयम्मि पुव्वकिट्टीए ।
## सेसं दुखणूणदुआवलिबद्धं उदयआवलिगयं य ॥१६९॥ (गीतिः)

वेद्यमानकिट्ट्याः प्रथमसमये पूर्वकिट्ट्याः।
शेषं द्विक्षणोनद्वयावलिकाबद्धमुदयावलिकागतं च ॥ १६९ ॥ इति पदसंस्कारः ।

**'वेइज्ज०'** इत्यादि, 'वेद्यमानकिट्ट्याः प्रथमसमये' वेद्यमानसंग्रहकिट्टिवेदनकालप्रथमसमये 'पूर्व-किट्ट्याः' वेद्यमानसंग्रहकिट्ट्यपेक्षया प्राक्तनसंग्रहकिट्ट्याः 'शेषं' अवशिष्यमाणप्रदेशाग्रं तु द्विक्षणो-नद्वयावलिकाबद्धं नूतनमुदयावलिकागतं च भवति, ततोऽन्यद्दलस्यान्यकिट्टितया परिणतत्वात् । इह प्रथमस्थितेरुदयावलिकागतं क्रोधप्रथमसंग्रहकिट्टिदलं यथाक्रमं स्तिबुकसङ्क्रमेण वेद्यमानसंग्रहकिट्टौ संक्रम्य विनाशयति, द्विसमयोनद्वयावलिकाबद्धनूतनदलमपि यथागमं वेद्यमानसंग्रहकिट्टौ संक्रम्य विनाशयति । यदुक्तं **कषायप्राभृतचूर्णौ**—**"जं संगहकिट्टिं वेदेदूण तदो से काले अण्णं संगहकिट्टिं पवेदयदि, तदो तिस्से पुव्वसमयवेदिदाए संगहकिट्टीए जे दो आवलियबंधा दुसमयूणा आवलियपविट्ठा च अस्सिं समए वेदिज्जमा-णिगाए संगहकिट्टीए पयोगसा संकमति ।"** इति । अथोपयुक्तसंग्रह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाथा प्रस्तुतमाश्रित्य व्याख्यायते—क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये समयोनद्व्यावलिकाबद्धनूतनदलं समयाधिकाऽऽवलिकागतं च प्रदेशाग्रं मुक्त्वा क्रोधप्रथमसंग्रहकिट्टयाः सर्वदलं संङ्क्रान्तम्। अथ क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धाप्रथमसमये नूतनबद्धदलमपि यथायोग्यं संक्रमयति, तेन द्विसमयोनद्व्यावलिकाबद्धनूतनदलं क्रोधप्रथमसंग्रहकिट्टेर्द्वितीयस्थितौ विद्यते। तथा क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितिरुदयावलिकाप्रमाणाऽवशिष्यते, प्रागुक्तसमयाधिकावलिकात उदयेनैकस्य निषेकस्य क्षीणत्वात्। इत्थं क्रोधप्रथमसंग्रहकिट्टया द्विसमयोनद्व्यावलिकाबद्धनूतनदलमुदयावलिकागतं च दलं क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धाप्रथमसमये विद्यते। उक्तं च **कषायप्राभृतचूर्णौ**—**"ताधे कोहस्स पढमकिट्टीए संतकम्मं दो आवलियबंधा दुसमयूणा सेसा, जं च उदयावलियं पविट्ठं, तं च सेसं पढमकिट्टीए।"** इति। प्रथमस्थितेरुदयाऽऽवलिकागतं च दलं क्रमशः स्तिबुकसंक्रमेण वेद्यमानसंग्रहकिट्टौ संक्रम्य नाशयति। एवमग्रेऽपि शेषाणां क्रोधद्वितीयसंग्रहकिट्टिप्रभृतिलोभद्वितीयसंग्रहकिट्टिपर्यवसानानामुदयावलिकागतं दलिकं वेद्यमानसंग्रहकिट्टौ स्तिबुकसंक्रमेण संक्रम्य विनाशयति। यदुक्तं **सप्ततिकाचूर्णौ** सूक्ष्मसम्परायप्ररूपणावसरे—**अतोयम्मि आवलिया छड्डियाओ, ताओ सव्वत्थ वेतिज्जमाणीसु थिबुगसंकमेणं विपच्चंति। एसो पुव्वमवक्खाणिओ अत्थो, अओ इयाणि भणितो।"** इति। **श्रीमन्मलयगिरिपादादयस्तु** तृतीयसंग्रहकिट्टेरेवावलिकागतं दलं स्तिबुकसङ्क्रमेण संक्रमयति, प्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टयोस्तु यथास्वं द्वितीयसंग्रहकिट्टितृतीयसंग्रहकिट्टयन्तर्गतं वेद्यत इत्याहुः। तथा च तद्ग्रन्थः—**पूर्वोक्ताश्चावलिकास्तृतीयकिट्टिगताः शेषीभूता अपि वेद्यमानासु परप्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमयति, प्रथमद्वितीयकिट्टिगताश्च यथास्वं द्वितीयतृतीयकिट्टयन्तर्गता वेद्यन्ते।"** इति। इदन्तु बोध्यम्-इह निषेकविवक्षया क्रोधप्रथमसंग्रहकिट्टेः समयोनावलिकामात्री प्रथमस्थितिः क्रोधद्वितीयसंग्रहकिट्टिवेदनप्रथमसमये बोध्या, उदयावलिकागतप्रथमनिषेकदलस्य क्रोधद्वितीयसंग्रहकिट्टितया परिणतत्वात्। कालविवक्षया पुनः क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितिरावलिकामात्री, यत उदयनिषेकस्य संक्रान्तत्वेऽपि प्रथमस्थितिचरमनिषेक आवलिकाया अन्ते प्राप्यते, तं निषेकमाश्रित्य कालविवक्षया क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितिरावलिकाप्रमाणा भवति, यथाऽबाधायां दलनिक्षेपाभावेऽपि स्थितिश्चरमनिषेकमाश्रित्य भण्यते। एवं क्रोधतृतीयादिसंग्रहकिट्टिवेदनाद्धाप्रथमसमयेऽयमर्थो भावनीयः। ॥१६९॥

| क्रोधद्वितीयसंग्रहकिट्टिवेदनप्रथमसमयमाश्रित्य यन्त्रकम् |
|---|
| (१) क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धायाः प्रथमसमय उदयसमयादारभ्य स्ववेदनकालत आवलिकयाऽधिकायां स्थितौ दलमसंख्येयगुणक्रमेण प्रक्षिप्य क्रोधद्वितीयसंग्रहकिट्टयाः प्रथमस्थितिं करोति । |
| (२) कालविवक्षयाऽऽवलिकाप्रमाणा निषेकविवक्षया तु समयोनाऽऽवलिकाप्रमाणा क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितिरवशिष्यते । |
| (३) उदयनिषेकगतं क्रोधप्रथमसंग्रहकिट्टिदलं द्वितीयसंग्रहकिट्टितया परिणतम् । |
| (४) प्रथमस्थित्यामुदयावलिकागतं द्वितीयस्थितौ च द्विसमयोनद्वयावलिकाबद्धं क्रोधप्रथमसंग्रहकिट्टिदलमवशिष्यते । |
| (५) स्थितिषु वेद्यमानाऽवेद्यमानसंग्रहकिट्टीनां प्रदेशावस्थानमनुभागावस्थानं चाऽष्टाधिकशततमैकोनविंशत्युत्तरशततमगाथोक्तमत्राऽपि बोध्यम् । |

क्रोधद्वितीयसंग्रहकिट्टिप्रथमसमयतः प्रभृति स्ववेदनकालचरमसमयं यावत् क्रोधप्रथमसंग्रहकिट्टिवेदकविधिमतिदिदिक्षुराह—

**बंधो उदओ णासो संकमणमपुव्वकिट्टिणिव्वत्ती ।**
**किट्टीअप्पाबहुअं पएसथोवबहुअं य पढमव्व ॥ १७० ॥ (गीतिः)**

बन्ध उदयो नाशः संक्रमणमपूर्वकिट्टिनिर्वृत्तिः ।
किट्टयल्पबहुत्वं प्रदेशस्तोकबहुत्वं च प्रथमावत् ॥ १७० ॥ इति पदसंस्कारः ।

'**बंधो**' इत्यादि, बन्ध उदयो नाशः संक्रमणमपूर्वकिट्टिनिर्वृत्तिः किट्टयल्पबहुत्वं प्रदेशाल्पबहुत्वं च 'प्रथमावत्' क्रोधद्वितीयसंग्रहकिट्टिवेदनकाले क्रोधप्रथमसंग्रहकिट्टिवेदनकालवज्ज्ञातव्यम् । तथाहि—क्रोधद्वितीयसंग्रहकिट्टेरुपरितनीरधस्तनीश्चाऽसंख्येयभागप्रमाणा अवान्तरकिट्टीर्वर्जयित्वा शेषा मध्यमाः स्वस्वरूपेणाऽवान्तरकिट्टय उदयन्ति, बध्यन्ते च । तत्राऽपि बन्धत उदये विशेषाधिका अवान्तरकिट्टयो भवन्ति, तथा बन्धोदययोर्जघन्योत्कृष्टतोऽल्पबहुत्वं गोमूत्रिकया वक्तव्यम् ।

अवान्तरकिट्टिनाशोऽपि प्रथमसंग्रहकिट्टिवद् बोध्यः । इदमुक्तं भवति—यथा क्रोधप्रथमसंग्रहकिट्टिवेदकः सर्वसंग्रहकिट्टीनामुपरितनीरसंख्येयभागमिता अवान्तरकिट्टीर्नाशयति स्म, तथा क्रोधद्वितीयसंग्रहकिट्टिवेदकोऽपि संग्रहकिट्टीनामुपरितनीरसंख्येयभागप्रमाणा अवान्तरकिट्टीर्विनाशयति ।

क्रोधद्वितीयसंग्रहकिट्टिवेदकस्य संक्रमोऽपि क्रोधप्रथमसंग्रहकिट्टिवेदकवज्ज्ञातव्यः । तथाहि—क्रोधद्वितीयसंग्रहकिट्टिदलं क्रोधतृतीयसंग्रहकिट्टौ मानप्रथमसंग्रहकिट्टौ च संक्रमयति । क्रोधतृतीयसंग्रहकिट्टिदलं मानप्रथमसंग्रहकिट्टावेव संक्रमयति । मानप्रथमसंग्रहकिट्टिदलं मानस्य द्वितीयसंग्रहकिट्टौ तृतीयसंग्रहकिट्टौ मायायाश्च प्रथमसंग्रहकिट्टौ संक्रमयति । मानद्वितीयसंग्रहकिट्टिदलं मानतृतीय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संग्रहकिट्टौ मायाप्रथमसंग्रहकिट्टौ च संक्रमयति । मानतृतीयसंग्रहकिट्टिदलं मायाप्रथमसंग्रहकिट्टावेव संक्रमयति । मायाप्रथमसंग्रहकिट्टिदलं मायाया द्वितीयसंग्रहकिट्टौ तृतीयसंग्रहकिट्टौ लोभप्रथमसंग्रहकिट्टौ च सङ्क्रमयति, मायाया द्वितीयसंग्रहकिट्टिदलं तृतीयसंग्रहकिट्टौ लोभप्रथमसंग्रहकिट्टौ च संक्रमयति । मायायास्तृतीयसंग्रहकिट्टिदलं लोभस्य प्रथमसंग्रहकिट्टयामेव संक्रमयति, लोभस्य प्रथमसंग्रहकिट्टिदलं लोभस्य द्वितीयसंग्रहकिट्टौ तृतीयसंग्रहकिट्टौ च संक्रमयति । लोभद्वितीयसंग्रहकिट्टिदलं लोभतृतीयसंग्रहकिट्टौ संक्रमयति । लोभतृतीयसंग्रहकिट्टिदलं त्वन्यत्र न संक्रमयति, अनानुपूर्वीसंक्रमाऽभावात् । न्यगादि च कषायप्राभृतचूर्णौ–"**एत्थ संकममाणयस्स पदेसग्गस्स विधिं वत्तइस्सामो । तं जहा–कोहविदियकिट्टीदो पदेसग्गं कोहतदियं च माणपढमं च गच्छदि । कोहस्स तदियादो किट्टीदो माणस्स पढमं चेव गच्छदि । माणस्स पढमादो किट्टीदो माणस्स विदियं तदियं मायाए पढमं च गच्छदि । माणस्स विदियकिट्टीदो माणस्स तदियं च मायाए पढमं च गच्छदि । माणस्स तदियकिट्टीदो मायाए पढमं गच्छदि । मायाए पढमादो पदेसग्गं मायाए विदियं तदियं च लोभस्स पढमकिट्टिं च गच्छदि । मायाए विदियादो किट्टीदो पदेसग्गं मायाए तदियं लोभस्स पढमं च गच्छदि । मायाए तदियादो किट्टीदो पदेसग्गं लोभस्स पढमं गच्छदि । लोभस्स पढमादो किट्टीदो पदेसग्गं लोभस्स विदियं तदियं च गच्छदि । लोभस्स विदियादो पदेसग्गं लोभस्स तदियं गच्छदि ।**" इति ।

इदमत्राऽवधेयम्–"**जं संगहकिट्टिं**" इत्यादि **सप्तविंशत्यधिकशत**तमगाथाया व्याख्यानात् क्रोधद्वितीयसंग्रहकिट्टितः क्रोधतृतीयसंग्रहकिट्टावितरसंग्रहकिट्टयपेक्षया संख्यातगुणं दलं संक्रमयति, शेषाऽल्पबहुत्वं च पूर्ववत् स्वयमेवोहनीयम्, सुगमत्वान्नाभिधीयते ।

यथा क्रोधप्रथमसंग्रहकिट्टिं वेदयन् संग्रहकिट्टयन्तरेषु निष्पाद्यमानाऽपूर्वाऽवान्तरकिट्टितोऽवान्तरकिट्टयन्तरेषु निष्पाद्यमानाऽपूर्वावान्तरकिट्टीरसंख्येयगुणा निर्वर्तयति स्म, तासु च दलनिक्षेपं करोति स्म, तथैव क्रोधद्वितीयसंग्रहकिट्टिवेदकोऽपि करोति ।

संग्रहकिट्टीनां प्रदेशानामवान्तरकिट्टीनां चाऽल्पबहुत्वं प्रथमसंग्रहकिट्टिवेदकवज्ज्ञातव्यम्, नवरमत्रैकादशसंग्रहकिट्टीराश्रित्य प्रदेशानामवान्तरकिट्टीनां चाऽल्पबहुत्वमभिधातव्यम्, तत्राऽपि क्रोधद्वितीयसंग्रहकिट्टेर्दलमितरसंग्रहकिट्टितः संख्यातगुणं वक्तव्यम्, क्रोधप्रथमसंग्रहकिट्टिगतद्विसंख्येयभागमात्रदलस्य तत्र प्रक्षिप्तत्वात् । एवमवान्तरकिट्टयोऽपि वाच्याः । तथाहि–मानस्य प्रथमसंग्रहकिट्टौ प्रदेशाः स्तोका भवन्ति । ततो विशेषाधिका मानस्य द्वितीयसंग्रहकिट्टौ भवन्ति, आधिक्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च पूर्वपदगतप्रदेशान् पल्योपमाऽसंख्येयभागेन खण्डयित्वैकखण्डेन बोध्यम् । एवमग्रेऽपि स्वस्थाने वक्तव्यम् । ततो विशेषाधिकाः प्रदेशा मानस्य तृतीयसंग्रहकिट्टावभिधातव्याः । ततो विशेषाधिकाः प्रदेशाः क्रोधस्य तृतीयसंग्रहकिट्टौ निश्चेतव्याः । आधिक्यं च पूर्वपदगतप्रदेशानावलिकाऽसंख्येय-भागेन भक्त्वैकखण्डेन ज्ञातव्यम् । एवमग्रेऽपि परस्थाने वक्तव्यम् । ततो विशेषाधिकाः प्रदेशा मायायाः प्रथमसंग्रहकिट्टौ वक्तव्याः । ततो विशेषाधिकाः प्रदेशा मायाया द्वितीयसंग्रहकिट्टौ निश्चेतव्याः । ततो विशेषाधिकाः प्रदेशा मायायास्तृतीयसंग्रहकिट्टौ भणितव्याः । ततो विशेषा-धिका लोभस्य प्रथमसंग्रहकिट्टौ मन्तव्याः । ततोऽपि विशेषाधिका लोभस्य द्वितीयसंग्रहकिट्टौ वाच्याः । ततोऽपि लोभतृतीयसंग्रहकिट्टौ प्रदेशा विशेषाधिका अवगन्तव्याः । ततः सङ्ख्यातगुणाः प्रदेशाः क्रोधस्य द्वितीयसंग्रहकिट्टौ निगदितव्याः, गुणकारश्चात्र चतुर्दशराशिः । तथाहि—लोभ-तृतीयसंग्रहकिट्टौ मोहनीयदलस्य चतुर्विंशतिभागप्रमाणं दलं विद्यते । क्रोधद्वितीयसंग्रहकिट्टावपि स्वदलं मोहनीयसकलदलस्य चतुर्विंशतिभागप्रमाणं विद्यते स्म, त्रयोदशचतुर्विंशतिभागप्रमाणं च क्रोधप्रथमसंग्रहकिट्टिदलं क्रोधद्वितीयसंग्रहकिट्टयां संक्रमेण प्रक्षिप्तम् , तेन तस्यां चतुर्दशचतु-र्विंशतिभागप्रमितं दलं जायते । तच्चाऽधस्तनराशिनैकचतुर्विंशतिभागलक्षणेन विभज्यते, तदा गुणकसंख्या चतुर्दश प्राप्यते ।

संग्रहकिट्टीनामवान्तरकिट्टयोऽप्यनेनाऽल्पबहुत्वक्रमेण वक्तव्याः, दलिकानुसारेणैवाऽवान्तर-किट्टिराशिदर्शनात् । यदवादि कषायप्राभृतचूर्णौ—"**कोधविदियकिट्टीए पढमसमय-वेदगस्स एक्कारससु संगहकिट्टीसु अंतरकिट्टीणमप्पाबहुअं वत्तइस्सामो । तं जहा—सव्वत्थोवाओ माणस्स पढमाए संगहकिट्टीए अंतरकिट्टीओ, विदियाए संगह-किट्टीए अंतरकिट्टीओ विसेसाहियाओ, तदियाए गहकिट्टीए अंतरकिट्टीओ विसे-साहियाओ कोहस्स तदियाए संगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ । मायाए पढमाए संगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ, विदियाए संगह-किट्टीए अंतरकिट्टीओ विसेसाहियाओ, तदियाए संगहकिट्टीए अंतरकिट्टीओ विसे-साहियाओ । लोभस्स पढमाए संगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ, विदियाए संगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ, तदियाए संगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ, कोहस्स विदियाए संगहकिट्टीए अंतरकिट्टीओ संखेज्जगुणाओ । पदेसग्गस्स वि एवं चेव अप्पाबहुअं ।**" इति ॥१७०॥

ननु क्रोधद्वितीयसंग्रहकिट्टेर्वेदकस्य बन्धः "**पढमव्व**" इत्यनेनातिदिष्टः, तत्र क्रोधप्रथम-संग्रहकिट्टिं वेदयन् सर्वेषां कषायाणां प्रथमसंग्रहकिट्टिं बध्नाति स्म । अत्र किं द्वितीयसंग्रहकिट्टिं वेदयन् सर्वेषां द्वितीयसंग्रहकिट्टिं बध्नाति ? उताऽस्ति कश्चिद् विशेषः ? इति जिज्ञासायां संग्रह-गाथया भणति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वेइज्जमाणगस्स कसायस्स अणुहवए तु जं किट्टिं ।**
**तं चेव बंधइ पराणं पढमं बंधए न परं ॥१७१॥**

वेद्यमानस्य कषायस्यानुभवति तु यां किट्टिम् ।
तां चैव बध्नाति परेषां प्रथमां बध्नाति न पराम् ॥१७१॥ इति पदसंस्कारः ।

'वेइज्ज०' इत्यादि, 'वेद्यमानस्य' अनुभूयमानस्य तु 'कषायस्य' क्रोध-मान-माया-लोभानामन्यतमकषायस्य 'यां किट्टिं' प्रथमसंग्रहकिट्टिद्वितीयसंग्रहकिट्टितृतीयसंग्रहकिट्टीनामन्यतमां यां संग्रहकिट्टिमनुभवति, तां चैव संग्रहकिट्टिं बध्नाति । 'पराणं' इत्यादि, 'परेषाम्' अवेद्यमानकषायाणां प्रथमां संग्रहकिट्टिं बध्नाति, न 'परां' द्वितीयसंग्रहकिट्टितृतीयसंग्रहकिट्टिलक्षणामन्याम् । उक्तञ्च **कषायप्राभृतचूर्णौ–"जस्स जं किट्टिं वेदयदि, तस्स कसायस्स तं किट्टिं बंधदि, सेसाणं कसायाणं पढमकिट्टीओ बंधदि ।"** इति । इयं च संग्रहगाथा । तेन प्रकृतेऽस्याः संग्रहगाथाया व्याख्यानं दर्श्यते–क्रोधद्वितीयसंग्रहकिट्टिं वेदयन् क्षपकः क्रोधस्य द्वितीयसंग्रहकिट्टिं बध्नाति, मानादीनां तु प्रथमसंग्रहकिट्टिं बध्नाति । एवमग्रेऽपि यथास्थानं भावनीयम् ।

अनेन विधिना क्रोधद्वितीयसंग्रहकिट्टिं वेदयतो जीवस्य क्रोधद्वितीयसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायां 'वेइज्जं०' इत्यादि **पञ्चषष्ट्यधिकशततमगाथा** प्रस्तुतमाश्रित्य व्याख्यायेत । तथाहि–क्रोधद्वितीयसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते । अभाणि च **कषायप्राभृतचूर्णौ–"कोहस्स विदियकिट्टिं वेदयमाणस्स जा पढमट्ठिदी, तिस्से पढमट्ठिदीए आवलिय–पडिआवलियाए सेसाए आगाल–पडिआगालो वोच्छिण्णो ।"** इति । न च किट्टिकरणात्प्रभृति मोहनीयकर्मण उद्वर्तना न भवतीत्युक्त**मेकोत्तरशततमगाथायाम्** । तेन **प्रस्तुतचूर्णौ** प्रथमस्थितितो द्वितीयस्थितौ प्रदेशगमनलक्षणस्य प्रत्यागालस्य व्यवच्छेदो व्यर्थः, प्रवृत्तस्यैव विच्छेदस्य न्याय्यत्वादिति वाच्यम् , द्वितीयस्थितितः प्रथमस्थितावपवर्तनया दलिकाऽऽगमनस्य संभवेन तन्निषेधस्याऽऽवश्यकत्वेनाऽऽगालव्यवच्छेदस्य न्याय्यत्वेन तत्साहचर्यात् पाठभङ्गभयाद्वा **चूर्णिकाराणां** प्रत्यागालोक्तिसंभवात् 卐 । ततः समयोनाऽऽवलिकायां गतायां क्रोधप्रथमसंग्रहकिट्टिप्रथमस्थितौ समयाऽधिकाऽऽवलिकाशेषायां प्रथमस्थितिचरमनिषेकतः क्रोधदलमुदये प्रक्षिपतः क्षपकस्यैकस्थितिप्रमाणा क्रोधस्य जघन्यस्थित्युदीरणा भवति ।

तदानीं चैव क्रोधद्वितीयसंग्रहकिट्टिचरमोदयः प्रवर्तते, ततः परं क्रोधतृतीयसंग्रहकिट्टिवेदनात् । उक्तं च **कषायप्राभृतचूर्णौ–"तिस्से चेव पढमट्ठिदीए समयाहियाए आवलियाए सेसाए ताहे कोहस्स विदियकिट्टीए चरिमसमयवेदगो ।"** इति ॥१७१॥

---

卐समाहितं च जयधवलाकारैरपि"जइ वि एत्थ किट्टीकरणद्धापारंभप्पहुडि मोहणीयस्स उक्कड्डणाभावेण पढमट्ठिदीदो विदियट्ठिदिम्मि पदेससंचारो णत्थि, तो वि विदियट्ठिदीदो पढमट्ठिदीए ओकड्डिज्जमाणपदेसग्गस्स एण्हिमणागमणं पेक्खियूणागालपडिआगालवोच्छेदो णिद्दिट्ठो ।" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### यन्त्रकम् (गाथा–१७०)

(१) क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धाप्रथमसमयतः प्रभृति क्रोधद्वितीयसंग्रहकिट्टया अधस्तनीरुपरितनीश्चाऽसंख्येयभागप्रमाणा अवान्तरकिट्टीर्वर्जयित्वा शेषा अवान्तरकिट्टीर्बध्नाति वेदयति च ।
(२) बध्यमानावान्तरकिट्टित उदयमाना अवान्तरकिट्टयो विशेषाधिका भवन्ति ।
(३) प्रतिसमयमनुसमयापवर्तनाघातेनोपरितनाऽसंख्येयभागप्रमाणा अवान्तरकिट्टीर्घातयति ।
(४) क्रोधप्रथमकिट्टिवेदकवत् संग्रहकिट्टयन्तरेष्ववान्तरकिट्टयन्तरेषु चाऽपूर्वावान्तरकिट्टीर्निर्वर्तयति ।
(५) एकादशानां संग्रहकिट्टीनां प्रदेशाल्पबहुत्वमवान्तरकिट्टयल्पबहुत्वञ्च चतुर्नवतितमादिगाथाभिर्यथाऽभिहितम्, तथैवा-ऽत्र बोध्यम्, नवरं लोभतृतीयसंग्रहकिट्टितः क्रोधद्वितीयसंग्रहकिट्टयाः प्रदेशा अवान्तरकिट्टयश्च संख्येयगुणा वाच्या ।
(६) क्रोधद्वितीयसंग्रहकिट्टयाः प्रथमस्थित्यां द्वयावलिकाशेषायामागालो व्यवच्छिद्यते ।
(७) क्रोधद्वितीयसंग्रहकिट्टयाः प्रथमस्थितौ समयाधिकावलिकाशेषायां क्रोधस्य जघन्यस्थित्युदीरणा भवति ।
(८) क्रोधद्वितीयसंग्रहकिट्टयाः प्रथमस्थित्यां समयाधिकावलिकाशेषायां क्रोधद्वितीयसंग्रहकिट्टयाश्चरमोदयः ।

अथ चरमोदये सप्तानामपि कर्मणां स्थितिबन्धमभिधित्सुराह—

**चरिमे बंधो मोहस्स देसऊणा दिणा असीई उ ।**
**घाईणद्दपुहुत्तं पराण संखियसहस्सवरिसाइं ॥१७२॥ (गीतिः)**

चरिमे बन्धो मोहस्य देशोना दिना अशीतिस्तु ।
घातिनामब्दपृथक्त्वं परेषां संख्यसहस्रवर्षाणि ॥१७२॥ इति पदसंस्कारः ।

**'चरिमे'** इत्यादि, 'चरमे' क्रोधद्वितीयसंग्रहकिट्ट्युदयचरमसमये क्रोधद्वितीयसंग्रहकिट्टिप्रथमस्थितौ समयाऽधिकाऽऽवलिकाशेषायामित्यर्थः, 'मोहस्य' संज्वलनचतुष्कस्य 'बन्धः' 'स्थितिबन्धो' 'देशोनाः' अन्तर्मुहूर्तन्यूना 'अशीतिस्तु' अशीतिसंख्याकास्तु 'दिनाः' दिवसा भवति, क्रोधप्रथमसंग्रहकिट्टिवेदनचरमसमयप्ररूपणाऽवसरे द्वितीयसंग्रहकिट्टिवेदनकाले स्थितिबन्धस्याऽन्तर्मुहूर्तन्यूनविंशतिदिनप्रमाणहानेस्त्रैराशिकेन साधितत्वात् ।

**'घाईण०'** इत्यादि, घातिनां कर्मणां स्थितिबन्धो 'अब्दपृथक्त्वं' वर्षपृथक्त्वं भवति । अत्र घातिशब्देन ज्ञानावरणदर्शनावरणाऽन्तराया ग्राह्याः, मोहनीयबन्धस्य पृथगभिहितत्वात् । अयं भावः—मोहनीयस्य स्थितिबन्धो विशेषतो देशोनाऽशीतिदिवसाः प्रोक्तः । इह तु सामान्येन घातिकर्मणां स्थितिबन्ध उच्यते, तेन मोहनीयस्य स्थितिबन्धो देशोनाऽशीतिदिवसा भवति, वर्षपृथक्त्वं तु घातिवचनेन ज्ञानावरणदर्शनावरणाऽन्तरायाणां जायते, अन्यथा पृथग् मोहनीयस्थितिबन्धविधानस्य वैयर्थ्यं प्रसज्येत । क्रोधप्रथमसंग्रहकिट्टिवेदनचरमसमये घातित्रयस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थितिबन्धोऽन्तर्मुहूर्तन्यूनदशवर्षप्रमाण आसीत् , स क्रोधद्वितीयसंग्रहकिट्टिवेदनकाले संख्यातेषु स्थितिबन्धेषु गतेषु क्रोधद्वितीयसंग्रहकिट्टिवेदनचरमसमये वर्षपृथक्त्वमात्रो जायते ।

'पराणं' इत्यादि, 'परेषां' त्रयाणामघातिकर्मणां नाम-गोत्र-वेदनीयलक्षणानां स्थितिबन्धः 'संख्यसहस्रवर्षाणि भवति, क्रोधप्रथमसंग्रहकिट्टिवेदनचरमसमयतः प्रतिस्थितिबन्धमघातिकर्मणां स्थितिबन्धो हीयमानः सन्निदानीमपि संख्यातसहस्रवर्षप्रमाणो भवति । उक्तं च कषायप्राभृतचूर्णौ–"**ताधे संजलणाणं ठिदिबंधो वे मासा वीसं च दिवसा देसूणा । तिण्हं घादिकम्माणं ट्ठिदिबंधो वासपुधत्तं । सेसाणं कम्माणं ट्ठिदिबंधो संखेज्जाणि वस्ससहस्साणि ।** "इति ॥१७२॥

अथ क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये सप्तानामपि कर्मणां स्थितिसत्त्वमभिधित्सुराह–

**मोहस्स देसऊणा चउमासऽहिअपणहायणा घाईणं ।**
**संखसहस्सवरिसगाइं इयराणं असंखवरिसा संतं ॥१७३॥ (आर्यागीतिः)**

मोहस्य देशोनाश्चतुर्मासाधिकपञ्चहायना घातिनाम् ।
सङ्ख्यसहस्रवर्षाणीतरेषामसङ्ख्यवर्षाः सत्त्वम् ॥१७३॥ इति पदसंस्कारः ।

'**मोहस्स**' इत्यादि, क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धायाश्चरमसमये 'मोहस्य' संज्वलनचतुष्कस्य 'सत्त्वं' स्थितिसत्त्वं 'चतुर्मासाधिकपञ्चहायनाः' चतुर्भिर्मासैरधिकानि पञ्चवर्षाणि जायते, क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमयप्ररूपणाऽवसरे क्रोधद्वितीयसंग्रहकिट्टिवेदनकालेऽन्तर्मुहूर्तन्यूनषोडशमासैः स्थितिसत्त्वस्य हानेस्त्रैराशिकेन साधितत्वात् । अयं भावः–क्रोधप्रथमसंग्रहकिट्टिवेदनचरमसमये मोहनीयस्य यत्स्थितिसत्त्वमन्तर्मुहूर्तन्यूनाऽष्टमासाधिकषड्वर्षप्रमाणमासीत् , तत् क्रोधद्वितीयसंग्रहकिट्टिवेदनकालेऽन्तर्मुहूर्तोनषोडशमासैर्हीनं सदन्तर्मुहूर्तन्यूनचतुर्मासाऽधिकपञ्चवर्षप्रमाणमिदानीं जायते ।

'**घाईणं**' इत्यादि, तथा 'घातिनां' ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां स्थितिसत्त्वं 'सङ्ख्यसहस्रवर्षाणि' संख्यातसहस्रवर्षप्रमितं विद्यत इति शेषः, 'परेषाम्' अघातिकर्मणां-नामगोत्र-वेदनीयानां स्थितिसत्त्वम् 'असंख्यवर्षाः' असंख्यातवार्षिकं विद्यते । क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये घात्यघातिकर्मणां यत्स्थितिसत्त्वं क्रमेण संख्येयासंख्येयवर्षाण्यासीत् , तत् संख्यातस्थितिघातसहस्रैर्घातितं सत् क्रोधप्रथमसंग्रहकिट्टिवेदनचरमसमयाऽपेक्षया घात्यघातिनां क्रमेण संख्येयाऽसंख्येयगुणहीनं भवदपि संख्येयाऽसंख्येयवर्षेभ्यो न्यूनं न भवतीत्यर्थः । उक्तं च कषायप्राभृतचूर्णौ–"**संजलणाणं ट्ठिदिसंतकम्मं पंच वस्साणि चत्तारि मासा अंतोमुहुत्तूणा । तिण्हं घादिकम्माणं ट्ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि । णामागोदवेदणीयाणं** **तकम्ममसंखेज्जाणि वस्साणि ।**" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये क्रोधद्वितीयसंग्रहकिट्टेरुदयसमयाधिकावलिकागतं समयोनद्व्यावलिकाबद्धं च नवीनं दलं परित्यज्य शेषं क्रोधद्वितीयसंग्रहकिट्टेः सर्वं दलं गृहीत्वाऽसंख्येयभागप्रमाणदलं क्रोधतृतीयसंग्रहकिट्टेर्मानप्रथमसंग्रहकिट्टेश्च पूर्वाऽपूर्वावान्तरकिट्टिषु यथायोग्यं संक्रमयति। शेषबहुसंख्येयभागमात्रदलतः क्रोधतृतीयसंग्रहकिट्टेरधस्तादपूर्वाऽवान्तरकिट्टीर्निर्वर्तयति। तेन क्रोधद्वितीयसंग्रहकिट्टिबहुसंख्येयभागप्रमाणं दलं क्रोधतृतीयसंग्रहकिट्टौ संक्रम्यते। इत्थं तस्यां दलं मोहनीयसकलदलस्य पञ्चदशचतुर्विंशतिभागकल्पं ($\frac{15}{24}$) जायते, क्रोधद्वितीयसंग्रहकिट्टिसम्बद्धस्य चतुर्दशचतुर्विंशतिभागप्रमाणस्य दलस्य तदानीं तत्तया (=क्रोधतृतीयसंग्रहकिट्टितया) परिणतत्वात्। तथा क्रोधतृतीयसंग्रहकिट्टौ दलमितरसंग्रहकिट्टयपेक्षया पञ्चदशगुणं जायते, इतरसंग्रहकिट्टीनां दलस्यैकचतुर्विंशतिभागप्रमाणत्वात्। एवं क्रोधतृतीयसंग्रहकिट्टेरवान्तरकिट्टयोऽपि बोध्याः ॥१७३॥

### यन्त्रकम्

(१) मोहनीयस्य स्थितिबन्धोऽन्तर्मुहूर्तन्यूनाशीतिदिवसाः।

(२) शेषघातित्रयस्य स्थितिबन्धो वर्षपृथक्त्वम्।

(३) अघातित्रयस्य स्थितिबन्धः संख्येयवर्षसहस्राणि।

(४) मोहनीस्य स्थितिसत्त्वमन्तर्मुहूर्तन्यूनचतुर्मासाधिकाः पञ्च वर्षाः।

(५) घातित्रयस्य स्थितिसत्त्वं संख्यातसहस्रवर्षाणि।

(६) अघातित्रयस्य स्थितिसत्त्वमसंख्येयवर्षाणि।

(७) समयाधिकोदयावलिकागतदलं समयोनद्व्यावलिकाबद्धनूतनदलं च वर्जयित्वाऽसंख्येयभागमात्रं च दलं मानप्रथमसंग्रहकिट्टौ प्रक्षिप्य शेषं क्रोधद्वितीयसंग्रहकिट्टिबहुसंख्येयभागप्रमाणं दलं क्रोधतृतीयसंग्रहकिट्टित्वेन परिणमयति। तेन क्रोधतृतीयसंग्रहकिट्टिदलं मोहनीयसकलदलस्य पञ्चदशचतुर्विंशतिभागकल्पं ( $\frac{15}{24}$ ) जायते। एवं क्रोधतृतीयसंग्रहकिट्टेरवान्तरकिट्टयोऽपि वाच्याः।

क्रोधद्वितीयसंग्रहकिट्टिवेदनविधिं परिपाल्य तदनन्तरसमये यत्करोति, तद् व्याजिहीर्षुराह–

**सेकाले तइयं किट्टिं ओकड्ढित्तु आइमठिइं उ।**
**कुणए वेयइ बीयव्व य सेसपरूवणा णेया ॥१७४॥**

अनन्तरकाले तृतीयां किट्टिमपकृष्याऽऽदिमस्थितिं तु।
करोति वेदयति द्वितीयावच्च शेषप्ररूपणा ज्ञेया ॥१७४॥ इति पदसंस्कारः।

'सेकाले' इत्यादि, 'अनन्तरकाले' क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धासमाप्तेरनन्तरसमय इत्यर्थः, 'तृतीयां किट्टिं' द्वितीयस्थितिस्थक्रोधतृतीयसंग्रहकिट्टिगतप्रदेशाग्रमपकृष्योदयसमयादारभ्य शेषक्रोधवेदनकालत आवलिकयाऽधिकासु स्थितिष्वसंख्येयगुणक्रमेण निक्षिपन् 'आदिमस्थितिं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोधतृतीयसंग्रहकिट्टेः प्रथमस्थितिं तु करोति । उक्तं च **कषायप्राभृतचूर्णौ–"तदो से काले कोहस्स तदियकिट्टीदो पदेसग्गमोकड्डियूण पढमट्ठिदिं करेदि ।"** इति ।

**'वेयइ'** त्ति तदानीमेव 'वेदयति' क्रोधतृतीयसंग्रहकिट्टिमनुभवति च, उक्तं च **सप्ततिकाचूर्णौ–"तओ से काले कोहस्स ततियकिट्टीओ दलियं कड्ढित्तु ततियकिट्टीए पढमठितिं करेति वेदेति य ।"** इति । अत्र **नवषष्ट्यधिकशततम**संग्रहगाथा प्रकृतमनुलक्ष्य व्याख्येया । तद्यथा–क्रोधतृतीयसंग्रहकिट्टिवेदनाद्धायाः प्रथमसमये क्रोधद्वितीयसंग्रहकिट्टेर्द्विसमयोनद्व्यावलिकाबद्धनूतनदलं द्वितीयस्थितौ प्रथमस्थितौ चोदयाऽऽवलिकागतं च दलं सत्कर्मणि विद्यते, ततोऽधिकं न विद्यते, शेषसर्वदलस्य क्रोधतृतीयसंग्रहकिट्टिमानप्रथमसंग्रहकिट्टितया परिणतत्वात् ।

अथ क्रोधतृतीयसंग्रहकिट्टिवेदनविधौ क्रोधद्वितीयसंग्रहकिट्टिवेदनविधिमतिदिदिक्षुराह–**'बोयव्व'** इत्यादि, 'द्वितीयावच्च' क्रोधद्वितीयसंग्रहकिट्टिवच्च 'शेषप्ररूपणा' बन्धोदयनाशसंक्रमाऽपूर्वावान्तरकिट्टिनिर्वृत्त्यवान्तरकिट्ट्यल्पबहुत्वादिप्ररूपणा 'ज्ञेया' ज्ञातव्या, विशेषाभावात् । यद्भाणि **कषायप्राभृतचूर्णौ–"जो विदियकिट्टिं वेदयमाणस्स विधी, सो चेव विधी तदियकिट्टिं वेदयमाणस्स वि कायव्वो ।"** इति । नवरं संग्रहकिट्टीनां प्रदेशाग्रमवान्तरकिट्टीश्चाश्रित्य दशपदकमल्पबहुत्वं ज्ञेयम् । तत्राऽपि लोभतृतीयसंग्रहकिट्टेः प्रदेशेभ्यः क्रोधतृतीयसंग्रहकिट्टेः प्रदेशाः संख्यातगुणा भवन्ति । एवमवान्तरकिट्टयोऽपि ।

**एकसप्तत्यधिकशततम**संग्रहगाथा प्रस्तुतमनुलक्ष्य भावनीया । तथाहि–क्रोधतृतीयसंग्रहकिट्टिमनुभवन् क्षपकः क्रोधस्य तृतीयसंग्रहकिट्टिं बध्नाति, मानादीनां तु प्रथमसंग्रहकिट्टिं बध्नाति ।

एवंविधानेन क्रोधतृतीयसंग्रहकिट्टिं वेदयतो जीवस्य क्रोधतृतीयसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायां 'वेइज्ज०' इत्यादि **पञ्चषष्ट्यधिकशततम**संग्रहगाथा प्रकृतमाश्रित्य व्याख्येया । तथाहि–क्रोधतृतीयसंग्रहकिट्टिप्रथमस्थितेरावलिकाद्वये शेषयागालो व्यवच्छिद्यते । ततः समयोनाऽऽवलिकाप्रमाणां प्रथमस्थितिमनुभूय क्रोधतृतीयसंग्रहकिट्टिप्रथमस्थितेः समयाधिकायामावलिकायां शेषायां क्रोधस्य जघन्यस्थित्युदीरणा क्रोधतृतीयसंग्रहकिट्टेश्च चरमोदयो जायते । इत्थं त्रिः क्रोधस्य जघन्यस्थित्युदीरणा क्रोधकिट्टिवेदनाद्धायां जाता ।

क्रोधतृतीयसंग्रहकिट्टिवेदनचरमसमय एव संज्वलनक्रोधस्य जघन्यानुभागोदीरणा गुणितकर्मांशस्य च क्षपकस्य संज्वलनक्रोधस्योत्कृष्टप्रदेशोदीरणा च भवति । प्रत्यपादि च **कर्मप्रकृतिचूर्णौ—"पंचविहअंतराइयकेवलणाणकेवलदंसणावरणचउण्हं संजलणाणं णवण्हं णोकसायाणं एयासिं वोसाए पगईणं अप्पप्पणो उदीरणंते जहण्णिया अणुभागउदीरणा होति । ××× घातिकम्माणं सव्वेसिं अणुभागउदीरणम्मि**

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

**जस्स जो जो जहण्णसामी भणितो, सो चेव उक्कोसपदेसउदीरणाए उक्कोससामी गुणियकम्मंसिगो य जाणियव्वो ।"** इति । तथैव **कषायप्राभृतचूर्णावपि--"कोहसंजलणस्स जहण्णाणुभागउदीरणा कस्स? खवगस्स चरिमसमयकोहवेदगस्स । ××× कोहसंजलणस्स उक्कस्सिया पदेसुदीरणा कस्स? खवगस्स चरिमसमयकोधवेदगस्स ।"** इति । एवं जघन्याऽनुभागोदयो गुणितकर्मांशस्य चोत्कृष्टप्रदेशोदयो वाच्यः, संज्वलनत्रिकस्य जघन्याऽनुभागोदीरणोत्कृष्टप्रदेशोदीरणयोः स्वामिना तुल्यत्वाद् यथाक्रमं जघन्यानुभागोदयोत्कृष्टप्रदेशोदययोः स्वामिनाम् । एवमग्रेऽपि मानमाययोर्भाव्यम् । क्रोधतृतीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायां क्रोधस्य चरमोदयः, ततः परं तस्य क्षपकस्य क्रोधोदयाऽभावात् । उक्तं च **कषायप्राभृतचूर्णौ--"तदियकिट्टिं वेदेमाणस्स जा पढमट्ठिदी, तिस्से पढमट्ठिदीए आवलियाए समयाहियाए सेसाए चरिमसमयकोधवेदगो जहण्णगो ठिदिउदीरगो ।"** इति ॥१७४॥

अथ क्रोधतृतीयसंग्रहकिट्टया उदयचरमसमये मोहनीयस्य स्थितिबन्धं स्थितिसत्त्वं च निरूरूपयिषुराह—

**चरिमुदये संजलणाणं ठिइबंधो दुमासिओ होइ ।**
**ठिइसंतं उण चत्तारि होइ वरिसाणि मोहस्स ॥१७५॥**

चरमोदये संज्वलनानां स्थितिबन्धो द्वैमासिको भवति ।
स्थितिसत्त्वं पुनश्चत्वारि भवति वर्षाणि मोहस्य ॥१७५॥ इति पदसंस्कारः ।

**'चरिमुदये'** इत्यादि, 'चरमोदये' क्रोधतृतीयसंग्रहकिट्टिचरमोदये=क्रोधतृतीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायामित्यर्थः, 'संज्वलनानां' संज्वलनक्रोध-मान-माया-लोभानां स्थितिबन्धो द्वैमासिको भवति, क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये यः स्थितिबन्धोऽन्तर्मुहूर्तन्यूनाऽशीतिर्दिवसा भवति स्म, स क्रोधतृतीयसंग्रहकिट्टिवेदनकाले त्रैराशिकसाधितैरन्तर्मुहूर्तन्यूनविंशतिदिवसैर्हीनो भवन् सम्प्रति द्विमासप्रमाणो जायत इत्यर्थः । न्यगादि च **कषायप्राभृतचूर्णौ--"ताधे ठिदिबंधो संजलणाणं दो मासा पडिपुण्णा ।"** इति । संज्वलनक्रोधस्य त्वेष जघन्यस्थितिबन्धः । यदभ्यधायि **श्रीमन्मलयगिरिपादैः स्थितिबन्धप्ररूपणावसरे--"संज्वलनचतुष्टयपुरुषवेदानामनिवृत्तिबादरक्षपकः तद्बन्धस्य यथास्वं चरमस्थितिबन्धे वर्तमानो जघन्यस्थितिबन्धकः तद्बन्धकेष्वस्यैवातिविशुद्धत्वात् ।"** इति । तथा तदानीमेव संज्वलनक्रोधस्य सर्वजघन्याऽनुभागबन्धो जायते । यदुक्तं **श्रीमन्मलयगिरिपादैरनुभागबन्धस्वामित्वप्रस्तावे--"पुरुषवेदसंज्वलनचतुष्कयोरनिवृत्तिबादरः क्षपकः स्वबन्धव्यवच्छेदसमये समयमेकं तथा, तस्यापि तद्बन्धकेष्वतिविशुद्धत्वात् ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ स्थितिसत्त्वं दर्शयति—'ठिइसंतं' इत्यादि, क्रोधतृतीयसंग्रहकिट्टिप्रथमस्थितेः समयाधिकाऽऽवलिकायां शेषायां 'मोहस्य' संज्वलनचतुष्कस्य स्थितिसत्त्वं पुनश्चत्वारि वर्षाणि भवति । इदमुक्तं भवति—क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये संज्वलनचतुष्कस्य यत् स्थितिसत्त्वमन्तर्मुहूर्तन्यूनचतुर्मासाधिकपञ्चवर्षाण्यासीत्, तत् त्रैराशिकेन साधितैरन्तर्मुहूर्तन्यूनषोडशमासैर्हीनं सत् चतुर्वार्षिकं जायते । यदुक्तं **कषायप्राभृतचूर्णौ—संतकम्मं चत्तारि वस्साणि पुण्णाणि ।**" इति । शेषाणां त्रयाणां घातिकर्मणां स्थितिसत्त्वं संख्येयानि वर्षसहस्राण्यघातित्रयस्य चाऽसंख्येयवर्षसहस्राणि बोध्यम्, पूर्वमुक्तत्वाद् इह नाऽभिहितम् ।

**"व्यवहारनयश्चलितमेव चलितमिति मन्यते, निश्चयस्तु चलदपि चलितमिति" श्रीव्याख्याप्रज्ञप्तिवृत्तिकारवचनात्** निश्चयनयेन व्यवच्छिद्यमानाः संज्वलनक्रोधस्य बन्धोदयोदीरणा युगपद् व्यवच्छिन्नाः । उक्तं च **सप्ततिकाचूर्णौ**—" ××× **खिवंतो खिवंतो जाव ततियकिट्टिवेदगद्धाए चरिमसमओ, ताव आगओ । तम्मि समए कोहसंजलणाए बंधोदओदीरणा य जुगवं फिट्टंति ।**" इति ।

क्रोधस्य तृतीयसंग्रहकिट्टिवेदनचरमसमये समयाधिकावलिकागतं दलं समयोनाऽऽवलिकाद्वयबद्धनूतनदलं च विहाय शेषक्रोधदलतो मानप्रथमसंग्रहकिट्टेः पूर्वावान्तरकिट्टिष्ववान्तरकिट्टयन्तरोत्पन्नाऽपूर्वावान्तरकिट्टिषु चाऽसंख्येयभागप्रमाणदलं दत्त्वा शेषबहुसंख्येयभागमितं दलं मानप्रथमसंग्रहकिट्टेरधस्तादपूर्वावान्तरकिट्टिषु संक्रमयति । यदुक्तं **सप्ततिकाचूर्णौ—"संतकम्मं पि समयूणदुआवलियबद्धं मोत्तूणं सव्वं माणम्मि पक्खित्तं ।**" इति । तेन मानप्रथमसंग्रहकिट्टौ दलं षोडशचतुर्विंशतिभागप्रमाणं ($\frac{16}{24}$) जायते, संज्वलनक्रोधतृतीयसंग्रहकिट्टिसम्बद्धपञ्चदशचतुर्विंशतिभागप्रमाणदलस्य ($\frac{15}{24}$) तदानीं मानप्रथमसंग्रहकिट्टितया परिणतत्वात्, तथा मानप्रथमसंग्रहकिट्टिदलमितरसंग्रहकिट्टयपेक्षया षोडशगुणं जायते, इतरसंग्रहकिट्टीनां प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमाणत्वात् । एवं मानप्रथमसंग्रहकिट्टेरवान्तरकिट्टयोऽपि ज्ञातव्याः ॥१७५॥

### क्रोधतृतीयसंग्रहकिट्टिवेदनाद्धाप्ररूपणायन्त्रकम्—

(१) द्वितीयस्थितिस्थक्रोधतृतीयसंग्रहकिट्टिप्रदेशाग्रमपकृष्य क्रोधतृतीयसंग्रहकिट्टयाः प्रथमस्थितिं करोति वेदयति च ।

(२) क्रोधद्वितीयसंग्रहकिट्टया द्विसमयोनद्वयावलिकाबद्धनूतनदलं द्वितीयस्थित्यामुदयावलिकागतं च दलं प्रथमस्थितौ विद्यते ।

(३) शेषं क्रोधद्वितीयसंग्रहकिट्टिवेदनवद् बोध्यम्, नवरं संग्रहकिट्टीनां प्रदेशाग्रमवान्तरकिट्टीश्चाश्रित्य दशपदकमल्पबहुत्वं वाच्यम् । तत्राऽपि लोभतृतीयसंग्रहकिट्टिप्रदेशेभ्यः क्रोधतृतीयसंग्रहकिट्टिप्रदेशाः संख्येयगुणा वक्तव्याः । एवमवान्तरकिट्टयोऽपि ।

(४) क्रोधस्य तृतीयसंग्रहकिट्टिं बध्नाति, मानादीनां तु पूर्ववत् प्रथमाम् ।

(५) क्रोधतृतीयसंग्रहकिट्टयाः प्रथमस्थितेरावलिकाद्वये शेषे आगालो व्यवच्छिद्यते ।

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

**पूर्वतोऽनुवर्तमानं क्रोधतृतीयसंग्रहकिट्टिवेदनाद्धाप्ररूपणायन्त्रकम्**

(६) क्रोधतृतीयसंग्रहकिट्टयाः प्रथमस्थितौ समयाधिकावलिकाशेषायाम्।
(क) क्रोधतृतीयसंग्रहकिट्टयाश्चरमोदयः।
(ख) क्रोधस्य जघन्यस्थित्युदीरणा जघन्यस्थित्युदयश्च।
(ग) क्रोधस्य जघन्यानुभागोदीरणा जघन्यानुभागोदयश्च।
(घ) गुणितकर्मांशस्य जीवस्य क्रोधस्योत्कृष्टप्रदेशोदीरणोत्कृष्टप्रदेशोदयश्च।
(ङ) संज्वलनानां स्थितिबन्धो द्वैमासिकः।
(च) संज्वलनक्रोधस्य जघन्यस्थितिबन्धः।
(छ) संज्वलनक्रोधस्य जघन्याऽनुभागबन्धः।
(ज) संज्वलनानां स्थितिसत्त्वं चत्वारि वर्षाणि।
(झ) निश्चयनयमतेन संज्वलनक्रोधस्य बन्धोदयोदीरणा व्यवच्छिद्यमाना युगपद् व्यवच्छिन्नाः।
(ञ) समयाधिकोदयावलिकागतदलं समयोनद्वयावलिकाबद्धनूतनदलं च वर्जयित्वा शेषक्रोधदलस्य मानप्रथमसंग्रहकिट्टित्वेन परिणामः। तेन मानप्रथमसंग्रहकिट्टिदलं मोहनीयसकलदलस्य षोडशचतुर्विंशतिभागकल्पं ($\frac{१६}{२४}$) जायते। एवं मानप्रथमसंग्रहकिट्टेरवान्तरकिट्टयोऽपि बोध्याः।

अथ क्रोधतृतीयसंग्रहकिट्टिवेदनविधिं परिपाल्याऽनन्तरसमये यत्करोति, तदभिधित्सुराह—

## सेकाले माणपढमकिट्टिं ओकड्ढिऊण पढमठिइं।
## कुणए वेयइ सव्वो य विही कोहपढमव्व णायव्वो ॥१७६॥ (गीतिः)

अनन्तरकाले मानप्रथमकिट्टिमपकृष्य प्रथमस्थितिम्।
करोति वेदयति सर्वश्च विधिः क्रोधप्रथमावज्ज्ञातव्यः ॥१७६॥ इति पदसंस्कारः।

**'सेकाले'** इत्यादि, **'अनन्तरकाले'** क्रोधतृतीयसंग्रहकिट्टिवेदनाद्धासमाप्तेरनन्तरसमये **'मानप्रथमकिट्टिं'** द्वितीयस्थितिस्थमानप्रथमसंग्रहकिट्टिप्रदेशाग्रमपकृष्योदयसमयादारभ्याऽसंख्येयगुणक्रमेण मानवेदनाद्धायाः साधिकत्रिभागे मानप्रथमसंग्रहकिट्टिवेदनकालतस्त्वावलिकयाऽधिकासु स्थितिषु निक्षिपन् 'प्रथमस्थितिं' मानप्रथमसंग्रहकिट्टिप्रथमस्थितिं 'करोति' निर्वर्तयति। यदवादि **कषायप्राभृतचूर्णौ–"से काले माणस्स पढमकिट्टिमोकड्डियूण पढमट्ठिदिं करेदि।"** इति। **'वेयइ'** त्ति तदानीमेव मानप्रथमसंग्रहकिट्टिं च 'वेदयति' अनुभवति। उक्तं च **सप्ततिकाचूर्णौ–"तओ से काले माणस्स पढमकिट्टीओ दलिअं ओकड्ढित्तु पढमठितिं करेति वेदेइ ताव, जाव अंतोमुहुत्तं।"** इति।

तदानीं प्रथमस्थितौ यत् क्रोधदलमुदयावलिकायां विद्यते, तत् प्रतिसमयं वेद्यमानमानप्रथमसंग्रहकिट्टौ स्तिबुकसंक्रमेण संक्रम्य विनाशयति। यत्पुनर्द्वितीयस्थितौ द्विसमयोनावलिकाद्वयेन बद्धदलं विद्यते, मानप्रथमसंग्रहकिट्टिं वेदयमानेन तावता कालेन पुरुषवेदवत् संक्रमेण तत् संक्रमयता जीवेन चरमप्रक्षेपेऽसंक्रम्यमाणे संज्वलनक्रोधस्य जघन्यस्थितिसत्त्वं जघन्याऽनुभागसत्त्वं च प्राप्यते। उक्तं च **कषायप्राभृतचूर्णौ–"कोहसंजलणस्स जहण्णट्ठिदिविहत्ती कस्स?**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**खवगस्स चरिमसमयअणिल्लेविदे कोहसंजलणे। ×××कोहसंजलणस्स जहण्णय-मणुभागसंतकम्मं कस्स ? खवगस्स चरिमसमयअसंकामयस्स।''** इति।

तथा क्रोधोदयचरमसमये जघन्ययोगिना बद्धक्रोधस्य तदानीं जघन्यं प्रदेशसत्कर्म भवति। उक्तं च **कषायप्राभृतचूर्णौ**–"**कोहसंजलणस्स जहण्णयं पदेससंतकम्मं कस्स ? चरिमसमयकोधवेदगेण खवगेण जहण्णजोगट्ठाणे जं बद्धं, तं जं वेलं चरिमसमय-अणिल्लेविदं, तस्स जहण्णयं संतकम्मं।**'' इति। तथैव **कर्मप्रकृतिचूर्णावपि**"**जहन्नगं संतकम्मं 'णियगसंतकम्मंते' त्ति अप्पप्पणो संतकम्मस्स अंते भवति।**" इति।

तदानीं चरमप्रक्षेपे संक्रम्यमाणे संज्वलनक्रोधस्य जघन्यस्थितिसंक्रमो जघन्याऽनु-भागसंक्रमश्च जायते। उक्तं च **कषायप्राभृतचूर्णौ**–"**कोहसंजलणस्स जहण्णट्ठिदिसं-कमो कस्स ? खवगस्स कोहसंजलणस्स अपच्छिमट्ठिदिबंधचरमसमयसंछुहमाण-यस्स तस्स जहण्णयं। ××× कोहसंजलणस्स जहण्णाणुभागसंकामओ को होइ ? चरिमाणुभागबंधस्स चरिमसमयअणिल्लेवगो।**''इति।

तथा **कर्मप्रकृतिचूर्णिकारादीनामभिप्रायेण** क्रोधोदयचरमसमये जघन्ययोगेन बद्ध-नूतनक्रोधदलिको जीव इदानीं क्रोधस्य जघन्यप्रदेशसंक्रमं करोति। तथा चात्र **कर्मप्रकृ-तिचूर्णिः**–"**पुरिसकोहमाणमायासंजलणाणं' 'घोलमाणेण' त्ति जहण्णगजोगिणा 'चरिमबद्धस्स' खवणाए अब्भुट्ठियस्स अप्पप्पणो चरिमसमयबद्धस्स 'सग-अंतिमे' त्ति अप्पप्पणो चरिमसमयछोभे सव्वसंकमेणं जहण्णतो पदेससंकमो होति त्ति।**'' तथैव **पञ्चसंग्रहेऽपि**—

"**पुंसंजलणतिगाणं जहण्णजोगिस्स खवगसेढीए।**
**सगचरिमसमयबद्धं जं छुभइ सगंतिमे समए॥१॥**'' इति।

**कषायप्राभृतचूर्णिकाराणामभिप्रायेण** तदानीं जघन्यप्रदेशसंक्रमं न करोति, तैरुपशमकस्यैव जघन्यप्रदेशसंक्रमस्य प्रतिपादितत्वात्। तथा च **तद्ग्रन्थः**–"**कोहसंजलणस्स जहण्णओ पदेससंकमो कस्स ? उवसामयस्स चरिमसमयपबद्धो जाधे उवसामि-ज्जमाणो उवसंतो, ताधे तस्स कोहसंजलणस्स जहण्णओ पदेससंकमो, एवं माणमायासंजलणपुरिसवेदाणं।**'' इति।

**'सव्वो'** इत्यादि, सर्वश्च 'विधिः' वेदनादिविधिः'क्रोधप्रथमावत्' क्रोधप्रथमसंग्रहकिट्टिवेद-नवज्ज्ञातव्यः, विशेषाभावात्। उक्तं च **कषायप्राभृतचूर्णौ**–"**जेणेव विहिणा कोधस्स पढमकिट्टी वेदिदा,तेणेव विधिणा माणस्स पढमकिट्टिं वेदयदि।**'' इति। इदमुक्तं भवति-यथा क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धायामधस्तनीरुपरितनीश्चाऽसंख्येयभागप्रमाणा अवान्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किट्टीर्वर्जयित्वा शेषा अबध्यन्ताऽवेद्यन्त च । तत्राऽपि बन्धत उदयेऽवान्तरकिट्टयो विशेषाधिका भवन्ति स्म । संज्वलनानां प्रथमसंग्रहकिट्टिरेव बध्यते स्म, प्रतिसमयमनुसमयाऽपवर्तनाघातेन उपरितन्योऽवान्तरकिट्टयो घात्यन्ते स्म, यथायोग्यं संग्रहकिट्टयन्तरेष्ववान्तरकिट्टयन्तरेषु चाऽपूर्वावान्तरकिट्टयो निर्वर्त्यन्ते स्म, पूर्वापूर्वाऽवान्तरकिट्टिषु दलनिक्षेपः, संग्रहकिट्टिगतानामवान्तरकिट्टीनामल्पबहुत्वं संग्रहकिट्टिप्रदेशाग्राऽल्पबहुत्वञ्चेत्यादिविधिः प्ररूपितः, तथैव मानप्रथमसंग्रहकिट्टिवेदनाद्धायां प्ररूपयितव्यः । नवरं बन्धः संज्वलनत्रिकप्रथमसंग्रहकिट्टेर्वक्तव्यः, तथा नवसंग्रहकिट्टिगतानामवान्तरकिट्टीनामल्पबहुत्वं वक्तव्यम्, तत्राऽपि लोभतृतीयसंग्रहकिट्टितो मानप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः संख्यातगुणा भणितव्याः । एवं नवसंग्रहकिट्टीनां प्रदेशाग्रस्याऽप्यल्पबहुत्वं वक्तव्यम्, प्रदेशसंक्रमाऽल्पबहुत्वे संक्रमावलिकाया विशेषस्तु स्वयमेव भावनीयः ।

एवंविधानेन मानप्रथमसंग्रहकिट्टिप्रथमस्थितेरावलिकाद्वये शेषे **पञ्चषष्ट्यधिकशततमसंग्रहगाथा** प्रस्तुतापेक्षया व्याख्येया । तथाहि—मानप्रथमसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते । ततः समयोनाऽऽवलिकायां गतायां मानप्रथमसंग्रहकिट्टिप्रथमस्थितेः समयाधिकाऽऽवलिकायां शेषायां मानस्य जघन्यस्थित्युदीरणा जायते । तदानीं चैव मानप्रथमसंग्रहकिट्टेश्चरमोदयः प्रवर्तते । ॥१७६॥

साम्प्रतं मानप्रथमसंग्रहकिट्टिसत्कोदयचरमसमये मोहनीयकर्मणः स्थितिबन्धं स्थितिसत्त्वं चाऽऽविश्चिकीर्षुराह—

## चरिमुदये संजलणतिगस्स उ पण्णासवासरा बंधो ।
## अंतोमुहुत्तऊणा चत्ता मासा हवइ संतं ॥१७७॥

चरमोदये संज्वलनत्रिकस्य तु पञ्चाशद्वासरा बन्धः ।
अन्तर्मुहूर्तोनाश्चत्वारिंशन्मासा भवति सत्त्वम् ॥१७७॥ इति पदसंस्कारः ।

**'चरिमुदये'** इत्यादि, **'चरमोदये'** संज्वलनमानप्रथमसंग्रहकिट्टेरुदयचरमसमये मानप्रथमसंग्रहकिट्टिप्रथमस्थितौ समयाधिकाऽऽवलिकाशेषायामित्यर्थः, **'संज्वलनत्रिकस्य'** संज्वलनमान-माया-लोभरूपस्य तु **'बन्धः'** स्थितिबन्धः **'पञ्चाशद्वासरा'** पञ्चाशद्दिवसाः (५०) अन्तर्मुहूर्तोना भवति । सम्प्रति मोहनीयस्य स्थितिसत्त्वमभिधित्सुराह—**'चत्ता'** इत्यादि, चत्वारिंशन्मासाः, घण्टालालान्यायेन **'अंतोमुहुत्तऊणा'** इति पदमत्राऽपि योज्यम् । ततश्चाऽयमर्थः—अन्तर्मुहूर्तोनाश्चत्वारिंशन्मासाः (४०) **'सत्त्वं'** संज्वलनत्रिकस्य स्थितिसत्त्वं **'भवति'** जायते । व्याहारि च कषायप्राभृतचूर्णौ—**"एदेण कमेण माणपढमकिट्टिं वेदयमाणस्स जा पढमट्ठिदी, तिस्से पढमट्ठिदीए जाधे समयाहियावलियसेसा, ताधे तिण्हं संजलणाण ठिदिबंधो मासो वीसं च दिवसा अंतोमुहुत्तूणा । संतकम्मं तिण्णि वस्साणि चत्तारि**

**मासा च अंतोमुहुत्तूणा।''** इति। इदमुक्तं भवति–क्रोधवेदनाद्धाचरमसमये संज्वलनानां स्थितिबन्धो यो द्वैमासिक आसीत्, स मानवेदनाद्धायाश्चरमसमय एकमासप्रमाणो भविष्यति। तेन मानसंग्रहकिट्टित्रयवेदनकाले त्रिंशद्दिवसप्रमाणः स्थितिबन्धो हीयते। यदि मानसंग्रहकिट्टित्रयवेदनकाले स्थितिबन्धस्त्रिंशद्दिवसप्रमाणो हीयते, तर्ह्येकस्याः संग्रहकिट्टेर्वेदनकाले कियान् स्थितिबन्धो हीयेत ? इति त्रैराशिकेन दशदिवसा लभ्यन्ते।

न्यासः— प्रमाणम् प्रमाणफलम् इच्छा इच्छाफलम्
३ । ३० दिवसाः । १ । १० दिवसाः

एवमेकस्या मानसंग्रहकिट्टेर्वेदनकाले स्थितिबन्धो दिवसदशकमात्रः परिहातव्यः, किन्तु मानद्वितीयसंग्रहकिट्टिवेदनकालतस्तृतीयसंग्रहकिट्टिवेदनकालतश्च मानप्रथमसंग्रहकिट्टेर्वेदनकालस्य विशेषाधिकत्वादन्तर्मुहूर्ताधिकदशदिवसप्रमितः स्थितिबन्धो हीयते, मानस्य द्वितीयसंग्रहकिट्टिवेदनकाले तृतीयसंग्रहकिट्टिवेदनकाले च प्रत्येकं यथासंभवमन्तर्मुहूर्तन्यूनदशदिवसप्रमाणो हीयते। इत्थं मानप्रथमसंग्रहकिट्टिवेदनकाले स्थितिबन्धस्याऽन्तर्मुहूर्ताधिकदशदिवसैर्हानिभवनाद् मानप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये स्थितिबन्धोऽन्तर्मुहूर्तन्यूनविंशतिदिवसाधिकैकमासप्रमितो भवति।

एवं संज्वलनत्रिकस्य स्थितिसत्त्वहानिरप्यन्तर्मुहूर्ताधिकाष्टमासप्रमाणा त्रैराशिकेन साधयितव्या। तथाहि–क्रोधवेदनाद्धाचरमसमये संज्वलनानां स्थितिसत्त्वं चत्वारि वर्षाण्यासीत्, मानवेदनाद्धाचरमसमये तु द्विवार्षिकं भविष्यति। इत्थं मानसंग्रहकिट्टित्रयवेदनकाले स्थितिघातैर्वर्षद्वयमात्रं स्थितिसत्त्वं घात्यते। यदि मानसंग्रहकिट्टित्रयवेदनकाले चतुर्विंशतिमासप्रमाणं स्थितिसत्त्वं घात्यते, तर्ह्येकस्या मानसंग्रहकिट्टेर्वेदनकाले कियत्स्थितिसत्त्वं घात्येत ? इति। त्रैराशिकेनाऽष्टमासाः प्राप्यन्ते।

न्यासः— प्रमाणम् प्रमाणफलम् इच्छा इच्छाफलम्
३ । २४ मासाः । १ । ८ मासाः।

किन्तु मानप्रथमसंग्रहकिट्टेर्वेदनकालः प्रभूतो भवति, द्वयोस्तु स्तोक इति मानस्य प्रथमसंग्रहकिट्टेर्वेदनकालेऽन्तर्मुहूर्ताधिकाष्टमासप्रमितं सत्त्वं घात्यते, शेषयोस्तु द्वयोः संग्रहकिट्ट्योः प्रत्येकं वेदनकालेऽन्तर्मुहूर्तन्यूनाऽष्टमासप्रमाणं घात्यते। अथ चतुर्वर्षेतोऽन्तर्मुहूर्ताधिकाष्टमासेषु विशोधितेष्वन्तर्मुहूर्तन्यूनचतुर्मासाधिकत्रिवर्षप्रमाणं स्थितिसत्त्वं मानप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये जायते। त्रयाणां घातिकर्मणां स्थितिसत्कर्म संख्येयवर्षसहस्राण्यघातिकर्मणां चाऽसंख्येयानि वर्षसहस्राणि बोध्यम्, पूर्वं निगदितत्वाद् इह नोक्तम्।

तदानीं च मानप्रथमसंग्रहकिट्टेरुदयसमयाधिकावलिकाप्रमाणप्रथमस्थितिगतं द्वितीयस्थितिगतं च समयोनाऽऽवलिकाद्वयबद्धं नूतनं दलं विहाय शेषं मानप्रथमसंग्रहकिट्टेर्दलमादाय ततश्चाऽसंख्येयभागमात्रं दलं यथायोग्यमन्यत्र संक्रम्याऽवशिष्टं सर्वदलं मानद्वितीयसंग्रहकिट्टेरधस्तात् संक्रमयति। इत्थं मानद्वितीयसंग्रहकिट्टौ दलं मोहनीयसकलदलस्य सप्तदशचतुर्विंशतिभागप्रमाणं ($\frac{17}{24}$) जायते, मानप्रथमसंग्रहकिट्टिप्रतिबद्धस्य षोडशचतुर्विंशतिभागप्रमाणस्य दलस्य

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

तदानीं मानद्वितीयसंग्रहकिट्टितया परिणतत्वात् । तथा मानद्वितीयसंग्रहकिट्टौ दलमितरसंग्रहकिट्टय-पेक्षया सप्तदशगुणं जायते, इतरसंग्रहकिट्टीनां प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमाणत्वात् । एवं मानद्वितीयसंग्रहकिट्टेरवान्तरकिट्टयोऽपि ज्ञातव्याः ॥१७७॥

## मानप्रथमसंग्रहकिट्टिवेदनविधियन्त्रकम्

(१) द्वितीयस्थितिस्थमानप्रथमसंग्रहकिट्टिप्रदेशाग्रमपकृष्य मानप्रथमसंग्रहकिट्टयाः प्रथमस्थितिं करोति वेदयति च ।

(२) मानवेदनाद्धाप्रथमसमयात्प्रभृति मानप्रथमसंग्रहकिट्टेरधस्तनीरुपरितनीश्चाऽसंख्येयभागमिता अवान्तरकिट्टीर्वर्जयित्वा शेषा अवान्तरकिट्टीर्बध्नाति वेदयति च ।

(३) बध्यमानाऽवान्तरकिट्टित उदयमानाऽवान्तरकिट्टयो विशेषाधिका भवन्ति ।

(४) संज्वलनत्रिकस्य प्रथमसंग्रहकिट्टिं बध्नाति ।

(५) प्रतिसमयमनुसमयाऽपवर्तनाघातेनोपरितनाऽसंख्येयभागप्रमाणावान्तरकिट्टीर्घातयति ।

(६) यथायोग्यं संग्रहकिट्टयन्तरेष्ववान्तरकिट्टयन्तरेषु चाऽ-पूर्वावान्तरकिट्टीर्निर्वर्तयति ।

(७) नवसंग्रहकिट्टीनामवान्तरकिट्टयल्पबहुत्वं पूर्ववद् वक्तव्यम्, नवरं लोभतृतीसंग्रहकिट्टितो मान-प्रथमसंग्रहकिट्टेरवान्तरकिट्टयः संख्येयगुणा निगदितव्याः ।

(८) एवं नवसंग्रहकिट्टीनां प्रदेशाल्पबहुत्वमपि भणितव्यम् ।

मानप्रथमसंग्रहकिट्टिवेदनाद्धायां क्रोधस्य चरमप्रक्षेपेऽसंक्रम्यमाणे

(९) संज्वलनक्रोधस्य जघन्यस्थितिसत्त्वम् ।

(१०) संज्वलनक्रोधस्य जघन्याऽनुभागसत्कर्म ।

(११) क्रोधोदयचरमसमये जघन्ययोगिना बद्धक्रोधस्य जघन्यप्रदेशसत्कर्म भवति ।

चरमप्रक्षेपं संक्रमयतो जीवस्य तु

(१२) संज्वलनक्रोधस्य जघन्यस्थितिसंक्रमः ।

(१३) संज्वलनक्रोधस्य जघन्यानुभागसंक्रमः ।

(१४) कर्मप्रकृतिचूर्णिकृदभिप्रायेण क्रोधोदयचरमसमये जघन्ययोगेन बद्धस्य नूतनक्रोधदलिकस्य जघन्यप्रदेशसंक्रमो भवति ।

(१५) मानप्रथमसंग्रहकिट्टेः प्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते ।

(१६) मानप्रथमसंग्रहकिट्टेः प्रथमस्थितौ समयाधिकावलिकाशेषायां मानस्य जघन्यस्थित्युदीरणा भवति ।

(१७) मानप्रथमसंग्रहकिट्टेः प्रथमस्थितौ समयाधिकावलिकाशेषायां मानप्रथमसंग्रहकिट्टेश्चरमोदयः ।

मानप्रथमसंग्रहकिट्टेरुदयचरमसमये

(१८) संज्वलनत्रिकस्य स्थितिबन्धोऽन्तर्मुहूर्तन्यूनपञ्चाशद्दिवसप्रमाणः ।

(१९) संज्वलनत्रिकस्य स्थितिसत्त्वमन्तर्मुहूर्तन्यूनचतुर्मासाधिकत्रिवर्षमात्रम् ।

(२०) ज्ञानावरणदर्शनावरणाऽन्तरायाणां संख्यातवर्षसहस्राणि स्थितिसत्कर्म ।

(२१) नामगोत्रवेदनीयानामसंख्येयवर्षसहस्राणि स्थितिसत्कर्म ।

(२२) समयाधिकोदयावलिकागतं समयोनावलिकाद्वयबद्धं च दलं मुक्त्वा शेषं प्रभूतं मानप्रथमसंग्रह-किट्टिदलं यथासंभवं मानद्वितीयसंग्रहकिट्टित्वेन परिणतम् । तेन मानद्वितीयसंग्रहकिट्टिदलं मोहनीयसकलदलस्य सप्तदशचतुर्विंशतिभागकल्पं ($\frac{१७}{२४}$) जायते ।

(२३) इतरसंग्रहकिट्टयपेक्षया मानद्वितीयसंग्रहकिट्टेः प्रदेशा अवान्तरकिट्टयश्च सप्तदशगुणा जायन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतर्हि मानप्रथमसंग्रहकिट्टेश्चरमोदयसमनन्तरं यत्करोति, तदभिधातुकाम आह—

सेकाले माणविइयकिट्टिं ओकड्ढिऊण पढमठिइं।
करए वेयइ अण्णो सव्वो विही य पुव्वव्व ॥१७८॥

अनन्तरकाले मानद्वितीयकिट्टिमपकृष्य प्रथमस्थितिम्।
कुरुते वेदयत्यन्यः सर्वो विधिश्च पूर्ववद् ॥१७८॥ इति पदसंस्कारः।

**'सेकाले'** इत्यादि, 'अनन्तरकाले' मानप्रथमसंग्रहकिट्टिवेदनकालसमाप्तितोऽनन्तरसमय इत्यर्थः, 'मानद्वितीयकिट्टिं' संज्वलनमानस्य द्वितीयसंग्रहकिट्टिप्रदेशानपकृष्योदयसमयादारभ्य किञ्चिन्न्यूने मानवेदनाद्धायास्त्रिभागे स्ववेदनकालतस्त्वावलिकयाऽधिकासु स्थितिष्वसंख्येयगुणक्रमेण निक्षिपन् 'प्रथमस्थितिं' मानद्वितीयसंग्रहकिट्टिप्रथमस्थितिं 'करोति' निर्वर्तयति। अभ्यधायि च **कषायप्राभृतचूर्णौ—"से काले माणस्स विदियकिट्टीदो पदेसग्गमोकड्डियूण पढमट्ठिदिं करेदि।"** इति

**'वेयइ'** त्ति 'वेदयति' तदानीमेव मानद्वितीयसंग्रहकिट्टेः प्रथमस्थितिमुदयेनाऽनुभवति। अभाणि च **सप्ततिकाचूर्णौ—"तओ से काले माणस्स बितियकिट्टीओ द ल ' उक्कड्ढित्तु पढमट्ठितिं करेइ वेदेइ य** XXX।" इति।

**'अण्णो'** इत्यादि, अन्यः सर्वो विधिः पूर्ववज्ज्ञातव्यः। इदन्त्ववधेयम्—अत्र मानस्य द्वितीयसंग्रहकिट्टिर्बध्यते, शेषयोस्तु प्रथमा। तथा मानद्वितीयसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च लोभतृतीयसंग्रहकिट्टितः संख्येयगुणा भवन्ति।

**पञ्चषष्ट्यधिकशततमगाथा** प्रस्तुतमाश्रित्य भावनीया। तथाहि—मानद्वितीयसंग्रहकिट्टिप्रथमस्थितेरावलिकाद्वये शेषयागालो व्यवच्छिद्यते। ततः समयोनाऽऽवलिकायां व्यतिक्रान्तायां मानद्वितीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकाऽऽवलिकाशेषायां मानस्य जघन्यस्थित्युदीरणा जायते, तदानीं च मानद्वितीयसंग्रहकिट्टेश्चरमोदयो भवति, तदनन्तरं मानतृतीयसंग्रहकिट्टेरुदयात् ॥१७८॥

मानद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये संज्वलनत्रिकस्य बन्धं सत्त्वं च व्याजिहीर्षुराह—

अंतम्मि मोहबंधो चत्तालीसा दिणा उ देसूणा।
संतं देसूणा बत्तीसा मासा कसायाणं ॥ १७९ ॥

अन्ते मोहबन्धश्चत्वारिंशद् दिनास्तु देशोनाः।
सत्त्वं देशोना द्वात्रिंशद्मासाः कषायाणाम् ॥ १७९ ॥ इति पदसंस्कारः।

**'अंतम्मि'** इत्यादि, 'अन्ते' मानद्वितीयसंग्रहकिट्ट्याश्चरमोदये मानद्वितीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायामित्यर्थः, 'मोहबन्धो' मानमायालोभरूपाणां कषायाणाम्, क्रोधस्य क्षीणत्वात्, स्थितिबन्धो 'देशोनाः' अन्तर्मुहूर्तन्यूनाश्चत्वारिंशद् ( ४० ) दिनास्तु भवति, त्रैराशिकसाधितैरन्तर्मुहूर्तन्यूनदशदिनैर्मानद्वितीयसंग्रहकिट्टिवेदनाद्धायां हीनो जात इत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'संतं' इत्यादि, तत्र 'कषायाणां' त्रयाणां संज्वलनानां 'सत्त्वं' स्थितिसत्त्वं 'देशोना' अन्तर्मुहूर्तपरिहीना द्वात्रिंशन्मासा भवति, त्रैराशिकसाधितैरन्तर्मुहूर्तन्यूनाष्टमासैर्मानद्वितीयसंग्रहकिट्टिवेदनाद्धायां घातितं सदिदानीमेतावज्जायत इत्यर्थः। उक्तं च कषायप्राभृतचूर्णौ–"तेणेव विहिणा संपत्तो माणस्स विदियकिट्टिं वेदयमाणस्स जा पढमट्ठिदी, तिस्से समयाहियावलियसेसा त्ति, ताधे संजलणाणं ठिदिबंधो मासो दस च दिवसा देसूणा। संतकम्मं दो वस्साणि अट्ठ च मासा देसूणा।" इति।

त्रयाणां घातिकर्मणां स्थितिसत्त्वं पूर्ववत् संख्येयानि वर्षसहस्राण्यघातित्रयस्य चाऽसंख्येयानि वर्षसहस्राणि निश्चेतव्यम्, पूर्वमभिहितत्वाद् इह न गदितम्।

तथा मानद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये मानद्वितीयसंग्रहकिट्ट्या उदयसमयाधिकावलिकागतं समयोनद्व्यावलिकाबद्धं च नूतनं दलं विमुच्य शेषं मानद्वितीयसंग्रहकिट्टेर्दलं गृहीत्वा ततश्चाऽसंख्येयभागप्रमाणं दलं यथायोग्यमन्यत्र संक्रम्य शेषसर्वदलं मानतृतीयसंग्रहकिट्टेरधस्तात् संक्रमयति, इत्थं मानतृतीयसंग्रहकिट्टौ दलं मोहनीयसकलदलस्याऽष्टादशचतुर्विंशतिभागकल्पं ($\frac{१८}{२४}$)जायते, मानद्वितीयसंग्रहकिट्ट्याः सप्तदशचतुर्विंशतिभागप्रमाणदलस्य तदानीं मानतृतीयसंग्रहकिट्टितया परिणतत्वात्। तथा मानतृतीयसंग्रहकिट्टिदलमितरसंग्रहकिट्ट्यपेक्षयाऽष्टादशगुणं जायते, इतरसंग्रहकिट्टीनां प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमितत्वात्। एवं मानतृतीयसंग्रहकिट्ट्या अवान्तरकिट्ट्योऽपि निश्चेतव्याः ॥१७९॥

## मानद्वितीयसंग्रहकिट्टिवेदनप्ररूपणायन्त्रकम्

(१) द्वितीयस्थितिस्थमानद्वितीयसंग्रहकिट्टिगतप्रदेशाग्रमपकृष्य मानद्वितीयसंग्रहकिट्टिप्रथमस्थितिं करोति वेदयति च। शेषविधिस्तु पूर्ववद् बोध्यः।

(२) मानद्वितीयसंग्रहकिट्टेः प्रथमस्थितौ द्व्यावलिकाशेषायां मानद्वितीयसंग्रहकिट्टेरागालो व्यवच्छिद्यते।

मानद्वितीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायाम्

(३) मानद्वितीयसंग्रहकिट्टेरुदयचरमसमयः।

(४) संज्वलनमानस्य जघन्यस्थित्युदीरणा।

(५) संज्वलनत्रिकस्य स्थितिबन्धोऽन्तर्मुहूर्तन्यूनचत्वारिंशद्दिवसाः।

(६) संज्वलनत्रिकस्य स्थितिसत्त्वमन्तर्मुहूर्तन्यूनाष्टमासाधिकद्विवर्षप्रमितम्।

(७) ज्ञानावरणदर्शनावरणाऽन्तरायाणां स्थितिसत्त्वं संख्येयानि वर्षसहस्राणि।

(८) नामगोत्रवेदनीयानां स्थितिसत्त्वमसंख्येयवर्षसहस्राणि।

(९) समयाधिकोदयावलिकागतं समयोनावलिकाद्वयबद्धं च नूतनं दलिकं वर्जयित्वा शेषं प्रभूतं मानद्वितीयसंग्रहकिट्टिदलं यथागमं मानतृतीयसंग्रहकिट्टितया परिणम्यते। तेन मानतृतीयसंग्रहकिट्टिदलं मोहनीयसर्वदलस्याऽष्टादशचतुर्विंशतिभागकल्पं ($\frac{१८}{२४}$) जायते।

(१०) मानतृतीयसंग्रहकिट्टिदलमितरसंग्रहकिट्ट्यपेक्षयाऽष्टादशगुणं भवति।

(११) एवं मानतृतीयसंग्रहकिट्टेरवान्तरकिट्ट्योऽपीतरसंग्रहकिट्टीनामवान्तरकिट्टिभ्योऽष्टादशगुणा भवन्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानद्वितीयसंग्रहकिट्टिवेदनविधिं परिपाल्य यत्करोति, तद् विभणिषुराह—

**सेकाले माणतइयकिट्टिं उक्किरिय करइ पढमठिइं ।**
**वेयइ मोहस्स तु बंधो मासोऽन्ते दुवरिसा संतं ॥१८०॥**

अनन्तरकाले मानतृतीयकिट्टिमुत्कीर्य करोति प्रथमस्थितिम् ।
वेदयति मोहस्य तु बन्धो मासोऽन्ते द्विवर्षौ सत्त्वम् ॥१८०॥ इति पदसंस्कारः ।

'**सेकाले**' इत्यादि, 'अनन्तरकाले' मानद्वितीयसंग्रहकिट्टिवेदनाद्धासमाप्तितोऽनन्तरसमये 'मानतृतीयकिट्टिं' मानतृतीयसंग्रहकिट्टिप्रदेशाग्रमुत्कीर्योदयसमयादारभ्याऽसंख्येयगुणक्रमेण स्ववेदनकालत आवलिकयाऽधिकासु स्थितिषु निक्षिपन् 'प्रथमस्थितिं' मानतृतीयसंग्रहकिट्टेरादिमस्थितिं 'करोति' निर्वर्तयति । अभ्यधायि च **कषायप्राभृतचूर्णौ—"से काले माणतदियकिट्टीदो पदेसग्गमोकड्डियूण पढमट्ठिदिं करेदि ।"** इति ।

'वेयइ' त्ति तथा तदानीमेव 'वेदयति' मानतृतीयसंग्रहकिट्टिप्रथमस्थितिं चानुभवति । अवादि च **सप्ततिकाचूर्णौ—"ततो से काले माणस्स ततियकिट्टीओ दलिअं उक्कड्ढित्तु पढमट्ठितिं करेति वेदेइ य ।"** इति । तदानीं प्रथमस्थित्यामुदयावलिगतं द्वितीयस्थितौ च द्विसमयोनद्व्यावलिकाबद्धं नूतनं दलं मानद्वितीयसंग्रहकिट्टिसम्बन्धि विद्यते । शेषा सर्वा प्ररूपणा पूर्ववत्कर्तव्या, विशेषाऽभावात् । नवरं मानस्य तृतीयसंग्रहकिट्टिमेव बध्नाति, शेषयोस्तु प्रथमाम् , मानतृतीयसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च यथासंख्यं लोभतृतीयसंग्रहकिट्टेरवान्तरकिट्टितः प्रदेशेभ्यश्च संख्येयगुणा भवन्ति । एवंक्रमेण मानतृतीयसंग्रहकिट्टिं वेदयतः क्षपकस्य मानतृतीयसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते । ततः समयोनाऽऽवलिकायामतिक्रान्तायां मानतृतीयसंग्रहकिट्टिप्रथमस्थितेः समयाधिकावलिकायां शेषायां मानस्य जघन्यस्थित्युदीरणा मानतृतीयसंग्रहकिट्ट्याश्च वेदनचरमसमयो भवति । इत्थं मानकिट्टिवेदनाद्धायां मानस्य त्रिर्जघन्यस्थित्युदीरणा जाता । तथा तदानीमेव संज्वलनमानस्य जघन्याऽनुभागोदीरणा गुणितकर्मांशस्य च जन्तोः संज्वलनमानस्योत्कृष्टप्रदेशोदीरणा जायते । एवं संज्वलनमानस्य जघन्याऽनुभागोदयो गुणितकर्मांशस्य च मानस्योत्कृष्टप्रदेशोदयो जायते ।

'**मोहस्स**' इत्यादि, तत्र 'अन्ते' मानतृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमये 'मोहस्य' संज्वलनमानमायालोभरूपमोहनीयकर्मणस्तु बन्धो मासो भवति, मानद्वितीयसंग्रहकिट्टिवेदनचरमसमयतस्त्रैराशिकसाधितैरन्तर्मुहूर्तन्यूनदशदिवसैर्हीनो भवन्नैकमासिकः स्थितिबन्धो जायत इत्यर्थः । स च मानस्य स्थितिबन्धः सर्वजघन्यो ज्ञातव्यः । एवमनुभागबन्धोऽपि मानस्य जघन्यो जायते । '**संतं**' इत्यादि, संज्वलनत्रिकस्य स्थितिसत्त्वं 'द्विवर्षौ' वर्षद्वयं जायते, मानद्वितीयसंग्रहकिट्टिवेदनचरमसमयाऽपेक्षया त्रैराशिकसाधिताऽन्तर्मुहूर्तन्यूनाष्टमासैर्हीनं सद् द्विवार्षिकं जायत इत्यर्थः । उक्तं

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**च कषायप्राभृतचूर्णौ–"ताधे चरिमसमयवेदगो। ताधे तिण्हं संजलणाणं द्विदिबंधो मासो पडिवुण्णो। संतकम्मं वे वस्साणि पडिवुण्णाणि।" इति।**

निश्चयनयापेक्षया तदानीं मानस्य बन्धोदयोदीरणा व्यवच्छिद्यमाना व्यवच्छिन्नाः, तथा समयाधिकोदयावलिकागतं दलं समयोनद्व्यावलिकाबद्धं च नूतनदलं विमुच्य शेषं मानदलमादाय ततश्चाऽसंख्येयभागप्रमाणं यथायोग्यमन्यत्र संक्रम्याऽवशिष्टं सर्वंदलं मायाप्रथमसंग्रहकिट्टेरधस्तात् संक्रमयति। उक्तश्च **सप्ततिकाचूर्णौ–"××वेदेइ य कमेण ताव, जाव समयाहियावलिया सेस त्ति। तम्मि समए माणस्स बंधोदयोदीरणा य जुगवं फिट्टंति। संतकम्मं पि समयूणदुआवलियबद्धं मोत्तूण सव्वं मायाए संछुद्धं।"** इति। इत्थं तदानीं मायाप्रथमसंग्रहकिट्टिदलं मोहनीयसकलदलस्यैकोनविंशतिचतुर्विंशतिभागप्रमाणं ($\frac{19}{24}$) जायते, मानतृतीयसंग्रहकिट्टिसम्बद्धस्याऽष्टादशचतुर्विंशतिभागप्रमाणदलस्य तदानीं मायाप्रथमसंग्रहकिट्टित्वेन परिणतत्वात्। तथा मायाप्रथमसंग्रहकिट्टिदलमितरसंग्रहकिट्ट्यपेक्षयैकोनविंशतिगुणं भवति, इतरसंग्रहकिट्टीनां प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमाणत्वात्। एवं मायाप्रथमसंग्रहकिट्टेरवान्तरकिट्ट्योऽपि वक्तव्याः ॥१८०॥

### मानतृतीयसंग्रहकिट्टिवेदनप्ररूपणायन्त्रकम्

(१) द्वितीयस्थितिस्थमानतृतीयसंग्रहकिट्टिप्रदेशाग्रमपकृष्य मानतृतीयसंग्रहकिट्टिप्रथमस्थितिं करोति वेदयति च। शेषविधिः पूर्ववद् बोध्यः।

(२) मानतृतीयसंग्रहकिट्टिवेदनाद्धाप्रथमसमय उदयावलिकागतं द्वितीयस्थितौ च द्विसमयोनद्व्यावलिकाबद्धं नूतनं दलं मानद्वितीयसंग्रहकिट्टिसत्कं सत्कर्मणि विद्यते।

(३) मानस्य तृतीयसंग्रहकिट्टिं बध्नाति, शेषयोस्तु प्रथमाम्।

(४) मानतृतीयसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च लोभतृतीयसंग्रहकिट्टितः संख्येयगुणाः।

(५) मानतृतीयसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायां मानस्यागालो व्यवच्छिद्यते।

(६) मानतृतीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायाम्।

(क) मानस्य जघन्यस्थित्युदीरणा जघन्यस्थित्युदयश्च।

(ख) गुणितकर्मांशस्य जन्तोरुत्कृष्टप्रदेशोदीरणोत्कृष्टप्रदेशोदयश्च।

(ग) संज्वलनत्रिकस्य स्थितिबन्ध एकमासप्रमाणः।

(घ) मानस्य सर्वजघन्यस्थितिबन्धः।

(ङ) मानस्य सर्वजघन्याऽनुभागबन्धः।

(च) संज्वलनत्रिकस्य स्थितिसत्त्वं द्विवार्षिकम्।

(छ) समयाधिकोदयावलिकागतं समयोनद्व्यावलिकाबद्धं च नूतनं दलं विहाय शेषं सर्वं मानतृतीयसंग्रहकिट्टिदलं यथागमं मायाप्रथमसंग्रहकिट्टित्वेनपरिणमयति। तेनमायाप्रथमसंग्रहकिट्टिदलं मोहनीयसर्वदलस्यैकोनविंशतिचतुर्विंशतिभागकल्पं ($\frac{19}{24}$) भवति।

(ज) मायाप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च इतरसंग्रहकिट्टित एकोनविंशतिगुणाः।

(झ) निश्चयनयापेक्षया मानस्य बन्धोदयोदीरणा व्यवच्छिद्यमाना व्यवच्छिन्नाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानतृतीयसंग्रहकिट्टिवेदनविधिमनुपाल्याऽनन्तरसमये यत्करोति, तदाविश्चिकीर्षुराह—

**सेकाले मायाऽऽइमकिट्टिं उक्किरिय करइ पढमठिइं ।**
**वेयइ अण्णो सव्वो य विही पुव्वव्व णायव्वो ॥१८१॥**

अनन्तरकाले मायाऽऽदिमकिट्टिमुत्कीर्य करोति प्रथमस्थितिम् ।
वेदयत्यन्यः सर्वश्च विधिः पूर्ववज्ज्ञातव्यः ॥१८१॥ इति पदसंस्कारः ।

'सेकाले' इत्यादि, 'अनन्तरकाले' मानवेदनचरमसमयसमनन्तरसमये 'मायाऽऽदिमकिट्टिं' द्वितीयस्थितिस्थमायाप्रथमसंग्रहकिट्टिप्रदेशाग्रमुत्कीर्योदयसमयाद् मायावेदनकालस्य साधिकत्रिभागे मायाप्रथमसंग्रहकिट्टेर्वेदनकालतः पुनरावलिकयाऽधिकासु स्थितिष्वसंख्येयगुणक्रमेण निक्षिपन् 'प्रथमस्थितिं' मायाप्रथमसंग्रहकिट्टेरादिमस्थितिं 'करोति' निर्वर्तयति । उक्तं च कषायप्राभृतचूर्णौ-"तदो से काले मायाए पढमकिट्टीए पदेसग्गमोकड्डियूण पढठिदिं करेदि ।" इति ।

'वेयइ' त्ति तदानीमेव मायाप्रथमसंग्रहकिट्टेः प्रथमस्थितिं 'वेदयति' अनुभवति च । उक्तं च **सप्ततिकाचूर्णौ-"तओ से काले मायाए पढमकिट्टीओ दलियं ओकड्ढेत्तु पढमठितिं करेइ वेदेइ य कमेण ताव, जाव अंतोमुहुत्तकालं ।"** इति । तदानीं यद् मानतृतीयसंग्रहकिट्टिदलं प्रथमस्थित्यामुदयावलिकागतं विद्यते, तद् वेद्यमानमायाप्रथमसंग्रहकिट्टौ प्रतिसमयं स्तिबुकसंक्रमेण संक्रम्य विनाशयति, द्वितीयस्थितौ च यद् द्विसमयोनाऽऽवलिकाद्वयेन बद्धनूतनदलं विद्यते, तत् पुरुषवेदवत् तावता कालेन संक्रमयता जन्तुना चरमप्रक्षेपेऽसंक्रम्यमाणे संज्वलनमानस्य जघन्यस्थितिसत्त्वं जघन्यानुभागसत्त्वं च, तथा जघन्ययोगेन मानचरमसमये प्रदेशाग्रं बद्धवता जन्तुना मानस्य जघन्यप्रदेशसत्कर्म प्राप्यते । चरमप्रक्षेपे च संक्रम्यमाणे मानस्य जघन्यस्थितिसंक्रमो जघन्याऽनुभागसंक्रमश्च भवति । **कर्मप्रकृतिचूर्णिकारादीनामभिप्रायेण** पुनर्मानजघन्यप्रदेशसंक्रमोऽपि भवति ।

'अण्णो' इत्यादि, अन्यः सर्वश्च विधिः पूर्ववज्ज्ञातव्यः, विशेषाभावात् । नवरमत्र मायालोभयोरुभयोः प्रथमसंग्रहकिट्टिर्बध्यते । लोभतृतीयसंग्रहकिट्टितो मायाप्रथमसग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च संख्येयगुणा वक्तव्याः ।

एवंविधानेन मायाप्रथमसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते । ततः समयोनाऽऽवलिकाव्यतिक्रमे मायाया जघन्यस्थित्युदीरणा जायते, मायाप्रथमसंग्रहकिट्टेश्च चरमोदयः ॥१८१॥

अथ मायाप्रथमसंग्रहकिट्टेरुदयचरमसमये मोहनीयस्य स्थितिबन्धं स्थितिसत्त्वं च प्रकाशयितुकामः प्राह—

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

## संजलणदुगस्स तु बंधो देसूणपणवीसदिवसाइं ।
## चरिमे संतं देसूणवीसमासा मुणेयव्वं ॥१८२॥

संज्वलनद्विकस्य तु बन्धो देशोनपञ्चविंशतिदिवसानि ।
चरमे सत्त्वं देशोनविंशतिमासा ज्ञातव्यम् ॥१८२॥ इति पदसंस्कारः ।

**'संजल०'** इत्यादि, तत्र 'चरमे' मायाप्रथमसंग्रहकिट्टिवेदनचरमसमये 'संज्वलनद्विकस्य' माया-लोभलक्षणस्य कषायद्वयस्य 'बन्धः' स्थितिबन्धो 'देशोनपञ्चविंशतिदिवसानि' अन्तर्मुहूर्तन्यूनपञ्चविंशतिदिनानि भवति। तथाहि–मानवेदनचरमसमये संज्वलनानां यः स्थितिबन्ध एकमासप्रमाण आसीत्, मायावेदनाद्धाचरमसमये स पञ्चदशदिवसप्रमाणो भविष्यति । इत्थं मायासंग्रहकिट्टित्रयवेदनकाले पञ्चदशदिवसप्रमाणः स्थितिबन्धो हीयते ।

यदि मायासंग्रहकिट्टित्रयवेदनकाले पञ्चदशदिवसमात्रः स्थितिबन्धो हीयते, तर्ह्येकस्या मायासंग्रहकिट्टेर्वेदनकाले कियान् स्थितिबन्धो हीयेत ? इति त्रैराशिकेन पञ्चदिवसा लभ्यन्ते ।

न्यासः— प्रमाणम् प्रमाणफलम् इच्छा इच्छाफलम्
३ । १५ दिवसाः । १ । ५ दिवसाः ।

तत्राऽपि पश्चानुपूर्व्या संग्रहकिट्टीनां वेदनकालस्य विशेषाधिकत्वान्मायाप्रथमसंग्रहकिट्टिवेदनकालेऽधिकः स्थितिबन्धो हीयते, ततो हीनो मायाद्वितीयसंग्रहकिट्टिवेदनकाले, ततोऽपि हीनतरो मायातृतीयसंग्रहकिट्टिवेदनकाले । तेनाऽन्तर्मुहूर्ताधिकपञ्चदिवसप्रमाणः स्थितिबन्धो मायाप्रथमसंग्रहकिट्टिवेदनकाले हीयते । ततश्चाऽन्तर्मुहूर्तन्यूनपञ्चविंशतिदिवसप्रमाणः स्थितिबन्धो मायाप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये जायते ।

**'संतं'** इत्यादि, 'सत्त्वं' मायाप्रथमसंग्रहकिट्टिवेदनचरमसमये संज्वलनद्विकस्य स्थितिसत्त्वं 'देशोनविंशतिमासाः' अन्तर्मुहूर्तन्यूनविंशतिमासप्रमाणं ज्ञातव्यम् । तथाहि–मानवेदनाद्धाचरमसमये मोहस्य स्थितिसत्त्वं द्विवार्षिकमासीत्, तद् मायावेदनाद्धाचरमसमयेएकवर्षप्रमितं भविष्यति । इत्थं मायासंग्रहकिट्टित्रयवेदनकाले द्वादशमासप्रमाणं स्थितिसत्त्वं घात्यते । यदि मायासंग्रहकिट्टित्रयवेदनकाले द्वादशमासप्रमाणं स्थितिसत्त्वं घात्यते, तर्ह्येकस्या मायासंग्रहकिट्ट्या वेदनकाले कियत्स्थितिसत्त्वं घात्येत ? इति त्रैराशिकेन चत्वारो मासा लभ्यन्ते ।

न्यासः— प्रमाणम् प्रमाणफलम् इच्छा इच्छाफलम्
३ । १२ मासाः । १ । ४ मासाः ।

पश्चानुपूर्व्या संग्रहकिट्टीनां वेदनकालस्य विशेषाधिकत्वाद् मायाप्रथमसंग्रहकिट्टिवेदनकालेऽधिकं स्थितिसत्त्वं घात्यते । ततो हीनं मायाद्वितीयसंग्रहकिट्टिवेदनकाले घात्यते । ततो हीनतरं मायातृतीयसंग्रहकिट्टिवेदनकाले घात्यते, तेनाऽन्तर्मुहूर्ताधिकचतुर्मासप्रमाणं स्थितिसत्त्वं मायाप्रथमसंग्रहकिट्टिवेदनकाले घात्यते । ततश्च मायाप्रथमसंग्रहकिट्टिवेदनचरमसमये स्थितिसत्त्वमन्तर्मुहूर्तन्यू-

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

नाष्टमासाधिकवर्षमात्रं भवति । व्याहृतं च कषायप्राभृतचूर्णौ—"एदेणेव विहिणा संपत्तो मायापढमकिट्टिं वेदयमाणस्स जा पढमट्ठिदी, तिस्से समयाहियावलिया सेसा त्ति, ताधे ठिदिबंधो दोण्हं संजलणाणं पणुवीसं दिवसा देसूणा । ठिदिसंतकम्मं वस्समट्ठ च मासा देसूणा ।" इति ।

ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां स्थितिसत्त्वं तु संख्येयानि वर्षसहस्राणि, नामगोत्रवेदनीयानां चाऽसंख्येयानि वर्षसहस्राणि बोध्यम्, पूर्वमभिहितत्वाद् इह नोक्तम् । तदानीं चोदयसमयाधिकावलिकागतं समयोना-ऽऽवलिकाद्वयबद्धं च नूतनं दलं विहाय शेषं मायाप्रथमसंग्रहकिट्टिदलं गृहीत्वा ततश्चाऽसंख्येयभागमात्रं यथायोग्यमन्यत्र संक्रम्य शेषसर्वदलं मायाद्वितीयसंग्रहकिट्टेरधस्तादपूर्वावान्तरकिट्टितया परिणमयति, इत्थं मायाद्वितीयसंग्रहकिट्टौ दलं मोहनीयसकलदलस्य विंशतिचतुर्विंशतिभागप्रमाणं ($\frac{२०}{२४}$) जायते, मायाप्रथमसंग्रहकिट्टिदलस्यैकोनविंशतिचतुर्विंशतिभागप्रमितस्य तदानीं मायाद्वितीयसंग्रहकिट्टितया परिणतत्वात् । तथा मायाद्वितीयसंग्रहकिट्टिदलमितरसंग्रहकिट्ट्यपेक्षया विंशतिगुणं जायते, इतरसंग्रहकिट्टीनां प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमाणत्वात् । एवं मायाद्वितीयसंग्रहकिट्टेरवान्तरकिट्टयो-ऽपि वाच्याः ॥ १८२ ॥

## मायाप्रथमसंग्रहकिट्टिवेदनप्ररूपणायन्त्रकम्

(१) द्वितीयस्थितिस्थमायाप्रथमसंग्रहकिट्टिप्रदेशाग्रमपकृष्य मायाप्रथमसंग्रहकिट्टयाः प्रथमस्थितिं करोति वेदयति च । शेषविधिस्तु पूर्ववद् बोध्यः, नवरं संज्वलनद्विकस्य प्रथमसंग्रहकिट्टिं बध्नाति । तथाऽवान्तरकिट्ट्यल्पबहुत्वं प्रदेशाल्पबहुत्वञ्च षट्पदकं वाच्यम् , तत्राऽपि लोभतृतीयसंग्रहकिट्टितो मायाप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च संख्येयगुणा वाच्याः ।

मायाप्रथमसंग्रहकिट्टिवेदनाद्धायां मानस्य चरमप्रक्षेपेऽसंक्रम्यमाणे

(२) संज्वलनमानस्य जघन्यस्थितिसत्त्वं जघन्याऽनुभागसत्कर्म च ।

(३) मानोदयचरमसमये जघन्ययोगिना बद्धसंज्वलनमानस्य जघन्यप्रदेशसत्कर्म भवति ।

(४) चरमप्रक्षेपं संक्रमयतो जीवस्य तु संज्वलनमानस्य जघन्यस्थितिसंक्रमो जघन्यानुभागसंक्रमश्च ।

(५) तथा कर्मप्रकृतिचूर्णिकृदभिप्रायेण मानोदयचरमसमये जघन्ययोगेन बद्धस्य नूतनमानदलिकस्य जघन्यप्रदेशसंक्रमो भवति ।

(६) मायाप्रथमसंग्रहकिट्टेः प्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते ।

(७) मायाप्रथमसंग्रहकिट्टेः प्रथमस्थितौ समयाधिकावलिकाशेषायां मायाया जघन्यस्थित्युदीरणा

(८) मायाप्रथमसंग्रहकिट्टेः प्रथमस्थितौ समयाधिकावलिकाशेषायां मायाप्रथमसंग्रहकिट्टेश्चरमोदयः ।

मायाप्रथमसंग्रहकिट्टेरुदयचरमसमये

(९) संज्वलनद्विकस्य स्थितिबन्धोऽन्तर्मुहूर्तन्यूनपञ्चविंशतिदिवसप्रमाणः ।

(१०) संज्वलनद्विकस्य स्थितिसत्त्वमन्तर्मुहूर्तन्यूनाष्टमासाधिकैकवर्षमात्रम् ।

(११) घातित्रयस्य संख्यातवर्षसहस्राण्यघातित्रयस्य चासंख्येयवर्षसहस्राणि स्थितिसत्कर्म ।

(१२) समयाधिकोदयावलिकागतं समयोनावलिकाद्वयबद्धं च दलं मुक्त्वा शेषं प्रभूतं मायाप्रथमसंग्रहकिट्टिदलं यथासंभवं मायाद्वितीयसंग्रहकिट्टित्वेन परिणतम् । तेन मायाद्वितीयसंग्रहकिट्टिदलं मोहनीयसकलदलस्य विंशतिचतुर्विंशतिभागकल्पं ($\frac{२०}{२४}$) जायते ।

(१३) इतरसंग्रहकिट्ट्यपेक्षया मायाद्वितीयसंग्रहकिट्टेः प्रदेशा अवान्तरकिट्टयश्च विंशतिगुणा जायन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मायाप्रथमसंग्रहकिट्टिवेदनाद्धायाः समाप्तेरनन्तरं यत्करोति, तद् निजिगदिपुराह—

**सेकाले पढमठिइं मायाबीयाउ करइ अणुहवएऽन्ते ।**
**देसूणा वीसदिणा बंधो मोहस्स सोलमासा संतं ॥१८३॥ (आर्यागीतिः)**

अनन्तरकाले प्रथमस्थितिं मायाद्वितीयस्याः करोत्यनुभवत्यन्ते ।
देशोना त्रिंशतिदिना बन्धो मोहस्य षोडशमासाः सत्त्वम् ॥१८३॥ इति पदसंस्कारः ।

**'सेकाले'** इत्यादि, 'अनन्तरकाले' मायाप्रथमसंग्रहकिट्टिवेदनकालसमाप्तितोऽनन्तरसमय इत्यर्थः, 'मायाद्वितीयस्याः' गम्यस्य यबन्तस्योत्पूर्वककृधातोः कर्मणि पञ्चमी विभक्तिः, ततश्चायमर्थः—मायाद्वितीयामुत्कीर्य=मायाद्वितीयसंग्रहकिट्टिप्रदेशाग्रमुत्कीर्योदयसमयादारभ्य स्ववेदनकालत आवलिकयाऽधिकासु स्थितिष्वसंख्येयगुणक्रमेण निक्षिपन् 'प्रथमस्थितिं' मायाद्वितीयसंग्रहकिट्टेः प्रथमस्थितिं करोति । न्यगादि च **कषायप्राभृतचूर्णौ—से काले मायाए विदियकिट्टीदो पदेसग्गमोकड्डियूण पढमट्ठिदिं करेदि ।"** इति । **'अणुहवए'** त्ति 'अनुभवति' तथा तदानीमेव मायाद्वितीयसंग्रहकिट्टिप्रथमस्थितिं वेदयति । अभिहितं च **सप्ततिकाचूर्णौ—"तओ से काले मायाए बितियकिट्टीओ दलिअं ओकड्ढित्तु पढमठितिं करेइ वेदेइ य ।"** इति ।

तदानीमुदयावलिकागतं प्रथमस्थितौ द्वितीयस्थितौ च द्विसमयोनद्व्यावलिकाबद्धमभिनवं मायाप्रथमसंग्रहकिट्टिदलं सत्कर्मणि विद्यते । अन्यः सर्वविधिः पूर्ववज्ज्ञातव्यः, नवरं मायाया द्वितीयसंग्रहकिट्टिर्बध्यते, लोभस्य तु पूर्ववत् प्रथमा । लोभतृतीयसंग्रहकिट्टितो मायाद्वितीयसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च संख्येयगुणा बोद्धव्याः, तथा मायाद्वितीयसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते । ततः समयोनाऽऽवलिकायां गतायां मायाया जघन्यस्थित्युदीरणा जायते, मायाद्वितीयसंग्रहकिट्टेश्च चरमोदयः प्रवर्तते ।

'अन्ते' चरमे=मायाद्वितीयसंग्रहकिट्टेरुदयचरमसमय इत्यर्थः, मोहस्य मायालोभात्मकस्य मोहनीयकर्मणो बन्धो 'देशोना' अन्तर्मुहूर्तन्यूना त्रिंशतिदिना जायते । अथ मायाद्वितीयसंग्रहकिट्टिवेदनचरमसमये स्थितिसत्त्वं भणति—**'सोलमासा'** इत्यादि, 'देसूणा'त्तिपदमत्राऽपि योज्यम् , देशोना-अन्तर्मुहूर्तन्यूनाः षोडशमासाः 'सत्त्वं' स्थितिसत्त्वं जायते, बन्धस्य सत्त्वस्य च त्रैराशिकसाधितप्रमाणेन हानिदर्शनात् । उक्तं च **कषायप्राभृतचूर्णौ—ताधे ठिदिबंधो वीसं दिवसा देसूणा, ठिदिसंतकम्मं सोलस मासा देसूणा ।"** इति ।

घातित्रयस्य स्थितिसत्त्वं संख्येयानि वर्षसहस्राण्यघातित्रयस्याऽसंख्येयानि वर्षसहस्राणि ज्ञेयम् , पूर्वं प्रतिपादितत्वात् नेह निगदितम् । तदानीमुदयसमयाधिकावलिकागतं समयोनाद्व्यावलिकाबद्धं च नूतनं दलं परित्यज्य शेषं सर्वं मायाद्वितीयसंग्रहकिट्टिदलं गृहीत्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्चाऽसंख्येयभागमात्रं यथायोग्यमन्यत्र संक्रम्य शेषसर्वदलं मायातृतीयसंग्रहकिट्टेरधस्तादपूर्वावान्तरकिट्टितया संक्रमयति । इत्थं मायातृतीयसंग्रहकिट्टिदलं मोहनीयसकलदलस्यैकविंशतिचतुर्विंशतिभागप्रमाणं (२१/२४) जायते, मायाद्वितीयसंग्रहकिट्टिदलस्य विंशतिचतुर्विंशतिभागप्रमितस्य तदानीं मायातृतीयसंग्रहकिट्टितया परिणतत्वात् । तथा मायातृतीयसंग्रहकिट्टिदलमितरसंग्रहकिट्ट्यपेक्षयैकविंशतिगुणं जायते, इतरसंग्रहकिट्टीनां प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमाणत्वात् । एवं मायातृतीयसंग्रहकिट्टेरवान्तरकिट्टयोऽपि वक्तव्याः ॥१८३॥

## मायाद्वितीयसंग्रहकिट्टिवेदनप्ररूपणायन्त्रकम्

(१) द्वितीयस्थितिस्थमायाद्वितीयसंग्रहकिट्टिगतप्रदेशाग्रमपकृष्य मायाद्वितीयसंग्रहकिट्टिप्रथमस्थितिं करोति वेदयति च। शेषविधिस्तु पूर्ववद् बोध्यः। नवरं मायाया द्वितीयसंग्रहकिट्टिं बध्नाति, लोभस्य तु पूर्ववत् प्रथमाम्, तथाऽवान्तरकिट्ट्यल्पबहुत्वं प्रदेशाल्पबहुत्वञ्च पञ्चपदकं वक्तव्यम्, तत्राऽपि लोभतृतीयसंग्रहकिट्टितो मायाद्वितीयसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च संख्येयगुणा वाच्याः।

(२) मायाद्वितीयसंग्रहकिट्टेः प्रथमस्थितौ द्व्यावलिकाशेषायां मायाद्वितीयसंग्रहकिट्टेरागालो व्यवच्छिद्यते।

मायाद्वितीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायाम्

(३) मायाद्वितीयसंग्रहकिट्टेरुदयचरमसमयः।

(४) संज्वलनमायाया जघन्यस्थित्युदीरणा।

(५) संज्वलनद्विकस्य स्थितिबन्धोऽन्तर्मुहूर्तन्यूनविंशतिदिवसाः।

(६) संज्वलनद्विकस्य स्थितिसत्त्वमन्तर्मुहूर्तन्यूनचतुर्मासाधिकैकवर्षप्रमितम्।

(७) ज्ञानावरणदर्शनावरणाऽन्तरायाणां स्थितिसत्त्वं संख्येयानि वर्षसहस्राणि।

(८) नामगोत्रवेदनीयानां स्थितिसत्त्वमसंख्येयवर्षसहस्राणि।

(९) समयाधिकोदयावलिकागतं समयोनावलिकाद्वयबद्धं च नूतनं दलिकं वर्जयित्वा शेषं प्रभूतं मायाद्वितीयसंग्रहकिट्टिदलं यथागमं मायातृतीयसंग्रहकिट्टितया परिणम्यते। तेन मायातृतीयसंग्रहकिट्टिदलं मोहनीयसर्वदलस्यैकविंशतिचतुर्विंशतिभागकल्पं (२१/२४) जायते।

(१०) मायातृतीयसंग्रहकिट्टिदलमितरसंग्रहकिट्ट्यपेक्षयैकविंशतिगुणं भवति।

(११) एवं मायातृतीयसंग्रहकिट्टेरवान्तरकिट्टयोऽपीतरसंग्रहकिट्टीनामवान्तरकिट्टिभ्य एकविंशतिगुणाः।

मायाद्वितीयसंग्रहकिट्टिवेदनाद्धासमाप्तितः परं यत्करोति, तदभिधातुकाम आह—

**सेकाले पढमठिइं मायातइयाउ कुणइ अणुहवए ।**
**पण्णरसदिणा बंधो संजलणदुगस्स चरिमुदये ॥१८४॥**

अनन्तरकाले प्रथमस्थितिं मायातृतीयायाः करोत्यनुभवति ।
पञ्चदशदिना बन्धः संज्वलनद्विकस्य चरमोदये ॥१८४॥ इति पदसंस्कारः।

'सेकाले' इत्यादि, 'अनन्तरकाले' मायाद्वितीयसंग्रहकिट्टिवेदनाद्धासमाप्तितोऽनन्तरसमये 'मायातृतीयायाः' मायातृतीयामुत्कीर्य=मायातृतीयसंग्रहकिट्टिप्रदेशाग्रमुत्कीर्योदयसमयादारभ्य माया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेदनकालत आवलिकयाऽधिकासु स्थितिष्वसंख्येयगुणक्रमेण दलं प्रक्षिपन् 'प्रथमस्थितिं' माया-तृतीयसंग्रहकिट्टेः प्रथमस्थितिं 'करोति' निर्वर्तयति । अभ्यधायि च **कषायप्राभृतचूर्णौ–"से काले मायाए तदियकिट्टीदो पदेसग्गमोकड्डियूण पढमठिदिं करेदि ।"** इति । **'अणुहवइ'** त्ति 'अनुभवति' तदानीमेव च मायातृतीयसंग्रहकिट्टिप्रथमस्थितिं वेदयते । प्रत्य-पादि च **सप्ततिकाचूर्णौ–"तओ से काले मायाए ततियकिट्टीओ दलियं ओक-ड्ढित्तु पढमठिर्ति करेइ अंतोमुहुत्तपमाणं वेदेइ य ।"** इति ।

तदानीमुदयावलिकागतं प्रथमस्थितौ द्वितीयस्थितौ च द्विसमयोनद्व्यावलिकाबद्धं मायाद्वितीय-संग्रहकिट्टिदलं सत्कर्मणि भवति । अन्यः सर्वविधिः पूर्ववज्ज्ञातव्यः । नवरं मायायास्तृतीयसंग्रह-किट्टिर्बध्यते, लोभस्य तु पूर्ववत् प्रथमा । लोभतृतीयसंग्रहकिट्टितो मायातृतीयसंग्रहकिट्टेरवान्तर-किट्टयः प्रदेशाश्च संख्यातगुणा भवन्ति । एवंविधानेन मायातृतीयसंग्रहकिट्टिप्रथमस्थितौ द्व्या-वलिकाशेषायामागालो व्यवच्छिद्यते । ततः समयोनावलिकाऽतिक्रमे मायाया जघन्यस्थित्युदीरणा जायते, मायातृतीयसंग्रहकिट्ट्याश्चोदयचरमसमयः । तदानीं संज्वलनमायाया जघन्यानुभागोदीरणा गुणितकर्मांशस्य च जन्तोर्मायाया उत्कृष्टप्रदेशोदीरणा जायते । तदानीमेव मायायाश्चरमोदयो भवति, अनन्तरसमये लोभस्योदयात् । उदीरणावत् संज्वलनमायाया जघन्यानुभागोदयो गुणित-कर्मांशस्य च क्षपकस्य मायाया उत्कृष्टप्रदेशोदयो भवति ।

**'पण्ण०'** इत्यादि, तत्र **'चरिमुदये'** त्ति 'चरमोदये' संज्वलनमायाया उदयचरमसमये मायातृतीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायामित्यर्थः, 'संज्वलनद्विकस्य' माया-लोभरूपस्य कषायद्वयस्य 'बन्धः' स्थितिबन्धः पञ्चदशदिना भवति । मायाद्वितीयसंग्रहकिट्टिवेदना-द्विचरमसमये विहितस्थितिबन्धः क्रमेण हीनः सन् मायातृतीयसंग्रहकिट्टिवेदनाद्धायां त्रैरा-शिकसाधितप्रमाणेन हीनो भूत्वेदानीं पञ्चदशदिवसमात्रो जायत इत्यर्थः । निरदेशि च **कषाय-प्राभृतचूर्णौ–"ताधे मायाए चरिमसमयवेदगो । ताधे दोण्हं संजलणाणं ठ्ठिदिबंधो अद्धमासो पडिवुण्णो ।"** इति । अयं च स्थितिबन्धो मायायाः सर्वजघन्यस्थितिबन्धः । मायाया अनुभागबन्धोऽपि तदानीं सर्वजघन्यो भवति ॥ १८४ ॥

अथ मायावेदनचरमसमये मोहनीयवर्जानां षण्णां कर्मणां स्थितिबन्धं मोहनीयस्य च स्थितिसत्त्वमभिधित्सुराह—

**घाईणं मासपुहुत्तं इयराणं य संखवरिसाणि ।**
**ठिइसंतं दुण्हं संजलणाणं होइ इगवासो ॥१८५॥**

घातिनां मासपृथक्त्वमितरेषां च सङ्ख्यवर्षाणि ।
स्थितिसत्त्वं द्वयोः संज्वलनयोर्भवत्येकवर्षः ॥१८५॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'घाईणं' इत्यादि, मायातृतीयसंग्रहकिट्टिवेदनचरमसमये 'घातिनां' ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां कर्मणां स्थितिबन्धो मासपृथक्त्वं भवति । क्रोधद्वितीयसंग्रहकिट्टिवेदनचरमसमये यस्त्रयाणां घातिकर्मणां स्थितिबन्धो वर्षपृथक्त्वमात्र आसीत्, स क्रमेण हीयमानः सन् मायावेदनाद्धाचरमसमये मासपृथक्त्वप्रमितो जायते । उक्तं च **कषायप्राभृतचूर्णौ–"तिण्हं घादिकम्माणं ठिदिबंधो मासपुधत्तं ।"** इति ।

**'इयराणं** इत्यादि, 'इतरेषाम्' अघातिकर्मणां नामगोत्रवेदनीयरूपाणां च स्थितिबन्धः सङ्ख्यवर्षाणि भवति, पूर्वमपि संख्यातवार्षिक आसीत्, संख्यातस्थितिबन्धेषु गतेष्वपीदानीं सङ्ख्यातवार्षिको भवति, नवरं पूर्वतः संख्येयगुणहीनो भवति ।

निश्चयनयमतमाश्रित्य तदानीमेव व्यवच्छिद्यमाना मायाया बन्धोदयोदीरणा युगपद् व्यवच्छिन्नाः । न्यगादि च **सप्ततिकाचूर्णौ–"तम्मि समए मायाए बंधोदओदीरणा य जुगवं फिट्टंति ।"** इति ।

अथ स्थितिसत्त्वमभिधत्ते **'दुण्हं'** इत्यादि, 'द्वयोः संज्वलनयोः' मायालोभरूपयोः कषाययोः स्थितिसत्त्वमेकवर्षो 'भवति' जायते । मायाद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमयोक्तस्थितिसत्त्वतः क्रमशो हीनो भवद् मायातृतीयसंग्रहकिट्टिवेदनकाले त्रैराशिकसाधितप्रमाणेन हीनं भूत्वेदानीमेकवर्षप्रमितं जायत इत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ–"ठितिसंतकम्ममेक्कं वस्सं पडिवुण्णं ।"** इति ॥ १८५ ॥

अथ षट्कर्मणां स्थितिसत्त्वं लोभप्रथमसंग्रहकिट्टिवेदनं चाऽभिधातुकाम आह—

## घाइअघाईण कमा संखासंखियसमासहस्साइं ।
## सेकाले पढमठिइं कुणेइ लोहपढमाउ वेयइ य ॥१८६॥ (गीतिः)

घात्यघातिनां क्रमात् संख्यासंख्यसमासहस्राणि ।
अनन्तरकाले प्रथमस्थितिं करोति लोभप्रथमाया वेदयति च ॥१८६॥ इति पदसंस्कारः ।

**'घाइ०'** इत्यादि, मायातृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमये घात्यघातिनां कर्मणां क्रमात् स्थितिसत्त्वं संख्यासंख्यसमासहस्राणि जायते, मोहनीयस्योक्तत्वाच्छेषघातित्रयस्य स्थितिसत्त्वं संख्यातानि वर्षसहस्राण्यघातित्रयस्य चाऽसंख्येयानि वर्षसहस्राणि भवतीत्यर्थः । प्रत्यपादि च **कषायप्राभृतचूर्णौ–"तिण्हं घादिकम्माणं ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि । इदरेसिं कम्माणं ठिदिसंतकम्ममसंखेज्जाणि वस्ससहस्साणि ।"** इति ।

तदानीमेवोदयसमयाधिकाऽऽवलिकागतं समयोनद्व्यावलिकाबद्धं च नूतनं दलं वर्जयित्वा शेषं मायातृतीयसंग्रहकिट्टिदलं गृहीत्वा ततश्चासंख्येयभागमात्रं दलं लोभप्रथमसंग्रहकिट्टिपूर्वापूर्वान्तर-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

किट्टित्वेन परिणम्य शेषं सर्वदलं लोभप्रथमसंग्रहकिट्टेरधस्तादपूर्वावान्तरकिट्टितया संक्रमयति। तथा चोक्तं सप्ततिकाचूर्णौ–"×××**वेदेइ य ताव, जाव समयाहियावलिया सेस त्ति। तम्मि समये ×××××××× संतकम्मं पि समऊणदुयावलियाबद्धं मोत्तूण सेसं सव्वं लोभसंजलणम्मि पक्खित्तं** ।"इति। इत्थं लोभप्रथमसंग्रहकिट्टिदलं मोहनीयसकलदलस्य द्वाविंशतिचतुर्विंशतिभागप्रमाणं ($\frac{22}{24}$) जायते, मायातृतीयसंग्रहकिट्टिदलस्यैकविंशतिचतुर्विंशतिभागप्रमितस्य तदानीं लोभप्रथमसंग्रहकिट्टितया परिणतत्वात्। तथा लोभप्रथमसंग्रहकिट्टिदलमितरसंग्रहकिट्ट्यपेक्षया द्वाविंशतिगुणं जायते, इतरसंग्रहकिट्ट्योः प्रत्येकं दलस्यैकचतुर्विंशतिभागप्रमितत्वात्। एवं लोभप्रथमसंग्रहकिट्टेरवान्तरकिट्ट्योऽपि वक्तव्याः।

**मायातृतीयसंग्रहकिट्टिवेदनप्ररूपणायन्त्रकम्**

(१) द्वितीयस्थितिस्थमायातृतीयसंग्रहकिट्टिप्रदेशाग्रमपकृष्य मायातृतीयसंग्रहकिट्टिप्रथमस्थितिं करोति वेदयति च। शेषविधिस्तु पूर्ववद् बोध्यः। यो विशेषः, स दर्श्यते—

(अ) मायातृतीयसंग्रहकिट्टिवेदनाद्धाप्रथमसमय उदयावलिकागतं द्वितीयस्थितौ च द्विसमयोनद्वयावलिकाबद्धं नूतनं दलं मायाद्वितीयसंग्रहकिट्टिसत्कं सत्कर्मणि विद्यते।

(ब) मायाया तृतीयसंग्रहकिट्टिं बध्नाति, लोभस्य तु पूर्ववत् प्रथमाम्।

(स) अत्रान्तरकिट्ट्यल्पबहुत्वं प्रदेशाल्पबहुत्वञ्च चतुष्पदकं वक्तव्यम्। तत्राऽपि मायातृतीयसंग्रहकिट्टेरवान्तरकिट्ट्यः प्रदेशाश्च लोभतृतीयसंग्रहकिट्टितः संख्येयगुणा वाच्याः।

(२) मायातृतीयसंग्रहकिट्टिप्रथमस्थितौ द्व्यावलिकाशेषायां मायाया आगालो व्यवच्छिद्यते।

(३) मायातृतीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायाम्।

(क) मायाया जघन्यस्थित्युदीरणा जघन्यस्थित्युदयो जघन्यानुभागोदीरणा जघन्यानुभागदयश्च।

(ख) गुणितकर्मांशस्य जन्तोरुत्कृष्टप्रदेशोदीरणोत्कृष्टप्रदेशोदयश्च।

(ग) संज्वलनद्विकस्य स्थितिबन्धः पञ्चदशदिवसप्रमाणः।

(घ) मायायाः सर्वजघन्यस्थितिबन्धः।

(ङ) मायायाः सर्वजघन्याऽनुभागबन्धः।

(च) संज्वलनद्विकस्य स्थितिसत्त्वमेकवर्षप्रमाणम्।

(छ) समयाधिकोदयावलिकागतं समयोनद्व्यावलिकाबद्धं च नूतनं दलं विहाय शेषं सर्वं मायातृतीयसंग्रहकिट्टिदलं यथागमं लोभप्रथमसंग्रहकिट्टित्वेन परिणमयति। तेन लोभप्रथमसंग्रहकिट्टिदलं मोहनीयसर्वदलस्य द्वाविंशतिचतुर्विंशतिभागकल्पं ($\frac{22}{24}$) भवति।

(ज) लोभप्रथमसंग्रहकिट्टेरवान्तरकिट्ट्यः प्रदेशाश्चेतरसंग्रहकिट्टितो द्वाविंशतिगुणाः।

(झ) निश्चयनयापेक्षया मायाया बन्धोदयोदीरणा व्यवच्छिद्यमाना व्यवच्छिन्नाः।

अथ लोभवेदनकालं विवर्णयिषुराह– 'सेकाले' इत्यादि, 'अनन्तरकाले' मायातृतीयसंग्रहकिट्टिवेदनकालसमाप्तितोऽनन्तरसमये 'लोभप्रथमायाः' लोभप्रथमसंग्रहकिट्टिप्रदेशाग्रमुत्कीर्योदयसमयादारभ्याऽसंख्येयगुणक्रमेण बादरलोभवेदनकालस्य साधिकद्विभागप्रमाणासु लोभवेदनकालस्य च साधिकत्रिभागमितासु लोभप्रथमसंग्रहकिट्टिवेदनकालतस्त्वावलिकयाऽधिकासु स्थितिषु

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

निक्षिपन् 'प्रथमस्थितिं' संज्वलनलोभप्रथमसंग्रहकिट्टेरादिमस्थितिं करोति । अत्रादि च कषायप्राभृतचूर्णौ–**"तदो से काले लोभस्स पढमकिट्टीदो पदेसग्गमोकड्डियूण पढमट्ठिदिं करेदि ।"** इति

'वेयइ य' त्ति 'वेदयति च' तदानीमेव लोभप्रथमसंग्रहकिट्टिमनुभवति च । यदुक्तं सप्ततिकाचूर्णौ–**"तओ से काले लोभस्स पढमकिट्टीओ दलियं ओकड्ढित्तु पढमठितिं करेइ अंतोमुहुत्तप्पमाणमेत्तं, तं च लोभवेयगद्धाए तिभागो वेदेइ य ।"** इति । तदानीं प्रथमस्थितावुदयावलिगतं यद् मायातृतीयसंग्रहकिट्टिदलं विद्यते, तत् प्रतिसमयं संज्वलनलोभे स्तिबुकसंक्रमेण संक्रम्य विनाशयति । द्वितीयस्थितौ च द्विसमयोनाऽऽवलिकाद्वयेन बद्धं यद् मायातृतीयसंग्रहकिट्टिदलं विद्यते, तत् तावता कालेन पुरुषवेदवत् संक्रमयता जन्तुना चरमप्रक्षेपेऽसंक्रम्यमाणे संज्वलनमायाया जघन्यस्थितिसत्त्वं जघन्याऽनुभागसत्त्वं च, तथा जघन्ययोगिना बद्धनूतनदलिकस्य जघन्यप्रदेशसत्कर्म प्राप्यते । तदानीं च चरमप्रक्षेपे संक्रम्यमाणे संज्वलनमायाया जघन्यस्थितिसंक्रमो जघन्यश्चानुभागसंक्रमो भवति । **कर्मप्रकृतिचूर्णिकारादीनाम**भिप्रायेण मायोदयचरमसमये जघन्ययोगिना जन्तुना बद्धनूतनमायादलिकस्य तदानीं जघन्यप्रदेशसंक्रमोऽपि जायते ।

शेषसर्वविधिः पूर्ववद् वेदितव्यः, नवरं लोभस्यैव प्रथमसंग्रहकिट्टिर्बध्यते, अवान्तरकिट्ट्यल्पबहुत्वं प्रदेशाऽल्पबहुत्वञ्च त्रिपदकं वक्तव्यम्, तत्राऽपि लोभतृतीयसंग्रहकिट्टितो लोभप्रथमसंग्रहकिट्टीनामवान्तरकिट्टयः प्रदेशाश्च संख्यातगुणा भवन्ति ।

एवंविधानेन लोभप्रथमसंग्रहकिट्टेः प्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते । ततः समयोनावलिकायां गतायां प्रथमस्थितेः समयाधिकावलिकायां शेषायां संज्वलनलोभस्य जघन्यस्थित्युदीरणा भवति, तदानीं च लोभप्रथमसंग्रहकिट्टेश्चरमोदयः ॥१८६॥

अथ लोभप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये सप्तानामपि कर्मणां स्थितिबन्धं मोहस्य च स्थितिसत्त्वं निजिगदिषुराह—

**चरिमे बंधो लोहस्स मुहुत्तंतो तहेव संतं वि ।**
**बंधो घाईण दिणपुहुत्तमघाईण वच्छरपुहुत्तं ॥१८७॥ (गीतिः)**

चरमे बन्धो लोभस्य मुहूर्तान्तस्तथैव सत्त्वमपि ।
बन्धो घातिनां दिनपृथक्त्वमघातिनां वत्सरपृथक्त्वम् ॥१८७॥ इति पदसंस्कारः ।

**'चरिमे'** इत्यादि, 'चरमे' लोभप्रथमसंग्रहकिट्टिवेदनाद्धायाश्चरमसमये 'लोभस्य' संज्वलनलोभस्य 'बन्धः' स्थितिबन्धो 'मुहूर्तान्तः' अन्तर्मुहूर्तं भवति । मायातृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमये यः स्थितिबन्धः पञ्चदशदिवसप्रमाण आसीत्, स क्रमेण हीनो भवन् सम्प्रत्यन्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुहूर्तप्रमितो जायत इत्यर्थः । 'तहेव' इत्यादि, 'तथैव सत्त्वमपि' लोभस्य स्थितिसत्त्वमपि स्थितिबन्धवदन्तमुहूर्तप्रमाणं भवति । अभिहितं च **कषायप्राभृतचूर्णौ**–"**ताधे लोभसंजलणस्स ठिदिबंधो अंतोमुहुत्तं । ठिदिसंतकम्मं पि अंतोमुहुत्तं** ।" इति । इदमत्राऽवधेयम्–उभयोरन्तमुहूर्तमात्रत्वेऽपि स्थितिबन्धतः स्थितिसत्त्वं संख्येयगुणं भवति ।

'**बंधो**' इत्यादि, तत्र 'घातिनां' मोहनीयस्योक्तत्वाज्ज्ञानावरण-दर्शनावरणाऽन्तरायाणां 'बन्धः' स्थितिबन्धो दिनपृथक्त्वं लोभप्रथमसंग्रहकिट्टिवेदनचरमसमये भवति, यो मायातृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमये मासपृथक्त्वप्रमित आसीत् । 'अघातिनां' नामगोत्रवेदनीयानां स्थितिबन्धो 'वत्सरपृथक्त्वं' वर्षपृथक्त्वं भवति, यो मायातृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमये तत्प्रायोग्यसंख्येयवर्षप्रमाण आसीत् । उक्तं च **कषायप्राभृतचूर्णौ**–"**ताधे लोभसंजलणस्स ठिदिबंधो अंतोमुहुत्तं । तिण्हं घादिकम्माणं ठिदिबंधो दिवसपुधत्तं । सेसाणं कम्माणं वासपुधत्तं** ।" इति ॥१८७॥

मोहनीयस्य स्थितिसत्त्वमुक्तम् । अथ षण्णां कर्मणां स्थितिसत्त्वं प्रदर्शयितुकाम आह—

**घाईणं संतं संखसहस्साणि वरिसाण होज्जेइ ।**
**तिण्ह अघाईण असंखेज्जाइं वच्छराणि खलु ॥१८८॥**

घातिनां सत्त्वं संख्यसहस्राणि वर्षाणां भवति ।
त्रयाणामघातिनामसंख्येयानि वत्सराणि खलु ॥१८८॥ इति पदसंस्कारः ।

'**घाईणं**' इत्यादि, लोभप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये 'घातिनां' ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां कर्मणां 'सत्त्वं' स्थितिसत्त्वं वर्षाणां संख्यसहस्राणि भवति, पूर्वमपि मायावेदनाद्धाचरमसमये ज्ञानावरणादीनां स्थितिसत्त्वं संख्येयवर्षसहस्रमात्रमासीत्, ततोऽन्तमुहूर्तप्रमाणायां लोभप्रथमसंग्रहकिट्टिवेदनाद्धायां गतायां संख्येयगुणहीनं भवदपि संख्येयवर्षसहस्रप्रमाणं विद्यत इत्यर्थः । '**तिण्ह**' इत्यादि, लोभप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये त्रयाणामघातिनां कर्मणां नामगोत्रवेदनीयलक्षणानां स्थितिसत्त्वं खल्वसंख्येयानि 'वत्सराणि' वर्षाणि भवति, सुगममिदम् । यत् प्रतिपादितं **कषायप्राभृतचूर्णौ**–"**घादिकम्माणं ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि, सेसाणं कम्माणमसंखेज्जाणि वस्साणि** ।" इति ।

तदानीमेवोदयसमयाधिकावलिकागतं समयोनद्वयावलिकाबद्धं च नूतनं दलं विहाय शेषं लोभप्रथमसंग्रहकिट्टिदलं गृहीत्वा ततश्च यथायोग्यमन्यत्र किञ्चिद्दलं संक्रम्य शेषसर्वदलं लोभद्वितीयसंग्रहकिट्टेरधस्तादपूर्वावान्तरकिट्टितया संक्रमयति । इत्थं लोभद्वितीयसंग्रहकिट्टिदलं मोहनीयसकलदलस्य त्रयोविंशतिचतुर्विंशतिभागप्रमाणं ( $\frac{23}{24}$ ) जायते, लोभप्रथमसंग्रहकिट्टिगतस्य द्वाविंशतिचतुर्विंशतिभागप्रमाणस्य दलस्य तदानीं लोभद्वितीयसंग्रहकिट्टितया परिणतत्वात् । तथा लोभ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयसंग्रहकिट्टिदलं लोभतृतीयसंग्रहकिट्टिदलात्त्रयोविंशतिगुणं जायते, लोभतृतीयसंग्रहकिट्टिदलस्यैकचतुर्विंशतिभागप्रमाणत्वात् । एवं लोभद्वितीयसंग्रहकिट्टेरवान्तरकिट्टयोऽपि ज्ञातव्याः ॥१८८॥

**लोभप्रथमसंग्रहकिट्टिवेदनप्ररूपणायन्त्रकम्**

(१) द्वितीयस्थितिस्थलोभप्रथमसंग्रहकिट्टिप्रदेशाग्रमपकृष्य लोभप्रथमसंग्रहकिट्टयाः प्रथमस्थितिं करोति वेदयति च । शेषविधिस्तु पूर्ववद् बोध्यः, नवरं संज्वलनलोभस्य प्रथमसंग्रहकिट्टिं बध्नाति । तथाऽवान्तरकिट्टयल्पबहुत्वं प्रदेशाल्पबहुत्वञ्च त्रिपदकं वाच्यम्, तत्राऽपि लोभतृतीयसंग्रहकिट्टितो लोभप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः प्रदेशाश्च संख्येयगुणा वाच्याः ।

लोभप्रथमसंग्रहकिट्टिवेदनाद्धायां मायायाश्चरमप्रक्षेपेऽसंक्रम्यमाणे

(२) संज्वलनमायाया जघन्यस्थितिसत्त्वम् ।

(३) संज्वलनमायाया जघन्याऽनुभागसत्कर्म ।

(४) मायोदयचरमसमये जघन्ययोगिना बद्धमायाया जघन्यप्रदेशसत्कर्म भवति

चरमप्रक्षेपं संक्रमयतो जीवस्य तु

(५) संज्वलनमायाया जघन्यस्थितिसंक्रमः ।

(६) संज्वलनमायाया जघन्यानुभागसंक्रमः ।

(७) कर्मप्रकृतिचूर्णिकृदभिप्रायेण मायोदयचरमसमये जघन्ययोगेन बद्धस्य नूतनमायादलिकस्य जघन्यप्रदेशसंक्रमो भवति ।

(८) लोभप्रथमसंग्रहकिट्टेः प्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते ।

(९) लोभप्रथमसंग्रहकिट्टेः प्रथमस्थितौ समयाधिकावलिकाशेषायां लोभस्य जघन्यस्थित्युदीरणा ।

(१०) लोभप्रथमसंग्रहकिट्टेः प्रथमस्थितौ समयाधिकावलिकाशेषायां लोभप्रथमसंग्रहकिट्टेश्चरमोदयः ।

लोभप्रथमसंग्रहकिट्टेरुदयचरमसमये

(११) संज्वलनलोभस्य स्थितिबन्धोऽन्तर्मुहूर्तप्रमाणः ।

(१२) संज्वलनलोभस्य स्थितिसत्त्वमप्यन्तर्मुहूर्तमात्रम् ।

(१३) ज्ञानावरण-दर्शनावरणा-ऽन्तरायाणां स्थितिबन्धो दिवसपृथक्त्वं भवति ।

(१४) वेदनीय-नाम-गोत्राणां स्थितिबन्धो वर्षपृथक्त्वं भवति ।

(१५) घातित्रयस्य संख्यातवर्षसहस्राण्यघातित्रयस्य चाऽसंख्येयवर्षाणि स्थितिसत्कर्म ।

(१६) समयाधिकोदयावलिकागतं समयोनावलिकाद्वयबद्धं च दलं मुक्त्वा शेषं प्रभूतं लोभप्रथमसंग्रहकिट्टिदलं यथागमं लोभद्वितीयसंग्रहकिट्टित्वेन परिणतम् । तेन मायाद्वितीयसंग्रहकिट्टिदलं मोहनीयसकलदलस्य त्रयोविंशतिचतुर्विंशतिभागकल्पं ($\frac{23}{24}$) जायते ।

(१७) इतरसंग्रहकिट्टयपेक्षया लोभद्वितीयसंग्रहकिट्टेः प्रदेशा अवान्तरकिट्टयश्च त्रयोविंशतिगुणाः ।

लोभप्रथमसंग्रहकिट्टिवेदनाद्धासमाप्तितोऽनन्तरसमये यत्करोति, तद् व्याजिहीर्षुराह—

## सेकाले लोहबिइयमोक्कड्ढित्तु पढमट्ठिइं तु करिज्जा ।
## वेयइ ताहे लोहगबिइयातइयाउ कुणइ य सुहुमकिट्टी ।१८९।(आर्यागीतिः)

अनन्तरकाले लोभद्वितीयामपकृष्य प्रथमस्थितिं तु करोति ।

वेदयति तस्मिन् काले लोभद्वितीयातृतीयाभ्यां करोति च सूक्ष्मकिट्टीः ॥१८९॥ इति पदसंस्कारः ।

**'सेकाले'** इत्यादि, 'अनन्तरकाले' लोभप्रथमसंग्रहकिट्टिवेदनाद्धासमाप्तितोऽनन्तरसमय इत्यर्थः, 'लोभद्वितीयां' लोभद्वितीयसंग्रहकिट्टिप्रदेशाग्रमपकृष्य लोभवेदनाद्धाया द्वितीये त्रिभागयुदय-

समयादारभ्य स्ववेदनकालत आवलिकयाऽधिकासु स्थितिष्वसंख्येयगुणक्रमेण निक्षिपन् 'प्रथमस्थितिं' लोभद्वितीयसंग्रहकिट्टेः प्रथमस्थितिं तु 'करोति' निर्वर्तयति । उक्तं च **कषायप्राभृतचूर्णौ–"तत्तो से काले लोभस्स विदियकिट्टीदो पदेसग्गमोकड्डियूण पढमठिदिं करेदि ।"** इति । तथैव **सप्ततिकाचूर्णावपि–"तओ से काले लोभस्स बितियकिट्टीओ दलिअं ओकड्ढित्तु पढमट्ठितिं करेइ बीयतिभागमेत्तं ।"** इति ।

**'वेयइ'** त्ति 'वेदयति, तदानीमेव च लोभद्वितीयसंग्रहकिट्टेः प्रथमस्थितिमनुभवति । इयं च द्वितीयसंग्रहकिट्टिवेदनाद्धा सूक्ष्मकिट्टिकरणाद्धाऽप्युच्यते, अस्यां सूक्ष्मकिट्टीनां निर्वृत्तेः ।

अथ सूक्ष्मकिट्टिनिर्वृत्तिं दर्शयति–**'ताहे'** इत्यादि, 'तस्मिन् काले' लोभद्वितीयसंग्रहकिट्टिवेदनप्रथमसमय एव 'लोभद्वितीयातृतीयाभ्यां' लोभद्वितीयसंग्रहकिट्टितो लोभतृतीयसंग्रहकिट्टितश्चाऽसंख्येयभागप्रमितं दलिकं गृहीत्वा सूक्ष्मकिट्टीः 'करोति' निर्वर्तयति, अन्यथा तृतीये त्रिभागे सूक्ष्मकिट्टिवेदनं नोपपद्येत । न च लोभतृतीयसंग्रहकिट्टिवेदनाद्धायां सूक्ष्मकिट्टिकरणं प्रतिपाद्यतामिति वाच्यम् , लोभतृतीयसंग्रहकिट्टेः स्वस्वरूपेणाऽनुदयात् । उक्तं च **कषायप्राभृतचूर्णौ–"ताधे चेव लोभस्स विदियकिट्टीदो च तदियकिट्टीदो च पदेसग्गमोकड्डियूण सुहुमसांपराइयकिट्टीओ णाम करेदि ।"** इति । तथैव **सप्ततिकाचूर्णावपि–"तं वेयंतो बितियकिट्टीओ तइअकिट्टीओ य दलियं घेत्तूणं सुहुमसंपराइयकिट्टीओ करेइ ।"** इति ॥ १८९ ॥

ननु ताः सूक्ष्मकिट्टीः कुत्र कथं च करोति ? इति पृष्ट आह—

सुहुमा किट्टीओ तइयाए हेट्ठम्मि कुणइ खलु खवगो ।
ता सुहुमा कोहपढमसंगहकिट्टिव्व पण्णत्ता ॥१९०॥

सूक्ष्माः किट्टीस्तृतीयस्या अधस्तात्करोति खलु क्षपकः ।
ताः सूक्ष्माः क्रोधप्रथमसंग्रहकिट्टिवत् प्रज्ञप्ताः ॥१९०॥ इति पदसंस्कारः ।

**'सुहुमा'**इत्यादि, तत्र **'खवगो'** त्ति 'क्षपकः' क्षपकश्रेणिमारूढो जीवो लोभद्वितीयसंग्रहकिट्टिं वेदयमानः खलु सूक्ष्माः किट्टीः 'तृतीयस्याः' लोभतृतीयसंग्रहकिट्टेरधस्तात् करोति, लोभतृतीयसंग्रहकिट्टेः सर्वजघन्यावान्तरकिट्टेरधस्तादनन्तगुणहीनरसतामापाद्य सूक्ष्मकिट्टीनां सर्वोत्कृष्टां सूक्ष्मकिट्टिं निर्वर्तयति, ततोऽधस्ताद् द्विचरमसूक्ष्मकिट्टिम् , ततोऽप्यधस्तात् त्रिचरमसूक्ष्मकिट्टिम्, एवं तावद् निर्वर्तयति, यावत् प्रथमसूक्ष्मकिट्टिरिति तात्पर्यम् । उक्तं च **कषायप्राभृतचूर्णौ–"तासिं सुहुमसांपराइयकिट्टीणं कम्हि ट्ठाणं ? तासिं ट्ठाणं लोभस्स तदियाए संगहकिट्टीए हेट्ठदो ।"** इति ।

**'ता'** इत्यादि, 'ताः' लोभतृतीयसंग्रहकिट्टेरधस्ताद् निर्वर्त्यमानाः 'सूक्ष्माः' सूक्ष्मकिट्टयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोधप्रथमसंग्रहकिट्टिवत् 'प्रज्ञप्ताः' निरूपिताः पूर्वमहर्षिभिरिति शेषः। प्रतिपादितं च **कषायप्राभृतचूर्णौ–"जारिसो कोहस्स पढमसंगहकिट्टी, तारिसो एसा सुहुमसांपराइयकिट्टी।"** इति।

भावार्थः पुनरयम्–(१) यथा क्रोधप्रथमसंग्रहकिट्टेरवान्तरकिट्टय इतरसंग्रहकिट्टीनां प्रत्येकमवान्तरकिट्टिभ्यः संख्यातगुणा आसन्, तथैव क्रोधकिट्टिवेदनाद्धाप्रथमसमयवर्तिनीभ्यः क्रोधप्रथमसंग्रहकिट्टिवर्जशेषसंग्रहकिट्टीनां प्रत्येकमवान्तरकिट्टिभ्यः संख्यातगुणाः सूक्ष्मकिट्टयो भवन्ति। इत्थं सूक्ष्मकिट्टीनां प्रमाणं **"कोहपढमसंगहकिट्टिव्व"** इत्यनेन सूचितमिति प्रथमो विकल्पः।

(२) अथवा यथा क्रोधप्रथमसंग्रहकिट्टिरपूर्वस्पर्धकानामधस्तादनुभागापेक्षयाऽनन्तगुणहीना क्रियते स्म, तथैव लोभतृतीयसंग्रहकिट्टेरधस्तादनुभागापेक्षयाऽनन्तगुणहीनाः सूक्ष्मकिट्टयः क्रियन्त इति द्वितीयो विकल्पः।

(३) यद्वा यथा क्रोधप्रथमसंग्रहकिट्टयवान्तरकिट्टयो जघन्यावान्तरकिट्टितः प्रभृत्युत्कृष्टावान्तरकिट्टिं यावदनुभागापेक्षयाऽनन्तगुणक्रमेण तिष्ठन्ति स्म, तथैव सूक्ष्मकिट्टयोऽपि जघन्यसूक्ष्मकिट्टितः प्रभृत्युत्कृष्टसूक्ष्मकिट्टिं यावदनुभागाऽपेक्षयाऽनन्तगुणक्रमेण विद्यन्त इति तृतीयो विकल्पः ॥१९०॥

अथ सूक्ष्मकिट्टिकरणाद्धायां संक्रमपरिपाटिं दर्शयितुकाम आह—

**लोहस्स बिइयकिट्टित्तो तइयाअ तह सुहुमकिट्टीसुं।**
**तइयत्तो सुहुमासुं संकमइ दलं न अण्णत्थ ॥१९१॥**

लोभस्य द्वितीयकिट्टितस्तृतीयस्यां तथा सूक्ष्मकिट्टिषु।
तृतीयातः सूक्ष्मासु संक्रामति दलं नाऽन्यत्र ॥१९१॥ इति पदसंस्कारः।

**'लोहस्स'** इत्यादि, 'लोभस्य' संज्वलनलोभस्य 'द्वितीयकिट्टितो' द्वितीयसंग्रहकिट्टितो 'दलं' प्रदेशाग्रं संज्वलनलोभस्य 'तृतीयस्यां' तृतीयसंग्रहकिट्टौ तथा सूक्ष्मकिट्टिषु संक्रामति। **'तइयत्तो'** इत्यादि, 'तृतीयातो' लोभतृतीयसंग्रहकिट्टितो सूक्ष्मासु किट्टिषु दलं संक्रामति, नाऽन्यत्र, आनुपूर्व्या संक्रमस्य प्रवर्तमानत्वात् किट्टिवेदनाद्धायां चोद्वर्तनाऽभावात् ॥१९१॥

अथ संक्रम्यमाणप्रदेशाग्रस्याऽल्पबहुत्वं व्याजिहीर्षुराह—

**सुहुमासुं तइयत्तोऽप्पं बीयाउ तइयाअ संखगुणं।**
**तो बीयत्तो सुहुमासु दलं संकमइ संखगुणं ॥ १९२ ॥**

सूक्ष्मासु तृतीयातोऽल्पं द्वितीयस्यास्तृतीयस्यां संख्यगुणम्।
ततो द्वितीयातः सूक्ष्मासु दलं संक्रामति सङ्ख्यगुणम् ॥१९२॥ इति पदसंस्कारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'**सुहुमासु**' इत्यादि, 'सूक्ष्मासु' सूक्ष्मकिट्टिषु 'तृतीयातः' लोभतृतीयसंग्रहकिट्टितो 'अल्पं' स्तोकं 'दलं' प्रदेशाग्रमपवर्तनासंक्रमेण संक्रामति । ततः '**बीयाउ**' इत्यादि, 'द्वितीयातः' लोभद्वितीयसंग्रह किट्टितः 'तृतीयस्यां' लोभतृतीयसंग्रहकिट्टौ संख्यगुणं दलं संक्रामति, लोभतृतीयसंग्रहकिट्टिदलतो द्वितीयसंग्रहकिट्टिदलस्य त्रयोविंशतिगुणत्वेन संख्येयगुणत्वात् । '**तो**' इत्यादि, ततो 'द्वितीयातो' लोभद्वितीयसंग्रहकिट्टितः 'सूक्ष्मासु' सूक्ष्मकिट्टिषु संख्येयगुणं दलं संक्रामति, लोभद्वितीयसंग्रहकिट्टितोऽनन्तरवेद्यमानत्वेन तत्र संख्येयगुणदलसंक्रमस्य न्याय्यत्वात् । न्यगादि च **कषायप्राभृतचूर्णौ**–"**सुहुमसांपराइकिट्टीसु कीरमाणीसु लोभस्स चरिमादो बादरसांपराइयकिट्टीदो सुहुसांपराइयकिट्टीए संकमदि पदेसग्गं थोवं। लोभस्स विदियकिट्टीदो चरिमबादरसांपराइयकिट्टीए संकमदि पदेसग्गं संखेज्जगुणं। लोभस्स विदियकिट्टीदो सुहुमसांपराइयकिट्टीए संकमदि पदेसग्गं संखेज्जगुणं।**" इति । पश्यन्तु पाठका यन्त्रकम्--२४ ॥१९२॥

अथ सूक्ष्मकिट्टीनां प्रमाणं जिज्ञापयिषुरल्पबहुत्वं भणति—

**थोवा आसि अवन्तरकिट्टी कोहपढमाअ कोहखये ।**
**माणपढमाअ माणे खीणे मायापढमगाए ॥१९३॥**
**मायाणासे लोहपढमाअ पढमखणकयसुहुमकिट्टी ।**
**कमसो अब्भहिआओ सगसंखेज्जइमभागेणं ॥१९४॥**

स्तोका आसन्नवान्तरकिट्टयः क्रोधप्रथमायाः क्रोधक्षये ।
मानप्रथमाया माने क्षीणे मायाप्रथमायाः ॥१९३॥
मायानाशे लोभप्रथमायाः प्रथमक्षणकृतसूक्ष्मकिट्टयः ।
क्रमशोऽभ्यधिकाः स्वसंख्येयतमभागेन ॥१९४॥ इति पदसंस्कारः ।

'**थोवा**' इत्यादि, तत्र 'क्रोधप्रथमायाः' क्रोधप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः स्तोका आसन् । 'अवन्तरकिट्टी' त्ति पदमग्रेऽपि स्थानत्रयेऽनुवर्तते । 'क्रोधक्षये' संज्वलनक्रोधतृतीयसंग्रहकिट्टेर्मानप्रथमसंग्रहकिट्टितया परिणामे सति 'मानप्रथमायाः' मानप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः, '**माणे**' इत्यादि, 'माने' मानतृतीयसंग्रहकिट्टौ 'क्षीणे' मायाप्रथमसंग्रहकिट्टितया परिणतायां 'मायाप्रथमायाः' मायाप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः, 'मायानाशे' मायातृतीयसंग्रहकिट्टेर्लोभप्रथमसंग्रहकिट्टितया परिणमने सति 'लोभप्रथमायाः' लोभप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः, 'प्रथमक्षणकृतसूक्ष्मकिट्टयः' सूक्ष्मकिट्टिकरणाद्धाप्रथमसमयनिर्वर्तितसूक्ष्मकिट्टयश्च 'क्रमशः' यथाक्रमं स्वसंख्येयतमभागेनाऽभ्यधिकाः । यदवादि **कषायप्राभृतचूर्णौ**— "**कोहस्स पढमसंगहकिट्टीए अंतरकिट्टीओ थोवाओ, कोहे संछुद्धे माणस्स पढम-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मकिट्टिषु संक्रम्यमाणदलस्य निरूपणम्




सङ्केतस्पष्टीकरणम्—

★=तृतीयसंग्रहकिट्टया अवान्तरकिट्टयः ।

*=लोभतृतीयसंग्रहकिट्टेः सर्वजघन्यावान्तरकिट्टिः, तस्या अधस्तात् अनन्तगुणहीनरसतामापाद्य चरमसूक्ष्मकिट्टिर्निर्वर्त्यते, सा च △ इत्यनेन चिह्नेन सूचिता । तस्या अधस्तात् द्विचरमसूक्ष्मकिट्टिः, एवं पश्चानुपूर्व्या तावद् वक्तव्या, यावत् प्रथमसूक्ष्मकिट्टिः (गाथा-१९०)

(१) 0000 अनेन चिह्नेन लोभतृतीयसंग्रहकिट्टितः सूक्ष्मकिट्टिषु प्रदेशाग्रं सङ्क्रामतीति सूचितम् , (गाथा-१९१), तच्च स्तोकम् , उपरि भण्यमाणस्य प्रभूतत्वात् ( गाथा-१९२ )

(२) ••• अनेन चिह्नेन लोभद्वितीयसंग्रहकिट्टितो लोभतृतीयसंग्रहकिट्टयां दलिकं सङ्क्रामतीति सूचितम् (गाथा-१९०), तच्च पूर्वपदतः संख्येयगुणं भवति, (गाथा-१९२) ।

(३) – – – अनेन चिह्नेन लोभद्वितीयसंग्रहकिट्टितः सूक्ष्मकिट्टिषु सङ्क्रम्यमाणदलं सूचितम् (गाथा-१९१), तच्च पूर्वपदतः संख्येयगुणं भवति (गाथा-१९२) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**संगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ। माणे संछुद्धे मायाए पढमसंगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ । मायाए संछुद्धाए लोभस्स पढमसंगहकिट्टीए अंतरकिट्टीओ विसेसाहियाओ । सुहुमसांपराइयकिट्टीओ जाओ पढमसमये कदाओ, ताओ विसेसाहियाओ ।एसो विसेसो अणंतराणंतरेण संखेज्जदिभागो ।"** इति ।

भावार्थः पुनरयम्—

(१) क्रोधप्रथमसंग्रहकिट्टिदलं मोहनीयसकलदलस्य त्रयोदशचतुर्विंशतिभागप्रमाणमासीत् । तच्च प्राग दर्शितम् । अवान्तरकिट्टयश्च दलिकानुसारेण भवन्ति स्म, तेन क्रोधप्रथमसंग्रहकिट्टेरवान्तरकिट्टयोऽपि मोहनीयसकलावान्तरकिट्टीनां त्रयोदशचतुर्विंशतिभागप्रमाणा ( $\frac{13}{24}$ ) भवन्ति स्म, ताश्च स्तोकाः, उपरितनानां पदानां विशेषाधिकत्वात् ।

(२) ततः संज्वलनक्रोधतृतीयसंग्रहकिट्टौ मानप्रथमसंग्रहकिट्टितया परिणतायां मानप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः संख्येयभागेनाऽधिका भवन्ति स्म । कथमेतदवगन्तव्यम् ? इति चेत् , उच्यते—क्रोधतृतीयसंग्रहकिट्टिदले मानप्रथमसंग्रहकिट्टितया परिणते मानप्रथमसंग्रहकिट्टिदलस्य षोडशचतुर्विंशतिभागमात्रत्वाद् ($\frac{16}{24}$) मानप्रथमसंग्रहकिट्टेरवान्तरकिट्टयोऽपि मोहनीयसकलावान्तरकिट्टीनां षोडशचतुर्विंशतिभागप्रमिता ( $\frac{16}{24}$ ) जायन्ते स्म । तेन क्रोधप्रथमसंग्रहकिट्टिगताभ्यस्त्रयोदशचतुर्विंशतिभागप्रमिताभ्यः ( $\frac{13}{24}$ ) अवान्तरकिट्टिभ्यः स्वसंख्येयभागेनाऽधिकाः क्रोधे मानतया सर्वथा परिणते मानप्रथमसंग्रहकिट्टेरवान्तरकिट्टयो भवन्ति स्म ।

(३) ततो मानतृतीयसंग्रहकिट्टौ मायाप्रथमसंग्रहकिट्टितया परिणतायां संख्येयभागेनाऽधिका मायाप्रथमसंग्रहकिट्टेरवान्तरकिट्टयो जायन्ते स्म । कथमेतदवसीयते ? इति चेत् , उच्यते—मानतृतीयसंग्रहकिट्टिदले मायाप्रथमसंग्रहकिट्टितया परिणते मायाप्रथमसंग्रहकिट्टिदलस्यैकोनविंशतिचतुर्विंशतिभागप्रमाणत्वाद् ( $\frac{19}{24}$ ) मायाप्रथमसंग्रहकिट्टयवान्तरकिट्टयोऽप्येकोनविंशतिचतुर्विंशतिभागप्रमाणा जायन्ते स्म । तेन मानप्रथमसंग्रहकिट्टिगताभ्यः षोडशचतुर्विंशतिभागप्रमिताभ्यो ( $\frac{16}{24}$ ) अवान्तरकिट्टिभ्यः स्वसंख्येयभागेनाऽधिका माने मायातया सर्वथा परिणते मायाप्रथमसंग्रहकिट्टेरवान्तरकिट्टयो भवन्ति स्म ।

(४) ततो मायातृतीयसंग्रहकिट्टौ लोभप्रथमसंग्रहकिट्टितया परिणतायां लोभप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः संख्येयभागेनाऽधिका भवन्ति स्म । कथमेतद् निश्चीयते ? इति चेत् , उच्यते—मायातृतीयसंग्रहकिट्टिदले लोभप्रथमसंग्रहकिट्टितया परिणते लोभप्रथमसंग्रहकिट्टिदलस्य द्वाविंशतिचतुर्विंशतिभागप्रमाणत्वाद् ( $\frac{22}{24}$ ) लोभप्रथमसंग्रहकिट्टिप्रतिबद्धाऽवान्तरकिट्टयोऽपि द्वाविंशतिचतुर्विंशतिभागप्रमाणा ( $\frac{22}{24}$ ) जायन्ते स्म । तेन मायाप्रथमसंग्रहकिट्टिप्रतिबद्धाभ्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोनविंशतिचतुर्विंशतिभागप्रमाणाभ्यो ($\frac{१९}{२४}$) अवान्तरकिट्टिभ्यः स्वसंख्येयभागेनाऽधिका मायायां लोभतया सर्वथा परिणतायां लोभप्रथमसंग्रहकिट्टचवान्तरकिट्टयो जायन्ते स्म ।

ततोऽपि लोभद्वितीयसंग्रहकिट्टिं वेदयतः प्रथमसमयकृतसूक्ष्मकिट्टयो विशेषाधिका भवन्ति ।

ननु लोभद्वितीयसंग्रहकिट्टिवेदनाद्धाप्रथमसमये सत्तागतदलस्याऽसंख्येयभागमात्रं दलिकं गृहीत्वा सूक्ष्माः किट्टीः करोतीति प्रागुक्तम् । अथ मायातृतीयसंग्रहकिट्टौ लोभप्रथमसंग्रहकिट्टितया परिणतायां मोहनीयसकलदलस्य द्वाविंशतिचतुर्विंशतिभागकल्पेन दलेन निर्वर्तिताभ्यो लोभप्रथमसंग्रहकिट्टचवान्तरकिट्टिभ्यश्चतुर्विंशतिचतुर्विंशतिभागप्रमाणमोहनीयसकलदलस्याऽसंख्येयभागकल्पेन दलेन विशेषाधिकाः सूक्ष्मकिट्टीः कथं निर्वर्तयेत् ? यतोऽसंख्येयभागप्रमाणदलेन लोभप्रथमसंग्रहकिट्टचवान्तरकिट्टीनामसंख्येयभागप्रमिता एव सूक्ष्मकिट्टिकरणप्रथमसमये सूक्ष्मकिट्टयो निर्वर्तयितव्या इति चेत् , उच्यते--सत्यम् , यदि प्रथमसमययेकैकसूक्ष्मकिट्टयां बादरसंग्रहकिट्टिगतैकैकावान्तरकिट्टिदृश्यमानदलतुल्यं दलं प्रक्षिपेत् , तर्ह्यसंख्येयभागप्रमाणाः सूक्ष्मकिट्टीर्निर्वर्तयेत् । किन्तु सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये बादरसंग्रहकिट्टिप्रतिबद्धैकैकावान्तरकिट्टौ यावद् दलं दृश्यमानं भवति, ततोऽसंख्येयगुणहीनं दलमेकैकस्यां सूक्ष्मकिट्टौ प्रक्षिपति । कथमेतदवसीयते ? इति चेत्, उच्यते--द्विशततमगाथया सूक्ष्मकिट्टितो बादरप्रथमावान्तरकिट्टयामसंख्येयगुणं दलं दृश्यमानं वक्ष्यति । सूक्ष्मकिट्टौ च दृश्यमानस्य दलस्य दीयमानदलतोऽनतिरिक्तत्वाद् बादरावान्तरकिट्टिदृश्यमानदलतः सूक्ष्मकिट्टौ दीयमानं दलमसंख्येयगुणहीनं सिध्यति । तेन सत्तागतदलस्याऽसंख्येयभागकल्पं दलं गृहीत्वैकैकबादरावान्तरकिट्टिदृश्यमानदलतोऽसंख्येयगुणहीनं दलमेकैकसूक्ष्मकिट्टयां तथा प्रक्षिपति, यथा मायायां लोभकिट्टितया परिणतायां लोभप्रथमसंग्रहकिट्टिसकलावान्तरकिट्टितः सूक्ष्मकिट्टयो विशेषाधिकाः समुत्पद्यन्ते । अत एव मायायाः सर्वथा लोभतया परिणतौ सत्यां लोभप्रथमसंग्रहकिट्टचवान्तरकिट्टितः प्रथमसमयकृतसूक्ष्मकिट्टीनां विशेषाधिकत्वं न विरुध्यते । पश्यन्तु पाठकाः यन्त्रकम्--२५ ॥१९३--१९४॥

किट्टिकरणाद्धायां येन विधिना किट्टीर्निर्वर्तयति, तेनैव विधिना सूक्ष्मकिट्टिकरणाद्धायां सूक्ष्मकिट्टीर्निर्वर्तयति । एतदेव विस्तरतो बिभणिषुराह--

**करइ सुहुमकिट्टीउ असंखगुणूणकमेण अणुसमयं ।**
**पडिसमयमसंखगुणकमेण दलं देइ सुहुमासु ॥ १९५ ॥**

करोति सूक्ष्मकिट्टीरसंख्यगुणोनक्रमेणाऽनुसमयम् ।
प्रतिसमयमसंख्यगुणक्रमेण दलं ददाति सूक्ष्मासु ॥ १९५ ॥ इति पदसंस्कारः ।

**'करइ'** इत्यादि, तत्र 'अनुसमयं' समये समये 'असंख्यगुणोनक्रमेण' असंख्येयगुणहीनक्रमेण सूक्ष्मकिट्टीः 'करोति' निर्वर्तयति । अयं भावः--लोभद्वितीयसंग्रहकिट्टिं वेदयन् सूक्ष्मकिट्टि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोधप्रथमसंग्रहकिट्टिवेदनप्रथमसमयतः संग्रहकिट्ट्यवान्तरकिट्टीनां चित्रम्




संज्वलनक्रोधस्य नाशे सति चित्रम्




संज्वलनमाने क्षीणे चित्रम्




मायायां क्षयं गतायां चित्रम्




लोभद्वितीयसंग्रहकिट्टिप्रथमसमये सूक्ष्मकिट्टीनां चित्रम्




सङ्केतस्पष्टीकरणम्:—१–प्रथमसंग्रहकिट्टिः। २– द्वितीयसंग्रहकिट्टिः। ३– तृतीयसंग्रहकिट्टिः

(पृष्ठं परावर्तयन्तु पाठकाः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संक्षेपतश्चित्रविवरणम्:—

(१) क्रोधप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः $\frac{१३}{२४}$ प्रथमचित्रे दर्शिताः । तेन ताः स्तोकाः ।

(२) क्रोधे क्षीणे मानप्रथमसंग्रहकिट्टया अवान्तरकिट्टयः $\frac{१६}{२४}$ द्वितीयचित्रे दर्शिताः । तेन ताः क्रोधप्रथमसंग्रहकिट्टयवान्तरकिट्टितः संख्येयभागेना-ऽधिकाः । आधिक्यं च चित्रे स्पष्टतया दर्शितम् ।

(३) माने क्षीणे मायाप्रथमसंग्रहकिट्टेरवान्तरकिट्टयः $\frac{१६}{२४}$ तृतीयचित्रे प्रदर्शिताः, तेन ता मानप्रथमसंग्रहकिट्टयवान्तरकिट्टितः संख्येयभागेना-ऽधिकाः । आधिक्यञ्च चित्रे सुस्पष्टम् ।

(४) मायायां क्षीणायां लोभप्रथमसंग्रहकिट्टया अवान्तरकिट्टय $\frac{२६}{२४}$ चतुर्थचित्रे दर्शिताः तेन ता मायाप्रथमसंग्रहकिट्टयवान्तरकिट्टितः संख्येयभागेना-ऽधिकाः, आधिक्यं च चित्रे स्पष्टम् ।

(५) लोभद्वितीयसंग्रहकिट्टिवेदनप्रथमसमये कृताः सूक्ष्मकिट्टयो लोभप्रथमसंग्रहकिट्टयवान्तरकिट्टितो संख्येयभागेना-ऽधिकाः । आधिक्यं च चित्रे सुस्पष्टम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणाद्धाप्रथमसमये सूक्ष्मकिट्टीः प्रभूता निर्वर्तयति, ततो द्वितीयसमये-ऽसंख्येयगुणहीना अपूर्वाः सूक्ष्मकिट्टीर्निर्वर्तयति, ततोऽपि तृतीयसमयेऽसंख्येयगुणहीना अपूर्वाः सूक्ष्मकिट्टीर्निर्वर्तयति । एवं प्रतिसमयमसंख्येयगुणहीनक्रमेणाऽपूर्वाः सूक्ष्मकिट्टीस्तावद् निर्वर्तयति, यावत् सूक्ष्मकिट्टिकरणाद्धा-चरमसमयः । अभ्यधायि च **कषायप्राभृतचूर्णौ—"सुहुमसांपराइयकिट्टीओ जाओ पढमसमए कदाओ, ताओ बहुगाओ । विदियसमये अपुव्वाओ कीरंति असंखेज्ज-गुणहीणाओ । अणंतरोवणिधाए सव्विस्से सुहुमसांपराइयकिट्टीकरणद्धाए अपु-व्वाओ सुहुमसांपराइयकिट्टीओ असंखेज्जगुणहीणाए सेढीए कीरंति ।"** इति ।

अथ सूक्ष्मकिट्टिकरणाद्धायां वर्तमानोऽनन्तगुणवृद्धायां विशुद्धयां प्रवर्धमानः सूक्ष्मकिट्टिषु प्रतिसमयमसंख्यातगुणक्रमेण दलं प्रक्षिपतीति ज्ञापनार्थमाह–**'पडिसमय०'** इत्यादि, प्रतिसमयम-संख्यगुणक्रमेण दलं सूक्ष्मासु किट्टिषु 'ददाति' निक्षिपति । तथाहि—सूक्ष्मकिट्टिकरणाद्धाप्रथम-समये सूक्ष्मकिट्टिषु स्तोकं दलं ददाति । ततो द्वितीयसमयेऽसंख्येयगुणं दलं सूक्ष्मकिट्टिषु ददाति ततोऽपि तृतीयसमयेऽसंख्येयगुणं दलं सूक्ष्मकिट्टिषु ददाति । एवं प्रतिसमयमसंख्यगुणक्रमेण सूक्ष्मकिट्टिषु दलं तावद् ददाति, यावत् सूक्ष्मकिट्टिकरणाद्धायाश्चरमसमयः । भणितं च **कषाय-प्राभृतचूर्णौ—"सुहुमसांपराइयकिट्टीसु पढमसमये पदेसग्गं दिज्जदि, तं थोवं, विदियसमये असंखेज्जगुणं । एवं जाव चरिमादो त्ति असंखेज्जगुणं ।"** इति ॥१९५॥

सूक्ष्मकिट्टिषु सामान्यतो दलनिक्षेपं विधाय सामान्यज्ञानस्य विशेषजिज्ञासायां हेतुत्वात् प्रथमसमये क्रियमाणासु सूक्ष्मकिट्टिषु विशेषतो दलनिक्षेपविधिं प्रसङ्गतश्च बादरकिट्टिषु दलनिक्षेप-विधिं विभणिषुराह—

**पढमसुहुमाअ देइ दलं बहु उप्पिं विसेसहीणकमेणं**
**बादरपढमाअ असंखगुणूणं उवरिमासु य विसेसूणं ॥१९६॥**

**(आर्यागीतिः)**

प्रथमसूक्ष्मायां ददाति दलं बहूपरि विशेषहीनक्रमेण ।
बादरप्रथमायामसंख्यगुणोनमुपरितनीषु च विशेषोनम् ॥१९६॥ इति पदसंस्कारः ।

**'पढम०'** इत्यादि, सत्तागतदलस्याऽसंख्येयभागप्रमितं दलिकं गृहीत्वा सूक्ष्मकिट्टिकरणा-द्धाप्रथमसमये 'प्रथमसूक्ष्मायां' प्रथमसमयेन याः सूक्ष्मकिट्टयो क्रियन्ते, तासां या सर्वजघन्या किट्टिः, सा प्रथमसूक्ष्मकिट्टिरुच्यते, तस्याम्, 'दलं' प्रदेशाग्रं 'बहु' प्रभूतं ददाति । 'उप्पिं' इत्यादि, 'उपरि' प्रथमसूक्ष्मकिट्टया उपरि विशेषहीनक्रमेण दलं ददाति । भावार्थः पुनर-यम्—सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये जघन्यायां सूक्ष्मकिट्टौ प्रभूतं प्रदेशाग्रं ददाति । ततोऽनन्तभागेन हीनं द्वितीयस्यां सूक्ष्मकिट्टौ ददाति । ततोऽप्यनन्तभागेन हीनं तृतीयस्यां सूक्ष्मकिट्टौ ददाति ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एवं विशेषहीनक्रमेण तावद् ददाति, यावच्चरमसूक्ष्मकिट्टिः । यदवादि **कषायप्राभृतचूर्णौ–"सुहुमसांपराइयकिट्टीसु पढमसमये दिज्जमाणगस्स पदेसग्गस्स सेढिपरूवणं वत्तइस्सामो । तं जहा-जहण्णियाए किट्टीए पदेसग्गं बहुअं । बिदियाए विसेसहीणमणंतभागेण । तदियाए विसेसहीणं । एवमणंतरोवणिधाए गंतूण चरिमाए सुहुमसांपराइयकिट्टीए पदेसग्गं विसेसहीणं ।"** इति ।

पूर्वार्धस्थं **'देइ दलं'** ति पदद्वयमुत्तरार्धेऽप्यनुवर्तते । लोभद्वितीयसंग्रहकिट्टेर्लोभतृतीयसंग्रहकिट्टेश्चावान्तरकिट्टयो बादरकिट्टय उच्यन्ते । तत्र **'बादरपढमाअ'** त्ति 'बादरप्रथमायां' चरमसूक्ष्मकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टयामित्यर्थः, 'असंखगुणोनम्' असंख्येयगुणहीनं दलं ददाति । तत उपरितनीषु च बादरकिट्टिषु 'विशेषोनं' विशेषहीनं यथाक्रमं निक्षिपति । यदवाचि **कषायप्राभृतचूर्णौ—"चरिमादो सुहुमसांपराइयकिट्टीदो जहण्णियाए बादरसांपराइयकिट्टीए दिज्जमाणगं पदेसग्गमसंखेज्जगुणहीणं । तदो विसेसहीणं ।"** इति । इदमत्र हृदयम्–सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये चरमसूक्ष्मकिट्टितोऽसंख्येयगुणहीनं दलं लोभतृतीयसंग्रहकिट्टेः प्रथमपूर्वावान्तरकिट्टौ प्रक्षिपति, ततोऽनन्तभागेन हीनं द्वितीयपूर्वावान्तरकिट्टौ प्रक्षिपति । ततोऽपि विशेषहीनं तृतीयपूर्वावान्तरकिट्टौ प्रक्षिपति, एवं विशेषहीनक्रमेण तावत् प्रक्षिपति, यावल्लोभतृतीयसंग्रहकिट्टयपूर्वावान्तरकिट्टिरप्राप्ता भवति, ततोऽपूर्वावान्तरकिट्टावसंख्येयगुणं दलं प्रक्षिपति । ननु प्रस्तुतग्रन्थे **कषायप्राभृतचूर्णौ** च बादराऽपूर्वावान्तरकिट्टीनां निर्वृत्तिस्तासु च दलनिक्षेपो नोक्तः, तत्र तु बादरकिट्टिषु विशेषहीनक्रमेण दलनिक्षेपः प्रतिपादितः, न त्वन्तरे निर्वर्त्यमानायामपूर्वाऽवान्तरकिट्टयामसंख्येयगुणः, अतो-ऽनुक्तो दलनिक्षेपः प्रामाणिको भवितुं नार्हति ? इति चेत्, मैवम्, यतः किट्टिवेदनाद्धाप्रथमसमये **प्रकृतग्रन्थे कषायप्राभृतचूर्णौ** च वेद्यमानसंग्रहकिट्टित इतरसंग्रहकिट्टावपूर्वावान्तरकिट्टीनां निर्वृत्तिस्तासु च दलनिक्षेपोऽभिहितः । ततः किट्टिवेदनाद्धाशेषसमयेष्वनुक्तोऽप्युक्तो ज्ञातव्यः, अप्रतिषेधात् । उक्तार्थस्य च पुनः कथने ग्रन्थगौरवं परित्यज्य फलविशेषान्तराऽसंभवः । न च किट्टिवेदनाद्धाप्रथमसमयप्रवर्तमानप्ररूपणायाः शेषसमयेष्वप्रतिषेधेऽपि किट्टिवेदनाद्धायां सूक्ष्मकिट्टिकरणाद्धाप्रथमसमयतः प्रभृत्यपूर्वावान्तरकिट्टयो न निर्वर्त्यन्ते, दलनिक्षेपस्य बादरकिट्टिषु विशेषहीनक्रमेण विहितत्वादिति वाच्यम्, दलनिक्षेपस्य सामान्यतो विशेषहीनक्रमेण-विहितत्वेन तथाऽनिष्टत्वात् । कथमेतदवसीयते ? इति चेत्, उच्यते--तृतीयसंग्रहकिट्टौ संक्रम्यमाणदलतः सूक्ष्मकिट्टिषु संख्यातगुणं दलं संक्रम्यते, तच्च दर्शितं द्विनवत्यधिकशततमगाथया । तेन सूक्ष्मकिट्टयां संक्रम्यमाणदलतस्तृतीयसंग्रहकिट्टौ संक्रम्यमाणदलं संख्यातगुणहीनं जायते, तथा लोभतृतीयसंग्रहकिट्टयवान्तरकिट्टयोऽपि सूक्ष्मकिट्टितः संख्यातगुणहीना भवन्ति, लोभतृतीयसंग्रह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किट्ट्यवान्तरकिट्टीनां मोहनीयसकलावान्तरकिट्ट्येकचतुर्विंशतिभागप्रमाणत्वात् सूक्ष्मकिट्टीनां पुनर्मोहनीयसकलावान्तरकिट्टिद्वाविंशतिचतुर्विंशतिभागकल्पाभ्यो लोभप्रथमसंग्रहकिट्ट्यवान्तरकिट्टिभ्योऽपि विशेषाधिकत्वात् । तेन यदि चरमसूक्ष्मकिट्टितोऽसंख्येयगुणहीनं दलं लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ प्रक्षिप्य विशेषहीनक्रमेण सूक्ष्मकिट्टीनां संख्येयभागप्रमाणासु लोभतृतीयसंग्रहकिट्टिगताऽवान्तरकिट्टिषु दलं प्रक्षिपेत्, तर्हि तृतीयसंग्रहकिट्टौ निक्षिप्यमाणं दलं सूक्ष्मकिट्टिषु निक्षिप्यमाणदलतोऽसंख्यातगुणहीनं स्यात् । ततश्च **द्विनवत्यधिकशततमगाथया** सूक्ष्मकिट्टिषु संक्रम्यमाणदलतः संख्यातगुणहीनं दलं तृतीयसंग्रहकिट्टौ संक्रमयतीति यदुक्तम्, तद् न सङ्गच्छेत । संक्रम्यमाणदलस्याऽल्पबहुत्वं तु संगमयितुमपूर्वाऽवान्तरकिट्ट्यो निर्वर्तयितव्याः, तासां निर्वृत्तिस्त्ववान्तरकिट्ट्यन्तरेषु संभवति । कुतः ? इति चेत्, उच्यते-चरमसूक्ष्मकिट्टितः प्रथमबादरकिट्टावसंख्येयगुणहीनं दलं ददातीति विहितम्, यदि लोभतृतीयसंग्रहकिट्ट्यन्तरे लोभतृतीयसंग्रहकिट्ट्यपूर्वावान्तरकिट्टीः कुर्यात्, तर्हि लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिभिः सहाऽभिनवानां क्रियमाणानां लोभतृतीयसंग्रहकिट्ट्यवान्तरकिट्टीनां दलमेकगोपुच्छाकारेण कर्तुं चरमसूक्ष्मकिट्टितोऽसंख्येयगुणं दलं निक्षिपेत् । न चाऽनेन विधानेन दलनिक्षेपोऽभिहितः । तेनेदानीं लोभतृतीयसंग्रहकिट्ट्यन्तरे लोभतृतीयसंग्रहकिट्ट्यपूर्वावान्तरकिट्ट्यो न निर्वर्त्यन्ते । किन्तु लोभतृतीयसंग्रहकिट्टेरवान्तरकिट्ट्यन्तरेषु निर्वर्त्यन्ते, ताश्च न निरन्तराः, किन्तु पूर्ववत् पल्योपमाप्रथमवर्गमूलाऽसंख्येयभागप्रमाणासु पूर्वावान्तरकिट्टिषु व्रजितास्वेकैकाऽपूर्वावान्तरकिट्टिर्निर्वर्त्यते ।

अथ प्रस्तुतमनुसरामः-ततोऽपूर्वाऽवान्तरकिट्टितः पूर्वाऽवान्तरकिट्टावसंख्यातगुणहीनं दलं ददाति । ततः परं विशेषहीनक्रमेण तावद् ददाति, यावदपूर्वाऽवान्तरकिट्टिरप्राप्ता भवति । ततोऽपूर्वावान्तरकिट्टावसंख्येयगुणं दलं ददाति । ततः पूर्वाऽवान्तरकिट्टावसंख्येयगुणहीनं दलं ददाति । तत ऊर्ध्वं विशेषहीनक्रमेण ददाति । एवंक्रमेण पूर्वाऽवान्तरकिट्टिषु तावद् ददाति, यावल्लोभतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः ।

ततो लोभतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टौ दीयमानदलतो विशेषहीनं दलं लोभद्वितीयसंग्रहकिट्टेः प्रथमावान्तरकिट्टौ ददाति, ततोऽपि विशेषहीनं द्वितीयस्यामवान्तरकिट्टौ ददाति, ततोऽपि विशेषहीनं तृतीयस्याम् । एवंक्रमेण तावद् ददाति, यावल्लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टिः । नवरं यत्र यत्र बन्धापूर्वावान्तरकिट्टिर्निर्वर्त्यते, तत्र तत्र प्राक्तनावान्तरकिट्टौ दत्तबन्धदलतोऽनन्तगुणं बन्धदलं ददाति बन्धापूर्वावान्तरकिट्ट्यां च दत्तबन्धदलतो बन्धपूर्वावान्तरकिट्टौ बन्धदलमनन्तगुणहीनं ददाति ।

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

# अथ गणितविभागः।

लोभप्रथमसंग्रहकिट्टिवेदनाद्धा चरमसमये लोभद्वितीयसंग्रहकिट्टयवान्तरकिट्टयो लोभतृतीयसंग्रहकिट्टयवान्तरकिट्टयश्चैकगोपुच्छाकारेण तिष्ठन्ति स्म। लोभद्वितीयसंग्रहकिट्टिवेदनाद्धाप्रथमसमये लोभस्य तृतीयसंग्रहकिट्टितः सूक्ष्मकिट्टिषु, द्वितीयसंग्रहकिट्टितस्तु तृतीयसंग्रहकिट्टौ सूक्ष्मकिट्टिषु च प्रदेशाग्रं संक्रमयति। तेन स्वस्थानगोपुच्छाकारो विनश्यति। तथाऽनुसमया-ऽपवर्तनाघातेन लोभद्वितीयसंग्रहकिट्टेस्तृतीयसंग्रहकिट्टेश्चोपरितनीरसंख्येयभागमात्रीरवान्तरकिट्टीर्विनाशयति। तेन परस्थानगोपुच्छाकारो विनश्यति। इदमुक्तं भवति—लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ दलमेकचयेन हीनमासीत्। साम्प्रतं लोभतृतीयसंग्रहकिट्टेरुपरितनीरसंख्येयभागप्रमाणा अवान्तरकिट्टीर्विनाशयति। तेनाऽसंख्येयभागमात्रीष्ववान्तरकिट्टिषु घातितासु लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमा-ऽवान्तरकिट्टावेकाधिक-घाताऽवान्तरकिट्टिराशिप्रमाणचयैर्हीनं दलं जायते।

अथ घातदलतो लोभतृतीयसंग्रहकिट्टयवान्तरकिट्टिषु लोभद्वितीयसंग्रहकिट्टयवान्तरकिट्टिषु च यथायोग्यं दलं दत्त्वा स्वस्थानगोपुच्छाकारो रचयितव्यः।

**परस्थानगोपुच्छाकाररचनम्—**

लोभद्वितीयसंग्रहकिट्टेर्घाताऽवान्तरकिट्टीनां घातदलं गृहीत्वा लोभद्वितीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ तृतीयसंग्रहकिट्टिघाताऽवान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति, ततः परं लोभद्वितीयसंग्रहकिट्टिद्वितीया-ऽऽद्यवान्तरकिट्टिषु तावतश्चयांस्तावत् प्रक्षिपति, यावल्लोभद्वितीयसंग्रहकिट्टिघातिताऽवशेषचरमाऽवान्तरकिट्टिः। इत्थं घातदलतो दलिके प्रक्षिप्ते लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टितः प्रभृति लोभद्वितीयसंग्रहकिट्टेर्घातितावशेषचरमाऽवान्तरकिट्टिं यावत् प्रदेशाग्रं गोपुच्छाकारेण दृश्यते। इदं च सुखावबोधार्थमसत्कल्पनया दर्श्यते। कल्प्यन्तां लोभस्य द्वितीयसंग्रहकिट्टौ विंशतिरवान्तरकिट्टयस्तृतीयसंग्रहकिट्टौ च दशाऽवान्तरकिट्टयस्तथा लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टयामेककोटी ( १,००,००,००० ) प्रदेशाः, चयस्त्वेकलक्षप्रदेशमात्रः।

**स्थापना**

| | | | | |
|---|---|---|---|---|
| लोभतृतीयसंग्रहकिट्टयवान्तरकिट्टिः | प्रथमा | द्वितीया | तृतीया | चरमा (दशमी) |
| प्रदेशाः | १०००००००० | ९९००००० | ९८००००० | ९१००००० । |
| लोभद्वितीयसंग्रहकिट्टयवान्तरकिट्टिः | प्रथमा | द्वितीया | तृतीया | चरमा (२० तमी) |
| प्रदेशाः | ९०००००० | ८९००००० | ८८००००० | ७१००००० । |

अथ लोभतृतीयसंग्रहकिट्टेश्चतस्रो (४) लोभद्वितीयसंग्रहकिट्टेश्चाऽष्टाववान्तरकिट्टयो घात्यन्त इति कल्प्यताम्। ततश्चतसृष्ववान्तरकिट्टिषु घातितासु लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ पञ्च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## यन्त्रकम्–२६ (चित्रम्–२६)

### सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये बादरकिट्टीनां परस्थानगोपुच्छाकाररचना

बादरकिट्टीनां स्थापना






**संक्षेपतो विवेचनम्—**

इह परमार्थतो लोभतृतीयसंग्रहकिट्टौ लोभद्वितीयसंग्रहकिट्टौ चा-ऽनन्ता अवान्तरकिट्टयो भवन्ति, किन्त्वसत्कल्पनया तृतीयसंग्रहकिट्टौ दश (१०), द्वितीयसंग्रहकिट्टौ च विंशतिः (२०) दर्शिताः। अथ तृतीयसंग्रहकिट्टयाश्चतस्रः (४) द्वितीयसंग्रहकिट्टयाश्चाष्टाऽवान्तरकिट्टयोऽनुसमया-ऽपवर्तनया घात्यन्ते । ताश्च परमार्थतस्तत्तत्संग्रहकिट्टया असंख्येयभागप्रमाणाः । लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ १,००,००,००० प्रदेशाः । ततो यथोत्तरं १,००,००० प्रदेशात्मकचयेन हीना हीनतराः। तेन तृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ ९१,००,०००, द्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ च ९०,००,००० प्रदेशाः, एकचयेन हीना इत्यर्थः, चित्रे हानिदर्शनार्थं लोभतृतीयसंग्रहकिट्टौ द्वादश (१२) बिन्दवो लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टयाञ्चैकादश (११) बिन्दवो दर्शिताः ।

### असंख्येयभागप्रमाणानां बादरकिट्टीनां घाते जाते बादरकिट्टीनां स्थापना




असंख्येयभागप्रमाणानां बादरकिट्टीनां घाते जाते-ऽसत्कल्पनया लोभतृतीयसंग्रहकिट्टयाश्चतसृणामवान्तरकिट्टीनां घाते जाते तृतीयसंग्रहकिट्टिचरमावान्तरकिट्टित एकाधिकलोभतृतीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणैः पञ्चभिश्चयैर्हीनाः प्रदेशा द्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ, यतो या षष्ठी अवान्तरकिट्टिरासीत्, सैवा-ऽधुना लोभतृतीयसंग्रहकिट्टयाश्चरमावान्तरकिट्टिः, तस्यां च ९५००००० प्रदेशाः, तेन ५००००० प्रदेशैर्हीना द्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ ९०००००० प्रदेशा भवन्ति। तद्द्योतनाय चित्रे लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ १३ बिन्दवः, लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टयाञ्च ११ बिन्दवो दर्शिताः, एवं च बिन्दुद्वयहानिर्दर्शिता, उपरितने चित्रे त्वेकबिन्दुहानिर्दर्शिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्थानगोपुच्छाकाररचना




च=लोभतृतीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणांश्चयान् लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ प्रक्षिपति । एकैकचयस्य च १००००० प्रदेशात्मकत्वकल्पनात् ४००००० प्रदेशान् प्रक्षिपति । तेन लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टयां ९४००००० प्रदेशा भवन्ति । तदेवं लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टिप्रदेशतः (९५०००००) लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टयामेकचयेन (१००००० हीनाः प्रदेशा भवन्ति । तद्द्योतनाय प्रस्तुतचित्रे लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टौ १३ बिन्दवः, लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ च १२ बिन्दवो दर्शिताः । ततः परं सर्वत्र तावतः (४०००००) प्रदेशान् निक्षिपति। प्रक्षिप्तेषु च तेषु प्रदेशेषु सर्वाऽवान्तरकिट्टय एकगोपुच्छाकारेण प्रदेशापेक्षया भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवतिलक्षाणि (९५०००००) प्रदेशा भवन्ति, षष्ठाऽवान्तरकिट्टित्वात् तस्याः । लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ तु प्रदेशाः पूर्ववद् नवतिलक्षाणि (९००००००) विद्यन्ते । तदेवं लोभतृतीयसंग्रहकिट्टिचरमावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ पञ्चलक्षैर्हीनाः प्रदेशा भवन्ति, एकचयस्य चैकलक्षप्रदेशमात्रत्वात् पञ्चभिश्चयैर्हीना भवन्ति । लोभद्वितीयसंग्रहकिट्टेश्चाऽष्टास्ववान्तरकिट्टिषु घातितासु चरमाऽवान्तरकिट्टौ प्रदेशा नवसप्ततिलक्षाणि (७९०००००)भवन्ति ।

## अवान्तरकिट्टीनां घाते जाते स्थापना

| | | | | |
|---|---|---|---|---|
| लोभतृतीयसंग्रहकिट्ट्यवान्तरकिट्टि : | प्रथमा | द्वितीया | तृतीया | चरमा (षष्ठी) |
| प्रदेशा : | १०००००००० | ९९००००० | ९८००००० | ९५००००० |
| लोभद्वितीयसंग्रहकिट्ट्यवान्तरकिट्टि: | प्रथमा | द्वितीया | तृतीया | चरमा (द्वादशी) |
| प्रदेशा : | ९०००००० | ८९००००० | ८८००००० | ७९००००० |

तेन द्वितीयसंग्रहकिट्टिघातदलतो दलमादाय लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टितः प्रभृति घातितावशेषचरमावान्तरकिट्टिं यावत् सर्वास्ववान्तरकिट्टिषु लोभतृतीयसंग्रहकिट्टिघातावान्तरकिट्टिराशिप्रमाणाश्चत्वारश्चयाः प्रक्षेप्तव्याः,एकचयस्य चैकलक्षप्रदेशप्रमितत्वाच्चतुर्लक्षाणि प्रदेशाः प्रक्षेप्तव्याः । एवं प्रक्षिप्तेषु प्रदेशेषु परस्थानगोपुच्छरचना जायते । पश्यन्तु पाठका यन्त्रकम्-२६ ।

## स्थापना

| | | | | |
|---|---|---|---|---|
| लोभतृतीयसंग्रहकिट्ट्यवान्तरकिट्टि : | प्रथमा | द्वितीया | तृतीया | चरमा (षष्ठी) |
| प्रदेशा : | १०००००००० | ९९००००० | ९८००००० | ९५००००० |
| लोभद्वितीयसंग्रहकिट्ट्यवान्तरकिट्टि: | प्रथमा | द्वितीया | तृतीया | चरमा (द्वादशी) |
| प्रदेशा : | ९४००००० | ९३००००० | ९२००००० | ८३००००० |

इह लोभतृतीयसंग्रहकिट्टौ संक्रमतोऽपूर्वावान्तरकिट्टीर्निर्वर्तयन् संक्रमदलतः पूर्वावान्तरकिट्टिष्वपि मध्यमखण्डादिरूपेण दलं प्रक्षिपति । वेद्यमानसंग्रहकिट्टौ तु स्वपूर्वावान्तरकिट्टिषु वक्ष्यमाणाऽधस्तनशीर्षचयमध्यमखण्डोभयचयदलं यद् दास्यति, तद्घातदलत एव दास्यति । तच्च पृथक्स्थापयितव्यम् । अथ स्वस्थानगोपुच्छरचनाय प्रक्षिप्तदलं तथा परस्थानगोपुच्छरचनाय दत्तदलं पृथक्स्थापितं च लोभद्वितीयसंग्रहकिट्टिवक्ष्यमाणाऽधस्तनशीर्षचयमध्यमखण्डोभयचयदलमित्येतद्दलसमूहः सर्वघातदलतो विशोध्य शेषसर्वघातदलं लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टितः प्रभृति लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टिं यावत् सर्वासु घातरहितास्ववान्तरकिट्टिषु विशेषहीनक्रमेण प्रक्षिपति । गणितरीत्या च निक्षेपः किट्टिवेदनाद्धाप्रथमसमयवद् दर्शयितव्यः ।

अथ तृतीयसंग्रहकिट्टौ सूक्ष्मकिट्टिषु च संक्रमेणाऽऽगतदलस्य लोभद्वितीयसंग्रहकिट्टेश्च बध्यमानत्वेन तत्र बन्धत आगतस्य दलस्य तथा पृथक्स्थापितघातदलस्याऽधस्तनशीर्षचयदलादिभिः प्ररूपणा क्रियते—

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

तत्रादौ तावत् सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये बादरकिट्टितः सूक्ष्मकिट्टितया परिणमनाय गृहीतदलं विभागद्वये विभजनीयम्–( १ ) सूक्ष्मकिट्टिचयदलं ( २ ) सूक्ष्मकिट्टिसमानखण्डदलं चेति।

**अथ सूक्ष्मकिट्टिचयदलम्**—सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये सूक्ष्मकिट्टितया परिणमनाय गृहीतसकलदलं पदेन विभक्तव्यम्। विभक्ते च मध्यमदलं प्राप्यते। तदप्यर्धीकृतैकोनपदार्धन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां विभज्यते, तदैकसूक्ष्मकिट्टिचयदलं प्राप्यते। तच्च वक्ष्यमाणसूक्ष्मकिट्टिसमानखण्डस्याऽनन्ततमभागमात्रं भवति। पदं त्वत्र सूक्ष्मकिट्टिराशिर्बोध्यम्।

चरमसूक्ष्मकिट्टयामेकं सूक्ष्मकिट्टिचयं ददाति, द्विचरमसूक्ष्मकिट्टौ द्वौ सूक्ष्मकिट्टिचयौ ददाति। एवं पश्चानुपूर्व्यैकोत्तरवृद्ध्या तावद् ददाति, यावत् प्रथमसूक्ष्मकिट्टिः। ते च सूक्ष्मकिट्टिचयाः "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल संकलिताख्या**" इति करणसूत्रेण सङ्कलयितव्याः। सङ्कलितैः सर्वैः सूक्ष्मकिट्टिचयैरेकसूक्ष्मकिट्टिचयगतदलं गुण्यते, तदा सर्वसूक्ष्मकिट्टिचयदलं प्राप्यते।

**सूक्ष्मकिट्टिसमानखण्डदलम्**–सूक्ष्मकिट्टितया परिणमनाय गृहीतसकलदलतः सूक्ष्मकिट्टिचयदलं विशोध्य शेषदलं सूक्ष्मकिट्टिसमानखण्डदलमुच्यते। तच्च सूक्ष्मकिट्टिराशिना विभज्यते, तदैकं सूक्ष्मकिट्टिसमानखण्डं प्राप्यते। तच्च वक्ष्यमाणबादरकिट्टिसंक्रममध्यमखण्डतोऽसंख्येयगुणं भवति। एकैकस्यां च सूक्ष्मकिट्टावविशेषेणैकैकं सूक्ष्मकिट्टिसमानखण्डं दातव्यम्।

**अथ बादरावान्तरकिट्टीनामधस्तनशीर्षचयादिदलं निरूप्यते—**

**(१) अधस्तनशीर्षचयदलम्**–लोभस्य तृतीयसंग्रहकिट्टेः प्रथमपूर्वावान्तरकिट्टौ प्रभूतं दलं विद्यते, तत एकचयेन हीनं द्वितीयपूर्वावान्तरकिट्टौ विद्यते। एवंक्रमेण तावद् विद्यते, यावल्लोभतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः।

सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये सर्वपूर्वावान्तरकिट्टयस्तेन क्रमेण पूरयितव्याः, येन सर्वपूर्वावान्तरकिट्टयः प्रदेशानाश्रित्य लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितुल्या भवेयुः। अतो लोभतृतीयसंग्रहकिट्टेर्द्वितीयपूर्वावान्तरकिट्टावेकचयं ददाति। तृतीयपूर्वावान्तरकिट्टौ द्वौ चयौ ददाति। एवमेकोत्तरवृद्ध्या तावद् ददाति, यावल्लोभतृतीयसंग्रहकिट्टिचरमपूर्वाऽवान्तरकिट्टिः। निक्षिप्यमाणाश्चैते चया अधस्तनशीर्षचया उच्यन्ते। ते च "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या।**" इति गणितकरणसूत्रेण सङ्कलयितव्याः। पदं त्वत्रैकोनलोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिर्बोध्यम्। सङ्कलिताऽधस्तनशीर्षचयैरेकाधस्तनशीर्षचयदलं गुण्यते, तदा तृतीयसंग्रहकिट्टिसर्वाऽधस्तनशीर्षचयदलं प्राप्यते। तच्च लोभतृतीयसंग्रहकिट्टौ संक्रम्यमाणदलतो दातुं पृथक्स्थापयितव्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यासः—

$$\text{तृतीयसंग्रहकिट्टेः सर्वेऽधस्तनशीर्षचयाः} = (\text{पदम्} + १) \times \frac{\text{पदम्}}{२}$$

$$\text{तृतीयसंग्रहकिट्टिसर्वाधस्तनशीर्षचयदलम्} = \text{सर्वाधस्तनशीर्षचयाः} \times \text{एकाधस्तनशीर्षचयदलम्}$$

ततो लोभद्वितीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ लोभतृतीयसंग्रहकिट्टिपूर्वाऽवान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति । ततो लोभद्वितीयसंग्रहकिट्टिद्वितीयावान्तरकिट्टयामेकाधिकान् लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति, एवमेकोत्तरवृद्ध्या तावत्प्रक्षिपति, यावल्लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्टिः । अनेन क्रमेण लोभद्वितीयसंग्रहकिट्टौ दीयमानाश्चयाः **"व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनं मुखयुग्दलितं तत् । मध्यधनं पदसंगुणितं तत् सर्वधनं गणितं च तदुक्तम् ।"** इति गणितकरणसूत्रेण सङ्कलयितव्याः । अत्र मुखम्= आदिधनम् , तच्च लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिप्रमाणाश्चयाः । चयश्चैको ज्ञातव्यः, एकोत्तरवृद्धिदर्शनात् । पदं तु लोभद्वितीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिर्बोध्यम् ।

न्यासः—

$$\text{अन्त्यधनम्} = (\text{पदम्} - १) \times \text{चयः} + \text{आदिधनम्}$$

$$\text{मध्यधनम्} = \frac{\text{अन्त्यधनम्} + \text{आदिधनम्}}{२}$$

$$\therefore \text{लोभद्वितीयसंग्रहकिट्टेः सर्वेऽधस्तनशीर्षचयाः} = \text{मध्यधनम्} \times \text{पदम्}$$

द्वितीयसंग्रहकिट्टिसर्वाऽधस्तनशीर्षचयैरेकाऽधस्तनशीर्षचयदलं गुण्यते, तदा लोभद्वितीयसंग्रहकिट्टिसकलाऽधस्तनशीर्षचयदलं प्राप्यते । तच्च घातदलतो दातुं पृथक्स्थापयितव्यम् ।

**(२) अपूर्वावान्तरकिट्टिदलम्**—लोभतृतीयसंग्रहकिट्टेरवान्तरकिट्टयन्तरेषु या अपूर्वावान्तरकिट्टयो निर्वर्त्यन्ते, तासामेकैकस्यामपूर्वावान्तरकिट्टौ लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिगतप्रदेशतुल्यं दलिकं प्रक्षेप्तव्यम् , तच्चैकाऽपूर्वावान्तरकिट्टिदलमुच्यते । तत्पुनर्लोभतृतीयसंग्रहकिट्टेरपूर्वावान्तरकिट्टिराशिना गुण्यते, तदा लोभतृतीयसंग्रहकिट्टिसर्वाऽपूर्वावान्तरकिट्टिदलं प्राप्यते । तच्च तृतीयसंग्रहकिट्टेः संक्रमेण प्राप्यमाणदलतो दातुं पृथक्स्थापयितव्यम् । अपूर्वाऽवान्तरकिट्टीनाञ्च राशिर्लोभतृतीयसंग्रहकिट्टिपूर्वाऽवान्तरकिट्टीनामसंख्येयभागप्रमाणो ज्ञातव्यः, पल्योपमप्रथमवर्गमूलासंख्येयभागमात्रीषु पूर्वावान्तरकिट्टिषु व्रजितास्वेकैकस्या अपूर्वावान्तरकिट्टेर्निर्वृत्तेः ।

**(३) उभयचयदलम्**—पूर्वोक्तदलद्वये यथायोग्यं प्रक्षिप्ते सर्वपूर्वाऽपूर्वावान्तरकिट्टयः समानदलिका जायन्ते । तासां दलिकं गोपुच्छाकारं कर्तुं लोभद्वितीयसंग्रहकिट्टेश्चरमावान्तरकिट्टावेकं चयं प्रक्षिपति । द्विचरमावान्तरकिट्टौ द्वौ चयौ प्रक्षिपति । एवंक्रमेण पश्चानुपूर्व्या लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ पूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्चयान् प्रक्षिपति । प्रक्षिप्यमाणचयाश्चोभयचया उच्यन्ते । सूक्ष्मकिट्टितया परिणम्यमानं मोहनीयदलिकं वर्जयित्वा शेषं मोहनीयसत्तागत-

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

दलं पदेन विभज्यते, तदा मध्यमदलं प्राप्यते। तत्पुनरर्धीकृतैकोनपदन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां विभज्यते, तदैकखण्डं यल्लभ्यते, तदेकोभयचयदलं भण्यते। पदं त्वत्र बादरपूर्वाऽपूर्वावान्तरकिट्टिराशिर्ज्ञातव्यम्।

इह लोभद्वितीयसंग्रहकिट्टिसर्वावान्तरकिट्टिषु निक्षिप्यमाणा उभयचयाः **"सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या"** इति करणसूत्रेण संकलयितव्याः। पदं त्वत्र लोभद्वितीयसंग्रहकिट्ट्यवान्तरकिट्टिराशिर्बोध्यम्।

संकलितैरुभयचयैरेकोभयचयदलं गुण्यते, तदा लोभद्वितीयसंग्रहकिट्टिसर्वोभयचयदलं प्राप्यते। उभयचयदलं च लोभद्वितीयसंग्रहकिट्टेः पूर्वावान्तरकिट्टिषु घातदलतो बन्धापूर्वावान्तरकिट्टिषु तु बन्धदलतो दीयते। तत्र बन्धदलतो बन्धापूर्वावान्तरकिट्टिषु किञ्चिन्न्यूनोभयचयदलं यद् दीयते, तद् बन्धापूर्वावान्तरकिट्टिचयदलमिति परिभाष्यते। तच्च वक्ष्यमाणप्रकारेण सङ्कलय्य सर्वोभयचयदलतो विशोधयितव्यम्। विशोधिते च तस्मिन् शेषतः पुनरनन्ततमभागमात्रं दलं विशोधनीयम्, तावद्दलस्य बन्धपूर्वापूर्वावान्तरकिट्टिषु बन्धचयबन्धमध्यमखण्डस्वरूपेण बन्धदलतो दास्यमानत्वात्। शुद्धशेषमुभयचयदलं घातदलतो दातव्यम्।

ततो लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टावेकाधिकलोभद्वितीयसंग्रहकिट्टिसकलावान्तरकिट्टिराशिप्रमाणानुभयचयान् प्रक्षिपति। ततः पश्चानुपूर्व्यैकोत्तरवृद्ध्योभयचयान् प्रक्षिपति। ते च **"व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनं मुखयुग् दलितं तत्। मध्यधनं पदसंगुणितं तत् सर्वधनं गणितं च तदुक्तम्।"** इति करणसूत्रेण सङ्कलयितव्याः। मुखमादिधनम्, तच्चात्रैकाधिकलोभद्वितीयसंग्रहकिट्टिसकलाऽवान्तरकिट्टिराशिप्रमाणाश्चयाः। चयस्त्वेकः, एकोत्तरवृद्धेः। पदं तु लोभतृतीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिर्बोध्यम्।

न्यासः—लोभतृतीयसंग्रहकिट्टौ निक्षिप्यमाणाः सर्वे उभयचयाः—

$$\text{अन्त्यधनम्} = (\text{पदम्} - १) + \text{चयः} + \text{मुखम्}$$

$$\text{मध्यधनम्} = \frac{\text{अन्त्यधनम्} + \text{आदिधनम्}}{२}$$

$\therefore$ लोभतृतीयसंग्रहकिट्टौ निक्षिप्यमाणाः सर्वे उभयचयाः = मध्यधनम् × पदम्।

तृतीयसंग्रहकिट्टिसर्वोभयचयैरेकोभयचयदलं गुण्यते, तदा लोभतृतीयसंग्रहकिट्टिसर्वोभयचयदलं प्राप्यते। तच्च संक्रमदलतः पृथक्स्थापयितव्यम्।

(४) **मध्यमखण्डम्**—लोभतृतीयसंग्रहकिट्टौ निक्षिप्यमाणमधस्तनशीर्षचयदलमपूर्वाऽवान्तरकिट्टिचयदलमुभयचयदलञ्चेति दलत्रयं लोभतृतीयसंग्रहकिट्टौ प्राप्यमाणसंक्रमदलतो विशोध्य तृतीयसंग्रहकिट्टेः शेषसंक्रमदलं लोभतृतीयसंग्रहकिट्टिपूर्वापूर्वावान्तरकिट्टिराशिना विभज्यते, तदैकमध्य-

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

मखण्डं प्राप्यते। तच्च लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिगतदलस्यासंख्येयभागमात्रं भवति। मतान्तरेण त्वनन्तभागमात्रं संभवति। इह प्रकरणे प्रथममतमाश्रित्य सर्वं प्ररूपयिष्यते द्वितीयमतं तु प्रतीत्य स्वयमेव भावनीयम्, किट्टिवेदनाद्धाप्रथमसमय उभयमतेन दर्शितत्वात्।

निरुक्तैकमध्यमखण्डदलं लोभद्वितीयसंग्रहकिट्टिपूर्वावान्तरकिट्टिराशिना गुण्यते, तदा लोभद्वितीयसंग्रहकिट्टेः सर्वमध्यमखण्डदलं प्राप्यते। तच्च घातदलतो दातव्यम्। एकैकमध्यमखण्डं लोभद्वितीयसंग्रहकिट्टिसर्वपूर्वाऽवान्तरकिट्टिष्वविशेषेण दातव्यम्।

लोभद्वितीयसंग्रहकिट्टावधस्तनशीर्षचयदलमुभयचयदलं मध्यखण्डदलं चेति दलत्रिके यथायोग्यं प्रक्षिप्ते स्वस्थानपरस्थानगोपुच्छरचनाऽवसरे पृथक्स्थापितं घातदलं परिसमाप्तं भवति। लोभतृतीयसंग्रहकिट्टौ च यथायोग्यमधस्तनशीर्षचयादिदलचतुष्टये दत्ते तृतीयसंग्रहकिट्टयामागतं संक्रमदलं परिसमाप्तं भवति।

**अथ बन्धदलं बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलादिभिर्विवर्ण्यते—**

लोभद्वितीयसंग्रहकिट्टिर्बध्यते। तेन तद्बन्धत आगतं दलमपि यथायोग्यं विभजनीयम्। तत्र बन्धदलं विभागचतुष्टये स्थापयितव्यम्। (१) बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलं (२) बन्धाऽपूर्वावान्तरकिट्टिचयदलं (३) बन्धचयदलं (४) बन्धमध्यमखण्डदलं चेति।

**(१) बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलम्**—बन्धदलतो लोभद्वितीयसंग्रहकिट्टयामवान्तरकिट्टयन्तरेषु या अपूर्वाऽवान्तरकिट्टयो निर्वर्त्यन्ते, तासामेकैकस्यामवान्तरकिट्टौ बन्धदलत एकसंक्रममध्यमखण्डाधिकलोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलं दातव्यम्। तच्चैकं बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डमुच्यते। बन्धाऽपूर्वावान्तरकिट्टिराशिनैकबन्धाऽपूर्वावान्तरकिट्टिसमानखण्डं गुण्यते, तदा सर्वबन्धापूर्वाऽवान्तरकिट्टिसमानखण्डदलं प्राप्यते।

न्यासः—एकबन्धापूर्वावान्तरकिट्टिसमानखण्डदलम्
= १ संक्रममध्यमखण्डम् + लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलम्।
सर्वबन्धापूर्वावान्तरकिट्टिसमानखण्डदलम्
= १ बन्धापूर्वावान्तरकिट्टिसमानखण्डदलम् × बन्धापूर्वावान्तरकिट्टिराशिः।

**(२) बन्धाऽपूर्वावान्तरकिट्टिचयदलम्**—यदेकोभयचयदलं प्राक् साधितम्, तदनन्ततमभागेन न्यूनमेकबन्धापूर्वावान्तरकिट्टिचयदलं भण्यते, [redacted]

अथ लोभद्वितीयसंग्रहकिट्टेरधस्तनीरुपरितनीश्चाऽसंख्येयभागप्रमाणा अवान्तरकिट्टीर्विमुच्य शेषा लोभद्वितीयसंग्रहकिट्टेरवान्तरकिट्टयो बध्यन्ते। तत्राऽपि बन्धचरमपूर्वावान्तरकिट्टेरधस्तादसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणा बन्धपूर्वाऽवान्तरकिट्टीर्व्यतिक्रम्य बन्धचरमापूर्वावान्तरकिट्टिर्निर्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्त्यते। तस्यां च लोभद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टित आरभ्य पश्चानुपूर्व्या यतिसंख्याका लोभद्वितीयसंग्रहकिट्टिबन्धचरमाऽपूर्वाऽवान्तरकिट्टिर्भवति, तत्संख्याका बन्धाऽपूर्वाऽवान्तरकिट्टिचयाः प्रक्षेपणीयाः। ततः पुनरसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणासु पूर्वावान्तरकिट्टिषु गतासु द्विचरम-बन्धापूर्वावान्तरकिट्टिर्निर्वर्त्यते, तत्र बन्धचरमाऽपूर्वावान्तरकिट्टितोऽसंख्यातपल्योपमप्रथमवर्गमूलराशिप्रमाणैर्बन्धापूर्वावान्तरकिट्टिचयैरधिका बन्धाऽपूर्वावान्तरकिट्टिचयाः प्रक्षेप्तव्याः। एवं पश्चानुपूर्व्या बन्धाऽपूर्वावान्तरकिट्ट्यामसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणैरधिका अधिकतरा बन्धाऽपूर्वावान्तरकिट्टिचयास्तावद् दातव्याः, यावद् बन्धप्रथमाऽपूर्वावान्तरकिट्टिः। एते च निक्षिप्यमाणाः सर्वे बन्धापूर्वाऽवान्तरकिट्टिचयाः "**व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनं मुखयुक् दलितं तत्। मध्यधनं पदसंगुणितं तत्सर्वधनं गणितं च तदुक्तम्।**" इति करणसूत्रेण सङ्कलयितव्याः। मुखमादिधनम्, तच्चात्र लोभद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिप्रभृतिबन्धप्रथमाऽपूर्वावान्तरकिट्टिपर्यवसानाऽवान्तरकिट्टिराशिप्रमाणा बन्धापूर्वाऽवान्तरकिट्टिचयाः, चयश्चाऽसंख्येयपल्योपमप्रथमवर्गमूलप्रमाणबन्धापूर्वाऽवान्तरकिट्टिचयाः। पदं पुनर्लोभद्वितीयसंग्रहकिट्टिबन्धाऽपूर्वाऽवान्तरकिट्टिराशिर्ज्ञातव्यम्।

न्यासः—

अन्त्यधनम् = ( पदम् − १ ) × चयः + आदिधनम्।

$$\text{मध्यधनम्} = \frac{\text{अन्त्यधनम्} + \text{आदिधनम्}}{२}$$

∴ लोभद्वितीयसंग्रहकिट्टिसर्वबन्धापूर्वावान्तरकिट्टिचयाः = मध्यधनम् × पदम्।

लोभद्वितीयसंग्रहकिट्ट्याः सर्वैर्बन्धापूर्वाऽवान्तरकिट्टिचयैरेकबन्धापूर्वाऽवान्तरकिट्टिचयदलं गुण्यते, तदा लोभद्वितीयसंग्रहकिट्टेः सर्वबन्धाऽपूर्वाऽवान्तरकिट्टिचयदलं प्राप्यते।

(३) **बन्धचयदलम्**—बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलं बन्धापूर्वाऽवान्तरकिट्टिचयदलं च बन्धदलतो विशोध्य शेषं बन्धदलं पदेन विभजनीयम्। विभक्ते च मध्यमदलं प्राप्यते। तदप्यर्धीकृतैकोनपदन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां विभज्यते, तदैकबन्धचयगतदलं प्राप्यते। पदं त्वत्र लोभद्वितीयसंग्रहकिट्टिबन्धपूर्वापूर्वाऽवान्तरकिट्टिराशिर्ज्ञातव्यम्। इह लोभद्वितीयसंग्रहकिट्टेर्बन्धचरमावान्तरकिट्टावेकं बन्धचयं ददाति, बन्धद्विचरमावान्तरकिट्टौ द्वौ बन्धचयौ ददाति, एवं पश्चानुपूर्व्यैकोत्तरवृद्ध्या बन्धपूर्वापूर्वावान्तरकिट्टिषु तावद् ददाति, यावल्लोभद्वितीयसंग्रहकिट्टिबन्धजघन्यपूर्वावान्तरकिट्टिः। ते च बन्धचयाः "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या**" इति गणितसूत्रेण संकलयितव्याः। पदं त्वत्र लोभद्वितीयसंग्रहकिट्टिबन्धपूर्वापूर्वावान्तरकिट्टिराशिर्बोध्यम्। एकबन्धचयदलं सर्वबन्धचयैर्गुण्यते, तदा सर्वबन्धचयदलं प्राप्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४) **बन्धमध्यमखण्डम्**—बन्धदलतः पूर्वोक्तबन्धदलत्रयं विशोध्य शेषबन्धदलं बन्धपूर्वाऽपूर्वावान्तरकिट्टिराशिना विभज्यते, तदैकं बन्धमध्यमखण्डं लभ्यते । तच्चैकैकं बन्धमध्यमखण्डं बन्धपूर्वापूर्वावान्तरकिट्टिष्वविशेषेण दातव्यम् ।

बध्यमानपूर्वावान्तरकिट्टिषु येनाऽनन्ततमभागेन हीनं संक्रमोभयचयदलं बध्यमानाऽपूर्वावान्तरकिट्टिषु चोभयचयापेक्षया येनानन्ततमभागेन हीनं बन्धाऽपूर्वावान्तरकिट्टिचयदलं प्रक्षिप्यते, सोऽनन्ततमभागो बन्धमध्यमखण्डे यथायोग्यं च बन्धचयदले प्रक्षिप्ते परिपूर्यते ।

**अथ सूक्ष्मकिट्टिषु लोभसंग्रहकिट्टिद्वये च दीयमानदलविधिर्भण्यते—**

सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये प्रथमसूक्ष्मकिट्टयामेकं सूक्ष्मकिट्टिसमानखण्डं सूक्ष्मकिट्टिराशिप्रमाणांश्च सूक्ष्मकिट्टिचयान् ददाति । इदं च दीयमानं दलं सर्वप्रभूतं भवति । ततः परं द्वितीयसूक्ष्मकिट्टयामेकं सूक्ष्मकिट्टिसमानखण्डमेकोनसूक्ष्मकिट्टिराशिप्रमाणांश्च सूक्ष्मकिट्टिचयान् ददाति । इत्थं प्रथमसूक्ष्मकिट्टितोऽस्यां दीयमानं दलमेकसूक्ष्मकिट्टिचयेन हीनं भवति, सूक्ष्मकिट्टिचयस्याऽनन्ततमभागमात्रत्वादनन्ततमभागेन हीनं दीयमानदलं भवति । ततः परमुत्तरोत्तरसूक्ष्मकिट्टावेकैकं सूक्ष्मकिट्टिसमानखण्डमेकोत्तरहान्या च सूक्ष्मकिट्टिचयाँस्तावद् ददाति, यावच्चरमसूक्ष्मकिट्टिः । एकसूक्ष्मकिट्टिचयस्याऽनन्ततमभागमात्रत्वादुत्तरोत्तरसूक्ष्मकिट्टौ दीयमानं दलमनन्तभागेन हीनं भवति । इत्थं सूक्ष्मकिट्टितया परिणमनाय गृहीतदलं परिसमाप्तं भवति ।

अथ **लोभतृतीयसंग्रहकिट्टिः**—चरमसूक्ष्मकिट्टित ऊर्ध्वं बादरजघन्यकिट्टिस्वरूपायां लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ संक्रमदलत एकं मध्यमखण्डं बादरपूर्वाऽपूर्वाऽवान्तरकिट्टिराशिप्रमाणांश्चोभयचयान् ददाति । इदं च दीयमानं दलं चरमसूक्ष्मकिट्टौ दीयमानदलतोऽसंख्यातगुणहीनं भवति, सूक्ष्मकिट्टिसमानखण्डतो मध्यमखण्डस्याऽसंख्येयगुणहीनत्वादुभयचयदलस्य चाऽनन्ततमभागमात्रत्वेनाऽकिञ्चित्करत्वात् ।

ततो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टावेकाऽधस्तनशीर्षचयदलमेकोनबादरपूर्वापूर्वावान्तरकिट्टिप्रमाणानुभयचयानेकं च मध्यमखण्डं ददाति । इत्थं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टौ दीयमानदलमेकाऽधस्तनशीर्षचयेनाधिकमेकोभयचयदलेन च हीनं भवति । तेन लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वाऽवान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टौ दीयमानदलमेकाऽधस्तनशीर्षचयदलन्यूनैकोभयचयदलेन हीनं भवति । अधस्तनशीर्षचयदलस्योभयचयदलतो हीनत्वाल्लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टितो लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टौ दलमनन्ततमभागेन हीनं ददातीति सिध्यति । एवमग्रेऽपि भावनीयम् । लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्टितः परमेकोत्तरवृद्ध्याऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकं च मध्यमखण्डं तावत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षिपति, यावदपूर्वावान्तरकिट्टिरप्राप्ता भवति । अपूर्वावान्तरकिट्टौ चैकाऽपूर्वावान्तरकिट्टिदलं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वावान्तरकिट्टिराशिन्यूनबादरसर्वपूर्वाऽपूर्वावान्तरकिट्टिराशिप्रमाणोभयचयानेकं च मध्यमखण्डं ददाति । तेन प्राक्तनपूर्वावान्तरकिट्टौ दीयमानदलतोऽस्यां दीयमानदलमसंख्यातगुणं भवति, प्राक्तनपूर्वावान्तरकिट्टौ प्रक्षिप्तमधस्तनशीर्षचयदलं मध्यमखण्डदलं चेत्येतद्दलद्वयतोऽपूर्वावान्तरकिट्टिदलस्यासंख्येयगुणत्वात् ।

ततोऽनन्तरायामुपरितन्यां लोभतृतीयसंग्रहकिट्टिपूर्वावान्तरकिट्टावेकं मध्यमखण्डं बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वापूर्वावान्तरकिट्टिराशिन्यूनबादरसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणानुभयचयान् बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वावान्तरकिट्टिराशिप्रमाणाऽधस्तनशीर्षचयांश्च प्रक्षिपति । तेन प्राक्तना-ऽपूर्वावान्तरकिट्टितोऽस्यां पूर्वावान्तरकिट्टौ दीयमानदलमसंख्येयगुणहीनं जायते, अस्यां निक्षिप्यमाणाऽधस्तनशीर्षचयमध्यमखण्डदलस्याऽपूर्वावान्तरकिट्टिदलतोऽसंख्येयगुणहीनत्वात् ।

तत उत्तरोत्तराऽवान्तरकिट्टयामेकोत्तरवृद्धयाऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकं च मध्यमखण्डं तावत्प्रक्षिपति, यावल्लोभतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः, नवरं पल्योपमप्रथमवर्गमूलाऽसंख्येयभागे गते यत्र यत्रा-ऽपूर्वावान्तरकिट्टिं निर्वर्तयति, तत्र तत्राऽधस्तनशीर्षचयान्न प्रक्षिपति, किन्तु तत्स्थानेऽपूर्वावान्तरकिट्टिदलं ददाति । तेन पूर्वाऽवान्तरकिट्टितोऽपूर्वावान्तरकिट्टौ दीयमानं दलमसंख्येयगुणं तथाऽपूर्वावान्तरकिट्टितः पूर्वाऽवान्तरकिट्टौ दीयमानं दलमसंख्यातगुणहीनं भवति ।

**अथ लोभद्वितीयसंग्रहकिट्टिः**—अतः परं लोभद्वितीयसंग्रहकिट्टौ दलं दातुमुपक्रमते । अस्या बध्यमानत्वेन चतुर्विधबन्धदलाद् वेद्यमानत्वेन च त्रिविधघातदलाद् यथायोग्यं दलं ददाति । तत्राऽसंख्येयभागमिता मन्दानुभागकास्तीव्रानुभागकाश्च या अवान्तरकिट्टयो न बध्यन्ते, तासु घातदलमेव ददाति । बन्धा-ऽपूर्वावान्तरकिट्टिषु केवलं बन्धदलं ददाति, न घातदलम् । तथाहि—लोभद्वितीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ घातदलादेकं मध्यमखण्डं बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वावान्तरकिट्टिराशिप्रमाणाऽधस्तनशीर्षचयान् बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वाऽपूर्वावान्तरकिट्टिराशिन्यूनबादरसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणोभयचयांश्च ददाति । तेन लोभतृतीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टितो लोभद्वितीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टौ दीयमानं दलिकमनन्ततमभागेन हीनं जायते, लोभतृतीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टयपेक्षयाऽधस्तनशीर्षचयदलन्यूनैकोभयचयदलेन हीनदलस्य प्रक्षेपात् । ततो लोभद्वितीयसंग्रहकिट्टिद्वितीयादिपूर्वावान्तरकिट्टिषु घातदलादेकोत्तरवृद्धयाऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकं च मध्यमखण्डं तावद् ददाति, यावल्लोभद्वितीयसंग्रहकिट्टिबन्धप्रथमपूर्वावान्तरकिट्टिरप्राप्ता भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो लोभद्वितीयसंग्रहकिट्टेर्जघन्यायां बन्धपूर्वावान्तरकिट्टौ घातदलत एकं मध्यमखण्डं बादरप्रथमपूर्वाऽवान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वावान्तरकिट्टिराशिप्रमाणाऽधस्तनशीर्षचयान् बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वापूर्वावान्तरकिट्टिराशिन्यूनबादरसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणोभयचयदलं चैकोभयचयदलाऽनन्ततमभागेन हीनं ददाति, एकोभयचयदलाऽनन्ततमभागप्रमाणदलस्य बन्धचयबन्धमध्यमखण्डरूपेण प्रक्षिप्यमाणत्वात् । बन्धदलतः पुनरेकं बन्धमध्यमखण्डं बन्धसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणांश्च बन्धचयान् प्रक्षिपति ।

ततः परमसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणासु पूर्वावान्तरकिट्टिषु बन्धदलादेकोत्तरहान्या बन्धचयानेकैकं च बन्धमध्यमखण्डं घातदलतः पुनरेकोत्तरवृद्ध्याऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकं च मध्यमखण्डं तावद् ददाति, यावल्लोभद्वितीयसंग्रहकिट्टिप्रथमबन्धाऽपूर्वावान्तरकिट्टिरप्राप्ता भवति । नवरमुभयचयदलमनन्ततमभागेन हीनं प्रक्षिपति, बन्धचयबन्धमध्यमखण्डरूपेण तावद्दलस्य प्रक्षेपात् ।

ततो लोभद्वितीयसंग्रहकिट्टिप्रथमबन्धाऽपूर्वावान्तरकिट्टौ बन्धदलत एकं बन्धाऽपूर्वावान्तरकिट्टिसमानखण्डं लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वापूर्वावान्तरकिट्टिराशिन्यूनबादरसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणान् बन्धाऽपूर्वावान्तरकिट्टिचयान् लोभद्वितीयसंग्रहकिट्टिबन्धप्रथमपूर्वाऽवान्तरकिट्टिप्रभृतिव्यतिक्रान्तबन्धपूर्वाऽवान्तरकिट्टिराशिन्यूनबन्धसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणान् बन्धचयानेकं च बन्धमध्यमखण्डं ददाति । घातदलतस्तु तस्यां दलं न प्रक्षिपति । इत्थं प्राक्तनपूर्वावान्तरकिट्टौ दीयमानबन्धदलतोऽस्यामपूर्वावान्तरकिट्टौ दीयमानबन्धदलमनन्तगुणं भवति, बन्धचय-बन्धमध्यमखण्डदलतो बन्धाऽपूर्वावान्तरकिट्टिचयबन्धाऽपूर्वावान्तरकिट्टिसमानखण्डदलस्याऽनन्तगुणत्वात् ।

ततः परमनन्तरायां पूर्वावान्तरकिट्टौ घातदलतो बादरप्रथमपूर्वाऽवान्तरकिट्टिप्रभृतिव्यतिक्रान्तपूर्वाऽवान्तरकिट्टिराशिप्रमाणाऽधस्तनशीर्षचयांस्तथाऽनन्ततमभागेन हीनं बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वापूर्वावान्तरकिट्टिराशिन्यूनबादरसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणोभयचयदलमेकं च मध्यमखण्डं प्रक्षिपति । बन्धदलतः पुनरेकं बन्धमध्यमखण्डं बन्धप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबन्धपूर्वापूर्वावान्तरकिट्टिराशिन्यूनबन्धसर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणान् बन्धचयान् प्रक्षिपति । इत्थं प्राक्तनबन्धापूर्वावान्तरकिट्टौ निक्षिप्तदलतोऽस्यां पूर्वावान्तरकिट्टौ निक्षिप्यमाणबन्धदलमनन्तगुणहीनं भवति, बन्धचय-बन्धमध्यमखण्डदलस्य बन्धापूर्वावान्तरकिट्टिचय-बन्धापूर्वावान्तरकिट्टिसमानदलतोऽनन्तगुणहीनत्वात् ।

ततः परं घातदलत एकोत्तरहान्योभयचयानेकोत्तरवृद्ध्याऽधस्तनशीर्षचयानेकैकं च मध्यमखण्डं बन्धदलतः पुनरेकोत्तरहान्या बन्धचयानेकैकं च बन्धमध्यमखण्डं तावद् ददाति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावल्लोभद्वितीयसंग्रहकिट्टिबन्धचरमपूर्वावान्तरकिट्टिः, नवरमसंख्यातपल्योपमप्रथमवर्गमूलप्रमाणासु पूर्वावान्तरकिट्टिषु गतासु यत्र यत्र बन्धाऽपूर्वावान्तरकिट्टिर्निर्वर्त्यते, तत्र तत्रोभयचयस्थाने बन्धदलतो बन्धाऽपूर्वावान्तरकिट्टिचयानधस्तनशीर्षचयस्थाने च बन्धाऽपूर्वाऽवान्तरकिट्टिसमानखण्डं ददाति, घातदलतश्च मध्यमखण्डं न ददाति ।

लोभद्वितीयसंग्रहकिट्टिचरमबन्धपूर्वाऽवान्तरकिट्टेरुपरितनपूर्वाऽवान्तरकिट्टौ घातदलत एकं मध्यमखण्डं बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वावान्तरकिट्टिराशिप्रमाणाऽधस्तनशीर्षचयान् बादरप्रथमपूर्वावान्तरकिट्टिप्रभृतिव्यतिक्रान्तबादरपूर्वापूर्वाऽवान्तरकिट्टिराशिन्यूनबादरसर्वपूर्वापूर्वाऽवान्तरकिट्टिराशिप्रमाणाँश्चोभयचयान् प्रक्षिपति । ततः परं घातदलत एकोत्तरवृद्ध्या-ऽधस्तनशीर्षचयानेकोत्तरहान्योभयचयानेकैकं च मध्यमखण्डं तावद् ददाति, यावल्लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः । पश्यन्तु पाठका यन्त्रकम्-२७ ।

## समाप्तो गणितविभागः ।

इत्थं भणितः सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये दलनिक्षेपविधिः ॥१९६॥

उत्तरोत्तरसमयेऽसंख्येयगुणहीना अपूर्वसूक्ष्मकिट्टीर्निर्वर्तयतीति प्रतिपादितं **पञ्चनवत्यधिकशततमगाथया** । अथ ताः कुत्र निर्वर्तयति ? किं किट्टिकरणाद्धावत् पूर्वासामेवाधस्ताद् निर्वर्तयति, उत क्रोधादिकिट्टिवेदनाद्धावदुभयत्र ? काश्च स्तोका निर्वर्तयति, काश्च प्रभूताः ? इति पृष्ट आह—

**बीयाइखणेसु अपुव्वा पुव्वाणन्तरेसु हेट्ठे य ।**
**कुणए हेट्ठेऽप्पा ताउ अंतरेसुं असंखगुणा ॥१९७॥**

द्वितीयादिक्षणेष्वपूर्वाः पूर्वासामन्तरेष्वधस्ताच्च ।
करोत्यधस्तादल्पास्ताभ्योऽन्तरेष्वसंख्यगुणाः ॥ १९७ ॥ इति पदसंस्कारः ।

**'बीयाइखणेसु'** इत्यादि, 'द्वितीयादिक्षणेषु' सूक्ष्मकिट्टिकरणाद्धाया द्वितीयादिसमयेषु 'पूर्वासां' पूर्वसूक्ष्मकिट्टीनाम् 'अन्तरेषु' द्वयोर्द्वयोः पूर्वसूक्ष्मकिट्ट्योर्मध्ये यान्यन्तराणि, तेषु, 'अधस्ताच्च' पूर्वसूक्ष्मकिट्टीनाञ्चाऽधस्ताज्जघन्यपूर्वसूक्ष्मकिट्टेरप्यधस्तादित्यर्थः, 'अपूर्वाः' अपूर्वसूक्ष्मकिट्टीः 'करोति' निर्वर्तयति । उक्तं च **कषायप्राभृतचूर्णौ—"सुहुमसांपराइयकिट्टीकारगो विदियसमये अपुव्वाओ सुहुमसांपराइयकिट्टीओ करेदि, असंखेज्जगुणहीणाओ । ताओ दोसु ठाणेसु करेदि । तं जहा-पढमसमए कदाणं हेट्ठा च अंतरे च ।"** इति । **कषायप्राभृतचूर्णिकृद्भिस्तृतीयादिसमयेषु** द्वितीयसमयभाव्यपूर्वसूक्ष्मकिट्टिनिर्वृत्तिरतिदिष्टा । तेन तृतीयादिसमयेष्वपि क्षपकः पूर्वसूक्ष्मकिट्टेरधस्तात् सूक्ष्मकिट्ट्यन्तरेषु चाऽपूर्वसूक्ष्मकिट्टीर्निर्वर्तयतीति सिध्यति । अधस्तात् 'स्तोकाः' अल्पा अपूर्वसूक्ष्मकिट्टीः करोति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**यन्त्रकम्–२७ (चित्रम्–२७)**

**सूक्ष्मकिट्टिकरणाद्धाप्रथमसमये सूक्ष्मकिट्टिषु बादरकिट्टिषु च दलिकनिक्षेपः**




संकेतस्पष्टीकरणम्—

१ ····३२,–यद्यपि परमार्थतः सूक्ष्मकिट्टियो-ऽनन्ता निर्वर्त्यन्ते, किन्त्वसत्कल्पनया द्वात्रिंशत् (३२) परिकल्पिताः।

१ अ—तत्र सूक्ष्मकिट्टिसमानखण्डं प्रत्येकं सूक्ष्मकिट्टौ दीयते।

२ अ—असत्कल्पनया प्रथमायां सूक्ष्मकिट्टौ द्वात्रिंशत् सूक्ष्मकिट्टिचयान् प्रक्षिपति, वस्तुतस्त्वनन्तान् सूक्ष्मकिट्टिचयान् प्रक्षिपति, ततोऽसत्कल्पनया द्वितीयस्यामेकत्रिंशत्। एवमेकोत्तरहान्या तावत् प्रक्षिपति, यावच्चरमसूक्ष्मकिट्टिः।

पू—पूर्वान्तरकिट्टयः। ताश्चाष्टादश (१८) अत्र परिकल्पिताः, वस्तुतोऽनन्ताः।

३ अ—पूर्वान्तरकिट्टिषु पुरातनं दलम्, तच्चोत्तरोत्तरपूर्वाऽवान्तरकिट्टौ विशेषहीनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४ अ—सर्वपूर्वापूर्वान्तरकिट्टिष्वेकैकं मध्यमखण्डं ददाति, नवरं बन्धाऽपूर्वान्तरकिट्टौ न ददाति ।

५ अ—लोभतृतीयसंग्रहकिट्टिप्रथमावान्तरकिट्टौ सर्वपूर्वापूर्वावान्तरकिट्टिराशिप्रमाणान असत्कल्पनया द्वाविंशतिमुभयचयान प्रक्षिपति । ततः परं यथाक्रममेकोत्तरहान्या प्रक्षिपति ।

६ अ—लोभतृतीयसंग्रहकिट्टिद्वितीयपूर्वावान्तरकिट्ट्यामेकाधस्तनशीर्षचयं प्रक्षिपति, ततः परं यथाक्रममेकोत्तरवृद्धया पूर्वावान्तरकिट्टिषु तावत् प्रक्षिपति, यावल्लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्टिः । तेन लोभद्वितीयसंग्रहकिट्टिचरमपूर्वावान्तरकिट्ट्यामसत्कल्पनया सप्तदश (१७) अधस्तनशीर्षचयान् प्रक्षिपति, असत्कल्पनया पूर्वावान्तरकिट्टीनामष्टादशत्वात् । वस्तुतस्त्वनन्तानधस्तनशीर्षचयान् प्रक्षिपति, परमार्थतः पूर्वावान्तरकिट्टीनामनन्तत्वात् । अधस्तनशीर्षचयेषु प्रक्षिप्तेषु सर्वपूर्वावान्तरकिट्टयस्तुल्यप्रदेशका भवन्ति ।

अ पू—संक्रमदलतो निर्वर्त्यमाना ऽपूर्वावान्तरकिट्टिः । असत्कल्पनया द्वे-ऽपूर्वावान्तरकिट्टी कल्पिते, तृतीया षष्ठी चेति, वस्तुतो-ऽनन्ता अपूर्वावान्तरकिट्टयो निर्वर्त्यन्ते ।

७ अ—तच्च लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलप्रमाणं भवति । अपूर्वावान्तरकिट्टौ चा ऽपूर्वावान्तरकिट्टिदलं ददाति ।

ब पू—बन्धपूर्वावान्तरकिट्टिः, ताश्चात्र षट् कल्पिताः, वस्तुतो-ऽनन्ता भवन्ति ।

८ अ—एकादशावान्तरकिट्टौ=बन्धचरमपूर्वावान्तरकिट्टौ एकं बन्धचयं प्रक्षिपति । ततः परमेकोत्तरवृद्धया तावत् प्रक्षिपति, यावद् बन्धप्रथमपूर्वावान्तरकिट्टिः । इत्थं बन्धप्रथमपूर्वावान्तरकिट्ट्यामसत्कल्पनया-ऽष्टौ बन्धचयान् प्रक्षिपति, असत्कल्पनया बन्धपूर्वापूर्वावान्तरकिट्टीनामष्टत्वात् ,परमार्थतस्त्वनन्तबन्धचयान् प्रक्षिपति, परमार्थतो बन्धपूर्वापूर्वावान्तरकिट्टीनामनन्तत्वात् । बन्धमध्यमखण्डं च सर्वासु बन्धपूर्वापूर्वाऽवान्तरकिट्टिष्वविशेषेण प्रक्षिपति । एतत्सर्वम् – अनेन चिह्नेन सूचितम् ।

ब अ पू—बन्धा-ऽपूर्वावान्तरकिट्टिः । असत्कल्पनया द्वे बन्धापूर्वावान्तरकिट्टी कल्पिते, वस्तुतस्तु ता अनन्ताः ।

९ अ—तच्च संक्रममध्यमखण्डाधिक लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वावान्तरकिट्टिदलप्रमाणम् । बन्धापूर्वावान्तरकिट्टौ तद् ददाति ।

१० अ—नवम्यामवान्तरकिट्टौ=बन्धचरमा-ऽपूर्वावान्तरकिट्ट्यां षड् (६) बन्धापूर्वावान्तरकिट्टिचयान् प्रक्षिपति, तस्या लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्ट्यपेक्षया षष्ठकिट्टित्वात् । वस्तुतस्त्वनन्तान् बन्धापूर्वावान्तरकिट्टिचयान् प्रक्षिपति, वस्तुतो लोभद्वितीयसंग्रहकिट्टिचरमावान्तरकिट्ट्यपेक्षया बन्धचरमापूर्वावान्तरकिट्ट्या अनन्ततमकिट्टित्वात् । बन्धद्विचरमापूर्वावान्तरकिट्टौ च बन्धचरमापूर्वावान्तरकिट्ट्यपेक्षयाऽसत्कल्पनया त्रिभिरधिकान् बन्धापूर्वावान्तरकिट्टिचयान् (=९) प्रक्षिपति, वस्तुतोऽसंख्येयपल्योपमप्रथमवर्गमूलैरधिकान् प्रक्षिपति । इह च साऽसत्कल्पनया षष्ठी किट्टिः, बन्धापूर्वावान्तरकिट्टिद्वयकल्पनाच्च सैव बन्धप्रथमापूर्वावान्तरकिट्टिः ।

सर्वसूक्ष्मकिट्टिषु दृश्यमानं दलं विशेषहीनक्रमेण विद्यते, एवं बादरावान्तरकिट्टिष्वपि , नवरं सूक्ष्मचरमकिट्टितो बादरप्रथमावान्तरकिट्टौ विशेषहीनं दलं न भवति, किन्त्वसंख्येयगुणं भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताभ्यः 'अन्तरेषु' पूर्वसूक्ष्मकिट्ट्यन्तरेष्वसंख्यगुणा अपूर्वसूक्ष्मकिट्टीः करोति । यदुक्तं **कषायप्राभृत-चूर्णौ–हेट्ठा थोवाओ, अंतरेसु असंखेज्जगुणाओ ।"** इति ॥१९७॥

अथ पूर्वापूर्वसूक्ष्मकिट्टिषु दलनिक्षेपं बिभणिषुराह—

**देइ दलिअं अपुव्वसुहुमकिट्टित्तो अणंतराए तु ।**
**पुव्वसुहुमकिट्टीए हीणमसंखेज्जभागेणं ॥१९८॥**
**पुव्वाउ असंखंसाहियं अणंतरअपुव्वकिट्टीए ।**
**सेसासु पुव्वापुव्वासु कमेणं विसेसूणं ॥१९९॥**

ददाति दलिकमपूर्वसूक्ष्मकिट्टितोऽनन्तरायां तु
पूर्वसूक्ष्मकिट्ट्यां हीनमसंख्येयभागेन ॥१९८॥
पूर्वस्या असंख्यांशाधिकमनन्तरापूर्वकिट्टौ ।
शेषासु पूर्वापूर्वासु क्रमेण विशेषोनम् ॥१९९॥ इति पदसंस्कारः ।

'देइ' इत्यादि, तत्राऽपूर्वसूक्ष्मकिट्टितोऽनन्तरायां तु पूर्वसूक्ष्मकिट्ट्यामसंख्येयभागेन हीनं दलिकं ददाति । 'पुव्वाउ' इत्यादि, 'पूर्वस्याः' पूर्वसूक्ष्मकिट्टितो 'अनन्तराऽपूर्वकिट्टौ' अनन्तरा-पूर्वसूक्ष्मकिट्टौ 'असंख्यांशाधिकम्' असंख्येयभागाधिकं दलं ददाति । **'सेसासु'** इत्यादि, 'शेषासु' उक्तोद्धरितासु'पूर्वापूर्वासु' पूर्वसूक्ष्मकिट्टिष्वपूर्वसूक्ष्मकिट्टिषु च क्रमेण 'विशेषोनम्' अनन्ततमभागेन हीनं दलं ददाति । इदमुक्तं भवति–सूक्ष्मकिट्टिकरणाद्धाया द्वितीयसमये प्रथमसमयकृतजघन्य-किट्टेरधस्ताद् याः सूक्ष्मकिट्टीः करोति, तासां सर्वजघन्याऽधस्तना-ऽपूर्वसूक्ष्मकिट्टौ दलिकं प्रभूतं ददाति । ततो द्वितीयस्यामधस्तना-ऽपूर्वसूक्ष्मकिट्टावनन्तभागेन हीनं दलं ददाति, ततोऽनन्तरान्त-रेणाऽनन्तभागेन हीनं तावद्ददाति, यावच्चरमाऽधस्तनाऽपूर्वसूक्ष्मकिट्टिः ।

ततः परं चरमाऽधस्तनाऽपूर्वसूक्ष्मकिट्टितोऽसंख्यातभागेन हीनं दलं प्रथमसमयकृतप्रथमसूक्ष्म-किट्टिलक्षणायां प्रथमपूर्वसूक्ष्मकिट्टौ ददाति । अत्र कारणं तु किट्टिकरणाद्धायां पूर्वावान्तरकिट्ट्य-पूर्वावान्तरकिट्ट्योः सन्धौ यथा प्ररूपितम् , तथैवा-ऽनुगन्तव्यम् , विशेषाभावात् । ततो द्वितीया-दिषु पूर्वसूक्ष्मकिट्टिषु विशेषहीनक्रमेण तावद् ददाति, यावदन्तरजाऽपूर्वसूक्ष्मकिट्टिरप्राप्ता भवति । ततोऽन्तरजा-ऽपूर्वसूक्ष्मकिट्ट्यामसंख्येयभागाधिकं दलं ददाति, ततोऽसंख्येयभागेन हीनं दलं तदनन्तरपूर्वसूक्ष्मकिट्टौ ददाति, ततः परं विशेषहीनक्रमेण तावद् ददाति, यावच्चरमपूर्वसूक्ष्म-किट्टिः, नवरं यत्र यत्राऽपूर्वसूक्ष्मकिट्टिर्निर्वर्त्यते, तत्र तत्र प्राक्तनपूर्वसूक्ष्मकिट्टितोऽसंख्येय-भागाधिकं दलिकं ददाति, तदनन्तरपूर्वसूक्ष्मकिट्टौ चाऽसंख्येयभागेन हीनं दलं ददाति । उक्तं च **कषायप्राभृतचूर्णौ–"विदियसमये दिज्जमाणगस्स पदेसग्गस्स सेढिपरूवणा–जा विदियसमए जहण्णिया सुहुमसांपराइयकिट्टी, तिस्से पदेसग्गं दिज्जदि बहुअं ।**

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

**विदियाए किट्टीए अणंतभागहीणं । एवं गंतूण पढमसमए जा जहण्णिया सुहुमसांपराइयकिट्टी, तत्थ असंखेज्जदिभागहीणं । तत्तो अणंतभागहीणं जाव अपुव्वं णिव्वत्तिज्जमाणगं ण पावदि, अपुव्वाए णिव्वत्तिज्जमाणिगाए किट्टीए असंखेज्जदिभागुत्तरं पुव्वणिव्वत्तिदं पडिवज्जमाणगस्स पदेसग्गस्स असंखेज्जदिभागहीणं । परं परं पडिवज्जमाणस्स अणंतभागहीणं ।**" इति । यथा द्वितीयसमये सूक्ष्मकिट्टिषु दलनिक्षेपविधिः प्ररूपितः, तथैव तृतीयादिसमयेष्वपि तावत् प्ररूपयितव्यः, यावत्सूक्ष्मकिट्टिकरणाद्धाचरमसमयः । अभाणि च **कषायप्राभृतचूर्णौ**–"**जो विदियसमए दिज्जमाणगस्स पदेसग्गस्स** विधी, **सो चेव** विधी **सेसेसु** वि **समएसु जाव चरिमसमयबादरसंपराइयो त्ति** ।" इति ।

बादरकिट्टिषु दलनिक्षेपस्तु प्रथमसमयवज्ज्ञातव्यः ।

## अथ गणितविभागः ।

साम्प्रतं सूक्ष्मकिट्टिकरणाद्धाया द्वितीयसमये दलिकनिक्षेपोऽधस्तनशीर्षचयादिप्ररूपणया स्पष्टीक्रियते ।

सूक्ष्मकिट्टिकरणाद्धाद्वितीयसमये प्रथमसमयतोऽसंख्यातगुणं दलं सूक्ष्मकिट्टितया परिणमनाय गृह्णाति । अथ द्वितीयसमये सूक्ष्मकिट्टितया परिणमनाय गृहीतसकलदलं विभागपञ्चके विभजनीयम्–(१) अधस्तनशीर्षचयदलम् (२) अधस्तनाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलम् (३) अन्तरजाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलम् (४) उभयचयदलं (५) मध्यमखण्डदलं चेति ।

**(१) अथाऽधस्तनशीर्षचयदलम्**–सर्वाः पूर्वसूक्ष्मकिट्टीः प्रथमसमयकृतजघन्यसूक्ष्मकिट्टिगतप्रदेशतुल्याः कर्तुं द्वितीयपूर्वसूक्ष्मकिट्टावेकचयं ददाति, तृतीयपूर्वसूक्ष्मकिट्टौ द्वौ चयौ ददाति। एवमेकोत्तरवृद्ध्या तावद् ददाति, यावच्चरमपूर्वसूक्ष्मकिट्टिः । एते च चया अधस्तनशीर्षचया उच्यन्ते । सर्वाधस्तनशीर्षचयाश्च "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल संकलिताख्या** ।" इति करणसूत्रेण सङ्कलयितव्याः । पदं त्वत्रैकोनपूर्वसूक्ष्मकिट्टिराशिर्बोध्यम् ।

एकाऽधस्तनशीर्षचयदलं सर्वाऽधस्तनशीर्षचयैर्गुण्यते, तदा सर्वाऽधस्तनशीर्षचयदलं प्राप्यते ।

(२) **अधस्तनाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलम्**–पूर्वसमयकृतप्रथमसूक्ष्मकिट्टिगतप्रदेशतुल्या अधस्तनाऽपूर्वसूक्ष्मकिट्टयः स्थापयितव्याः । स्थापितायाञ्चैकैकस्यां किट्टौ यद् दलं भवति, तदेकाऽधस्तनाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलमुच्यते । एकाऽधस्तनाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलमधस्तनाऽपूर्वसूक्ष्मकिट्टिराशिना गुण्यते, तदा सर्वाऽधस्तनाऽपूर्वसूक्ष्मकिट्टिदलं प्राप्यते ।

(३) **अन्तरजाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलम्**—पूर्वसमयकृतप्रथमसूक्ष्मकिट्टिगत-प्रदेशतुल्या अन्तरजाऽपूर्वसूक्ष्मकिट्टयः स्थापयितव्याः। स्थापितायाञ्चैकैकस्यां सूक्ष्मकिट्टौ यद् दलं भवति, तदेकान्तरजा-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलमुच्यते। एकाऽन्तरजाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलमन्तरजाऽपूर्वसूक्ष्मकिट्टिराशिना गुण्यते, तदा सर्वा-ऽन्तरजाऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलं प्राप्यते।

(४) **उभयचयदलम्**—पूर्वोक्तदलत्रये यथायोग्यं प्रक्षिप्ते सर्वपूर्वाऽपूर्वसूक्ष्मकिट्टयः समानदलिका जायन्ते। तासां दलिकं गोपुच्छाकारं कर्तुं चरमपूर्वसूक्ष्मकिट्ट्यामेकश्चयः प्रक्षेपणीयः, द्विचरमपूर्वसूक्ष्मकिट्टौ द्वौ चयौ प्रक्षेपणीयौ। एवंक्रमेण पश्चानुपूर्व्या चयास्तावत् प्रक्षेप्तव्याः, यावद् द्वितीयसमये क्रियमाणप्रथमाऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिः। ते च "**सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल संकलिताख्या।**" इति करणसूत्रेण संकलयितव्याः। पदं त्वत्र पूर्वा-पूर्वसूक्ष्मकिट्टिराशिर्ज्ञातव्यम्। एते च चया उभयचया उच्यन्ते। सर्वोभयचयैरेकोभयचयगतदलं गुण्यते, तदा सर्वोभयचयदलं प्राप्यते।

नन्वेकोभयचयगतदलं कियद् भवति ? इति चेत्, उच्यते—प्रथमसमये सूक्ष्मकिट्टितया परिणमनाय गृहीतदलं द्वितीयसमये च सूक्ष्मकिट्टितया परिणमनाय गृह्यमाणदलमिति दलद्वयं पदेन विभज्यते, तदा मध्यमदलं प्राप्यते। तत्पुनरर्धीकृतैकोनपदन्यूनाभ्यां द्वाभ्यां द्विगुणहानिभ्यां विभज्यते, तदैकोभयचयदलं प्राप्यते। पदन्त्वत्र समयद्वयकृतसूक्ष्मकिट्टिराशिरवगन्तव्यम्।

न्यासः—

$$\text{मध्यमदलम्} = \frac{\text{समयद्वये सूक्ष्मकिट्टितया परिणमनाय गृहीतदलम्।}}{\text{पदम्}}$$

$$\text{एकोभयचयदलम्} = \frac{\text{मध्यमदलम्}}{\text{द्वे द्विगुणहानी}-\frac{(\text{पदम्}-१)}{२}}$$

(५) **मध्यमखण्डदलम्**—द्वितीयसमये सूक्ष्मकिट्टितया परिणमनाय गृहीतसकलदलतः पूर्वोक्ताधस्तनशीर्षचयादिदलचतुष्टयं विशोध्य शेषदलं मध्यमखण्डदलमुच्यते। तच्च पूर्वापूर्वसूक्ष्म-किट्टिराशिना विभज्यते, तदेकं मध्यमखण्डं प्राप्यते। एकमध्यमखण्डदलं चाऽधस्तनापूर्वसूक्ष्म-किट्टिसमानखण्डदलतोऽसंख्येयगुणं भवति। एकैकं मध्यमखण्डं सर्वपूर्वापूर्वसूक्ष्मकिट्टिष्वविशेषेण दातव्यम्।

लोभतृतीयसंग्रहकिट्टिसंक्रमदलस्याऽधस्तनशीर्षचयादिविभागचतुष्टयं लोभद्वितीयसंग्रहकिट्ट्याश्च घातदलस्या-ऽधस्तनशीर्षचयादिविभागत्रयं बन्धदलस्य च बन्धापूर्वान्तरकिट्टिसमानखण्डादिविभागचतुष्टयं पूर्ववदवसेयम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अथ पूर्वापूर्वसूक्ष्मकिट्टिषु दलनिक्षेपो भण्यते**—द्वितीयसमये सूक्ष्मकिट्टितया परिणमनाय गृहीतदलात् प्रथमा-ऽधस्तनापूर्वसूक्ष्मकिट्टावेकमधस्तना-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डं पूर्वापूर्वसूक्ष्मकिट्टिराशिप्रमाणानुभयचयानेकं च मध्यमखण्डं ददाति । तच्च दीयमानं दलं प्रभूतं भवति, उपरि दीयमानदलस्य हीनत्वात् । ततो द्वितीया-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टयामेकमधस्तना-ऽपूर्वकिट्टिसमानखण्डमेकोनपूर्वापूर्वसूक्ष्मकिट्टिराशिप्रमाणानुभयचयानेकं च मध्यमखण्डं ददाति । इत्थं प्रथमा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टितो द्वितीया-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टयामेकोभयचयेन हीनं दलं ददाति । उभयचयदलस्या-ऽनन्ततमभागमात्रत्वात् प्रथमा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टितो द्वितीया-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टावनन्ततमभागेन हीनं दलं ददातीति सिध्यति । ततः परं तृतीयाद्यधस्तना-ऽपूर्वसूक्ष्मकिट्टिष्वेकैकमधस्तना-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डमेकैकं मध्यमखण्डमेकोत्तरहान्या चोभयचयांस्तावत् प्रक्षिपति, यावच्चरमा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिः ।

ततः परं प्रथमपूर्वसूक्ष्मकिट्टावेकं मध्यमखण्डं सर्वा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिराशिन्यून-पूर्वापूर्वसूक्ष्मकिट्टिराशिप्रमाणांश्चोभयचयान् ददाति । तदेव चरमा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टितः प्रथमपूर्वसूक्ष्मकिट्टयामेकोभयचयेनैकेन चा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डेन हीनं दलं ददाति । इत्थश्च चरमा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टितः प्रथमपूर्वसूक्ष्मकिट्टौ दीयमानदलमसंख्येयभागेन हीनं जायते, एकमध्यमखण्डदलत एका-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलस्या-ऽसंख्येयगुणहीनत्वादुभयचयदलस्य चा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डदला-ऽनन्ततमभागमात्रत्वात् ।

ततो द्वितीयपूर्वसूक्ष्मकिट्टावेकमधस्तनशीर्षचयमेकं मध्यमखण्डमेकाधिका-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिराशिन्यूनपूर्वापूर्वसूक्ष्मकिट्टिराशिप्रमाणाँश्चोभयचयान् ददाति । तेन प्रथमपूर्वसूक्ष्मकिट्टितो-ऽस्यां दीयमानदलमनन्तभागेन हीनं जायते । कथमेतदवसीयते ? इति चेत् उच्यते—प्रथमपूर्वसूक्ष्मकिट्टितो-ऽस्यां दीयमानदलमेका-ऽधस्तनशीर्षचयेना-ऽधिकं जायते, एकोभयचयेन च हीनम् । तेनैका-ऽधस्तनशीर्षचयदलन्यूनैकोभयचयदलेन हीनं दीयमानदलं प्रथमपूर्वसूक्ष्मकिट्टितो द्वितीयपूर्वसूक्ष्मकिट्टौ जायते । अधस्तनशीर्षचयदलस्य केवलमुभयचयदला-ऽसंख्येयभागमात्रत्वादुभयचयदलस्य चा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलानन्ततमभागमात्रत्वात् प्रथमपूर्वसूक्ष्मकिट्टितो द्वितीयपूर्वसूक्ष्मकिट्टावनन्तभागेन हीनं दीयमानं दलं भवति । एवमग्रे-ऽपि भावनीयम् ।

ततः परं तृतीयादिपूर्वसूक्ष्मकिट्टिष्वेकैकं मध्यमखण्डमेकोत्तरवृद्ध्या-ऽधस्तनशीर्षचयानेकोत्तरहान्या चोभयचयान् यथाक्रमं पल्योपमा-ऽसंख्यभागमात्रास्वसंख्यातासु सूक्ष्मकिट्टिषु तावत्प्रक्षिपति, यावदन्तरजा-ऽपूर्वसूक्ष्मकिट्टिरप्राप्ता भवति ।

अन्तरजापूर्वसूक्ष्मकिट्टावेकं मध्यमखण्डं प्रथमा-ऽधस्तना-ऽपूर्वसूक्ष्मकिट्टिप्रभृतिव्यतिक्रान्तपूर्वापूर्वसूक्ष्मकिट्टिराशिन्यूनसर्वपूर्वापूर्वसूक्ष्मकिट्टिराशिप्रमाणानुभयचयानेकं चा-ऽन्तरजा-ऽपूर्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सूक्ष्मकिट्टिकरणाद्धाद्वितीयसमये [redacted]दलनिक्षेपविधिः



सङ्केतस्पष्टीकरणम्—

अपू=द्वितीयसमये निर्वर्त्यमाना-ऽधस्तनापूर्वसूक्ष्मकिट्टिः, असत्कल्पनया सर्वाधस्तनापूर्वसूक्ष्मकिट्टयस्तिस्रः (३), वस्तुतो-ऽनन्ताः ।

पू=पूर्वसूक्ष्मकिट्टिः, असत्कल्पनया पूर्वसूक्ष्मकिट्टयो द्वात्रिंशत् , (४, ५, ६, ७, ९, १०, ११, १२, १४, १५, १६, १७, १९, २० २१, २२, २४, २५, २६, २७, २९, ३०, ३१, ३२, ३४, ३५, ३६, ३७, ३९, ४०, ४१, ४२) ।

अं=सूक्ष्मकिट्ट्यन्तरे निर्वर्त्यमाना अपूर्वसूक्ष्मकिट्टिः, असत्कल्पनयाऽन्तरजाऽपूर्वसूक्ष्मकिट्टयः सप्त (८, १३, १८, २३, २८, ३३, ३८) ।

०००अनेन चिह्नेना-ऽधस्तनापूर्वसूक्ष्मकिट्टिसमानखण्डं सूचितम्, तच्चैकैकाधनस्तनापूर्वसूक्ष्मकिट्टौ दीयते। एकाधस्तनापूर्वसूक्ष्मकिट्टिसमानखण्डदलं तु प्रथमसमयकृतजघन्यपूर्वसूक्ष्मकिट्टिप्रदेशतुल्यम्।

•••अनेन चिह्नेन पूर्वसूक्ष्मकिट्टिषु पुरातनदलं सूचितम्, तच्चोत्तरोत्तरपूर्वसूक्ष्मकिट्टौ विशेषहीनक्रमेण भवति।

अ=अधस्तनशीर्षचयदलम्

× प्रदेशापेक्षया सर्वपूर्वसूक्ष्मकिट्टीः प्रथमसमयकृतजघन्यपूर्वसूक्ष्मकिट्टिप्रदेशतुल्याः कर्तुं द्वितीयपूर्वसूक्ष्मकिट्ट्यामेकाधस्तनशीर्षचयः प्रक्षिप्यते, तृतीयपूर्वसूक्ष्मकिट्टौ द्वा अधस्तनशीर्षचयौ, चतुर्थपूर्वसूक्ष्मकिट्टौ त्रयो-ऽधस्तनशीर्षचयाः, एवमेकोत्तरवृद्ध्या पूर्वसूक्ष्मकिट्टिषु तावत् प्रक्षिप्यन्ते यावच्चरमपूर्वसूक्ष्मकिट्टिः, तस्यामसत्कल्पनयैकत्रिंशद् (३१) अधस्तनशीर्षचयाः प्रक्षिप्यन्ते, पूर्वसूक्ष्मकिट्टीनां द्वात्रिंशत्त्वात्, वस्तुतस्त्वनन्ता अधस्तनशीर्षचया निक्षिप्यन्ते, पूर्वसूक्ष्मकिट्टीनां परमार्थतोऽनन्तत्वात्।

※ अन्तरजापूर्वसूक्ष्मकिट्टिसमानखण्डदलम्, तच्च सूक्ष्मकिट्ट्यन्तरे निर्वर्त्यमानायामेकैकस्यामपूर्वसूक्ष्मकिट्टौ दीयते। एकान्तरजापूर्वसूक्ष्मकिट्टिसमानखण्डदलं तु प्रथमसमयकृतजघन्यपूर्वसूक्ष्मकिट्टिप्रदेशतुल्यम्।

। अनेन चिह्नेन मध्यमखण्डं सूचितम्, तच्चैकैकं पूर्वापूर्वसूक्ष्मकिट्टिषु दीयते, एकमध्यमखण्डदलं चैकाधस्तनापूर्वसूक्ष्मकिट्टिसमानखण्डदलतो वैकान्तरजापूर्वसूक्ष्मकिट्टिसमानखण्डदलतो वाऽसंख्येयगुणं भवति।

उ=उभयचयदलम्

△ चरमसूक्ष्मकिट्ट्यामेक उभयचयः प्रक्षिप्यते, द्विचरमसूक्ष्मकिट्टौ द्वा उभयौ प्रक्षिप्येते, त्रिचरमसूक्ष्मकिट्टौ त्रय उभयचयाः प्रक्षिप्यन्ते, एवमेकोत्तरवृद्ध्योभयचयाः पूर्वापूर्वसूक्ष्मकिट्टिषु तावत् प्रक्षिप्यन्ते, यावत् प्रथमाधस्तनापूर्वसूक्ष्मकिट्टिः, तस्यां च पूर्वापूर्वसूक्ष्मकिट्टिराशिप्रमाणा उभयचयाः प्रक्षिप्यन्ते, असत्कल्पनया तु द्वाचत्वारिंशत् (४२), वस्तुतोऽनन्ताः, परमार्थतः पूर्वापूर्वसूक्ष्मकिट्टीनामनन्तत्वात्। अनेन क्रमेण दलिके प्रक्षिप्ते प्रथमाधस्तनापूर्वसूक्ष्मकिट्टौ प्रक्षिप्यमाणं सर्वदलम् ०। △ इत्यनेन सूचितं प्रभूतं भवति, ततो विशेषहीनक्रमेण तावत्, यावच्चरमाधस्तनापूर्वसूक्ष्मकिट्टिः, असत्कल्पनया तु तृतीया सूक्ष्मकिट्टिः। ततोऽसंख्येयभागेन हीनम्। △ इत्यनेन सूचितं दीयमानं सर्वदलं प्रथमपूर्वसूक्ष्मकिट्टौ, असत्कल्पनया तु चतुर्थसूक्ष्मकिट्टौ। ततो द्वितीयादिपूर्वसूक्ष्मकिट्टिषु पल्योपमाऽसंख्येयभागप्रमाणास्वसंख्याता-स्वसत्कल्पनया तु तिसृषु सूक्ष्मकिट्टिषु विशेषहीनक्रमेण तावद् भवति, यावदन्तरजापूर्वसूक्ष्मकिट्टिरप्राप्ता। ततस्तदनन्तरान्तरजाऽपूर्वसूक्ष्मकिट्टा असत्कल्पनयाऽष्टमसूक्ष्मकिट्ट्यामसंख्येयभागेनाधिकम् ※। △ इत्यनेन सूचितं दीयमानं दलं भवति, तदनन्तरपूर्वसूक्ष्मकिट्टावसंख्येयभागहीनम् ×। △ इत्यनेन सूचितं दीयमानं दलं भवति, ततः परं विशेषहीनक्रमेण तावद् भवति, यावच्चरमपूर्वसूक्ष्मकिट्टिः, नवरं यत्र यत्राऽपूर्वसूक्ष्मकिट्टिर्निर्वर्त्यते, तत्र तत्र प्राक्तनपूर्वसूक्ष्मकिट्टितोऽसंख्येयभागाधिकम्, तदनन्तरपूर्वसूक्ष्मकिट्टौ चासंख्येयभागेन हीनं दलं दीयते।

एवं सूक्ष्मकिट्टिकरणाद्धायाः शेषसमयेष्वपि वक्तव्यम्।

दृश्यमानदलं सूक्ष्मकिट्टिकरणाद्धायाः सर्वसमयेषु सर्वपूर्वापूर्वसूक्ष्मकिट्टिषु विशेषहीनक्रमेण भवति।

---

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मकिट्टिसमानखण्डं ददाति । इत्थं प्राक्तनपूर्वसूक्ष्मकिट्टितोऽस्यामपूर्वसूक्ष्मकिट्टौ दीयमानदलमसंख्येयभागाधिकं जायते । कथमेतदत्रसीयते ? इति चेत् , उच्यते-पूर्वसूक्ष्मकिट्टितोऽस्यामन्तरजा-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डमधिकं ददाति, तच्च मध्यमखण्डस्या-ऽसंख्येयभागमात्रं भवति, तेन पूर्वसूक्ष्मकिट्टितो-ऽसंख्येयभागाधिकं दलिकमस्यां सूक्ष्मकिट्टौ दीयमानं दलं भवति । अत्र यद्यपि पूर्वसूक्ष्मकिट्टित एकोभयचयेन निरुक्ताऽधस्तनशीर्षचयैश्च हीनं दलं ददाति, तथापि तेषामन्तरजा-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलाऽनन्तभागमात्रत्वेना-ऽकिञ्चित्करत्वम् ।

ततोऽनन्तरायां पूर्वसूक्ष्मकिट्टावेकं मध्यमखण्डं प्रथमाऽधस्तनाऽपूर्वसूक्ष्मकिट्टिप्रभृतिव्यतिक्रान्तपूर्वापूर्वसूक्ष्मकिट्टिराशिन्यूनसर्वपूर्वापूर्वसूक्ष्मकिट्टिराशिप्रमाणानुभयचयान् प्रथमपूर्वसूक्ष्मकिट्टिप्रभृतिव्यतिक्रान्तपूर्वसूक्ष्मकिट्टिप्रमाणाऽधस्तनशीर्षचयान् प्रक्षिपति । तेन पूर्ववत्पर्यन्तरजाऽपूर्वसूक्ष्मकिट्टितोऽनन्तरपूर्वसूक्ष्मकिट्टौ दीयमानं दलमसंख्येयभागहीनं जायते, मध्यमखण्डदलतोऽन्तरजा-ऽपूर्वसूक्ष्मकिट्टिसमानखण्डदलस्याऽसंख्येयगुणहीनत्वात् । तत ऊर्ध्वमेकोत्तरहान्योभयचयानेकोत्तरवृद्ध्याऽधस्तनशीर्षचयानेकैकं च मध्यमखण्डं तावद् ददाति, यावच्चरमपूर्वसूक्ष्मकिट्टिः, नवरं पल्योपमाऽसंख्येयभागप्रमितास्वसंख्यातासु पूर्वसूक्ष्मकिट्टिषु व्रजितासु यत्र यत्राऽपूर्वसूक्ष्मकिट्टिं निर्वर्तयति, तत्र तत्राऽधस्तनशीर्षचयस्थानेऽन्तरजाऽपूर्वसूक्ष्मकिट्टिसमानखण्डं ददाति । तेन पूर्वापूर्वसूक्ष्मकिट्टिसन्धौ सति पूर्वसूक्ष्मकिट्टितोऽपूर्वसूक्ष्मकिट्ट्यामसंख्यातभागेनाधिकं तथाऽपूर्वसूक्ष्मकिट्टेः पूर्वसूक्ष्मकिट्टेश्च सन्धौ सत्यपूर्वसूक्ष्मकिट्टितः पूर्वसूक्ष्मकिट्ट्यामसंख्येयभागेन हीनं दीयमानदलं जायते, शेषासु पूर्वसूक्ष्मकिट्टिषु विशेषहीनक्रमेणैव दीयमानदलं भवति । इत्थं द्वितीयसमये सूक्ष्मकिट्टितया परिणमनाय यद्दलं गृहीतम्, तत्सर्वं प्रक्षिप्तं भवति ।( दृश्यनु यन्त्रकम्-२७ अ )

ततः परं बादरपूर्वापूर्वान्तरकिट्टिषु दलं निक्षिपति । तत्र लोभतृतीयसंग्रहकिट्टौ चतुर्विधसंक्रमदलाल्लोभद्वितीयसंग्रहकिट्टौ च त्रिविधघातदलाच्चतुर्विधबन्धदलाद् यथायोग्यं दलं निक्षिपति ।

तत्र चरमसूक्ष्मकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमपूर्वान्तरकिट्टौ दलमसंख्यातगुणहीनं ददाति, ततः शेषास्वपि सूक्ष्मकिट्टिकरणाद्धाप्रथमसमयवद् भावनीयम् , विशेषाभावात् ।

## इति गणितविभागः ।

यथा सूक्ष्मकिट्टिकरणाद्धाया द्वितीयसमये गणितरीत्या दलिकनिक्षेपो भणितः, तथैव तृतीयादिसमयेषु भणितव्यः । ॥१९८–१९९॥

अथ सूक्ष्मकिट्टिकरणाद्धायां दृश्यमानदलं विवर्णयिषुराह—

**पढमसुहुमाउ चरिमं जावं दीसइ दलं विसेसूणं ।**
**तो य असंखगुणं बायरपढमाअ उवरिं विसेसूणं ॥२००॥ (गीतिः)**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमसूक्ष्मायाश्चरमां यावद् दृश्यते दलं विशेषोनम् ।
ततश्चाऽसंख्यगुणं बादरप्रथमायामुपरि विशेषोनम् ॥२००॥ इति पदसंस्कारः ।

**'पढम०'** इत्यादि, 'प्रथमसूक्ष्मायाः' प्रथमसूक्ष्मकिट्टितः प्रभृति 'चरमां' चरमसूक्ष्मकिट्टिं यावद् 'दलं' प्रदेशाग्रं 'विशेषोनं' विशेषहीनं दृश्यते । 'तो' इत्यादि, 'ततः' चरमसूक्ष्मकिट्टितश्चाऽसंख्यगुणं दलं 'बादरप्रथमायां' लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टौ दृश्यते । **'उवरिं'** इत्यादि, उपरि विशेषोनं दृश्यते ।

इदमुक्तं भवति–सूक्ष्मकिट्टिकरणाद्धायाः प्रथमसमयात् प्रभृति चरमसमयं यावत् प्रथमसूक्ष्मकिट्टौ प्रभूतं दलं दृश्यते । ततो विशेषहीनं दलं द्वितीयस्यां सूक्ष्मकिट्टौ दृश्यते । एवं विशेषहीनक्रमेण तावद् दृश्यते, यावच्चरमसूक्ष्मकिट्टिः । चरमसूक्ष्मकिट्टितश्च लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टावसंख्यातगुणं दलं दृश्यते । किं कारणम् ? इति चेत्, उच्यते-बादरकिट्टिगतदलस्याऽसंख्येयभागप्रमितमेव दलं गृहीत्वा बादरकिट्टितो विशेषाधिकाः सूक्ष्मकिट्टीः करोति । तेन चरमसूक्ष्मकिट्टितो लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टावसंख्यातगुणं दलं दृश्यते । उक्तं च **कषायप्राभृतचूर्णौ–"सुहुमसांपराइयकिट्टीकारगस्स किट्टीसु दिस्समाणपदेसग्गस्स सेढिपरूवणं । तं जहा-जहण्णियाए सुहुमसांपराइयकिट्टीए पदेसग्गं बहुगं, तत्तो अणंतभागहीणं जाव चरिमसुहुमसांपराइयकिट्टि त्ति । तदो जहण्णियाए बादरसांपराइयकिट्टीए पदेसग्गमसंखेज्जगुणं । एसा सेढिपरूवणा जाव चरिमसमयबादरसांपराइओ त्ति ।"**

ततो लोभतृतीयसंग्रहकिट्टिप्रथमाऽवान्तरकिट्टितो विशेषहीनं दलं लोभतृतीयसंग्रहकिट्टिद्वितीयाऽवान्तरकिट्टौ दृश्यते । ततः परमनन्तरानन्तरेण विशेषहीनक्रमेण तावद् दृश्यते, यावल्लोभद्वितीयसंग्रहकिट्टिचरमाऽवान्तरकिट्टिः ॥ २०० ॥

लोभद्वितीयसंग्रहकिट्टिं वेदयतो जीवस्यावलिकात्रिकमात्रप्रथमस्थितिभवनानन्तरं यो विशेषः प्रवर्तते, तं बिभणिषुराह—

**जा आवलितिगसेसा पढमठिई ताव संकमेइ दलं ।**
**बीयत्तो तइयाए तओ परं संकमेइ सुहुमासु ॥२०१॥ (गीतिः)**

यावदावलिकात्रिकशेषा प्रथमस्थितिस्तावत् संक्रामति दलम् ।
द्वितीयातस्तृतीयस्यां ततः परं संक्रामति सूक्ष्मासु ॥२०१॥ इति पदसंस्कारः ।

**'जा'** इत्यादि, लोभद्वितीयसंग्रहकिट्टिं वेदयतः क्षपकस्य यावद् आवलिकात्रिकशेषा 'प्रथमस्थितिः' लोभद्वितीयसंग्रहकिट्टिप्रथमस्थितिर्भवति, तावद् 'द्वितीयातो' लोभद्वितीयसंग्रहकिट्टितः 'तृतीयस्यां' लोभतृतीयसंग्रहकिट्टौ दलं संक्रामति । 'ततो' लोभद्वितीयसंग्रहकिट्टि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमस्थितेरावलिकात्रिकात्परं लोभद्वितीयसंग्रहकिट्टितो दलं 'सूक्ष्मासु' सूक्ष्मकिट्टिष्वेव संक्रामति, प्राक्तूभयत्राऽपि संक्रामति स्मेत्यर्थः। प्रत्यपादि च **कषायप्राभृतचूर्णौ–"लोभस्स विदियकिट्टिं वेदयमाणस्स जा पढमट्ठिदी, तिस्से पढमट्ठिदीए जाव तिण्णि आवलियाओ सेसाओ, ताव लोभस्स विदियकिट्टीदो लोभस्स तदियकिट्टीए संछुब्भदि पदेसग्गं। तेण परं ण संछुब्भदि, सव्वं सुहुमसांपराइयकिट्टीसु संछुब्भदि।"** इति।

प्रथमस्थितौ द्व्यावलिकाशेषायामागालो व्यवच्छिद्यते। ततः समयोनाऽऽवलिकायां गतायां लोभस्य जघन्यस्थित्युदीरणा जायते। तदानीमेव बादरलोभस्य चरमोदयः ॥ २०१ ॥

अथ लोभद्वितीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायां बादरकिट्टीनां सर्वथा सूक्ष्मकिट्टितया परिणतिं प्रतिपिपादयिषुराह—

**खणअहिआवलिसेसाए बिइयातइयगाण सव्वदलं।**
**संकामइ सुहुमासुं वज्जिय णवबद्धमावलिगयं य ॥२०२॥ (गीतिः)**

क्षणाधिकावलिकाशेषायां तु द्वितीयातृतीययोः सर्वदलम्।
संक्रमयति सूक्ष्मासु वर्जयित्वा नवबद्धमावलिकागतं च ॥२०२॥ इति पदसंस्कारः।

**'खण०'** इत्यादि, लोभद्वितीयसंग्रहकिट्टिप्रथमस्थितौ 'क्षणाधिकाऽऽवलिकाशेषायां' समयाधिकावलिकाशेषायां 'नवबद्धं' द्वितीयसंग्रहकिट्टेः समयोनद्व्यावलिकाबद्धं द्वितीयस्थितिस्थम् 'आवलिकागतं' तस्या एवोदयावलिकायां प्रविष्टं च प्रथमस्थितिगतं दलिकं वर्जयित्वा 'द्वितीया-तृतीययोः' लोभद्वितीयसंग्रहकिट्टितृतीयसंग्रहकिट्ट्योः सर्वदलं 'सूक्ष्मासु' सूक्ष्मकिट्टिषु संक्रमयति, सूक्ष्मकिट्टितया परिणमयतीत्यर्थः। न्यगादि च **कषायप्राभृतचूर्णौ—"लोभस्स विदियकिट्टिं वेदयमाणस्स जा पढमट्ठिदी, तिस्से पढमट्ठिदीए आवलियाए समयाहियाए सेसाए ताधे जा लोभस्स तदियकिट्टी, सा सव्वा णिरवयवा सुहुमसंपराइयकिट्टीसु संकंता। जा विदियकिट्टी, तिस्से दो आवलिया मोत्तूण समयूणे उदयावलियपविट्ठं च सेसं सव्वं सुहुमसंपराइयकिट्टीसु संकंतं।"** इति ॥२०२॥

लोभद्वितीयसंग्रहकिट्टिप्रथमस्थितौ समयाधिकावलिकाशेषायां मोहनीयस्य यश्चरमस्थितिबन्धो जायते, तमभिदधच्छेषकर्मणामपि स्थितिबन्धं भणति—

**लोहस्स मुहुत्तंतो बंधो घाईण दिवसंतो।**
**हवइ अघाईणं वासंतो अह भणिमु ठिइसंतं ॥२०३॥ (उपगीतिः)**

लोभस्य मुहूर्त्तान्तर्बन्धो घातिनां दिवसान्तः।
भवत्यघातिनां वर्षान्तरथ भणामः स्थितिसत्त्वम् ॥२०३॥ इति पदसंस्कारः।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

'लोहस्स' इत्यादि, लोभद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये 'लोभस्य' संज्वलनलोभस्य 'मुहूर्तान्तः' मुहूर्तस्य अन्तर्=मध्ये, अन्तर्मुहूर्तमात्र इत्यर्थः, 'बन्धः' स्थितिबन्धो 'भवति' जायते, मोहनीयस्याऽन्तर्मुहूर्तमात्रः स्थितिबन्धो भवतीत्यर्थः । अयं च मोहनीयस्य सर्वजघन्यस्थितिबन्धः । एवं मोहनीयस्यानुभागबन्धोऽपि सर्वजघन्यो भवति ।

'घाईण' इत्यादि, 'घातिनां' मोहनीयस्योक्तत्वाज्ज्ञानावरण-दर्शनावरणा-ऽन्तरायरूपाणां कर्मणां स्थितिबन्धो 'दिवसान्तः' दिवसस्य-अहोरात्रस्य अन्तर्=मध्ये भवति, लोभप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमये यो घातित्रयस्य स्थितिबन्धो दिवसपृथक्त्वमात्र आसीत्, स क्रमेण हीयमानः सन् सम्प्रत्यन्तरहोरात्रप्रमाणो जायत इत्यर्थः । 'अघाईणं' इत्यादि, तदानीं चाऽघातिनां कर्मणां नामगोत्रवेदनीयलक्षणानां स्थितिबन्धो 'वर्षान्तः' वर्षस्याऽन्तर्जायते । प्रतिपादितं च कषायप्राभृतचूर्णौ--"**तम्हि चेव लोभसंजलणस्स ठिदिबंधो अंतोमुहुत्तं तिण्हं घादिकम्माणं ठिदिबंधो अहोरत्तस्स अंतो । णामागोदवेदणीयाणं बादरसांपराइयस्स जो चरिमो ठिदिबंधो, सो संखेज्जेहिं वस्ससहस्सेहिं हाइदूण वस्सस्स अंतो आदो ।**" इति ।

अथ प्रतिजिज्ञासुराह–'अह' इत्यादि, 'अथ' स्थितिबन्धप्ररूपणानन्तरम्, आनन्तर्यार्थकत्वाद् अथशब्दस्य, 'भणामः' प्रतिपादयामः, किम् ? इत्याह–'ठिइसंतं' त्ति 'स्थितिसत्त्वं' सप्तानामपि कर्मणां स्थितिसत्कर्म ॥२०३॥

अथ प्रतिज्ञां निर्वोढुकामः सप्तानामपि स्थितिसत्त्वं व्याहरति—

**लोहस्स मुहुत्तंतो संखसहस्सवरिसा य घाईणं ।**
**होज्जेइ अघाईण उण असंखेज्जवरिसा चरिमे ॥२०४॥**

लोभस्य मुहूर्तान्तः संख्यसहस्रवर्षाश्च घातिनाम् ।
भवत्यघातिनां पुनरसंख्येयवर्षाश्चरमे ॥२०४॥ इति पदसंस्कारः ।

'लोहस्स' इत्यादि, तत्र 'चरिमे' त्ति 'चरमे' लोभद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमये 'लोभस्य' संज्वलनलोभस्य स्थितिसत्त्वं 'मुहूर्तान्तः' अन्तर्मुहूर्तं भवति । 'संख०' इत्यादि, तत्र 'घातिनां' ज्ञानावरण-दर्शनावरणा-ऽन्तरायरूपाणां च कर्मणां स्थितिसत्त्वं संख्यसहस्रवर्षा भवति । 'अघाईण' इत्यादि, 'अघातिनां' नाम-गोत्र-वेदनीयलक्षणानां कर्मणां पुनः स्थितिसत्त्वमसंख्येयवर्षा भवति, लोभप्रथमसंग्रहकिट्टिवेदनाद्धाचरमसमयतः परं संख्यातेषु स्थितिघातेषु गतेषु स्थितिसत्त्वं हीनं सदिदानीमप्येतावद् भवति । उक्तं च कषायप्राभृतचूर्णौ—"**चरिमसमयबादरसांपराइयस्स मोहणीयस्स ट्ठिदिसंतकम्ममंतोमुहुत्तं । ×××**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**णिण्हं घादिकम्माणं ठिदिसंतकम्मं संखेज्जाणि वस्ससहस्साणि×××× णामागोद-वेदणीयाणं ´ठिदिसंतकम्ममसंखेज्जाणि वस्साणि ।"** इति ।

निश्चयनयमाश्रित्य तदानीमेव व्यवच्छिद्यमानः संज्वलनलोभस्य बन्धो व्यवच्छिन्नः । एवं बादरकषायस्योदयोदीरणे व्यवच्छिन्ने तथाऽनिवृत्तिबादरसम्परायगुणस्थानकाद्धाऽपि व्यवच्छिन्ना । यदुक्तं **सप्ततिकाचूर्णौ-"एवं अंतोमुहुत्तं किट्टीओ करेति ताव, जाव लोभस्स बितियकिट्टीए पढमट्ठिती समयाहियावलियसेस त्ति । तम्मि समए लोभसंजलणाए बंधवोच्छेओ, बायरकसायाणं उदओदीरणावोच्छेओ य अनियट्टिकालवोच्छेओ य जुगवं भवंति ।"** इति ।

तदेवं समर्थिता बादरकिट्टिवेदनाद्धा । तस्यां च समर्थितायां समाप्तमनिवृत्तिकरण-निरूपणम् ॥२०४॥

## एकाधिकद्विशततमप्रभृतिगाथाः समाश्रित्य यन्त्रकम्

(१) यावल्लोभद्वितीयसंग्रहकिट्टया आवलिकात्रिकप्रमाणा प्रथमस्थितिः शेषा भवति, तावद् द्वितीयसंग्रह-किट्टितस्तृतीयसंग्रहकिट्टयामपि दलं संक्रामति । ततः परं द्वितीयसंग्रहकिट्टिदलं तृतीयसंग्रहकिट्टौ न संक्रामति, किन्तु सूक्ष्मकिट्टिष्वेव ।

(२) लोभद्वितीयसंग्रहकिट्टिप्रथमस्थितेर्द्वयावलिकयोः शेषयोरागालो व्यवच्छिद्यते ।

(३) लोभद्वितीयसंग्रहकिट्टिप्रथमस्थितेः समयाधिकावलिकायां शेषायाम्

(क) लोभस्य जघन्यस्थित्युदीरणा भवति ।

(ख) समयोनद्वयावलिकाबद्धनूतनदलमुदयावलिकाप्रविष्टदलं च वर्जयित्वा शेषं सर्वं बादरकिट्टिदलं सूक्ष्मकिट्टितया परिणमयति ।

(ग) मोहनीयस्य स्थितिबन्धोऽन्तर्मुहूर्तमात्रः ।

(घ) घातित्रयस्य स्थितिबन्धोऽन्तरहोरात्रम् ।

(ङ) अघातित्रयस्य स्थितिबन्धोऽन्तर्वर्षम् ।

(च) लोभस्य स्थितिसत्त्वमन्तर्मुहूर्तम् ।

(छ) घातित्रयस्य स्थितिसत्त्वं संख्येयसहस्रवर्षाणि ।

(ज) अघातित्रयस्याऽसंख्येयवर्षाः स्थितिसत्त्वं भवति ।

(झ) मोहनीयस्य सर्वजघन्यस्थितिबन्धः ।

(ञ) मोहनीयस्य सर्वजघन्यानुभागबन्धः ।

(ट) निश्चयनयमाश्रित्य

(अ) तदानीं व्यवच्छिद्यमानः संज्वलनकषायस्य बन्धो व्यवच्छिन्नः ।

(ब) तदानीं व्यवच्छिद्यमाने बादरकषायस्योदयोदीरणे व्यवच्छिन्ने ।

(स) एवमेवाऽनिवृत्तिकरणगुणस्थानकाद्धाऽपि व्यवच्छिन्ना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनिवृत्तिबादरसम्परायगुणस्थानकसमाप्तिसमनन्तरं सूक्ष्मसम्परायगुणस्थानकं प्रतिपद्यते । तेन सूक्ष्मसम्परायगुणस्थानके प्रक्रियाविशेषं प्रदर्शयितुकामः प्राह—

**सेकाले सुहुमगुणट्ठाणं पडिवज्जए तयाणिं य ।**
**गुणसेढिं करइ सुहुमकिट्टी उकिरिय वेयइ य ॥२०५॥**

अनन्तरकाले सूक्ष्मगुणस्थानं प्रतिपद्यते तदानीञ्च ।
गुणश्रेणिं करोति सूक्ष्मकिट्टीरुत्कीर्य वेदयति च ॥२०५॥ इति पदसंस्कारः ।

**'सेकाले'** इत्यादि, 'अनन्तरकाले' बादरकिट्टिवेदनाद्धासमाप्तितोऽनन्तरसमये 'सूक्ष्मगुणस्थानं' सूक्ष्मसम्परायगुणस्थानकं प्रतिपद्यते, परिणाममाहात्म्यात् । तदानीं किं करोति ? इत्यत आह— **'तयाणिं य'** इत्यादि, तदानीञ्च 'सूक्ष्मकिट्टीः' सूक्ष्मकिट्टिगतप्रदेशानुत्कीर्य 'गुणश्रेणिं' गुणेन-उदयसमयादारभ्याऽसंख्येयगुणकारेण श्रेणि-प्रदेशरचनां 'करोति' निर्वर्तयति । उदयसमयतः प्रभृत्यसंख्येयगुणक्रमेण दलिकं निक्षिप्य प्रथमस्थितिं विदधातीत्यर्थः । 'वेदयति च' तदानीञ्चैव सूक्ष्मकिट्टीरनुभवति । यदुक्तं **सप्ततिकाचूर्णौ—तओ सेकाले सुहुमसंपराइगकिट्टीओ दलिअं ओकड्ढित्तु पढमट्ठितिं करेइ । ततियतिभागमेत्तं वेदेइ य, तओ सुहुमसंपराइओ वुच्चइ ।**" इति ।

एवं **शतकचूर्णावपि:—**

**"बायररागेण कया सुहुमो वेएइ सुहुमकिट्टीओ ।**
**तम्हा सुहुमकसाओ सुहुमो सुद्धप्प योगप्प ॥१॥"** इति ॥२०५॥

ननु गुणश्रेणिनिक्षेपः सूक्ष्मकिट्टिवेदनाद्धाप्रथमसमये कियान् भवति ? तथा गुणश्रेण्यां तदुपरितनस्थितिषु च दलिकनिक्षेपः कथं भवति ? इत्याशङ्काव्युदासाय प्राह—

**सुहुमगुणत्तो गुणसेढीणिक्खेवो विसेसअब्भहिओ ।**
**तत्थ असंखगुणकमेणं णिखिविज्जा पएसग्गं ॥२०६॥**
**चरिमाउ असंखगुणं अंतरआइम्मि ताउ य विसेसूणं ।**
**उवरि तओ बीयाइम्मि ताउ संखगुणहीणयं तो हीणं ॥२०७॥**
**(आर्यागीतिः)**

सूक्ष्मगुणतो गुणश्रेणिनिक्षेपो विशेषाभ्यधिकः ।
तत्राऽसंख्यगुणक्रमेण निक्षिपति प्रदेशाग्रम् ॥२०६॥
चरमादसंख्यगुणमन्तरादौ तस्माच्च विशेषोनम् ।
उपरि ततो द्वितीयादौ तस्मात् संख्यगुणहीनं ततो हीनम् ॥॥२०६॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'सुहुमगुणत्तो'** इत्यादि, 'सूक्ष्मगुणतः' पदैकदेशे पदसमुदायस्योपचारात् सूक्ष्मसम्परायगुणस्थानकाद्धातो 'गुणश्रेणिनिक्षेपो' मोहनीयस्य गुणश्रेण्यायामोऽन्तरस्थितीनां संख्येयभागकल्पो भवन् विशेषाधिको भवति। भणितं च **कषायप्राभृतचूर्णौ–"गुणसेढिणिक्खेवो सुहुमसांपराइयद्धादो विसेसुत्तरो।"** इति। एवं ज्ञानावरणादीनामपि गलितावशेषगुणश्रेणिनिक्षेपः सूक्ष्मसम्परायाद्धातो विशेषाधिको भवति, नवरं मोहनीयगुणश्रेणिनिक्षेपतः शेषकर्मणां तात्कालिकगलितावशेष-गुणश्रेणिनिक्षेपोऽन्तमुहूर्तकालेनाऽधिको भवति, क्षीणकषायगुणस्थानकालस्योऽपरि शेषकर्मगुणश्रेणिशिरोदर्शनात्। अथ मोहनीयगुणश्रेणौ तदुपरि च दलनिक्षेपं भणति–**'तत्थ'** इत्यादि, 'तत्र' सूक्ष्मसम्परायाद्धातो विशेषाधिकाऽऽयामलक्षणे गुणश्रेणिनिक्षेपेऽसंख्यगुणक्रमेण प्रदेशाग्रं 'निक्षिपति' प्रक्षिपति। अयम्भावः-सूक्ष्मकिट्टिगतस्य दलस्याऽसंख्येयभागप्रमाणं दलमुत्कीर्योत्कीर्णस्य च दलस्याऽसंख्येयभागप्रमितं दलं गृहीत्वोदयनिषेके स्तोकं दलं ददाति। तदनन्तरोपरितनद्वितीयनिषेकेऽसंख्येयगुणं दलं ददाति। ततोऽपि तृतीयनिषेकेऽसंख्येयगुणं दलं ददाति। एवमसंख्यातगुणक्रमेण तावद् ददाति, यावदन्तर्मुहूर्तप्रमाणगुणश्रेणिनिक्षेपस्य चरमनिषेकः। अवाचि च **कषायप्राभृतचूर्णौ–"तदो पदेसग्गमोकड्डियूण उदये थोवं दिण्णं। अंतोमुहुत्तद्धमेत्तमसंखेज्जगुणाए सेढीए देदि।"** इति। ततो बह्वसंख्येयभागप्रमितं दलं गृहीत्वा 'चरमात्' प्रत्यासत्त्या गुणश्रेणिनिक्षेपचरमनिषेकतोऽसंख्यगुणं प्रदेशाग्रम् 'अन्तरादौ' अन्तरकरणप्रथमनिषेके निक्षिपति। इदमुक्तं भवति–इदानीमतीत्थापनां वर्जयित्वा सर्वत्र दलनिक्षेपं करोति, तेनाऽन्तरकरणं न संभवति, तथाप्यनिवृत्तिकरणे निष्पादितस्याऽन्तरकरणस्य गुणश्रेणिं वर्जयित्वा येषु निषेकेषु दलनिक्षेपं करोति, ते **"भूतपूर्वकस्तदुपचारः"** इति न्यायेनाऽन्तरकरणनिषेका भण्यन्ते, तेषां च प्रथमनिषेके गुणश्रेणिशिरस उपरितने प्रथमनिषेक इति यावत्, गुणश्रेणिचरमनिषेकतोऽसंख्येयगुणं दलिकं निक्षिपति। **'ताउ'** इत्यादि, 'तस्मात्' अन्तरप्रथमनिषेकतश्च विशेषोनं दलमुपरि यथाक्रमं निक्षिपति, यावदन्तरचरमनिषेकः, तस्योपरि भिन्नक्रमेण दलिकनिक्षेपप्रतिपादनात्। अथ द्वितीयस्थितिप्रथमनिषेके दलनिक्षेपं व्याहर्तुकामः प्राह–**'तओ'** इत्यादि, 'ततः' अन्तकरणचरमनिषेकतो 'द्वितीयादौ' द्वितीयायाः—द्वितीयस्थित्या आदौ–प्रथमनिषेके **'संखगुणहीणयं'**ति कप्रत्ययस्य स्वार्थिकत्वात् संख्यगुणहीनं दलं प्रक्षिपति। समवादि च **कषायप्राभृतचूर्णौ--"गुणसेढिसीसगादो जा अणंतरट्ठिदो, तत्थ असंखेज्जगुणं। तत्तो विसेसहीणं ताव, जाव पुव्वसमये अंतरमासी तस्स अंतरस्स चरिमादो अंतरट्ठिदीदो त्ति पुव्वसमये जा विदियट्ठिदी, तिस्से आदिट्ठिदोए दिज्जमाणगं पदेसग्गं संखेज्जगुणहीणं तत्तो विसेसहीणं।"** इति। इहापि द्वितीयस्थितिव्यपदेशस्तु **"भूतपूर्वकस्तदुपचारः"** इति न्यायाद् बोध्यः। अयं भावः—सूक्ष्मसम्परायगुणस्थानकप्रथमसमये सत्तागतदलस्याऽसंख्येयभागप्रमितं दलमुत्कीर्य

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

तस्यैकाऽसंख्येयभागप्रमितं दलं गृहीत्वा गुणश्रेणौ निक्षिप्य शेषान् बहूनसंख्येयभागान् गुणश्रेणेरुपरि निक्षिपति । तत्राऽपि बह्वसंख्येयभागमात्रदलस्य बहून् संख्येयभागानेकं वा संख्येयभागमन्तरस्थितिषु विशेषहीनक्रमेण निक्षिप्य शेषदलं द्वितीयस्थितौ समयाऽधिकाऽऽवलिकाप्रमाणातीत्थापनान्यूनायां विशेषहीनक्रमेण प्रक्षिपति । इह यथा प्रथमपक्षे दोषाभावः, तथा द्वितीयेऽपि । तथाहि–अपकृष्टसर्वदलस्या-ऽसंख्येयभागप्रमाणं दलमन्तरस्थितिनिषेकतः संख्यातगुणहीनेषु गुणश्रेणिनिषेकेषु यथाविभागं ददाति, बहुसंख्यातभागप्रमितदलस्य च संख्येयतमभागं पृथक्स्थाप्य बहून् संख्येयभागान् यथाविभागं गुणश्रेणिनिषेकतः संख्यातगुणेष्वन्तरस्थितिनिषेकेषु ददाति । इत्थं गुणश्रेणिचरमनिषेकतोऽन्तरस्थितिप्रथमनिषेके दीयमानदलमसंख्येयगुणं जायते, संख्यातगुणनिषेकेष्वसंख्यातगुणदलिकस्य प्रक्षेपात् । ततः परं विशेषहीनक्रमेण तावद्ददाति, यावदन्तरस्थितिचरमनिषेकः । पृथक्स्थापितैकसंख्येयभागन्त्वन्तरस्थितितः संख्यातगुणेषु द्वितीयस्थितिनिषेकेषु यथाविभागं निक्षिपति । इत्थमन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेके दीयमानं दलं संख्यातगुणहीनं जायते, संख्यातगुणनिषेकेषु संख्येयभागमात्रदलिकस्य प्रक्षिप्यमाणत्वादिति प्रथमपक्षः ।

अथ द्वितीयपक्षो व्युत्पाद्यते—अपकृष्टसकलदलस्याऽसंख्येयभागः पूर्ववद् गुणश्रेणिनिषेकेषु दातव्यः । शेषाणां बह्वसंख्येयभागानां संख्येयतमभागमन्तरस्थितिनिषेकेषु यथाविभागं निक्षिपति । इत्थमपि गुणश्रेणिचरमनिषेकतोऽन्तरस्थितिप्रथमनिषेके दीयमानं दलमसंख्येयगुणं जायते, संख्यातगुणनिषेकेष्वसंख्यातगुणदलिकस्य निक्षिप्यमाणत्वात् । ततः शेषान् बहुसंख्येयभागान् समयाधिकाऽवलिकारूपामतीत्थापनां वर्जयित्वा द्वितीयस्थितिसर्वनिषेकेषु विशेषहीनक्रमेण ददाति । इत्थमप्यन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेके दीयमानं दलं संख्येयगुणहीनं भवति, अन्तरस्थितौ दीयमानदलतो द्वितीयस्थितौ दीयमानदलस्य संख्येयगुणत्वेऽप्यन्तरस्थितिनिषेकतो द्वितीयस्थितिनिषेकाणां संख्येयगुणत्वात् * ।

एवंक्रमेण दलिकप्रक्षेपस्तावद्वाच्यः, यावत् सूक्ष्मसम्परायगुणस्थानके प्रथमस्थितिघातः पूर्णो भवति, नवरं प्रथमस्थितिघाताद्धाचरमसमययुत्कीर्णस्य दलस्य बह्वसंख्येयभागमात्रदलस्य

---

*जयधवलाकारा अपि प्रथमपक्षं प्रदर्श्य द्वितीयपक्षेऽपि दोषाभावं स्वीकुर्वन्ति । तथा च तद्ग्रन्थः- "कुदो ? अंतरट्ठिदीसु पुव्वुत्तदव्वस्स संखेज्जे भागे णिसिंचियूण पुणो सेससंखेज्जदिभागमेत्तदव्वमंतरायामादो संखेज्जगुणविदियट्ठिदीए जहापविभागं णिसिंचमाणस्स परिप्फुडमेवेदम्मि संधिविसये दिज्जमाणपदेसग्गस्स संखेज्जगुणहीणत्तदंसणादो । × × × × जइवि एत्थ अंतरट्ठिदीसु ओकड्डिदसयलदव्वस्स संखेजदिभागमेत्तमेव दव्वं णिसिंचदि, विदियट्ठिदीए च संखेज्जे भागे णिसिंचदि त्ति घेप्पइ । तो विषयदत्थसिद्धीए णत्थि पडिबंधो, अंतरायामादो विदियट्ठिदीआयामस्स(स्सा)संखेज्जगुणत्तमस्सियूण तस्स सिद्धीए बाहाणुवलंभादो ।" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संख्येयतमभागमेवा-ऽन्तरस्थितिषु निक्षिपति, न तु प्रथमविकल्पेन बहुसंख्येयभागान् । कथमेतदवसीयते ? इति चेत् , उच्यते—सूक्ष्मकिट्टिवेदनाद्धायां प्रथमस्थितिघाताद्धाया द्विचरमसमयं यावत् स्थितिखण्डगतदलस्याऽसंख्येयभागमात्रमेव दलमुत्कीर्णं भवति, अपकर्षणभागहारेण मोहनीयदलं भक्त्वैकभागस्योत्करणात् । तेन स्थितिखण्डगतदलबहुसंख्येयभागमात्रदलं प्रथमस्थितिघाताद्धाचरमसमये गृह्यते, तच्च मोहनीयसर्वदलस्य संख्येयभागमात्रं भवति, स्थितिघातेन मोहनीयस्य घात्यमानस्थितीनां तत्स्थितिसत्कर्मसंख्येयभागप्रमाणत्वस्य वक्ष्यमाणत्वात् । तथा स्थितिघातेन घात्यमानस्थितितः संख्यातगुणहीना अन्तरस्थितयो भवन्ति, अल्पबहुत्वस्य वक्ष्यमाणत्वात् । अत्र यद्युत्कीर्णदलस्य बहुसंख्येयभागमात्रं दलमन्तरस्थितौ प्रक्षिप्यैकसंख्येयतमभागप्रमाणं दलं द्वितीयस्थितौ प्रक्षिपेत् , तर्ह्यन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेके दृश्यमानं दलमेकगोपुच्छाकारेण न स्यात् , घात्यमानस्थितिनिषेकतः संख्यातगुणहीनेष्वन्तरस्थितिनिषेकेषु घात्यमानस्थितिगतबहुसंख्येयभागप्रमितदलप्रक्षेपस्वीकारात् । किन्त्वन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेके दृश्यमानं दलं संख्यातगुणहीनं प्रसज्येत । वक्ष्यति च प्रथमस्थितिघाते पूर्णे **नवोत्तरद्विशततम**गाथायां गुणश्रेणिं मुक्त्वोपरितननिषेकेषु दृश्यमानं दलिकं गोपुच्छाकारेण तिष्ठतीति । तेन सह विरोधः स्यात् । तस्मात् प्रथमस्थितिघाताद्धाचरमसमययुत्कीर्णदलस्याऽसंख्येयभागप्रमितं दलं गुणश्रेणिनिषेकेषु प्रक्षिप्य शेषबहुसंख्येयभागमात्रदलस्य संख्येयभागप्रमाणं दलमन्तरस्थितिनिषेकेषु निक्षिप्य बहुसंख्येयभागप्रमाणं दलं स्थितिखण्डरहितद्वितीयस्थितिनिषेकेषु निक्षिपति । तथाहि—सूक्ष्मसम्परायकाले प्रथमस्थितिघाताद्धायाश्चरमसमये मोहनीयदलस्य संख्येयभागमात्रं दलमुत्किरति, घात्यमानस्थितिखण्डस्य स्थितिसत्कर्मसंख्येयभागप्रमाणत्वात् , उत्कीर्य चोत्कीर्णदलस्याऽसंख्येयभागमात्रं दलं गृहीत्वोदयसमयतः प्रभृत्यसंख्येयगुणक्रमेण तावत् प्रक्षिपति, यावद् गुणश्रेणिशिरः । बहुसंख्येयभागप्रमाणदलतस्तु दलमादाय गुणश्रेणिशिरस उपरितनेऽन्तरस्थितिप्रथमनिषेके गुणश्रेणिचरमनिषेकतोऽसंख्येयगुणं दलं प्रक्षिपति । ततः परं विशेषहीनक्रमेण तावत् प्रक्षिपति, यावदन्तरस्थितिचरमनिषेकः । ततः परं द्वितीयस्थितिप्रथमनिषेके संख्यातगुणहीनं दलं प्रक्षिपति । ततः परं विशेषहीनक्रमेण तावत् प्रक्षिपति, यावद् घात्यमानरहितद्वितीयस्थितिचरमनिषेकः ।

नन्वन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेके संख्यातगुणहीनं दलं प्रक्षिपतीत्येतत् कथमवसीयते ? इति चेत् , उच्यते—प्रथमस्थितिघाताद्धाद्विचरमसमयं यावद् द्वितीयस्थितिगतसर्वदलस्याऽसंख्येयभागकल्पं दलमन्तरस्थितौ निक्षिप्तम् । प्रथमस्थितिघाताद्धाचरमसमये तु स्थितिखण्डतः सर्वं दलमुत्कीर्योत्कीर्णदलस्य संख्येयभागमात्रं दलमन्तरस्थितिनिषेकेषु निक्षिपति, बहुसंख्येयभागप्रमाणं च संख्यातगुणेषु द्वितीयस्थितिनिषेकेषु निक्षिपति । तत्र द्वितीयस्थितेरेकैकनिषेके पुरातनसत्तागतदलस्य संख्येयभागमात्रं दलं निक्षिप्यमाणं भवति, ततश्च संख्यातगुणं दलमन्तरस्थितेरेकै-

कनिषेके निक्षिपति, अन्यथा स्थितिघाते पूर्णे दृश्यमानदलमेकगोपुच्छाकारेण नवाधिकद्विशततम-गाथायां यद्वक्ष्यति, तन्नोपपद्येत। इत्थमन्तरस्थितिचरमनिषेकतो द्वितीयस्थितेः प्रथमनिषेके संख्यातगुणहीनं दलं प्रक्षिपति। पश्यन्तु पाठका यन्त्रकम्—२८।

## अथ गणितविभागः।

गणितरीत्येत्थं दर्शयितव्यम्—अन्तरस्थितिनिषेकैः स्थितिखण्डनिषेकराशिर्विभज्यते, तदा संख्यातरूपाणि लभ्यन्ते, अन्तरस्थितिनिषेकतः स्थितिखण्डस्य संख्येयगुणेन बृहत्तरत्वात्। तानि संख्यातरूपाणि पृथक्पृथक् स्थापयितव्यानि। अथ संख्यातरूपैः स्थितिखण्डसर्वनिषेकान् खण्डयित्वा पृथक्पृथक्स्थापितेषु संख्यातरूपेष्वेकैकं खण्डं दातव्यम्। तत्रैकरूपे लब्धनिषेकाः सर्वान्तरस्थितिनिषेकप्रमाणा भवन्ति। अथैकरूपे प्राप्तनिषेकान् गृहीत्वाऽन्तरस्थितिनिषेकराशिना विभज्यैकैकनिषेकमन्तरस्थितेरेकैकनिषेके प्रक्षिपेत्। इत्थञ्च जाते प्रक्षेपेऽन्तरस्थितिचरमनिषेके द्वितीयस्थितिप्रथमनिषेकतो दृश्यमानदलं किञ्चिदधिकं जायते, पुरातनदलस्य तत्र सत्त्वात्। ततो द्वितीयरूपे प्राप्तनिषेकान् संख्यातराशिना विभज्यैकखण्डमन्तरस्थितिनिषेकेषु यथाविभागं पुनर्निक्षिपति, शेषाणि बहूनि खण्डानि गृहीत्वा यथाविभागं द्वितीयस्थितिनिषेकेषु निक्षिपति, संख्यातराशिश्चाऽत्रान्तरस्थितिनिषेकराशिभाजितगुणश्रेणिवर्जशेषाऽघात्यमानस्थितिसत्कर्मनिषेकप्रमाणो बोद्धव्यः। एवं तृतीयादिरूपेषु स्थापितनिषेकगतदलमन्तरस्थितिनिषेकेषु द्वितीयस्थितिनिषेकेषु च यथागमं निक्षिपति। एवंक्रमेण निक्षिपतो जीवस्याऽन्तरस्थितिचरमनिषेके निक्षिप्तसकलदलतो द्वितीयस्थितिप्रथमनिषेके निक्षिप्तसकलदलं संख्यातगुणहीनं भवति।

अथासत्कल्पनया दर्श्यते—कल्प्यन्तां गुणश्रेणिनिक्षेपनिषेकाश्चत्वारः (४), अन्तरस्थितिनिषेका अष्टौ (८), प्रथमस्थितिखण्डं पुनर्द्वात्रिंशन्निषेकमात्रम् (३२), शेषद्वितीयस्थितिस्त्वष्टचत्वारिंशदधिकद्विशतनिषेकप्रमाणा (२४८), प्रथमस्थितिघाताद्धायाश्च द्विचरमसमयं यावदन्तरस्थितिप्रथमनिषेके निक्षिप्तदलानि षट् सहस्राणि (६०००)। तत उत्तरोत्तरनिषेके दलिकदशकरूपेण (१०) चयेन हीनानि हीनतराणि तावन्निक्षिप्तानि, यावदन्तरस्थितिचरमनिषेकः। तेनाऽन्तरस्थितिचरमनिषेके त्रिंशदधिकनवपञ्चाशच्छतमात्रं (५९३०) दलं प्रक्षिप्तम्। अथ द्वितीयस्थितिप्रथमनिषेकयेकलक्षमात्रं (१०००००) दलं कल्प्यम्। तत उत्तरोत्तरनिषेके विंशतिदलिकात्मकचयेन हीनं हीनतरं दलं तावत् कल्प्यम्, यावत् प्रथमस्थितिखण्डचरमनिषेकः। तेन प्रथमस्थितिखण्डचरमनिषेके दलमशीत्यधिकपञ्चपञ्चाशच्छतन्यूनलक्षमात्रम्। इह यद्यपि द्वितीयस्थितिप्रथमनिषेकतः प्रभृति प्रथमस्थितिखण्डचरमनिषेकं यावद् दलिकं विशेषहीनं भवति, तथापि विशेषहीनत्वं न विवक्षणीयम्, गणितप्रक्रियासौकर्यलाभाद् अकिञ्चित्करत्वाच्च। अतो द्वितीयस्थितिप्रथमनिषेकतः प्रथमस्थितिखण्डचरमनिषेकं यावदेकैकस्मिन् निषेकयेकलक्षमात्रं दलं बोद्धव्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२०६-२०७ गाथाद्वयमाश्रित्य सूक्ष्मसम्परायाद्धाप्रथमसमये दीयमानदलप्ररूपणा
२०८ गाथामाश्रित्य सूक्ष्मसम्परायाद्धाप्रथमसमये दृश्यमानदलप्ररूपणा
२१० गाथाश्चाश्रित्य सूक्ष्मसम्परायाद्धादीनामल्पबहुत्वम् ।




सङ्केतविवरणम्:—

१– सूक्ष्मसम्परायाद्धा, सा च स्तोका (गाथा–२०६, २१०)।

२– गुणश्रेणिनिक्षेपः, स च सूक्ष्मसम्परायाद्धातो विशेषाधिकः (गाथा-२०६, २१०) तस्मिंश्च दीयमानं दलं यथोत्तरमसंख्येयगुणक्रमेण भवति (गाथा–२०६)। एवं दृश्यमानमपि (गाथा–२०८)

३– अन्तरस्थितिनिषेकाः, ते च गुणश्रेणिनिक्षेपतः संख्येयगुणाः (गाथा-२१०)।

△ अन्तरकरणप्रथमनिषेके गुणश्रेणिचरमनिषेकतोऽसंख्येयगुणं दीयमानं दलम्। ततो यथोत्तरं विशेषहीनं विशेषहीनम् (गाथा–२०७)। एवं दृश्यमानमपि (गाथा-२०८)।

(पृष्ठं परावर्तयन्तु)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

● (i) अन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेके संख्येयगुणहीनं दीयमानं दलम्। ततः परमतीत्थापनां वर्जयित्वा यथोत्तरं सर्वत्र विशेषहीनक्रमेण दीयमानदलम् (गाथा-२०७)।

(ii) दृश्यमानं त्वन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेकेऽसंख्येयगुणं दलम्। ततः परं यथोत्तरं सर्वत्र विशेषहीनं विशेषहीनम (गाथा-२०८)।

४– प्रथमस्थितिखण्डम्, तच्चा-ऽन्तरस्थितिनिषेकेभ्यः संख्येयगुणम्। (गाथा-२१०)
सूक्ष्मसम्परायाद्धाप्रथमसमये मोहनीयस्थितिसत्ता प्रथमस्थितिखण्डतः संख्येयगुणा(गाथा-२१०)

. . . लघुभिर्बिन्दुभिर्गुणश्रेण्यां दलं दर्शितम्।

* अनेन चिह्नेना-ऽन्तरस्थितौ दलं सूचितम्।

★ अनेन चिह्नेन प्रथमस्थितिखण्डरहितद्वितीयस्थितौ पुरातनदलं सूचितम्।

° ° ° एतैः शून्यैर्द्वितीयस्थितौ दीयमानं दलं दर्शितम।

● ● ● ● ● एतैर्गुरुभिर्बिन्दुभिः प्रथमस्थितिखण्डे दलं दर्शितम्।



अथाऽन्तरस्थितिनिषेकैरष्टभिः (८) स्थितिखण्डराशिर्द्वात्रिंशद् विभज्यते, तदा संख्यातरूपाणि चत्वारि ($\frac{३२}{८}$=४) लभ्यन्ते। तानि च पृथक्पृथक्स्थापयितव्यानि १-१-१-१। अथ संख्यातरूपैश्चतुर्भिः (४) स्थितिखण्डगतनिषेका द्वात्रिंशद् (३२) भज्यन्ते, तदैकखण्डमष्टनिषेकप्रमाणं प्राप्यते ($\frac{३२}{४}$=८)। तच्चैकैकं खण्डं पृथक्स्थापितसंख्यातरूपेषु दातव्यम्। $\frac{१}{८}$ $^{१}$ $\frac{१}{८}$ $\frac{१}{८}$। इत्थमेकरूपेऽष्टौ निषेकाः प्राप्यन्ते, ते चाऽन्तरस्थितिप्रमाणा भवन्ति। एकरूपे च प्राप्तनिषेका अष्टौ (८) अन्तरस्थितिराशिनाऽष्टरूपेण भज्यन्ते, तदैकनिषेको लभ्यते। स चाऽन्तरस्थितेरेकैकनिषेके प्रक्षेप्तव्यः। दीयमानयेकैकनिषेकयेकलक्षमात्रदलस्य कल्पितत्वादन्तरस्थितेरेकैकस्मिन् निषेके लक्षमङ्ख्यं दलिकं प्रक्षिपति। तेनाऽन्तरस्थितिचरमनिषेके द्वितीयस्थितिप्रथमनिषेकतः किञ्चिदधिकं दलं जायते, तत्र पुरातनदलस्य त्रिंशदधिकनवपञ्चाशच्छतमात्रस्य सत्त्वात्। द्वितीयरूपे प्राप्ताऽष्टनिषेकगतदलमष्टलक्षमात्रं संख्यातराशिना विभक्तव्यम्। संख्यातराशिश्चात्राऽन्तरस्थितिराशिनाष्टाख्येन गुणश्रेणिवर्जसर्वाऽघात्यमानस्थितिनिषेकेषु षट्पञ्चाशदधिकद्विशतमात्रेषु विभक्तेषु द्वात्रिंशल्लभ्यते। ($\frac{२५६}{८}$=३२)। तेनैकखण्डं पञ्चविंशतिसहस्रदलप्रमाणं ($\frac{८०००००}{३२}$=२५०००) भवति। ततस्तदेकं खण्डं गृहीत्वाऽष्टनिषेकमात्रेष्वन्तरस्थितिषु यथाविभागं प्रक्षिपति। तेनाऽन्तरस्थितेरेकैकस्मिन् निषेके साधिकत्रिसहस्रमात्रं दलं प्रक्षिपति। द्वितीयस्थितौ तु बहूनि खण्डानि पादोनाष्टलक्षदलनिष्पन्नानि यथाविभागं (७७५०००) प्रक्षिपति, तेन द्वितीयस्थितिप्रथमनिषेकेऽपि साधिकत्रिसहस्रमात्रं दलं प्रक्षिप्तं भवति।

एवंक्रमेण तृतीयादिरूपेषु प्राप्तनिषेकान् गृहीत्वा यथाविभागमन्तरस्थितिनिषेकेषु द्वितीयस्थितिनिषेकेषु च तथा प्रक्षिपति, यथाऽन्तरस्थितिनिषेकेषु द्वितीयस्थितिनिषेकेषु च दृश्यमानं दलं गोपुच्छाकारेण भवतीति। अनेन क्रमेण दलिके प्रक्षिप्ते द्वितीयस्थितिप्रथमनिषेके प्रक्षिप्यमाणानि दलिकानि सर्वसंख्यया साधिकैकविंशतिसहस्रमात्राणि जायन्ते (साधिकानि २१०००), अन्तरस्थितिचरमनिषेके तु साधिकैकविंशतिसहस्रोत्तरलक्षमात्राणि (साधिकानि १२१०००) भवन्ति। इत्थमन्तरस्थितिचरमनिषेके दत्तदलिकतो द्वितीयस्थितिप्रथमनिषेके दीयमानदलं संख्येयगुणहीनं जायते ॥२०६–२०७॥

दीयमानदलं प्ररूप्य सूक्ष्मसम्परायाद्धाप्रथमसमयतः प्रभृति दृश्यमानदलं निरूपयिषुराह–

**दीसइ अंतरपढमं जाव दलमसंखगुणकमेणं तत्तो।**
**हीणकमेणं बीयाइम्मि असंखगुणमुवरिं तु विसेसूणं ॥२०८॥**

**(आर्यागीतिः)**

दृश्यतेऽन्तरप्रथमं यावद् दलमसङ्ख्यगुणक्रमेण ततः।
हीनक्रमेण द्वितीयादावसंख्यगुणमुपरि तु विशेषोनम् ॥२०८॥ इति पदसंस्कारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'दीसइ' इत्यादि, तत्र 'अन्तरप्रथमम्' अन्तरकरणप्रथमनिषेकं यावद् 'दलं' प्रदेशाग्रम् 'असंख्यगुणक्रमेण' असंख्यातगुणक्रमेण दृश्यते। इदमुक्तं भवति–सूक्ष्मसम्परायाद्धा-प्रथमसमययुदयस्थितौ स्तोकं दलं दृश्यते। ततो द्वितीयनिषेकेऽसंख्यातगुणम्, ततोऽपि तृतीयनिषेकेऽसंख्यातगुणम्, एवंक्रमेण तावद् दृश्यते, यावद् गुणश्रेणिशिरः। ततोऽपि गुणश्रेणिशिरसोऽनन्तरोपरितननिषेकेऽन्तरकरणप्रथमनिषेक इत्यर्थः, असंख्येयगुणं दलं दृश्यते, दीयमानदलतो दृश्यमानदलस्याऽनतिरिक्तत्वेन दीयमानदलवद् दृश्यमानदलस्याऽपि तथाविधक्रमोपपत्तेः।

'तत्तो' इत्यादि, 'ततः' अन्तरस्थितिप्रथमनिषेकतः परं 'हीनक्रमेण' विशेषहीनक्रमेण दलं दृश्यते, यावदन्तरस्थितिचरमनिषेकः, द्वितीयस्थितिप्रथमनिषेकेऽसंख्येयगुणदृश्यमानदलस्य प्रतिपादनात्। अयं भावः–अन्तरस्थितिप्रथमनिषेकतोऽन्तरस्थितेर्द्वितीयनिषेके विशेषहीनं दलं दृश्यते, ततोऽपि तृतीयनिषेके विशेषहीनं दृश्यते, एवंक्रमेण तावद् दृश्यते, यावदन्तरस्थितेश्चरमनिषेकः, अन्तरस्थितौ दृश्यमानदलस्य दीयमानदलतोऽनतिरेकेण तथाविधक्रमोपपत्तेः।

'बीयाइम्मि' 'द्वितीयादौ' द्वितीयस्थितिप्रथमनिषेकेऽन्तरस्थितिचरमनिषेकतोऽसंख्यगुणं दलं दृश्यते। कथमेतदवसीयते ? इति चेत्, उच्यते––अन्तरस्थितौ सत्तागतसकलदलस्याऽसंख्येयभागमात्रं दलं प्रक्षिप्तम्, उत्कीर्णस्य सकलस्याऽपि दलस्य मोहनीयसकलदलाऽसंख्येयभागमात्रत्वात्। बह्वसंख्यातभागप्रमाणदलं चाऽन्तरस्थितितः संख्यातगुणेषु द्वितीयस्थितिनिषेकेषु यथाविभागं तिष्ठति। तेनाऽन्तरस्थितितो द्वितीयस्थितिप्रथमनिषेके दृश्यमानं दलमसंख्येयगुणं भवति। 'उवरिं' इत्यादि, 'उपरि' द्वितीयस्थितिप्रथमनिषेकस्योपरि तु 'विशेषोनं' विशेषहीनं दलं यथोत्तरं दृश्यते। इदमुक्तं भवति–द्वितीयस्थितिप्रथमनिषेके दृश्यमानदलतो द्वितीयस्थितिद्वितीयनिषेके दलं विशेषहीनं दृश्यते, ततोऽपि तृतीयनिषेके विशेषहीनम्। एवं विशेषहीनक्रमेण तावद् दृश्यते, यावद् द्वितीयस्थितिचरमनिषेकः। अनेन क्रमेण दृश्यमानं दलं तावद्वक्तव्यम्, यावत्सूक्ष्मसम्परायाद्धायां प्रथमस्थितिखण्डं निःशेषतो नोत्कीर्यते, प्रथमस्थितिखण्डे तूत्कीर्णे उत्तरगाथया द्वितीयादिस्थितिघातेषु दृश्यमानदलस्य भिन्नक्रमेण प्रतिपादनात्। उक्तं च कषायप्राभृतचूर्णौ–"**पढमसमयसुहुमसांपराइयस्स उदये दिस्सदि पदेसग्गं थोवं। विदियाए ट्ठिदीए असंखेज्जगुणं दीसदि। (एवं) ताव जाव (गुणसेढिसीसयं त्ति) गुणसेढिसीसयादो अण्णा च एक्का ठिदि त्ति। तत्तो विसेसहीणं ताव, जाव चरिमअंतरट्ठिदि त्ति। तत्तो असंखेज्जगुणं। तत्तो विसेसहीणं। एस कमो ताव, जाव सुहुमसांपराइयस्स पढमट्ठिदिखंडयं चरिमसमयअणिल्लेविदं त्ति।**" ॥२०८॥

प्रथमस्थितिघाते पूर्णे द्वितीयादिस्थितिघातकाले दीयमानं दृश्यमानं च दलं विभणिषुराह––

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## यन्त्रकम्-२९ (चित्रम्-२९)

### सूक्ष्मसम्परायाद्धायां द्वितीयादिस्थितिघातावसरे दृश्यमानदलप्ररूपणा




सङ्केतविवरणम्:—

१–गुणश्रेणिनिक्षेपः, तस्मिँश्चोत्तरोत्तरनिषेकेऽसंख्येयगुणक्रमेण दलिकं दृश्यते।

२–स च गुणश्रेणेरुपरितनः प्रथमनिषेकः, तस्मिँश्च गुणश्रेणिचरमनिषेकतोऽसंख्येयगुणं दलं दृश्यते। ततः परं सर्वत्र विशेषहीनक्रमेण दलं दृश्यते। तेना–ऽन्तरचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेके विशेषहीनं दलं दृश्यते। एवमन्यत्रा–ऽपि।

यथा दृश्मानं दलं चित्रे दर्शितम्, तथैव दीयमानमपि दलं बोध्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## बीयाइट्ठिइघायेसुं गुणसेढिउवरिल्लपढमणिसेगं ।
## जावं दिज्जंतं दीसंतं य असंखगुणकमा तो हीणं ।२०९। (आर्यागीतिः)

द्वितीयादिस्थितिघातेषु गुणश्रेण्युपरितनप्रथमनिषेकम् ।
यावद् दीयमानं दृश्यमानञ्चाऽसंख्यगुणक्रमात् ततो हीनम् ॥२०९॥ इति पदसंस्कारः ।

**'बीयाइ०'** इत्यादि, दलमिति पदं पूर्वतोऽनुवर्तते । 'द्वितीयादिस्थितिघातेषु' सूक्ष्मसम्परायाद्धायां प्रथमस्थितिघाते पूर्णे द्वितीयादिस्थितिघातेषु 'गुणश्रेण्युपरितनप्रथमनिषेकं यावद्' गुणश्रेणेरुपरितनं प्रथमनिषेकं यावदसंख्यगुणक्रमाद् दीयमानं दृश्यमानञ्च दलं भवति । 'तो' इत्यादि, 'ततो' गुणश्रेणेरुपरितनप्रथमनिषेकतः परं 'हीनं' विशेषहीनं विशेषहीनं दीयमानं दृश्यमानञ्च दलिकं भवति । इदमुक्तं भवति–सूक्ष्मसम्परायाद्धायां प्रथमस्थितिघाते पूर्णे द्वितीयस्थितिघातप्रथमसमयतः प्रभृति सत्तागतसकलदलाऽसंख्येयभागमात्रं दलमुत्कीर्योत्कीर्णदलाऽसंख्येयभागप्रमितं च दलं गृहीत्वोदयनिषेके स्तोकं दलं ददाति । ततोऽनन्तरद्वितीयनिषेकेऽसंख्येयगुणं दलं ददाति । ततोऽप्यसंख्येयगुणं तृतीयनिषेके । एवमसंख्येयगुणक्रमेण तावत्प्रक्षिपति, यावद्गुणश्रेणिशिरः । तत उत्कीर्णदलस्य बह्वसंख्येयभागप्रमाणाद् दलाद् दलमादाय गुणश्रेणिशीर्षस्योपरितने प्रथमनिषेकेऽसंख्येयगुणं दलं ददाति । ततो विशेषहीनक्रमेण तावद् ददाति, यावदतीत्थापनाऽप्राप्ता भवति, नवरं स्थितिघाताद्धायाश्चरमसमये सत्तागतदलस्य संख्येयभागमात्रदलमुत्कीर्य स्थितिखण्डप्रमाणामतीत्थापनां वर्जयित्वा शेषस्थितिषु पूर्वोक्तक्रमेण दलं ददाति । एवंक्रमेण तावद्वक्तव्यम्, यावत्सूक्ष्मसम्परायगुणस्थानके मोहनीयस्य चरमस्थितिघातः । यदवादि **कषायप्राभृतचूर्णौ–"विदियादो ठिदिखंडयादो ओकड्डियूण (जं) पदेसग्गमुदये दिज्जदि, तं थोवं । तदो दिज्जदि असंखेज्जगुणाए सेढीए ताव, जाव गुणसेढीसीसयादो उवरिमाणंतरा एक्का ट्ठिति त्ति, तदो विसेसहीणं । एसो पाए सुहुमसांपराइयस्स जाव मोहणीयस्स ठिदिघादो ताव एसो कमो ।"** इति । एवं दृश्यमानमपि दलं गुणश्रेणेरुपरितनं प्रथमनिषेकं यावदसंख्येयगुणकारेण भवदुपरि मोहनीयचरमनिषेकं यावद् विशेषहीनक्रमेण तिष्ठति । प्रत्यपादि च **कषायप्राभृतचूर्णौ–"पढमे ठिदीखंडए णिल्लेविदे (जं) उदये पदेसग्गं दिस्सदि, तं थोवं । विदियाए ठिदीए असंखेज्जगुणं । एवं ताव, जाव गुणसेढिसीसयं । गुणसेढिसीसयादो अण्णा च एक्का ठिदि त्ति असंखेज्जगुणं दिस्सदि । तत्तो विसेसहीणं जाव उक्कस्सिया मोहणीयस्स ठिदि त्ति ।"** पश्यन्तु पाठका यन्त्रकम्–२९ ॥२०९॥

ननु प्रथमस्थितिखण्डे घातिते गुणश्रेणिं मुक्त्वा शेषस्थितिषु दलमेकगोपुच्छाकारेण कुतो भवति ? इति शङ्कां समाधातुकामोऽल्पबहुत्वं भणति—

**सुहुमद्धा थोवा तत्तो गुणसेढी विसेसअब्भहिआ।**
**तत्तोऽन्तरं पढमखंडं तह संतं कमेण संखगुणं ॥२१०॥ (गीतिः)**

सूक्ष्माद्धा स्तोका ततो गुणश्रेणिर्विशेषाभ्यधिका।
ततोऽन्तरं प्रथमखण्डं तथा सत्त्वं क्रमेण संख्यगुणम् ॥२१०॥ इति पदसंस्कारः।

**'सुहुमद्धा'** इत्यादि, 'सूक्ष्माद्धा' सूक्ष्मसम्परायगुणस्थानकाद्धा 'स्तोका' अल्पा, उपरितनपदानां प्रभूतत्वदर्शनात्। **'तत्तो'** इत्यादि, 'ततः' सूक्ष्मसम्परायाद्धातः 'गुणश्रेणिः' सूक्ष्मसम्परायप्रथमसमये सूक्ष्मकिट्टिदलमुत्कीर्य या गुणश्रेणिः क्रियते, सा विशेषाभ्यधिका भवति, गुणश्रेणिनिषेका विशेषाधिका भवन्तीत्यर्थः।

**'तत्तो'** इत्यादि, 'ततो' मोहनीयगुणश्रेणिनिषेकतोऽन्तरं प्रथमखण्डं तथा 'सत्त्वं' स्थितिसत्त्वं क्रमेण प्रत्येकं संख्यगुणं भवति। अन्तरसाहचर्यात् प्रथमस्थितिखण्डं स्थितिसत्त्वं च मोहनीयस्य ग्रहीतव्ये। इदमुक्तं भवति—मोहनीयगुणश्रेणिनिषेकतोऽन्तरस्थितिनिषेकाः संख्यातगुणा भवन्ति। ततोऽपि सूक्ष्मसम्परायाद्धायां घात्यमानं मोहनीयप्रथमस्थितिखण्डं संख्यातगुणं भवति, ततोऽपि मोहनीयस्य स्थितिसत्त्वं संख्यातगुणं तिष्ठति। अभ्यधायि च **कषायप्राभृतचूर्णौ**— **"सव्वत्थोवा सुहुमसांपराइयद्धा, पढमसमयसुहुमसांपराइयस्स मोहणीयस्स गुणसेढिणिक्खेवो विसेसाहिओ। अंतरट्ठिदीओ संखेज्जगुणाओ, सुहुमसांपराइयस्स पढमट्ठिदिखंडयं मोहणीये संखेज्जगुणं पढमसमयसुहुमसांपराइयस्स मोहणीयस्स ठिदिसंतकम्मं संखेज्जगुणं।"** इति। नन्ववतरणे यदभिहितम्, प्रथमस्थितिखण्डे घातिते गुणश्रेणिं मुक्त्वा शेषस्थितिषु दलमेकगोपुच्छाकारेण कुतो भवतीति शङ्काव्युदासायेदमल्पबहुत्वमवतीर्णमिति, तत्कथं सङ्गच्छते? इति चेत्, उच्यते-अन्तरस्थितिनिषेकतः संख्यातगुणाः प्रथमस्थितिखण्डगतनिषेका भवन्ति, तेन प्रथमस्थितिघाताद्धाचरमसमय उत्कीर्णदलतोऽन्तरस्थितिनिषेकेषु द्वितीयस्थितिनिषेकेषु च दलिकं तेन क्रमेण प्रक्षिपति, येन दृश्यमानदलमेकगोपुच्छाकारेण जायते। प्रथमस्थितिखण्डगतनिषेकतोऽन्तरस्थितिनिषेकाणां बहुत्वे तु दृश्यमानं दलमन्तरस्थितिचरमनिषेकतो द्वितीयस्थितिप्रथमनिषेक एकचयेन हीनं न स्यात्। ततश्चाऽन्तरस्थितिनिषेकेषु द्वितीयस्थितिनिषेकेषु चैकगोपुच्छाकारेण दलं न स्यात्। तेनेदमल्पबहुत्वमेकगोपुच्छाकारदलसाधनायाऽलं भवति ॥२१०॥

सूक्ष्मसम्परायाद्धाप्रथमसमये सूक्ष्मकिट्टीनां प्रथमस्थितिं कृत्वा वेदयतीति प्राक् सामान्यत उक्तम्। सामान्यज्ञानस्य च विशेषजिज्ञासाहेतुत्वात् सम्प्रति विशेषतः सूक्ष्मकिट्टीनामुदयं विवर्णयिषुराह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुहुमाण हेट्ठिमा उवरिल्लाअ असंखभागमेत्तीओ ।
न अणुहवेज्जन्ते सेसा वेइज्जन्ति किट्टीओ ॥२११॥

सूक्ष्माणामधस्तन्य उपरितन्यश्चाऽसंख्यभागमात्र्यः ।
ना-ऽनुभूयन्ते शेषा वेद्यन्ते किट्टयः ॥ २११ ॥ इति पदसंस्कारः ।

**'सुहुमाण'** इत्यादि, सूक्ष्मसम्परायगुणस्थानकाद्धाप्रथमसमये 'सूक्ष्माणां' सूक्ष्मकिट्टीनाम् 'अधस्तन्यः' मन्दानुभागकाः 'उपरितन्यश्च' तीव्रानुभागकाश्चाऽसंख्येयभागमात्र्यः सूक्ष्मकिट्टयो 'ना-ऽनुभूयन्ते' उदयेन न वेद्यन्ते। ननु काः सूक्ष्मकिट्टयो वेद्यन्ते ? इत्याह–**'सेसा'**इत्यादि, 'शेषाः' उपर्युक्तादन्याः, उपरितन्योऽधस्तन्यश्चासंख्येयभागमात्र्यो याः सूक्ष्मकिट्टयोऽवेद्यमानाः,ताभ्योऽन्या बह्वसंख्येयभागमात्र्यो मध्यमाऽनुभागका इत्यर्थः, 'किट्टयः' सूक्ष्मकिट्टयो 'वेद्यन्ते' उदयेना-ऽनुभूयन्ते । यदुक्तं **कषायप्राभृतचूर्णौ—"से काले पढमसमयसुहुमसांपराइओ । ताधे सुहुमसांपराइयकिट्टीणमसंखेज्जा भागा उदिण्णा ।"** इति । इदमुक्तं भवति-प्रथमसमये द्वितीयस्थितितः सर्वसूक्ष्मकिट्टिभ्यो दलिकमपकृष्य प्रथमस्थितिं करोति । तत्राऽसंख्येयभागप्रमाणास्तीव्रानुभागका मन्दानुभागकाश्चोदयनिषेके मध्यमकिट्टिस्वरूपेण परिणम्य वेदयति, इत्थमसंख्येयभागप्रमाणानां स्वरूपेण वेदनाभावाच्छेषा बह्वसंख्येयभागप्रमाणा मध्यमसूक्ष्मकिट्टीर्वेदयति । एवं द्वितीयादिसमयेष्वपि सूक्ष्मकिट्टिवेदनविधिर्वक्तव्यः, नवरं पूर्वपूर्वसमयत उत्तरोत्तरसमये-ऽसंख्येयभागेनाऽधिका अधिकतरा उपरितन्यः सूक्ष्मकिट्टयः स्वरूपेण न वेद्यन्ते, तथा–ऽपूर्वेणाऽसंख्येयभागेनाऽधिका अधिकतरा अधस्तन्यः सूक्ष्मकिट्टयो वेद्यन्ते । एवं तावद्वक्तव्यम् , यावत्सूक्ष्मसम्परायगुणस्थानकाद्धाचरमसमयः ॥ २११ ॥

उदीर्णा-ऽनुदीर्णसूक्ष्मकिट्टीरभिधाय सम्प्रति तासामल्पबहुत्वं विभणिषुराह—

हेट्ठिल्ला अणुदिण्णा थोवा तत्तो विसेसअहिआओ ।
उवरिल्ला तत्तो य असंखेज्जगुणा उदिण्णाओ ॥२१२॥

अधस्तन्योऽनुदीर्णाः स्तोकास्ततो विशेषाधिकाः ।
उपरितन्यस्ततश्चाऽसंख्येयगुणा उदीर्णाः ॥ २१२ ॥ इति पदसंस्कारः ।

**'हेट्ठिल्ला'** इत्यादि, सूक्ष्मसम्परायाद्धाप्रथमसमये 'अधस्तन्यो' मन्दानुभागका अनुदीर्णाः सूक्ष्मकिट्टयः स्तोका भवन्ति, या मन्दानुभागकाः सर्वसूक्ष्मकिट्टयसंख्येयभागप्रमाणाः सूक्ष्मकिट्टयो न वेद्यन्ते, ताः स्तोका भवन्तीत्यर्थः । **'तत्तो'** इत्यादि, 'ततः' अनुदीर्णा-ऽधस्तनसूक्ष्मकिट्टितः 'उपरितन्यः' तीव्रानुभागका अनुदीर्णाः सर्वसूक्ष्मकिट्टयसंख्येयभागप्रमाणा भवन्त्योऽपि विशेषाधिकाः । **'तत्तो'** इत्यादि, 'ततः' अनुदीर्णोपरितनसूक्ष्मकिट्टित उदीर्णा मध्यमाऽनुभागकाः सूक्ष्मकिट्टयोऽसंख्येयगुणा भवन्ति, पूर्वोक्तानामनुदीर्णोपरितनसूक्ष्मकिट्टीनामसंख्येयभाग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणत्वाद् , आसां च बहुसंख्येयभागप्रमाणत्वात् । उक्तं च **कषायप्राभृतचूर्णौ**—**"हेट्ठा अणुदिण्णाओ थोवाओ, उवरि अणुदिण्णाओ विसेसाहियाओ । मज्झे उदिण्णाओ सुहुमसांपराइयकिट्टीओ असंखेज्जगुणाओ ।"** इति । एवं सूक्ष्मसम्परायगुणस्थानाद्धायाः शेषसमयेष्वपि भावनीयम् , विशेषाभावात् ॥२१२॥

एवंविधिना संख्यातेषु स्थितिघातसहस्रेषु गतेषु मोहनीयस्य चरमस्थितिघातकाले यद्भवति, तद्वक्तुकाम आह—

## सुहुमद्धाए संखेज्जइभागे सेसगे विणासेइ ।
## गुणसेढिसंखभागं अन्तिमखण्डं विघातंतो ॥२१३॥

सूक्ष्माद्धायाः संख्येयतमभागे शेषके विनाशयति ।
गुणश्रेणिसंख्यभागमन्तिमखण्डं विघातयन् ॥ २१३ ॥ इति पदसंस्कारः ।

**'सुहुमद्धाए'** इत्यादि, संख्यातैः स्थितिघातसहस्रैः 'सूक्ष्माद्धायाः' सूक्ष्मसम्परायगुणस्थानकाद्धायाः 'संख्येयतमभागे शेषके' बहुषु संख्यातभागेषु गतेष्वेकस्मिन् संख्येयतमभागे शेषे 'अन्तिमखण्डं' मोहनीयस्य चरमस्थितिखण्डं 'विघातयन्' विनाशयन् 'गुणश्रेणिसंख्यभागम्' अग्रतो गुणश्रेणिनिक्षेपस्य संख्येयतमभागं 'विनाशयति' घातयति । अभाणि च **कषायप्राभृतचूर्णौ**–**"सुहुमसांपराइयस्स संखेज्जेसु ठिदिखंडयसहस्सेसु गदेसु जमपच्छिमं ठिदिखंडयं मोहणीयस्स, तम्हि ट्ठिदिखंडये उक्कीरमाणे जो मोहणीयस्स गुणसेढिणिक्खेवो, तस्स गुणसेढिणिक्खेवस्स अग्गग्गादो संखेज्जदिभागो आगाइदो ।"** इति । भावार्थः पुनरयम्–सूक्ष्मसम्परायाद्धायाः संख्येयतमे भागे शेषे मोहनीयस्थितिखण्डमन्तर्मुहूर्तमात्रं घातयति, तथा यः सूक्ष्मसम्परायाद्धातो विशेषाधिको गुणश्रेणिनिक्षेपः प्रागुक्तः, तस्याऽग्रतः संख्येयतमभागमपि घातयति । घातयश्च सूक्ष्मसम्परायाद्धाचरमसमयेऽभिनवगुणश्रेणिशिरो निर्वर्तयति । एवं सूक्ष्मसम्परायजीवश्चरमस्थितिखण्डेन गुणश्रेणिसंख्येयभागप्रमाणनिषेकांस्ततश्च संख्यातगुणानन्यानुपरितननिषेकान् घातयति । तदानीं दलनिक्षेपस्त्वनन्तरवक्ष्यमाणप्रकारेण संभाव्यते, दर्शनमोहक्षपणाधिकारे सम्यक्त्वमोहनीयदलनिक्षेपस्य **कषायप्राभृतचूर्णिकारा**दिभिस्तथाप्रतिपादितत्वात् । अथ दलप्रक्षेपक्रमः–मोहनीयचरमस्थितिघाताद्धाप्रथमसमये दलिकमुत्कीर्योदयनिषेके स्तोकं दलं प्रक्षिपति । ततो द्वितीयनिषेकेऽसंख्येयगुणं दलं निक्षिपति, ततोऽपि तृतीयनिषेकेऽसंख्येयगुणम् । एवमसंख्येयगुणक्रमेण तावत्प्रक्षिपति, यावत् सूक्ष्मसम्परायाद्धाचरमनिषेकलक्षणमभिनवश्रेणिशिरः । ततोऽनन्तरनिषेकेऽसंख्येयगुणहीनं दलं ददाति । ततः परं विशेषहीनक्रमेण तावद्ददाति, यावत्पुरातनगुणश्रेणिशिरः । ततः परमनन्तरनिषेकेऽसंख्येयगुणहीनं ददाति । तत ऊर्ध्वं विशेषहीनक्रमेण तावद् ददाति, यावदतीत्थापनाऽप्राप्ता भवति । अयं दलनिक्षेपक्रमस्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वद्वक्तव्यः, यावद् मोहनीयचरमस्थितिघाताद्धाद्विचरमसमयः। चरमसमये तु दलमुत्कीर्योदय-निषेके स्तोकं दलं ददाति, ततोऽसंख्येयगुणं द्वितीयनिषेके ददाति, ततोऽपि तृतीयनिषेकेऽसंख्येय-गुणं ददाति, एवमसंख्येयगुणक्रमेण तावद्ददाति, यावत्सूक्ष्मसम्परायाद्धाचरमनिषेकः 卐 ॥२१३॥

सूक्ष्मसम्परायाद्धायाः संख्येयतमभागे शेषे मोहनीयस्थितिघाताद्धाया द्विचरमसमयं यावद् दीयमानदलिकप्ररूपणा




१=सूक्ष्मसम्परायाद्धा, तस्यां चाऽसंख्येयगुणक्रमेण दलं प्रक्षिप्यते। २=गुणश्रेणेरभिनवशिरः।

३=गुणश्रेणिनूतनशिरस उपरितनाऽनन्तरनिषेकः, तस्मिंश्च गुणश्रेणिनूतनशिरसि प्रक्षिप्ताद् दला-दसंख्येयगुणहीनं दलं प्रक्षिप्यते। ततः परं विशेषहीनक्रमेण निक्षिप्यते।

४=गुणश्रेणिनिक्षेपस्याऽग्रतः संख्येयतमभागः, स च चरमस्थितिखण्डे घात्यते।

५=गुणश्रेणेः पुरातनशिरः।

६=गुणश्रेणिपुरातनशिरस उपरितनोऽनन्तरनिषेकः,तस्मिँश्च गुणश्रेणिपुरातनशीर्षे प्रक्षिप्तदलतोऽसंख्येय-गुणहीनं दलं प्रक्षिप्यते। ततः परं विशेषहीनक्रमेण।

• ० ०=अनेन चिह्नेन दीयमानं दलं सूचितम्।····अनेन चिह्नेन घात्यमानस्थितौ पुरातनसत्तागतं दलं सूचितम्।

✱ अनेन चिह्नेनाऽघात्यमानस्थितौ पुरातनसत्तागतं दलं सूचितम्।

७=मोहनीयचरमस्थितिघाताद्धायाश्चरमसमयः। तदानीं मोहनीयसर्वदलमुत्कीर्य गुणश्रेणिनूतनशीर्षं यावदसंख्येयगुणक्रमेण दलं दीयते, न ततः परम्।

---

卐जयधवलाकारैरप्यनेनैव क्रमेण दलिकनिक्षेपो दर्शितः। अक्षराणि त्वेवम्–"संपहि चरिमट्ठिदि-खंडयस्स पढमसमये उक्कीरिज्जमाणपदेसग्गस्स सेढिपरूवणं सुत्तसूचिदं वत्तइस्सामो। तं कधं? ताधे चेव पढमफालीदव्वमोकड्डियूण उदये पदेसग्गं थोवं देदि। से काले असंखेज्जगुणं देदि। एवमसंखेज्जगुणाए सेढीए णिक्खिवमाणो गच्छदि, जाव सुहुमसांपराइयचरमसमयो त्ति। एवं च एण्हि मोहणीयस्स गुणसे-ढिसीसयमिदि घेत्तव्वं। तत्तो उवरिमाणंतरट्ठिदीए असंखेज्जगुणहीणं देदि। तत्तो विसेसहीणं णिक्खि-वमाणो गच्छदि जाव चिराणगुणसेढिसीसयं पत्तो त्ति। तदो उवरिमाणंतराए एक्किस्से ट्ठिदीए असं-खेज्जगुणहीणं णिक्खिवदि। तत्तो परं सव्वत्थ विसेसहीणं चेव णिक्खिवदि, जाव अप्पणो चरिमट्ठिदि-मइच्छावणावलियमेत्तेण अपत्तो त्ति। एवं विदियादिफालीसु वि णिवदमाणियासु एरिसी चेव दिज्ज-माणगस्स सेढिप्ररूवणा णिव्वामोहमणुगंतव्वा, जाव चरिमट्ठिदिखंडयस्स दुचरिमफालि त्ति। पुणो चरिमफालिदव्वं घेत्तूण उदये पदेसग्गं थोवं देदि। से काले असंखेज्जगुणं। एवमसंखेज्जगुणाए सेढीए णिक्खिवमाणो गच्छदि, जाव सुहुमसांपराइयचरिमट्ठिदि त्ति।" इति।

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

मोहनीयचरमस्थितिखण्डे घातिते यद्भवति, तद्वक्तुकाम आह—

**चरिमे खंडे णट्ठे तु णत्थि मोहस्स ठिइघाओ ।**
**ठिइसंतं उण सुहुमद्धापमिअं होइ मोहस्स ॥२१४॥ (उपगीतिः)**

चरमे खण्डे नष्टे तु नास्ति मोहस्य स्थितिघातः ।
स्थितिसत्त्वं पुनः सूक्ष्माद्धाप्रमितं भवति मोहस्य ॥२१४॥ इति पदसंस्कारः ।

**'चरिमे'** इत्यादि, 'चरमे खण्डे' मोहनीयकर्मणश्चरमस्थितिखण्डे नष्टे तु **'मोहस्य'** मोहनीयकर्मणः स्थितिघातो 'नास्ति' न भवति, शेषाणां ज्ञानावरणादीनां कर्मणां स्थितिघातादयः पूर्ववत् प्रवर्तन्ते । उक्तं च **सप्ततिकाचूर्णौ—"तओ पभिति मोहस्स ठितिघाओ णत्थि, सेसाणं कम्माणं ठिदिघातादओ पवत्तंति चेव ।"** इति । तथैव **कषायप्राभृतचूर्णावपि**, नवरं **कषायप्राभृतचूर्णिकारैः**र्ज्ञानावरणादिकर्मणां स्थितिघातादीनां प्रवृत्तिर्न दर्शिता, पूर्वतः प्रवृत्तानां प्रतिषेधाभावेनाऽनुक्तसिद्धत्वात् । अक्षराणि त्वेवम् **"तम्हि ठिदिखंडये उक्किण्णे तदोप्पहुडि मोहणीयस्स णत्थि ठिदिघादो ।"** इति ।

अथ तदानीं स्थितिसत्त्वं प्ररूपयति—**'ठिइसंतं'** इत्यादि, मोहनीयचरमस्थितिखण्डे विनष्टे 'मोहस्य' मोहनीयकर्मणः स्थितिसत्त्वं पुनः 'सूक्ष्माद्धाप्रमितं' शेषसूक्ष्मसम्परायगुणस्थानकाद्धाप्रमाणं 'भवति' जायते, नाधिकम् । न्यगादि च **कषायप्राभृतचूर्णौ—"जत्तियं सुहुमसांपराइयद्धाए सेसं, तत्तियं मोहणीयस्स ठिदिसंतकम्मं सेसं ।"** इति । तदपि पूर्वपूर्वसमयत उत्तरोत्तरसमय एकैकसमयेन हीनं हीनतरं भवति, उदयेनैकैकनिषेकस्याऽनुभवनात् ॥२१४॥

मोहनीयचरमस्थितिखण्डं घातयित्वा सूक्ष्मकिट्टीरुदयेनाऽनुभवतो जीवस्य सूक्ष्मसम्परायगुणस्थानककाले समयाधिकावलिकाशेषे लोभजघन्यस्थित्युदीरणादयः पदार्थाः प्रवर्तन्ते, तान् व्याजिहीर्षुराह—

**समयाहियआवलिसेसम्मि ठिइउदीरणा जहण्णंते ।**
**तिण्हं घाईणं बंधो तह संतं मुहुत्तंतो ॥२१५॥**
**णामदुगस्स अडमुहुत्ता तह तइयस्स बारस मुहुत्ता ।**
**बंधो संतं तु अघाईण असंखेज्जवासाणि ॥२१६॥**

समयाधिकावलिकाशेषे स्थित्युदीरणा जघन्याऽन्ते ।
त्रयाणां घातिनां बन्धस्तथा सत्त्वं मुहूर्तान्तः ॥२१५॥
नामद्विकस्याऽष्टमुहूर्तास्तथा तृतीयस्य द्वादश मुहूर्ताः ।
बन्धः सत्त्वं त्वघातिनामसंख्येयवर्षाणि ॥२१६॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'समया०'** इत्यादि, समयाधिकावलिकाशेषे सूक्ष्मसम्परायगुणस्थानकाले "लुक्" (सिद्धहेम० ८-१-११) इति प्राकृतसन्धिलक्षणेन लुप्ताऽऽकारस्य दर्शनात् 'जहण्णा' त्ति' जघन्या स्थित्युदीरणा प्रस्तुतत्वाल्लोभस्य, तदानीमेकनिषेकत उदीरयतः क्षपकस्य संज्वलनलोभस्य जघन्यस्थित्युदीरणा जायत इत्यर्थः । उक्तं च **कर्मप्रकृतिचूर्णौ–"समएण अहिगा आवलिया समयाहिआवलिया, ताए समएण अहिगाए आवलियाए 'पढमठितीए उ सेसवेलाए' त्ति अंतरकरणे कए मूल्लिल्ला ठिती पढमठिती, उवरिल्ला ठिती बितीयठिती। ताए पढमठितीए समयाहियावलियसेसाए मिच्छत्तस्स तिण्हं वेयाणं चउण्हं संजलणाणं सम्मत्तस्स य जहण्णिया ठितिउदीरणा भवति ।"** इति । लोभस्य जघन्यस्थित्युदीरणा भवत्येतदुपलक्षणम् , तेन संज्वलनलोभस्य जघन्यानुभागोदीरणा गुणितकर्मांशस्य च जीवस्य लोभस्योत्कृष्टप्रदेशोदीरणोपलक्ष्येते । अत्रादि च **कषायप्राभृतचूर्ण्यामनुभागोदीरणाऽधिकारे प्रदेशोदीरणाऽधिकारे च–"लोहसंजलणस्स जहण्णाणुभागउदीरणा कस्स ? खवयस्स समयाहियावलियचरिमसमयसकसायस्स । ××××× लोहसंजलणस्स उक्कस्सिया पदेसुदीरणा कस्स ? खवगस्स समयाहियावलियचरिमसमयसकसायस्स ।"** इति । तथैव **कर्मप्रकृतिचूर्णावप्यनुभागोदीरणाऽधिकारे प्रदेशोदीरणाधिकारे च–"खवणाए' त्ति खवणाए अब्भुट्ठियस्स 'विग्घकेवलसंजलणाण य सनोकसायाणं सयसयउदीरणंते' त्ति पंचविहअंतराइय-केवलणाण-केवलदंसणावरणचउण्हं संजलणाणं णवण्हं णोकसायाणं एयासिं वीसाए पगईणं अप्पप्पणो उदीरणंते जहण्णिया अणुभागउदीरणा होति ।××××× घादिकम्माणं सव्वेसिं अणुभागउदीरणम्मि जस्स जस्स जो जो जहण्णसामी भणितो, सो च्चेव उक्कोसपदेसउदीरणाए उक्कोससामी गुणियकम्मंसिगो य जाणियव्वो ।"** इति ।

तदानीमेव लोभस्यैकसमयप्रमाणो जघन्यस्थितिसंक्रमो जघन्याऽनुभागसंक्रमश्च जायते । उक्तं च **कषायप्राभृतचूर्णौ स्थितिसंक्रमाधिकारेऽनुभागसंक्रमाधिकारे च–"लोभसंजलणस्स जहण्णट्ठिदिसंकमो कस्स ? आवलियसमयाहियसकसायस्स खवयस्स । ××× लोहसंजलणस्स जहण्णाणुभागसंकामओ को होइ ? समयाहियावलियचरिमसमयसकसायो खवगो ।"** इति ।

निश्चयनयमाश्रित्य सूक्ष्मसम्परायगुणस्थानककाले समयाधिकाऽऽवलिकाशेषे व्यवच्छिद्यमाना संज्वलनलोभस्योदीरणा व्यवच्छिन्ना । ततः परं केवलेन शुद्धोदयेन लोभसूक्ष्मकिट्टीरनुभवन् क्रमेण सूक्ष्मसम्परायगुणस्थानचरमसमयं प्राप्नोति । अन्यथापि च **सप्ततिकाचूर्णौ–"तं ओव-**

**ट्ठियठितिं उदओदीरणाहिं वेदेंतो गओ ताव, जाव समयाहियावलियसेस त्ति। तम्मि समए उदीरणा पुव्वुत्ता फिट्टा। उदएण चेव वेदेति ताव, जाव चरिमसमओ त्ति।"**

तदानीं च लोभस्य जघन्याऽनुभागोदयोगुणितकर्मांशस्य च संज्वलनलोभस्योत्कृष्टप्रदेशोदयो भवति। न्यगादि च **कर्मप्रकृतिटीकायां श्रीमन्मलयगिरिपादैरनुभागोदयाधिकारे-प्रदेशोदयाधिकारे च–"नवरं ज्ञानावरणपञ्चकाऽन्तरायपञ्चकदर्शनावरणचतुष्टय-वेदत्रयसंज्वलनलोभसम्यक्त्वानामुदीरणाव्यवच्छेदे सति परत आवलिकां गत्वा = अतिक्रम्य तस्या आवलिकायाश्चरमसमये जघन्याऽनुभागोदयो वाच्यः। ××× तथा मोहानां = मोहनीयप्रकृतीनां सम्यक्त्वसंज्वलनचतुष्कवेदत्रयाख्याना-मष्टानां गुणितकर्मांशस्य क्षपकस्य स्वस्वोदयचरमसमये उत्कृष्टप्रदेशोदयः।"** इति।

अथ सूक्ष्मसम्परायगुणस्थानकचरमसमये स्थितिबन्धं स्थितिसत्त्वं चाभिधातुकाम आह–'अंते' इत्यादि, 'अन्ते' सूक्ष्मसम्परायगुणस्थानकाद्धाचरमसमये 'त्रयाणां घातिनां' मोहनीयबन्धस्य व्यवच्छिन्नत्वाज्ज्ञानावरणदर्शनावरणाऽन्तरायाणां 'बन्धः' स्थितिबन्धः 'तथा' तथाशब्दः समुच्चयार्थकः 'सत्त्वं' स्थितिसत्त्वं 'मुहूर्तान्तः' अन्तर्मुहूर्तमात्रं भवति। भावार्थः पुनरयम्–अनिवृत्तिबादर-सम्परायगुणस्थानकाद्धायाश्चरमसमये घातित्रयस्य यः स्थितिबन्धोऽन्तरहोरात्रप्रमाण आसीत्, स क्रमेण हीयमानः सम्प्रत्यन्तर्मुहूर्तं जायते। स्थितिसत्त्वं पुनरनिवृत्तिकरणबादरसम्परायचरमसमये संख्येयवर्षाण्यासीत्, तत्क्रमेण संख्यातसहस्रैः स्थितिघातैर्हीयमानमिदानीमन्तर्मुहूर्तप्रमाणं जायते। प्रत्यपादि च कषायप्राभृतचूर्णौ–**"जाधे चरिमसमयसुहुमसांपराइयो जादो, ताधे ××× तिण्हं घादिकम्माणं ट्ठिदिबंधो अंतोमुहुत्तं। तिण्हं घादिकम्माणं ट्ठिदिसंतकम्मं अंतोमुहुत्तं।"** इति। अयं च चरमस्थितिबन्धो ज्ञानावरणपञ्चकस्य दर्शनावरणचतुष्कस्याऽन्तरायपञ्चकस्य च सर्वजघन्यो ज्ञातव्यः। उक्तं च **कर्मप्रकृतिटीकायां श्रीमदुपाध्यायपुङ्गवैः–"ज्ञानावरण-पञ्चकदर्शनावरणचतुष्काऽन्तरायपञ्चकसातवेदनीययशःकीर्त्युच्चैर्गोत्राणां सूक्ष्म-सम्परायक्षपकश्चरमस्थितिबन्धे वर्तमानो जघन्यस्थितिबन्धकः, तद्बन्धकेष्वस्यै-वाऽतिविशुद्धत्वात्।"** इति। तथा सूक्ष्मसम्परायचरमसमय एव ज्ञानावरणादीनां चतुर्दशानां जघन्याऽनुभागबन्धो जायते। अवादि च **कर्मप्रकृतिटीकायाम्–"ज्ञानावरणपञ्चकदर्शना-वरणचतुष्टयाऽन्तरायपञ्चकरूपाणां चतुर्दशानां प्रकृतीनां क्षपकः स्वबन्धव्यवच्छेदसमये वर्तमानः समयमेकं तथा, तद्बन्धकेषु तस्य विशुद्धतमत्वात्।"** इति। इदमत्राऽवधेयम्–सूक्ष्मसम्परायचरमसमये केवलज्ञानावरणकेवलदर्शनावरणयोरनुभागबन्धो जघन्यो भवन्नपि सर्वघाती भवति, बन्धे तयोरनुभागस्य देशघातित्वाऽनुपलम्भात्। शेषाणां द्वादशानां प्रकृतीनामनुभागबन्धो देशघाती भवति, अनिवृत्तिकरणेऽपि देशघातित्वप्रतिपादनात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाऽघातिकर्मणां स्थितिबन्धं भणति-'णामदुगस्स' इत्यादि, 'नामद्विकस्य' नामगोत्ररूपस्य 'बन्धः' स्थितिबन्धः सूक्ष्मसम्परायगुणस्थानकचरमसमयेऽष्टमुहूर्ता भवति, योऽनिवृत्तिबादरसम्परायगुणस्थानकचरमसमयेऽन्तर्वर्षप्रमाण आसीत्, स क्रमेण हीयमान इदानीमष्टमुहूर्तप्रमाणो जायत इत्यर्थः । 'तइयस्स' इत्यादि, 'तृतीयस्य' वेदनीयस्य स्थितिबन्धो 'द्वादश मुहूर्ता' द्वादशमुहूर्तप्रमाणो भवति । उक्तं च **कषायप्राभृतचूर्णौ—"जाधे चरिमसमयसुहुमसांपराइयो जादो, ताधे णामागोदाणं ठिदिबंधो अट्ठ मुहुत्ता, वेदणीयस्स ठिदिबंधो बारस मुहुत्ता ।"** इति ।

अयं स्थितिबन्धो यशःकीर्त्युच्चैर्गोत्रयोः सातवेदनीयस्य च सर्वजघन्यो ज्ञातव्यः ।

तदानीमेव च यशःकीर्त्युच्चैर्गोत्रयोः सातवेदनीयस्य च सर्वोत्कृष्टाऽनुभागबन्धो जायते । प्रतिपादितं च **कर्मप्रकृतिटीकायाम्—"तथाऽप्रमत्तसंयतो देवायुष उत्कृष्टाऽनुभागस्वामी सर्वेभ्यस्तद्बन्धकेभ्योऽस्याऽतिविशुद्धत्वात् । सातवेदनीययशःकीर्त्युच्चैर्गोत्राणां सूक्ष्मसम्परायचरमसमये वर्तमानस्तथा, तद्बन्धकेभ्योऽस्यैवातिविशुद्धत्वात् ।"** इति ।

**'संतं'** इत्यादि, सूक्ष्मसम्परायगुणस्थानकचरमसमये 'सत्त्वं' स्थितिसत्त्वं तुर्वाक्यभेदे 'अघातिनां' नामगोत्रवेदनीयरूपाणां कर्मणाम् 'असंख्येयवर्षाणि' असंख्येयवर्षमात्रं भवति ।

तदानीं यथासमयं चतुरो वारानुपशमश्रेणिमारुह्य क्षपकश्रेणिं शीघ्रं प्रतिपन्नस्य गुणितकर्मांशस्य जीवस्य सातवेदनीययशःकीर्त्युच्चैर्गोत्राणामुत्कृष्टप्रदेशसत्त्वं भवति । यदुक्तं **कर्मप्रकृतिचूर्णौ—"गुणियकम्मंसिगो चत्तारि वारे कसाए उवसामेत्ति, उवसामेंतस्स बहुगा पुग्गला लब्भंतित्ति काउं ततो खिप्पमेव खवणाए अब्भुट्ठितो, तस्स सुहुमरागस्स सुहुमरागचरिमसमते वट्टमाणस्स साय-जस-उच्चागोयाणं उक्कोसं पदेससंतं ।"** इति । तथा तदानीमेव गुणितकर्मांशस्य जीवस्य निद्राद्विकाऽसातवेदनीय-नीचैर्गोत्र-प्रथमवर्जसंस्थानपञ्चकाऽनाद्यसंहननपञ्चकाऽशुभवर्णादिनवकोपघाताऽप्रशस्तविहायोगत्यपर्याप्ताऽस्थिराऽशुभ-दुर्भग-दुःस्वराऽनादेयाऽयशःकीर्तिरूपाणां द्वात्रिंशत्प्रकृतीनामुत्कृष्टप्रदेशसंक्रमो जायते । उक्तं च **कर्मप्रकृतिचूर्णौ—"कम्मचउक्के' दंसणावरणवेतणिज्जणामगोतेसु 'असुभाणं अबज्झमाणीणं' णिद्दादुगअसातावेयणिज्जआदिल्लवज्जसंठाणसंघयणं कुवण्णणवगं उवघातअपसत्थविहायगतिअपज्जत्तगअथिरादिछक्कणीतागोत एयासिं बत्तीसाए कंमाणं खवगस्स 'सुहुमरागंते' सुहुमरागस्स चरिमसमए उक्कोसो पदेससंकमो, गुणितकंमंसितस्स गुणसंकमेण लब्भति संछोभ इत्यर्थः ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निश्चयनयमाश्रित्य व्यवच्छिद्यमानः सूक्ष्मसम्परायचरमसमय एव ज्ञानावरणपञ्चकदर्शनावरणचतुष्काऽन्तरायपञ्चकोच्चैर्गोत्रयशःकीर्त्तीनां बन्धो व्यवच्छिन्नः, एवं व्यवच्छिद्यमाने मोहनीयस्योदयसत्त्वेऽपि व्यवच्छिन्ने ॥२१५-२१६॥

यन्त्रकम् (गाथा—२१५-२१६)

सूक्ष्मसम्परायाद्धायां समयाधिकावलिकाशेषायाम्

(१) संज्वलनलोभस्य जघन्यस्थित्युदीरणा ।
(२) संज्वलनलोभस्य जघन्या–ऽनुभागोदीरणा ।
(३) गुणितकर्मांशस्य जीवस्य लोभस्योत्कृष्टप्रदेशोदीरणा ।
(४) संज्वलनलोभस्य जघन्यस्थितिसंक्रमः ।
(५) संज्वलनलोभस्य जघन्या–ऽनुभागसंक्रमः ।
(६) निश्चयनयमाश्रित्य संज्वलनलोभस्योदीरणा व्यवच्छिद्यमाना व्यवच्छिन्ना ।

सूक्ष्मसम्परायाद्धायाश्चरमसमये

(७) संज्वलनलोभस्य जघन्याऽनुभागोदयः ।
(८) गुणितकर्मांशजीवस्य संज्वलनलोभस्योत्कृष्टप्रदेशोदयः ।
(९) ज्ञानावरण-दर्शनावरणाऽन्तरायाणां स्थितिबन्धोऽन्तर्मुहूर्तमात्रः, स च सर्वजघन्यः ।
(१०) ज्ञानावरणदर्शनावरणाऽन्तरायाणां स्थितिसत्त्वमन्तर्मुहूर्तमात्रम् ।
(११) ज्ञानावरणदर्शनावरणा-ऽन्तरायाणां जघन्यो-ऽनुभागबन्धः ।
(१२) नामगोत्रयोरष्टमुहूर्तमात्रः (८) स्थितिबन्धः ।
(१३) वेदनीयस्य द्वादशमुहूर्तप्रमाणः (१२) स्थितिबन्धः ।
(१४) यशःकीर्त्युच्चैर्गोत्रयोः सातवेदनीयस्य च सर्वजघन्यस्थितिबन्धः ।
(१५) यशःकीर्त्युच्चैर्गोत्रसातवेदनीयानामुत्कृष्टा-ऽनुभागबन्धः ।
(१६) नामगोत्रवेदनीयानां स्थितिसत्त्वमसंख्येयवर्षाणि ।
(१७) गुणितकर्मांशजीवस्य यशःकीर्त्युच्चैर्गोत्रसातवेदनीयानामुत्कृष्टप्रदेशसत्त्वम् ।
(१८) गुणितकर्मांशजीवस्य निद्राद्विकाऽसातवेदनीय-नीचैर्गोत्र-प्रथमवर्जसंस्थानपञ्चकप्रथमवर्जसंहननपञ्चका-ऽशुभवर्णादिनवकोपघाताऽप्रशस्तविहायोगत्यपर्याप्ता-ऽस्थिरा-ऽशुभ-दुर्भग-दुःस्वरा-ऽनादेया-ऽयशःकीर्त्तिरूपाणां द्वात्रिंशत्प्रकृतीनाम् (३२) उत्कृष्टप्रदेशसंक्रमः ।
(१९) निश्चयनयमाश्रित्य--(अ) मोहनीयस्योदयसत्त्वे व्यवच्छिद्यमाने व्यवच्छिन्ने ।
(ब) ज्ञानावरणपञ्चक—दर्शनावरणचतुष्का-ऽन्तरायपञ्चकोच्चैर्गोत्रयशःकीर्त्तीनां बन्धोऽपि व्यवच्छिद्यमानो व्यवच्छिन्नः ।

अथ किट्टिक्षपणां निगमयन्नाह—

**खविआ एगारस किट्टी अणुहवणेण संकमेणं य ।**
**दुखणूणदुआली संकमेण य अणुहवणेण सुहुमाओ ॥२१७॥ (गीतिः)**

क्षपिता एकादश किट्टयोऽनुभवनेन संक्रमेण च ।
द्विक्षणोनद्व्यावलिके संक्रमेण चाऽनुभवनेन सूक्ष्माः ॥२१६॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'खविआ' इत्यादि, 'क्षपिताः' विनाशिताः' एकादश किट्टयः' क्रोधप्रथमसंग्रहकिट्टिप्रभृति-लोभद्वितीयसंग्रहकिट्टिपर्यवसाना एकादशसंख्यकाः संग्रहकिट्टयः 'अनुभवनेन' विपाकोदयस्वरूपेण वेदनेन 'संक्रमेण च' यथासंभवमन्यसंग्रहकिट्टिषु संक्रान्त्या च। इदमुक्तं भवति-क्रोधप्रथम-संग्रहकिट्ट्यादिवेदनाद्धाप्रथमसमयतः प्रभृति स्वस्ववेदनाद्धाचरमसमयं यावत् तत्तत्संग्रहकिट्टय-वान्तरकिट्टीरुदयेन वेदयमानोऽन्यसंग्रहकिट्ट्यवान्तरकिट्टितया च परिणमयन् क्षपयति स्म, एतच्च प्राग् विस्तरेण परिभावितम्। 'दुखणूण०' इत्यादि, 'द्विक्षणोनद्व्यावलिके' द्विसमयोनद्व्यावलि-कायद्धाः किट्टयः, स्वस्ववेदनाद्धायां क्षीणायामपि या द्विसमयोनद्व्यावलिकाबद्धाः किट्टयस्तत्तत्संग्रह-किट्टिस्वरूपेण तिष्ठन्ति स्म, ता इत्यर्थः, 'संक्रमेण' वेद्यमानसंग्रहकिट्टौ संक्रमेण क्षपिताः, स्वस्व-वेदनाद्धायां क्षीणायां द्विसमयोनद्व्यावलिकाबद्धकिट्टीनां संक्रमेणैव क्षपणासंभवात्। चकारोऽनुक्त-समुच्चयार्थको भिन्नक्रमश्च, स चैकादशसंग्रहकिट्टिप्रथमस्थितिचरमावलिकागतावान्तरकिट्टीर्लोभ-तृतीयसंग्रहकिट्टिश्चाऽपि संक्रमेणैव क्षपयति स्मेति सञ्चिनोति। 'अनुभवनेन' विपाकोदयस्वरूपेण वेदनेन 'सूक्ष्माः' सूक्ष्मकिट्टयः क्षपिताः, न तु परत्र संक्रमेण, पतद्ग्रहाऽभावात्। उक्तं च कषाय-प्राभृते—

**"पढमं विदियं तदियं वा वेदेंतो वि संछुहंतो वा।**
**चरिमं वेदयमाणो खवेदि उभएण सेसाओ ॥१॥**

**एवं तच्चूर्णावपि-" पढमं कोहस्स किट्टिं वेदेंतो वा खवेदि, अधवा अवेदंतो संछुहंतो। जे दो आवलियबंधा दुसमयूणा, ते अवेदेंतो खवेदि, केवलं संछुहंतो चेव। पढमसमयवेदगप्पहुडि जाव तिस्से किट्टीए चरिमसमयवेदगो त्ति ताव एदं किट्टिं वेदेंतो खवेदि। एवमेदं पि पढमकिट्टिं दोहिं पयारेहिं खवेदि–किंचि कालं वेदेंतो, किंचि कालमवेयेंतो संछुहंतो। जहा पढमकिट्टिं खवेदि, तहा विदियं तदियं चउत्थं जाव एक्कारसमि त्ति, बारसमीए बादरसांपराइयकिट्टीए अव्ववहारो। 'चरिमं वेदेमाणो' त्ति अहिप्पाओ–जा सुहुमसांपराइयकिट्टी, सा चरिमा, तदो तं चरिम-किट्टिं वेदेंतो खवेदि, ण संछुहंतो। सेसाणं किट्टीणं दो दो आवलियबंधे दुसमयूणे चरिमे संछुहंतो चेव खवेदि, ण वेदेंतो। चरिमकिट्टिं वज्ज दो आवलियदुसम-यूणबंधे च वज्ज जं सेसकिट्टीणं, तमुभएण खवेदि।"** इति ॥२१७॥

मोहनीयस्य सर्वथा क्षपणां व्याहृत्य किट्टिवेदनकालस्या-ऽल्पबहुत्वं भणति, अन्यथा किट्टिवेदनकालानुगमो न स्यात्, किं क्रोधप्रथमसंग्रहकिट्टिवेदनकालोऽल्प आसीत्? उत सूक्ष्म-किट्टिवेदनकालः? आहोस्विद् इतरसंग्रहकिट्टिवेदनकाल इति?

**सुहुमगकिट्टीवेयणकालत्तो जाव कोहपढमाए।**
**वेयणकालं कालो अहिओ पच्छाणुपुव्वीए ॥२१८॥**

Jain Education International      For Private & Personal Use Only      www.jainelibrary.org

सूक्ष्मकिट्टिवेदनकालतो यावत् क्रोधप्रथमायाः ।
वेदनकालं कालोऽधिकः पश्चानुपूर्व्या ॥२१८॥ इति पदसंस्कारः ।

**'सुहुम०'** इत्यादि, प्राकृतत्वात् स्वार्थिकः कप्रत्ययः, सूक्ष्मकिट्टिवेदनकालतः प्रभृति 'क्रोधप्रथमायाः' क्रोधप्रथमसंग्रहकिट्टया वेदनकालं यावत् 'कालः' किट्टिवेदनकालः 'अधिको' विशेषाधिको भवति । इदमुक्तं भवति—लोभस्य सूक्ष्मकिट्टिवेदनाद्धा सर्वस्तोका भवति, ततो लोभस्य द्वितीयसंग्रहकिट्टिवेदनाद्धा विशेषाधिकाऽभिधातव्या, आधिक्यं च संख्येयतमभागेन बोद्धव्यम् । एवमग्रेऽपि । ततोऽपि लोभस्य प्रथमसंग्रहकिट्टिवेदनाद्धा विशेषाधिका वाच्या । ततो मायायास्तृतीयसंग्रहकिट्टिवेदनाद्धा विशेषाधिका वक्तव्या । ततो मायाद्वितीयसंग्रहकिट्टिवेदनाद्धा विशेषाधिकाऽभिधेया । ततो मायाप्रथमसंग्रहकिट्टिवेदनाद्धा विशेषाधिका निगदितव्या । ततो मानतृतीयसंग्रहकिट्टिवेदनाद्धा विशेषाधिका वक्तव्या । ततो मानद्वितीयसंग्रहकिट्टिवेदनाद्धा विशेषाधिका कथयितव्या । ततो मानप्रथमसंग्रहकिट्टिवेदनाद्धा विशेषाधिकाऽभिधातव्या । ततः क्रोधतृतीयसंग्रहकिट्टिवेदनाद्धा विशेषाधिका भणितव्या । ततः क्रोधद्वितीयसंग्रहकिट्टिवेदनाद्धा विशेषाधिका व्याहर्तव्या । ततोऽपि क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धा विशेषाधिका प्ररूपयितव्या । यदुक्तं **कषायप्राभृतचूर्णौ–पच्छिमकिट्टिमंतोमुहुत्तं वेदयदि, तिस्से वेदगकालो थोवो, एक्कारसमीए किट्टीए वेदगकालो विसेसाहिओ, दसमीए किट्टीए वेदगकालो विसेसाहिओ, णवमीए किट्टीए वेदगकालो विसेसाहिओ। अट्ठमीए किट्टीए वेदगकालो विसेसाहिओ। सत्तमीए किट्टीए वेदगकालो विसेसाहिओ, छट्ठीए किट्टीए वेदगकालो विसेसाहिओ, पंचमीए किट्टीए वेदगकालो विसेसाहिओ, चउत्थीए किट्टीए वेदगकालो विसेसाहिओ, तदियाए किट्टीए वेदगकालो विसेसाहिओ, विदियाए किट्टीए वेदगकालो विसेसाहिओ, पढमाए किट्टीए वेदगकालो विसेसाहिओ। विसेसो संखेज्जदिभागो।**" इति ।

**आवश्यकादिग्रन्थाभिप्रायेण मोहनीयस्य क्षपणेत्थं प्रतिपादनीया—**

तद्यथा—हास्यषट्कस्य क्षपणातः परं पुरुषवेदं खण्डत्रयं करोति । तत्र खण्डद्वयं युगपत्क्षपयति, तृतीयखण्डं तु संज्वलनक्रोधे प्रक्षिपति । ततः संज्वलनक्रोधं खण्डत्रयं करोति । द्वे खण्डे युगपत्क्षपयति, तृतीयखण्डं तु माने प्रक्षिपति । ततः संज्वलनमानं खण्डत्रयं करोति । खण्डद्वयं युगपत् क्षपयति, एकखण्डं तु मायायां प्रक्षिपति । ततः संज्वलनमायां त्रीणि खण्डानि करोति, खण्डद्वयं युगपत्क्षपयति, एकखण्डं तु संज्वलनलोभे प्रक्षिपति । ततः संज्वलनलोभं खण्डत्रयं करोति । द्वे खण्डे युगपत् क्षपयति । एकखण्डं तु संख्येयानि खण्डानि करोति, तेभ्य एकं संख्येयतमखण्डं मुक्त्वा शेषाणि सर्वखण्डानि पृथक् पृथक् कालभेदेन क्षपयति बादरसम्परायः । ततः सूक्ष्मसम्परायगुणस्थानकवर्ती क्षपक एकं संख्येयतमभागमसंख्येयानि खण्डानि करोति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तान्यपि समये समय एकैकं क्षपयति । क्षपितलोभश्च यथाख्यातचारित्री छद्मस्थवीतरागो भवति । अक्षराणि त्वेवम्-"**ताहे णपुंसगवेदं, ताहे इत्थिवेदं, ताहे छक्कं हास-रति-अरति-भय-सोग-दुगंछाओ, ताहे पुमवेदं तिन्नि भागे करेति । दो भागे जुगवं, एगं संजलणकोहे छुभति । ताहे संजलणकोहं तिन्नि भागे करेति, दो भागे जुगवं खवेति, एगं भागं संजलणे माणे छुभइ । ताहे तं पि तिन्नि भागे करेति । दो भागे जुगवं खवेति । एगं संजलणमायाए छुहइ, ताहे तं पि तिन्नि खंडाइ करेति, दो भागे जुगवं खवेति, एगं संजलणे लोभे छुहइ, ताहे तं पि तिन्नि भागे करेति, दो भागे जुगवं खवेति, एगं भागं संखेज्जाइं खंडाइं करेति । एत्थ बादरसंपरायो खवओ ताहे खवेति, (एगं संखिज्जइमं भागं मोत्तूण सव्वं खवेति) जं संखेज्जतिमं खंडं, तं असंखेज्जे भागे करेति । तेऽवि कमेण खवेति, तत्थ खवगो सुहुमसंपराओ । जाहे तं पि खवितं भवति, ताहे खवगणियण्ठो लब्भति ।**" इति ॥२१८॥

सूक्ष्मसम्परायगुणस्थानकं यावदधस्तादुक्ता सर्वा प्ररूपणा पुरुषवेदक्रोधोदयेन प्रतिपन्नस्य ज्ञातव्या । क्षपकश्रेणिं पुनः कश्चिज्जन्तुः पुरुषवेदक्रोधोदयेन प्रतिपद्यते, कश्चित्पुनः पुरुषवेदमानोदयेना-ऽऽरोहति, अन्यः पुरुषवेदमायोदयेन, इतरः पुरुषवेदलोभोदयेन, परस्तु स्त्रीवेदक्रोधोदयेन । पुरुषवेदोदयवत् स्त्रीवेदोदयस्यापि चत्वारो विकल्पा वक्तव्याः, एवं नपुंसकवेदोदयस्या-ऽपि चत्वारो विकल्पा भणितव्याः । इत्थं सर्वसंख्यया विकल्पा द्वादश भवन्ति । तत्र सूक्ष्मसम्परायगुणस्थानकं यावत् पुरुषवेदक्रोधोदयेन क्षपकश्रेणिं प्रतिपन्नस्य मोहनीयक्षपणाविधिर्दर्शितः । सम्प्रति भिन्नभिन्नकषायोदयेन भिन्नभिन्नवेदोदयेन च क्षपकश्रेणिं प्रतिपद्यमानानां क्रियाभेदो वक्तव्यः, अन्यथा तन्निर्णयो न स्यात् । न च त्रिकालमाश्रित्य सर्वक्षपकाणामनिवृत्तिकरणे परिणामसादृश्यात् क्रियाभेदः कथं घटेत् ? इति वाच्यम्, करणपरिणामानां सादृश्येऽपि भिन्नभिन्नवेदकषायोदयलक्षणसहकारिकारणोपलम्भेन क्रियाभेदे विरोधा-ऽभावात् । तत्र सर्वेषां क्षपकाणां पुरुषवेदादिभिः क्रोधादिभिश्च क्षपकश्रेणिं प्रतिपन्नानामन्तरकरणक्रियातः प्राक् कश्चिदपि भेदो नास्ति । उक्तञ्च **कषायप्राभृतचूर्णौ-"अंतरे अकदे णत्थि णाणत्तं ।"** इति अन्तरकरणे क्रियमाणे यो भेद उपलभ्यते, तं प्रदिदर्शयिषुः प्रथमं तावत् प्रथमस्थितिभेदमाविष्करोति—

**माणादीहिं चडिआणं पढमठिई उ माणपहुडीणं ।**
**कोहादिगदुतिखवणद्धाजुअकोहपढमट्ठिइपमाणा ॥२१९॥ (गीतिः)**

मानादिभिरारूढानां प्रथमस्थितिस्तु मानप्रभृतीनाम् ।
क्रोधाद्येकद्वित्रिक्षपकाद्धायुतक्रोधप्रथमस्थितिप्रमाणा ॥२१९॥ इति पदसंस्कारः ।

**'माणा०'** इत्यादि, **'मानादिभिः'** मानमायालोभलक्षणैः कषायैः **'आरूढानां'** क्षपकश्रेणिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपन्नानां क्षपकाणां 'मानप्रभृतीनां' मान-माया-लोभरूपाणां कषायाणां प्रथमस्थितिस्तु 'क्रोधाद्येक-द्वि-त्रिक्षपणाद्धायुतक्रोधप्रथमस्थितिप्रमाणा' क्रोधादीनां=क्रोध-मान-मायानाम् एक-द्वि-त्रिक्षपणाद्धायुक्तक्रोधप्रथमस्थितिप्रमिता भवति । इदमुक्तं भवति—एकस्य=क्रोधस्य याऽन्तर्मुहूर्तप्रमाणा क्षपणाद्धा, तया युक्ताऽन्तरकरणे क्रियमाणे क्रोधप्रथमस्थितिर्यावती भवति, तावती मानोदयेन क्षपकश्रेणिं समारूढस्य जीवस्य मानस्य प्रथमस्थितिर्भवति ।

ननु क्रोधोदयारूढः क्रोधप्रथमस्थितिं वेदयन्नेव यथायोग्यं संक्रमेण वेदनेन च क्रोधसंग्रहकिट्टित्रयं क्षपयति । तेन क्रोधक्षपणाद्धायाः क्रोधप्रथमस्थितावेवा-ऽन्तर्भावसम्भवात् क्रोधक्षपणाद्धायुतक्रोधप्रथमस्थितिप्रमाणा मानप्रथमस्थितिरित्यत्र क्रोधक्षपणाद्धायुतेति विशेषणस्य वैयर्थ्येना-ऽनुपादेयत्वमिति चेत्, मैवम्, यतोऽन्तरकरणे क्रियमाणे क्रोधोदयाऽऽरूढस्य जीवस्याऽन्तरकरणस्याऽधस्ताद् यावती क्रोधस्थितिर्भवति, यस्यां च स्थितोऽन्तरकरणं कृत्वा ततो यथाक्रमं वेदत्रिकं क्षपयित्वा-ऽश्वकर्णकरणाद्धां च समाप्य किट्टिकरणाद्धायाश्चरमसमयं प्राप्नोति, तावती स्थितिः क्रोधप्रथमस्थितिरत्र विवक्षिता । द्वितीयस्थितितो दलं गृहीत्वा क्रोधसंग्रहकिट्टित्रयस्य यथाक्रमं प्रथमस्थितिं कृत्वा वेदयन् सङ्क्रमेण यावता कालेन क्रोधं क्षपयति, तावान् कालस्तु क्रोधक्षपणाद्धा व्यपदिश्यते । एवमग्रेऽपि मानादीनां क्षपणाद्धा व्याख्येया । इत्थमन्तरकरणक्रियाप्रारम्भप्रथमसमयप्रभृतिकिट्टिकरणचरमसमयपर्यवसानाद्धा क्रोधप्रथमस्थितिः, क्रोधप्रथमसंग्रहकिट्टिवेदनाद्धाप्रथमसमयप्रभृतितृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमयपर्यवसाना तु क्रोधक्षपणाद्धेति विवेकः, तेन क्रोधक्षपणाद्धा क्रोधप्रथमस्थितौ ना-ऽन्तर्भवति । अनन्तर्भावाद् न विशेषणस्य वैयर्थ्यम्, अवैयर्थ्याच्च नाऽनुपादेयतेत्यलं प्रसङ्गेन ।

मानोदयारूढः क्रोधक्षपणाद्धायुक्तक्रोधप्रथमस्थितिप्रमाणां मानप्रथमस्थितिं वेदयन् यथाक्रमं वेदत्रयस्य क्रोधस्य च क्षपणामश्वकर्णकरणाद्धां किट्टिकरणाद्धां च परिसमापयति । तस्य जीवस्य क्रोधस्य प्रथमस्थितिर्न भवति । यदाहुः **कषायप्राभृतचूर्णौ—"अन्तरकरणे कदे कोहस्स पढमट्ठिदी णत्थि, माणस्स अत्थि । सा केम्महंती ? जद्देही कोहेण उवट्ठिदस्स कोहस्स पढमट्ठिदी कोहस्स चेव खवणद्धा, तद्देही चेव एम्महंती माणेण उवट्ठिदस्स माणस्स पढमट्ठिदी ।"** इति ।

मायोदयेन क्षपकश्रेणिं समारूढस्य जीवस्य मायायाः प्रथमस्थितिः क्रोधमानक्षपणाद्धायुक्तक्रोधप्रथमस्थितिप्रमिता भवति । क्रोधक्षपणाद्धा प्राग् व्याख्याता । मानसंग्रहकिट्टित्रयं वेदनेन संक्रमेण च यावता कालेन क्षपयति, तावान् कालो मानक्षपणाद्धा व्यपदिश्यते । इत्थं क्रोधस्य क्षपणाद्धा मानस्य क्षपणाद्धा क्रोधोदयेन चाऽऽरूढस्य क्रोधप्रथमस्थितिरित्येतत्त्रयप्रमाणा मायोदयेन समारूढस्य मायायाः प्रथमस्थितिर्भवति । उक्तञ्च **कषायप्राभृतचूर्णौ—"कोहेण उवट्ठिदस्स**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जम्महंती कोहस्स पढमट्ठिदी, कोहस्स चेव खवणद्धा माणस्स च खवणद्धा, मायाए उवट्ठिदस्स एम्महंती मायाए पढमट्ठिदी।"** इति ।

लोभोदयेन क्षपकश्रेणिं समधिगतस्य जन्तोर्लोभस्य प्रथमस्थितिः क्रोध-मान-माया-सम्बन्धिक्षपणाद्धा-ऽन्वितक्रोधप्रथमस्थितिप्रमाणा भवति । प्रत्यपादि च **कषायप्राभृतचूर्णौ–"जद्देही कोहेण उवट्ठिदस्स कोहस्स पढमट्ठिदी, कोहस्स माणस्स मायाए च खवणद्धा, तद्देही लोभेण उवट्ठिदस्स पढमट्ठिदी ।"** इति। अत एव **द्वाचत्वारिंशत्तमगाथोक्ता**-ल्पबहुत्वं सूपपद्यते ॥२१९॥

अथ मानादिकषायोदयेन प्रतिपन्नानां क्षपकाणां क्रियाभेदमभिधित्सुराह—

**इग-दु-ति-खवणं किच्चा कमेण हयकण्णकिट्टिकरणाइं ।**
**माणाईहिं चडिओ करइ विणासइ तओ सेसं ॥२२०॥**

एक-द्वि-त्रि-क्षपणां कृत्वा क्रमेण हयकर्ण-किट्टिकरणे ।
मानादिभिरारूढः करोति विनाशयति ततः शेषम् ॥२२०॥ इति पदसंस्कारः ।

**'इगदु०'** इत्यादि, तत्र 'मानादिभिः' मानमायालोभलक्षणैः कषायैः 'आरूढः' क्षपकश्रेणिं प्रतिपन्नः 'एक-द्वि-त्रि-क्षपणाम्' एकश्च द्वौ च त्रयश्चेत्येकद्वित्रयः, तेषां क्षपणा, ताम् , ततश्चायमर्थः—एकस्य-क्रोधस्य, द्वयोः-क्रोधमानयोः, त्रयाणां-क्रोधमानमायानां क्षपणां-विनाशं 'कृत्वा' विधाय 'क्रमेण हयकर्णकिट्टिकरणे' क्रमेणाऽश्वकर्णकरणं किट्टिकरणं च करोति **'विणासइ'** इत्यादि, तत्र 'ततः' किट्टिकरणाद्धापरिसमाप्तेः परं 'शेषं' यथासंभवं मानादित्रयरूपं मायालोभरूपं वा लोभलक्षणं वा मोहनीयं 'विनाशयति' यथाक्रमं किट्टिस्वरूपेण क्षपयति । अयमस्य भावार्थः—क्रोधोदयेन समारूढः पुरुषवेदक्षपणा-ऽनन्तरं यदा-ऽश्वकर्णकरणाद्धायां संज्वलनचतुष्कस्या-ऽपूर्वस्पर्धकानि निर्वर्तयति, तदा मानोदयेन क्षपकश्रेणिं प्रतिपन्नः संज्वलनक्रोधं पूर्वस्पर्धकस्वरूपेणैव क्षपयति, प्रकारान्तरा-ऽसंभवात् । ततः क्रोधोदयारूढः संज्वलनचतुष्कस्य किट्टिकरणाद्धामारभते, मानोदयप्रतिपन्नस्तु क्षपितक्रोधो-ऽश्वकर्णकरणाद्धामारभते, तत्र च संज्वलनत्रिकस्या-ऽपूर्वस्पर्धकानि करोति । तेन मानोदयारूढस्य जीवस्यैकस्य क्रोधस्य क्षपणाद्धानन्तरमश्वकर्णकरणाद्धा प्रवर्तत इति सूपपन्नम् । ततः क्रोधोदयेन प्रतिपन्नस्य क्रोधसंग्रहकिट्टित्रयवेदनकालक्षणः क्रोधक्षपणाकालः प्रवर्तते, मानोदयेन तु प्रतिपन्नस्य किट्टिकरणाद्धा प्रवर्तते, तदानीं च संज्वलनत्रिकस्य नवानामेव संग्रहकिट्टीनां निर्वर्तनं संभवति, क्रोधस्य प्रागेव स्पर्धकस्वरूपेण क्षीणत्वात् । तच्च **त्र्यशीतितमगाथया** दर्शितम् । ततः क्रोधोदयेन समारूढो मानसंग्रहकिट्टिप्रथमस्थितिं कृत्वा मानक्षपणाद्धामारभते, तदानीमेव च मानोदयारूढोऽपि मानक्षपणाद्धामुपक्रमते । समवादि च **कषायप्राभृतचूर्णौ–"जम्हि कोहेण उवट्ठिदो अस्सकण्णकरणं करेदि, माणेण उवट्ठिदो तम्हि काले कोहं खवेदि, कोहेण उव-**

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**ट्ठिदस्स जा किट्टीकरणद्धा, माणेण उवट्ठिदस्स तम्हि काले अस्सकण्णकरणद्धा। कोहेण उवट्ठिदस्स जा कोहस्स खवणद्धा, माणेण उवट्ठिदस्स तम्हि काले किट्टीकरणद्धा। कोहेण उवट्ठिदस्स जा माणस्स खवणद्धा, माणेण उवट्ठिदस्स तम्हि चेव काले माणस्स खवणद्धा।"** इति। मानक्षपणाद्धाप्रथमसमये तु मानोदयाऽऽरूढस्य किट्टिवेदनाद्धाप्रथमसमये मोहनीयस्य स्थितिसत्त्वं चतुर्वार्षिकं जायते, क्रोधतृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमये मोहनीयस्थितिसत्कर्मणश्चतुर्वार्षिकत्वप्रतिपादनात्। अभाणि च कषायप्राभृतचूर्णौ–**माणेण उवट्ठिदस्स पढमसमयकिट्टीवेदगस्स ट्ठिदिसंतकम्मं चत्तारि वस्साणि।"** इति। ततः परं सर्वप्ररूपणा क्रोधोदयारूढवदविशेषेण कर्तव्या। उक्तं च कषायप्राभृतचूर्णौ–**"एत्तो पाए जहा कोहेण उवट्ठिदस्स विही, तहा माणेण उवट्ठिदस्स।"** इति

अथ मायोदयेन प्रतिपन्नस्य विशेषोऽभिधीयते--क्रोधोदयारूढः पुरुषवेदक्षपणाऽनन्तरं यदाऽश्वकर्णकरणाद्धायां संज्वलनचतुष्कस्याऽपूर्वस्पर्धकानि करोति, तदा मायोदयारूढः क्षपकः पूर्वस्पर्धकस्वरूपेणैव क्रोधं संक्रम्य क्षपयति। ततः क्रोधोदयारूढः किट्टिकरणाद्धां प्रवर्तयति, मायोदयारूढस्तु पूर्वस्पर्धकस्वरूपेणैव मानं संक्रम्य क्षपयति। ततः क्रोधोदयाऽऽरूढः क्रोधसंग्रहकिट्टित्रयं क्षपयति, तदानीं मायोदयप्रतिपन्नस्त्वश्वकर्णकरणाद्धामारभमाणो मायालोभयोरपूर्वस्पर्धकानि करोति। इत्थं द्वयोः=क्रोधमानयोः क्षपणानन्तरं मायोदयेन प्रतिपन्नस्याऽश्वकर्णकरणाद्धा प्रवर्तते। ततः क्रोधोदयारूढो मानं क्षपयति, मायोदयेन समारूढस्तु मायालोभयोः षट् संग्रहकिट्टीः करोति। ततः क्रोधोदयेन प्रतिपन्नो मायाकिट्टीर्वेदयन् मायां विनाशयति, मायोदयेन क्षपकश्रेणिमधिगतोऽपि मायायाः किट्टीर्वेदयन् मायां क्षपयति। न्यगादि च कषायप्राभृतचूर्णौ–**"कोहेण उवट्ठिदो जम्हि अस्सकण्णकरणं करेदि, मायाए उवट्ठिदो तम्हि कोहं खवेदि। कोहेण उवट्ठिदो जम्हि किट्टीओ करेदि, मायाए उवट्ठिदो तम्हि माणं खवेदि। कोहेण उवट्ठिदो जम्हि कोधं खवेदि, मायाए उवट्ठिदो तम्हि अस्सकण्णकरणं करेदि। कोहेण उवट्ठिदो जम्हि माणं खवेदि, मायाए उवट्ठिदो तम्हि किट्टीओ करेदि। कोहेण उवट्ठिदो जम्हि मायं खवेदि, तम्हि चेव मायाए उवट्ठिदो मायं खवेदि।"** इति। मायाकिट्टिवेदनाद्धाप्रथमसमये तु मायोदयाऽऽरूढस्य जीवस्य मोहनीयस्य स्थितिसत्त्वं द्विवार्षिकं भवति, क्रोधोदयारूढस्य मानतृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमये स्थितिसत्कर्मणो द्विवार्षिकत्वसंस्तवात्। अभ्यधायि च कषायप्राभृतचूर्णौ–**"मायाए उवट्ठिदस्स पढमसमयकिट्टीवेदगस्स वे वस्साणि मोहणीयस्स ट्ठिदिसंतकम्मं।"** इति। ततः परं क्षपितमायः क्रोधोदयारूढवद् मायोदयारूढोऽपि लोभं क्षपयति। उक्तञ्च कषायप्राभृतचूर्णौ–**"एत्तो पाए लोभं खवेमाणस्स णत्थि णाणत्तं।"** इति।

सम्प्रति यो लोभोदयेन क्षपकश्रेणिं प्रतिपद्यते, तस्य भेदो दर्श्यते--क्रोधोदयारूढः पुरु-

Jain Education International　　　　For Private & Personal Use Only　　　　www.jainelibrary.org

षवेदक्षपणा-ऽनन्तरमश्वकर्णकरणाद्धायां संज्वलनचतुष्कस्या-ऽपूर्वस्पर्धकानि करोति, लोभोदयारूढः पूर्वस्पर्धकस्वरूपेणैव संज्वलनक्रोधं क्षपयति । ततः क्रोधोदयारूढः संज्वलनचतुष्कस्य किट्टीः करोति, लोभोदयेन प्रतिपन्नस्तु पूर्वस्पर्धकस्वरूपेणैव मानं क्षपयति । ततः क्रोधोदयेन क्षपकश्रेणिं समारूढः क्रोधं क्षपयति, लोभोदयेन क्षपकश्रेणिमधिगतस्तु पूर्वस्पर्धकस्वरूपेणैव मायां क्षपयति, क्रोधोदयेन क्षपकश्रेणिं समारूढो मानं क्षपयति, लोभोदयारूढस्त्वश्वकर्णकरणाद्धामारभमाणो लोभस्या-ऽपूर्वस्पर्धकानि निर्वर्तयति । इत्थं त्रयाणां क्रोधमानमायानां क्षपणातः परं लोभोदयारूढो-ऽश्वकर्णकरणाद्धामारभते । ततः क्रोधोदयारूढो मायां क्षपयति, लोभोदयेन प्रतिपन्नस्तु संज्वलनलोभस्य तिस्रः संग्रहकिट्टीः करोति । ततः क्रोधोदयेन क्षपकश्रेणिमधिगतः किट्टिगतं लोभं क्षपयति, लोभोदयारूढोऽपि किट्टिगतं लोभं क्षपयति । अभिहितं च **कषायप्राभृतचूर्णौ**—**"कोहेण उवट्ठिदो जम्हि अस्सकण्णकरणं करेदि, लोभेण उवट्ठिदो तम्हि कोहं खवेदि । कोहेण उवट्ठिदो जम्हि किट्टीओ करेदि, लोभेण उवट्ठिदो तम्हि माणं खवेदि । कोहेण उवट्ठिदो जम्हि कोहं खवेदि, लोभेण उवट्ठिदो तम्हि मायं खवेदि । कोहेण उवट्ठिदो जम्हि माणं खवेदि, लोभेण उवट्ठिदो तम्हि अस्सकण्णकरणं करेदि । कोहेण उवट्ठिदो जम्हि मायं खवेदि, लोभेण उवट्ठिदो तम्हि किट्टीओ करेदि । कोहेण उवट्ठिदो जम्हि लोभं खवेदि, तम्हि चेव लोभेण उवट्ठिदो लोभं खवेदि ।"** इति । लोभं क्षपयतो जीवस्य किट्टिवेदनाद्धाप्रथमसमये मोहनीयस्थितिसत्त्वमेकवर्षमात्रं भवति । उक्तं च **कषायप्राभृतचूर्णौ**—**"लोभेण उवट्ठिदस्स पढमसमयकिट्टीवेदगस्स मोहणीयस्स ट्ठिदिसंतकम्ममेकं वस्सं ।"** इति । ततः क्रोधोदयारूढवत् तावद्वसेयम् , यावत्सूक्ष्मसम्परायचरमसमयः ॥२२०॥

भिन्नभिन्नकषायोदयेन क्षपकश्रेणिं प्रतिपन्नानां क्रियाभेदो दर्शितः । सम्प्रति भिन्नभिन्नवेदोदयेन क्षपकश्रेणिं समारूढानां क्रियाभेदमाविश्चिकीर्षुः प्रथमतस्तावत् स्त्रीवेदोदयेन प्रतिपन्नस्य जीवस्य क्रियाभेदं दर्शयति—

**इत्थी खलु पुरिसुदयेणं पडिवन्नस्स इत्थिखवणांतं ।**
**पढमठिइं ठावेइ अवेआ सत्त जुगवं विणासेइ ॥२२१॥ (गीतिः)**

स्त्री खलु पुरुषोदयेन प्रतिपन्नस्य स्त्रीक्षपणान्ताम् ।
प्रथमस्थितिं स्थापयत्यवेदा सप्त युगपद् विनाशयति ॥२२१॥ इति पदसंस्कारः ।

**'इत्थी'** इत्यादि, 'स्त्री' स्त्रीवेदोदयेन क्षपकश्रेणिं समारूढो जीवः 'खलु' खलुर्वाक्यालङ्कारे, पुरुषवेदोदयेन प्रतिपन्नस्य जन्तोः 'स्त्रीक्षपणान्तां' स्त्रियाः—स्त्रीवेदस्य क्षपणा-क्षपणाकालोऽन्ते यस्याः, सा, ताम् 'प्रथमस्थितिं' प्रस्तुतत्वात् स्त्रीवेदस्य प्रथमस्थितिं स्थापयति, पुरुषवेदोदया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूढस्या-ऽन्तरकरणक्रियाप्रथमसमयप्रभृतिस्त्रीवेदक्षपणाद्धाचरमसमयपर्यवसाना पुरुषवेदस्य यावती प्रथमस्थितिर्भवति, तावतीं प्रथमस्थितिं स्त्रीवेदस्य स्त्रीवेदोदयारूढो जीवः स्थापयतीत्यर्थः। उक्तं च कषायप्राभृतचूर्णौ—**"जद्देही पुरिसवेदेण उवट्ठिदस्स इत्थीवेदस्स खवणाद्धा, तद्देहि इत्थीवेदेण उवट्ठिदस्स इत्थीवेदस्स पढमट्ठिदी।"** इति। अत एव द्वाचत्वारिंशत्तमगाथया प्रतिपादितं प्रथमस्थित्यल्पबहुत्वं सूपपद्यते। अन्तरकरणनिष्पादनतः पूर्वं क्रियाभेदो नास्ति। अन्तरकरणं विधाय निरुक्तस्त्रीवेदप्रथमस्थितिं वेदयन् पुरुषवेदोदयाऽऽरूढवद् नपुंसकवेदं परिक्षप्य ततः स्त्रीवेदं क्षपयति। स्त्रीवेदप्रथमस्थितेश्चाऽऽवलिकाद्वये शेषे स्त्रीवेदस्यागालो व्यवच्छिद्यते। ततः परं स्त्रीवेदप्रथमस्थितौ समयाधिकावलिकाशेषायां स्त्रीवेदस्य जघन्यस्थित्युदीरणा भवति। उक्तं च कर्मप्रकृतिचूर्णौ—**"ताए पढमठितीए समयाहियावलियसेसाए मिच्छत्तस्स, तिण्हं वेयाणं, चउण्हं संजलणाणं, सम्मत्तस्स य जहण्णिया ठितिउदीरणा भवति।"** इति। तदानीमेव जघन्या-ऽनुभागोदीरणा गुणितकर्मांशस्य च क्षपकस्योत्कृष्टप्रदेशोदीरणा जायते। उक्तं च कर्मप्रकृतिचूर्ण्यामनुभागोदीरणाऽधिकारे प्रदेशोदीरणा-ऽधिकारे च **"पञ्चविहअंतराइय-केवलणाण-केवलदंसणावरण-चउण्हं संजलणाणं णवण्हं णोकसायाणं एयासिं वीसाए पगईणं अप्पप्पणो उदीरणंते जहण्णिया अणुभागउदीरणा होति। ××× वेयाणं तिण्हं पि अप्पप्पणो समयाहियावलियचरिमसमयवेयगो।"** इति। तथैवा-ऽभिहितं कषायप्राभृतचूर्णावप्यनुभागोदीरणाधिकारे प्रदेशोदीरणाधिकारे च—**"इत्थिवेदस्स जहण्णाणुभागउदीरणा कस्स? इत्थिवेदखवगस्स समयाहियावलिय चरिमसमयसवेदस्स। ×× इत्थिवेदस्स उक्कस्सिया पदेसुदीरणा कस्स? खवगस्स समयाहियावलियचरिमसमयइत्थिवेदगस्स।"** इति।

ततः परं यदा स्त्रीवेदस्य चरमस्थितिखण्डं संक्रमयति, तदा तस्य जीवस्य स्त्रीवेदस्य जघन्यस्थितिसंक्रमो भवति। तदानीमेव च स्त्रीवेदस्य चरमाऽनुभागखण्डं संक्रमयतो जघन्या-ऽनुभागसंक्रमोऽपि भवति। अत्र श्रीमन्मलयगिरिपादादयस्तु स्त्रीवेदोदयारूढस्यैव जघन्यस्थितिसंक्रमो भवति, नाऽन्यवेदोदयारूढस्य, स्त्रीवेदोदयारूढस्योदयोदीरणाभ्यां प्रभूतायाः स्थितेस्त्रोटनादित्याहुः। उक्तं च तैः कर्मप्रकृतिवृत्तौ—**"स्त्रीवेदेन च प्रतिपन्नो नपुंसकवेदक्षयानन्तरमन्तर्मुहूर्तेन कालेन स्त्रीवेदं क्षपयति। एतावता च कालेनोदयोदीरणाभ्यां बह्वी स्थितिस्त्रुटयति। यद्यपि च पुरुषवेदेनापि प्रतिपन्नस्यैतावान् कालो लभ्यते, तथापि तस्य स्त्रीवेदसत्के उदयोदीरणे न भवत इति। स्त्रीवेदप्रतिपन्नस्यैव स्त्रीवेदस्य जघन्यस्थितिसंक्रमः, न शेषस्य।"** इति। एवमनुभागसंक्रमोऽपि जघन्यः स्त्रीवेदोदयारूढस्यैव बोद्धव्यस्तेषां मतेन। अन्ये तु त्रयाणामन्यतमेन वेदेन प्रतिपन्नस्य चरमस्थिति-

Jain Education International　　　　For Private & Personal Use Only　　　　www.jainelibrary.org

खण्डं संक्रमयतो जीवस्य स्त्रीवेदस्य जघन्यस्थितिसङ्क्रमो भवति । इयं च तेषां युक्तिः–स्त्रीवेदोदयारूढो यस्मिन् स्थाने स्त्रीवेदं सर्वथा संक्रमयति, तस्मिन्नेव स्थाने पुरुषवेदोदयारूढो नपुंसकवेदोदयारूढश्चाऽपि । तदेवं वेदत्रयारूढानामेकस्मिन् स्थाने स्त्रीवेदस्य सर्वथा संक्रमणाऽन्यतमवेदेनारूढानां क्षपकाणां स्त्रीवेदस्य जघन्यस्थितिसंक्रमो भवति, स्थित्युदयोदीरणयोः सत्योरपि ताभ्यां स्थितिघाताऽभावात् । उक्तं च **कर्मप्रकृतिचूर्णिटिप्पनके श्रीमन्मुनिचन्द्रसूरिपादैः**– **"स्त्रीवेदस्य तु वेदत्रयेणारूढस्य जघन्यस्थितिसंक्रमो लभ्यते । सर्वत्रापि स्वस्थाने एव तस्य क्षयादिति ।"**卐 एवमनुभागसंक्रमोऽपि द्रष्टव्यः ।

तदानीं यथा पुरुषवेदोदयारूढस्य गुणितकर्मांशस्य स्त्रीवेदस्योत्कृष्टप्रदेशसंक्रमो भवति, न तथा स्त्रीवेदोदयारूढस्य स्त्रीवेदस्योत्कृष्टप्रदेशसंक्रमः, उदयोदीरणाभ्यां कतिपयानां दलानां क्षपितत्वात् ।

स्त्रीवेदप्रथमस्थितिचरमसमये स्त्रीवेदस्य जघन्याऽनुभागोदयो गुणितकर्मांशजन्तोश्चोत्कृष्टप्रदेशोदयो जायते । तदानीमेव स्त्रीवेदस्य जघन्यस्थितिसत्त्वं जघन्याऽनुभागसत्त्वं च भवतः । यदुक्तं **कषायप्राभृतचूर्णौ स्थितिविभक्त्यधिकारेऽनुभागविभक्त्यधिकारे च– "इत्थिवेदस्स जहण्णट्ठिदिविहत्ती कस्स ? चरिमसमयइत्थिवेदोदयक्खवयस्स । ××××इत्थिवेदस्स जहण्णयमणुभागसंतकम्मं कस्स ? खवयस्स चरिमसमयइत्थिवेदयस्स ।"** इति ।

निश्चयनयमाश्रित्य तदानीमेव व्यवच्छिद्यमानः पुरुषवेदस्य बन्धो व्यवच्छिन्नः, स्त्रीवेदस्य चोदयसत्त्वे व्यवच्छिद्यमाने व्यवच्छिन्ने । उक्तं च **सप्ततिकाचूर्णौ–"एमेव इत्थिवेएण वि उवट्ठियस्स, नवरि नपुंसगवेओ पढमं खिज्जइत्ति । तओ अंतोमुहुत्तेण इत्थिवेयस्स उदयसंतक्खओ पुरिसवेयबंधवोच्छेए य जुगवं भवइ ।"** इति ।

**'अवेआ'** त्ति 'अवेदा' न विद्यते वेदो-वेदोदयो यस्याः, साऽवेदा, अपगतवेदा मानुषीत्यर्थः, स्त्रीवेदं परिक्षप्याऽन्तर्मुहूर्तकालेन **'सत्त'** इत्यादि, 'सप्त' हास्यषट्कपुरुषवेदरूपाणि सप्तकर्माणि युगपत् सर्वात्मना क्षपयति, नाऽवशिष्यते समयोनद्व्यावलिकाबद्धः पुरुषवेदः, अन्तर्मुहूर्तात् प्रागेव स्त्रीवेदक्षयचरमसमये पुरुषवेदबन्धोच्छेदात् । पुरुषवेदोदयारूढस्तु वेदोदयचरमसमये समयोनावलिकाद्वयबद्धनूतनपुरुषवेददलं मुक्त्वा शेषं पुरुषवेदं हास्यषट्केन सह परिक्षप्य ततोऽवेदभावे तावता

---

卐जयधवलाकारैरप्युक्तम्—एत्थिथित्थिवेदोदयक्खवयस्सेत्ति वयणं सेसवेदोदयक्खवयपडिसेहफलं । णिरत्थयमिदं विसेसणं, अण्णवेदोदएण वि चढिदस्स खवयस्स जहण्णट्ठिदिसंकमाविरोहादो । ण च सोदय-परोदएहि चढिदाणं खवयाणमित्थिवेदचरिमट्ठिदिखंडयम्मि विसरिसभावो अत्थि, णवुंसयवेदस्सेव तदणुवलंभादो । तम्हा अण्णदरवेदोदइल्लस्स खवयस्सेत्ति सामित्तणिद्देसो कायव्वो त्ति । एत्थ परिहारो–सच्चमेदमुदाहरणमेत्तं तु इत्थिवेदोदयक्खवयावलंबणं, णेदं तंतमिति घेत्तव्वं । ×××××××× तम्हा सोदए वा परोदएण वा पयदसामित्तमविरुद्धं ।"इति ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कालेन पुरुषवेदं सर्वथा क्षपयति स्म। उक्तञ्च कषायप्राभृतचूर्णौ–"तदो अवगतवेदो सत्तकम्मंसे खवेदि। सत्तण्हं पि कम्माणं तुल्ला खवणद्धा।" इति। एवं सप्ततिकावृत्त्यामप्युक्तम् ॥२२१॥

अथ नपुंसकवेदोदयेन क्षपकश्रेणिं प्रतिपन्नस्य क्रियाभेदो द्रष्टव्यः। तत्रा-ऽन्तरकरणनिष्पादनतः प्राक् क्रियाभेदो नास्ति। अन्तरकरणक्रियाप्रारम्भतो यः क्रियाभेदः, तं दर्शयति—

**संढो ठवइ पढमठिइं इत्थीपढमठिइमिअं खवइ।**
**वेअदुगं जुगवं अवगयवेओ सत्त परिखवइ ॥२२२॥**

षण्ढः स्थापयति प्रथमस्थितिं स्त्रीप्रथमस्थितिमितां क्षपयति।
वेदद्विकं युगपदपगतवेदः सप्त परिक्षपयति ॥२२२॥ इति पदसंस्कारः।

**'संढो'** इत्यादि, 'षण्ढः' नपुंसको–नपुंसकवेदोदयेन क्षपकश्रेणिं प्रतिपन्नो जीव इत्यर्थः, 'प्रथमस्थितिं' नपुंसकवेदस्या-ऽऽदिमस्थितिं स्त्रीवेदप्रथमस्थितिप्रमितां स्थापयति, स्त्रीवेदोदयेन क्षपकश्रेणिं प्रतिपन्नो यावतीं स्त्रीवेदस्य प्रथमस्थितिं स्थापयति, नपुंसकवेदोदयाऽऽरूढोऽपि नपुंसकवेदस्य तावतीं प्रथमस्थितिं स्थापयति, पुरुषवेदस्त्रीवेदयोः प्रथमस्थितिं न स्थापयति। उक्तं च **कषायप्राभृतचूर्णौ—"जम्महंतो इत्थीवेदेण उवट्ठिदस्स इत्थीवेदस्स पढमट्ठिदी, तम्महंती णवुंसयवेदेण उवट्ठिदस्स णवुंसयवेदस्स पढमट्ठिदी।"** इति। अत एव **द्वाचत्वारिंशत्तमगाथोक्ताल्पबहुत्वं** सूपपद्यते।

ततः क्रमेण प्रथमस्थितिचरमसमयं प्राप्तो जीवो 'वेदद्विकं' स्त्रीवेदनपुंसकवेदलक्षणं युगपत् 'परिक्षपयति' सर्वात्मना विनाशयति, न तु पुरुषवेदोदयारूढवद् नपुंसकवेदं यथास्थानं परिक्षप्य ततः स्त्रीवेदं क्षपयतीत्यर्थः। अयं भावः–नपुंसकवेदोदयारूढोऽप्यन्तरकरणक्रियां परिसमाप्य नपुंसकवेदं क्षपयितुमारभते, तं च प्रतिसमयमसंख्येयगुणक्रमेण क्षपयन् गच्छति। यदा पुरुषवेदोदयारूढो नपुंसकवेदं सर्वथा क्षपयति स्म, न तदा-ऽयं नपुंसकवेदोदयारूढो नपुंसकवेदं सर्वात्मना क्षपयति, किन्तु ततः प्रभृति नपुंसकवेदेन सह स्त्रीवेदमपि क्षपयितुमुपक्रमते। उक्तं च **कषायप्राभृतचूर्णौ–"जद्देही पुरिसवेदेण उवट्ठिदस्स णवुंसयवेदस्स खवणद्धा, तद्देही णवुंसयवेदेण उवट्ठिदस्स णवुंसयवेदस्स खवणद्धा गदा, ण ताव णवुंसयवेदो खीयदि, तदो से काले इत्थिवेदं खवेदुमाढत्तो णवुंसयवेदं पि खवेदि।"** इति। ततो वेदद्वयं क्रमेण क्षपयन् नपुंसकवेदप्रथमस्थितौ द्व्यावलिकाशेषायां नपुंसकवेदस्यागालो व्यवच्छिद्यते।

ततः परं नपुंसकवेदप्रथमस्थितौ समयाधिकावलिकाशेषायां नपुंसकवेदस्य जघन्यस्थित्युदीरणा जायते। तदानीमेव नपुंसकवेदस्य जघन्या-ऽनुभागोदीरणा गुणितकर्मांशस्य च जीवस्योत्कृष्टप्रदेशोदीरणा जायते। उक्तं च **कषायप्राभृतचूर्णावनुभागोदीरणा-ऽधिकारे प्रदेशोदीरणा-ऽवसरे च–"णवुंसयवेदस्स जहण्णानुभागुदीरणा कस्स? णवुंसयवेदखव-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**यस्स समयाहियाऽऽवलियचरिमसमयसवेदगस्स। ×× णवुंसयवेदस्स उक्कस्सिया पदेसुदीरणा कस्स ? खवगस्स समयाहियावलियचरिमसमयणवुंसयवेदगस्स।"** इति। तथैव **कर्मप्रकृतिचूर्णावपि**–ततः परं यदा नपुंसकवेदोदयारूढो नपुंसकवेदस्य चरमस्थितिखण्डं संक्रमयति, तदा तस्य जीवस्य नपुंसकवेदस्य जघन्यस्थितिसंक्रमो भवति, पुरुषवेदोदयारूढस्य तु स न भवति स्म। अत्रेयं युक्तिः–यदा जीवः पुरुषवेदोदयेन क्षपकश्रेणिमारोहति, स यस्मिन् स्थाने नपुंसकवेदं सर्वथा क्षपयति, तत ऊर्ध्वमन्तर्मुहूर्तं गत्वा नपुंसकवेदोदयारूढो नपुंसकवेदं सर्वात्मना क्षपयति। अर्वाक् चाऽल्पविशुद्धत्वेन पुरुषवेदोदयारूढो नपुंसकवेदस्य स्थितिं सर्वजघन्यां न करोति, नपुंसकवेदोदयारूढस्त्वन्तर्मुहूर्तमूर्ध्वं गत्वा स्त्रीवेदेन सह नपुसंकवेदं सर्वथा क्षपयन् नपुंसकवेदस्य सर्वजघन्यां स्थितिं संक्रमयति, अन्तर्मुहूर्तकाले प्रभूतविशुद्ध्या प्रभूतायाः स्थितेरपवर्तितत्वात्। उक्तञ्च **श्रीमुनिचन्द्रसूरिपादैः कर्मप्रकृतिचूर्णिटिप्पनके**–**"यदा पुरुषवेदेन स्त्रीवेदेन चोदयमागतेन क्षपकश्रेणिमारोहति जन्तुः, तदा नपुंसकवेदस्य स्वस्थान एव क्षयादजघन्यस्थितिसंक्रमः। तदा तस्य मनागशुद्धत्वेन सर्वजघन्यनपुंसकवेदस्थितिकरणाऽभावात्। यदा तु नपुंसकवेदोदयेनारोहति, तदा नपुंसकवेदं जुगवं खवेति त्ति वचनात् स्त्रीवेदेन सह क्षयं नयतीति तदा तस्य जघन्यस्थितिसंक्रमो लभ्यते, शुद्धत्वेन स्थितीनां बह्वपवर्तितत्वात्।"** इति। एवं नपुंसकवेदोदयारूढस्य नपुंसकवेदस्य जघन्याऽनुभागसंक्रमोऽपि वाच्यः। यदुक्तं **कषायप्राभृतचूर्ण्याम्**–**णवुंसयवेदयस्स जहण्णाणुभागसंतकम्मं कस्स? खवगस्स चरमसमयणवुंसयवेदयस्स।"** इति।

नपुंसकवेदप्रथमस्थितिचरमसमये नपुंसकवेदस्य जघन्याऽनुभागोदयो गुणितकर्मांशस्य च जन्तोरुत्कृष्टप्रदेशोदयो जायते। तदानीं च सर्वसंक्रमेण नपुंसकवेदं स्त्रीवेदं च पुरुषवेदे संक्रम्य सर्वात्मना क्षपयति। उक्तं च **कषायप्राभृतचूर्णौ**–**"पुरिसवेदेण उवट्ठिदस्स जम्हि इत्थीवेदो खीणो, तम्हि चेव णवुंसयवेदेण उवट्ठिदस्स इत्थिवेद-णवुंसयवेदा च दो वि सह खिज्जंति।"** इति। एवं **सप्ततिकावृत्तावपि**–**"यदा तु नपुंसकवेदेन प्रतिपद्यते, तदा प्रथमतः स्त्रीवेद-नपुंसकवेदौ युगपत् क्षपयति।"** इति।

यथा पुरुषवेदोदयारूढस्य चरमस्थितिखण्डसंक्रमे नपुंसकवेदोत्कृष्टप्रदेशसंक्रमः प्राग् दर्शितः, न तथा नपुसंकवेदोदयप्रतिपन्नस्य नपुंसकवेदस्योत्कृष्टप्रदेशसंक्रमो भवति, कतिपयानां दलिकानामुदयोदीर्णाभ्यां क्षपितत्वात्।

निश्चयनयमाश्रित्य तदानीमेव व्यवच्छिद्यमानः पुरुषवेदस्य बन्धो व्यवच्छिन्नः, एवं व्यवच्छिद्यमाने नपुंसकवेदस्योदयसत्त्वेऽपि व्यवच्छिन्ने। उक्तं च **सप्ततिकाचूर्णौ**–**"णपुंसगवेएण**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उवट्ठियस्स नपुंसक-इत्थिवेयसंतक्खए पुरिसवेयबंधवोच्छेए य जुगवं कए तस्स एक्कारससंतं ।"** इति ।

**'अवगय०'** इत्यादि, स्त्रीवेदनपुंसकवेदक्षयानन्तरम् 'अपगतवेदः' अपगतो व्यवच्छिन्नो वेदो=वेदोदयो यस्य, स जीवोऽपगतवेदः, व्यवच्छिन्नवेदोदयो जीव इत्यर्थः, अन्तर्मुहूर्तकालेन 'सप्त' पुरुषवेद-हास्यषट्कलक्षणानि सप्तसङ्ख्यानि कर्माणि युगपत् सर्वात्मना क्षपयति, अन्तर्मुहूर्तात् प्रागेव नपुंसकवेदक्षयचरमसमये पुरुषवेदबन्धोच्छेदेन समयोनद्व्यावलिकाबद्धपुरुषवेदस्यावशिष्टत्वाभावात् । उक्तं च **कषायप्राभृतचूर्णौ–"तदो अवगयवेदो सत्त कम्मंसे खवेदि । सत्तण्हं कम्माणं तुल्ला खवणद्धा ।"** इति । एवं **सप्ततिकावृत्त्यादावपि** । ॥२२२॥

भिन्नभिन्नवेदोदयेन प्रतिपन्नानां क्रियाभेददर्शनात् स्त्रीवेदनपुंसकवेदोदयारूढानां जीवानां पुरुषवेदस्य जघन्यस्थितिबन्धो न भवतीत्याविश्चिकीर्षुराह—

**इत्थीसंढाणं पुरिसस्स जहण्णो न होइ ठिइबंधो ।**
**सेसं तु पुरिसवेअव्व भासियं वेदणाणत्तं ॥२२३॥**

स्त्रीषण्ढयोः पुरुषस्य जघन्यो न भवति स्थितिबन्धः ।
शेषं तु पुरुषवेदवद् भाषितं वेदनानात्वम् ॥ २२३ ॥ इति पदसंस्कारः ।

**'इत्थी०'** इत्यादि, 'स्त्रीषण्ढयोः' स्त्रीवेदोदयेन प्रतिपन्नस्य नपुंसकवेदोदयाऽऽरूढस्य चेत्यर्थः 'पुरुषस्य' पुरुषवेदस्य जघन्यस्थितिबन्धो-ऽष्टवर्षप्रमाणो न भवति । कथमेतदवसीयते ? इति चेत्, उच्यते–पुरुषवेदस्य जघन्यस्थितिबन्धः पुरुषवेदोदयारूढस्य प्रथमस्थितिचरमसमये भवति स्म, स्त्रीनपुंसकवेदोदयेन प्रतिपन्नानां क्षपकाणां वेदस्य प्रथमस्थितिः पुरुषवेदोदयारूढवेद-प्रथमस्थितितः संख्येयभागप्रमाणया हास्यषट्कक्षपणाद्धया हीना भवति, सा च प्राग् दर्शिता **द्वाचत्वारिंशत्तमगाथयाऽनन्तरोक्तगाथद्वयेन** च । पुरुषवेदस्य चरमस्थितिबन्धस्तु वेदप्रथम-स्थितिचरमसमये भवति । तेन स्त्रीनपुंसकोदयप्रतिपन्नानां पुरुषवेदस्य चरमबन्धः पुरुषवेदोदया-रूढतोऽर्वाग् भवति, अर्वाक् च विशुद्धेरल्पत्वात् पुरुषवेदोदयारूढवज्जघन्यस्थितिबन्धो न भवति । उपलक्षणमेतद्, तेन स्त्रीवेदनपुंसकवेदोदया-ऽऽरूढानां पुरुषवेदस्य जघन्या-नुभागबन्धोऽपि न भवति । तथा प्रागुक्ताः पुरुषवेदस्य जघन्यस्थित्युदीरणा-जघन्याऽनुभागोदीरणोत्कृष्टप्रदेशोदीरणा-जघन्यानुभागोदयोत्कृष्टप्रदेशोदया न भवन्ति, पुरुषवेदोदयाभावात्, पुरुषवेदस्य च जघन्यस्थिति-सत्ता-जघन्यानुभागसत्ता-जघन्यप्रदेशसत्ता - जघन्यस्थितिसंक्रम-जघन्या-ऽनुभागसंक्रम - जघन्यप्रदेश-संक्रमा न भवन्ति, पुरुषवेदोदयचरमसमयबन्धमाश्रित्य निरुक्तानां लाभात् ।

**'सेसं'** इत्यादि, उपर्युक्तादन्यच्छेषम्, तच्च पुरुषवेदवदवसेयम्, विशेषाऽभावात् । अथ निगम-यति–**'भासियं'** इत्यादि, 'भाषितं' कथितं 'वेदनानात्वं' वेदमाश्रित्य क्रियाभेदः, भिन्नभिन्नवेदो-दयेन समारूढानां क्षपकाणां क्रियाभेदः प्रतिपादित इत्यर्थः । पश्यन्तु पाठका यन्त्रकम्–३० ॥२२३॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

## भिन्नभिन्नकषायोदयेन भिन्नभिन्नवेदोदयेन च क्षपकश्रेणिं प्रतिपन्नानां कर्मक्षपणायाश्चित्रम्




सङ्केतस्पष्टीकरणम्—

वामपार्श्वे नपुंसकवेदोदयारूढस्य जीवस्य नपुंसकवेदस्य प्रथमस्थितिः स्तोका दर्शिता, सा च स्त्रीवेदप्रथमस्थितिप्रमाणा। तस्मात् कारणात् स्त्रीवेदनपुंसकवेदयोः प्रथमस्थितिर्मिथस्तुल्या भवति। ततो हास्यषट्कक्षपणाकालमात्रेण संख्येयभागेनाधिका पुरुषवेदस्य प्रथमस्थितिर्भवति, यतः स्त्रीवेदस्य प्रथमस्थितिः पुरुषवेदोदयारूढस्त्रीवेदक्षपणाद्धाचरमसमयपर्यवसाना, पुरुषवेदस्य तु प्रथमस्थितिर्हास्यषट्कक्षपणाद्धाचरमसमयपर्यवसाना। (गाथाः—४२, २२१, २२२)।

१=नपुंसकवेदप्रथमस्थितिचरमसमयः, तदानीं स्त्रीवेद-नपुंसकवेदलक्षणं वेदद्वयं युगपत् क्षपयति। तदानीमेव नपुंसकवेदस्य जघन्यानुभागोदयो जघन्यस्थितिसत्त्वं जघन्यानुभागसत्त्वं गुणितकर्मांशस्य च जीवस्य तदुत्कृष्टप्रदेशोदयः, पुरुषवेदस्य च बन्धोच्छेदो वाच्यः।

२=तदानीं स्त्रीवेदोदयारूढः पुरुषवेदोदयारूढश्च नपुंसकवेदं सर्वथा क्षपयतः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२=स्त्रीवेदप्रथमस्थितिचरमसमयः, तदानीं स्त्रीवेदं सर्वथा क्षपयति, स्त्रीवेदस्य जघन्यानुभागोदयो जघन्यस्थितिसत्त्वं जघन्यानुभागसत्त्वं गुणितकर्मांशस्य च तदुत्कृष्टप्रदेशोदयः, पुरुषवेदस्य च बन्धोच्छेदः ।

३=तदानीं पुरुषवेदोदयारूढः स्त्रीवेदं सर्वात्मना क्षपयति ।

४=स्त्रीवेदोदयारूढो नपुंसकवेदोदयारूढश्चाऽवेदौ हास्यषट्कं पुरुषवेदञ्च क्षपयन्तौ तदानीं सर्वथा युगपत् क्षपयतः ।

५=पुरुषवेदोदयारूढस्य पुरुषवेदप्रथमस्थितिचरमसमयः, तदानीं हास्यषट्कं निश्शेषं क्षीणम् , समयोनद्व्यावलिकाबद्धनूतनदलं च वर्जयित्वा शेषः पुरुषवेदः क्षीणः ( गाथा –५७ ) तथा पुरुषवेदस्य जघन्यानुभागोदयो गुणितकर्मांशस्य जीवस्य तदुत्कृष्टप्रदेशोदयोऽष्टवार्षिकः स्थितिबन्धः संज्वलनानां षोडशवर्षप्रमाणः स्थितिबन्धः, व्यच्छिद्यमानश्च पुरुषवेदस्य बन्धो व्यवच्छिन्नः ।

चित्रे पुरुषवेदप्रथमस्थितितः क्रोधोदयारूढाश्वकर्णकरणाद्धाकिट्टिकरणाद्धारूपसंख्येयभागेनाऽधिका क्रोधोदयारूढक्रोधप्रथमस्थितिर्दर्शिता ( गाथा-४२ ) । मानोदयारूढमानप्रथमस्थितिः क्रोधोदयारूढक्रोधक्षपणाद्धायुक्तक्रोधप्रथमस्थितिप्रमाणा, तेन क्रोधोदयारूढक्रोधप्रथमस्थितितो मानोदयारूढमानप्रथमस्थितिः संख्येयभागेनाऽधिका । मायोदयारूढमायाप्रथमस्थितिः क्रोधोदयारूढक्रोधमानक्षपणाद्धायुक्तक्रोधप्रथमस्थितिप्रमाणा, तेन मानोदयारूढमानप्रथमस्थितितो मायोदयारूढमायाप्रथमस्थितिः संख्येयभागेनाऽधिका । लोभोदयारूढलोभप्रथमस्थितिः क्रोधमानमायाक्षपणाद्धायुक्तक्रोधप्रथमस्थितिप्रमाणा, तेन लोभोदयारूढप्रथमस्थितिर्मायोदयारूढमायाप्रथमस्थितितः संख्येयभागेनाऽधिका । ( गाथा–४२, २१९ )

मानादिभिः क्षपकश्रेणिं प्रतिपन्नाः क्रोधादीन् पूर्वस्पर्धकस्वरूपेणैव क्षपयित्वाऽश्वकर्णकरणं किट्टिकरणं चारभन्ते (गाथा—२२०) ।

क=क्रोधतृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमयः, तदानीं संज्वलनचतुष्कस्य स्थितिबन्धो द्विमासप्रमाणः, क्रोधस्य जघन्यस्थितिबन्धो जघन्याऽनुभागबन्धश्च । संज्वलनचतुष्कस्य स्थितिसत्त्वं चत्वारि वर्षाणि ।

ख=मानतृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमयः, तदानीं संज्वलनत्रिकस्य स्थितिबन्ध एकमासमात्रः, मानस्य जघन्यस्थितिबन्धो जघन्यानुभागबन्धश्च, संज्वलनत्रिकस्य स्थितिसत्त्वं वर्षद्वयमात्रम् ।

ग=मायातृतीयसंग्रहकिट्टिवेदनाद्धाचरमसमयः, तदानीं संज्वलनद्विकस्य स्थितिबन्धः पञ्चदश दिवसाः, मायाया जघन्यस्थितिबन्धो जघन्यानुभागबन्धश्च संज्वलनद्विकस्य स्थितिसत्त्वमेकवर्षप्रमाणम् ।

घ=लोभद्वितीयसंग्रहकिट्टिवेदनाद्धाचरमसमयः, तदानीं लोभस्य स्थितिबन्धः स्थितिसत्त्वं चान्तर्मुहूर्तम् , अनिवृत्तिबादरसम्परायाख्य-नवमगुणस्थानकस्य च समाप्तिः

卐

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तदेवं समाप्तः षष्ठोऽधिकारः । तत्समाप्तौ च समाप्तो मोहनीयक्षपणाविधिः । मोहनीये च क्षीणे परेशां कर्मणां विनाशोऽवश्यंभावी । यदुक्तं श्रीतत्त्वार्थसूत्रभाष्यकारैः—

"पूर्वार्जितं क्षपयतो यथोक्तैः क्षयहेतुभिः ।
संसारबीजं कात्स्न्येन मोहनीयं प्रहीयते ॥१॥
ततोऽन्तरायज्ञानघ्न-दर्शनघ्नान्यनन्तरम् ।
प्रहीयन्तेऽस्य युगपत् त्रीणि कर्माण्यशेषतः ॥२॥
गर्भसूच्यां विनष्टायां यथा तालो विनश्यति ।
तथा कर्म क्षयं याति मोहनीये क्षयं गते ॥३॥" इति ।

तेन शेषाणां त्रयाणां घातिकर्मणां क्षपणप्रक्रियां दिदर्शयिषुः सप्तमा-ऽधिकारं निवर्णयति—

**सेकालेऽवगयकसायगुणं लहए स पत्तहक्खायो ।**
**ठिइरसरहियं तइयं बंधइ पयइप्पएसेहिं ॥२२४॥**

अनन्तरकाले-ऽपगतकषायगुणं लभते स प्राप्ता-ऽथाख्यातः ।
स्थितिरसरहितं तृतीयं बध्नाति प्रकृतिप्रदेशाभ्याम् ॥२२४॥ इति पदसंस्कारः ।

'सेकाले' इत्यादि, 'अनन्तरकाले' मोहनीयनिश्शेषक्षयानन्तरसमय इत्यर्थः 'स' जितमोहः क्षपकः 'प्राप्ता-ऽथाख्यातः' मोहनीयपरिक्षयात् प्राप्तं=लब्धम् अथाख्यातम्=अथशब्दोऽत्र याथातथ्ये, आङ् अभिविधौ, आ समन्ताद् याथातथ्येन=कषायोदयाभावेन निरतिचारत्वात् पारमार्थिकरूपेण ख्यातं तदथाख्यातं येन, स प्राप्ता-ऽथाख्यातः, 'अपगतकषायगुणं' पदैकदेशे पदसमुदायस्योपचाराद् अपगतकषायगुणस्थानकं क्षीणमोहगुणस्थानकमित्यर्थः, 'लभते' अश्नुते। ननु प्राप्तक्षीणकषायगुणस्थानकः किं करोति ? इत्यत आह—'ठिइ०' इत्यादि, स्थितिरसरहितं 'तृतीयं' सातवेदनीयकर्म प्रकृतिप्रदेशाभ्यां बध्नाति, तद्बन्धस्य योगनिमित्तकत्वात् । इदमुक्तं भवति—स्थितिबन्धो रसबन्धश्च कषायप्रत्ययौ । क्षीणकषायगुणस्थानके च कषायाभावात् स्थितिरसौ न बध्येते । प्रकृतिबन्धः प्रदेशबन्धश्च योगप्रत्ययौ । क्षीणकषायगुणस्थानके च गात्रसञ्चारादिरूपयोगसद्भावात् सातवेदनीयस्य प्रकृतिबन्धः प्रदेशबन्धश्च जायते । अयं च सातवेदनीयबन्ध ईर्यापथिककर्मबन्ध उच्यते । अयम्भावः—"ईर गतिप्रेरणयोः" इत्यस्माद् भावे ध्यण्प्रत्ययः, ईरणम्—ईर्या=गमनम् , तस्यास्तया वा पन्थाः=ईर्यापथः, तत्र भवम् ईर्यापथिकम् । व्युत्पत्तिनिमित्तमेतद्, यतस्तिष्ठतोऽपि तद्भवति । प्रवृत्तिनिमित्तं तु गात्रसञ्चरादिरूपेण योगेन यत्कर्म बध्यते, तदीर्यापथिकम्, योगनिमित्तकमित्यर्थः । तच्च प्रथमसमये बध्यते,कषायाभावेन स्थित्यभावाद् द्वितीयसमये वेद्यते,तृतीयसमये चा-ऽकर्मतामेति । तच्च प्रकृतितः सातवेदनीयं भवति,स्थितितो द्विसमयस्थितिकमनुभावतोऽनुत्तरोपपातिकसुखातिशायि,प्रदेशतश्चः स्थूल-रूक्ष-शुक्ल-मन्द-महाव्यय-बहुप्रदेशम्।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तथा चोक्तम् आचाराङ्गटीकायां श्रीमद्भिः शीलाङ्काचार्यपादैः–"तदेवं सूक्ष्मतरगात्रसञ्चाररूपेण योगेन यत्कर्म्म बध्यते, तदीर्यापथिकम्–ईर्याप्रभवम्, ईर्याहेतुकमित्यर्थः, तच्च द्विसमयस्थितिकम्, एकस्मिन् समये बद्धं द्वितीयसमये वेदितं तृतीयसमये तदपेक्षया चाऽकर्मतामेति । कथमिति ? उच्यते-यतस्तत्प्रकृतितः सातवेदनीयमकषायत्वात् स्थित्यभावेन बध्यमानमेव परिशटति, अनुभावतोऽनुत्तरोपपातिकसुखातिशायि, प्रदेशतः स्थूलरूक्षशुक्लादिबहुप्रदेशमिति ।" इति ।

तथैव सूत्रकृताङ्गवृत्तावपि–"याऽसावकषायिणः क्रिया, तया यद् बध्यते कर्म, तत्प्रथमसमय एव बद्धं स्पृष्टं चेतिकृत्वा तत्क्रियैव बद्धस्पृष्टेत्युक्ता, तथा द्वितीयसमये वेदितेत्यनुभूता, तृतीयसमयेऽतिजीर्णा । एतदुक्तं भवति–कर्म योगनिमित्तं बध्यते, तत्स्थितिश्च कषायायत्ता, तदभावाच्च न तस्य साम्परायिकस्येव स्थितिः, किन्तु योगसद्भावाद् बध्यमानमेव स्पृष्टतां-संश्लेषं याति । द्वितीयसमये त्वनुभूयते, तच्च प्रकृतितः सातवेदनीयं स्थितितो द्विसमयस्थितिकमनुभावतः शुभानुभावमनुत्तरोपपातिकदेवसुखातिशायि, प्रदेशतो बहुप्रदेशमस्थिरबन्धं बहुव्ययं च ।" इति ।

तथा श्रीमच्छीलाङ्काचार्यैरीर्यापथिककर्मप्रतिपादिकेयं गाथा दर्शिता—

"अप्पं बायरमउयं बहुं च लुक्खं च सुक्किलं चेव ।
मंदं महव्वतं ति य सातबहुलं तं कम्मं ॥१॥"

अथाऽस्या अर्थः प्रतिपाद्यते–ईर्यापथिककर्म सातवेदनीयं 'अप्पं' ति 'अल्पं' स्तोकं स्थितितः, कषायाभावेन स्थितिबन्धस्या-ऽयोग्यत्वात् प्रथमसमये कर्मरूपेण परिणतस्य द्वितीयसमये वेदितस्य तृतीयसमये चाऽकर्मतामापन्नस्या-ऽल्पत्वमुच्यत इत्यर्थः । बादरं=स्थूलं परिणामतः, तथाविधसूक्ष्मपरिणामविरहात् । न चा-ऽनुभागतो बादरं कुतो न भण्यते, सूक्ष्मसम्परायतोऽनन्तगुणविशुद्धेरुपलम्भाद् ? इति वाच्यम्, कषायाभावेन तत्प्रत्यया-ऽनुभागबन्धस्या-ऽभावात् ।

नन्वेवं तर्हि कार्मणवर्गणास्कन्धाः कर्मत्वेन परिणमनकाले सर्वजीवाऽनन्तगुणाऽनुभागका भवन्ति, अन्यथा कर्मत्वेन परिणत्यनुपपत्तेरिति । तत् कथमुपपद्येताऽनुभागबन्धाऽभावः ? इति चेत्, भण्यते–इह जघन्यानुभागबन्धस्थानजघन्यवर्गणातोऽनन्तगुणहीनरसविशिष्टकार्मणवर्गणास्कन्धानामपि बन्धो न विरुध्यते, यतो यद्यपीर्यापथिककर्मणो जघन्यानुभागबन्धस्थानाद्यवर्गणातोऽनन्तगुणहीनरसता भवति, केवलयोगप्रत्ययत्वात्, तथापि नामप्रत्ययोत्कृष्टवर्गणातो योगप्रत्ययाद्यस्पर्धकाद्यवर्गणाया अनन्तगुणत्वादीर्यापथिककर्मस्कन्धाः सर्वजीवानन्तगुणरसाऽविभागकाः । उक्तश्च कर्मप्रकृ-

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**तिचूर्णिटिप्पनके श्रीमुनिचन्द्रसूरिपादैः–"तत्र च योऽकषायावस्थाभावी, तस्य जघन्यस्पर्धकाद्यवर्गणाऽपि नामप्रत्ययिकस्पर्धकोत्कृष्टवर्गणातोऽनन्तगुणरसाविभागा, कषायप्रत्ययिकसर्वजघन्यानुभागस्थानकजघन्यस्पर्धकाद्यवर्गणातः पुनरनन्तगुणहीनरसाविभागा, तुच्छरसत्वाद् योगप्रत्ययिकबन्धस्य ।"** इति । कषायप्रत्ययजघन्यरसबन्धस्थानतश्चाऽस्य बन्धस्याऽनन्तगुणहीनत्वात् कषायप्रत्ययानुभागबन्धरहितत्वाच्चाऽनुभागबन्धो नास्तीति भणितम् । अत एव यथा स्थित्यपेक्षयेर्यापथिककर्माऽल्पं भणितम्, तथा रसाऽपेक्षयाऽप्यल्पं बोध्यम् । उक्तश्च **कर्मप्रकृतिचूर्णिटिप्पनके–"अल्पं स्तोकं कषायाभावेन तत्प्रत्ययस्थित्यनुभागापोढतया अल्पस्थित्यनुभागत्वात् । तथाहि–तत्कर्म प्रथमसमये बद्धम्, द्वितीयसमये वेदितं तृतीयसमये निर्जीर्यंत इति । अनुभागतस्तु कषायप्रत्ययसर्वजघन्यानुभागस्थानस्य सर्वजघन्यस्पर्धकादप्यनन्तगुणहीनरसमिति ।"** इति ।

**'मउअं'** ति मृदु अनुभावतः, मृद्वनुभावकमित्यर्थः । उक्तश्चाचाराङ्गवृत्तौ–**"बादरं परिणामतोऽनुभावतो मृद्वनुभावम् ।"** इति । यद्वा स्वरूपदर्शकं विशेषणमिदं मृदुस्पर्शप्रतिपादकम्, तैजसवर्गणाया उपरितनकार्मणादिवर्गणागतपुद्गलेषु मृदुस्पर्शस्याऽवस्थितिदर्शनात् । उक्तं च **वर्गणाधिकारे श्रीमदुपाध्यायपादैः–'तत्र मृदुलघुरूपौ द्वौ स्पर्शाववस्थितौ"** । इति । न चैतद् व्याख्यानमसिद्धमिति वाच्यम्, ग्रन्थान्तरेऽपि तथाव्याख्यातत्वात् । उक्तं च **कर्मप्रकृतिचूर्णिटिप्पनके "मृदु, कर्कशादिस्पर्शाभावेन ।"** इति ।

**'बहुअं'** ति बहु प्रदेशतः । इदमुक्तं भवति–सकषायजीवैर्बध्यमानसातवेदनीयप्रदेशतः संख्यातगुणाः प्रदेशाः क्षीणमोहप्रभृतिगुणस्थानके बध्यन्ते, सातवेदनीयरूपस्यैकस्यैव कर्मणो बध्यमानत्वेन सर्वेषां गृह्यमाणप्रदेशानां सातवेदनीयरूपत्वात् सकषायगुणस्थानकेषु तु यथासंभवमष्टानां सप्तानां षण्णां कर्मणां बध्यमानत्वेन प्रदेशानां यथाविभागं तत्तत्कर्मरूपेण परिणम्यमानत्वात् क्षीणकषायादिगुणस्थानकापेक्षया तत्र वेदनीयप्रदेशानां स्तोकत्वोपलम्भात् । इत्थं सकषायप्रदेशबन्धतो-ऽकषायसातवेदनीयप्रदेशबन्धस्य संख्यातगुणत्वाद् ईर्यापथिककर्मणो बहुत्वं सुनिरूपितं भवति । चशब्दोऽनुक्तसमुच्चयार्थकः, तेन सुगन्धि सुच्छायं चेत्यपि ज्ञातव्यम् । **'लुक्खं'** ति रूक्षं स्पर्शतः, चिरकालावस्थानगुणाऽननुगतत्वात् । **'सुक्किलं'** ति शुक्लं वर्णतः, ईर्यापथिककर्मस्कन्धाः शुक्लवर्णा भवन्तीत्यर्थः । एवकारोऽवधारणे, स च सर्वत्र सम्बन्धनीयः, ततोऽल्पमेव बादरमेवेत्यवं सर्वत्र विपक्षक्षेपो द्रष्टव्यः । **'मंदं'** ति मन्दं लेपतः, स्थूलचूर्णमुष्टिमृष्टकुड्यापतितलेपवत् । **'महव्वयं'** ति महाव्ययम्, एकसमयेनैव सर्वप्रदेशानां निःशेषतो निर्जीर्णत्वदर्शनात् । **'सातबहुलं'** ति सातबहुलमनुत्तरोपपातिकसुखातिशायित्वात् ॥२२४॥

अथ क्षीणकषायगुणस्थानके स्थितिघातादीन् विवर्णयिषुराह —

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**होज्जा पुव्वव्व छकम्माणं ठिइरसविघायगुणसेढी ।**
**दलिअं पडुच्च गुणसेढिनिज्जरा उण असंखगुणा ॥२२५॥**

भवन्ति पूर्ववत् षट्कर्मणां स्थितिरसविघातगुणश्रेणयः ।
दलिकं प्रतीत्य गुणश्रेणिनिर्जरा पुनरसंख्यगुणा ॥२२५॥ इति पदसंस्कारः ।

**'होज्जा'** इत्यादि, तत्र 'षट्कर्मणां' ज्ञानावरण-दर्शनावरणा-ऽन्तराय-वेदनीय-नाम-गोत्राणां **'स्थितिरसविघातगुणश्रेणयः'** स्थितिघातो रसघातो गुणश्रेणिश्च पूर्ववद् भवन्ति । इदमुक्तं भवति–क्षीणकषायगुणस्थानके त्रयाणां घातिकर्मणामन्तर्मुहूर्तप्रमाणं स्थितिखण्डं घातयति, अनुभागखण्डेन पुनः सत्तागताऽनुभागस्य बह्वनन्तभागान् घातयति । तथा नाम-गोत्र-वेदनीयानां स्थितिखण्डमसंख्यातवर्षप्रमाणं घातयति, तथा तेषामेवा-ऽशुभप्रकृतीनां सत्तागता-ऽनुभागस्य बह्वनन्तभागाननुभागखण्डेन विनाशयति । तथा स्थितिघातं कुर्वन् प्रदेशाग्रमुत्कीर्योत्कीर्णदलस्या-ऽसंख्येयभागप्रमाणं दलं गृहीत्वोदयनिषेके स्तोकं दलं ददाति, ततो-ऽसंख्येयगुणं द्वितीयनिषेके ददाति । ततो-ऽपि तृतीयनिषेके-ऽसंख्येयगुणं निक्षिपति । एवमसंख्येयगुणक्रमेण तावत् प्रक्षिपति, यावत् क्षीणकषायगुणस्थानकतो विशेषाधिकाद्धायां गुणश्रेणिचरमनिषेकलक्षणगुणश्रेणिशिरः । ततो बहुसंख्येयभागमात्रदलाद् दलमादायगुणश्रेणिचरमनिषेकतो-ऽसंख्येयगुणं दलं गुणश्रेणिशिरस उपरितने प्रथमनिषेके प्रक्षिपति, । ततो विशेषहीनक्रमेण तावद्ददाति, यावदतीत्थापना-ऽप्राप्ता भवति । शेषा घातिकर्मणां प्ररूपणाऽस्मत्कृतोपशमनाकरणटीकायां **दर्शनमोहक्षपणाधिकारे** प्रतिपादितसम्यक्त्वमोहनीयक्षपणावदवसेया, विशेषाभावात् ।

अथ सूक्ष्मसम्परायतो गुणश्रेणौ विशेषं दर्शयति–**'दलिअं'** इत्यादि, 'दलिकं' प्रदेशाग्रं 'प्रतीत्य' आश्रित्य 'गुणश्रेणिनिर्जरा' सूक्ष्मसम्परायचरमसमयभाविगुणश्रेणिनिर्जरातः क्षीणकषायप्रथमसमयभाविगुणश्रेण्या कर्मप्रदेशानां परिशाटनम् 'असंख्यगुणा' असंख्येयगुणं भवति, पुनर्वाक्यभेदे, यदुक्तं **तत्त्वार्थसूत्रे–"सम्यग्दृष्टि-श्रावक-विरता-ऽनन्तवियोजक-दर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपक-क्षीणमोह–जिनाः क्रमशोऽसंख्येयगुणनिर्जराः ।"** इति । ॥२२५॥

उक्तविधिना तावद् निरूपणीयम् यावत् क्षीणकषायगुणस्थानकस्य बहुसंख्येयभागा गता भवन्ति । तत एकस्मिन् संख्येयतमभागे शेषे यद्भवति, तद्दर्शयितुकाम आह—

**सेसम्मि संखभागे खीणकसायस्स हणइ झाणेण ।**
**अन्तिमखंडेणं तस्स उवरिमठिइं तिघाईण ॥२२६॥**

शेषे सङ्ख्यभागे क्षीणकषायस्य हन्ति ध्यानेन ।
अन्तिमखण्डेन तस्योपरितनस्थितिं त्रिघातिनाम् ॥२२६॥ इति पदसंस्कारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'सेसम्मि'** इत्यादि, तत्र 'क्षीणकषायस्य' क्षीणकषायगुणस्थानकाद्धाया अन्तर्मुहूर्तप्रमाणायाः 'संख्यभागे' संख्येयतमभागे शेषे 'अन्तिमखण्डेन' त्रयाणां घातिकर्मणां चरमस्थितिखण्डेन 'त्रिघातिनां' त्रयाणां घातिकर्मणां ज्ञानावरण-दर्शनावरणाऽन्तरायरूपाणां 'तस्य' तच्छब्दस्य पूर्ववस्तुपरामर्शित्वेनाऽनन्तरोक्तक्षीणकषायस्य परामर्शात् क्षीणकषायगुणस्थानकस्योपरितनस्थितिं ध्यानेन 'हन्ति' विनाशयति । **'झाणेण'** इत्यनेन कर्मक्षये हेतुरुक्तः, ध्यानमन्तरेण कर्मोन्मूलनाऽनुपपत्तेः ।

अत्र कर्मक्षये ध्यानस्य हेतुत्वप्रतिपादिका **तत्त्वार्थवृत्त्युक्तकारिका**—

**"प्राप्नोति परं ह्लादं हिमातपाभ्यामिव विमुक्तम् ।**
**तेन ध्यानेन यथाख्यातेन च संयमेन घातयति ॥**
**शेषाणि घातिकर्माणि युगपदपरञ्जनानि ततः ।**
**कार्त्स्न्यान्मिस्तकशूच्यां यथा हतायां हतो भवति तालः ।**
**कर्माणि क्षीयन्ते तथैव मोहे हते कार्त्स्न्यात् ॥"** इति ।

तथैवोक्तं **ध्यानशतके-ऽपि**—

**जह चिरसंचियमिंधणमनलो पवणसहिओ दुयं दहइ ।**
**तह कम्मेंधणममियं खणेण झाणाणलो डहइ ॥१॥**
**जह वा घणसंघाया खणेण पवणाहया विलयमिंति ।**
**झाणपवणावहूया तह कम्मघणा विलिज्जंति ॥२॥"** इति ।

इदमत्र हृदयम्—संख्यातैः स्थितिघातसहस्रैः क्षीणकषायगुणस्थानकस्य बहुसंख्यातभागेषु गतेषु सत्सु घातिकर्मणामन्तर्मुहूर्तप्रमाणं चरमस्थितिखण्डं घातयन् गुणश्रेणिनिक्षेपस्य संख्येयतमभागमपि विनाशयति, ध्यानमुपगतः क्षीणकषायगुणस्थानकस्योपरितनीर्घातिकर्मणां गुणश्रेणिसंख्येयतमभागमात्रीस्ततश्च संख्येयगुणा अन्याः स्थितीश्चरमस्थितिखण्डेन घातयतीत्यर्थः । दलनिक्षेपक्रमस्तु मोहनीयचरमस्थितिखण्डवत् संभवति । त्रयाणां घातिकर्मणां चरमस्थितिखण्डे घातिते ज्ञानावरणपञ्चक-दर्शनावरणषट्का-ऽन्तरायपञ्चकरूप-षोडशप्रकृतीनां स्थितिसत्त्वं शेषक्षीणकषायगुणस्थनकालप्रमाणं जायते, नवरं निद्राद्विकस्य समयोनं भवति । ततः परं घातिकर्मणा स्थितिघातो न भवति। तच्च वक्ष्यत्यष्टाविंशत्यधिकद्विशततमगाथायाम् । शेषाणां त्रयाणामघातिकर्मणां तु भवत्येव । उक्तं च **सप्ततिकाचूर्णौ**—**"एवं खीणकसायद्धाअंतोमुहुत्तपमाणमेत्ताए संखेज्जेसु भागेसु गतेसु संखेज्जइमे सेसे पंचणाणावरण-छदंसणावरण-पंचण्हमंतराइगाणं एएसिं सोलसण्हं कम्माणं ठितिसंतकम्मं सव्वोवट्टणाए उव्वट्टेत्तु सेसखीणकसायद्धासमं करेइ । तओ पभिइं एयासिं ठितिघाओ फिट्टो, सेसाणं**

**अत्थि चेव । नवरिं निद्दादुगस्स एक्केण समएण ऊणियठिर्ति ठवेइ, दलियं पडुच्च, कालो उ तुल्लो ।"** इति ॥२२६॥

ननु भवता प्रोक्तम्–ध्यानेन क्षीणकषायगुणस्थानस्योपरितनीं घातिकर्मस्थितिं विनाशयतीति । तत् किं नाम ध्यानम् ? कतिविधं च तत् ? इति चेत्, उच्यते–ध्यायते=चिन्त्यते तत्त्वमनेनेति ध्यानम् ,एकाग्रचिन्तानिरोध इत्यर्थः । अग्रम्=आलम्बनम् , एकं च तदग्रं चेत्येकाग्रम् । चलं चित्तमेव चिन्ता, तस्य निरोधः=एकत्र व्यवस्थापनमन्यत्राऽप्रचारः, एकाग्रे=एकावलम्बने चिन्तानिरोध इत्येकाग्रचिन्तानिरोधः । एवंस्वरूपं ध्यानं चतुर्विधम्, आर्त-रौद्र-धर्म्य-शुक्लभेदात् । किन्तु द्वयोरेव धर्म्य-शुक्लाख्ययोर्निर्वाणसाधनत्वेन कर्मक्षयकारणत्वम् , शेषयोस्तु भवकारणत्वेन कर्मबन्धप्रयोजकता । यदुक्तं **ध्यानशतके**—

**"अट्टं रुद्दं धम्मं सुक्कं झाणाइ तत्थ अंताइं ।**
**निव्वाणसाहणाइं भवकारणमट्टरुद्दाइं ॥१॥"** इति ।

इह च कर्मक्षयस्या-ऽधिकृतत्वात् कर्मक्षयकारणलक्षणविशेषणं पुरस्कृत्य ध्यानस्य द्वैविध्यं प्रतिपिपादयिषुराह—

## कम्मखयकारणं झाणं दुविहं धम्मसुक्कभेअत्तो ।
## एक्केक्कं होइ चउविहं णायव्वं पवयणत्तो ॥२२७॥

कर्मक्षयकारणं ध्यानं द्विविधं धर्म्यशुक्लभेदात् ।
एकैकं भवति चतुर्विधं ज्ञातव्यं प्रवचनतः ॥२२७॥ इति पदसंस्कारः ।

**'कम्म०'** इत्यादि, 'कर्मक्षयकारणं' ज्ञानावरणादिकर्मविनाशनिबन्धनं 'ध्यानम्' उक्तशब्दार्थं 'द्विविधं' द्विप्रकारं भवति, धर्म्यशुक्लभेदात् । तत्र धर्मात्-क्षमादिलक्षणादनपेतं धर्म्यम् , **"हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या-गार्हपत्य-जन्य-धर्म्यम्"** (सिद्धहेम०७-१-११) इति निपातनाद् यप्रत्ययान्तः । शुचम्-अष्टविधकर्मलक्षणां क्लमयति=ग्लपयति=निरस्यतीति शुक्लम्, यद्वा शुक्लं-निर्मलं कर्मक्षयहेतुत्वात् । यद्वा शोधयत्यष्टप्रकारं कर्ममलमिति शुक्लम् । अथ धर्म्यस्य शुक्लस्य च ध्यानस्य चातुर्विध्यमुपवर्णयति-**'एक्केक्कं'** इत्यादि, 'एकैकं' धर्म्यं शुक्लं च प्रत्येकं पुनः 'चतुर्विधं' चतुष्प्रकारं भवति, 'ज्ञातव्यं' तच्च बोध्यं 'प्रवचनतः' जिनेन्द्रप्रणीताऽऽगमतः, न विस्तरेण प्रदर्श्यत इति भावः ।

अथ ध्यानद्वयस्य किञ्चित् स्वरूपं वर्ण्यते, अन्यथा मन्दबुद्धिजनानां तद्विषयकबोधो न स्यात् । तत्राद्यं धर्म्यध्यानं चतुर्विधमाज्ञाविचया-ऽपायविचय-विपाकविचय-संस्थानविचयभेदात् ।

तत्रादौ तावद् **आज्ञाविचयः**–कुशलकर्मण्याज्ञाप्यन्ते प्राणिनोऽनयेत्याज्ञा सर्वज्ञप्रणीतागम इत्यर्थः, तस्या विचयः=पर्यालोचनमित्याज्ञाविचयः । तथाहि–केवलालोकेन विनाशिता-ऽशेषसंशय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिमिराणां तीर्थकृतां सुनिपुणां सूक्ष्मद्रव्याद्युपदर्शकत्वाद् मत्यादिप्रतिपादकत्वाच्च, द्रव्यार्थादेशापेक्षयाऽनाद्यपर्यवसितां, सर्वजीवनिकायहिताम्, अनेकान्तपरिच्छेदात्मिकां, महार्घ्यां सर्वोत्तमत्वाद्, अपरिमिताम् एकसूत्रस्याऽनन्तार्थकत्वाद्, अजितां परप्रवचनैरपराजितत्वाद्, महार्थां पूर्वापराविरोधित्वादनुयोगद्वारात्मकत्वान्नयगर्भत्वाच्च, महानुभावां चतुर्दशपूर्वविदां सर्वलब्धिसम्पन्नत्वात् प्रभूतकार्यकरणाच्च, महाविषयां सकलद्रव्यादिविषयत्वाद्, अकुशलजनदुर्ज्ञेयां नैगमादिनय–भङ्ग-प्रमाण-गमगहनामाज्ञां चिन्तयेत्। यः पुनर्ज्ञानावरणोदयेन मतिदौर्बल्यात् तथाविधाचार्याभावाद् वा ज्ञेयगहनत्वाद्वोपयुक्तोऽपि दुरधिगम्यां भगवदाज्ञां नाऽवबुध्यते, सोऽपीत्थं ध्यायेत्--परैरनुपकृतेऽपि धर्मोपदेशादिना परानुग्रहोद्युक्तानां जितरागदोषाणामवितथवादिनां भगवतां तीर्थकृतां वचनमवितथमेव, रागद्वेषाऽभावेनावितथकारणाऽनुपलम्भादिति। उक्तं च **ध्यानशतके**—

**"सुनिउणमणाइनिहणं भूयहियं भूयभावणमहग्घं।**
**अमियमजियं महत्थं महाणुभावं महाविसयं ॥१॥**

**झाइज्जा निरवज्जं जिणाणमाणं जगप्पईवाणं।**
**अणिउणजणदुण्णेयं नय-भंग-पमाण-गमगहणं ॥२॥**

**तत्थ य मइदोब्बलेण तव्विहायरियविरहओ वा वि।**
**णेयगहणत्तणेण य णाणावरणोदएणं च ॥३॥**

**हेऊदाहरणासंभवे य सइ सुट्ठु जं न बुज्झेज्जा।**
**सव्वण्णुमयमवितहं तहावि तं चिंतए मइमं ॥४॥**

**अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा।**
**जियरागदोसमोहा य णऽण्णहावादिणो तेणं ॥५॥"** इति।

**अथ द्वितीयमपायविचयाख्यं धर्मध्यानमुच्यते**–अपायाः=विपदः शारीरमानसानि दुःखानीत्येकार्थाः, तेषां विचयः-चिन्तनम्। तथाहि-इह खलु जन्मजरामरणसंव्याप्तसंसारसागरे सांसारिकसुखेष्ववितृप्तचेतसः सत्त्वा रागद्वेषकषायाऽऽश्रवादिषु प्रवर्तन्ते, ते च नरकादिगतिषु चङ्क्रम्यन्ते। केचित् पुनरिहैव कृतवैरानुबन्धाः परस्परमाक्रोशवधाद्यपायभाजो दृश्यन्ते क्लिश्यन्ते चेत्यादि भवचक्रे भ्रमतां जन्तूनामिहलोकपरलोकापायाँश्चिन्तयतोऽपायविचयाख्यधर्मध्यानं भवति। उक्तं च **ध्यानशतके**—

**"रागद्दोसकसायाऽऽसवादिकिरियासु वट्टमाणाणं।**
**इह-परलोयावाए झाइज्जा वज्जपरिवज्जी ॥१॥"**

तथा चात्र **श्रीकलिकालकल्पतरुकल्पानां श्रीमद्हरिभद्रसूरीश्वराणां तट्टीका**–
**"रागद्वेषकषायाऽऽश्रवादिक्रियासु प्रवर्तमानानामिहपरलोकापायान् ध्यायेत्,**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा रागादिक्रिया ऐहिका-ऽऽमुष्मिकविरोधिनी, उक्तं च—

"रागः सम्पद्यमानोऽपि दुःखदो दुष्टगोचरः ।
महाव्याध्यभिभूतस्य कुपथ्यान्नाभिलाषवत् ॥१॥ तथा—
द्वेषः सम्पद्यमानोऽपि तापयत्येव देहिनम् ।
कोटरस्थो ज्वलन्नाशु दावानल इव द्रुमम् ॥२॥ तथा—
दृष्टयादिभेदभिन्नस्य रागस्यामुष्मिकं फलम् ।
दीर्घः संसार एवोक्तः, सर्वज्ञैः सर्वदर्शिभिः ॥३॥ इत्यादि, तथा—
"दोसानलसंतत्तो इह लोए चेव दुक्खिओ जीवो ।
परलोगंमि य पावो पावइ निरयानलं तत्तो ॥१॥"

इत्यादि, तथा कषायाः क्रोधादयः, तदपायाः पुनः–

कोहो पीइं पणासेइ माणो विणयनासणो ।
माया मित्ताणि नासेइ, लोभो सव्वविणासणो ॥१॥
कोहो य माणो य अणिग्गहीया माया य लोहो य पवड्ढमाणा ।
चत्तारि एए कसिणा कसाया सिंचंति मूलाइं पुणब्भवस्स ॥२॥"

तथा-ऽऽश्रवाः–कर्मबन्धहेतवो मिथ्यात्वादयः, तदपायाः पुनः—

"मिच्छत्तमोहियमई जीवो इहलोग एव दुक्खाइं ।
निरओवमाइं पावो पावइ पसमाइगुणहीणो ॥१॥" तथा—
"अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः ।
अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ॥१॥" तथा—
"जीवा पाविंति, इहं पाणवहादविरईए पावाए ।
नियसुयघायणमाई दोसे जणगरहिए पावा ॥१॥
परलोगंमि वि एवं आसवकिरियाहि अज्जिए कम्मे ।
जीवाण च्चिरमवाया निरयाइगई भमंताणं ॥२॥" इत्यादि ।

आदिशब्दः स्वगता-ऽनेकभेदख्यापकः, प्रकृति-स्थित्यनुभावप्रदेशबन्ध-भेदग्राहक इत्यन्ये, क्रियास्तु कायिक्यादिभेदाः पञ्च, एताः पुनरुत्तरत्र न्यक्षेण वक्ष्यामः । विपाकः पुनः—

'किरियासु वट्टमाणा काइगमाईसु दुक्खिया जीवा ।
इह चेव य परलोए संसारपवड्ढया भणिया ॥१॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ततश्चैवं रागादिक्रियासु वर्तमानानामपायान् ध्यायेत्, किंविशिष्टः सन्नित्याह-'वर्ज्यपरिवर्जी' तत्र वर्जनीयं वर्ज्यम्–अकृत्यं परिगृह्यते, तत्परिवर्जी-अप्रमत्त इति गाथार्थः ।"** इति ।

**अथ विपाकविचयाख्यं तृतीयं धर्मध्यानमुच्यते**–वि=विविधो विशिष्टो वा पाको विपाकः–अनुभाव इत्यर्थः,नरकादिगतिषु कर्मणां विपाकस्य विचयः–पर्यालोचनमिति विपाकविचयः । ज्ञानावरणादिकमष्टप्रकारकं कर्म प्रकृतिस्थित्यनुभागप्रदेशभेदभिन्नमिष्टानिष्टविपाकपरिणामं जघन्य-मध्यमोत्कृष्टस्थितिकं विविधविपाकम् । तद्यथा-ज्ञानावरणाद् दुर्मेधस्त्वम् , दर्शनावरणाच्चक्षुरादिवैकल्यं निद्रायुद्भवश्च, असातवेदनीयाद् दुःखं सातवेदनीयात्सुखम् , मोहनीयाद् विपरीतग्राहिता चारित्रनिर्वृत्तिश्च, आयुषोऽनेकभवप्रादुर्भावः, नाम्नो-ऽशुभप्रशस्तदेहादिनिर्वृत्तिः, गोत्रादुच्चनीचकूलोत्पत्तिः, अन्तरायादलाभ इत्यादिकर्मविपाकं चिन्तयतो विपाकविचयाख्यं तृतीयं धर्मध्यानं भवति । उक्तं च **ध्यानशतके**—

**"पयइ-ठिइ-पएसा-ऽणुभावभिन्नं सुहासुहविहत्तं ।**
**जोगाणुभावजणियं कम्मविवागं विचिंतेज्जा ॥१॥**

**अथ संस्थानविचयनामधेयं चतुर्थं धर्मध्यानमुच्यते**-संस्थानम्-आकारविशेषो लोकस्य द्रव्याणां च । संस्थानस्य विचयो-अनुस्मरणमिति संस्थानविचयः । न केवलं लोकस्य द्रव्याणां च संस्थानं चिन्तयेच्चतुर्थधर्मध्यानोपगतः, अपि तु षड्द्रव्याणां लक्षणा-ऽऽसन-विधान-प्रमाणानि तथोत्पादव्ययादिपर्यायानपि चिन्तयेत् । उक्तं च—

**"जिणदेसियाइ लक्खण-संठाणा-ऽऽसण-विहाण-माणाइं ।**
**उप्पायट्ठिइभंगाइ पज्जवा जे य दव्वाणं ॥१॥"** इति ।

इह लक्षणं धर्मास्तिकायादीनां गत्यादि । तथा संस्थानं मुख्यवृत्त्या पुद्गलरचनाकाररूपं परिमण्डलाद्यजीवानाम् , उक्तं च **"परिमंडले य वट्टे तंसे चउरंसे आयते चेव ।"** इति । जीवशरीराणां च समचतुरस्रादि, उक्तश्च—

**"समचउरंसे नग्गोहमंडले साइ वामणे खुज्जे ।**
**हुंडे वि संठाणे जीवाणं छ मुणेयव्वा ॥१॥"** इति ।

तथा धर्माधर्मयोरपि लोकक्षेत्रा-ऽपेक्षया संस्थानं भावनीयम् । लोकसंस्थानं चेत्थं भावनीयम्–अधोलोको वेत्रासनसंस्थानः, तिर्यग्लोकः पुनर्झल्लरीसंस्थानः, ऊर्ध्वलोकस्तु मृदङ्गसंस्थानः । **यदुक्तं जीवसमासे—**

**"हेट्ठा मज्झे उवरिं वेत्तासण-झल्लरी-मुइंगनिभो ।**
**मज्झिमवित्थाराहिय चोद्दसगुणमायओ लोओ ॥१॥"**

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

आसनानि चाऽऽधारलक्षणानि, धर्मा-ऽस्तिकायादीनां लोकाकाशादीनि स्वस्वरूपाणि वा । तथा विधानानि–धर्मास्तिकायादीनां भेदाः । प्रमाणानि च धर्मास्तिकायादीनामेवात्मीयानि, तथा धर्मास्तिकायादीनामुत्पादस्थितिव्ययादिपर्यायाः । उत्पादादिपर्यायेषु चेयं युक्तिश्शास्त्रवार्तासमुच्चये प्रतिपादिता **श्रीहरिभद्रसूरिपादैः**—

> **"घट-मौली-सुवर्णार्थी नाशोत्पत्तिस्थितिष्वयम् ।**
> **शोक-प्रमोद-माध्यस्थं जनो याति सहेतुकम् ॥१॥**
> **पयोव्रतो न दध्यत्ति न पयो-ऽत्ति दधिव्रतः ।**
> **अगोरसव्रतो नोभे, तस्मात्तत्त्वं त्रयात्मकम् ॥२॥"** इति ।

इह धर्मास्तिकायो विवक्षितसमयसम्बन्धरूपा-ऽपेक्षयोत्पद्यते, तदनन्तराऽतीतसम्बन्धरूपा-ऽपेक्षया तु नश्यति, धर्मास्तिकायत्वेन तु नित्य इति ।

पञ्चास्तिकायमयो लोकः, स च कालतो-ऽनाद्यनिधनः । क्षेत्रतश्च लोकस्त्रिविधः, अधोलोकादिभेदैः । तत्राऽप्यष्टानां क्षितीनां घर्माद्यानां पृथ्वीनामेकविंशतेर्घनोदधिघन-वाततनुवातात्मकानां घर्मादिसप्तपृथिवीवलयानां जम्बूद्वीपप्रभृतिस्वयम्भूरमणद्वीपपर्यवसानाना-मसंख्येयद्वीपानां लवणप्रभृतिस्वयंभूरमणपर्यवसानानामसंख्येयानां सागराणां सीमन्तकप्रभृत्यप्रति-ष्ठानावसानानां चतुरशीतिलक्षाणां (८४,००,०००) निरयाणामसंख्येयानां ज्योतिष्कादिसम्बन्धि-विमानानां द्वासप्ततिलक्षोत्तरसप्तकोटीनाम् (७,७२,००,०००) असुरादिदशनिकायसम्बन्धिनां भव-नवास्यालयरूपभवनानामसंख्येयानां व्यन्तरनगराणां स्थानानि, व्योमादिप्रतिष्ठानं च लोकस्थिति-विधानमित्यादि चिन्तयतो जीवस्य चतुर्थं धर्मध्यानं भवति । किञ्च साकाराद्युपयोगलक्षणो जीवो नित्य औदारिकादिशरीरेभ्यः पृथग्भूतो-ऽमूर्तः स्वज्ञानावरणादिकर्मणां कर्तोपभोक्ता चाऽस्ति । तस्य जीवस्य स्वकर्मजनितो जन्मादिजलो व्यसनशतश्वापदः कषायपातालो मोहनीयकर्मावर्तो महा-भयानको ज्ञानावरणकर्मोदयजनिताऽज्ञानवायुप्रेरितसंयोगवियोगवीचिसन्तानोऽनाद्यपर्यवसितोऽशुभः संसारसागरो-ऽस्तीत्यादि चतुर्थधर्मध्यानोपगतो ध्यायति । किं बहुना भाषितेन , निश्शेषं जीवा-ऽजीव-पुण्य-पापा-ऽऽश्रव-संवर-निर्जरा-बन्ध-मोक्षाख्य-नवपदार्थविस्तरोपेतं द्रव्यास्तिकायादिसर्व-नयसमन्वितं जिनेन्द्रभाषितं सिद्धान्तं ध्यायतो जीवस्य चतुर्थं धर्मध्यानं भवति । यदुक्तं **ध्यान-शतके**—

> **"पंचत्थिकायमइयं लोगमणाइणिहणं जिणक्खायं ।**
> **णामाइभेयविहियं तिविहमहोलोयभेयाइं ॥१॥**
> **खिइ-वलय-दीव-सागर-निरय-विमाण-भवणाइसंठाणं ।**
> **वोमाइपइट्ठाणं निययं लोगट्ठिइविहाणं ॥२॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवओगलक्खणमणाइनिहणमत्थंतरं सरोराओ ।
जोवमरूविं कारिं भोयं च सयस्स कम्मस्स ॥३॥
तस्स य सकम्मजणियं जम्माइजलं कसायपायालं ।
वसणसयसावयमणं मोहावत्तं महाभोमं ॥४॥
अण्णाणमारुएरियसंजोगविजोगवोइसंताणं ।
संसारसागरमणोरपारमसुहं विचिंतेज्जा ॥५॥
किं बहुणा ? सव्वं चिय जोवाइपयत्थवित्थरोवेयं ।
सव्वनयसमूहमयं झाएज्जा समयसब्भावं ॥६॥" इति ।

अथ धर्मध्यानस्य ध्यातारो निगद्यन्ते—अप्रमत्तगुणस्थानकवर्तिप्रभृतिक्षीणकषायगुणस्थानकवर्त्तिपर्यवसाना जीवा धर्मध्यानस्य ध्यातारः । ते च दर्शन-ज्ञान-चारित्रलक्षणरत्नत्रय-वैराग्यभावनाभिर्भावितात्मानोऽनियते च देशे काल आसने वर्तमाना वाचनापृच्छनाद्यालम्बनयुक्तास्तेजःप्रभृतिलेश्याका भवन्ति । उक्ताश्च ध्यानशतके भावना-देश-काला-ऽऽसना-ऽऽलम्बन-लेश्याः । अक्षराणि त्वेवम्—

"पुव्वकयब्भासो भावणाहि झाणस्स जोग्गयमुवेइ ।
ताओ य नाण-दंसण-चरित्त-वेरग्गनियता (जणिया) ओ ॥१॥
णाणे णिच्चब्भासो कुणइ मणोधारणं विसुद्धिं च ।
नाणगुणमुणियसारो तो झाइ सुनिच्चलमईओ ॥२॥ (इति ज्ञानभावना)
संकाइदोसरहिओ पसम-थेज्जाइगुणगणोवेओ ।
होइ असंमूढमणो दंसणसुद्धोइ झाणंमि ॥३॥ (इति दर्शनभावना)
नवकम्माऽणायाणं पोराणविणिज्जरं सुभाऽऽयाणं ।
चारित्तभावणाए झाणमयत्तेण य समेइ ॥४॥ (इति चारित्रभावना)
सुविदियजगस्सभावो निस्संगो निब्भओ निरासो य ।
वेरग्गभावियमणो झाणंमि सुनिच्चलो होइ ॥५॥ (इति वैराग्यभावना)
निच्चं चिय जुवइ-पसू-नपुंसग-कुसोलवज्जियं जईणो ।
ठाणं वियणं भणियं विसेसओ झाणकालंमि ॥६॥
थिरकयजोगाणं पुण मुणोण झाणे सुनिच्चलमणाणं ।
गामंमि जणाइण्णे सुण्णे रण्णे व ण विसेसो ॥७॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

तो जत्थ समाहाणं होज्ज मणो-वयण-कायजोगाणं ।
भूओवरोहरहिओ सो देसो झायमाणस्स ॥८॥ (इति ध्यातुर्देशः प्रतिपादितः)
कालो-ऽवि सो चिय जहिं जोगसमाहणमुत्तमं लहइ ।
न उ दिवस-निसावेलाइनियमणं झाइणो भणियं ॥९॥ (इति कालो ध्यातुः)
जच्चिय देहावत्था जिया ण झाणोवरोहिणी होइ ।
झाइज्जा तदवत्थो ठिओ निसण्णो निव्वण्णो च ॥१०॥
सव्वासु वट्टमाणा मुणओ जं देस-काल-चेट्ठासु ।
वरकेवलाइलाभं पत्ता बहुसो समियपावा ॥११॥ (इति ध्यातुरासनानि)
आलंबणाइ वायण-पुच्छण-परियट्टणा-ऽणुचिंताओ ।
सामाइयाइयाइं सद्धम्मावस्सयाइं च ॥१२॥
विसमंमि समारोहइ दढदव्वालंबणो जहा पुरिसो ।
सुत्ताइकयालम्बो तह झाणवरं समारुहइ ॥१३॥ (इति ध्यायकस्यालम्बनानि)
होंति कमविसुद्धाओ लेसाओ पीय-पम्ह-सुक्काओ ।
धम्मज्झाणोवगयस्स तिव्वमंदाइभेयाओ ॥१४॥ (इति ध्यायिनो लेश्याः)

नन्वेते जीवा धर्मध्यानोपगता इत्येतत् कथमवसीयते ? इति चेत्, उच्यते—लिङ्गेन । अयं भावः=लिङ्ग्यतेऽनेनेति लिङ्गम् । यथा धूमात्मकलिङ्गेन पर्वतो वह्निमानिति ज्ञायते, तथैव श्रद्धानादिलिङ्गैर्ज्ञायन्ते, यदेते जीवा धर्मध्यायिन इति । तच्च लिङ्गमागमोपदेशत आज्ञानिसर्गतश्च तीर्थङ्करप्ररूपितद्रव्यादिपदार्थानां श्रद्धानम्, अवितथा एत इत्यादिलक्षणं, जिनसाधुगुणोत्कीर्तनप्रशंसाविनयदानसम्पन्नता श्रुत-शील-संयमरमणश्च । उक्तं च **ध्यानशतके**—

"आगमउवएसा-ऽऽणाणिसग्गओ जं जिणप्पणीयाणं ।
भावाणं सद्दहणं धम्मज्झाणस्स तं लिङ्गं ॥१॥
जिणसाहूगुणकित्तण-पसंसणा-विणय-दाणसंपण्णो ।
सुअसीलसंजमरओ धम्मज्झाणी मुणेयव्वो ॥२॥" इति ।

अत्र आगमः—सूत्रम्, तदनुसारेण कथनमुपदेशः, निसर्गः—स्वभावः ।

तदेवं गतं धर्मध्यानम् ।

इह पूर्वधरेतरः क्षपको धर्मध्यानबलेन मोहनीयकर्म निश्शेषतो विनाश्य क्षीणकषायगुणस्थानकं प्रतिपद्यते । पूर्ववित्क्षपकस्तु **शतकलघुचूर्णिकाराद्य**भिप्रायेण शुक्लध्यानेनाऽपि मोहनीयं परिक्षपय्य क्षीणकषायगुणस्थानकं प्रतिपद्यते । **तत्त्वार्थसूत्रकृदाद्य**भिप्रायेण सर्वे धर्मध्यानोपगता एव मोहनीयं क्षपयति, ततः क्षीणकषाया भवन्ति, उपशान्तमोहप्रभृतिगुणस्थानेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुक्लध्यानस्वीकरात् । क्षीणकषायगुणस्थानके तु सर्वेषां मतेनाद्यशुक्लध्यानद्वयमपि भवति । अतः शुक्लध्यानद्वयं सप्रभेदं प्ररूप्यते—

**शुक्लध्यानम्**—शुक्लध्यानं चतुर्विधम्, पृथक्त्ववितर्कसविचारादिभेदात् । तत्राद्यं पृथक्त्ववितर्कसविचारम्, द्वितीयमेकत्ववितर्का-ऽविचारम्, तृतीयं सूक्ष्मक्रियमप्रतिपाति चतुर्थं च व्युपरतक्रियमनिवर्तीति ।

**अथ प्रथमं शुक्लध्यानं पृथक्त्ववितर्कसविचारं विविच्यते**—पृथक्त्वं=भेदः, वितर्क्यते=आलोच्यते पदार्थो येन स वितर्कः, करणे घञ्प्रत्ययः, मतिज्ञानविकल्प इत्यर्थः, तदनुगतं श्रुतमपि वितर्को व्यपदिश्यते, तदभेदात् । अथ व्युत्पत्त्यन्तरं दर्श्यते--विगतं तर्कं=वितर्कं संशयविपर्यया-ऽपेतं श्रुतज्ञानमित्यर्थः । विचरणं=विचारः, अर्थव्यञ्जनयोगेषु संक्रान्तिरित्यर्थः, तत्राऽर्थः परमाण्वात्मादिः, व्यञ्जनम्=अर्थस्य वाचको शब्दः, योगः=मनोवाक्काययोगस्वरूपः, तेषु संक्रान्तिर्विचार उच्यत इति यावत् । अर्थाद् व्यञ्जने संक्रामति, व्यञ्जनादर्थे, मनोयोगात् काययोगे, काययोगाद् वाग्योगे, वाग्योगात् काययोग इत्यादौ संक्रामति । ततश्च पृथक्त्वेन=एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन पृथुत्वेन वा विस्तीर्णभावेनेत्यन्ये वितर्कः=श्रुतं यस्मिन् ध्याने तत्पृथक्त्ववितर्कम्, यद्वा पृथक्त्वेन=एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन पृथुत्वेन वा वितर्को=विकल्पः पूर्वगतश्रुतालम्बनो नानानयानुसरणलक्षणो यस्मिन् ध्याने, तत्पृथक्त्ववितर्कम् । विचारेण=अर्थादिषु संक्रान्त्या सह वर्तते, तत् सविचारम्, अर्थाद् व्यञ्जनं संक्रामति व्यञ्जनादर्थमित्यादि, तेनेदं सविचारमुच्यत इत्यर्थः, पृथक्त्ववितर्कं च तत् सविचारं चेति पृथक्त्ववितर्कसविचारं प्रथमशुक्लध्यानमित्यर्थः ।यदुक्तं ध्यानशतके—

**"उप्पायठितिभंगाइ पज्जयाणं जमेगदव्वंमि ।**
**नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ॥१॥**
**सवियारमत्थ-वंजण-जोगंतरओ तयं पढमसुक्कं ।**
**होति पुहुत्तवियक्कं सवियारमरागभावस्स ॥२॥"** इति ।

तथैव तद्वृत्तावप्युक्तं कलिकालतमोदिवाकरैः **श्रीमद्धरिभद्रसूरिपादैः–"विचारः=अर्थ-व्यञ्जनयोगसंक्रम इति, आह च–अर्थ-व्यञ्जन-योगान्तरतः–अर्थः=द्रव्यं, व्यञ्जनं=शब्दः, योगः-मनःप्रभृति, एतदन्तरतः=एतावद्भेदेन सविचारम्, अर्थाद्व्यञ्जनं संक्रामतीति विभाषा, तकम्–एतद् प्रथमशुक्लं आद्यशुक्लं भवति । किं नामेत्यत आह–पृथक्त्ववितर्कं सविचारं, पृथक्त्वेन भेदेन विस्तीर्णभावेनाऽन्ये वितर्कः श्रुतं यस्मिन् तत्तथा ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ प्रकारान्तरेण व्युत्पाद्यते-पृथक्त्वम्=अनेकत्वं तेन सहगतो वितर्कः=पृथक्त्ववितर्कः, पृथक्त्वमेव वा वितर्को--वितर्कपुरोगं=पृथक्त्ववितर्कम्, पृथक्त्वञ्चाऽत्र परमाणुजीवादावेकद्रव्य उत्पाद-व्यय-ध्रौव्यादिपर्यायाऽनेकनयार्पितत्वम्। पृथक्त्वेन पृथक्त्वे वा तस्य चिन्तनं वितर्कसञ्चरितं पृथक्त्ववितर्कम्, पृथक्त्ववितर्कं च तत् सविचारं चेति पृथक्त्ववितर्कसविचारम्। इदमुक्तं भवति--त्रयाणां योगानामन्यतमे योगे वर्तमान उत्तमसंहननो जीवः प्राक् परमाण्वात्मादिकवाचकशब्दं गृह्णाति। ततस्तत्स्वरूपं चिन्तयति, ततस्तत्पर्यायं चिन्तयति, ततस्तदर्थं नानानयैः पूर्वगतभङ्गिश्रुतज्ञानबलेन पूर्ववित् तदितरस्तु **मरुदेव्यादिवदन्यथा** चिन्तयति, "**पूर्वगतश्रुतानुसारेण पूर्वविदः, मरुदेव्यादीनां त्वन्यथा।**" इति **ध्यानशतकवृत्तौ** प्रतिपादनात्। ग्रन्थान्तराभिप्रायेण तु **मरुदेव्यादीनां** निश्चयतो भावसूत्रयोगस्वीकाराद् न विरुध्यते तेषामपि यथोक्तश्रुतज्ञानबलेन चिन्तनम्। यदुक्तमुपदेशरहस्यवृत्तौ-"**येषामपि मरुदेव्यादीनां व्यवहारतो नोपलभ्यन्त एते, तेषामपि निश्चयत एतत्सत्त्वमभ्युपगन्तव्यम्, तत्फलस्य संपन्नत्वात्, अत एवाद्ये पूर्वविद इत्यादिकमुपपद्यते, केवलज्ञानप्राप्तियोग्यतयाऽनुमीयमानस्याऽऽद्यशुक्लद्वयस्य तत्र भावतः पूर्ववित्त्वं विनाऽसंभवात्।**" इति। ततः शब्दार्थयोः स्वरूपविशेषचिन्ताप्रतिबन्धः प्रणिधानम्। ततोऽन्तर्मुहूर्तकाले गते पर्यायान्तरं चिन्तयति, अथवा द्रव्यान्तरं गुणान्तरं वा, तेनेदं ध्यानं सपृथक्त्वमुच्यते। कश्चित्पुनरर्थादर्थान्तरं गच्छति, शब्दाच्छब्दान्तरे संक्रामति। अन्यः पुनः पूर्वयोगतोऽन्यतरस्मिन् योगे वा संक्रामति, तेनेदं ध्यानं सविचारं भण्यते। श्रुतज्ञानबलेन चिन्तयति, तेन सवितर्कमुच्यते। उक्तं च **गुणस्थानकक्रमारोहे**—

**"स्वशुद्धात्मानुभूतात्मभावश्रुतालम्बनात्।**
**अन्तर्जल्पो वितर्कः स्यात् यस्मिंस्तत्सवितर्कजम्॥१॥**
**अर्थादर्थान्तरे शब्दाच्छब्दान्तरे च संक्रमः।**
**योगाद्योगान्तरे यत्र सविचारं तदुच्यते॥२॥**
**द्रव्याद् द्रव्यान्तरं याति गुणाद्याति गुणान्तरम्।**
**पर्यायादन्यपर्यायं सपृथक्त्वं भवत्यतः॥३॥**" इति।

संक्षेपत एकस्मिन् परमाण्वादौ द्रव्य उत्पाद-स्थिति-भङ्ग-मूर्ता-ऽमूर्त-नित्या-ऽनित्यादि-पर्यायाणां द्रव्यास्तिकादिनानानयैश्चिन्तनपरं प्रथमशुक्लध्यानम्।

न च अर्थादर्था-ऽन्तरं गच्छतो जन्तोर्ध्यानविनाशो भवेदिति वाच्यम्, चित्तस्याऽन्यत्र गमनाऽभावेन ध्याननाशाऽभावात्।

**अथ द्वितीयं शुक्लध्यानमेकत्ववितर्काऽविचारं निरूप्यते—**

एकत्वेन=अभेदेन=उत्पादादिपर्यायाणामन्यतमैकपर्यायालम्बनतयेत्यर्थो वितर्कः-व्यञ्जन-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

रूपोऽर्थरूपो वा यस्य तत्तथा, इदमपि पूर्वगतश्रुतानुसारेणैव भवति, न विद्यते विचारः=अर्थ-व्यञ्जनयोरेकतरस्मादितरत्र तथा मनःप्रभृतीनामन्यतमादन्यत्र सञ्चारो निर्वातगृहगतप्रदीपस्येव यस्य तदविचारम् । एकत्ववितर्कं च तदविचारं चेत्येकत्ववितर्का-ऽविचारं द्वितीयशुक्लध्यानमुच्यते । उक्तञ्च—

**"जं पुण सुनिप्पकंपं निवायसरणप्पदीवमिव चित्तं ।**
**उप्पाय-ठिइ-भंगाइयाणमेगंमि पज्जाए ॥१॥**
**अवियारमत्थवंजणजोगंतरओ तयं बिइयं सुक्कं ।**
**पुव्वगयसुयालंबणमेगत्तवियक्कमवियारं ॥२॥"** इति ।

इदमुक्तं भवति-एकस्य भाव एकत्वम्, एकत्वगतो वितर्क एकत्ववितर्कः । यत्रैक एव योगस्त्रयाणामन्यतमस्तथा-ऽर्थो व्यञ्जनं चैकमेव पर्याया-ऽन्तरा-ऽनर्पितमेकपर्यायचिन्तनम्=उत्पादव्ययध्रौव्यादिपर्यायाणामेकस्मिन् पर्याये निर्वातगृहप्रतिष्ठितप्रदीपवद् निष्प्रकम्पं पूर्वगतश्रुतानुसारि चित्तं निर्विचारमर्थव्यञ्जनयोगान्तरेषु तदेकत्ववितर्का-ऽविचारम् ।

अत्र द्वितीयध्याने एकं द्रव्यं पर्यायं गुणं वा चिन्तयति, तेन एकत्वपदमुपादीयते । एकयोगेन निश्चलस्य चिन्तयतो-ऽर्थाद् व्यञ्जने व्यञ्जनादर्थे योगादन्ययोगे संक्रमणं=विचारो न भवतीत्यविचारपदमुपादीयते, श्रुतानुसारेण चिन्त्यते, तेन वितर्कपदोपादानम् । उक्तं च **गुणस्थानकक्रमारोहे**—

**"निजात्मद्रव्यमेकं वा पर्यायमथवा गुणम् ।**
**निश्चलं चिन्त्यते यत्र, तदेकत्वं विदुर्बुधाः ॥१॥**
**यद्व्यञ्जनार्थयोगेषु परावर्तविवर्जितम् ।**
**चिन्तनं तदविचारं स्मृतं सद्ध्यानकोविदैः ॥२॥**
**निजशुद्धात्मनिष्ठं हि भावश्रुता-ऽवलम्बनात् ।**
**चिन्तनं क्रियते यत्र सवितर्कं तदुच्यते ॥३॥**

**तथा तत्त्वार्थटीकायामपि श्रीसिद्धसेनगणिभिः**—

**"क्षीणकषायस्थानं, तत् प्राप्य ततो विशुद्धलेश्यः सन् ।**
**एकत्ववितर्काऽविचारं ध्यानं ततो-ऽध्येति ॥१॥**
**एकार्थाश्रयमिष्टं योगेन च केनचित् तदेकेन ।**
**ध्यानं समाप्यते यत् कालोऽल्पोऽन्तर्मुहूर्तश्च ॥२॥**
**श्रुतमुच्यते वितर्कः, पूर्वाभिहितार्थनिश्चितमतेश्च ।**
**ध्यानं तदिष्यते येन तेन सवितर्कमिष्टं तत् ॥३॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अर्थव्यञ्जनयोगानां संक्रान्तिरुदितो हि विचारः ।**

**तदभावात् तद्ध्यानं प्रोक्तमविचारमर्हद्भिः ॥४॥" इति ।**

अयं महात्मा शुक्लध्यानीत्येतदवधा-ऽसंमोह-विवेक-व्युत्सर्गरूपलिङ्गैर्ज्ञायते । तत्रोपसर्गैः परिषहैश्च न बिभेति, नाऽपि चाल्यते ध्यानादित्यवधलिङ्गम् । अत्यन्तगहनेषु पदार्थेषु देवमायासु च न मुह्यतीत्यसंमोहलिङ्गम् । शरीरादात्मानं पृथक् पश्यतीति विवेकलिङ्गम् । देहोपधीनां सङ्गं त्यजतीति व्युत्सर्गलिङ्गम् । उक्तं च ध्यानशतके—

**"अवहा-ऽसंमोह-विवेग-विउसग्गा तस्स होंति लिंगाइं ।**
**लिंगिज्जइ जेहिं मुणी सुक्कज्झाणोवगयचित्तो ॥१॥**
**चालिज्जइ बीभेइ य धीरो न परिसहोवसग्गेहिं ।**
**सुहुमेसु न संमुज्झइ भावेसु न देवमायासु ॥२॥**
**देहविवित्तं पेच्छइ अप्पाणं तह य सव्वसंजोगे ।**
**देहोवहिवोसग्गं निस्संगो सव्वहा कुणइ ॥३॥**

तथैव **तत्त्वार्थवृत्तावपि श्रीसिद्धसेनगणिपादैः—**

**"व्युत्सर्गविवेका(त्)संमोहाव्ययलिङ्गमिष्यते शुक्लम् ।**
**न च सम्भवन्ति कार्त्स्न्येन तानि लिङ्गानि मोहवतः ॥१॥**
**व्युत्सर्गः सङ्गत्यागः देहोपधीनां विवेकः ।**
**प्रीत्यप्रीतिविरहितं ध्यायंस्तदुपेक्षपकः प्रसन्नं सः ॥२॥"** इति

शुक्लध्यानस्य ध्याता शुक्ललेश्याक एव भवति । अभ्यधायि च ध्यानशतके—**"सुक्काए लेसाए दो ततियं परमसुक्कलेस्साए ।"** इति । शेषं शुक्लध्यानद्वयमग्रे यथावसरं वक्ष्यते ॥२२७॥

ध्यानबलेन यथाख्यातसंयमबलेन च घातित्रयस्य चरमस्थितिखण्डं घातयित्वा क्षीणकषायगुणस्थानस्याऽवशिष्टाऽद्धामात्रं स्थितिसत्त्वं क्रियत इति प्रतिपादितं **षड्विंशत्यधिकद्विशततमगाथया** । अथ चरमस्थितिखण्डे घातिते यद्भवति, तदाऽऽविश्चिकीर्षुराह—

## चरिमे खंडे उक्किण्णम्मि तिघाईण णत्थि ठिइघाओ
## समयहिअआलिसेसे हस्सठिइउदीरणा तिघाईणं ॥ २२८॥ (गीतिः)

चरमे खण्ड उत्कीर्णे त्रिघातिनां नास्ति स्थितिघातः ।
समयाधिकावलिकाशेषे ह्रस्वस्थित्युदीरणा त्रिघातिनाम् ॥ २२८ ॥ इति पदसंस्कारः ।

**'चरिमे'** इत्यादि, **देहलीदीपकन्यायेन 'घाईणं'** ति पदमत्रापि सम्बध्यते, 'त्रिघातिनां' ज्ञानावरण-दर्शनावरणा-ऽन्तरायरूपाणां कर्मणां 'चरमे खण्डे' अन्तिमे स्थितिखण्डे 'उत्कीर्णे' घातिते घातिकर्मणां स्थितिघातो 'नास्ति' न भवति । नाम-गोत्र-वेदनीयरूपाणां त्रयाणामघातिकर्मणां तु स्थितिघातादयः पूर्ववत् प्रवर्तन्ते, प्रतिषेधाभावात् । इतः प्रभृति ज्ञानावरणादीनां दलं केवलमुदयोदीरणाभ्यामसंख्येयगुणक्रमेण क्षपयति । 'समयाधिकावलिकाशेषे' क्षीणकषायगुणस्थानकाले समया-

धिकावलिकामात्रे शेषे 'त्रिघातिनां' ज्ञानावरण-दर्शनावरणा-ऽन्तरायरूपाणां कर्मणां 'ह्रस्वस्थित्युदीरणा' जघन्यस्थित्युदीरणा भवति । समयाधिकावलिकाप्रमाणस्थितिसत्त्वस्य चरमनिषेकत उदीरणा-प्रयोगेणोदयनिषेके दलं निक्षिपतो जन्तोरेकस्थितिप्रमाणा जघन्यस्थित्युदीरणा जायत इत्यर्थः । उपलक्षणमेतद्, तेन तदानीमेव केवलज्ञानावरण-केवलदर्शनावरण-पञ्चाऽन्तरायाणां, सर्वोत्कृष्टचतुर्दश-पूर्वधरं च प्रतीत्य मति-श्रुतज्ञानावरण-चक्षुरचक्षुर्दर्शनावरणानां, प्राप्तपरमावधिकस्यात्मनो-ऽवधिज्ञा-नावरणा-ऽवधिदर्शनावरणयोर्विपुलमतिभृतश्च मनःपर्यवज्ञानावरणस्य जघन्याऽनुभागोदीरणा जायते। गुणितकर्मांशस्य च शीघ्रं क्षपकश्रेणिमारूढस्य ज्ञानावरणपञ्चक-दर्शनावरणचतुष्क-पञ्चाऽन्तराय-रूपचतुर्दशप्रकृतीनामुत्कृष्टप्रदेशोदीरणा जायते, नवरं लब्धावधिज्ञानस्य जन्तोरवधिज्ञानावरणा-ऽवधिदर्शनावरणयोरुत्कृष्टप्रदेशोदीरणा न भवति, अवधिप्राप्तौ प्रभूतानां कर्मपुद्गलानां परिशटनात्, तथा सर्वेषां क्षपकाणां चतुर्दशानां मतिज्ञानावरणादीनां जघन्यस्थितिसंक्रमो जघन्या-ऽनुभागसंक्रमश्च जायत इत्युपलक्ष्यते । यदुक्तं **कर्मप्रकृतिचूर्णौ-चक्खुदंसणावरण-अचक्खुदंसणावरण-केव-लदंसणावरण-पंचअंतराइय-पंचविहणाणावरणजहण्णियट्ठिदिसंकमसामी खीण-कसातो समयाहियावलियसेसे वट्टमाणो । ××× अंतरकरणे कए उवरि जासिं घातिकम्माणं जहिं जहण्णगो ठितिसंकमो भणितो, तासिं अप्पप्पणो ठाणे तहिं जहण्णाणुभागसंकमो । के ते ? भण्णइ–णवणोकसाया चत्तारि संजलणा णिद्दा पयला पंचणाणावरण चत्तारि दंसणावरण पंच अंतरायमिति-एतेसिं एगूणतीसाए पगतीण अंतरकरणस्स उवरिं जहण्णगठितिसंकमो भवति । ××छउमत्थखीणरागेत्ति खीणकसाय त्ति 'चउदस समयाहियावलियठितिए' (पञ्च)णाणावरण-दंसणावर-णचउक्कं पंचण्हमंतराइयाणं एयासिं चोदसण्हं कम्माणं समयाहियावलियसेसाए ठितिए जहण्णिया ठितिउदीरणा भवति ।×××सुयकेवलि = चउद्दसपुव्वी सव्वु-क्कोसपज्जवेहिं तस्स मइ-सुय-चक्खु-अचक्खुणं उदीरणा मंदत्ति काउं तेण आभि-णिबोहियणाणावरण-सुयणाणावरण-चक्खुदंसणावरणाणं अचक्खुदंसणावरणाणं जहण्णाणुभागुदीरणा खवणाए अब्भुट्ठियस्स खीणकसायस्स समयाहियावलिया-सेसे वट्टमाणस्स । 'विपुलपरमोहिगाणं मणणाणोहीदुगस्सावि' त्ति–विपुलमण-पज्जवणाणिस्स मणपज्जवणाणावरणस्स तस्सेव खीणकसायस्स । ओहिणाणावर-णाणं ओहिदंसणावरणाणं वि परमोहिस्स खीणकसायस्स समयाहियावलिय-सेसे वट्टमाणस्स ।' ××चउण्हं णाणावरणीयाणं तिण्हं दंसणावरणीयाणं सुतके-वली वा इयरो वा सव्वे वि उक्कोस (पएस) उदीरणासामी, मणपज्जवणाणाव-रणीयस्स वि लद्धिसहिओ वा इयरो वा उक्कोसउदीरणासामी । ओहिनाण-ओहि-दंस-णावरणीयाणं (जस्स) लंभो णत्थि, तस्स उक्कोसिया पदेसउदीरणा । लद्धिसहि-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्स बहुया ओहिदुगावरणपअेसा खिज्जंति त्ति णेच्छिज्जइ लद्धी। एवं संखेवेण भणियं, तहावि असंमोहणिमित्तं विसेसयरं भणामि-ओहिणाणावरणवज्जाणं चउण्हं णाणावरणाणं चक्खु-अचक्खु-केवलदंसणावरणीयाणं एतेसिं सत्तण्हं उक्कसिया पदेसउदीरणा समयाहियावलियसेसे छउमत्थस्स, तस्सेव ओहिदुगस्स ओहिरहियस्स उक्कोसिया पदेसुदीरणा।" इति

तदानीं व्यवच्छिद्यमाना घातित्रयस्योदीरणा व्यवच्छिन्ना ॥२२८॥

ततः परं केवलमुदयेन घातिकर्मत्रयं वेदयन् क्षीणकषायगुणस्थानस्य द्विचरमसमयं प्राप्नोति, तदा निद्राद्विकक्षयं ततश्च चरमसमये चतुर्दशप्रकृतीनां क्षयं प्रदिदर्शयिषुराह--

**वोच्छिन्ना सन्तुदया निद्दुगस्स तु दुचरिमसमये-ऽन्ते।**
**णाणंतरायचउदंसणाण फिट्टन्ति सन्तुदया ॥२२९॥**

व्यवच्छिन्नौ सत्तोदयौ निद्राद्विकस्य तु द्विचरमसमये-ऽन्ते।
ज्ञानावरणाऽन्तरायचतुर्दर्शनावरणानां भ्रश्यतः सत्तोदयौ ॥ २२९ ॥ इति पदसंस्कारः।

'**वोच्छिन्ना**' इत्यादि, तत्र '**दुचरिमसमये**' त्ति 'द्विचरमसमये' द्वितीयश्चरमो यस्मात् =यत आरभ्य चरमसमयो द्वितीयो भवति, स द्विचरमः **पृषोदरादित्वात्** तीयलोपः, यदि वा द्वौ चरमौ यस्माद्=यत आरभ्य द्वौ समयौ चरमौ भवतः, स द्विचरमः, ततः समयशब्देन सह कर्मधारयसमासाद् द्विचरमसमयः, उभयथाऽपि सामयिक्या परिभाषया चरमसमयादनन्तरं पाश्चात्यः समयः, तस्मिन्, क्षीणकषायगुणस्थानस्य चरमसमयादनन्तरप्राक्तनसमय इत्यर्थः, 'निद्राद्विकस्य' निद्राप्रचलाख्यस्य '**सन्तुदया**' त्ति गाथायां सदिति निर्देशस्य भावप्रधानत्वेन सदित्यनेन सत्ताया व्याख्येयत्वात् सत्तोदयौ व्यवच्छिन्नौ भवतः, ततः परं निद्राद्विकं सत्कर्मणि न दृश्यत इत्यर्थः। उक्तं च **कषायप्राभृतचूर्णौ**–"**तदो दुचरिमसमये निद्दापयलाणुदयसंतवोच्छेदो।**" इति। एवं **कर्मस्तवादावपि**। तुशब्दो विशेषार्थकः, स चा-ऽन्येषामाचार्याणां मतेन निद्राद्विकस्य सत्त्वमेव व्यवच्छिद्यते, उदयस्तु पूर्वमपि क्षीणकषायगुणस्थानके न भवतीति विशिनष्टि, यदुक्तं **श्रीमन्मेरुतुङ्गाचार्यपादैः सप्ततिकाभाष्यवृत्तौ**–"**तस्य च मोहवर्जशेषकर्मणां स्थितिघातादयः पूर्ववत्प्रवर्तन्ते, यावत् क्षीणमोहाद्धायाः संख्येया भागा गच्छन्त्येको-ऽवतिष्ठते। तस्मिंश्च भागे ज्ञानावरणाऽन्तरायपञ्चक-दर्शनावरणचतुष्क-निद्राद्विकरूपाणां षोडशप्रकृतीनां स्थितिं सर्वाऽपवर्तनयाऽपवर्त्य क्षीणमोहाद्धासमां विधत्ते, केवलं निद्राद्विकस्य स्वरूपं प्रतीत्यैकसमयोनां कर्मत्वमात्रा-ऽपेक्षया तु तुल्यां, कोऽर्थः? क्षीणमोहस्य द्विचरमसमये निद्राद्विकस्य दलिकं स्तिबुकाः दर्शनावरणप्रकृतिचतुष्के सङ्क्रमयिष्यन्ति, संक्रमच दलिकं किञ्चित् स्वरूपं जहातीति**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निद्राद्विकत्वलक्षणस्वकीयरूपावस्थानमाश्रित्य समयोना क्षीणमोहाद्धासमा स्थितिः। अथ च संक्रमान्त्यसमये प्रकृतिचतुर्दशकरूपतया (प्रकृतिचतुष्करूपतया) स्थित्वा तेन साकं क्षेष्यतीति, परप्रकृतिरूपकर्मत्वमात्रापेक्षया तुल्येति, तदुक्तं कर्मप्रकृतिटीकायाम्–'अनुदयवतीर्हि चरमसमये स्तिवुकसंक्रमेणोदयवतीषु प्रकृतिषु मध्ये प्रक्षिपति, तत्स्वरूपेण वाऽनुभवति, तेन चरमसमये तासां दलिकं स्वरूपेण न प्राप्यते, किन्तु पररूपेण' इत्यादि। एवमग्रेऽप्यनुदयवत्कर्मणां समयोनता भावनीया। सा च क्षीणाद्धाऽन्त्यान्तर्मुहूर्तमाना, ततः प्रभृति च तासां स्थितिघातादयः स्थिताः, शेषाणां तु भवत्येव। ताश्च प्रकृतीर्निद्राद्विकवर्जमुदयोदीरणाभ्यां वेदयमानस्तावद् गतो यावत् समयाधिकावलिकामात्रं शेषः, तत्रोदीरणा निवृत्ता, तत आवलिकां यावदुदयेनैव केवलेन वेदयते, यावत् क्षीणमोहाद्धाया द्विचरमसमयः। तत्र च निद्राद्विकं स्तिवुकसंक्रमेणोदयवतीषु प्रकृतिषु संक्रान्तत्वात् स्वरूपसत्तापेक्षया क्षीणम्। अत एव 'उदये पुण खवगाणं चत्तारि उ दंसणावरणे' इति सूत्रेण क्षपकश्रेण्यां निद्राद्विकोदयः प्राग्न्यषेधि–यत उदयवतीनां प्रकृतीनां प्राक्संक्रमाभावात्स्वरूपेण प्रान्त्यसमयं यावद्दलिकं दृश्यते, एतयोश्च दलिकं द्विचरमसमय एव क्षीणं, अतो ज्ञायते–निद्राद्विकस्य क्षपकश्रेणावुदयो नास्तीति। तदुक्तं चूर्णौ—"दुचरिमसमए एवं निदादुगं खीणं उदयाभावाउ' अत्र 'उदयाभावाउ' इति यस्मादेतयोः क्षपकश्रेणावुदयाभावोऽत एते स्तिवुकसंक्रान्त्या द्विचरमसमय एव क्षीणे इत्यर्थः।" इति

केषाञ्चिदाचार्याणामभिप्रायेण क्षीणकषायगुणस्थानकद्विचरमसमये निद्राद्विकेन सह देवगति-देवानुपूर्वी-वैक्रियशरीरा-ऽऽहारकशरीर-वज्रर्षभनाराचवर्जसंहननपञ्चका-ऽनुदितसंस्थानपञ्चकरूपचतुर्दशप्रकृतयो-ऽपि सत्त्वतो व्यवच्छिद्यन्ते, अतीर्थकरप्रतिपत्तुस्तु जिननामकर्मणो-ऽपि सत्त्वतो व्यवच्छेद इति। यदुक्तमावश्यकचूर्णौ–"अन्ने भणंति-जत्थ निद्दं पयलं च खवेति, तत्थ नामस्स इमाओ पयडीओ खवेति, तं जहा–देवगति देवाणुपुव्वी विउव्वियदुगं पढमवज्जाइं पंच संघयणाइं पंच संठाणाइं तित्थगरनामं जदि अतित्थगरो।" इति।

अन्यत्रा-ऽपि प्रतिपादितम्—

"वीसमिऊण नियंठो दोहि उ समएहिं केवले सेसे।
पढमं निद्दं पयलं नामस्स इमाउ पयडीओ ॥१॥
देवगइ–आणुपुव्वी-वेउव्विय-संघयणपढमवज्जाइं।
अन्नयरं संठाणं तित्थयराहारनामं च ॥२॥"

एवं बृहत्कल्पवृत्तावप्यभिहितम्।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

ततः परं क्षीणकषायगुणस्थानकचरमसमये केवलज्ञानावरणकेवलदर्शनावरण-दान-लाभ-भोगोपभोग-वीर्या-ऽन्तरायाणां तथा सर्वोत्कृष्टचतुर्दशपूर्वधरं प्रतीत्य मतिज्ञानावरण-श्रुतज्ञानावरण-चक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणानां, प्राप्तावधिज्ञानांश्च जीवानाश्रित्याऽवधिद्विकस्य तथा विपुलमतिं प्रतीत्य मनःपर्यवज्ञानावरणस्य जघन्यानुभागोदयो जायते, तथा गुणितकर्मांशस्य शीघ्रं क्षपकश्रेणिमारूढस्य चतुर्दशप्रकृतीनां मतिज्ञानावरणादीनामुत्कृष्टप्रदेशोदयो जायते, नवरं प्राप्ताऽवधिलब्धिकस्य न वाच्यः, अवधिप्राप्तौ प्रभूतानां प्रदेशानां परिशटनात्। उक्तञ्च कर्मप्रकृतिवृत्तौ–"नवरं ज्ञानावरणपञ्चकाऽन्तरायपञ्चक-दर्शनावरणचतुष्टय–वेदत्रय-संज्वलनलोभ-सम्यक्त्वानामुदीरणाव्यवच्छेदे सति परत आवलिकां गत्वा-अतिक्रम्य तस्या आवलिकायाश्चरमसमये जघन्यानुभागोदयो वाच्यः। XXX 'आवरण' त्ति आवरणं-पञ्चप्रकारं ज्ञानावरणं चतुष्प्रकारं दर्शनावरणं 'विग्घ' त्ति पञ्चप्रकारमन्तरायं एतासां चतुर्दशप्रकृतीनां लघुक्षपणया-शीघ्रक्षपणार्थं अभ्युद्यतस्य। द्विविधा हि क्षपणा लघुक्षपणा चिरक्षपणा च। तत्र योऽष्टवार्षिक एव सप्तमासाभ्यधिकः संयमं प्रतिपन्नः, तत्प्रतिपत्त्यनन्तरं चाऽन्तमुहूर्तेन क्षपकश्रेणिमारभते। तस्य या क्षपणा, सा लघुक्षपणा। यस्तु प्रभूतेन कालेन संयमं प्रतिपद्यते, संयमप्रतिपत्तेरप्यूर्ध्वं प्रभूतेन कालेन क्षपकश्रेणिमारभते, तस्य या क्षपणा, सा चिरक्षपणा। तया च प्रभूताः पुद्गलाः परिशटन्ति, स्तोका एव च शेषा भवन्ति। ततो न तथा उत्कृष्टः प्रदेशोदयो लभ्यते, तत उक्तं लघुक्षपणयाऽभ्युत्थितस्येति। तस्य गुणितकर्मांशस्य क्षीणमोहगुणस्थानकचरमसमये गुणश्रेणिशिरसि वर्तमानस्योत्कृष्टप्रदेशोदयो भवति। नवरं 'ओहीण णोहिलद्धिस्स' त्ति अवध्योरवधिज्ञानावरणाऽवधिदर्शनावरणयोरनवधिलब्धिकस्या-ऽवधिलब्धिरहितस्य क्षपणायोत्थितस्योत्कृष्टः प्रदेशोदयो वाच्यः। अवधिज्ञानं ह्युत्पादयतो बहवः पुद्गलाः परिशटन्ति-क्षीयन्ते। ततो नाऽवधियुक्तस्योत्कृष्टप्रदेशोदयलाभ इत्यनवधिलब्धियुतस्येत्युक्तम्।" इति।

तदानीमेव मूलकर्माऽपेक्षया ज्ञानावरण-दर्शनावरण-ऽन्तरायाणामुत्तरकर्मापेक्षया च पञ्चज्ञानावरण--चतुर्दर्शनावरण-पञ्चाऽन्तरायाणां जघन्यस्थित्युदयो भवति, कर्मप्रकृतिवृत्तौ श्रीमन्मलयगिरिपादैः "★षट्त्रिंशत्प्रकृतीनां जघन्यः स्थित्युदयः समयमात्रैकस्थित्युदय-

★ षट्त्रिंशत्प्रकृतयो नामतः पुनरिमाः--ज्ञानावरणपञ्चकं दर्शनावरणचतुष्कं सातवेदनीयमसातवेदनीयं संज्वलनलोभो वेदत्रिकं सम्यक्त्वमोहनीयं मिथ्यात्वमोहनीयं चत्वार्यायुष्काणि मनुष्यगति-पञ्चेन्द्रियजाति-त्रस-बादर-पर्याप्त-सुभगा-ऽऽदेय-यशःकीर्तयो जिननामोच्चैर्गोत्रमन्तरायपञ्चकं चेति।

**प्रमाणो वेदितव्यः, समयमात्रा चैका स्थितिः चरमस्थितिरवसेया ।"** इत्युक्तत्वाद् निरुक्तकर्मणां च चरमस्थितेः क्षीणकषायचरमसमय एव लभ्यमानत्वात् ।

**ग्रन्थान्तराभिप्रायेण** तु निरुक्तकर्मणां जघन्यस्थित्युदयः स्वोदीरणाव्यवच्छेदात् परमावलिकां यावत् प्रतिसमयं भवति, उदीरणाऽपवर्तनयोर्व्यवच्छिन्नत्वेन केवलोदयेन प्रतिसमयमेकैकस्याः स्थितेः क्षयात् ※ ।

एवमेवेह ग्रन्थे मोहनीयस्य जघन्यस्थित्युदयः सूक्ष्मसम्परायचरमावलिकाचरमसमये नामगोत्रयोश्चाऽयोगिकेवलिगुणस्थानचरमसमये प्रथममतेन भावनीयः, द्वितीयमतेन तु मोहनीयस्य जघन्यस्थित्युदयः सूक्ष्मसम्परायचरमावलिकाप्रमाणे काले नामगोत्रयोश्चाऽयोगिकेवलिगुणस्थानाद्धाप्रमाणेऽन्तर्मुहूर्तकाले प्रतिपादनीयः ।

उक्तनीत्या पुरुषवेदादीनामपि जघन्यस्थित्युदयः स्वमत्या यथास्थानं परिभावनीयः ।

निश्चयनयमाश्रित्य क्षीणकषायगुणस्थानकचरमसमये क्षीयमाणानि त्रीणि घातिकर्माणि निश्शेषतः क्षीणानि, तदभिधातुकाम आह—'अन्ते' क्षीणकषायगुणस्थानकचरमसमये **'णाणंत०'** त्ति पदैकदेशे पदसमुदायोपचारात् ज्ञानावरणा-ऽन्तराय-चतुर्दर्शनावरणानां=मति-श्रुता-ऽवधि-मनःपर्याय-केवलज्ञानावरण-चक्षुरचक्षुरवधिकेवलदर्शनावरण-दान-लाभ-भोगोपभोग-वीर्यान्तरायरूपाणां चतुर्दशप्रकृतीनामित्यर्थः, **'सन्तुदया'** त्ति प्राकृतत्वाद् **"द्विवचनस्य बहुवचनम्"**(सिद्धहेम०८-३-१३०) इत्यनेन सूत्रेण बहुवचनम्, सत्त्वोदयौ **'फिट्टन्ति'** त्ति 'भ्रश्यत': व्यवच्छिद्येते । उक्तं च **सप्ततिकाचूर्णौ—"आवरणमंतराए छउमत्थो चरिमसमयम्मि त्ति एयासिं चोद्दसण्हं पगडोणं उदयसंतखओ खीणकसायस्स चरिमसमए भवति ।"** इति । **तथैवोक्तं कषायप्राभृतचूर्णावावश्यकचूर्णौ** चाऽपि । इत्थं क्षीणमोहगुणस्थानकचरमसमये शेषाणि त्रीणि घातिकर्माणि परिक्षीयन्ते । न च तदानीमेव घातिकर्मवदघातिकर्माणि कुतो न परिशटन्ति, कर्मत्वेनोभयेषामप्यविशेषत्वाद् ? इति वाच्यम् , अघातिकर्मणां तदानीं पल्योपमा-ऽसंख्येयभागप्रमाणस्थितेः सद्भावेन कर्मा-ऽपेक्षयाऽविशेषत्वे-ऽपि नाम-गोत्रा-ऽऽयुर्वेदनीयानां प्रशस्ताऽप्रशस्तत्वेना-ऽप्रशस्तज्ञानावरणादितो विलक्षणत्वात् । तद्यथा—मोहनीयस्या-ऽप्रशस्ततरत्वात् सूक्ष्मसम्परायगुणस्थानक एव तत्क्षयो जातः । ज्ञानावरणादीनामप्रशस्तत्वात् क्षीणकषायगुणस्थानके तद्विनाशो जायते । अघातिकर्मणां तु प्रशस्ताऽप्रशस्तत्वात् क्षीणकषायगुणस्थानकेऽपि तत्क्षयो न भवति, किन्त्वयोगिकेवलिगुणस्थानके । एवमघातिकर्मणां प्रशस्ताप्रशस्तत्वप्रयुक्तवैचित्र्यस्य सद्भावात् क्षीणकषायगुणस्थानके तानि निश्शेषतो न क्षीयन्ते ।

---

※ उक्तञ्च **धवलाकारैरपि—"णाणावरणीय-दंसणावरणीय-अंतराइयाणं जहण्णट्ठिदिउदओ कस्स ? चरिम(समय)छउमत्थमादिं कादूण जाव आवलियचरिमसमयछदुमत्थो त्ति ।"**

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**निश्चयनयाऽभिप्रायेण** यस्मिन्नेव समय आवरणक्षयः, तस्मिन्नेव समये केवलज्ञानमुत्पद्यते, क्रियाकाल-निष्ठाकालयोरैक्येन क्षीयमाणस्य क्षीणत्वात् ।

**व्यवहारनयाऽभिप्रायेण** तु यस्मिन् समय आवरणक्षयः, तदनन्तरसमये केवलज्ञानस्योत्पत्तिः, क्रियाकाल-निष्ठाकालयोर्भेदेना-ऽऽवरणक्षयसमये क्षीयमाणत्वात् क्षीयमाणस्य चा-ऽक्षीणत्वात् । उक्तश्च **श्रीविशेषावश्यकभाष्ये—**

**"आवरणक्खयसमए निच्छइनयस्स केवलुप्पत्ती ।**
**तत्तो-ऽणंतरसमए ववहारो केवलं भणइ ॥१॥"** इति ।

**भावार्थः** पुनरयम्—श्रुताख्यप्रमाणविषयीभूतस्यानन्तधर्मात्मकस्य वस्तुनः स्वाभिप्रेतैकांऽशस्तदितरां-ऽशौदासीन्यतो नीयते=ज्ञायते येना-ऽभिप्रायविशेषेण, स नयः, स च यद्यपि द्रव्यार्थिकः पर्यायार्थिकश्च, निश्चयो व्यवहारश्च, द्रव्यात्मको भावात्मकश्च, क्रियात्मको ज्ञानात्मकश्चेत्यादिविविधरूपः शास्त्रान्तरेषु दृश्यते,तथाप्यत्र व्यवहार-निश्चयौ विविच्येते, तयोरेवा-ऽत्राऽधिकृतत्वात् ।

तत्रादौ तावद् **व्यवहारनयाभिप्रायो** व्यक्तीक्रियते-तथाहि—यदविद्यमानम्, तदुत्पद्यते, न तु विद्यमानम् , असत्कार्यवादी हि व्यवहारनयः । तत्राऽनुमानप्रमाणमाह-यद् विद्यमानम्, न तत् केनचित् क्रियते, यथा पूर्वनिष्पन्नो घटः । अथ कृतमपि क्रियते, तदा क्रियतां नित्यमिति क्रियाव्यापारानुपरमप्रसङ्गः, किञ्चैवं सति नैकस्याऽपि कार्यस्याऽनन्तकालेनाऽपि परिसमाप्तिः स्यात्, अपिच यदि कृतमपि क्रियते, तर्हि घटादिकार्यं उत्पाद्ये चक्रभ्रमणादिक्रियाया वैयर्थ्या-ऽऽपत्तिः, कार्यस्य प्रस्तुतक्रियायाः प्रागेव सत्त्वात् । प्रत्यक्षविरोधश्च सत्कार्यवादे, यतः पूर्वं मृत्पिण्डाद्यवस्थायामसदेव घटादिकार्यं कुम्भकारादिव्यापारेणोत्पद्यमानं दृश्यते ।

ननु यस्मिन्नेव समये कार्यं प्रारभ्यते, तस्मिन्नेव समये निष्पद्यते, अतो निष्पन्नमेव तत् क्रियते, क्रियाकाल-निष्ठाकालयोरभेदात् । इत्थं च सदुत्पद्यत इति चेत्, न, उत्पद्यमानानां हि घटादीनां प्रदीर्घः क्रियाकालः प्रत्यक्षप्रतीतः, यतो मृदानयन-तत्पिण्डविधान-चक्रारोपण-शिवकादिविधानादिचिरकालेनैव घटाद्युत्पत्तिर्दृश्यते, न तु घटाद्यारम्भकाल एव ।

ननु भवतु नाम दीर्घः क्रियाकालः, घटादिकार्यं त्वारम्भसमयेऽप्युपलभ्यत इति चेत्, मैवम्, यतः क्रियारम्भकाले घटादिकार्यनिष्पत्तिर्न दृष्टा केनचित्, नाऽपि शिवक-स्थास-कोश-कुशूलादिकाले, किन्तु दीर्घक्रियाकालपरिसमाप्तिसमये घटादिकार्यं दृश्यते, तस्मात् क्रियाकालपर्यन्त एव घटादिकार्यसत्त्वं युज्यते, न तु पूर्वम्, तत्रा-ऽनुपलभ्यमानत्वात् । तदेवं क्रियाकाले कार्यं नास्ति, अनुपलभ्यमानत्वात्, किन्तु तन्निष्ठाकाल एव, तत्रैवोपलब्धेः । ततो ना-ऽऽवरणं क्षीयमाणं क्षीणम्, क्रियाकाले तस्य क्षीयमाणत्वात्, निष्ठाकाल एव च क्षीणत्वात्, क्रियाकाल-निष्ठाकालयोश्चाऽत्यन्तं भेदात् । तयोरैक्ये तु क्रियाकालेऽपि कार्यस्य सत्त्वात् क्रियावैयर्थ्यप्रसङ्गः ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

न च समानकालभाविनोः क्रिया-कार्ययोः कार्यकारणभावो युज्यत इति वाच्यम् , समानकाल-भाविनोः सव्येतरगोविषाणयोः परस्परं कार्यकारणभावप्रसङ्गात् । न चाऽऽवरणे क्षीयमाणे केवल-ज्ञानोत्पत्तिर्युक्तेति वाच्यम्, क्षीयमाणस्य क्रियाकालत्वात् तत्काले च कार्यसत्त्वाभ्युपगमे कार्यकारणभावव्यवस्थाभङ्गप्रसङ्गात् । इत्थं क्षीयमाणतानन्तरसमये क्षीण एव तदावरणे केवलज्ञानं युज्यते, अस्य निष्ठाकालत्वात् । क्रियाकाल-निष्ठाकालयोश्चैक्यं प्रतिविहितमेव, इति **व्यवहारनयः** ।

अथ **निश्चयनयः** परिभाव्यते—यदसत्कार्यवादिना व्यवहारनयेनाऽभिधीयते-यदविद्यमानम् तदुत्पद्यते, न तु विद्यमानमिति, तत्र सत्कार्यवादी निश्चयनयो ब्रूते—विद्यमानमेवोत्पद्यते, नाऽविद्य-मानम्, प्रमाणयति च—नाऽविद्यमानमुत्पद्यते, अभावत्वात्, खपुष्पवद् । अथाऽविद्यमानमपि जायते, तर्हि खरविषाणमपि जायताम् , असत्त्वाविशेषात् । अपि चाऽसत्कार्यवादिना नित्यकरणादयो ये दोषा उद्भाविताः, ते तत्पक्षेऽपि समाना एव । तथाहि—अत्राऽपि शक्यते वक्तुमिदम्—यद्यसत् क्रियते, तर्हि क्रियतां नित्यम् , असत्त्वाऽविशेषात् । न चैवमेकस्या-ऽपि कार्यस्याऽनन्तेना-ऽपि कालेन परिसमाप्तिर्युज्यते, खरविषाणदेश्ये चाऽसति कार्ये क्रियावैफल्यमित्यादि । किञ्च व्यवहारनय-मतेनोक्तदोषाणां दुष्परिहार्यतरत्वम् । विद्यमानस्यैव कार्यस्य केनाऽपि पर्यायविशेषेण करणं सम्भवति, लोकेऽपि सतामाकाशादीनां पर्यायविशेषा-ऽऽधाना-ऽपेक्षया करणस्य रूढत्वात् । खरविषा-णकल्पे त्वसति कार्ये न केना-ऽपि प्रकारेण करणं संभवति ।

अथोत्पद्यमानानां घटादीनां प्रदीर्घः क्रियाकालः प्रत्यक्षप्रतीत इति यदुक्तम् , तत्रोच्यते—प्रतिसमयमुत्पद्यमानानां परस्परविलक्षणानां मृत्खनन-संहरण-रासभपृष्ठारोपण-ऽम्भःसेचन-परिम-र्दन-पिण्डविधान-भ्रमण-चक्रारोपण-शिवक-स्थास-कोश-कुशुलादिकार्याणां यदि प्रदीर्घः क्रिया-कालो दृश्यते, तर्हि घटस्य किमायातम् । अयमत्र भावः—प्रतिसमयं विलक्षणा एव क्रियाः, विलक्ष-णान्येव च मृत्खननादीनि कार्याणि, घटस्तु चरमसमये प्रारब्धः, तत्रैव च परिसमाप्तः । ततश्च प्रतिसमयभिन्नानामनेककार्याणां यदि दीर्घः क्रियाकालो भवति, तर्हि चरमैकक्रियाक्षणमात्रभाविनि घटे दीर्घक्रियाकालप्रेरणं व्यवहारनयस्याऽल्पज्ञतां सूचयति ।

अथ क्रियारम्भकाले घटादिकार्यनिष्पत्तिर्न दृष्टा केनचिदित्यादिकं यदुक्तम् , तत् प्रतिविधीयते-न खलु प्रारम्भकाले घटः प्रारब्धः, किन्तु मृत्खनन-चक्रमस्तकमृत्पिण्डा-रोपणादिकार्याणि प्रारब्धानि, न चाऽन्यारम्भेऽन्यद् दृष्टम्, पटारम्भे घटवत् । न हि शिवकादयो घटः, अतः शिवकादिकाले घटदर्शनं कथं स्यात् ? अन्यारम्भकाले-ऽन्यस्य दर्शनानुपपत्तेः । व्यवहारनयस्तु प्रतिसमयकार्यकोटीनिरपेक्षत्वेन स्थूलमतित्वात् प्रतिसमयं शिवकादिकार्यसम्बन्धिनमपि कालं घटकालमध्यवस्यति, तेन शिवकादिकालेऽपि घटदर्शनम-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

भिकाङ्क्षति । अयम्भावः-प्रतिसमयमपरा-ऽपराण्येव शिवकादीनि कार्याण्युत्पद्यन्ते दृश्यन्ते च, तानि च तथोत्पद्यमानानि व्यवहारनयो नाऽवबुध्यते, घटोत्पत्तिनिमित्तैवेयं सर्वाऽपि मृच्चक्र-चीवरादिसामग्रीत्येवं केवलघटाभिलाषयुक्तत्वात्, ततस्तन्निरपेक्ष एव स्थूलमतितया सर्वमपि कालं घट-कालत्वेन मन्यते, ततश्च प्राक्तनक्रियासमयेष्वनुत्पन्नत्वाद् घटमदृष्ट्वैवं ब्रूते-क्रियाकाले घटात्मकं कार्यं न दृश्यत इति, इदं तु नाऽवबुध्यते, यदुत-चरमक्रियासमय एव घटः प्रारभ्यते, प्राक्तनक्रिया-काले तु शिवकादीन्येवा-ऽऽरभ्यन्ते, अन्यारम्भे चाऽन्यद् न दृश्यत एवेति । ननु यदि प्रथमस-मयादारभ्या-ऽपरा-ऽपराणि शिवकादीनि कार्याण्यारभ्यन्ते, तर्हि कोऽयश्चरमसमयनियमः, येन प्रथमसमये घटादीनि कार्याणि न समुत्पद्यन्त इत्युच्यत इति चेत्, न, न ह्यकारणं कार्यमुत्पद्यते, अतिप्रसङ्गात्। तेनाऽन्त्यसमय एव घटादिकार्यस्य कारणं विद्यते, अतस्तत्रैव कार्यमुत्पद्यते, अन्वय-व्यतिरेकाभ्यां कार्यकारणभावस्य गम्यमानत्वात् । इत्थश्च दीर्घक्रियाकालपरिसमाप्तिसमये घटा-दिकार्यं दृश्यत इत्युक्तम्, तद्युक्तमेव, तदानीमेव तस्य प्रारब्धत्वात् । तच्च कार्यं क्रियासमये क्रियमाणं कृतमेव, समयस्य निरंशत्वात् । यच्च कृतम्, तत् सदेव । ततः सदेव क्रियते, नाऽसत्, यच्च सत्, तदुपलभ्यत एव । इत्थं क्रियाकाल-निष्ठाकालयोरभेदः । ततश्च यस्मिन्नेव समय आवरणक्षयः, तस्मिन्नेव समये केवलज्ञानोत्पादः, क्रियाकाल-निष्ठाकालयोर्भेदे त्वन्यत्र काले क्रिया, अन्यत्र च कार्योत्पत्तिरिति स्यात्, तच्च न युक्तम्, क्रियाविरहेऽपि कार्योत्पत्त्यभ्युपगम-प्रसङ्गेन क्रियाप्रारम्भात्पूर्वमपि कार्योत्पत्तिप्रसङ्गात् ।

ननु व्यवहारनयेनाऽऽवरणस्य क्षये केवलज्ञानोत्पत्तिरिष्यते. न त्वावरणे क्षीयमाणे । तत्र विकल्पद्वयमवतरति–किमावरणक्षयकाले क्रिया समस्ति, नवा ? यदि नास्ति, तर्हि क्रियां विना-ऽऽव-रणक्षये कोऽन्यः हेतुः ? न कोऽपीत्यर्थः, अथाऽस्त्यावरणक्षयकाले तद्धेतुभूता क्रिया, तया च तत्क्षयो विधीयते, तर्हि बलादायातं क्रियाकाल-निष्ठाकालयोरैक्यम् ।

किञ्च यदि क्रियाकालयावरणक्षयो नास्ति, तर्हि पश्चादप्यसौ न स्यात्, अक्रियत्वात् । यदि च द्वितीयसमये क्रियाव्युपरत्यामक्रियस्य सत आवरणक्षयोऽभ्युपगम्यते, तर्हि क्रियावित्त-प्रथमसमये क्रियाया वैयर्थ्यं स्यात्, तामन्तरेणाऽप्यावरणक्षयोपपत्तेः, क्रियाविरहित-द्वितीयसमयवद् ।

अन्यच्च **श्रीविवाहप्रज्ञप्तौ "णिज्जरिज्जमाणे णिज्जिण्णे"**इत्युक्तम्,अतः क्षीयमाणं क्षीणमेवेति न क्रियाकाल-निष्ठाकालयोर्भेदः। एवमावरणक्षीयमाणतासमय आवरणस्य क्षीणत्वेन प्रतिबन्धकविरहात् केवलज्ञानोत्पत्तिः केन निवारयितुं शक्यते ? यदि चावरणक्षीयमाणतासमये प्रतिबन्धकाभावेऽपि केवलज्ञानं नोत्पद्यते, तदुत्तरकाले तु पश्चादुत्पद्यते, तर्ह्यकारणः स्यात् केवलोत्पादः, ततश्चाकारणत एव तद्विनाशः सम्पद्येत । तस्मात् केवलज्ञानस्य तदावरणस्य च प्रकाश-तमसोरिव युगपदेवोत्पाद-विना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चाऽभ्युपगन्तव्यौ, यथा हि यस्मिन्नेव समये तमसो विनाशः, तस्मिन्नेव समये प्रदीपादिप्रकाशस्योत्पत्तिर्भवति । एवमत्राऽपि यस्मिन्नेव समय आवरणस्य क्षयः, तस्मिन्नेव समये केवलज्ञानस्योत्पत्तिः, तत्र हि समय आवरणस्य क्षीयमाणस्य क्षीणत्वात् केवलज्ञानस्योत्पद्यमानस्योत्पन्नत्वात् ।

तदेवं दर्शितौ निश्चयनय-व्यवहारनया आक्षेपपरिहाराभ्याम् । जिनमतं तूभयनयात्मकम् । तेन क्रियाकाल-निष्ठाकालयोर्भेदाभेदः । ततश्च निश्चयनयेन क्षीणकषायचरमसमये केवलज्ञानस्योत्पत्तिः, व्यवहारनयेन त्वनन्तरसमये, तन्मतेन च साऽनन्तरगाथायां प्रतिपादयिष्यत इत्यलं विस्तरेण ॥२२९॥

| क्षीणकषायचरमसमयमाश्रित्य यन्त्रकम् |
|---|
| (१) केवलज्ञानावरण-केवलदर्शनावरण-पञ्चाऽन्तरायाणां जघन्याऽनुभागोदयो जायते |
| (२) सर्वोत्कृष्टचतुर्दशपूर्वधरस्य मतिज्ञानावरण-श्रुतज्ञानावरण-चक्षुर्दर्शनावरणा-ऽचक्षुर्दर्शनावरणानां जघन्याऽनुभागोदयो भवति । |
| (३) विपुलमतिमनःपर्यायज्ञानभृतो जीवस्य मनःपर्यायज्ञानावरणस्य जघन्यानुभागोदयो जायते । |
| (४) गुणितकर्मांशस्य शीघ्रक्षपणायोद्यतस्य मतिज्ञानावरण-श्रुतज्ञानावरण-मनःपर्यवज्ञानावरण-केवलज्ञानावरण-चक्षुर्दर्शनावरणा-ऽचक्षुर्दर्शनावरण-केवलदर्शनावरण-पञ्चाऽन्तरायरूपाणां द्वादशप्रकृतीनामुत्कृष्टप्रदेशोदयो भवति । |
| (५) गुणितकर्मांशस्याऽवधिलब्धिरहितस्य शीघ्रं क्षपकश्रेणिमारूढस्याऽवधिज्ञानावरणाऽवधिदर्शनावरणयोरुत्कृष्टप्रदेशोदयो भवति । |
| (६) त्रीण्यपि घातिकर्माणि क्षीयमाणानि सर्वथा क्षीणानि । |
| (७) निश्चयनयाभिप्रायेणाऽऽवरणक्षयसमय एव केवलज्ञानमुत्पद्यते । |

**समाप्तः सप्तमाधिकारः ।**

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सम्प्रत्यष्टमा-ऽधिकारं प्रतिपिपादयिषुरादौ तावद् व्यवहारनयमतमाश्रित्य केवलज्ञानादि-लाभं समर्थयति—

**सेकाले पावेइ सजोगिगुणं लहइ केवलं णाणं ।**
**तह केवलं दरिसणं णिरन्तरायं च वीरियमणंतं ॥२३०॥ (गीतिः)**

अनन्तरकाले प्राप्नोति सयोगिगुणं लभते केवलं ज्ञानम् ।
तथा केवलं दर्शनं निरन्तरायञ्च वीर्यमनन्तम् ॥२३०॥ इति पदसंस्कारः ।

**'सेकाले'** इत्यादि, 'अनन्तरकाले' घातिकर्मक्षयादनन्तरसमये जीवः 'सयोगिगुणं' पदैकदेशे पदसमुदायोपचारात् सयोगिगुणस्थानकं 'प्राप्नोति' आसादयति । तत्र मनःपर्ययज्ञा-निभिरनुत्तरदेवादिभिर्वा मनसा पृष्टो व्याकरणाय मनोवर्गणापुद्गलानादाय मनोयोगं युनक्ति केवली भगवान्, तेन भगवतो मनोयोगो घटते । देशनाऽऽमन्त्रणादौ वाग्योग्यपुद्ग-लानादाय वचनयोगं प्रयुनक्ति । तत्राऽपि च सत्यवाग्योगो-ऽसत्यामृषवाग्योगश्चेति द्वा एव वाग्योगौ भगवतः, नेतरौ द्वौ भेदौ, वीतरागत्वात् सर्वज्ञत्वाच्च । आगमनादौ च काययोगः, तद्यथा-भगवान् कार्यवशतः कुतश्चित् स्थानाद् विवक्षिते स्थाने समागच्छेत्, यदिवा क्वापि गच्छेत्, अथवा तिष्ठेत्, ऊर्ध्वस्थानेन वा-ऽवतिष्ठेत निषीदेद्वा, तथाविधश्रमापगमाय त्वग्वर्तनं वा कुर्यात्, अथवा विवक्षिते स्थाने तथाविधसाम्पातिकसत्त्वाकुलां भूमिमवलोक्य तत्परिहाराय जन्तुरक्षानिमित्तमुल्ल-ङ्घनं प्रलङ्घनं वा कुर्यात् । एवं भगवतः केवलिनः योगत्रयस्य सद्भावात् योगेन सह वर्तते इति सयोगी, यद्वा योगो वीर्यपरिस्पन्द इति सुप्रसिद्धम्, सह योगेन वर्तन्त इति सयोगा मनो-वाक्कायाः, ते सन्त्यस्येति सयोगी, **"अतोऽनेकस्वरात्"** (सिद्धहेम०७-२-६) इत्यनेन सूत्रेण इन्प्रत्ययः । सयोगिनो गुणस्थानकं सयोगिगुणस्थानकम्, तत् क्षीणघातिकर्मा लभते । ननु सयोगिगुणस्थानकं लभमानः पुनः किमासादयति ? इत्यत आह-**'लहइ'**इत्यादि, 'लभते' आसादयति केवलं ज्ञानं तथा केवलं दर्शनं निरन्तरायं च वीर्यमनन्तम्, तथाशब्द-चकारशब्दौ समुच्चयार्थौ, अनन्तपदं च **अन्त्यदीपकन्यायेन** प्रत्येकमभिसम्बध्यते, ततश्चायमर्थः-अनन्त-केवलज्ञानमनन्तकेवलदर्शनं निरन्तरायञ्चाऽनन्तवीर्यं प्राप्तसयोगिकेवलिगुणस्थानकोऽश्नुत इति । उक्तं च **तत्त्वार्थसूत्रवृत्तौ** श्रीमद्भिः **सिद्धसेनगणिपादैः**—

**"तस्य हि तस्मिन् समये केवलमुत्पद्यते गततमस्कम् ।**
**ज्ञानं च दर्शनं चावरणद्वयसङ्क्षयाच्छुद्धम् ॥१॥**

**वीर्यं निरन्तरायं भवत्यनन्तं तथैव तस्य तदा ।**
**कल्पातीतस्य महात्मनो-ऽन्तरायक्षयः कार्त्स्न्यात् ॥२॥"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदानीं च मूलकर्मा-ऽपेक्षया चत्वार्यघातिकर्माण्युत्तरकर्मा-ऽपेक्षया तु पञ्चनवतिः कर्माणि जरद्वस्त्रकल्पानि जायन्ते । प्राप्तकेवलज्ञानकेवलदर्शनो भगवान् त्रिकालसहितं सर्वलोकालोकं युगपत् पश्यति । यदवादि **तत्त्वार्थसूत्रवृत्तौ**—

**चित्रं चित्रपटनिभं त्रिकालसहितं ततः सलोकमिमम् ।**
**पश्यति युगपत्सर्वं सालोकं सर्वभावज्ञः ॥१॥"** इति

तथैवावश्यकाऽनियुक्त्यामपि—

**"संभिन्नं पासंतो लोगमलोगं च सव्वओ सव्वं ।**
**तं नत्थि जं न पासइ, भूयं भव्वं भविस्सं च ॥१॥"** इति ।

स च भगवान् केवलज्ञानेन सर्वं जानीत इति सर्वज्ञ उच्यते, केवलदर्शनेन सर्वं पश्यतीति सर्वदर्शी भण्यते, यदुक्तं **वाचकमुख्यैः श्रीप्रशमरतौ**—

**"कृत्स्ने लोकालोके व्यतीतसाम्प्रतभविष्यतः कालान् ।**
**द्रव्य-गुण-पर्यायाणां ज्ञाता द्रष्टा च सर्वार्थैः ॥१॥"** इति ।

सयोगिगुणस्थानकप्रथमसमये महात्मनः केवलज्ञानोपयोगो भवति, द्वितीयसमये केवलदर्शनोपयोगः, तृतीयसमये पुनः केवलज्ञानोपयोगः, चतुर्थसमये केवलदर्शनोपयोगः, एवंक्रमेण ज्ञानदर्शनोपयोगौ परावर्तेते ।

अथ केवलज्ञानादीनां स्वरूपं किञ्चिदुच्यते–केवलम्=असहायं=मत्यादिज्ञानरहितम् , ज्ञानं= संवेदनम् , केवलं च तज्ज्ञानं चेति केवलज्ञानम् , तच्चानन्तम् , अपर्यवसानत्वादनुच्छेदित्वाच्च । यद्वा सर्वजीवाजीवादिद्रव्याणां प्रयोगविस्रसोभयजन्योत्पादव्ययध्रौव्यादिपर्यायाणां भावस्य परिच्छित्तेः कारणं केवलज्ञानं भवति, क्षेत्रादीनामपि द्रव्यत्वात् केवलज्ञानं सर्वद्रव्य-क्षेत्र-काल-भावपरिच्छेदकं भवति । इत्थं च ज्ञेयस्या-ऽऽनन्त्यात् केवलज्ञानमप्यनन्तं सुनिश्चितं भवति । तच्च शाश्वतमप्रतिपाति च, तत्र शश्वद् भवं शाश्वतम् , सदोपयोगवदित्यर्थः, प्रतिपतनशीलं प्रतिपाति, न प्रतिपाति=अप्रतिपाति, सदा-ऽवस्थायीत्यर्थः । उक्तं चागमे–**"तं चेव केवलणाणं सव्वदव्वाणं परिणामस्स सव्वभावाणं च परिणामस्स विन्नत्तिकारणं भवति, एगगहणे तज्जातीयाणं सव्वेसिंति काऊण दव्वभावग्गहणेण सव्वखेत्तपरिणामस्स सव्वकालपरिणामस्स य दोण्ह वि विन्नत्तिकारणं भवति । जम्हा य सव्वदव्व-खेत्त-काल-भावाणं चउण्ह वि सव्वपरिणामाणं विन्नत्तिकारणं भवति । अतो तं केवलणाणं अणंतं दट्ठव्वं ति । तत्थ दव्वपरिणामो णाम–दव्वं दुविहं भवति । तं जहा-जीवदव्वं अजीवदव्वं च,**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तस्स दुविहस्सावि दव्वस्स जो उप्पायट्ठितिभंगेहिं पज्जायभावो सो दव्वपरिणामो भन्नति, तत्थ खेत्तगहणेण आगासत्थिकायस्स गहणं कयं, तस्स खेत्तपरिणामो परपच्चइओ पोग्गलत्थिकायादिणो दव्वे पडुच्च भवतीति तत्थ कालपरिणामो णाम समयावलियमुहुत्तादी अणेगभेदो भवति, भावपरिणामो णाम एगगुणकालादो अणेगभेदो दट्ठव्वो त्ति । एतेसिं चउण्ह वि दव्व-खेत्त-काल-भावाणं जो परिणामो, तस्स सव्वपरिणामस्स विन्नत्तिकारणमणंतं केवलणाणं भवतीति । तत्थ विन्नत्तिकरणं विन्नत्तिकारणं वा, जाणितव्वगसामत्थजुत्तं ति वा, विन्नत्तिहेउभूयं ति वा एगट्ठा, जहा य केवलणाणं भवति, तहा सासतं अपडिवादो एगविहं च भवति । तत्थ एगविहं णाम आभिणिबोहियनाणादिभेदविउत्तं ति वुत्तं भवति ।"** इति ।

एवं केवलदर्शनमपि प्रतिपादनीयम् ।

न च ज्ञानदर्शनयोरेकतरोपयोगेन सकललोकालोकप्रत्यक्षसंभवेऽन्यस्य वैयर्थ्यापत्तिरिति वाच्यम् , आगमग्रन्थेषूपयोगद्वयस्य ज्ञानदर्शनलक्षणस्य क्रमेण प्रतिपादितत्वात् । उक्तं च—

**केवलनाणुवउत्ता जाणंती सव्वभावगुणभावे ।**
**पासंति सव्वओ खलु केवलदिट्ठी हिऽणंताहिं ॥१॥"** इति ।

अनन्तवीर्यस्योपलक्षणत्वाद् अनन्तदान-लाभ-भोगोपभोगलब्धय आविर्भवन्तीत्युपलक्ष्यते, दानान्तरायाणां संक्षीणत्वात् ।

ईर्यापथिककर्मबन्धस्तु क्षीणकषायवद् भवति ।

अर्हद्भक्तिप्रमुखविंशतिपुण्यस्थानविशेषाऽऽराधनाद् येन प्राक् तीर्थकृन्नामकर्म समुपार्जितम् , तस्य निरुक्तनामकर्मण उदयो भवति, तदुदयाच्च भूमिमस्पृशन् कनककमले स्वपादौ निदधत् सुरासुरनरेन्द्रैः स्तूयमानश्चतुस्त्रिंशदतिशयसमन्वितोऽष्टमहाप्रातिहार्यश्रीयुक्तः पृथ्वीतले धर्मतीर्थं प्रवर्तयन् सद्देशनाभिश्च तीर्थकृन्नामकर्म वेदयन् विहरति । उक्तं च **गुणस्थानकक्रमारोहे**—

**"स सर्वातिशयैर्युक्तः, सर्वामरनरैर्नतः ।**
**चिरं विजयते सर्वोत्तमं तीर्थं प्रवर्तयन् ॥१॥**
**वेद्यते तीर्थकृत्कर्म, तेन सद्देशनाभिः ।**
**भूतले भव्यजीवानां प्रतिबोधादि कुर्वता ॥२॥"** इति ।

सयोगिगुणस्थानकप्रथमसमये तीर्थकृत्कर्मण उत्कृष्टस्थित्युदयोदीरणे भवतः ॥२३०॥

अथ त्रयोदशगुणस्थानकस्य कालं गुणश्रेणिं च प्रदर्शयितुकाम आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हस्सो भिन्नमुहुत्तं जेट्ठो देसूणपुव्वकोडी से ।**
**कालो अवट्ठिया गुणसेढी आयोजिकाअ परि ॥२३१॥**

ह्रस्वो भिन्नमुहूर्तं ज्येष्ठो देशोनपूर्वकोटिस्तस्य ।
कालोऽवस्थिता गुणश्रेणिरायोजिकायाः परि ॥२३१॥ इति पदसंस्कारः ।

'**हस्सो**' इत्यादि, 'ह्रस्वः' जघन्यो 'भिन्नमुहूर्तम्' अन्तर्मुहूर्तम् 'ज्येष्ठः' उत्कृष्टो 'देशोनपूर्वकोटिः' साधिकाऽष्टवर्षन्यूनपूर्वकोटिवर्षप्रमाणो भवति । कः? इत्याह—'**से कालो**' त्ति 'तस्य' लब्धसयोगीगुणस्थानस्य कालः । भावार्थः पुनरयम्—यथाऽपूर्वकरणगुणस्थानकवर्ती जघन्यत एकसमयं संयतत्वेन स्थित्वा पञ्चत्वं गच्छति, न तथा प्राप्तसयोगिगुणस्थानकः, किन्तु जघन्यतोऽन्तर्मुहूर्तं सयोगित्वेन स्थित्वाऽयोगिगुणस्थानकं सम्प्राप्य निर्वाणमेति । तेन सयोगिगुणस्थानकस्य जघन्यकालोऽन्तर्मुहूर्तं भवति । यः पूर्वकोटिवर्षायुष्को सप्तमासाऽभ्यधिकवर्षाष्टके प्राप्तसंयमः क्षपकश्रेणिमारोहति, सोऽन्तर्मुहूर्तकालेन सयोगिगुणस्थानकं समासाद्योत्कृष्टतो देशोनपूर्वकोटिवर्षाणि तत्र तिष्ठति, ततः शैलेशीं प्रतिपद्य निःश्रेयसमश्नुते । एवं सयोगिगुणस्थानकस्योत्कृष्टकालः साधिकवर्षाष्टकन्यूनपूर्वकोटिवर्षप्रमाणो लभ्यते ।

सम्प्रति सयोगिगुणस्थानके गुणश्रेणिं प्रपञ्चयति—'**अवट्ठिया**'इत्यादि, 'अवस्थिता' प्रदेशाग्रमाश्रित्य कालं च प्रतीत्याऽवस्थिता गुणश्रेणिर्भवति । किं सर्वत्र सयोगिगुणस्थानकेऽवस्थिता गुणश्रेणिर्भवति ? इति चेत् , न, किंतर्हि ? इत्याह—'**आयोजिकाअ परि**' त्ति 'आयोजिकायाः परि' परिशब्देन वर्ज्यवर्जकभावसम्बन्धो द्योत्यते । तेन आयोजिकाशब्दात् "**पर्यपाभ्यां वर्ज्ये**" (सिद्धहेम०२-२-७१) इत्यनेन सूत्रेण पञ्चमी विभक्तिः, आयोजिकां वर्जयित्वेत्यर्थः, वक्ष्यमाणाऽऽयोजिकाकरणात् प्राक् सर्वत्र सयोगिगुणस्थानके गुणश्रेणिरवस्थिता भवतीति फलितार्थः । इदमत्र हृदयम्—सयोगिकेवलिगुणस्थानकप्रथमसमयतः प्रभृति क्षीणकषायगुणस्थानकगुणश्रेण्यपेक्षया संख्येयगुणहीनः सयोगिकेवलिगुणश्रेणिनिक्षेपो भवति । स चाऽवस्थितः,पूर्वपूर्वसमये क्षीणे उपर्युपरि वर्धनात् । तदेवं कालतोऽवस्थिता गुणश्रेणिः । तथा सयोगिप्रथमसमये क्षीणकषायगुणश्रेण्यां परिणमनाय गृहीतदलतोऽसंख्येयगुणं दलं गृह्णाति, छद्मस्थपरिणामतः केवलिपरिणामानां विशुद्धतमत्वेनेव क्षीणकषायगुणश्रेणितः सयोगिगुणस्थानकगुणश्रेणेः शास्त्रेऽसंख्येयगुणत्वप्रतिपादनात् । दलञ्च गृहीत्वा गुणश्रेणिशिरो यावदसंख्येयगुणक्रमेण प्रक्षिपति । द्वितीयसमयेऽपि तावदेव दलं गृहीत्वा गुणश्रेणिशिरो यावदसंख्येयगुणक्रमेण दलं प्रक्षिपति, परिणामानामवस्थितत्वात् । एवं प्रतिसमयं तावदेव दलं गृहीत्वा गुणश्रेणिशिरो यावदसंख्येयगुणक्रमेण निक्षिपति । एवं गुणश्रेण्यर्थं प्रतिसमयं दलिकमवस्थितं तावद् गृह्णाति, यावदायोजिकाकरणं नारभते । तेन दलिकाऽपेक्षया सयोगिगुणस्थानगुणश्रेणिरायोजिकाकरणतः प्रागवस्थिता भवति ॥२३१॥

नन्वायोजिकाकरणं कदा करोति ? इत्यत आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आयोजिगाकरणमाउगम्मि अंतोमुहुत्तसेसम्मि ।**
**करए अहवा आवस्सयकरणमवस्सकरणं वा ॥२३२॥**
**आवज्जियकरणं वा-ऽऽवज्जीकरणं तओ समुग्घायं ।**
**कुणए जस्साउत्तो तईआईइं पहूआइं ॥२३३॥**

आयोजिकाकरणमायुष्यन्तमुहूर्तशेषे ।
करोत्यथवा-ऽऽवश्यककरणमवश्यकरणं वा ॥२३२॥
आवर्जितकरणं वा-ऽऽवर्जीकरणं ततः समुद्घातम् ।
करोति यस्यायुस्तस्तृतीयादीनि प्रभूतानि ॥२३३॥ इति पदसंस्कारः ।

**'आयोजि०'** इत्यादि, तत्रा-ऽन्तमुहूर्तशेष आयुष्यायोजिकाकरणं करोति, अयम्भावः–सर्वोऽपि केवली भगवान् जघन्यतो-ऽन्तमुहूर्तकालमुत्कृष्टतश्च देशोनपूर्वकोटिवर्षप्रमाणं कालं विहृत्य स्वायुष्यन्तमुहूर्तमात्रे शेष आन्तर्मौहूर्तिकमायोजिकाकरणमुदयावलिकायां कर्मपुद्गलनिक्षेपव्यापाररूपमुदीरणाविशेषात्मकमारभते । इयमत्र व्युत्पत्तिः–आ-मर्यादया योजनं-केवलिदृष्ट्या शुभानां योगानां व्यापार इत्यायोजिका, **"भावे"** (सिद्धहेम०५-३-१२२) सूत्रेण भावे णकप्रत्ययः, आयोजिकायाः करणमित्यायोजिकाकरणम् । उक्तं च **श्रीमन्मलयगिरिपादैः**–"**इह सर्वोऽपि सयोगिकेवली समुद्घातादर्वाक् आयोजिकाकरणमान्तमुहूर्तिकमुदयावलिकायां कर्मपुद्गलप्रक्षेपव्यापाररूपमुदीरणाविशेषात्मकमारभते । अथ आयोजिकाकरणमिति कः शब्दार्थः ? उच्यते, आङ् मर्यादायाम्, आ-मर्यादया केवलिदृष्ट्या योजनं व्यापारणं, शुभानां योगानामिति गम्यते, आयोजिका, तस्याः करणमायोजिकाकरणम् ।**" इति ।

**'अहवा'** इत्यादि, अथवाशब्दो मतान्तरद्योतकः, अथवा-ऽन्ये प्राहुः-स्वायुष्यन्तमुहूर्तशेषे केवली भगवान् आवश्यककरणं करोतीति । कः शब्दार्थः ? उच्यते-अवश्यंभावः=आवश्यकम्, **"चोरादेः"** (सिद्धहेम०७-१-७३) इति सूत्रेण भावे अकञ्प्रत्ययः, आवश्यकेन=अवश्यंभावेन करणमित्यावश्यककरणम् , यथा लोके साटकेन कक्षां बद्ध्वा ततः परं कृतावश्यककक्षाबन्धकरणो योद्धुमुपक्रमते तथा-ऽन्तमुहूर्तायुःशेषेण सर्वकेवलिना सिध्यता प्रथममेवेदं करणमवश्यं कर्तव्यमित्यावश्यककरणम् । यदुक्त**मावश्यकचूर्णौ**–"**सर्वे च भगवन्तः केवलिनस्तीर्थकराश्च नियमादावश्यकरणं कुर्वन्ति ।**" इति ।

'अवश्यकरणं वा' वाशब्दो मतान्तरद्योतकः, एवमग्रे ऽपि, अथवैके भणन्ति–सयोगीकेवली भगवानन्तमुहूर्तप्रमाण आयुषि शेषे-ऽवश्यकरणं करोतीति, सर्वकेवलिभिः सिद्ध्यद्भिरवश्यंक्रियमाणत्वादवश्यकरणमिति व्यपदिश्यते, अवश्यंक्रियत इत्यवश्यकरणमिति व्युत्पत्तेः । अभ्यधायि चाऽऽ-**वश्य-**

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कचूर्णौ–"स्वोपात्तमनुष्यायुषोऽन्तःप्रक्षयवशाद् भुक्तस्या-ऽन्तर्मुहूर्तशेषे सिध्यत्पर्यायाभिमुखा अवश्यकरणं कुर्वन्तीति। कथमिदमवश्यकरणमिति प्रश्ने, प्रदर्श्यते–अन्वर्थत्वादवश्यकरणसंज्ञायाः भास्करवत्, अवश्यकरणीयत्वादवश्यकरणम्। कथमियमन्वर्थेति दश्यते–अर्थमनुगता या संज्ञा सा-ऽन्वर्था, अर्थमङ्गीकृत्य प्रवर्तत इत्यर्थः। कथम्? इह यथा भास्करसंज्ञा अन्वर्था, कथमन्वर्था? भासं करोतीति भास्करः इति यो भासनार्थः, तमङ्गीकृत्य प्रवर्तते इत्यन्वर्था, तथा-ऽवश्यकरणमिति इयं संज्ञा अन्वर्था, कथमिति चेत्, ब्रूमहे- अवश्यंक्रियते इत्यवश्यकरणं इति योऽवश्यकरणार्थोऽवश्यकर्तव्यता, तमङ्गीकृत्य प्रवर्तते, यस्मात्, तस्मात् सर्वकेवलिभिः सिद्धयद्भिरवश्यं क्रियमाणत्वादवश्यकरणमित्यन्वर्थसंज्ञासिद्धिः।" इति।

'आवज्जि०' इत्यादि, तत्र 'वा' अथवा परे भणन्ति-'आवर्जितकरणं' करोतीति। नन्वावर्जितकरणं कुतो व्यपदिश्यते? इति चेत्, उच्यते–आवर्जितस्य=तथाभव्यत्वेन मोक्षगमनं प्रत्यभिमुखीकृतस्य करणं=शुभयोगव्यापारणमित्यावर्जितकरणम्। यदवादि कषायप्राभृतचूर्णौ–"अंतोमुहुत्ते आउगे सेसे तदो आवज्जिदकरणे कदे तदो केवलिसमुग्घादं करेदि।" इति। तथैवावश्यकवृत्तावपि–"केचिदावर्जितकरणमित्याहुः। अयं शब्दार्थः–आवर्जितः=अभिमुखीकृतः। आवर्जितस्य=तथाभव्यत्वेन मोक्षगमनं प्रति अभिमुखीकृतस्य करणं=क्रिया=शुभयोगव्यापारणम् आवर्जितकरणम्।" इति।

'आवर्जीकरणम्' काकाक्षिगोलकन्यायेन वाशब्दोऽत्राऽऽपि सम्बध्यते, वा=अथवा विशेषावश्यकभाष्यकारादयो हरिभद्रसूरिपादादयश्च भणन्ति–केवली भगवानन्तर्मुहूर्तमात्र आयुषि शेष आवर्जीकरणं करोतीति। उक्तञ्च भाष्यकृद्भिः—

"तत्थाउयसेसाहियकम्मसमुग्घायणं समुग्घाओ।
तं गन्तुमणो पुव्वं आवज्जीकरणमब्भेइ ॥१॥" इति।

एवं श्रीमद्हरिभद्रसूरिपादैरप्यावश्यकवृत्तौ–"इह समुद्घातं प्रारभमाणः प्रथममेवा-ऽऽवर्जीकरणमभ्येति।" इति। नन्वावर्जीकरणं कुतो व्यवह्रियते? इति चेत्, भण्यते-आवर्जनम्=आवर्जः, आपूर्वकाद् वर्जिधातोर्भावे घञ्प्रत्ययः, आत्मानं प्रति मोक्षस्या-ऽभिमुखीकरणम्=आत्मनो मोक्षं प्रत्युपयोग इत्यर्थः, मया-ऽधुनेदं कर्तव्यमित्येवंरूपः, यद्वा आवर्ज्यते=अभिमुखीक्रियतेऽनेनेत्यावर्जः, उदयावलिकायां कर्मप्रक्षेपरूपो व्यापार इत्यर्थः, यदुक्तं भाष्यकृद्भिः–

आवज्जणमुवओगो वावारो वा तदत्थमाईए।
अंतोमुहुत्तमेत्तं काउं कुरुए समुग्घायं ॥१॥" इति।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

आवर्ज्यो वा घ्यण्प्रत्ययान्तशब्दः, तदर्थस्तु मोक्षं प्रत्यभिमुखीकर्तव्य इति, अनावर्जस्या-ऽनावर्ज्यस्य वा-ऽऽवर्जस्या-ऽऽवर्ज्यस्य वा करणम्, अभूततद्भावविवक्षायां "**कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्त्वे च्विः** (सिद्धहेम० ७-२-१२६) इत्यनेन च्विप्रत्यये सत्यावर्जीकरणमिति।

नन्वावर्जीकरणशब्दव्युत्पत्त्यवसरे आवर्जः=उदयावलिकायां कर्मप्रक्षेपरूपव्यापार इत्युक्तम्, तच्चा-ऽयुक्तम्, आवर्जीकरणात्पूर्वमप्युदीरणायाः प्रवर्तमानत्वेनोदयावलिकायां कर्मप्रक्षेपरूपव्यापारस्य पूर्वमपि प्रवृत्तत्वेन विशेषाभावादिति चेत्, उच्यते–सत्यमेतद्, किन्त्वावर्जीकरणात्पूर्वं या प्रदेशोदीरणा भवति, सा स्तोका भवति, आवर्जीकरणे त्वधिका। कथमेतदवसीयते ? इति चेत्, उच्यते-**कर्मप्रकृतिचूर्णिकारै**स्तीर्थकृन्नामकर्मणो जघन्यप्रदेशोदीरणा-ऽऽवर्जीकरणात् प्राग् दर्शिता। अक्षराणि त्वेवम्–"**तित्थकरनामाए पढमसमते केवलिमादिकाउं जाव आजोजीकरणस्स अकारगो ताव जहण्णपदेसुदीरणा।**" इति। तेन ज्ञायते-आवर्जीकरणे प्रदेशोदीरणा विशिष्टा जायत इति। ततश्चोदयावलिकायां कर्मप्रक्षेपरूपव्यापारस्य पूर्वं सत्त्वे-ऽप्यावर्जीकरणाऽवस्थायां शुभयोगव्यापारविशेषेण विशिष्टप्रदेशोदीरणायाः सद्भावात् समस्ति विशेषो-ऽत्र। अस्ति च सयोगिकेवलिनो-ऽपि विशुद्धितारतम्यहेतुः शुभयोगव्यापारविशेषः। न च सयोगिकेवल्यादीनां वीतरागाणामेकस्यैव संयमस्थानस्य तत्र तत्र प्रतिपादनादावर्जीकरणे विशुद्धितारतम्यमसिद्धमिति वाच्यम्, संयमस्थानस्यैकत्वेन तदाश्रितविशुद्धितारताम्यस्या-ऽभावेऽपि शुभयोगव्यापारविशेषाधीनस्य तस्या-ऽक्षतत्वस्या-ऽभ्युपगमनीयत्वात्, सयोगिकेवलिनो हि विशुद्धेः सदैकरूपत्वाऽभ्युपगमे तु तच्चरमसमये मनुष्यगत्यादीनां द्वाषष्टिप्रकृतीनामुत्कृष्टप्रदेशोदीरणा नोपपद्येत, अपि तु सर्वदैव सयोग्यवस्थायां सम्पद्येत, विशुद्धेरविशेषत्वाभ्युपगमात्। तच्च नेष्टम्, यतो विशुद्धिविशेषमाश्रित्य सयोगिकेवलिचरमसमय एव मनुष्यगत्यादीनामुत्कृष्टप्रदेशोदीरणा तत्र तत्र प्रतिपाद्यते। तथा चोक्तं **श्रीकर्मप्रकृतिवृत्तौ–"सयोगीकेवली 'अन्ते'–चरमसमये, उदीरको यासां ता योग्यन्तोदीरकास्तासां–मनुजगतिपञ्चेन्द्रियजात्यौदारिकसप्तकतैजससप्तकसंस्थानषट्कप्रथमसंहननवर्णादिविंशत्यगुरुलघूपघातपराघातविहायोगतिद्विकत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभसुभगादेययशःकीर्त्तिनिर्माणतीर्थकरोच्चैर्गोत्राणां द्विषष्टिसंख्यानां प्रकृतीनां सयोगिकेवली चरमसमये उत्कृष्टप्रदेशोदीरकः। तथा केवलिनः स्वरद्विकप्राणापानयोः 'निजकान्ते'–स्वस्वनिरोधकाले उत्कृष्टा प्रदेशोदीरणा। तथाह–स्वरनिरोधकाले सुस्वरदुःस्वरयोः, प्राणापाननिरोधकाले च प्राणापाननाम्न उत्कृष्टा प्रदेशोदीरणा। इह सर्वकर्मणामुत्कृष्टप्रदेशोदीरणायामेषा परिभाषा–यो यः स्वस्वोदीरणाधिकारी, स तस्य कर्मणः सर्वविशुद्ध उत्कृष्टप्रदेशोदीरणास्वामी वेदितव्यः।"** इति। तदेवं सयोगिनो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशुद्धितारतम्यहेतोः शुभयोगव्यापारविशेषस्य सिद्धौ शुभयोगव्यापारविशेषादावर्जीकरणे विशिष्टा प्रदेशोदीरणा निराबाधा सिध्यति। ततश्च युज्यत एव निरुक्त आवर्जशब्दार्थः।

नन्वेवं तर्ह्यावर्जीकरणं कुर्वन्नुदयावलिकायां कर्मदलं क्षपयति, ततश्चैवा-ऽऽयुषा सह समानानि शेषकर्माणि भविष्यन्ति, किं वक्ष्यमाणेन समुद्घातेनेति वाच्यम्, आवर्जीकरणे विशिष्टप्रदेशोदीरणासद्भावे-ऽपि तादृशविशिष्टस्थितिघातादीनां समुद्घातेन विना-ऽनुपपत्तेः।

इदं चा-ऽऽवर्जीकरणमान्तमुहूर्तिकं भवति, यदुक्तं **श्रीप्रज्ञापनासूत्रे–"कइसमइए णं भंते ? गोयमा ! असंखेज्जसमइए अंतोमुहुत्तिए आउज्जीकरणे पन्नत्ते।"** इति।

न च **प्रज्ञापनादिष्वावर्जीकरणस्य** कालोऽभिहितः, किन्तु य आचार्या आयोजिकाकरणादिकं करोतीति ब्रुवते, तेषां मतेना-ऽऽयोजिकाकरणादिकालः कियद्भवति ? इति न निश्चीयत इति वाच्यम्, शब्दभेदेन भेदेऽप्यर्थभेदाऽभावात्। न च **"तं गंतुमणो पुव्वं आवज्जीकरणमब्भेइ।"** इति वचनात् केवलिसमुद्घातकारिण एव जीवस्या-ऽऽवर्जीकरणं भवति, न त्वन्येषां जीवानामिति समस्त्यर्थभेदोऽपीति वाच्यम्, तादृशवाक्यानां तादृशनियमपरत्वे मानाऽभावात्, प्रत्युत–ननु यदि सर्वोऽपि केवल्यावर्जीकरणं कुरुते, तर्हि समुद्घातस्य कारकः किं पूर्वमावर्जीकरणं कुरुते, उत समुद्घातमित्याशङ्काव्युदासाय समुद्घातात् प्रागावर्जीकरणं करोतीति नियमप्रदर्शनपरत्वस्य तादृशवाक्यानां समर्थनीयत्वात्।

निरुक्तकरणप्रथमसमये नाम-गोत्र-वेदनीयानां प्रदेशाग्रमुत्कीर्योदयनिषेके स्तोकं निक्षिपति। ततो द्वितीयनिषेके-ऽसंख्येयगुणं प्रदेशाग्रं प्रक्षिपति। एवं तावद्वक्तव्यम्, यावत् शेषसयोगिगुणस्थानकाला-ऽयोगिगुणस्थानकालतो विशेषाधिके काले गुणश्रेणिशिरः प्राप्यते। अयं च गुणश्रेणिनिक्षेपः प्राक्प्रतिपादितसयोगिगुणश्रेणिनिक्षेपतः प्रदेशाग्रमाश्रित्या-ऽसंख्येयगुणम्, कालं प्रतीत्य पुनः संख्यातगुणहीनो भवति, यतः सयोगिगुणश्रेणितो-ऽयोगिगुणश्रेणिः प्रदेशानश्रित्या-ऽसंख्येयगुणा, कालं प्रतीत्य पुनः संख्यगुणहीना भवति। गुणश्रेणिशिरस्तः परमुपरितन एकस्मिन्निषेकेऽसंख्यातगुणं दलं प्रक्षिपति, तत उर्ध्वं विशेषहीनक्रमेण प्रक्षिपति। एवमयोगिगुणस्थानकस्य गुणश्रेणिं निरुक्तकरणकाले विरचयति, अयोगिगुणस्थानके तु केवलं प्रतिसमयमसंख्येयगुणं निर्जरयति। यदुक्तं **प्रज्ञापनावृत्तौ श्रीमद्धरिभद्रसूरिपादैः–तेषु च शैलेषोसमयेषु 'पुव्वरइयं च णं कम्मं' ति आउज्जोकाले चेव गुणसेढी करेत्ति।"** इति।

उक्तकरणं विधाय केवलिसमुद्घातमारभते, तं विवर्णयिषुराह–**'तओ'** इत्यादि, 'ततः' उक्तकरणसम्पादनानन्तरं सयोगिकेवली समुद्घातं करोति, कः ? इत्याह–**'जस्सा०'** इत्यादि, यस्य सयोगिकेवलिनः 'आयुष्टः' आयुष्ककर्मतः 'तृतीयादीनि' वेदनीयादीनि कर्माणि 'प्रभूतानि' अधिकस्थितिकानि भवन्ति, स समुद्घातं करोति, न त्वायोजिकाकरणवत् सर्वे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलिनः । ननु समुद्घात इति कः शब्दार्थः ? इति चेत्, उच्यते-सम्यक्=अपुनर्भावेन उत्=प्राबल्येन घातो=वेदनीयादीनां कर्मणां हननं=विनाशो यस्मिन् प्रयत्नविशेषे, स समुद्घात इत्युच्यते,अथ व्युत्पत्त्यन्तरं दर्श्यते–सं=सामस्त्येन उत्=प्राबल्येन घातो=हननं=शरीराद् बहिर्जीवप्रदेशानां निस्सारणमिति समुद्घातः, "हनंक् हिंसागत्योः" इति हन्धातोर्गत्यर्थकत्वाद् निस्सारणस्य चा-ऽपि गतिविशेषत्वात् । अयं भावः–प्रभूतस्थितिकस्य वेदनीयादेरायुषा सह समीकरणार्थं जीवप्रदेशानामूर्ध्वमधस्तिर्यक् शरीराद् बहिर्निस्सारणं समुद्घात उच्यत इति यावत्, यथा चा-ऽऽर्द्रशाटिका विस्तारिता सती क्षिप्रं शुष्यति, तथैव विस्तारितानां जीवप्रदेशानां कर्मोदकं शीघ्रं शुष्यति, यदुक्तं **श्रीभद्रबाहुस्वामिभिः—**

**"नाऊण वेअणिज्जं अइबहुअं आउअं च थोवागं ।**
**गंतूण समुग्घायं खवंति कम्मं निरवसेसं ॥१॥**
**जह उल्ला साडोआ आसुं सुक्कइ विरल्लिआ संती ।**
**तह कम्मलहुअसमए वच्चंति जिणा समुग्घायं ॥२॥"** इति ।

तथैवाऽऽवश्यकचूर्ण्यामपि–**"सिग्घं कम्मं खविज्जति तो समुग्घाओ समो आयुषो कर्मणां उद्घातः समुद्घातः, सव्वे जीवपदेशे विसारेति ।"** इति । एवमन्यत्राऽप्युक्तम्—

**"आयुषि समाप्यमाने शेषाणां कर्मणां समाप्तिः ।**
**न स्यात् स्थितिवैषम्याद् गच्छति ततः समुद्घातम् ॥१॥**
**स्थित्या च बन्धनेन च समीक्रियार्थं हि कर्मणां तेषाम् ।**
**अन्तर्मुहूर्तशेषे तदा-ऽऽयुषि समुज्जिघांसति सः ॥२॥**
**आर्द्रं विरल्लितं सद् वस्त्रं मङ्क्ष्वेव ननु विनिर्वाति ।**
**संवेष्टितं तु न तथा, तथा हि कर्मणां मूर्त्तत्वात् ॥३॥"**
**स्नेहक्षयसाम्यात् (स्थितिबन्धहेतुर्हि) स्नेहः स च हीयते समुद्घातात् ।**
**क्षीणस्नेहं शटति हि, भवति तदल्पस्थिति च शेषम् ॥४॥**
**आयुष्कस्या-ऽपि विरल्लितस्य न ह्रास्यते स्थितिः कस्मात् ।**
**इति वा चोद्यं चरमशरीरो-ऽनुपक्रमायुर्यत् कङ्कुकवत् ॥५॥"** इति ।

येषां महात्मनामायुष्ककर्मतो वेदनीयमधिकस्थितिकं भवति, ते नियमात् समुद्घातं कुर्वन्ति,येषां पुनरायुष्ककर्मणा सह स्वभावत एव समस्थितिकानि वेदनीयादिकानि कर्माणि जायन्ते, ते समुद्घातं न कुर्वन्ति । न्यगादि चाऽऽवश्यकचूर्णौ–**"येषां बहु सद्वेद्यमस्ति, आयुश्चाल्पमवतिष्ठते, ते नियमात्समुद्घातं कुर्वन्ति नेतर इति ।"** अतीतकालेऽनन्तकेवलिनः समुद्घातमकृत्वा सिद्धिं प्राप्ताः, यदुक्तं **प्रज्ञापनासूत्रे—**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जस्साउएण तुल्लाणिं बन्धणेहिं ठितीहि य ।
भवोवग्गहकम्माइं समुग्घायं से ण गच्छइ ॥१॥
अगंतूणं समुग्घातं अणंता केवली जिणा ।
जरमरणविप्पमुक्का सिद्धिं वरगइं गया ॥२॥" इति ।

अत्र बध्यन्त इति बन्धनानि "भुजिपत्यादिभ्यः कर्मापादाने"(सिद्धहेम०५-३-१२८) इत्यनेन कर्मणि अनप्रत्ययः, कर्मपुद्गला इत्यर्थः, तैः, शेषं सुगमम् ।

उक्तञ्च वाचकमुख्यैरपि–"यस्य पुनः केवलिनः कर्म भवत्यायुषोऽतिरिक्ततरम् ।
स समुद्घातं गतवानथ गच्छति तत्समीकर्तुम् ॥१॥" इति ।卐

तत्राप्यावश्यकचूर्णिकाराभिप्रायेण येषां महात्मनामन्तर्मुहूर्तात्प्रभृति षण्मास आयुषि शेषे केवलज्ञानमुत्पन्नम्, ते नियमात् समुद्घातमारभन्ते, शेषास्तु विभाषया, केचिदारभन्ते, केचिद् नेत्यर्थः, यद्वा शेषा ना-ऽऽरभन्त इत्यर्थः । उक्तं चाऽऽवश्यकचूर्णौ–"येऽन्तर्मुहूर्तमादिकृत्वोत्कर्षेण आ मासेभ्यः षड्भ्य आयुषो-ऽवशिष्टेभ्यः अभ्यन्तरे आविर्भूतकेवलपर्यायाः, ते नियमात्समुद्घातं कुर्वन्ति, ये तु षण्मासेभ्यः उपरिष्टादाविर्भूतकेवलज्ञानाः शेषास्ते समुद्घातकाद्[समुद्घातकरणाद्]बाह्याः, ते समुद्घातं न कुर्वन्तीत्यर्थः, अथवा-ऽयमर्थः–शेषाः समुद्घातं प्रति भाज्याः, कस्मात् ? यस्मात् षाण्मासिका-ऽवशिष्टे आयुषि आविर्भूतकेवलज्ञानपर्यायेभ्यः केवलिभ्यः सकाशात् षड्भ्यो मासेभ्यः ये उपरि समयोत्तरवृद्ध्या-ऽवशिष्टे आयुषि शेषे आविर्भूतकेवलिनः, ते शेषाः समुद्घातं प्रति भाज्याः । केचित्समुद्घातं कुर्वन्ति केचिन्नेति ।" तथैव गुणस्थानकक्रमारोहवृत्तावपि—

"तथैवाऽन्यत्रापि-'छम्मासाउसेसे, उत्पन्नं जेसिं केवलं नाणं ।
ते नियमा समुद्घाया सेसा समुग्घायभइयव्वा ॥१॥"❀

---

卐उक्तं च मूलाराधनाकारैरपि—"जेसिं आउसमाइं णामगोदाइ वेदणीयं च ।
ते अकदसमुग्घादा जिणा उवणमंति सेलेसिं ॥१॥
जेसिं हवंति विसमाणि णामगोदाउवेदणीयाणि ।
ते तु कदसमुग्घादा जिणा उवणमंति सेलेसिं ॥२॥
ठिदिसंतकम्मसमकरणत्थं सव्वेसिं तेसिं कम्माणं ।
अंतोमुहुत्तसेसे जंति समुग्घादाउम्मि ॥३॥" इति ।

❀ उक्तं च मूलाराधनाकारैरपि—"उक्कस्सएण छम्मासाउगसेसम्मि केवली जादा ।
वच्चंति समुग्घादं सेसा भज्जा समुग्घादे ॥१॥" इति ।

धवलाकारास्तु "यतिवृषभोपदेशात्सर्वघातिकर्मणां क्षीणकषायचरमसमये स्थितेः साम्याभावात् सर्वेऽपि कृतसमुद्घाताः सन्तो निवृत्तिमुपढौकन्ते । येषामाचार्याणां लोकव्यापिकेवलिषु विंशतिसंख्यानियमस्तेषां मतेन केचित् समुद्घातयन्ति केचिन्न समुद्घातयन्ति ।" इत्याहुः ।

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

गुणस्थानकक्रमारोहग्रन्थे तु—

"यः षण्मासाधिकायुष्को लभते केवलोद्गमम् ।
करोत्यसौ समुद्घातमन्ये कुर्वन्ति वा नवा ॥१॥" इत्युक्तम् । तच्च-मत्र केवलिनो बहुश्रुता वा विदन्ति ।

केचिदाहुः—जघन्यतो-ऽन्तर्मुहूर्तमात्र आयुषि शेष उत्कृष्टतः पुनः षण्मासप्रमाण आयुषि शेषे समुद्घातं करोतीति, तन्न समीचीनम्, यतो-ऽन्तर्मुहूर्तमात्र आयुषि शेष आयोजिकाकरणं कृत्वा समुद्घातमारभते, तेन समुद्घातप्रारम्भे तस्यायुः षण्मासमात्रं न संभवति । किञ्च भगवता-ऽऽर्यश्यामेन प्रज्ञापनायामायोजिकाकरणानन्तरं प्रातिहारिकपीठफलकादीनां प्रत्यर्पणमेवो-क्तम्, न तु ग्रहणम्, तेना-ऽन्तर्मुहूर्तमात्रशेषायुष्कः समुद्घातमारभते, न तु षाण्मासिकायुष्कः । यदि षट्सु मासेसु शेषेसु समुद्घातमारभेत, तर्हि षट्सु मासेसु कदाचिदपान्तराले वर्षाकाल-सम्भवात् तन्निमित्तं पीठफलकादीनामादानमप्युपपद्येत, न च तत्सूत्रसम्मतमिति कृत्वोत्कृष्टतः षण्मासेषु शेषेसु समुद्घातं करोतीति मतं निरस्तम् । उक्तं च भाष्यकारैः—

कम्मलहुआए समओ भिन्नमुहुत्तावसेसओ कालो ।
अन्ने जहन्नमेयं छम्मासुक्कोसमिच्छंति ॥१॥
तत्तोऽनंतरसेलेसीवयणओ जं च पाडिहारीणं ।
पच्चप्पणमेव सुए इहरा गहणं पि होज्जाहि ॥२॥" इति ।

इह कर्मलघुतानिमित्तं समुद्घातस्य समयः=अवसरो भिन्नमुहूर्त्तावशेषः कालः, शेषं सुगमम् ॥

ननु प्रभूतस्थितिकस्य वेदनीयादेरायुषा सह समीकरणार्थं समुद्घातारम्भ इति भवता यत् प्रोक्तम्, तदयुक्तम्, कृतनाशादिदोषप्रसङ्गात् । तद्यथा—प्रभूतकालोपभोग्यस्य वेदनीयादेः स्तोकेन कालेना-ऽपगमसम्पादनात् कृतनाशः, तथोपगमे च वेदनीयादिवच्च कृतस्या-ऽपि कर्म-क्षयस्य पुनर्विनाशसम्भवेन मोक्षे-ऽपि कर्मोत्पत्त्या ततः पुनश्च्युतिः प्रसज्येतेति चेत्, न, कृतनाशादिदोषा-ऽप्रसङ्गात्, तथाहि—यथा प्रतिदिवसं सेतिकापरिभोग्येन वर्षशतपरिभोग्य-स्य कल्पिताहारस्य भस्मकव्याधिना तत्सामर्थ्यतः स्तोकदिवसैर्निशेषतः परिभोगान्न कृतनाशो-पगमः, तथा कर्मणो-ऽपि वेदनीयादेस्तथाविधशुभाध्यवसायानुबन्धादुपक्रमेण साकल्यतो-ऽनुभवान्न कृतनाशलक्षणदोषः प्रसज्यते । द्विविधो हि कर्मणो-ऽनुभवः, प्रदेशतो विपाकतश्च । तत्र प्रदेशतः सकलमपि कर्मा-ऽनुभूयते, न तदस्ति किञ्चित्कर्म, यत्प्रदेशतो-ऽप्यननुभूतं सत् क्षयमुपयाति, ततः कथं कृतनाशदोषापत्तिः ? अत्र क्षयो नाम बन्धपरिणामेन जीवप्रदेशैः सह परिणतानां कर्मपुद्गलानां बन्धप्रतिपक्षमोक्षपरिणामैः प्रक्षिप्यमाणानां तेषां जीवप्रदेशतो निर्मूलतो-ऽपगमनम्, सर्वथा नाशस्तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ना-ऽभ्युपगम्यते स्याद्वादवादिभिः, जीवप्रदेशतः पृथग्भूतानामकर्मस्वरूपेण परिणतानामपि कर्मपुद्गलानां पुद्गलस्वरूपेण परिक्षया-ऽनुपलम्भात् **"ना-ऽसतो विद्यते भावो, ना-ऽभावो विद्यते सतः"** इतिन्यायात् । तेन यथा मणेर्मलादेर्व्यावृत्तिः क्षय इति व्यपदिश्यते, तथैवा-ऽऽत्मप्रदेशतः कर्मणामपगमनं क्षय इति परिभाष्यते। स च क्षयः प्रदेशतो विपाकतश्च भवति। विपाकतः कर्मणो-ऽनुभवस्तु भजनीयः, किञ्चित्कर्म विपाकतो-ऽनुभूतं सत् क्षयमुपगच्छति, किञ्चित्पुनः विपाकतो-ऽननुभूतमेव, अन्यथा मोक्षा-ऽभावः प्रसज्येत । तथाहि-यदि विपाकानुभवत एव सर्वकर्मदलं परिक्षपणीयमिति नियमः स्यात्, तर्ह्यसंख्यातेषु भवेषु तथाविधविचित्रा-ऽध्यवसायविशेषैर्नरकगत्यादिकं कर्मोपार्जितम्, तस्य नैकस्मिन् मनुष्यादावेव भवेऽनुभवः, स्वस्वभवनिबन्धनत्वात् तथाविधविपाकानुभवस्य । क्रमेण च स्वस्वभवा-ऽनुगमेना-ऽनुभवे नारकादिभवेषु चारित्रा-ऽभावेन प्रभूततरकर्मसन्तानसञ्चयात्, तस्या-ऽपि च स्वस्वभवा-ऽनुगमेना-ऽनुभवोपगमात् कुतो मोक्षः ? तस्मात् सर्वं कर्म विपाकतो भजनया-ऽनुभूयते, प्रदेशतः पुनरवश्यमेवा-ऽनुभवनीयमित्यभ्युपगन्तव्यम्, यदुक्तं **श्रीविवाहप्रज्ञप्तौ-"तत्थ णं जं तं पएसकम्मं, तं णियमा वेयइ, तत्थ णं जं अणुभागकम्मं, तं अत्थेगइअं वेएइ, अत्थेगइअं णो वेएइ।"** इति । एवं च न कश्चिद् दोषः । न च तथापि दीर्घकालभोग्यतया यद् वेदनीयादिकं कर्मोपार्जितम्, अथ च परिणामविशेषादुपक्रमेणा-ऽर्वागेव तदनुभवति, ततः कथं न कृतनाशदोषप्रसङ्गः ? इति वाच्यम्, बन्धकाले तथाविधा-ऽध्यवसायवशत आदावुपक्रमयोग्यस्यैव बन्धात्, उक्तं च **भाष्यकृद्भिः-**

**"उदयक्खयक्खओवसमोवसमा जं च कम्मुणो भणिया ।**
**दव्वादिपंचगं पति जुत्तमुवक्कमणमत्तो-ऽवि ।।१।।"** इति ।

किञ्च जिनवचनप्रामाण्यादपि वेदनीयादिकर्मणामुपक्रमो मन्तव्यः । न चैवं कर्मक्षयस्योपक्रमहेतुत्वेन मोक्षतः पुनश्च्युतिप्रसङ्गः, मोक्षाद्धि प्रच्यावयितुं रागादयः समर्थाः, ते च निर्मूलकाषं कषिता इति भवता यदुक्तं 'तथोपगमे वेदनीयादिवच्च कृतस्या-ऽपि कर्मक्षयस्य' इत्यादि, न तत्सम्यगुपपन्नमिति स्थितम् ।

ननु यदा वेदनीयादिकमतिप्रभूतं सर्वस्तोकं चा-ऽऽयुष्कम्, तदा समधिकवेदनीयादिघातार्थं समुद्घातमारभताम्, वेदनीयादिकस्य सोपक्रमत्वात् । यदा त्वधिकमायुष्कं स्तोकञ्च वेदनीयादिकम्, तदा का वार्त्ता ?, न खल्वायुष्कस्य घाताय समुद्घातः कल्पते, चरमशरीरिणामायुषो निरुपक्रमत्वात्, **"चरमसरीरा य निरुवक्कम्मा ।"** इति वचनात्, तदयुक्तम्, एवंविधभावस्य कदाचना-ऽप्यभावात् । तथाहि—सर्वदैव वेदनीयाद्येवायुषः सकाशादधिकस्थितिकं भवति, न तु कदाचिदपि वेदनीयादित आयुष्कम् । न च कुतो-ऽयं नियमः, येन वेदनीयादित आयुष्कमधिकस्थितिकं न भवति ? इति वाच्यम्, तथारूपजीवपरिणामस्वाभाव्यात् । इदमुक्तं भवति-यथा-ऽऽयुर्व-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

र्जानां ज्ञानावरणादिकर्मणां सप्तानां ध्रुवबन्धः, आयुषस्त्वध्रुवबन्धः, सोऽपि नियत एव काले स्व-भवत्रिभागादिशेषरूपे, उक्तं च **"सिय तिभागे सिय तिभागतिभागे।"** इति । तत्र बन्ध-वैचित्र्यनियमे न स्वभावात् परः कश्चिद् हेतुरस्ति, तथैवेहाऽप्यायुषो वेदनीयादितोऽ-धिकस्थितिकत्वा-ऽभावे स्वभावविशेष एव नियामकः प्रतिपत्तव्यः । इत्थंभूत एवात्मनः परि-णामः, येन जीवस्या-ऽऽयुष्कं वेदनीयादिभिस्तुल्यं न्यूनं वा भवति, न कदाचना-ऽप्यधिकम् ।

ननु कृतकृत्योऽपि सयोगिकेवली भगवान् समुद्घातं करोतीति न युज्यते, कृतकृत्यत्व-व्याघातप्रसङ्गादिति चेत्, न, समुद्घातेनैवा-ऽऽयुष्कतोऽधिकस्थितिकानां वेदनीयादीनां कर्मणां क्षपणीयत्वेनैकान्ततः कृतकृत्यत्वा-ऽसिद्धेः, । न चैतदनिष्टम्, धर्मदेशनादिनैवोदीर्णतीर्थ-कृन्नामकर्मणः क्षपणीयत्वेना-ऽप्येकान्ततो भगवतः कृतकृत्यत्वा-ऽसिद्धेरिष्टत्वात्, यदुक्तं **विशेषावश्यकभाष्ये—**

**"नेगंतेण कयत्थो जेणोदिन्नं जिणिंदनामं से ।**
**तदवंज्झफलं तस्स य, खवणोवओयमेव जओ॥१॥"** इति ।

रागद्वेषराहित्यलक्षणं तु कृतकृत्यत्वं तत्र भगवति निराबाधमेव ।

ननु वेदनीयादीनां प्रभूतस्थितिकानामायुषा सह समीकरणार्थं समुद्घातारम्भः, तत्र भवतु नाम समुद्घातेन नाम-गोत्रयोः कर्मक्षपणा, तदुदीरणायाः प्रवृत्तत्वात्, वेदनीयस्य तूदीरणा-ऽभा-वात् कथं युज्येत तत्क्षपणा ? इति चेत्, मैवम्, यतो न केवलमुदीरणयैव कर्मक्षपणा भवति, अपि त्वपवर्तनादिभिरपि । वक्ष्यन्ते च समुद्घातावस्थायां स्थितिघातादयः, न हि वेदनीयस्य स्थितिघातादयो व्यवच्छिन्नाः, तेन भवन्त्येव समुद्घातावस्थायां वेदनीयस्य स्थितिघातादयोऽपवर्त-नादिभिः, ततश्च न किञ्चिदनुपपन्नम् । न च यद्यपवर्तनादिभिर्जायमानस्थितिघातादीनाश्रित्य समुद्घातो भण्यते, तर्ह्यपूर्वकरणादिष्वपि समुद्घातव्यवहारः स्यादिति वाच्यम्, विशिष्टप्रयत्नेन शरीराद् बहिर्जीवप्रदेशानां यन्निस्सारणम्, तत्प्रयोज्यस्य प्राबल्येन घातस्य समुद्घातत्वविवक्षणात् । यत्तु **प्रज्ञापनावृत्तौ** समुद्घातशब्दप्रतिपादना-ऽवसरे **"प्राबल्येन कथं घात इति चेत्, उच्यते—इह वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मप्रदेशान् कालान्त-रानुभवयोग्यानुदीरणाकरणेनाकृष्योदयावलिकायां प्रक्षिप्या-ऽनुभूय च निर्जरय-तीत्युक्तम्,** तदपि तत्र वेदनादिसमुद्घातेषु यस्य यस्य कर्मणो घात उदीरणायाः प्रयोजकत्वं सम्भ-वति, तत्तत्कर्मघाते तद् योज्यम् । विशिष्टप्रयत्नेन शरीराद् बहिर्निस्सारणस्य कर्मघातप्रयोजकत्वं तु वेदनादिसर्वसमुद्घातेष्वपि समस्ति, न तत्र कस्यचित् विप्रतिपत्तिः ॥२३२-२३३

ननु यः केवली भगवान् समुद्घातं करोति, स कथं करोति ? इति पृष्टे भणति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दंड-कवाड-पयर-लोगपूरणाणि कमसो चउखणेसु**
**पढमसमये पएसा वित्थारइ बहुअसंखभागमिआ ॥२३४॥ (गीतिः)**

दण्ड-कपाट-प्रतर-लोकपूरणानि क्रमशश्चतुःक्षणेषु ।
प्रथमसमये प्रदेशान् विस्तारयति बह्वसंख्यभागमितान् ॥२३४॥ इति पदसंस्कारः ।

**'दंड०'** इत्यादि, पूर्वगाथातः 'कुणए' इति क्रियापदमनुवर्तते । दण्ड-कपाट-प्रतर-लोकपूरणानि 'क्रमशः' क्रमेण 'चतुःक्षणेषु' चतुर्षु समयेषु करोति समुद्घातगतो जीवः । तद्यथा–प्रथमसमये दण्डं करोति, द्वितीयसमये कपाटम्, तृतीयसमये प्रतरम्, चतुर्थे च समये लोकपूरणं करोति । इदमत्र हृदयम्-प्रथमसमय औदारिककाययोगस्थो बाहल्यतः स्वशरीरप्रमाणमूर्ध्वमधश्च लोकान्तपर्यन्तमात्मप्रदेशानां दण्डं करोति, अथ दण्ड इति को-ऽर्थः ? दण्ड इव दण्डः । क उपमार्थः ? यथा मूल-मध्या-ऽग्रयूर्ध्वाधःसमप्रदेशः परिवृत्तपर्यायो दण्डो भवति, तथैव समुद्घातकरणवशादूर्ध्वमधश्च लोकान्तं प्राप्तानां बाहल्यतः स्वशरीरावगाहनागतानामात्मप्रदेशानां दण्डाकारेणाऽवस्थानाद् दण्डत्वसिद्धिः । द्वितीयसमय औदारिकमिश्रकाययोगस्थः पूर्वपश्चिमदिशोर्दक्षिणोत्तरदिशयोर्वाऽऽत्मप्रदेशानां तिर्यक्प्रसारणेन लोकान्तगामिनं कपाटं करोति । अथ कपाट इति कोऽर्थः ? कपाट इव कपाटः । अयमुपमार्थः-यथा पूर्वपश्चिमदिशोस्तिर्यग् विस्तीर्णो दक्षिणोत्तरदिशोर्ह्रस्व ऊर्ध्वा-ऽधोदिशयोरुच्छ्रितः, यद्वा-ऽपागुदग्दिशोस्तिर्यग्विस्तीर्णः प्राक्प्रत्यग्दिशोर्ह्रस्व ऊर्ध्वा-ऽधोदिशयोरुच्छ्रितः कपाटः शब्द्यते, तथैव समुद्घातकरणवशात् पूर्वपश्चिमदिशयोर्दक्षिणोत्तरदिशोर्वा बाहल्यतः स्वशरीरावगाहनाप्राप्तानामायामतश्चतुर्दशरज्जुषु विस्तृतानां विष्कम्भतश्च लोकान्तं यावद् निर्गतानामात्मप्रदेशानां कपाटाऽऽकारेण दर्शनात् कपाटत्वसिद्धिः । तृतीयसमये कार्मणकाययोगस्थः पूर्वपश्चिमयोर्दक्षिणोत्तरयोर्दिशोर्वा-ऽऽत्मप्रदेशानां प्रसारणेन लोकान्तप्रापि प्रतरं करोति । अथ च प्रतरमिति को-ऽर्थः ? प्रतरमिव प्रतरम् । अयमुपमार्थः–यथा घननिचितनिरन्तरप्रचिताऽवयवसंस्थितं परिवृत्तं स्थालकं स्फलकं वा लोके प्रतरं भण्यते, तथा समुद्घातकरणवशाद् निर्गतानामात्मप्रदेशानां प्रतरसंस्थानेनाऽवस्थानात् प्रतरत्वं सिध्यति । यदभिहित**मावश्यकचूर्णौ–"अथ तृतीयसमये प्रतरं कुर्वन्ति, तत्सामायिकश्च कार्मणकाययोगो भवति । अथ प्रतरमिति कोऽर्थः ? प्रतरमिव प्रतरम् । क उपमानार्थः ? यथा-घननिचितावयवसंस्थितं परिवृत्तं स्थालकं स्फलकं वा लोके प्रतरमित्युच्यते, तथाऽऽकारमपरमपि [तथा आकाशमपि] परस्परप्रदेशसंसर्ग(?)विच्छेदपरिवृत्तपर्यायेणा-ऽवस्थितं प्रतरमिति प्रसिद्धम् ।"** इति । इदमेव प्रतरं **कैश्चिदाचार्यै** रुचकशब्देन व्यवह्रियते, यदाहुः **श्रीतत्त्वार्थवृत्तिकाराः श्रीसिद्धसेनगणिपादाः–"दण्ड-कपाटक-रुचकक्रिया-जगत्पूरणं चतुःसमयम् ।"** इति । **अन्यैश्च** मन्थानशब्देन व्यपदिश्यते, यदाहुः **श्रीहरिभद्रसूरिपादाः–"तृतीयसमये तदेव कपाटं दक्षिणोत्तरदिग्द्वयप्रसारणान्मन्थसदृशं मन्थानं करोति ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्थसमये कार्मणकाययोगस्थो लोकपूरणं करोति, प्रतरावस्थायामपूरितान्यवकाशान्तराणि पूरयित्वा केवली सर्वविश्वव्यापी भवति । इह **जीवसमासवृत्तौ श्रीमलधारिहेमचन्द्रसूरिपा-**दैराक्षेप-परिहाराभ्यां तृतीयसमये-ऽन्तराणामुद्धरणमित्थं दर्शितम्–"**ननु लोकमध्ये स्थितो यदा केवली समुद्घातं करोति, तदा तृतीयेऽपि समये लोकः पूर्यते एव, किं चतुर्थसमयेऽन्तरपूरणेनेति, नैतदेवं, लोकस्य मध्यं हि मरुमध्य एव सम्भवति, तत्र च प्रायः समुद्घातकर्तुः केवलिनोऽसम्भव एव, अन्यत्र च समुद्घातं कुर्व-तस्तस्य तृतीयसमयेऽन्तराण्युद्धरन्त्ययेवेति परिभावनीयम् ।**" इति ।

अथ समुद्घातकरणे दण्डादीनि कुर्वतो महात्मनो विधिविशेषं प्रदर्शयितुकाम आदौ तावत् प्रथमसमये प्रवर्तमानं विधिं भणति–'**पढमसमये**' इत्यादि, 'प्रथमसमये' समुद्घातकरणाऽद्धायाः प्रथमसमये 'बहुसंख्यभागमितान् प्रदेशान्' असंख्येयभागप्रमाणान् जीवप्रदेशान् स्वशरीरे परि-त्यज्य शेषान् बहुसंख्येयभागमितान् जीवप्रदेशान् बाहल्यतः स्वशरीरमान ऊर्ध्वमधश्च लोकान्त-गामिनि चतुर्दशरज्ज्वायामे दण्डाकारे 'विस्तारयति' प्रसारयति । यदुक्त**मावश्यकचूर्णौ**— "**अथ दंडककरणे को विधिरिति प्रश्ने ब्रूमहे-इह व्यावहारिकनयवशात् ये असंख्येया जीवप्रदेशाः, ते सर्वेऽपि बुद्ध्या असंख्येया भागाः कृताः, तत्र प्रथमसमये दण्ड-ककाराणामसंख्येया भागा निर्गच्छन्ति, असंख्येयभागोऽवतिष्ठते, ततस्तैरेव असंख्येयैर्जीवप्रदेशभागैः स्वशरीरान्निर्गतैर्हि दंडकमभिनिर्वर्तयंतः अष्टौ जीव-मध्यप्रदेशान् सांततिकपरस्पराचियोगिनो रुचकसंस्थितान् चक्रिवैडूर्यपटलयोरुभयो रत्नाद्यवस्थायिषु रुचकसंस्थितलोकमध्यप्रविष्टाष्टाकाशप्रदेशेषु संस्थाप्य चतुर्दशर-ज्ज्वायतं दंडकं कुर्वन्तीति** ।" न च कुतो जीवप्रदेशदण्डस्य स्वशरीरविष्कम्भबाहल्योपेतत्व-मेव, न तु तन्न्यूनाऽतिरिक्तविष्कम्भबाहल्ययुक्तत्वमिति वाच्यम् , जीवस्या-ऽनुश्रेणिगमनस्वभाव-त्वात् । इहा-ऽनुश्रेणिगमनं नाम यास्वाकाशश्रेणिषु जीवोऽवगाढः, ता अपरित्यज्याऽऽत्मनो गमनम् ।

बहुसंख्येयभागमात्रजीवप्रदेशान् विस्तारयन्नपि दण्डावस्थायां लोका-ऽसंख्येयभागमात्रं क्षेत्रं व्याप्नोति, न त्वधिकम् ॥२३४॥ अथ दण्डं कुर्वतः स्थित्यनुभागयोर्विनाशं दर्शयति—

**ठिइसंतस्स असंखंसा ठिइखंडेण णासइ रसं तु ।**
**घायेइ बहुअणंतंसमितं अणुभागखंडेणं ॥२३५॥**

स्थितिसत्त्वस्या-ऽसंख्यांशान् स्थितिखण्डेन नाशयति रसं तु ।
घातयति बह्वनन्तांशमितमनुभागखण्डेन ॥२३५॥ इति पदसंस्कारः ।

'**ठिइसंतस्स**' इत्यादि, 'स्थितिसत्त्वस्य' वेदनीयादिकर्मणां स्थितिसत्तायाः 'असंख्यां-शान्' असंख्येयभागान् स्थितिखण्डेन 'नाशयति' विघातयति, वेदनीयादिकर्मणां स्थितेरसंख्ये-यभागान् कृत्वैकमसंख्येयभागं तत्रैव विमुच्य बहुसंख्येयभागान् स्थितिखण्डेन घातयतीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'रसं' इत्यादि, रसं त्वनुभागसत्त्वस्य बह्वनन्तांशमितमनुभागखण्डेन घातयति। इदमुक्तं भवति-अशुभकर्मणां सत्तागताऽनुभागस्याऽनन्तान् भागान् कृत्वैकानन्ततमभागप्रमितमनुभागं तत्रैव परित्यज्य बह्वनन्तभागमात्रमनुभागमनुभागखण्डेन विनाशयति। यदुक्तमावश्यकचूर्णौ– **"तस्येदानीं मनुष्याऽवस्थायां या पल्योपमा-ऽसंख्येयभागमात्रा कर्मत्रयसत्क-कर्मस्थितिरवतिष्ठते, सा बुद्ध्या असंख्येयभागाः क्रियन्ते, ततः प्रथमसमये दंडक-कारक(ः)सत्कर्मस्थितेरसंख्येयान् भागान् हन्ति, असंख्येयभागो-ऽवतिष्ठते, यश्चामुष्यामवस्थायां कर्मत्रयानुभवः, स बुद्ध्या अनन्तभागाः क्रियन्ते, ततो-ऽसद्वेद्य-न्यग्रोध-सादि-कुब्ज-वामन-हुंडसंस्थान-वज्रनाराच-नाराचाऽर्धनाराच-कीलि-का-ऽसंप्राप्तसृपाटिकासंहनना-ऽप्रशस्तवर्ण-गन्ध-रस-स्पर्शोपघाता-ऽ-प्रशस्तविहायो-गत्यपर्याप्तका-ऽस्थिरा-ऽशुभ-दुर्भग-दुःस्वरा-ऽनादेया-ऽयशःकीर्त्ति-नीचैर्गोत्रसंज्ञिकानां पञ्चविंशतेरप्रशस्तानां प्रकृतीनां प्रथमसमये दंडककारका(को-ऽ)नुभवस्याऽनन्तान् भागान् हन्ति, अनन्तभागोऽवतिष्ठते।"** इति

तथैव **कषायप्राभृतचूर्ण्यामप्यशुभप्रकृतीनामनुभागघातो दर्शितः। अक्षराणि त्वेवम्–"पढमसमए दंडं करेदि। तम्हि ठिदीए असंखेज्जे भागे हणइ। सेसस्स च अणुभागस्स अप्पसत्थाणमणंते भागे हणदि।"** इति।

**आवश्यकचूर्णिकारादयस्तु** प्रशस्तानामप्येकोनचत्वारिंशत्कर्मणामनुभागो-ऽप्रशस्तप्रकृत्य-नुभागमध्ये प्रवेशेन घात्यत इति मन्यन्ते। तथा च तद्ग्रन्थः-**"तत्सामयिकमेव सद्वेद्य-मनुष्य-देवगति-पञ्चेन्द्रियजात्यौदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणशरीर-समचतुरस्र-संस्थानौदारिक-वैक्रियका--ऽऽहारकशरीराङ्गोपाङ्गवज्रर्षभनाराचसंहनन-प्रशस्तवर्ण-गन्ध-रस-स्पर्श - मनुष्यदेवगतिप्रायोग्या -ऽऽनुपूर्व्यगुरुलघु-पराघाता - ऽऽतपोद्यो-तोच्छ्वास-प्रशस्तविहायोगति-त्रस-बादर-पर्याप्त-प्रत्येकशरीर-स्थिर-शुभ-सुभग-सुस्वरा-ऽऽदेय - यशःकीर्त्ति-निर्माण - तीर्थकरोच्चैर्गोत्रसंज्ञिकानामेकोनचत्वारिंशतः प्रशस्तानामपि योऽनुभवः, तस्याऽप्रशस्तप्रकृत्यनुभवघाता-ऽनुप्रवेशेनैव घातनं ज्ञेयम्, समुद्घातमाहात्म्यमेतद्।"** इति।

नन्वेकोनचत्वारिंशच्छुभप्रकृतिषु मध्य आतपोद्योतयोर्ग्रहणं व्यर्थम्, अनिवृत्तिकरणे तयोः क्षयस्यै**कोनचत्वारिंशत्तमगाथया** प्रतिपादितत्वादिति चेत्, उच्यते–**कार्मग्रन्थिकाऽभि-प्रायेण** तत्र तयोः क्षीणत्वेऽप्या**वश्यकनिर्युक्तिकाराद्य**भिप्रायेण न तयोस्तत्र क्षयो जातः, तदभिप्रायकमिह तयोर्ग्रहणम्, न तु **कार्मग्रन्थिका-ऽभिप्रायकम्**। तेन तयोर्ग्रहणं न व्यर्थम्। पूर्वत्र तु पञ्चविंशत्यशुभप्रकृतिषु मध्येऽप्रशस्तविहायोगत्यपर्याप्तनामकर्मणोर्ग्रहणं **कार्म-ग्रन्थिकाऽभिप्रायकम्, आवश्यकनिर्युक्तिकाराद्य**भिप्रायेणाऽनिवृत्तिकरण एव तयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षयस्यैकोनचत्वारिंशत्तमगाथायाष्टीकायां दर्शितत्वात् । इत्थमेकत्रा-ऽऽतपोद्यतयोरन्यत्र चाऽप्रशस्तविहायोगत्यपर्याप्तनामकर्मणोर्ग्रहणेनावश्यकचूर्णिकृता मतद्वयं ज्ञापितमित्यस्माकं प्रतिभाति । तत्त्वं तु केवलिनो बहुश्रुता वा विदन्ति ।

स्थितिघातो रसघातश्च प्रतिसमयं भवति, न तु प्रत्यन्तर्मुहूर्तम् । एवं स्थितिघातरसघातौ तावद्वक्तव्यौ, यावत् समुद्घातस्य पञ्चमसमयः, कषायप्राभृतचूर्णिकारमतेन तु यावच्चतुर्थसमयः ॥२३५॥

अथ समुद्घातकरणस्य द्वितीयसमये कार्यविशेषं जिज्ञापयिषुराह—

**बीयसमये कवाडे वित्थारइ बहुअसंखभागमिआ ।**
**जीवपएसा ठिइघाओ रसघाओ य पुव्वव्व ॥२३६॥**

द्वितीयसमये कपाटे विस्तारयति बह्वसंख्यभागमितान् ।
जीवप्रदेशान् स्थितिघातो रसघातश्च पूर्ववत् ॥२३६॥ इति पदसंस्कारः ।

**'बीयसमये'** इत्यादि, 'द्वितीयसमये' समुद्घातस्य द्वितीयस्मिन् समये प्राङ्मुक्ताऽसंख्येयभागस्य बह्वसंख्यभागमितान् 'जीवप्रदेशान्' आत्मप्रदेशान् कपाटे विस्तारयति । इदमुक्तं भवति—दण्डं कुर्वता प्रथमसमये ये-ऽसंख्येयभागमात्राः प्रदेशा विमुक्ताः, तेषामसंख्येयभागान् कृत्वैका-ऽसंख्येयतमभागं तत्रैव शरीरे परित्यज्य शेषान् बह्वसंख्येयभागमात्रानात्मप्रदेशान् निष्क्रमयति । तेन प्रथमसमये निष्क्रमितप्रदेशतो द्वितीयसमये निष्क्रम्यमाणप्रदेशा असंख्येयगुणहीना भवन्ति । तान्निष्क्रमितान् जीवप्रदेशान् पूर्वपश्चिमदिशोर्दक्षिणोत्तरदिशयोर्वा प्रसारयन् पार्श्वतो लोकान्तगामिनं कपाटं करोति । उक्तञ्चाऽऽवश्यकचूर्णौ—**"अथ कपाटकरणे को विधिरिति प्रश्ने ब्रूमहे, अतः प्रथमसमयनिर्गतात्मप्रदेशसकाशात् यो-ऽसंख्येयभागोऽवतिष्ठते इत्युक्तं, स बुद्ध्या पुनरपि असंख्येयान् भागान् गतः, ततो द्वितीयसमये कपाटकारकाणां असंख्येया भागा निष्कामंति, असंख्येयभागोऽवतिष्ठते, अनेकैरसंख्येयैर्भागैर्निर्गतैरेतैः कपाटकं कुर्वन्ति । तत्र ये निर्गतास्ते प्रथमसमयनिर्गतात्मप्रदेशसकाशात् असंख्येयगुणहीना असंख्येयभाग इत्यर्थः ।"** इति ।

कपाटस्थोऽपि लोकस्याऽसंख्येयभागमात्रं क्षेत्रं व्याप्नोति, किन्तु दण्डस्थजीवस्य क्षेत्रतः कपाटस्थस्य क्षेत्रमसंख्येयगुणं भवति, दण्डबाहल्यतः कपाटबाहल्यस्याऽसंख्येयगुणत्वात् ।

अत्र प्रेरको भणति-ननु प्रथमसमयतो द्वितीयसमये-ऽसंख्येयगुणं क्षेत्रमसंख्यगुणहीना जीवप्रदेशाः कथं व्याप्तुमर्हन्ति ? इति, उच्यते—द्वितीयसमये पूर्वपश्चिमदिशोर्दक्षिणोत्तरदिशयोर्वा यथा शरीरावच्छिन्नदण्डक्षेत्रतो जीवप्रदेशा विस्तृणन्ति तथा शरीराऽनवच्छिन्नदण्डक्षेत्रतोऽपि । तत्र तदानीं शरीरावच्छिन्नदण्डगता-ऽवगाहनातो निर्गत्य ये प्रदेशा पूर्वपश्चिमदिशोर्दक्षिणोत्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिशयोर्वा विस्तृणन्ति, ते प्रथमसमये स्वशरीरतो निर्गत्य दण्डाकारेण संस्थितेभ्यः प्रदेशेभ्योऽ-संख्यातगुणहीना भवन्ति, यतः प्रथमसमये शरीरगतजीवप्रदेशानां बहुसंख्येयभागमात्रा दण्डात्मकक्षेत्रं व्याप्ताः, द्वितीयसमये तु प्रथमसमयमुक्तैका-ऽसंख्येयभागस्य बहुसंख्येयभागप्रमिता जीवप्रदेशा शरीरतो विनिर्गताः । किन्त्वनुश्रेणिगमनादुपर्यधश्च शरीरा-ऽनवच्छिन्नदण्डगताऽवगाहनातो-ऽपि निर्गत्य प्रदेशाः प्रभूतं कपाटक्षेत्रं व्याप्नुवन्ति, ते च प्रभूताः । इत्थं प्रथमसमयतो द्वितीयसमये शरीरतो निष्क्रम्यमाणानामपूर्वाणां जीवप्रदेशानामसंख्येयगुणहीनत्वेऽपि न विरुध्यतेऽसंख्येयगुणक्षेत्रस्य व्यापनम् । एवमग्रेऽपि ।

अथ कपाटं कुर्वतो महात्मनो स्थितिघातं रसघातं चाऽतिदिदिक्षुराह—'**ठिइघाओ**' इत्यादि, स्थितिघातो रसघातश्च पूर्ववद् भवतः । अयं भावः—प्रथमसमये या-ऽसंख्येयभागप्रमाणा स्थितिः परित्यक्ता, तस्या असंख्येयभागान् कृत्वैकमसंख्येयभागं सत्कर्मणि विमुच्य बहुसंख्येय-भागान् विनाशयति कपाटस्य कारकः । तथा प्रथमसमये योऽनन्ततमभागप्रमाणोऽनुभागः सत्क-र्मणि परित्यक्तः, तस्याऽनन्तभागान् कृत्वैकमनन्ततमभागं सत्कर्मणि परित्यज्य बह्वनन्त-भागान् विनाशयति । न्यगादि चा-ऽऽवश्यकचूर्णौ—"**अथ द्वितीयसमये कपाटकारकस्य स्थित्यनुभावघातने को विधिरिति प्रश्नेऽभिदध्महे प्रथमसमयघातितसत्कर्म-स्थितेः सकाशात् योऽसंख्येयभागोऽवतिष्ठते इत्युक्तं असावपि बुद्ध्या पुनरसंख्ये-यभागाः क्रियन्ते, तस्य कपाटकारको-ऽप्यसंख्येयान् भागान् हन्ति, असंख्येय-भागो-ऽवतिष्ठते, ततो-ऽनुभवस्यापि प्रथमसमयघातनानुभवसकाशात् योऽव-शिष्टो-ऽनन्तोऽनुभवोऽवतिष्ठत इत्युक्तं, असावपि बुद्ध्या पुनरनन्तभागाः क्रियन्ते, तस्य कपाटकारोऽनन्तान् भागान् हन्ति, पुनरनन्तभागोऽवतिष्ठते ।**" इति । तथैव कषायप्राभृतचूर्णावपि—"**तदो विदियसमए कवाडं करेदि । तम्मि सेसिगाए ठिदोए असंखेज्जे भागे हणइ । सेसस्स च अणुभागस्स अप्पसत्थाण-मणंते भागे हणइ ।**" इति । **आवश्यकचूर्णिकृदादयो महर्षयस्तु** कपाटं कुर्वन् शुभ-प्रकृतीनामप्यनुभागमशुभप्रकृत्यनुभागघातना-ऽनुप्रवेशनेन घातयतीति मन्यन्ते । अक्षराणि त्वेवम्—"**अयमपि चाऽप्रशस्तप्रकृत्यनुभवघातनानुप्रवेशनेनैव प्रशस्तप्रकृत्यनुभवघा-तनं करोतीति ज्ञेयम् ।**" इति ॥ २३६ ॥

एतर्हि समुद्घातस्य तृतीयसमये प्रतरं कुर्वतः क्रियाविशेषं दर्शयति—

**तइयसमये बहुअसंखभागमेत्ता-ऽप्पणो पएसा य ।**
**वित्थारइ पयरे ठिइरसाण घाओ उ पुव्वव्व ॥२३७॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृतीयसमये बहुसंख्यभागमात्रानात्मनः प्रदेशांश्च ।
विस्तारयति प्रतरे स्थितिरसयोर्घातस्तु पूर्ववत् ॥२३७॥ इति पञ्चसंस्कारः ।

'तइय०' इत्यादि, 'तृतीयसमये' समुद्घातस्य तृतीयसमये बहुसंख्येयभागमात्रान् 'आत्मनः' जीवस्य प्रदेशान् दक्षिणोत्तरदिशयोः पूर्वापरदिशोर्वा विस्तारयति, चकारः पादपूरणे। इदमुक्तं भवति-कपाटं कुर्वता द्वितीयसमये येऽसंख्येयभागमात्राः स्वशरीरे प्रदेशाः परित्यक्ताः, तेषामसंख्येयभागान् कृत्वैकाऽसंख्येयभागं तत्रैव शरीरे विमुच्य शेषान् बहुसंख्येयभागान् निष्क्रमयति, ते च निष्क्रमिताः प्रदेशा द्वितीयसमयनिष्क्रमितप्रदेशतोऽसंख्येयगुणहीना भवन्ति । तान् निष्क्रमितान् जीवप्रदेशान् दक्षिणोत्तरदिशयोः प्राक्प्रत्यग्दिशोर्वा प्रसारयन् द्वितीयसमयकृत-कपाटं लोकान्तप्रापि प्रतरं करोति, अवकाशान्तराणि तूद्धरन्ति । उक्तं चाऽऽवश्यक-चूर्णौ–"**अथ तृतीयसमये प्रतरपूरकाणां को विधिरिति प्रश्ने प्रतिब्रूमहे, ततो द्वितीयसमये निर्गतात्मप्रदेशसंकाशात् योऽसंख्येयभागोऽवतिष्ठते इत्युक्तं असावपि बुद्ध्या पुनरसंख्येयभागाः कृताः, ततस्तृतीयसमये प्रतरकारकाणामसंख्येयभागा निष्क्रामन्ति, असंख्येयभागोऽवतिष्ठते, तैरसंख्येयैर्भागैर्निर्गतैरेतैः प्रतरं पूरयंति । तत्र ये निष्क्रान्तास्ते द्वितीयसमयनिष्क्रान्तात्मप्रदेशसकाशादसंख्येयगुणहीनाः** ।" इति । तृतीयसमये प्रतराकारेण जीवप्रदेशान् विस्तारयन् भगवान् लोकस्य बहुसंख्येयभागान् स्पृशति, यतोऽवकाशान्तराणामपूरितत्वादसंख्येयभागो न स्पृश्यते । उक्तञ्चाऽऽवश्यकवृत्तौ–"**तृतीयसमये तदेव कपाटं दक्षिणोत्तरं पूर्वापरं वा दिग्द्वय-प्रसारणात् मथिसदृशं मन्थानं लोकान्तप्रापिणमारचयति, एवं च प्रायो लोकस्य बहु पूरितं भवति, मन्थान्तराण्यपूरितानि जीवप्रदेशानामनुश्रेणिगमनात्** ।" इति । एवं **प्रज्ञापनावृत्तावपि** ।

न च प्रमाणतयोपन्यस्तग्रन्थे मन्थानकारकस्य लोकबहुसङ्ख्यभागमात्रं क्षेत्रं प्रतिपादितम्, न तु प्रतरकारकस्येति वाच्यम्, शब्दभेदेन भेदेऽप्यर्थभेदेन भेदाऽभावात् । न चाऽस्तीहाऽर्थभेदेन भेदे किञ्चित् प्रमाणम् । न च स्वदेहप्रमाणबाहल्यादखण्डदण्डावच्छिन्नरूपात् कपाटमध्यभागादेव कपाटस्य मन्थानीकरणम्, न त्वखण्डस्य कपाटस्य । एवञ्च लोकान्तगामी पूर्वापरविस्तीर्णो दक्षिणोत्तरविस्तीर्णो वैकः कपाटः, इतरस्तु दक्षिणोत्तरविस्तीर्णः पूर्वापरविस्तीर्णो वा । इत्थं कपाटद्वयात्मक एव मन्थानः । ततश्च तृतीयसमयेऽवकाशान्तराण्यप्युद्धरन्ति, चतुर्थसमये तु तत्पूरणं भवति । एवमष्टसामयिकत्ववचनमपि न विरुध्यत इत्यस्त्यर्थभेदेन भेदे प्रमाणमिति वाच्यम्, एतादृशमन्थानार्थाऽभ्युपगमे मथिकरणावस्थायां स्नातकस्य लोकाऽसंख्येयभागप्रमाणावगाहनाप्रसङ्गेन **व्याख्याप्रज्ञप्तिवृत्तिग्रन्थोक्तवचनेन** सह विरोधोद्भवात् । तथाहि– भवदभिप्रायेण मन्थानकरणकाले स्नातकस्यावगाहना लोकाऽसंख्येयभागमात्री स्यात्, लोकाऽसंख्ये-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यभागद्वयमात्राऽवगाहनाया अपि लोकाऽसंख्येयभागमात्रत्वात् । ततश्च **व्याख्याप्रज्ञप्तिवृत्तौ श्रीमदभयदेवसूरिपादैः "असंखेज्जेसु भागेसु होज्जत्ति मथिकरणकाले बहोर्लोकस्य व्याप्तत्वेन स्तोकस्य चाऽव्याप्ततयोक्तत्वाल्लोकस्याऽसंख्येयेषु भागेषु स्नातको वर्तते ।"** इति यदुक्तम्, तेन सह विरोधः स्यात् । तत उर्ध्वमधश्च लोकान्तगामिनस्तथा पूर्वापरदिशोर्दक्षिणोत्तरयोर्वा लोकान्तप्राप्तस्या-ऽखण्डस्य कपाटस्य तृतीयसमये मन्थानीकरणमभ्युपगन्तव्यम् । एवं च सुसिध्यत्येव स्नातकस्य मथिकरणकाले लोकबह्वसंख्येयभागप्रमाणाऽवगाहना, जीवप्रदेशानामनुश्रेणिगमनेन बहोर्लोकस्य पूरितत्वादवकाशान्तराणां चा-ऽपूरितत्वात् । किञ्च प्रतरमेव केचिद् मन्थानं प्राहुरन्ये तु रुचकमिति प्राग् दर्शितम् । तदेवं शब्दभेदेऽपि नास्तीहाऽर्थभेदः । ननु स्यादेवम्, किन्तु मन्थानमिव मन्थानं करोतीति तत्र तत्र प्रतिपाद्यते, तर्हि तत्र क उपमार्थो घटते, न ह्यखण्डकपाटाद् मन्थाने क्रियमाणे मन्थाना-ऽऽकृतिः सम्पद्यते ? इति चेत्, उच्यते-मथ्यतेऽनेनेति मन्थानः, **"संस्तुस्पृशि०"** (उणादि०२७६) इति सूत्रेण मन्थिधातोरानप्रत्ययः, यथा मन्थानेन दधिघनावस्था प्रच्याव्यते, तथा समुद्घाततृतीयसमयतत्कावस्थाविशेषेणा-ऽघातित्रयस्य स्थिति-रसौ ह्रास्येते । तदेवं घटत उपमार्थ इत्यस्माकं मतिः । तत्त्वं तु केवलिनो बहुश्रुता वा जानन्ति ।

अथ प्रतरं कुर्वतः स्थितिघातं रसघातं चा-ऽतिदिशति-**'ठिइ०'** इत्यादि, स्थितिरसयोर्घातस्तु पूर्ववज्ज्ञातव्य इति शेषः, तुर्वाक्यभेदे । इदमुक्तं भवति-समुद्घातकरणस्य द्वितीयसमये या स्थितिर्विमुक्ता, तस्या असंख्येयभागान् कृत्वैकाऽसंख्येयभागं सत्कर्मणि विहाय बह्वसंख्येयभागान् विनाशयति प्रतरं निर्वर्तयन्, तथा सत्कर्मणि द्वितीयसमये परित्यक्ताऽनुभागस्याऽनन्तान् भागान् कृत्वैकमनन्ततमभागं सत्कर्मणि विमुच्य शेषाननन्तान् भागान् विघातयति । न्यगादि चा-ऽऽवश्यकचूर्णौ-**"अथ तृतीयसमये प्रतरपूरकस्य स्थित्यनुभवघातने को विधिरिति प्रश्नेऽभिसंवादोयते, ततो द्वितीयसमयघातितसत्कर्मस्थितेः सकाशात् योऽसंख्येयभागोऽवशिष्टो-ऽवतिष्ठत इत्युक्तं, असावपि बुद्ध्या पुनरसंख्येयभागाः क्रियन्ते, तस्य प्रतरपूरकोऽसंख्येयान् भागान् हन्ति, असंख्येयभागो-ऽवतिष्ठते, ततो-ऽनुभवस्या-ऽपि द्वितीयसमयघातितानुभवसकाशात् यो-ऽवशिष्टो-ऽनन्तो-ऽनुभवो-ऽवतिष्ठते इत्युक्तं, असावपि बुद्ध्या पुनरनन्तभागाः क्रियते, तस्य प्रतरपूरको-ऽनन्तभागान् हन्ति, अनन्तभागो-ऽवतिष्ठते ।** इति । तथैव **कषायप्राभृतचूर्णावपि- "तदो तदियसमए मंथं करेदि, ठिदिअणुभागे तहेव णिज्जरयदि ।"** इति ।

**आवश्यकचूर्णिकारादीनामभिप्रायेण** तदानीं प्रशस्तप्रकृत्यनुभागस्या-ऽप्यप्रशस्तप्रकृत्यनुभागघातना-ऽनुप्रवेशेन घातनं भवति, यदुक्तमावश्यकचूर्णौ—**"अयमपि चा-ऽप्रशस्तप्रकृत्यनुभवघातनानुप्रवेशनेनैव प्रशस्तप्रकृत्यनुभागघातनं करोतीति ज्ञेयम्"** इति ॥२३७॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अथ समुद्घातं प्रतिपन्नस्य चतुर्थसमये कार्यविशेषं व्याजिहीर्षुराह—

**वित्थारेइ चउत्थसमये बहुअसंखभागमिआ ।**
**जगपूरणे पएसा ठिइरसघाओ उ पुव्वव्व ॥२३८॥ (उपगीतिः)**

विस्तारयति चतुर्थसमये बह्वसंख्येयभागमितान् ।
जगत्पूरणे प्रदेशान् स्थितिरसघातस्तु पूर्ववद् ॥२३८॥ इति पदसंस्कारः ।

**'वित्थारेइ'** इत्यादि, तत्र 'चतुर्थसमये' समुद्घातस्य चतुर्थसमये बह्वसंख्येयभागमितान् 'प्रदेशान्' जीवप्रदेशान् जगत्पूरणे विस्तारयति, तृतीयसमयोद्धरितावकाशान्तरेषु स्वात्मप्रदेशान् प्रसार्य निखिलं लोकं स्वात्मप्रदेशैः पूरयतीत्यर्थः, तदानीमेकैकजीवप्रदेश एकैका-ऽऽकाशप्रदेशमवगाह्य तिष्ठति । भावार्थः पुनरयम्–प्रतरं कुर्वता ये-ऽसंख्येयभागमात्रप्रदेशाः स्वशरीरे परित्यक्ताः, तेषामसंख्येयभागान् कृत्वैका-ऽसंख्येयभागगतान् स्वशरीरावगाहनीया-ऽवकाशप्रमाणान् जीवप्रदेशान् तत्रैव शरीरे स्थाप्य शेषान् बह्वसंख्येयभागप्रमितान् जीवप्रदेशान् निष्क्रम्य तृतीयसमयोद्धरितावकाशान्तराणि पूरयति । इत्थं समुद्घातकरणस्य चतुर्थसमये केवली भगवान् निखिललोकव्यापी भवति । यदभिहितम् आवश्यकचूर्णौ–**"ततस्तृतीयसमयनिर्गतात्मप्रदेशसकाशात् यो-ऽसंख्येयभागोऽवतिष्ठते इत्युक्तम्, असावपि बुद्ध्या पुनरप्यसंख्येया भागाः क्रियन्ते, ततश्चतुर्थसमये लोकपूरकाणामसंख्येयभागा निष्क्रामन्ति, असंख्येयभागोऽवतिष्ठते, ततस्तैरसंख्येयभागैर्निष्क्रान्तैरेते लोकनिष्कुटान् पूरयंति, तत्र ये निष्क्रान्तास्ते तृतीयसमयनिष्क्रान्तात्मप्रदेशसकाशादसंख्येयगुणहीनाः, यश्चाऽधुना-ऽसंख्येयभागोऽवतिष्ठते-ऽसौ स्वशरीरावगाह्यावकाशप्रमाण इति ।"**

**'ठिइरस०'** इत्यादि, 'स्थितिरसघातस्तु' समुद्घातकरणस्य चतुर्थसमये स्थितिघातो रसघातश्च पूर्ववद् भवति, तुर्वाक्यभेदे । अयमत्राशयः-तृतीयसमये परित्यक्तैका-ऽसंख्येयभागप्रमाणस्थितेरसंख्येयभागान् कृत्वैकमसंख्येयभागं सत्कर्मणि प्रतिष्ठाप्य तदानीं शेषानसंख्येयभागान् घातयति, तथा तृतीयसमये सत्कर्मणि मुक्ता-ऽनुभागस्या-ऽनन्तभागान् कृत्वैकमनन्ततमभागं सत्कर्मणि विहाय चतुर्थसमये शेषाननन्तान् भागान् घातयति, यन्निगदितम् आवश्यकचूर्णौ–**"अथ चतुर्थसमये लोकपूरकस्य स्थित्यनुभागघातने को विधिः ? इत्यभिलपामः-ततस्तृतीयसमयघातितसत्कर्मस्थितेः सकाशाद् यो-ऽवशिष्टो-ऽसंख्येयभागो-ऽवतिष्ठते इत्युक्तम्, असावपि बुद्ध्या पुनरसंख्येयभागाः क्रियन्ते, तस्य लोकपूरको-ऽसंख्येयान् भागान्हन्ति, असंख्येयभागो-ऽवतिष्ठते । ततोऽनुभवस्याऽपि तृतीयसमयघातितानुभवसकाशात् योऽवशिष्टोऽनन्तोऽनुभवोऽवतिष्ठते इत्युक्तं असावपि बुद्ध्या पुनरनन्तभागाः क्रियन्ते, तस्य लोकपूरकोऽनन्तान् भागान् हन्ति, अनन्तभागोऽवतिष्ठते ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रा-ऽपि प्रशस्तप्रकृतीनामनुभागमप्रशस्तप्रकृत्यनुभागघातना-ऽनुप्रवेशेन घातयतीति मन्यन्त **आवश्यकचूर्णिकारादयः** । तथा चाऽत्र **आवश्यकचूर्णिः**–"**अयमपि च अप्रशस्तप्रकृत्यनुभवघातना-ऽनुप्रवेशनेन प्रशस्तप्रकृत्यनुभवघातनं करोतीति ज्ञेयम्** ।" इति । **कषायप्राभृतचूर्णौ** लोके पूर्णे योगस्यैकवर्गणा भवति, तेन सर्वात्मप्रदेशेषु योगस्तुल्यो भवतीत्युक्तम् । तथा चाऽत्र **कषायप्राभृतचूर्णिः**–"**लोगे पूण्णे एक्का वग्गणा जोगस्स त्ति समजोगो त्ति णायव्वो** ।" इति । अयं भावः–समुद्घातस्य चतुर्थसमये लोकप्रमाणनिखिलात्मप्रदेशेषु योगाऽविभागास्तुल्या भवन्ति, न त्वेकोत्तरवृद्धया वर्गणारूपेण तिष्ठन्ति, तेन स्पर्धकान्यपि न भवन्ति । इत्थं सर्वात्मप्रदेशेषु योगाऽविभागानां तुल्यत्वाद् एकैव वर्गणा भवति, ततो योगः सर्वत्र समानो भवति । यदा पञ्चमसमये लोकपूरणमुपसंहृत्य प्रतरं करोति, तदा पुनरेकोत्तरवृद्धया योगाऽविभागा वर्गणारूपेण प्रादुर्भवन्ति, योगस्पर्धकानि लभ्यन्त इत्यर्थः । इत्थं पुनरात्मप्रदेशेषु योगो विषमो भवति ॥२३८॥

अथ लोकपूरणा-ऽवस्थायां स्थितिसत्त्वं जगत्पूरणादीनाञ्च संहरणं व्याजिहीर्षुराह—

**तइयाईणं अंतोमुहुत्तमेत्ता ठिई उ आउत्तो ।**
**संखगुणा तत्तो संहरए जगपूरणाईणि ॥२३९॥**

तृतीयादीनामन्तर्मुहूर्तमात्रा स्थितिस्तु आयुष्टः ।
संख्यगुणा ततः संहरति जगत्पूरणादीनि ॥२३९॥ इति पदसंस्कारः ।

'**तइयाईणं**' इत्यादि, 'तृतीयादीनां' नाम-गोत्र-वेदनीयानां स्थितिरन्तर्मुहूर्तमात्रा भवतीति शेषः, तुः पुनरर्थे भिन्नक्रमश्च, 'आयुष्टः' आयुष्कस्थितितः पुनः संख्यगुणा भवति, अद्याप्यायुषा सह समाना न जातेत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ**–"**लोगे पुण्णे अंतोमुहुत्तं ठिदिं ठवेत्ति, संखेज्जगुणमाउआदो** ।" इति । 卐तथैवा-ऽऽवश्यकचूर्णावपि–"**एवं पूर्णलोकस्य कर्मत्रयसत्कर्म आयुषः सकाशात् संख्येयगुणं जातं अनुभवोऽनन्तः** ।" इति ।

अथ विस्तारितानात्मप्रदेशान् पञ्चमसमयात्प्रभृति प्रतिलोमं संकोचयतीत्येतदभिधित्सुराह–'**तत्तो**' इत्यादि, 'ततः' समुद्घातस्य चतुर्थसमयात् परं 'जगत्पूरणादीनि' जगत्पूरण-प्रतर-कपाट-दण्डरूपाणि 'संहरति' यथोक्तक्रमात् प्रतिलोममुपसंहरति । एतदुक्तं भवति—समुद्घातगतो

---

卐 धवलाकारास्तु महावाचकाऽऽर्यनन्दीनामभिप्रायेणा-ऽऽयुष्कतः शेषकर्माणि संख्येयगुणानि भवन्ति समुद्घातचतुर्थसमये, आर्यमङ्क्षूणामभिप्रायेण पुनरायुष्कतुल्यस्थितिकानि भवन्तीति वदन्ति । अक्षराणि त्वेवम्–"महावाचयाणमज्जमंखुसमणाणमुवदेसेण लोगे पुण्णे आउसमं करेदि । महावाचयाणमज्जणंदीणं उवदेसेण अंतोमुहुत्तं ट्ठवेदि संखेज्जगुणमाउआदो ।" इति ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

जीवः समुद्घातस्य पञ्चमसमयेऽन्तराणां प्रदेशान् संहृत्य प्रतरे तिष्ठति, षष्ठे समये प्रतरस्थः प्रदेशान् संहृत्य कपाटे वर्तते, सप्तमसमये कपाटं संकोच्य दण्डे तिष्ठति, अष्टमसमये तु दण्डं संहृत्य स्वशरीरस्थो भवति, यदुक्तं वाचकमुख्यैः—

**"दण्डं प्रथमे समये कपाटमथ चोत्तरे तथा समये ।**
**मन्थानमथ तृतीये लोकव्यापी चतुर्थे तु ॥१॥**
**संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।**
**सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम् ॥२॥"** इति ॥२३९॥

अथ समुद्घातस्य पञ्चमादिसमयेषु क्रियाविशेषं प्रतिपिपादयिषुरादौ तावत् पञ्चमसमयभाविनं क्रियाविशेषं प्रतिपादयति—

**पंचमसमये पयरे ठान्तो बहुसंखभागपमियठिइं ।**
**नासइ रसं तु रससंतस्स बहुअणंतभागमियं ॥२४०॥**

पञ्चमसमये प्रतरे तिष्ठन् बहुसंख्यभागप्रमितस्थितिम् ।
नाशयति रसं तु रससत्त्वस्य बह्वनन्तभागमितम् ॥२४०॥ इति पदसंस्कारः ।

**'पंचम०'** इत्यादि, 'पञ्चमसमये' समुद्घातस्य पञ्चमसमये 'प्रतरे' जगत्पूरणं संहृत्य प्रतरे तिष्ठन् केवलिभगवान् 'बहुसंख्यभागप्रमितस्थितिं' स्थितिसत्ताया बहून् संख्येयभागान् 'नाशयति' विघातयति, 'रसम्' अनुभागं 'तु' तुः पुनरर्थे, रससत्त्वस्य बह्वनन्तभागमितं नाशयति, **काकाक्षिगोलकन्यायेन** 'नासइ' इति पदस्या-ऽत्राऽपि योजनात् । अयं भावः-चतुर्थसमये परित्यक्तस्य स्थितिसत्कर्मणः संख्येयभागान् कृत्वा पञ्चमसमये प्रतरस्थ एकं संख्येयभागं सत्कर्मण्यवस्थाप्य शेषान् संख्येयान् भागान् विनाशयति, तथा प्राङ्मुक्तस्या-ऽनुभागस्या-ऽनन्तान् भागान् कृत्वैकमनन्ततमभागं सत्कर्मण्यवस्थाप्य शेषान् बहूननन्तभागान् विनाशयति, यदभिहितम् आवश्यकचूर्णौ—**"अतश्चतुर्थसमयघातितस्थितिसत्कर्मणः सकाशात् या असंख्येयभागप्रमाणाऽवशिष्टा स्थितिरवतिष्ठत इत्युक्तं, सा बुद्ध्या संख्येया भागाः क्रियन्ते । पंचमसमये प्रतरस्थः संख्येयान् भागान् हन्ति, संख्येयभागोऽवतिष्ठते, चतुर्थसमयघातिताऽनुभवसकाशात् अनन्तोऽवशिष्टो-ऽनुभवो-ऽवतिष्ठते इत्युक्तं असावपि बुद्ध्या अनन्ता भागाः क्रियन्ते, तस्य पंचमसमये प्रतरस्थोऽनन्तान् भागान् हन्ति, अनन्तभागोऽवतिष्ठते ।"** इति ॥२४०॥

अधुना समुद्घाताद्धायाः षष्ठे समये कार्यविशेषं प्रतिपादयति—

**छट्ठखणे ठान्तो उ कवाडम्मि ठिइं रसं य पुव्वव्व ।**
**नासइ ठिइरसघायद्धा खलु अंतोमुहुत्तमिआ ॥२४१॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठक्षणे तिष्ठंस्तु कपाटे स्थितिं रसं च पूर्ववत् ।
नाशयति स्थितिरसघाताद्धा खल्वन्तर्मुहूर्तमिता ॥२४१॥ इति पदसंस्कारः ।

'छट्ठखणे' इत्यादि, 'षष्ठक्षणे' समुद्घातकरणस्य षष्ठे समये 'कपाटे' प्रतरं संक्षिप्य कपाटे तिष्ठंस्तु स्थितिं रसं च पूर्ववद् नाशयति । प्रागेकसामयिकी स्थितिघाताद्धा रसघाताद्धा चाऽऽसीत्, अतः प्रभृति यो विशेषः, तं दर्शयति–'ठिइ०' इत्यादि, अद्धापदस्य प्रत्येकं सम्बन्धात् स्थितिघाताद्धा रसघाताद्धा च 'खलु' निश्चयेन 'अन्तर्मुहूर्तमिता' अन्तर्मुहूर्तप्रमाणा भवति, न तु सामयिकी । अयमस्य भावः–पञ्चमे समये सत्कर्मणि स्थापितस्थितेः सङ्ख्येयान् भागान् कृत्वा षष्ठे समये कपाटस्थ एकं संख्येयभागं तत्रैव विमुच्य शेषान् संख्येयान् भागान् घातयितुमुपक्रमते, तेभ्यः प्रतिसमयं कतिपयं दलमुत्किरति, अन्तर्मुहूर्ते पूर्णे तु संख्यातभागाः निःशेषतो घात्यन्ते, तेन सप्तमादिसमयेष्वभिनवस्थितिं घातयितुं न गृह्णाति, किन्तु प्राग् गृहीतामेव दलिकोत्करणेन घातयति । तथा पञ्चमसमये मुक्त्वाऽनुभागस्याऽनन्तान् भागान् कृत्वा षष्ठे समये कपाटस्थ एकमनन्ततमभागं सत्कर्मण्येव निधाय शेषाननन्तान् भागान् घातयितुमुपक्रमते, अन्तर्मुहूर्तकालेन निरशेषतो विनाशयति, प्राक्तनेषु पञ्चसु समयेषु तु स्थितिघाताद्धा रसघाताद्धा चैकसामयिकी समासीत् । उक्तं चाऽऽवश्यकचूर्णौ–"**एषु दण्डकादिषु पंचसु समयेषु सामायिकं कण्डकमुत्कीर्णमितिकृत्वा समये समये स्थित्यनुभवघातो ज्ञेयः । अथ किमिदं कण्डकमिति प्रश्ने ब्रूमहे-कण्डकमिव कण्डकं, कः उपमार्थः ? यथा लोके तरोः खण्डभागः अंशः कण्डकमित्यभिधीयते, तथा कर्मतरोरपि खण्डं कण्डकमिति सिद्धं, अतः परं षष्ठसमयादारभ्य स्थितिकण्डकमनुभागकण्डकं वा अन्तर्मुहूर्तकमुत्किरति । कण्डकं यतः किरति-क्षिपति-विनाशयतीत्यर्थः ।**" इति ।

**कषायप्राभृतचूर्णिकाराणामभिप्रायेण** दण्डादीनि कुर्वतः समयचतुष्टये स्थितिघातकालोऽनुभागघातकालश्चैकसामयिकः, पञ्चमसमयात्प्रभृति त्वान्तर्मौहूर्तिकः । तथा च तद्ग्रन्थः–"**एदेसु चदुसु समएसु अप्पसत्थकम्मंसाणमणुभागस्स अणुसमयओवट्टणा, एगसमइओ ट्ठिदिखंडयस्स घादो । एत्तो सेसिगाए ठिदीए संखेज्जे भागे हणइ । सेसस्स अणुभागस्स अणंते भागे हणइ । एत्तो पाए ट्ठिदिखंडयस्स अणुभागखंडयस्स च अंतोमुहुत्तिया उक्कीरणद्धा ।**" इति । तत्त्वं तु केवलिनो बहुश्रुता वा विदन्ति ॥२४१॥

इदानीं सप्तमसमये-ऽष्टमसमये चाऽवस्थाविशेषं समुद्घातसमयाष्टके च योगं चिन्तयति–

**सत्तमसमये दंडे ठाअइ अट्ठमखणे सरीरत्थो ।**
**पढमट्ठमसमयेसुं जोगो ओरालिओ होइ ॥२४२॥**
**सत्तम-छट्ठ-विइयसमयेसुं मिस्सो य कम्मणो जोगो ।**
**तइय-तुरिय-पंचमसमयेसु निरुम्भेइ तो जोगं ॥२४३॥**

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

सप्तमसमये दण्डे तिष्ठत्यष्टमक्षणे शरीरस्थः ।
प्रथमाऽष्टमसमययोर्योग औदारिको भवति ॥२४२॥
सप्तम-षष्ठ-द्वितीयसमयेषु मिश्रश्च कार्मणो योगः ।
तृतीय-तुरिय-पञ्चमसमयेषु निरुणद्धि ततो योगम् ॥२४३॥ इति पदसंस्कारः ।

**'सत्तम०'** इत्यादि, 'सप्तमसमये' समुद्घातस्य सप्तमसमये 'दण्डे' कपाटं संहृत्य दण्डे तिष्ठति, दण्डस्थस्य महात्मनः स्थितिघातोऽनुभागघातश्च पूर्वारब्धा एव प्रवर्तेते, तयोरद्धाया आन्तर्मौहूर्तिकत्वात् ।

**'अट्ठम०'** इत्यादि, तत्र 'अष्टमक्षणे' समुद्घातस्या-ऽष्टमे समये 'शरीरस्थः' स्वशरीरप्रविष्टा-ऽऽत्मप्रदेशको भवतीति शेषः । अत्रा-ऽपि स्थितिघातोऽनुभागघातश्च पूर्वारब्धा एव प्रवर्तेते । अन्तर्मुहूर्ते पूर्णे स्थितिघातोऽनुभागघातश्च पूर्णौ भवतः । ततः पुनरन्यत्स्थितिखण्डमनुभागखण्डं च घातयितुमुपक्रमते । तच्चा-ऽन्तर्मुहूर्तकालेन निःशेषतो विनाशयति । एवमान्तर्मौहूर्तिकः स्थितिघातकालोऽनुभागघातकालश्च तावदवगन्तव्यौ, यावत् सयोगिगुणस्थानकचरमसमयः । तावति कालेऽमूनि सर्वाणि स्थितिखण्डान्यनुभागखण्डानि च संख्येयानि व्यतिक्रामन्ति, यदभिहितम् आवश्यकचूर्णौ–**"तदनेन विधिना-ऽन्तर्मुहूर्तपूरणचरमसमयाऽनन्तरमेव कृत्स्नं कण्डकं उत्कीर्णमित्यवसेयं उत्कीर्णं नष्टमित्यर्थः । एवं प्रतिसमयमन्तर्मुहूर्तिकः स्थित्यनुभवकण्डकघातको ज्ञेयः तावद्यावत् सयोगिनोऽन्त्यसमय इति । एवमेतानि सर्वाण्यपि संख्येयानि स्थित्यनुभवकण्डकानि ज्ञेयानि ।"** इति ।

तावत्काले सर्वाण्यमूनि स्थितिकण्डकान्यनुभागकण्डकानि चा-ऽसंख्येयानि व्यतिक्रामन्तीति ग्रन्थान्तरे दृश्यते, तथा चात्र श्री**मलयगिरीया-ऽऽवश्यकवृत्तिः–"अतः परं षष्ठसमयादारभ्य स्थितिकण्डकमनुभागकण्डकं चाऽन्तर्मुहूर्तेन कालेन विनाशयति, षष्ठादिषु च समयेषु कण्डकस्य प्रतिसमयमेकैकं शकलं तावदुत्किरति, यावदन्तर्मुहूर्तचरमसमये सकलमपि तत्कण्डकमुत्कीर्णं भवति । एवमन्तर्मुहूर्तिकानि स्थितिकण्डकान्यनुभागकण्डकानि च घातयन् तावद्वेदितव्यः, यावत्सयोग्यवस्थाचरमसमयः । सर्वाण्यपि चामूनि स्थित्यनुभागकण्डकान्यसंख्येयान्यवगन्तव्यानि।"** इति । तत् त्वशुद्धं प्रतिभाति, स्थितिखण्डस्या-ऽऽवलिका-ऽसंख्येयभागमात्रत्वस्वीकारप्रसङ्गात् । कथम् ? इति चेद्, उच्यते–समुद्घातचतुर्थसमये वेदनीयादीनां कर्मणां स्थितिसत्त्वमायुष्कस्थितिसत्कर्मतः संख्येयगुणं जायते । तच्च दर्शित**मेकोनचत्वारिंशदधिकद्विशततम**गाथया । आयुष्कस्थितिसत्कर्म त्वन्तर्मुहूर्तप्रमाणं भवति,अन्तर्मुहूर्तमात्र आयुषि शेषे समुद्घातारम्भात् । तेन वेदनीयादीनां स्थितिसत्कर्म समुद्घातपञ्चमादिसमयेषु संख्येयावलिकातोऽधिकं न भवति । यदि समुद्घातभवनात् परमसंख्येयानि स्थितिखण्डानि व्यतिक्रमेयुः, तर्हि संख्येयावलि-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कानामसंख्येयैर्विभजनादेकस्थितिखण्डमावलिकाऽसंख्येयभागमात्रं स्यात् । तस्मात् संख्येयस्थिति-खण्डानि व्यतिक्रामन्तीत्यावश्यकचूर्णिकारादीनां वचनं न्याय्यं प्रतीयते । एवमनुभाग-खण्डान्यपि संख्येयानि प्रकारान्तरेण साधयितव्यानि ।

अथ समुद्घातावस्थायां योगश्चिन्त्यते–न तावद् मनोयोगो वाग्योगो वा संभवति, प्रयोजना-ऽभावात् । उक्तं च **धर्मसारप्रकरणे—"मनोवचसी तु तदा न व्यापारयति, प्रयोजना-ऽभावात् ।"** इति । तथैव **आवश्यकचूर्ण्यामपि—"तत्थ समुग्घातस्स मणवइजोगो णत्थि ।"** इति । काययोगो-ऽप्यौदारिकादिर्ना-ऽवस्थितः सर्वेषु समयेषु, किं तर्हि ? इत्याह— **'पढम०'** इत्यादि, 'प्रथमाष्टमसमययोः' समुद्घातस्य प्रथमसमये-ऽष्टमसमये च 'योग औदा-रिकः' औदारिककाययोगो भवति ।

**'सत्तम०'** इत्यादि, 'सप्तम-षष्ठ-द्वितीयसमयेषु' समुद्घातप्रतिपन्नस्य सप्तमसमये षष्ठसमये द्वितीयसमये च 'मिश्रः' औदारिकमिश्रकाययोगो भवति । चकारः समुच्चये, स चोत्तरत्र योज्यः । **'कम्मणो'** इत्यादि, तत्र 'तृतीय-तुरिय-पञ्चमसमयेषु' समुद्घातं गतस्य जीवस्य तृतीयस-मये चतुर्थसमये पञ्चमसमये च 'कार्मणो योगः' कार्मणकाययोगो भवति, बहिरेवौदारिकाद् बहुतरव्या-पारसद्भावेन कार्मणकाययोगमात्रचेष्टनात् । कार्मणकाययोगी च नियमतोऽनाहारको भवति । तेन तृतीय-चतुर्थ-पञ्चमसमयेषु समुद्घातगतो नियमतो-ऽनाहारको भवति । उक्तञ्चो**मास्वातिपादैः**–

**"औदारिकप्रयोक्ता प्रथमाष्टमसमययोरसाविष्टः ।**
**मिश्रौदारिकयोक्ता सप्तम-षष्ठ-द्वितीयेषु ॥१॥**
**कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च ।**
**समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ॥२॥"** इति ।

**एवं भाष्यकृद्भिरपि—**

**"न किर समुग्घायगओ मणवइजोगप्पओयणं कुणइ ।**
**ओरालियजोगं पुण जुंजइ पढमट्ठमे समए ॥१॥**
**उभयव्वावाराओ तम्मीसं बीय-छट्ठ-सत्तमए ।**
**ति-चउत्थ-पंचमे कम्मयं तु तम्मत्तचेट्ठाओ ॥२॥"** इति

'निरुम्भइ' इत्यादि, तत्र **'तो'** त्ति 'ततः' समुद्घातनिवृत्तितः परं **'जोगं'** ति मनोवा-क्काययोगलक्षणं योगं निरुणद्धि । अयं भावः–समाप्तसमुद्घातः केवली भगवान् कारणवशाद् योगत्रयं प्रयुङ्क्ते । कथम् ? इति चेत्, उच्यते-अनुत्तरसुरादिपृष्टः सत्यमसत्यामृषं वा मनोयोगं प्रयुङ्क्ते, आमन्त्रणादौ सत्यमसत्यामृषं वा वाग्योगं प्रयुङ्क्ते, काययोगञ्च फलकप्रत्यर्पणादौ । न्यगादि च **भाष्यकारैः**–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विणिवत्तसमुग्घाओ तिन्नि वि जोए जिणो पउंजेज्ज ।
सच्चमसच्चामोसं च सो मणं तह वईजोगं ॥१॥
ओरालियकाओगं गमणाइं पाडिहारियाणं वा ।
पच्चप्पणं करेज्जा जोगनिरोहं तओ कुरुए ॥२॥" इति ।

एवमावश्यकचूर्णिकारैरप्युक्तम्–"ततो पडियागतो तिविहं पि जोगं जुंजति, वइजोगस्स सच्चाइजोगं जुंजति, चउत्थं आमंतणादी, मणे वि एते चेव जोगे दोण्णि, ते पुण किह होज्ज ? मणसा पुच्छेज्ज कोइ, तेसिं मणसा वागरेति, अणुत्तरो अण्गो वा देवमणुयो, कायजोगं गच्छेज्ज वा चिट्ठणट्ठाणणिसीयणतुयट्टणाणि गच्छणे उक्खेवणसंखेवणउल्लंघणपल्लंघणतिरियणिक्खेवणादीणि, पाडिहारियं वा पीठकादि पच्चप्पिणेज्जा ।" इति । अयं सयोगी केवली भगवान् निर्वाणं यियासुः समुद्घाततः प्रतिनिवृत्तोऽन्तर्मुहूर्तमास्ते, ततो योगं निरोद्धुं प्रयतते । कुतः ? इति चेत् ? उच्यते–सति योगे द्विसामयिकस्थितिकस्य सातवेदनीयकर्मबन्धस्य प्रवृत्तत्वेन कर्मादानसन्ततिसद्भावादात्मनो मोक्षो न स्यात् । अतो योगनिमित्तकबन्धरोधार्थं लेश्यानिरोधार्थं च योगनिरोधमारभते, यदभ्यधायि सिद्धसेनीयतत्त्वार्थवृत्तौ–

स ततो योगनिरोधं करोति लेश्यानिरोधमभिकाङ्क्षन् ।
समसमयस्थितिबन्धं योगनिमित्तं स हि रुरुत्सन् ॥१॥
समये समये कर्मादाने सति सन्ततेर्न मोक्षः स्यात् ।
यद्यपि हि न मुच्यन्ते, स्थितिक्षयात् पूर्वकर्माणि ॥२॥
नोकर्मणाणि वीर्यं योगद्रव्येण भवति जीवस्य ।
तस्याऽवस्थाने ननु सिद्धः समयस्थितिर्बन्धः ॥३॥" इति ।

तत्र योगनिरोधव्याख्यानं द्विविधम्, संक्षेपविस्तरभेदात् । संक्षिप्तव्याख्यानं मूले न दर्शितम्, सुगमत्वात् । तथाहि–समुद्घाततो निवृत्तो-ऽन्तर्मुहूर्ते गते योगनिरोधं कुर्वन् प्रथममेव याऽसौ शरीरसम्बद्धा मनःपर्याप्तिः, यया त्र पूर्वं मनोद्रव्यग्रहणं कृत्वा भावमनः प्रयुक्तवान्, कर्मसंयोगविघटनाय मन्त्रसामर्थ्येन विषमिव स भगवाननुत्तरेणा-ऽचिन्त्येन निरावरणेन करणवीर्येण तद्व्यापारं निरुणद्धि । तद्यथा–पर्याप्तसंज्ञिपञ्चेन्द्रियजघन्ययोगिनो यो मनोयोगो भवति, ततो-ऽप्यसंख्येयगुणहीनं मनोयोगं प्रतिसमयं निरुन्धन्नन्तर्मुहूर्तेन कालेन सर्वथा निरुणद्धि । ततः पर्याप्तद्वीन्द्रियजघन्यवचनयोगतो-ऽसंख्येयगुणहीनं वचनयोगं प्रतिसमयं निरुन्धानोऽन्तर्मुहूर्तकालेन निःशेषतो निरुणद्धि । एवं प्रथमसमयोत्पन्नसूक्ष्मपनकस्य जघन्ययोगतोऽसंख्येयगुणहीनं काययोगं प्रतिसमयं निरुन्धानोऽन्तर्मुहूर्तेन सर्वथा निरुणद्धि, यदुक्तं विशेषावश्यकभाष्ये–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पज्जत्तमित्तसन्निस्स जत्तियाइं जहन्नजोगिस्स ।
होंति मणोदव्वाइं तव्वावारो य जम्मत्तो ॥१॥
तदसंखगुणविहीणं समए समए निरुंभमाणो सो ।
मणसो सव्वनिरोहं कुणइ असंखेज्जसमएहिं ॥२॥
पज्जत्तमेत्तबिंदियजहन्नवइजोगपज्जया जे उ ।
तदसंखगुणविहीणे समए समए निरुंभंतो ॥३॥
सव्ववइजोगरोहं संखाईएहिं कुणइ समएहिं ।
तत्तो य सुहुमपणयस्स पढमसमयोववन्नस्स ॥४॥
जो किर जहन्नजोगो तदसंखेज्जगुणहीणमेक्केक्के ।
समए निरुंभमाणो देहतिभागं च मुंचंतो ॥५॥
रुंभइ स कायजोगं संखाईएहिं चेव समएहिं ।
तो कयजोगनिरोहो सेलेसीभावयामेइ ॥६॥" इति ।

तथैवोक्तं प्रज्ञापनायामपि–"से णं भंते ! जहा सजोगी सिज्झति जाव अंतं करेति ? गो० ! नो इणट्ठे समट्ठे, से णं पुव्वमेव सण्णिस्स पंचिंदियपज्जत्तयस्स जहण्णजोगिस्स हेट्ठा असंखेज्जगुणपरिहीणं पढमं मणजोगं निरुंभति, ततो अणंतरं बेइंदियपज्जत्तगस्स जहण्णजोगिस्स हेट्ठा असंखिज्जगुणपरिहीणं दोच्चं वतिजोगं निरुंभति । ततो अणंतरं च णं सुहुमस्स पणगजीवस्स अपज्जत्तयस्स जहण्णजोगिस्स हेट्ठा असंखेज्जगुणपरिहीणं तच्चं कायजोगं निरुंभति ।" इति ।

योगनिरोधस्य विस्तृतव्याख्याने तु द्विविध उपदेश,एकस्तावदावश्यकचूर्णिकारादीनाम्, अपरः पुनः कषायप्राभृतचूर्णिकारादीनाम् । इहा-ऽऽवश्यकचूर्णिकारादीनामभिप्रायेण योगनिरोधं विस्तरतः प्रथमं व्याख्यास्यते, ततः कषायप्राभृतचूर्णिकारादीनां मतेन । ननु द्विविध उपदेशः प्रामाणिको भवितुं ना-ऽर्हति, तीर्थकृद्गणधरादीनामेकतरस्यैवोपदेशस्य संभवेन तस्यैव प्रामाण्यसंभवादिति चेत्, उच्यते–सत्यमेतद्-तीर्थकृदादीनामेकतर एवोपदेश आसीदिति । किन्तु सम्प्रति केवलिनः श्रुतकेवलिनश्चाभावाद् न के-ऽप्याचार्या इदं वक्तुं समर्थाः, अयमेवोपदेशः सत्यः, अन्यो-ऽसत्य इति । तेन यथासम्प्रदायमुपदेशः प्राप्तः, तथैव तं समर्थयन्ति । अत उभावप्युपदेशौ शास्त्रे निबद्धव्यौ, अन्यथैकतरस्य निबन्धनेनेतरस्योपदेशस्य लोपः प्रसज्येत, न चेष्टापत्तिः, केवलिश्रुतकेवलिविरहेणैदंयुगीनानाञ्चा-ऽऽचार्याणां तथाविधविशिष्टज्ञानाभावेना-ऽसत्येतरोपदेशलोपस्या-ऽनिवारणात् ॥२४२-२४३॥

अथ प्रथमत आवश्यकचूर्णिकारादीनां मतेन योगनिरोधं विभणिषुराह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बायरवय-मण-उस्सास-कायजोगा निरुम्भइ कमेण ।**
**तत्तो सुहुमवयण-मण-तनुजोगा त्ति इगउवएसो ॥२४४॥**

बादरवचो-मन-उच्छ्वास-काययोगान् निरुणद्धि क्रमेण ।
ततः सूक्ष्मवचन-मनस्तनुयोगानित्येकोपदेशः ॥२४४॥ इति पदसंस्कारः ।

**'बायर०'** इत्यादि, 'बादरवचो-मन-उच्छ्वास-काययोगान्' समुद्घातं गत्वाऽगत्वा वा बादरवचोयोगं बादरमनोयोगमुच्छ्वासं बादरकाययोगं च 'क्रमेण' परिपाट्या निरुणद्धि । **'तत्तो'** त्ति 'ततः' बादरयोगनिरोधतः परं 'सूक्ष्मवचन-मनस्तनुयोगान्' **"द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकं सम्बध्यते ।"** इति न्यायात् सूक्ष्मवचनयोगं सूक्ष्ममनोयोगं सूक्ष्मतनुयोगं च क्रमेण निरुणद्धि, 'इति' इतिशब्दः समाप्तिद्योतकः, समाप्तः'एक उपदेशः' **आवश्यकचूर्णिकारादीनाम**भिप्रायः । अयं भावः-समुद्घातं परिसमाप्य समुद्घातमप्रतिपन्नस्त्वायोजिकाकरणं विधायाऽन्तर्मुहूर्तं गत्वा केवली भगवान् बादरकाययोगबलेन बादरवचनयोगं निरोद्धुमुपक्रमते, अन्तर्मुहूर्तेन कालेन वचनयोगं सर्वथा निरुणद्धि । ततोऽन्तर्मुहूर्तमास्ते, योगनिरोधं न करोतीत्यर्थः । ततो बादरकाययोगोपष्टम्भाद् बादरमनोयोगं निरोद्धुमारभते, अन्तर्मुहूर्तकालेन निःशेषतो बादरमनोयोगं निरुणद्धि । उक्तं च **तत्त्वार्थवृत्तौ—**

**"बादरतन्वा पूर्वं वाङ्मनसे बादरे स निरुणद्धि क्रमेणैव ।**
**आलम्बनाय करणं हि तदिष्टं तत्र वीर्यवतः ॥१॥"** इति ।

मनोयोगनिरोधानन्तरमन्तर्मुहूर्तं स्थित्वा बादरकाययोगबलेनोच्छ्वासं निरोद्धुमुपक्रमते, अन्तर्मुहूर्तकालेन चोच्छ्वासं सर्वात्मना निरुणद्धि । ततोऽन्तर्मुहूर्तं विश्रम्य बादरकाययोगबलेन बादरकाययोगं निरोद्धुं प्रवर्तते, अन्तर्मुहूर्तकालेन तं सर्वात्मना निरुणद्धि, यदुक्तम् आवश्यकचूर्णौ–**"ततः स्वशरीरं प्रविष्टोऽन्तर्मुहूर्तमास्ते, तत उपर्यनन्तरसमय एव बादरवाग्योगान् रोद्धुमारब्धः, ततोऽन्तर्मुहूर्तपूरणसमय एव बादरकाययोगबलाधानाद् बादरवाग्योगो निरुध्यमानो निरुद्धः, ततो बादरवाग्योगं निरुध्याऽन्तर्मुहूर्तमास्ते, न बादरयोगनिरोधः प्रवर्तत इत्यर्थः, तत उपर्यनन्तरं बादरमनोयोगं निरोद्धुमारब्धः, ततोऽन्तर्मुहूर्तस्याऽन्त्ये समये बादरकाययोगोपष्टंभात् बादरमनोयोगो निरुध्यमानो निरुद्धः । ततोऽन्तर्मुहूर्तं स्थित्वोपर्यनन्तरसमय एव उच्छ्वासनिःश्वासौ निरोद्धुमारब्धः, ततोऽन्तर्मुहूर्तस्याऽन्त्ये समये बादरकाययोगोपष्टम्भात् उच्छ्वासनिःश्वासौ निरुध्यमानौ निरुद्धौ, ततोऽन्तर्मुहूर्तं स्थित्वोपर्यनन्तरसमय एव बादरकाययोगं निरोद्धुमारब्धः, ततोऽन्तर्मुहूर्तस्याऽन्त्ये समये बादरकाययोगो निरुध्यमानो निरुद्धः, तत्स्थः तमेव क्षपयतीत्ति**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अयुक्तमिति चेत्, न, दृष्टत्वात्, तद्यथा—कारपत्रिकः क्रकचेन स्तंभे छिदिक्रियां प्रारभमाणः तत्स्थस्तमेव छिनत्ति, तथा काययोगोपष्टंभात् काययोगनिरोधो-ऽप्यवसेयः।"** इति ।

अत्र **श्रीशतकचूर्णिकारादयस्तु** सूक्ष्मकाययोगोपष्टम्भेन बादरकाययोगं निरुणद्धीत्यभिदधते । तथा चा-ऽत्र **श्रीशतकचूर्णिः**—

**"बादरतणुमवि णिरुणद्धि तओ सुहुमेण कायजोगेण ।**
**ण णिरुज्झए उ सुहुमो जोगो सइ बायरे जोगे ॥१॥"** इति ।

बादरकाययोगनिरोधप्रथमसमयतः प्रभृत्यन्तर्मुहूर्तं यावत् पूर्वस्पर्धकानामधस्ताद् योगस्याऽपूर्वस्पर्धकानि करोति । तत ऊर्ध्वं योगस्य किट्टीः कर्तुमारभते, अन्तर्मुहूर्तकालेन च सर्वेषां पूर्वा-ऽपूर्वस्पर्धकानां किट्टीः करोति, योगस्पर्धकानि च स्वरूपतो निश्शेषं नाशयति, यदुक्तं **श्रीतत्त्वार्थवृत्तौ**—

**"नाशयति काययोगं स्थूलं सोऽपूर्वफड्डकीकृत्य ।**
**शेषस्य काययोगस्य तथा किट्टीश्च स करोति ॥१॥"** इति 卐 ।

किट्टिकरणचरमसमयादनन्तरमन्तर्मुहूर्तं यावत् किट्टिगतयोगो भवति, तदानीं च न किञ्चिदपि करोति, यदुक्तं श्रीमन्**मलयगिरिपादैः पञ्चसंग्रहवृत्तौ**—**"किट्टिकरणा-ऽवसानानन्तरं च पूर्वस्पर्धकान्यपूर्वस्पर्धकानि च नाशयति । तत्समयादारभ्य च अन्तर्मुहूर्तं यावत् किट्टिगतयोगो भवति । न चात्र किञ्चिदपि करोति ।"** इति । ततः सूक्ष्मकाययोगबलेन सूक्ष्मवचनयोगं निरोद्धुमारभते, अन्तर्मुहूर्तेन च कालेन सर्वथा निरुणद्धि । ततो-ऽन्तर्मुहूर्तमास्ते, नाऽन्यसूक्ष्मयोगनिरोधे प्रयतते, ततः सूक्ष्मकाययोगबलाधानात् सूक्ष्ममनोयोगं निरोद्धुमारभते । अन्तर्मुहूर्तकालेन सूक्ष्ममनोयोगं सर्वात्मना निरुणद्धि, निरुद्धसूक्ष्ममनोयोगो-ऽन्तर्मुहूर्तमास्ते, अन्ययोगनिरोधं न करोति । ततोऽन्तर्मुहूर्तप्रमाणकालस्योपर्यनन्तरसमये सूक्ष्मकाययोगोपष्टम्भात् सूक्ष्मकाययोगं निरोद्धुमारभते, उक्तं च **आवश्यकचूर्णौ—"अत्र काययोगं निरुंधन् पूर्वस्पद्र्धकानामधस्तादपूर्वस्पद्र्धकानि करोति । अथ किमिदं स्पद्र्धकमिति प्रश्ने व्याचक्ष्महे-स्पर्धकमिव स्पद्र्धकं, क उपमार्थः ? यथा लोके शालिफलककाणशानां समुदायात् मुष्टिर्भवति, या स्पद्र्धकमिति शब्द्यते, कथमिति तद्विवृणमहे-'स्पर्द्ध-संहर्षे' इति शब्दाद् भवति स्पर्धकं संहर्षः समुदायः पिण्ड**

---

卐 मूला-ऽऽराधनकारा अपि सूक्ष्मकाययोगबलेन बादरकाययोगं निरुणद्धीति मन्यन्ते, तथा च तद्ग्रन्थः—

''बादरवचिजोगं बादरेण कायेण बादरमणं च ।
बादरकायं पि तधा रुंभदि सुहुमेण काएण ॥१॥'' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यनर्थान्तरं, अथ केषां संघर्ष इति प्रश्ने व्याचक्ष्महे-इह यथा बहूनां समुदायः क्षणे (कंडके) संभवति। बहूनां च काण्डकस्थकाणशानां [शालिफलकणानां] समुदायात् मुष्टिरिति भवति, तथा शालिफलकणतुल्यानामसंख्येयानां लोकानां ये प्रदेशास्तत्प्रमाणप्रमितानामविभागपरिच्छेदानां भावपरमाणुसंज्ञितानां समुदायात् काणसतुल्या वर्गणा भवति। एवमसंख्येया वर्गणा श्रेण्या असंख्येयभागप्रमाणा एकजीवे भवन्ति। तासां च बहुकाण्डस्थकणकाणशसमुदायोत्पन्नमुष्टितुल्यानां असंख्येयानां वर्गणानां श्रेण्याः असंख्येयभागमात्राणां समुदायादेकं स्पर्द्धकं भवति। एवमसंख्येयानि स्पर्द्धकानि श्रेण्या असंख्येयभागमात्राण्येकजीवे सन्ति।

अथ किमिदं पूर्वस्पर्द्धकानि अपूर्वस्पर्द्धकानीति च प्रश्ने व्याचक्ष्महे-यानि पर्याप्तिपर्यायेण परिणमितात्मना पूर्वमेव योगनिर्वर्तनार्थमुपात्तानि, यानि चानादौ संसारे पुनः पुनर्योगनिर्वृत्त्यर्थं पूर्वमुपात्तान्यात्मना, तानि पूर्वस्पर्धकानि इत्यभिधीयंते, तानि च स्थूलानि। यान्यधुना क्रियन्ते, तानि सूक्ष्माणि, न च तथालक्षणानि अनादौ संसारे परिभ्रमता आत्मना कदाचिदप्युपात्तानि इत्यतोऽपूर्वस्पर्धकानि व्याख्यायन्ते।

अथाऽपूर्वस्पर्धककरणे को विधिरिति प्रश्नेऽभिदध्महे-अधस्तात्पूर्वस्पर्द्धकानामादिवर्गणा यास्तासां अविभागपरिच्छेदा ये, तेषामयं योगजधर्मानुग्रहादसंख्येयान् भागानाकर्षति, असंख्येयभागं स्थापयति, जीवप्रदेशानामपि च असंख्येयभागमात्रं कर्षति *, असंख्येयान् भागान् स्थापयति, एवं प्रथमसमये, द्वितीयसमये प्रथमसमयाकृष्टाविभागपरिच्छेदानां असंख्येयेभ्यो भागेभ्यः सकाशादसंख्येयगुणहीनं भागमाकर्षयति, असंख्येयभागमाकर्षयतीत्यर्थः, जीवप्रदेशानामपि च प्रथमसमयाकृष्टजीवप्रदेशासंख्येयभागसकाशादसंख्येयगुणभागमाकर्षयति, असंख्येयभागानाकर्षयतीत्यर्थः। एतेन विधिना-ऽऽकृष्य योगजधर्मानुग्रहादपूर्वस्पर्धकानि करोति। एवं समये समये भागं करोति, यावत्पूर्णोऽन्त-

* ननु किं नाम जीवप्रदेशानामाकर्षणम् ? न चा-ऽऽत्मप्रदेशानामवगाहनां द्वित्रिभागप्रमाणां कर्तुं जीवप्रदेशानां सङ्कोचनं तदिति वाच्यम्, सूक्ष्मक्रिया-ऽप्रतिपातिध्यानसामर्थ्येन निरुक्ताऽवगाहनानिर्वृत्तेर्वक्ष्यमाणत्वादिति चेत्, उच्यते—प्रथमसमयेऽसंख्येयभागमात्रजीवप्रदेशान् पूर्वस्पर्धकप्रथमवर्गणातोऽसंख्येयगुणहीने योगे परिणमयति, ततो-ऽसंख्येयगुणाञ्जीवप्रदेशान् पूर्वस्पर्धकप्रथमवर्गणातो-ऽसंख्येयगुणहीने योगे द्वितीयस्मिन् समये परिणमयति, ततोऽप्यसंख्येयगुणाञ्जीवप्रदेशांस्तृतीयसमये। एवमग्रेऽपि। इत्थं हीने हीनतरे योगे जीवप्रदेशानां परिणमनं जीवप्रदेशानामाकर्षणमुच्यते, योगस्या-ऽल्पीकरणं तु योगाऽविभागानामाकर्षणं भण्यत इत्यलं विस्तरेण।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुहूर्त इति । कियन्ति पुनः स्पर्धकानि करोतीति प्रश्ने ब्रूमहे–श्रेण्या असंख्येय-भागमात्राणि, श्रेणिवर्गमूलस्या-ऽप्यसंख्येयभागमात्राणि, पूर्वस्पर्धकानामप्य-संख्येयभागमात्राणि । एवमपूर्वस्पर्धककरणे समाप्ते अत ऊर्ध्वमुपर्यनन्तरसमय-मेव कृष्टीः कर्तुमारब्धोऽन्तर्मुहूर्तेन सर्वाः करोति ।

अथ किमिदं कृष्टिरिति प्रश्नेऽभिधीयते, कर्मणः कर्शनं कृष्टिः, अल्पी-करणमित्यर्थः, अथ कृष्टेः करणे को विधिरिति प्रश्ने व्याचक्ष्महे–पूर्वस्पर्धकाना-मपूर्वस्पर्धकानां चाधस्तात् या आदिवर्गणाः, तासामविभागपरिच्छेदा ये, तेषामयं योगजधर्मानुग्रहात् असंख्येयान् भागान् कर्षति, असंख्येयभागं स्थापयति । जीव-प्रदेशानामप्यसंख्येयान् भागान् कर्षति, असंख्येयं भागं स्थापयति । एवमा-कृष्याकृष्य प्रथमसमये कृष्टीः करोति । अथ द्वितीयसमये प्रथमसमयाकृष्टा-नामविभागपरिच्छेदानामसंख्येयेभ्यो भागेभ्यः सकाशात् असंख्येयगुणहीनं भागमाकर्षयति, असंख्येयभागमाकर्षयतीत्यर्थः, जीवप्रदेशानामपि प्रथमसमया-कृष्टजीवप्रदेशासंख्येयभागसकाशादसंख्येयगुणं भागमाकर्षयति, असंख्येयान् भागानाकर्षयतीत्यर्थः । एवमनेन विधिना-ऽऽकृष्या-ऽऽकृष्य कृष्टीः करोति । एवं समये२ कृष्टयः क्रियमाणाः क्रियन्ते तावद्यावच्चरमसमयकृष्टिरिति । तत्र प्रथमसमयाः (...ये) कृष्टयः कृता असंख्येयगुणास्ततो द्वितीयसमये असंख्येयगुण-हीनाः । एवं समये समये असंख्येयगुणहीनया श्रेण्या कृतास्तावद्यावदन्तर्मुहूर्त इति, तत्र याः कृष्टयः प्रथमसमयकृतास्ता असंख्येयगुणाः कृताः द्वितीयसमयकृ-ताभ्यः सकाशाद् ।

अथ याः द्वितीयसमयकृतास्ताः प्रथमसमयकृतकृष्टिप्रमाणाः कथं भवंतीति प्रश्नेऽभिधीयते–पल्योपमस्य(...स्या-)संख्येयभागेन गुणिताः प्रथमसमयकृताः कृष्टयः श्रेण्या असंख्येयभागप्रमाणाः, एवं द्वितीयादिष्वपि समयेषु श्रेण्या असंख्येयभागप्रमाणाः तावद्यावत्कृष्टिकरणस्या-ऽन्तसमय इति एवं सर्वा अपि कृष्टयः श्रेण्या असंख्येयभागप्रमाणाः पूर्वस्पर्धकेभ्योऽपूर्वस्पर्धकेभ्यश्चासंख्येयभाग इति । सर्वासां कृष्टीनामसङ्ख्येयभागप्रमाणतुल्यत्वात् सर्वस्याः कृष्टिगतायाः असंख्येयतायाः तुल्यत्वमिति चेत् , न, पूर्वाभ्यः पूर्वाभ्यः सकाशाद् उत्तराभ्य उत्तराभ्यो असङ्ख्येयगुणहीनयोः(...या) श्रेण्या कृतत्वमित्युक्तत्वात् । एवं कृष्टि-करणावसानानन्तरसमये पूर्वस्पर्धकान्यपूर्वस्पर्धकानि च नश्यन्ति, अतोऽनन्तर-समय एव सूक्ष्मवाग्योगं निरोद्धुमारब्धः, ततो-ऽन्तर्मुहूर्त्ते पूर्णे सूक्ष्मकाययोग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बलाभिधानात् सूक्ष्मवाग्योगो निरुध्यमानो निरुद्धः, ततो निरुद्धवाग्योगोऽन्तमुर्हूर्तमास्ते, न सूक्ष्मयोगनिरोधं प्रति वर्त्तते इत्यर्थः । तत उपर्यनन्तरसमय एव सूक्ष्ममनोयोगं निरोद्धुमारब्धः, ततोऽन्तमुर्हूर्त्ते पूर्णे सूक्ष्मकाययोगोपष्टम्भात् सूक्ष्ममनोयोगो निरुध्यमानो निरुद्धः । ततोऽन्तमुर्हूर्त्तं स्थित्वा उपर्यनन्तरसमय एव सूक्ष्मकाययोगं निरोद्धुमारब्धः ।"** इति ।

सूक्ष्मकाययोगं निरुन्धानः प्रथमसमये किट्टीनामसंख्येयभागान् नाशयति, एकं चाऽसंख्येयभागं मुञ्चति । द्वितीयसमये प्राङ्मुक्तस्यैकभागस्याऽसंख्येयान् भागान् विनाशयति, एकं च परित्यजति, एवंक्रमेण किट्टीस्तावद् नाशयति, यावत् सयोगिगुणस्थानकचरमसमयः, यदुक्तं **पञ्चसङ्ग्रहवृत्तौ–"सूक्ष्मकाययोगं निरुन्धानः प्रथमसमये किट्टीनामसंख्येयान् भागान् नाशयति, एकस्तिष्ठति । द्वितीयसमये तस्यैवैकस्य भागस्योद्धरितस्य संबन्धिनोऽसंख्येयान् भागान् नाशयति, एक उद्धरति । एवं समये समये किट्टीस्तावन्नाशयति, यावत्सयोग्यवस्थाचरमसमयः ।"** इति ।

सूक्ष्मकाययोगं च निरुन्धानो वक्ष्यमाणस्वरूपं सूक्ष्मक्रियाऽप्रतिपाति शुक्लध्यानं ध्यायति, यदभिहितम् **आवश्यकचूर्णौ–"ततोऽन्तमुर्हूर्ते पूर्णे सूक्ष्मकाययोगोपष्टम्भात् सूक्ष्मकाययोगो निरुध्यमानो निरुद्धः । अस्यामवस्थायां सूक्ष्मक्रियाप्रतिपातिध्यानं ध्यायति ।"** इति । तृतीयशुक्लध्यानसामर्थ्याच्च वदनोदरादिविवरपूरणेन संकुचितदेहत्रिभागवर्तिप्रदेशो भवति ।

**गुणस्थानकक्रमारोहे** तु योगनिरोध इत्थं प्रतिपादितः—

**"बादरे काययोगेऽस्मिन् स्थितिं कृत्वा स्वभावतः ।**
**सूक्ष्मीकरोति वाक्चित्तयोगयुग्मं स बादरम् ॥१॥**
**त्यक्त्वा स्थूलं वपुर्योगं सूक्ष्मवाक्चित्तयोः स्थितिम् ।**
**कृत्वा नयति सूक्ष्मत्वं, काययोगं तु बादरम् ॥२॥**
**सुसूक्ष्मकाययोगेऽथ स्थितिं कृत्वा पुनः क्षणम् ।**
**निग्रहं कुरुते सद्यः सूक्ष्मवाक्चित्तयोगयोः ॥३॥**
**ततः सूक्ष्मे वपुर्योगे स्थितिं कृत्वा क्षणं हि सः ।**
**सूक्ष्मक्रियं निजात्मानं चिद्रूपं विन्दति स्वयम् ॥४॥"** इति ।

तत्त्वं तु केवलिनो बहुश्रुता वा विदन्ति ।

नन्वयुक्तमिदं योगनिरोधव्याख्यानम्, सतो हि निरोधः संभवति । न चाऽत्र बादरकाययोगे सूक्ष्मकाययोगे वा वर्तमानस्य महात्मनो मनोयोगो वचनयोगो वा संभवति, एककालावच्छेदेनैकस्यैव योगस्य सिद्धान्ते प्रतिपादितत्वात्, अतोऽसतो मनोयोगस्य वाग्योगस्य वा निरोधो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न संभवतीति चेत् ? उच्यते- सत्यमेतद् , एककालावच्छेदेन एक एव योगः प्रवर्तमानो भवति, किन्तु मनोयोगस्य वचनयोगस्य काययोगस्य चोत्पादिका या शक्तिः, तस्या निरोधं करोत्यन्तर्मुहूर्तशेषायुष्कः सयोगिकेवली । तत्र पूर्वं बादरयोगोत्पादिकां शक्तिं रुणद्धि, ततः सूक्ष्मयोगोत्पादिकां शक्तिं निरुणद्धि । कारणे कार्योपचाराच्च बादरमनो-वचन-काययोगं सूक्ष्ममनो-वचन-काययोगं च निरुणद्धीति व्यपदिश्यत इति न कश्चन दोषः ॥२४४॥

सम्प्रति द्वितीयोपदेशेन योगनिरोधं विवर्णयितुकामः प्राह—

**रुम्भइ बायरमण-वय-उस्सास-तणू कमेण बीयमया ।**
**बायरतणूअ भिन्नमुहुत्तेणऽन्तोमुहुत्तमच्चासं ॥२४५॥ (गीतिः)**

रुणद्धि बादरमनो-वच-उच्छ्वास-तनूः क्रमेण द्वितीयमतात् ।
बादरतन्वा भिन्नमुहूर्तेनाऽन्तर्मुहूर्तमत्यासम् ॥२४५॥

'**रुम्भइ०**'इत्यादि, तत्र 'द्वितीयमतात्' **कषायप्राभृतचूर्णिकारादीनां** मतमपेक्ष्य 'बादरमनो-वच-उच्छ्वास-तनूः' बादरपदस्य प्रत्येकमभिसम्बन्धाद् बादरमनोयोगं बादरवचनयोगं बादरोच्छ्वासं बादरकाययोगं च क्रमेण 'बादरतन्वा' बादरकाययोगबलेना-ऽन्तर्मुहूर्तमत्यासं 'भिन्नमुहूर्तेन' अन्तर्मुहूर्तकालेन निरुणद्धि । अयम्भावः-क्रियाऽव्यवधायका-ऽर्थे वर्तमानाद् अतिपूर्वकाद् असिधातोः "**कालेन तृष्यस्वः क्रियान्तरे**"(सिद्धहेम०५-४-८२) इत्यनेन णम् प्रत्ययः, यत आन्तर्मौहूर्तिकयोगनिरोधक्रियाऽन्तर्मुहूर्तकाला-ऽत्यासेन व्यवधीयते । ततश्चायमर्थः—बादरमनोयोगं निरुध्य अन्तर्मुहूर्तं व्यतिक्रम्य बादरवचनयोगमन्तर्मुहूर्तेन निरुणद्धि । ततो बादरवचनयोगं निरुध्याऽन्तर्मुहूर्तं व्यतिक्रम्य बादरोच्छ्वासमन्तर्मुहूर्तकालेन निरुणद्धि । एवमग्रेऽपि । तथाहि—समुद्घाताद् निवृत्तोऽन्तर्मुहूर्तं विश्रम्य योगनिरोधमारभते । तत्र योजनं योगः, जीवस्य परिस्पन्द इति यावत् । स च त्रिविधः, मनो-वचः-कायभेदात् । तत्रा-ऽप्येकैको द्विविधः, सूक्ष्म-बादरभेदात् । योगनिरोधात् प्राक् सर्वत्र बादरयोग एवा-ऽऽसीत् । सम्प्रति केवली भगवान् बादरकाययोगोपष्टम्भाद् बादरमनोयोगं निरोद्धुमुपक्रमते, अन्तर्मुहूर्तकालेन च निरुणद्धि । ततो बादरमनोयोगनिरोधानन्तरमन्तर्मुहूर्तं गत्वा बादरकाययोगमवष्टभ्या-ऽन्तर्मुहूर्तकालेन बादरवचनयोगं निरुणद्धि । ततोऽन्तर्मुहूर्तं व्यतिक्रम्य बादरकायायोगेनान्तर्मुहूर्तेन सर्वथा बादरोच्छ्वासं निरुणद्धि । ततोऽन्तर्मुहूर्तमतीत्य बादरकाययोगेन बादरकाययोगमन्तर्मुहूर्तकालेन सर्वथा निरुणद्धि । अभ्यधायि च **कषायप्राभृतचूर्णौ—"एत्तो अंतोमुहुत्तं गंतूण बादरकायजोगेण बादरमणजोगं णिरुंभइ । तदो अंतोमुहुत्तेण बादरकायजोगेण बादरवचिजोगं णिरुंभइ । तदो अंतोमुहुत्तेण बादरकायजोगेण बादरउस्सासणिस्सासं णिरुंभइ । तदो अंतोमुहुत्तेण बादरकायजोगेण तमेव बादरकायजोगं णिरुंभइ ।"** इति । तथैवोक्तं **प्रशमरतिवृत्तिकारैः श्रीमद्हरिभद्रसूरीश्वरैरपि—"अन्तर्मुहूर्तचतुष्टयसमन्वितेषु प्रथमं मनोयोगं बादरं**

(१), एवं बादरवाग्योगं (२) तत उच्छ्वासं (३) ततः काययोगं (४) अपान्तराले एकस्य २ अन्तर्मुहूर्तस्य विश्रम्येत्यष्टावन्तर्मुहूर्ता इति ।" ॥२४५॥

अभिहितो बादरयोगनिरोधः कषायप्राभृतचूर्णिकारादीनामभिप्रायेण, साम्प्रतं तन्मतेन सूक्ष्मयोगनिरोधं विवर्णयिषुराह—

**सुहुमेण कायजोगेण कमा सुहुमाणि चउमणाईणि ।**
**रुम्भइ गंतूणं गंतूणं अंतोमुहुत्तं तु ॥२४६॥**

सूक्ष्मेण काययोगेन क्रमात् सूक्ष्माणि चतुर्मनआदीनि ।
रुणद्धि गत्वा गत्वा-ऽन्तर्मुहूर्तं तु ॥२४६॥ इतिपदसंस्कारः ।

**'सुहुमेण'** इत्यादि, 'सूक्ष्मेण काययोगेन' सूक्ष्मकाययोगबलेन क्रमात् सूक्ष्माणि 'चतुर्मनआदीनि' चतुःसंख्याकानि मनोयोगवचनयोगोच्छ्वासकाययोगरूपाणि 'अन्तर्मुहूर्तं तु' अन्तर्मुहूर्तप्रमाणं तु कालं गत्वा गत्वा 'रुणद्धि' निरुणद्धि । भावार्थः पुनरयम्—बादरकाययोगनिरोधाऽनन्तरमन्तर्मुहूर्तं गत्वा सूक्ष्मकाययोगबलात् सूक्ष्ममनोयोगं निरुणद्धि । ततः सूक्ष्ममनोयोगनिरोधानन्तरमन्तर्मुहूर्तकालेन सूक्ष्मकाययोगोपष्टम्भात् सूक्ष्मवचनयोगं निरुणद्धि, ततः सूक्ष्मवचनयोगनिरोधानन्तरमन्तर्मुहूर्तकालेन सूक्ष्मकाययोगोपष्टम्भात् सूक्ष्मोच्छ्वासं निरुणद्धि । ततो-ऽन्तर्मुहूर्तं गत्वा सूक्ष्मकाययोगबलेन सूक्ष्मकाययोगमपि निरुणद्धि । उक्तं च कषायप्राभृतचूर्णौ—"**तदो अंतोमुहुत्तं गंतूण सुहुमकायजोगेण सुहुममणजोगं णिरुंभइ । तादो अंतोमुहुत्तेण सुहुमकायजोगेण सुहुमवचिजोगं निरुंभइ । तादो अंतोमुहुत्तेण सुहुमकायजोगेण सुहुमउस्सासं णिरुंभइ । तदो अंतोमुहुत्तं गंतूण सुहुमकायजोगेण सुहुमकायजोगं णिरुंभमाणो इमाणि करणाणि करेदि ××।**" इति ॥२४६॥

अथ सूक्ष्मकाययोगं निरुन्धानो यत्करोति, तदाह—

**सुहुमं सरीरजोगं णिरुम्भमाणो अपुव्वफड्डाणि ।**
**कुणइ पढमसमया पहुडि पुव्वफड्डाण हेट्ठम्मि ॥२४७॥**

सूक्ष्मं शरीरयोगं निरुन्धानो-ऽपूर्वस्पर्धकानि ।
करोति प्रथमसमयात् प्रभृति पूर्वस्पर्धकानामधस्तात् ॥२४७॥ इति पदसंस्कारः ।

**'सुहुमं'** इत्यादि, सूक्ष्मकाययोगाऽवलम्बनेनैव सूक्ष्मं 'शरीरयोगं' काययोगं निरुन्धानः 'प्रथमसमयात्' सूक्ष्मकाययोगनिरोधप्रथमसमयतः प्रभृति 'पूर्वस्पर्धकानां' योगस्य पूर्वस्पर्धकानामधस्ताद् अपूर्वस्पर्धकानि 'करोति' निर्वर्तयति । इदमुक्तं भवति—पर्याप्तिपर्यायेण परिणतात्मना पूर्वमेव योगनिवृत्त्यर्थं यानि योगस्पर्धकान्युपात्तानि, यानि चा-ऽनादौ संसारे पुनः पुनर्योगनिर्वर्तनार्थं पूर्वमुपात्तान्यात्मना, तानि सर्वाणि पूर्वस्पर्धकानि व्यपदिश्यन्ते । तेषां स्वरूपं तु **बन्धनकरणादितो**-ऽवसेयम् । तानि पूर्वस्पर्धकान्यधुना सूक्ष्मीकृत्या-ऽपूर्वस्पर्धकानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियन्ते। न चैवंभूतान्यनादौ संसारे भ्रमताऽऽत्मना कदाचिदपि कृतानि, तेनाऽपूर्वस्पर्धकानि व्यपदिश्यन्ते ॥२४७॥

नन्वपूर्वस्पर्धककरणे को विधिः? इति पृष्ट आह—

**पुव्वगफड्डाणं पढमवग्गणाअ विरियाविभागाणं।**
**तह जीवपएसाणं ओकड्ढिज्जा असंखंसं ॥२४८॥**

पूर्वस्पर्धकानां प्रथमवर्गणाया वीर्याऽविभागानाम्।
तथा जीवप्रदेशानामपकर्षेत्यसंख्यांशम् ॥२४८॥ इति पदसंस्कारः।

'पुव्वग०' इत्यादि, पूर्वस्पर्धकानां प्रथमवर्गणायाः 'वीर्याऽविभागानां' योगाऽविभागानां तथा 'जीवप्रदेशानां' पूर्वस्पर्धकप्रतिबद्धानां जीवप्रदेशानाम् 'असंख्यांशम्' असंख्येयभागमपकर्षति। उक्तं च **कषायप्राभृतचूर्णौ–"पढमसमए अपुव्वफद्दयाणि करेदि पुव्वफद्दयाणं हेट्ठदो। आदिवग्गणाए अविभागपडिच्छेदाणमसंखेज्जदिभागमोकड्डुदि। जीवपदेसाणं च असंखेज्जदिभागमोकड्डुदि।"** इति। इदमुक्तं भवति-पूर्वस्पर्धकेषु लोकाकाशप्रदेशप्रमिता जीवप्रदेशास्तिष्ठन्ति। तत्र पूर्वस्पर्धकप्रथमादिवर्गणाभ्यो-ऽसंख्येयभागप्रमाणान् जीवप्रदेशानपकृष्य पूर्वस्पर्धकजघन्यवर्गणागतवीर्या-ऽविभागसत्काऽसंख्येयभागप्रमाणवीर्या-ऽविभागविशिष्टान्यपूर्वस्पर्धकानि निर्वर्तयति। ततः पूर्वस्पर्धकप्रथमवर्गणागतवीर्या-ऽविभागतोऽसंख्येयगुणहीना वीर्या-ऽविभागा अपूर्वस्पर्धकचरमवर्गणायां भवन्ति। ते-ऽपि पुनरसंख्येयलोकाकाशप्रदेशप्रमिताः। एवमपूर्वस्पर्धकप्रथमवर्गणायामप्यसंख्येयलोकाकाशप्रदेशराशिप्रमाणा वीर्या-ऽविभागा भवन्ति। किन्त्वयं विशेषः–प्रथमा-ऽपूर्वस्पर्धकप्रथमवर्गणायां वीर्याऽविभागाः स्तोका भवन्ति, ततो द्वितीयवर्गणायामेकेनाधिका वीर्याविभागा भवन्ति, ततोऽप्येकेनाऽधिकास्तृतीयवर्गणायां भवन्ति। एवमेकोत्तरवृद्ध्या-ऽग्रेऽपि वर्गणा वक्तव्याः।

अथ व्यवहारनयेनाऽपकृष्टजीवप्रदेशानां प्रक्षेपो निगद्यते–अपूर्वस्पर्धककरणप्रथमसमये पूर्वस्पर्धकेभ्योऽसंख्येयभागप्रमितान् जीवप्रदेशानादाया-ऽपूर्वस्पर्धकप्रथमवर्गणायां प्रभूतानात्मप्रदेशान् ददाति, अल्पयोगे परिणम्यमानजीवप्रदेशानां प्रभूतत्वसंभवात्। ततो विशेषहीनानपूर्वस्पर्धकस्य द्वितीयवर्गणायामात्मप्रदेशान् ददाति, ततो-ऽपि विशेषहीनांस्तृतीयवर्गणायाम्। एवं विशेषहीनक्रमेण तावद् ददाति, यावदपूर्वस्पर्धकचरमवर्गणा। अपूर्वस्पर्धकचरमवर्गणातः पूर्वस्पर्धकप्रथमवर्गणायामसंख्यातगुणहीनानात्मप्रदेशान् ददाति। तत ऊर्ध्वं विशेषहीनक्रमेण तावद् ददाति, यावत् पूर्वस्पर्धकचरमवर्गणा। अत्र जीवप्रदेशान् ददातीत्यनेन तावन्तो जीवप्रदेशाः प्रथमादिवर्गणागतयोगाऽविभागेषु परिणमन्तीति ग्राह्यम्, न ह्यमूर्तानां जीवप्रदेशानामादानप्रदानौ संभवतः परमार्थतः। प्रथमसमये क्रियमाणान्यपूर्वस्पर्धकानि सूचिश्रेणेरसंख्येयभागमात्राणि भवन्त्यपि पूर्वस्पर्धकानामसंख्येयभागप्रमाणानि भवन्ति ॥२४८॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

नन्वपूर्वस्पर्धकानि कियन्तं कालं केन च क्रमेण करोति, एवं जीवप्रदेशांश्च केन क्रमेणाऽपकर्षति ? इत्यत आह—

**कुणए अपुव्वफड्डाणि मुहुत्तंतो असंखगुणहाणीए।**
**तह जीवपएसा उ असंखेज्जगुणक्कमेण ओकड्ढिज्जा॥२४९॥**(आर्यागीतिः)

करोत्यपूर्वस्पर्धकानि मुहूर्तान्तरसंख्यगुणहान्या ।
तथा जीवप्रदेशांस्त्वसंख्येयगुणक्रमेणा-ऽपकर्षति ॥२४९॥ इति पदसंस्कारः ।

**'कुणए'** इत्यादि, तत्र 'मुहूर्तान्तः' अन्तर्मुहूर्तम् 'असङ्ख्यगुणहान्या' असङ्ख्यातगुणहीनक्रमेणा-ऽपूर्वस्पर्धकानि 'करोति' निर्वर्तयति । भावार्थः पुनरयम्—प्रथमसमये यावन्त्यपूर्वस्पर्धकानि करोति, ततोऽसंख्येयगुणहीनानि प्रथमसमयकृता-ऽपूर्वस्पर्धकानामधस्तादपूर्वस्पर्धकानि द्वितीयसमये करोति । ततो-ऽप्यसंख्येयगुणहीनानि तृतीयसमये, एवमसंख्येयगुणहीनक्रमेणा-ऽपूर्वस्पर्धकानि तावत् करोति, यावदन्तर्मुहूर्तचरमसमयः । 'तह' इत्यादि, अपूर्वस्पर्धकानि कुर्वन् जीवप्रदेशांस्त्वसंख्येयगुणक्रमेणा-ऽपकर्षति, तुर्वाक्यभेदे । अयं भावः- अपूर्वस्पर्धकानि कुर्वन् प्रथमसमये यावतो जीवप्रदेशानपकर्षति, ततो द्वितीयसमये-ऽसंख्येयगुणाञ्जीवप्रदेशानपकर्षति, ततोऽपि तृतीयसमयेऽसंख्येयगुणान् । एवमसंख्येयगुणक्रमेण तावदपकर्षति, यावदन्तर्मुहूर्तचरमसमयः । उक्तं च **कषायप्राभृतचूर्णौ**–"**एवमन्तोमुहुत्तमपुव्वफद्दयाणि करेदि असंखेज्जगुणहीणाए सेढीए, जीवपदेसाणं च असंखेज्जगुणाए सेढीए।**" इति । ॥२४९॥ अथ योगस्याऽपूर्वस्पर्धकानां प्रमाणमभिधित्सुराह–

**इह सेढिवग्गमूलस्स असंखंसो अपुव्वफड्डाइं ।**
**हुन्ते असंखभागो पुव्विल्लाणं वि फड्डाणं ॥२५०॥**

इह श्रेणिवर्गमूलस्या-ऽसंख्यांशोऽपूर्वस्पर्धकानि ।
भवन्त्यसंख्यभागः पूर्वेषामपि स्पर्धकानाम् ॥२५०॥ इति पदसंस्कारः ।

**'इह'** इत्यादि, 'इह' योगनिरोधप्रकरणेऽपूर्वस्पर्धकानि 'श्रेणिवर्गमूलस्य' सूचिश्रेणिप्रथमवर्गमूलस्य 'असंख्यांशः' असंख्येयभागमात्राणि भवन्ति ।

ननु योगस्य पूर्वस्पर्धकान्यपि सूचिश्रेणिप्रथमवर्गमूलाऽसंख्येयभागमात्राणि सन्ति, तदुभयेषां को विशेषः ? इत्यत आह–'**असंखभागो**' इत्यादि, अपूर्वस्पर्धकानि पूर्वेषामपि स्पर्धकानाम् 'असंख्यभागः' असंख्येयभागप्रमाणानि भवन्ति, नाऽधिकानीत्यर्थः । उक्तं च **कषायप्राभृतचूर्णौ**–"**अपुव्वफद्दयाणि सेढीए असंखेज्जदिभागो । सेढिवग्गमूलस्स वि असंखेज्जदिभागो । पुव्वफद्दयाणं पि असंखेज्जदिभागो सव्वाणि अपुव्वफद्दयाणि ।**" इति ॥२५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपूर्वस्पर्धककरणाद्धामन्तमुहूर्तप्रमाणां व्यतिक्रम्य सयोगिकेवली योगकिट्टीः करोतीत्येतदभिधित्सुराह—

**तत्तो पुव्वाऽपुव्वेहिं फड्डेहिं कुणेइ किट्टीओ ।**
**हेट्ठम्मि अपुव्वाणं सेढिअसंखेज्जभागमिआ ॥२५१॥**

ततः पूर्वापूर्वेभ्यः स्पर्धकेभ्यः करोति किट्टीः ।
अधस्तादपूर्वेषां श्रेण्यसंख्येयभागमिताः ॥२५१॥ इति पदसंस्कारः ।

'**तत्तो**' इत्यादि, 'ततः' अपूर्वस्पर्धककरणाद्धासमाप्तितः परं पूर्वापूर्वेभ्यः स्पर्धकेभ्यः 'अपूर्वेषाम्' अपूर्वस्पर्धकानामधस्तात् 'श्रेण्यसंख्येयभागमिताः' सूचिश्रेणेरसंख्येयभागप्रमाणाः 'किट्टीः' योगस्य किट्टीः 'करोति' निर्वर्तयति । ननु का नाम किट्टिः ? इति चेत् , उच्यते-एकोत्तरवृद्धिं परित्यज्या-ऽसंख्येयगुणहीनैकैकवर्गणास्थापनेन योगस्य कर्शनं कृष्टिः=अल्पीकरणमित्यर्थः । तथाहि—अपूर्वस्पर्धककरणाद्धायां पूर्वस्पर्धकतो-ऽसंख्येयगुणहीनं योगं कृत्वा योगा-ऽविभागानामेकोत्तरवृद्ध्या वर्गणाः स्थापयित्वा सूचिश्रेणेरसंख्यभागप्रमाणाभिर्वर्गणाभिरेकैकाऽपूर्वस्पर्धकं रचयति स्म । तानि च सर्वाणि निर्वर्त्यमानान्यपूर्वस्पर्धकानि सूचिश्रेणेरसंख्येयभागप्रमाणानि जायन्ते स्म । किट्टिकरणकाले-ऽपूर्वस्पर्धकप्रथमवर्गणातो-ऽप्यसंख्येयगुणहीनं योगं कृत्वा योगाऽविभागानामेकोत्तरवृद्धिं विहायोत्कृष्टकिट्टितोऽसंख्येयगुणहीनक्रमेण किट्टीस्तावत् स्थापयति, यावत् प्रथमकिट्टिः, यद्वा जघन्यकिट्टितो-ऽसंख्येयगुणक्रमेण तावत् स्थापयति, यावदुत्कृष्टकिट्टिः । उत्कृष्टकिट्टावप्यपूर्वस्पर्धकप्रथमवर्गणातोऽसंख्येयगुणहीना वीर्याऽविभागा भवन्ति । अनेन क्रमेण योगस्याऽल्पीकरणं किट्टिरिति व्यपदिश्यते ॥२५१॥

ननु किट्टिकरणाद्धाप्रथमसमये किट्टिकरणे को विधिः ? इत्यत आह—

**ओकड्ढए अपुव्वाइवग्गणाए असंखभागमिआ ।**
**अविभागे तह जीवपएसा वि असंखभागमिआ ॥२५२॥**

अपकर्षत्यपूर्वादिवर्गणाया असंख्यभागमितान् ।
अविभागांस्तथा जीवप्रदेशानप्यसंख्यभागमितान् ॥२५२॥ इति पदसंस्कारः ।

'**ओकड्ढए**' इत्यादि, तत्र 'अपूर्वादिवर्गणायाः' किट्टिकरणप्रथमसमयेऽपूर्वस्पर्धकप्रथमवर्गणायाः 'असङ्ख्यभागमितान्' असंख्येयभागप्रमितान् 'अविभागान्' वीर्या-ऽविभागान् 'अपकर्षति' आकर्षति । '**तह**' इत्यादि, 'तथा' तथाशब्दः समुच्चये, 'जीवप्रदेशानप्यसंख्यभागमितान्' पूर्वाऽपूर्वस्पर्धकप्रतिबद्धानां लोकाकाशप्रदेशप्रमितानामात्मप्रदेशानामप्यसंख्येयभागप्रमितान् जीवप्रदेशानाकर्षतीत्यर्थः । उक्तञ्च **कषायप्राभृतचूर्णौ**—"**अपुव्वफद्दयाणमादिवग्गणाएअविभागपडिच्छेदाणमसंखेज्जदिभागमोकड्डुदि । जीवपदेसाणमसंखेज्जदिभागमोकड्डुदि ।**" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वापूर्वस्पर्धकेभ्योऽसंख्येयभागमितान् जीवप्रदेशानादाया-ऽपूर्वस्पर्धकप्रथमवर्गणाया असंख्येय-भागप्रमाणवीर्या-ऽविभागकाः किट्टीः करोति, तेन चरमकिट्टावप्यपूर्वस्पर्धकप्रथमवर्गणातो-ऽसंख्येयगुणहीना वीर्याऽविभागा भवन्ति ।

**अथ योगकिट्टिषु जीवप्रदेशानां प्रक्षेपक्रमोऽभिधीयते**—किट्टिकरणाद्धाप्रथमसमये पूर्वापूर्वस्पर्धकेभ्यो-ऽसंख्येयभागप्रमितान् जीवप्रदेशान् गृहीत्वा प्रथमकिट्टौ प्रभूतान् जीवप्रदेशान् निक्षिपति । ततो विशेषहीनान् द्वितीयकिट्टौ निक्षिपति, ततोऽपि तृतीयस्यां किट्टौ विशेषहीनान् । एवमुत्तरोत्तरकिट्टौ विशेषहीनक्रमेण तावन्निक्षिपति, यावच्चरमकिट्टिः । चरमकिट्टिर्नाम किट्टिषु सर्वप्रभूतवीर्याऽविभागका किट्टिः । प्रथमकिट्टिर्नाम किट्टिषु सर्वाऽल्पवीर्याऽविभागका किट्टिः । चरमकिट्टितोऽपूर्वस्पर्धकप्रथमवर्गणायामसंख्येयगुणहीनान् जीवप्रदेशान् प्रक्षिपति । ततो विशेषहीनान् द्वितीयवर्गणायां निक्षिपति । तत उपरि विशेषहीनक्रमेण प्रक्षिपति ॥२५२॥

ननूत्तरोत्तरसमये किमधिका अधिकतराः किट्टीः करोति, उत हीना हीनतराः ? एवं जीवप्रदेशान् किं वृद्धिक्रमेणाऽपकर्षति, आहोस्विद् हीनक्रमेण, कियतीश्च सर्वाः किट्टीः करोति ? इति पृष्टे गाथाद्वयेन प्रतिवक्ति—

**अंतोमुहुत्तकालमसंखगुणूणक्कमेण किट्टीओ ।**
**करए ओकड्ढइ जीवपएसे उण असंखगुणणाए ॥२५३॥ (गीतिः)**
**किट्टीगुणगारो पल्लासंखंसो हवन्ति किट्टीओ ।**
**सेढीअसंखभागो अपुव्वफड्डाण उण असंखंसो ॥२५४॥ (गीतिः)**

अन्तर्मुहूर्तकालमसंख्यगुणोनक्रमेण किट्टीः ।
करोत्यपकर्षति जीवप्रदेशान् पुनरसंख्यगुणनया ॥२५३॥
किट्टिगुणकारः पल्या-ऽसंख्यांशो भवन्ति किट्टयः ।
श्रेण्यसंख्यभागो-ऽपूर्वस्पर्धकानां पुनरसंख्यांशः ॥२५४॥ इति पदसंस्कारः ।

'अंतो०' इत्यादि, 'अन्तर्मुहूर्तकालं' अन्तर्मुहूर्तं यावद् 'असङ्ख्यगुणोनक्रमेण' असंख्येयगुणहीनक्रमेण 'किट्टीः' अपूर्वकिट्टीः 'करोति' निर्वर्तयति । 'अपकर्षति' आकर्षति जीवप्रदेशान् पुनः 'असङ्ख्यगुणनया' प्रतिसमयमसंख्येयगुणकारेण । उक्तं च **कषायप्राभृतचूर्णौ**—"**एत्थ अंतोमुहुत्तं किट्टीओ करेदि, असंखेज्जगु[णही]णाए सेढीए, जीवपदेसाणमसंखेज्जगुणाए सेढीए ।**" इति । इदमत्र तात्पर्यम्—किट्टिकरणप्रथमसमये सूचिश्रेणेरसंख्येयभागप्रमाणाः किट्टीः करोति, ताश्च प्रभूताः, ततो द्वितीयसमये-ऽसंख्येयगुणहीना अपूर्वाः किट्टीः करोति, ततो-ऽपि तृतीयसमये-ऽसंख्येयगुणहीनाः । एवमसंख्येयगुणहीनक्रमेण तावत् करोति, यावदन्तर्मुहूर्तप्रमाणायाः किट्टिकरणाद्धायाश्चरमसमयः । तथा योगा-ऽविभागानाश्रित्य प्राक्तनसमयकृतजघन्यकिट्टितो-ऽप्यसंख्येय-

गुणहीना तात्कालिकोत्कृष्टा किट्टिर्भवति । तथा किट्टिकरणाद्धाप्रथमसमये-ऽसंख्येयभागप्रमितान् यान् जीवप्रदेशानपकर्षति, ते स्तोकाः, ततो द्वितीयसमये-ऽसंख्येयगुणान् जीवप्रदेशानपकर्षति, ततोऽप्यसंख्येयगुणांस्तृतीयसमये । एवमसंख्येयगुणक्रमेण तावदपकर्षति, यावत् किट्टिकरणाद्धायाश्चरमसमयः ।

प्रथमसमये किट्टिषु जीवप्रदेशानां निक्षेपविधिः प्रागभिहितः । सम्प्रति शेषसमयेषु भण्यते-प्रथमसमयतो द्वितीयसमयेऽसंख्येयगुणान् जीवप्रदेशानाकृष्य द्वितीयसमये क्रियमाणायां प्रथमाऽपूर्वकिट्टौ प्रभूतान् जीवप्रदेशान् निक्षिपति, ततो द्वितीया-ऽपूर्वकिट्टौ विशेषहीनान् । एवं विशेषहीनक्रमेण तावत् प्रक्षिपति, यावच्चरमाऽपूर्वकिट्टिः । चरमा-ऽपूर्वकिट्टितः प्रथमसमयकृतायां प्रथमपूर्वकिट्टावसंख्येयभागहीनान् जीवप्रदेशान् निक्षिपति, तत ऊर्ध्वं विशेषहीनक्रमेण तावत् प्रक्षिपति, यावच्चरमपूर्वकिट्टिः । स्पर्धकेषु निक्षेपः प्रथमसमयवद् वक्तव्यः । एवं शेषेषु सर्वेषु समयेषु निक्षेपोऽभिधातव्यः, नवरं पूर्वपूर्वसमयत उत्तरोत्तरसमयेऽपूर्वाः किट्टीरसंख्येयगुणहीनक्रमेण निर्वर्तयति, जीवप्रदेशान् पुनरसङ्ख्यातगुणक्रमेणा-ऽपकर्षति ।

'किट्टी०' इत्यादि, किट्टिगुणकारः 'पल्या-ऽसङ्ख्यांशः' पल्योपमा-ऽसंख्येयभागमात्रो ज्ञातव्य इति गम्यते, उक्तं च **कषायप्राभृतचूर्णौ-"किट्टीगुणगारो पलिदोवमस्स असंखेज्जदिभागो ।"** इति, इह किट्टिगुणकार इत्युक्ते (१) तात्कालिककिट्टिराशौ येन गुणकारेण गुणिते प्राक्तनसमयकृतकिट्टिराशिः प्राप्यते, स गुणकारः पल्योपमा-ऽसंख्येयभागप्रमाणः किट्टिगुणकारो बोद्धव्यः ।

(२) यद्वैकं जीवप्रदेशमाश्रित्य प्रथमकिट्टिगतयोगाऽविभागा येन गुणकारेण गुणिताः सन्तो द्वितीयकिट्टिगता योगा-ऽविभागा भवन्ति, स गुणकारः पल्योपमा-ऽसंख्येयभागप्रमाणः किट्टिगुणकार इति व्यपदिश्यते । अयं गुणकारो द्वितीयादिकिट्टिष्वपि तावदभिधातव्यः, यावच्चरमकिट्टिः । चरमकिट्टिगतैकजीवप्रदेशस्थवीर्या-ऽविभागाः पल्योपमाऽसंख्येयभागेन गुणिता अपूर्वस्पर्धकप्रथमवर्गणागतैकजीवप्रदेशस्थवीर्या-ऽविभागा भवन्ति । ततो द्वितीयादिवर्गणास्वनन्तरानन्तरेणैकजीवप्रदेशस्थवीर्या-ऽविभागा विशेषाधिका भवन्ति ।

(३) यद्वा प्रथमकिट्टिगतसकलजीवप्रदेशानां सकलवीर्याऽविभागा येन गुणकारेण गुणिताः सन्तो द्वितीयकिट्टिगतसकलजीवप्रदेशानां सकलवीर्याविभागा जायन्ते, स गुणकारः पल्योपमाऽसंख्येयभागप्रमितः किट्टिगुणकार इति व्यवह्रियते । एवं द्वितीयकिट्टिगतसकलजीवप्रदेशप्रतिबद्धसर्ववीर्या-ऽविभागा येन गुणकारेण गुणितास्तृतीयकिट्टिगतसकलजीवप्रदेशप्रतिबद्धसर्ववीर्याऽविभागा भवन्ति, स पल्योपमा-ऽसंख्येयभागमात्रः किट्टिगुणकारः । एवमग्रेऽपि वक्तव्यः । इदन्त्ववधेयम्—चरमकिट्टितः प्रथमा-ऽपूर्वस्पर्धकप्रथमवर्गणागतसमस्तजीवप्रदेशप्रतिबद्धसकलवीर्याविभागा असंख्येयगुणहीना भवन्ति, आत्मप्रदेशानामसंख्येयगुणहीनत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ किट्टिकरणाद्धायां निर्वर्तितकिट्टीनां प्रमाणं व्याहरति–'**हवन्ति**' इत्यादि, तत्र 'किट्टयः' योगकिट्टयः 'श्रेण्यसङ्ख्यभागः' सूचिश्रेणेरसंख्येयभागप्रमाणा 'भवन्ति' जायन्ते । नन्व-पूर्वस्पर्धकान्यपि सूचिश्रेणेरसंख्येयभागमात्राणि जायन्ते स्म, तेभ्यः किं किट्टयो हीनाः, उता-ऽधिकाः? न तावदधिकाः, किं तर्हि ? इत्याह–'**अपुव्वफड्डाण**' इत्यादि, अपूर्वस्पर्धकानां 'पुनः' पुनश्शब्दो वाक्यभेदे 'असङ्ख्यांशः' असंख्येयभागप्रमिताः किट्टयो भवन्ति, ना-ऽधिकाः । उक्तं च **कषायप्राभृतचूर्णौ–"किट्टीओ सेढीए असंखेज्जदिभागो । अपुव्वफद्दयाणं पि असंखेज्जदिभागो । ।"** इति । तथा किट्टिकरणाद्धायां निर्वर्तिताः सर्वाः किट्टयः सूचिश्रेणि-प्रथमवर्गमूलस्या-ऽसंख्येयभागप्रमिता एव भवन्तीति फलितार्थः, कथमेतदवसीयते ? इति चेत्, उच्यते-अपूर्वस्पर्धकानां सूचिश्रेणिप्रथमवर्गमूलसत्का-ऽसंख्येयभागप्रमाणत्वं प्राक्प्रतिपादितम्, निर्व-र्तितकिट्टीनां चा-ऽपूर्वस्पर्धकसत्का-ऽसंख्येयभागमात्रत्वेन सुतरां सूचिश्रेणिप्रथमवर्गमूला-ऽसंख्येय-भागप्रमितत्वं सिध्यति ।

जीवप्रदेशानाश्रित्य प्रथमकिट्टितः प्रभृति चरमकिट्टिं यावद् विशेषहीनक्रमेण किट्टयस्ति-ष्ठन्ति, वीर्याऽविभागानाश्रित्य पुनरसङ्ख्यातगुणक्रमेण विद्यन्ते ॥२५३-२५४॥

अथ किट्टिकरणाद्धायां समाप्तायां यद्भवति, तद्व्याजिहीर्षुराह—

**किट्टीकरणे सम्मत्ते सेकाले विणासइ सजोगी ।**
**सव्वाणि उभयफड्डाइं जोगो तस्स किट्टिगओ ॥२५५॥**

किट्टिकरणे समाप्ते-ऽनन्तरकाले विनाशयति सयोगी ।
सर्वाण्युभयस्पर्धकानि योगस्तस्य किट्टिगतः ॥२५५॥ इति पदसंस्कारः ।

'**किट्टी०**' इत्यादि, '**किट्टिकरणे समाप्ते**' अन्तर्मुहूर्तप्रमाणायां किट्टिकरणाद्धायां समाप्तायाम् 'अनन्तरकाले' अनन्तरसमये 'सयोगी' निरुध्यमानसूक्ष्मकाययोगो महात्मा सयोगिकेवली भगवान् 'सर्वाण्युभयस्पर्धकानि' समस्तानि पूर्वाऽपूर्वस्पर्धकानि विनाशयति, सर्वाणि पूर्वापूर्वस्पर्धकानि किट्टितया परिणमयतीत्यर्थः ।

'**जोगो**' इत्यादि, योगस्तु समाप्तकिट्टिकरणस्य 'तस्य' सूक्ष्मकाययोगं निरुन्धानस्य महात्मनः 'किट्टिगतः' ततः प्रभृत्यन्तर्मुहूर्तं यावत् किट्टिगतो भवति । अभिहितश्च **कषायप्राभृत-चूर्णौ–"किट्टीकरणद्धे णिट्ठिदे से काले पुव्वफद्दयाणि अपुव्वफद्दयाणि च णासेदि । अंतोमुहुत्तं किट्टीगदजोगो होदि ।"** इति ।

लब्धकिट्टिगतयोगो महात्मा सयोगिगुणस्थानकद्विचरमसमयं यावत् सर्वकिट्टीनामसंख्ये-यभागप्रमिताः किट्टीर्विनाशयति, यतश्चरमसमये बहुसंख्येयभागमिता विनाशयति । उक्तं च **कषा-यप्राभृतचूर्णौ–"किट्टीणं चरिमसमये असंखेज्जे भागे णासेदि ।"** इति ।

Jain Education International　　　For Private & Personal Use Only　　　www.jainelibrary.org

अत्र किट्टीर्नाशयति नाम तथाविधप्रभूतयोगा-ऽविभागककिट्टिष्वत्रस्थितान् जीवप्रदेशा-नल्पतरयोगा-ऽविभागकिट्टिषु परिणमयति । न च तावतीषु किट्टिषु स्थिताः प्रदेशा निर्योगकाः क्रियन्त इत्यर्थो गृह्यते, एकस्मिन्नात्मनि जीवप्रदेशानां सयोगत्वाऽयोगत्वाऽनुपपत्तेः ॥२५५॥

ननु सूक्ष्मकाययोगं निरुन्धानः किं ध्यानं ध्यायति ? इत्यत आह—

**सुहुमतणुं रुम्भन्तो झायइ सुहुमकिरियं अपडिवाइ ।**
**चरिमे समये सव्वाओ किट्टीओ विणासेइ ॥२५६॥**

सूक्ष्मतनुं रुन्धानो ध्यायति सूक्ष्मक्रियमप्रतिपाति ।
चरमे समये सर्वाः किट्टीर्विनाशयति ॥२५६॥ इति पदसंस्कारः ।

**'सुहुमतणु'** इत्यादि, 'सूक्ष्मतनु' सूक्ष्मकाययोगं 'रुन्धानः' निरुन्धानः सयोगिकेवली महात्मा सूक्ष्मक्रियमप्रतिपाति ध्यानं ध्यायति । उक्तं च **कषायप्राभृतचूर्णौ**–**"सुहुमकिरिय-ऽपडिवादिझाणं झायदि ।"** इति ।

**एवं तत्त्वार्थवृत्तावपि—**

**"तमपि स योगं सूक्ष्मं निरुरुत्सन् सर्वपर्यायाऽनुगतम् ।**
**ध्यानं सूक्ष्मक्रियमप्रतिपात्युपयाति वितमस्कम् ॥१॥"** इति ।

**सप्तविंशत्यधिकद्विशततमगाथा**टीकायां प्राक्प्रतिज्ञातम् , शेषं शुक्लध्यानद्वयमग्रे यथावसरं वक्ष्यत इति । अतस्तृतीयं सूक्ष्मक्रियमप्रतिपातिशुक्लं विवर्णयामः, चतुर्थन्त्वग्रेऽयोगिकेवलि-गुणस्थानकाऽधिकारे वक्ष्यामः ।

सूक्ष्मा क्रिया=काययोगलक्षणा यस्मिन् ध्याने, तत् सूक्ष्मक्रियम्, प्रतिपततीत्येवंशीलं प्रतिपाति, न प्रतिपातीत्यप्रतिपाति, एतद्ध्यानानन्तरं व्युपरतक्रिया-ऽनिवृत्तिध्यानोपलम्भेना-ऽधः-प्रतिपाता-ऽभावात् । सूक्ष्मक्रियं च तदप्रतिपाति चेति सूक्ष्मक्रिया-ऽप्रतिपाति । सूक्ष्मकाययोगं निरुन्धान इदं तृतीयशुक्लध्यानमुपगच्छति, यदवादि **ध्यानशतके—**

**"निव्वाणगमणकाले केवलिणो दरनिरुद्धजोगस्स ।**
**सुहुमकिरियानियट्टिं तइयं तणुकायकिरियस्स ॥१॥"** इति ।

नन्वेकाग्रचिन्तानिरोध इति ध्यानशब्दार्थः, तर्हि केवलिनो मनसो-ऽभावाद् ध्यानं कथमि-ष्यते ? इति चेत्, उच्यते–समीचीनमेतद्–केवलज्ञानदर्शनोपयोगेन प्रत्यक्षीकृतसकलपदार्थस्य केवलिन एकाग्रचिन्तानिरोधलक्षणं ध्यानं न घटत इति, किन्तु (१) ध्यानमिव ध्यानमिति व्युत्प-त्तिसमाश्रयणाद् न कश्चिद् दोषः । क उपमार्थः ? उच्यते-यथा पृथक्त्ववितर्कसविचारैकत्ववित-र्काऽविचाररूपशुक्लध्यानद्वयं धर्मध्यानं चोपगतो जीवादिपदार्थांश्चिन्तयन् कर्माणि क्षपयति,तथा सूक्ष्म-क्रिया-ऽप्रतिपातिध्यानोपगतो मनसो-ऽभावेना-ऽसत्यामपि चिन्तायां कर्माणि क्षपयति । अतः कर्म-

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

दहनसामान्याद् युक्तमेव भगवतो ध्यानम् , यदभिहितम् आवश्यकचूर्णौ—"इह यथा पृथक्त्वैकत्ववितर्कपूर्वशुक्लध्यानद्वयपरिणत आत्मा-ऽर्थान् चिन्तयन् साम्परायिकं दहति, यथा वा धर्मद्वय ध्याने परिणतः कर्मपर्यन्तं क्षपयति, तथा सूक्ष्मक्रिया-ऽप्रतिपाति-व्युपरतक्रियानिवृत्तिध्यानद्वयपरणितो-ऽप्यात्मा असत्यामपि चिन्तायां कर्म क्षपयतीत्यतः कर्मक्षपणसामान्यात् ध्यानमिव ध्यानमिति सिद्धम् ।" इति । न च ध्यानस्य कर्मक्षपणसामर्थ्यमसिद्धमिति वाच्यम् ,पूर्वमहर्षिभिर्ध्याने कर्मविनाशसामर्थ्यस्य प्रतिपादित्वात् । तथा चाऽत्र ध्यानशतकम्—

"अंबर-लोह-महीणं कमसो जह मल-कलंक-पंकाणं ।
सोज्झाव गयणसोसे साहेंति जला-ऽणलाइच्चा ॥१॥
तह सोज्झाइसमत्था जोवंबर-लोह-मेइणिगयाणं ।
झाण-जल-ऽणलसूरा कम्म-मल-कलंक-पंकाणं ॥२॥
तापो सोसो भेओ जोगाणं झाणओ जहा निययं ।
तह ताव-सोस-भेया कम्मस्स वि झाइणो नियमा ॥३॥" इति ।

(२) यद्वा यथा छद्मस्थस्य सुनिश्चलं मनो ध्यानं भण्यते, तथैवा-ऽस्य सयोगिकेवलिनो योगत्वा-ऽव्यभिचारात् सुनिश्चलः कायो ध्यानमुच्यते, इत्थं युक्तमेव भगवतो ध्यानम् , निश्चलत्वसामान्यात् , तथा चोक्तं ध्यानशतके—

"जह छउमत्थस्स मणोझाणं भण्णइ सुनिच्चलो संतो ।
तह केवलिणो काओ सुनिच्चलो भन्नइ झाणं ॥१॥" इति ।

(३) अथवा मनोविशेष एव ध्यानमित्यनैकान्तिकम् । इदमुक्तं भवति—यथा ध्यै चिन्तायाम्, तथा ध्यैधातुः काययोगनिरोधेऽपि, नानार्थत्वाद् धातूनाम् , यदुक्तं—

"निपाताश्चोपसर्गाश्च धातवश्चेति त्रयः ।
अनेकार्थाः स्मृताः लोके पाठस्तेषां निदर्शनम् ॥१॥" इति ।

अतः सयोगिकेवलिनां कायनिरोधप्रयत्नस्वरूपं ध्यानमुपपद्यते । उक्तं च विशेषा-ऽऽवश्यक-भाष्यकारमहर्षिभिः—

"झाणं मणोविसेसो तदभावे तस्स संभवो कत्तो ।
भण्णइ भणियं झाणं समए तिविहे वि करणंमि ॥१॥
सुदढप्पयत्तवावारणं निरोहो व विज्जमाणाणं ।
झाणं करणाणमयं न उ चित्तनिरोहमित्तागं ॥२॥
होज्ज न मणोमयं वाइयं च झाणं जिणस्स तदभावे ।
कायनिरोधपत्तयस्स भावमिह को निवारेइ ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ छउमत्थस्स मणोनिरोहमेत्तप्पयत्तयं झाणं ।
कह कायजोगरोहप्पयत्तयं होइ न जिणस्स ? ॥४॥" इति ।

तथैव गुणस्थानकक्रमारोहेऽपि

"छद्मस्थस्य यथा ध्यानं मनसः स्थैर्यमुच्यते ।
तथैव वपुषः स्थैर्यं ध्यानं केवलिनो भवेत् ॥१॥"

किञ्च जीवो योगसद्भावाज्जिनागमवचनप्रामाण्याच्च सिध्यति सयोगिकेवलिनो ध्यानम् । तृतीयशुक्लध्यानोपगतः काययोगे परमशुक्ललेश्यायां च वर्तते, यदुक्तं ध्यानशतके—

"पढमं जोगे जोगेसु वा मयं बितियमेकजोगम्मि ।
तइयं च कायजोगे सुक्कमजोगंमि य चउत्थं ॥१॥
सुक्काए लेसाए दो ततियं परमसुक्कलेसाए ।
थिरयाजियसेलेसिं लेसाईयं परमसुक्कं ॥२॥" इति ।

तृतीयशुक्लध्यानं ध्यायन् वेदनीयादीनां च स्थितिघातादीन् कुर्वन् योगकिट्टीश्च विनाशयन् सयोगिगुणस्थानकचरमसमयं प्राप्नोति, तदानीं योगं निर्मूलतो नाशयति, तद्व्याजिहीर्षुराह— 'चरिमे' इत्यादि, 'चरमे समये' सयोगिकेवलिगुणस्थानकस्यान्त्यसमये 'सर्वाः' अशेषाः 'किट्टीः' योगकिट्टीः 'विनाशयति' निःशेषतो नाशयति, इत्थं निश्चयनयमाश्रित्य सयोगिकेवलिगुणस्थानकचरमसमये सर्वात्मना योगकिट्टिनाशो जायमानो जातः । तदेवं समर्थितो योगनिरोधः ।

अथ सयोगिकेवलीचरमसमयेऽयोगिकेवलिकालतुल्यस्थितिकरण-जघन्यस्थितिसंक्रमादयो भण्यन्ते—सयोगिकेवलिगुणस्थानकचरमसमये चरमस्थितिघातेन नाम-गोत्र-वेदनीयानामयोगिगुणस्थानकोपरितनस्थितिं घातयित्वोदये स्तोकं दलं ददाति, ततो-ऽनन्तरे द्वितीयस्मिन्निषेके-ऽसंख्येयगुणं दलं ददाति । ततो-ऽपि तृतीयनिषेके-ऽसंख्येयगुणं ददाति । एवमसंख्येयगुणक्रमेण तावद् ददाति, यावदयोगिकेवलिगुणस्थानकस्य चरमसमयः ।

इत्थं सयोगिगुणस्थानकचरमसमये सर्वाण्यपि कर्माण्ययोगिकेवलिगुणस्थानककालसमस्थितिकानि जातानि, येषां च कर्मणामयोग्यवस्थायामुदयाऽभावः,तेषां स्थितिं स्वरूपं प्रतीत्य समयोनां विदधाति । सामान्यतः सत्ताकालं तु प्रतीत्या-ऽयोग्यवस्थासमानामिति । कुतः ? इति चेत्, उच्यते— अनुदयवत्यः प्रकृतयश्चरमसमये स्तिबुकसंक्रमेणोदयवतीषु संक्रमिष्यन्ति, तेन चरमसमये स्वरूपेण न प्राप्स्यन्ते, किन्तूदयवत्प्रकृतिरूपेण प्राप्स्यन्ते । तेनोदयवतीनां प्रकृतीनां दलिकं कालमाश्रित्या-ऽयोगिचरमसमयं यावत् स्वस्वरूपेण स्थास्यति, उदयरहितानां प्रकृतीनां दलिकं तु द्विचरमसमयं-यावत् स्वरूपेण, चरमसमये स्तिबुकसंक्रमणेन तासां संक्रमयिष्यमाणत्वेन परस्वरूपेणोपलम्भात् ।

यद्वा येषां कर्मणामयोगिकेवलिगुणस्थानकयुदयो भवति, तेषामयोगिकेवलिगुणस्थानकाल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणा स्थितिर्भवति, येषां तूदयो न भवति, तेषां निषेकमाश्रित्य समयोना भवति, प्रथमनिषेकस्य स्तिबुकसंक्रमेण संक्रान्तत्वात् । कालमाश्रित्य त्वयोगिगुणस्थानककालप्रमाणा भवति, यथा बन्धेऽबाधास्थितौ दलाऽभावे-ऽपि स्थितिश्चरमनिषेकमाश्रित्य भण्यते, तथैवात्राऽपि चरमनिषेकमाश्रित्य स्थितिरयोगिगुणस्थानकालप्रमाणा भण्यते। प्रत्यपादि च **सप्ततिकाचूर्णौ–"तस्स चरिमसयोगिकेवलिस्स कम्माणि उव्वट्टिज्जमाणाणि उव्वट्टिज्जमाणाणि सव्वोवट्टणाए उव्वट्टियाणि अजोगिकेवलिकालसमठितियाणि जायाणि । जेसिं कम्माणं अजोगिम्मि उदओ नत्थि, तेसिं ठितिं समऊणं ठवेइ दलिअं पडुच्च न कालं ।"**इति ।

तथा सयोगिगुणस्थानकचरमसमये नरकद्विक-तिर्यग्द्विक-पञ्चेन्द्रियजातिरहितशेषजातिचतुष्टय-स्थावर-सूक्ष्म-साधारणा-ऽऽतपोद्योतनामानि वर्जयित्वा शेषाणां नामकर्मनवतिप्रकृतीनां (९०) वेदनीयद्विकस्य गोत्रद्विकस्य च जघन्यस्थितिसंक्रमो भवति । अभ्यधायि च **कर्मप्रकृतिचूर्णौ–"चरिमसजोगे जा अत्थि,तासिं सो चेव'जोगंतिया चउणउती पुव्ववण्णिया,तासिं सो चेव सजोगिकेवली चरिमोवट्टणे वट्टमाणो सामो ।"** इति । तदानीमेव मनुष्यगति-पञ्चेन्द्रियजात्यौदारिकसप्तक-तैजससप्तक-प्रथमसंहनन-संस्थानषट्क-वर्णादिविंशतिक-प्रशस्ताऽप्रशस्तखगति-पराघातोपघाता-ऽगुरुलघु-तीर्थङ्कर-निर्माण-त्रस-बादर-पर्याप्त-प्रत्येक-स्थिराऽस्थिर-शुभा-ऽशुभ-सुभगा-ऽऽदेय-यशःकीर्त्युच्चैर्गोत्ररूपाणां द्वाषष्टिप्रकृतीनां (६२) जघन्यस्थित्युदीरणा गुणितकर्मांशस्य च महात्मन एतासां प्रकृतीनामुत्कृष्टप्रदेशोदीरणा जायते । इह **कर्मप्रकृतिचूर्णिकारादिभिः** स्वरद्विकस्योच्छ्वासस्य च प्रकृत्युदीरणोत्कृष्टप्रदेशोदीरणे क्रमेण वाग्योगनिरोधकाल उच्छ्वासनिरोधकाले च दर्शिते, अक्षराणि त्वेवम्–**"उस्सासणामस्स आणपाणुपज्जत्तीए पज्जत्ता सव्वे उदीरगा सुस्सरदुस्सराणं भासापज्जत्तीए पज्जत्तगा उदीरगा । 'सव्वणूणुस्सासो भासा वि य जा ण रुज्झंति' सव्वण्णूणं केवलीणं उस्सासभासातो जाव ण निरुज्झंति, ताव उदीरेति, परत्थ उदयाभावातो णत्थि उदीरणा । ××××सरणिरोहकालम्मि सुस्सरदुस्सराणं सो चेवुक्कोसपदेसुदीरतो(...गो) आणपाणुणिरोहसमते सो चेव केवली आणपाणूणं ।"**इति । तेषां जघन्यस्थित्युदीरणा पुनः सयोगिकेवलिचरमसमये प्रोक्ता,अक्षराणि त्वेवम्- **"मणुयगति-पंचिदियजाति-उरालियसत्तगं छसंठाण-पढमसंघयणं उवघायं परघायं उस्सासं पसत्थापसत्थविहायगति-तसं बायरं पज्जत्तगं पत्तेयसरीरं सुभगं सुसरं दुसरं आएज्जं जसं तित्थकरं उच्चागोयं, एत्ताओ बत्तीसं धुवोदीरणातेत्तीससहितातो पणसट्ठि होति । एतासिं उदीरणंते त्ति सयोगिकेवलिचरमसमये जहण्णिया ठिदिउदीरणा होइ ।"** इति । तदत्र प्रकृत्युदीरणाभावे कथं स्थित्युदीरणा भवति ? इति वयं न विद्मः तेषां कोऽभिप्राय इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अतो वयमपि तथैव दर्शयामः । न चैकान्तेन युक्त्युपन्यासे आग्रहः कार्यः, अतीन्द्रियपदार्थेषु तर्काणामकिञ्चित्करत्वाद् आगमोपपत्तिगम्यमानत्वाच्च तत्त्वस्य, यदुक्तं **योगबिन्दौ** दुःषमान्धकारप्रदीपैर्जिनप्रवचनकुशलैः **श्रीहरिभद्रसूरिपादैः—**

**"यत्नेनाऽनुमितोऽप्यर्थः कुशलैरनुमातृभिः ।**
**अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥१॥**
**ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः ।**
**कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥२॥**
**न चैतदेवं यत्तस्माच्छुष्कतर्कग्रहो महान् ।**
**मिथ्याभिमानहेतुत्वात्त्याज्य एव मुमुक्षुभिः ॥३॥"** इति ।

उक्तश्चाऽन्यत्राऽपि- **"आगमश्चोपपत्तिश्च सम्पूर्णं दृष्टिलक्षणम् ।**
**अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ॥१॥"** इति ।

एवं चरमसमये पञ्चषष्टिप्रकृतीनां जघन्यस्थित्युदीरणा भवति ।

अथवा **कर्मप्रकृतिचूर्णिकारादिभिर्यदुक्तं** सयोगिकेवलिगुणस्थानकचरमसमये उच्छ्वासस्य जघन्यस्थित्युदीरणा भवतीति, तत् सामान्येनाऽभिहितम् , **"व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ।"** इति न्यायेनोच्छ्वासं निरुन्धानस्य सयोगिकेवलिनश्चरमसमये उच्छ्वासस्य जघन्यस्थित्युदीरणा भवति । एवं वाग्योगं निरुन्धतः सयोगिकेवलिनश्चरमसमये सुस्वर-दुःस्वरयोर्जघन्यस्थित्युदीरणा भवतीति व्याख्येयम् ● । तत्त्वं तु केवलिनो बहुश्रुता वा विदन्ति ।

---

*धवलाकारास्तु सुस्वरदुःस्वरयोरुच्छ्वासस्य च प्रकृत्युदयं क्रमेण वाग्योगनिरोधकालमुच्छ्वासनिरोधकालं च यावत् प्रतिपादयन्ति । अक्षराणि त्वेवम्—"उस्सासस्सआणापाणपज्जत्तीए **पज्जत्तयदो जाव चरिमसमयउस्सासणिरोहकारओ त्ति ताव वेदओ ।** ××× **सुस्सरदुस्सराणं को वेदओ ? भासापज्जत्तीए पज्जत्तदो जाव भासाणिरोहस्स अकारओ त्ति**" इति । एवमुत्कृष्टप्रदेशोदीरणामपि निरूपयन्ति । किन्तु प्रकृत्युदीरणां जघन्यस्थित्युदीरणां च सयोगिकेवलिचरमसमयं यावद् व्याहरन्ति । अक्षराणि त्वेवम्—"**उस्सासणामाए मिच्छाइट्ठिपहुडि जाव सजोगि चरिमसमओ त्ति** [उदीरणा] ××× **सुस्सरदुस्सराणं मिच्छाइट्ठिप्पहुडि जाव सजोगिकेवलिचरमसमओ त्ति उदीरणा ।** ××× **अगुरुलघुअ-उवघाद-परघाद-उस्सास-पसत्थापसत्थविहायगदि-तस-बादर-पज्जत्त-पत्तेयसरीर-थिराथिर-सुहासुह-सुभग-सुस्सर-दुस्सर-आदेज्ज-जसगित्ति-तित्थयर-णिमिणणामाणं जहण्णट्ठिदिउदीरओ को होदि ? चरिमसमयसजोगी ।"** इति । इत्थं वाग्योगोच्छ्वासयोः प्राग् निरुद्धत्वात् सुस्वर-दुःस्वरोच्छ्वासानां प्रकृत्युदयं विना सयोगिकेवलिचरमसमये तेषां प्रकृत्युदीरणा जघन्यस्थित्युदीरणा च कथं भवेताम्? उदयाभावे उदीरणाऽयोगादिति नाऽवबुध्यते तदभिप्रायः ।

●व्याख्यातश्चैतदर्थः सत्कर्मपञ्जिकायामपि—"**एत्थ जाव सयोगिकेवलिचरिमसमयो ता उस्सासमुदीरेदि त्ति उत्तं उस्सासणिरोहं करेंतकेवलिचरिमसमयो जाव तावेदस्सुस्सासुदीरणा जीव-पदेसाणं परिप्फंदमुस्सासरूवं च करेदि । तत्तो परं ते दोण्णि वि कज्जाणि करेदुमसत्था होदूण तत्थ फलं सगरूवेणं पदेसणिज्जरं ण करेदि त्ति वत्तव्वं ।।**" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा तैजससप्तक-मृदु लघुवर्जशुभवर्णादिनवका-ऽगुरुलघु-स्थिर-शुभ-सुभगा-ऽऽदेय-यशः-कीर्ति-निर्माणोच्चैर्गोत्र-तीर्थकरनाम्नां पञ्चविंशतिसंख्यकानामुत्कृष्टा-ऽनुभागोदीरणा, कृष्ण-नील-दुरभिगन्ध-तिक्त-कटु-शीत-रूक्षा-ऽस्थिरा-ऽशुभरूपाणां च नवानां प्रकृतीनां जघन्यानुभागोदीरणा भवति। उक्तश्च कर्मप्रकृतिचूर्णौ—"**सजोगिकेवलिस्स अंते सव्वोवट्टणाए वट्टमाणस्स सुभपगतीणं, कयरासिं? भन्नइ—तेजतिगसत्तगं सुभवन्नेक्कारसगं मउय-लहु-यहीणं अगुरुलहुगं थिर-सुभ-सुभगं आएज्जं जसं निमिणं उच्चागोयं तित्थ-करनामाणं एयासिं पणुवीसाणं पगतीणं उक्कोसाणुभागउदीरणा लब्भति। कक्खडगुरुगहीणं कुवण्णणवगं अथिरं असुभं एतेसिं णवण्हं कम्माणं सजोगि-केवलिचरिमसमए जहण्णाणुभागुदीरणा।**" इति।

सयोगिकेवलिगुणस्थानकचरमसमये औदारिकसप्तक-तैजससप्तक-प्रथमसंहनन-संस्थानषट्क-वर्णादिविंशतिक-प्रशस्ता-ऽप्रशस्तखगति-पराघातोपघाता-ऽगुरुलघु-निर्माण-प्रत्येक-स्थिरा-ऽस्थिर-शुभा-ऽशुभरूपाणां द्वापञ्चाशत्प्रकृतीनां(५२)जघन्यस्थित्युदयो गुणितकर्मांशस्य च महात्मन उत्कृष्ट-प्रदेशोदयो भवति, सुस्वरदुःस्वरयोरुच्छ्वासस्य च जघन्यस्थित्युदयो गुणितकर्मांशस्य चोत्कृष्टप्रदेशो-दयः प्रागेव क्रमेण वाग्योगनिरोधचरमसमय उच्छ्वासनिरोधचरमसमये च भवति स्म। तथा तैजस-सप्तक-मृदुलघुवर्जशुभवर्णादिनवका-ऽगुरुलघु-स्थिर-शुभ-सुभगा-ऽऽदेय-यशः कीर्ति-निर्माण-तीर्थङ्करोच्चै-र्गोत्रलक्षणानां पञ्चविंशतिप्रकृतीनामुत्कृष्टानुभागोदयो कृष्ण-नील-दुरभिगन्ध-तिक्त-कटु-शीत-रूक्षा-ऽस्थिरा-ऽशुभरूपाणां च नवानां जघन्या-ऽनुभागोदयो भवतः, उदीरणातुल्यत्वात्तयोः ॥२५६॥

अथ सयोगिकेवलिगुणस्थानकचरमसमय उदयविच्छेदं गाथात्रयेण प्रतिपादयति—

**चरिमसमये सजोगिस्स य अण्णयरस्स वेयणीयस्स।**
**ओरालियदुग-तेजस-कम्मण-संठाणछक्काणं ॥२५७॥**
**तह पढमसंघयण-वण्णचउक्काण तह दोण्ह खगईणं।**
**अगुरुलहुय-उवघाय-परघाय-निम्माणणामाणं ॥२५८॥**
**पत्तेय-थिरा-ऽथिर-णामाण तह सुहा-ऽसुहाण वोच्छिण्णो।**
**उदओ पुव्वं चिय सुसर-दुस्सरुस्सासणामाणं ॥२५९॥**

चरमसमये सयोगिनश्चा-ऽन्यतरस्य वेदनीयस्य।
औदारिकद्विक-तैजस-कार्मण-संस्थानषट्कानाम् ॥२५७॥
तथा प्रथमसंहनन-वर्णचतुष्कयोस्तथा द्वयोः खगत्योः।
अगुरुलघूपघात-पराघात-निर्माणनाम्नाम् ॥२५८॥

प्रत्येक-स्थिरा-ऽस्थिरनाम्नां तथा शुभा-ऽशुभयोर्व्यवच्छिन्नः ।
उदयः पूर्वमेव सुस्वर-दुस्स्वरोच्छ्वासनाम्नाम् ॥२५१॥ इति पदसंस्कारः ।

**'चरिमसमये'** इत्यादि, तत्र 'सयोगिनश्च' सयोगिकेवलिनश्चरमसमये च 'अन्यतरस्य वेदनीयस्य' साता-ऽसातयोरन्यतरवेदनीयकर्मणः 'औदारिकद्विक-तैजस-कार्मण-संस्थानषट्कानाम्' औदारिकद्विकस्य=औदारिकशरीरौदारिकाङ्गोपाङ्गरूपस्य तैजसस्य=तैजसशरीरनामकर्मणः कार्मणस्य=कार्मणशरीरनामकर्मणः संस्थानषट्कस्य=समचतुरस्र-न्यग्रोधपरिमण्डल-सादि-वामन-कुब्ज-हुण्डलक्षणस्य च, तथा 'प्रथमसंहनन-वर्णचतुष्कयोः' प्रथमसंहननस्य=वज्रर्षभनाराचस्य वर्णचतुष्कस्य=वर्ण-गन्ध-रस-स्पर्शाख्यस्य च, तथा 'द्वयोः खगत्योः' प्रशस्तविहायोगतेरप्रशस्तविहायोगतेश्च 'अगुरुलघूपघात-पराघात-निर्माणनाम्नाम्' अगुरुलघुनामकर्मण उपघातनामकर्मणः पराघातनामकर्मणो निर्माणनामकर्मणश्च 'प्रत्येक-स्थिरा-ऽस्थिरनाम्नां' प्रत्येकनामकर्मणः स्थिरनामकर्मणो-ऽस्थिरनामकर्मणश्च 'शुभा-ऽशुभयोः' शुभनामकर्मणो-ऽशुभनामकर्मणश्चोदयो व्यवच्छिन्नः । तत्रैकतरं वेदनीयं यदयोगिकेवलिना न वेदयितव्यम् , तत् सयोगिकेवलिचरमसमय उदयतो व्यवच्छिद्यते,अयोगिगुणस्थानके वेदनीयोदयस्य परावृत्तेरभावात् । तथा नामकर्मणोऽप्युक्तौदारिकद्विकादिप्रकृतयो व्यवच्छिन्नोदया भवन्ति, उत्तत्रोदया-ऽभावात् ।

इह मूले सयोगिकेवलिगुणस्थानकचरमसमये नामकर्मणः सप्तषष्टिभेदानाश्रित्य षड्विंशतिनामकर्मोत्तरप्रकृतीनामुदयविच्छेदो-ऽभिहितः, व्यधिकशतभेदाँस्त्ववलम्ब्य द्वापञ्चाशत्प्रकृतीनामुदयविच्छेदो वक्तव्यः, औदारिकद्विकमपनीयौदारिकशरीरौदारिकाऽङ्गोपाङ्गौदारिकौदारिकबन्धनौदारिकतैजसबन्धनौदारिककार्मणबन्धनौदारिकतैजसकार्मणबन्धनौदारिकसंघातनलक्षणौदारिकसप्तकस्य तैजस-कार्मणलक्षणशरीरद्वयममपनीय तैजसशरीर-तैजसतैजसबन्धन–तैजसकार्मणबन्धन-तैजससंघातन-कार्मणशरीर-कार्मणकार्मणबन्धन-कार्मणसंघातनाख्यतैजससप्तकस्य वर्णचतुष्कञ्चा-ऽपनीय कृष्ण–नील-लोहित-हारिद्र-शुक्ल-तिक्त-कटु-कषाया-ऽऽम्ल-मधुर-सुरभि-दुरभि-गुरु-लघु-मृदु-खर-शीतोष्ण-स्निग्ध-रूक्षरूपविंशतिप्रकृतीनां प्रक्षेपात् ।

ननु सयोगिकेवलिचरमसमये सुस्वर-दुःस्वरोच्छ्वासनामकर्मणामप्युदयविच्छेदः कुतो नोक्तः? इत्यत आह–'पुव्वं' इत्यादिः, पूर्वमेव 'सुस्वर-दुःस्वरोच्छ्वासनाम्नां' सुस्वरनामकर्मणो दुःस्वरनामकर्मण उच्छ्वासनामकर्मणश्चोदयो व्यवच्छिन्नः, वाग्योगनिरोधकाले सुस्वर-दुःस्वरयोरुच्छ्वासनिरोधकाले चोच्छ्वासस्योदयो व्यवच्छिन्न इत्यर्थः । यदुक्तं सप्ततिकाचूर्णौ–**"तम्मि चेव समए ओरालिय-तेया-कम्मइगसरीरसंबद्धाणं बंधण-संघाय छन्हं संठाणाणं पढमसंघयण-ओरालियंगोवंगं वण्ण-गंध-रस-फास-अगुरु० उवघाय–पराघाय–विहग०२-पत्तेय–थिराथिर–सुभासुभ-निमेणणामाणं एएसिं कम्माणं उदओदीरणाणं वोच्छेओ, ऊसास-सरा हेट्ठओ निरुद्धा ।"** इति । अत्र चूर्णिकारैर्नामकर्मण एवोदयोदीरणाविच्छेदः प्रदर्शितः, तेना-ऽन्यतरवेदनीयस्योदयविच्छेदो नोल्लिखितः ।

सयोगिचरमसमये सर्वथोच्छ्वासनिरोधं मन्यन्त आवश्यकचूर्णिकारादय इत्यस्माकं मतिः। यदुक्तमावश्यकचूर्णौ–"ताहे आणपाणुणिरोहं काउं अजोगो भवति।" इति।

सूक्ष्मक्रिया-ऽप्रतिपातिध्यानसामर्थ्येन संस्थानप्रमाणमुच्छ्रायप्रमाणं च क्रमेण ह्रासयतः केवलिनश्चरमभवे यत् संस्थानप्रमाणमुच्छ्रायप्रमाणं च भवति, तदुच्छ्रायप्रमाणतस्त्रिभागहीनौ संस्थानोच्छ्रायौ निरुद्धयोगस्य महात्मनः सयोगिकेवलिचरमसमये भवतः,यतो मुखश्रवणोदरादिच्छिद्राणि स्वात्मप्रदेशैः पूरितानि भवन्ति, यदुक्तमावश्यकचूर्णौ–"जाइं च से सरीरे कम्मणिव्वत्तियाइं मुहसवणसिरोदरादिच्छिद्दाइं तानि वियोएमाणो२ तिभागूणं पदेसोगाहणं करेति।" इति। एवं **वाचकमुख्यैरपि-**

**"चरिमभवे संस्थानं यादृग् यस्योच्छ्रयप्रमाणं च।**
**तस्मात् त्रिभागहीनावगाहसंस्थानपरिणाहः ॥१॥" इति ॥२५७-२५८-२५९॥**

अथ सयोगिकेवलिगुणस्थानचरमसमये ये सप्त पदार्था युगपद् व्यवच्छिद्यन्ते,तान् व्याजिहीर्षुराह–

**किट्टी जोगो ठिइरसघाओ णामदुगुदीरणा लेसा।**
**बंधो तइयज्झाणं य सत्त अन्तम्मि वोच्छिण्णा ॥२६०॥**

किट्ट्यो योगः स्थितिरसघातो नामद्विकोदीरणा लेश्या।
बन्धस्तृतीयध्यानं च सप्ता-ऽन्ते व्यवच्छिन्नाः ॥२६०॥ इति पदसंस्कारः।

'**किट्टी**' इत्यादि, 'किट्टयः' प्रागनिरूपितशब्दार्थाः सर्वा योगकिट्टयः 'योगः' जीवप्रदेशपरिस्पन्दनलक्षणः करणवीर्यमित्यर्थः, स्थितिरसघातो 'नामद्विकोदीरणा' नाम-गोत्रयोरुदीरणा 'लेश्या' शुक्ललेश्या 'बन्धः' सातवेदनीयस्यैर्यापथिकबन्धः 'तृतीयध्यानं' सूक्ष्मक्रिया-ऽप्रतिपातिनामधेयं ध्यानं च सर्वसङ्ख्यया 'सप्त' सप्तसङ्ख्यकाः पदार्था 'अन्ते' सयोगिकेवलिगुणस्थानकस्य चरमसमये युगपद् 'व्यवच्छिन्नाः' अपुनर्भाविना-ऽपगता भवन्ति। न चैषा सप्तपदार्थव्यवच्छित्तिः स्वमनीषिकया-ऽभिहिता, **पूर्वमहर्षिभिरुक्तत्वात्**। तथा चा-ऽऽहुः **श्रीमन्मलयगिरिपादाः–"तस्मिंश्च सयोग्यवस्थाचरमसमये सूक्ष्मक्रिया-ऽप्रतिपातिध्यानं सर्वाः किट्टयः सद्वेद्यबन्धो नामगोत्रयोरुदीरणा योगः शुक्ललेश्या स्थित्यनुभागघातश्चेति सप्तपदार्थाः युगपद्व्यवच्छिद्यन्ते।"** इति। भावार्थः पुनरयम्-सयोगिगुणस्थानकचरमसमये सर्वा योगकिट्टयो व्यवच्छिद्यन्ते, सर्वथा तन्नाशस्य दर्शितत्वात्। योगकिट्टीनां व्यवच्छिन्नत्वाद् योगोऽपि व्यवच्छिद्यते। न च किट्टीनां नाशेन योगव्यवच्छेदोऽनुक्तः सिद्धः, कुतः पदार्थान्तरत्वेनोपदिश्यत इति वाच्यम्, मन्दबुद्धिजनानां सुखावबोधाय प्रतिपादितत्वेन विरोधा-ऽभावात्। करणवीर्यरूपस्य योगस्य व्यवच्छेदात् स्थितिघातरसघातलक्षणा-ऽपवर्तना, उदीरणा लेश्या बन्धश्च निवर्तन्ते, तेषां योगनिमित्तत्वात् **"निमित्ता-ऽभावे नैमित्तिकस्याप्यभावः"** इति न्यायोपलम्भाच्च। तृतीयध्यानस्य फलं योग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरोधः, तेन योगनिरोधलक्षणफले समुत्पन्ने तत्कारणं सूक्ष्मक्रिया-ऽप्रतिपातिध्यानं निवर्तते, प्रयोजनसिद्धेः । इत्थं सूक्ष्मक्रियाऽप्रतिपातिध्यानबलेन निरुद्धकाययोगो विगतलेश्यो देहे स्थितो-ऽपि निर्वाणं यियासुः केवलज्ञानी भगवान् निष्क्रियो भवति । उक्तं च—

"ध्याने दृढा-ऽ-र्पिते परमात्मनि ननु निष्क्रियो भवति कायः ।
प्राणापातनिमेषोन्मेषवियुक्तो मृतस्येव ॥१॥
ध्याना-ऽर्पितोपयोगस्या-ऽपि न वाङ्-मनसक्रिये यस्मात् ।
अन्तर्वर्त्तित्वादुपरमतस्तेन तयोर्ध्यानेन निरोधनं नेष्टम् ॥२॥
सततं तेन ध्यानेन निरुद्धे सूक्ष्मकाययोगेऽपि ।
निष्क्रियदेहो भवति स्थितो-ऽपि देहे विगतलेश्यः ॥३॥" इति ॥२६०॥

तदेवं समर्थितोऽष्टमोऽधिकारः ।

## सयोगिकेवलिगुणस्थानकचरमसमये प्रवर्तमानपदार्थानां यन्त्रकम् ।

(१) उदयवतीनां प्रकृतीनामयोगिगुणस्थानकाद्धाप्रमाणां स्थितिं विदधाति ।

(२) अनुदयवतीनां प्रकृतीनामयोगिगुणस्थानकाद्धापेक्षया समयोनां स्थितिं निर्वर्तयति ।

(३) नरकद्विक-तिर्यग्द्विक-पञ्चेन्द्रियवर्जजातिचतुष्टय-स्थावर-सूक्ष्म-साधारणा-ऽऽतपोद्योतवर्जानां शेषाणां नामकर्मनवतिप्रकृतीनां (९०) वेदनीयद्विक-गोत्रद्विकयोश्च जघन्यस्थितिसंक्रमो भवति ।

(४) मनुष्यगति-पञ्चेन्द्रियजात्यौदारिकसप्तक-तैजससप्तक-प्रथमसंहनन-संस्थानषट्क-वर्णादिविंशतिक-खगति-द्विक-पराघातोपघातोच्छ्वासा-ऽगुरुलघु-तीर्थङ्कर-निर्माण-त्रस-बादर-पर्याप्त-प्रत्येक-स्थिरा-ऽस्थिर-शुभा-ऽशुभ-सुभग-सुस्वर-दुःस्वरा-ऽऽदेय-यशःकीर्त्युच्चैर्गोत्ररूपाणां पञ्चषष्टिप्रकृतीनां (६५) जघन्यस्थित्युदीरणा भवति ।अथवा सुस्वर-दुःस्वरोच्छ्वासवर्जानां निरुक्तमनुष्यगत्यादीनां जघन्यस्थित्युदीरणा भवति ।

(५) अनन्तरोक्तपञ्चषष्टिप्रकृतीनाम् (६५) उत्कृष्टप्रदेशोदीरणा गुणितकर्मांशजीवस्य भवति ।अथवा सुस्वर-दुःस्वरोच्छ्वासवर्जानां शेषाणां द्वाषष्टिप्रकृतीनाम् (६२) उत्कृष्टप्रदेशोदीरणा भवति ।

(६) तैजससप्तक-मृदुलघुवर्जशुभवर्णादिनवका-ऽगुरुलघु-स्थिर-शुभ-सुभगा-ऽऽदेय-यशःकीर्त्ति-निर्माणोच्चैर्गोत्र-तीर्थकरनाम्नां पञ्चविंशतिकर्मणाम् (२५) उत्कृष्टानुभागोदीरणा भवति ।

(७) अनन्तरोक्तानां पञ्चविंशतिप्रकृतीनामुत्कृष्टानुभागोदयो भवति ।

(८) कृष्ण-नील-दुरभिगन्ध-तिक्त-कटु-शीत-रूक्षा-ऽस्थिरा-ऽशुभरूपाणां नवप्रकृतीनां (९) जघन्या-ऽनुभागोदीरणा भवति ।

(९) अनन्तरोक्तनवप्रकृतीनां जघन्या-ऽनुभागोदयो भवति ।

(१०) औदारिकद्विक--तैजस-कार्मणशरीर-संस्थानषट्क-प्रथमसंहनन-वर्णचतुष्क--खगतिद्विका-ऽगुरुलघूपघात-पराघात-निर्माण--प्रत्येक-स्थिरा--ऽस्थिर-शुभा-ऽशुभा--ऽन्यतरवेदनीयरूपाणां सप्तत्रिंशतिप्रकृतीनाम् (२७) उदयो व्यवच्छिद्यते । नामकर्मणस्त्र्यधिकशतभेदाँस्त्वाश्रित्य त्रिपञ्चाशत्प्रकृतीनामुदयो व्यवच्छिद्यते ।

(११) चरमभवाऽपेक्षया देहः संस्थानत उच्छ्रायतश्च त्रिभागहीनो भवति ।

(१२) सप्तपदार्थानां व्यवच्छित्तिः । तद्यथा—

(१) योगकिट्टीनां सर्वथा विनाशः ।   (२) योगस्य विनाशः ।   (३) स्थितिघात-रसघातयोर्विच्छेदः ।
(४) नामगोत्रयोरुदीरणाया व्यवच्छेदः ।   (५) शुक्ललेश्याया उच्छेदः ।
(६) सातवेदनीयबन्धस्योच्छेदः ।   (७) सूक्ष्मक्रिया-ऽप्रतिपातिध्यानस्या-ऽपगमः ।

Jain Education International      For Private & Personal Use Only      www.jainelibrary.org

सम्प्रति नवममधिकारमयोगिगुणस्थानकाख्यं प्रतिपादयितुकाम आह—

**सेकाले लहइ अजोगिगुणट्ठाणमुवयाइ झाणं च ।**
**वोच्छिण्णकिरियमंतोमुहुत्तपमिअं च सेलेसिं॥२६१॥**

अनन्तरकाले लभते-ऽयोगिगुणस्थानकमुपयाति ध्यानं च ।
व्यवच्छिन्नक्रियमन्तर्मुहूर्तप्रमितां च शैलेशीम् ॥२६१॥ इति पदसंस्कारः ।

'**सेकाले**' इत्यादि, 'अनन्तरकाले' सयोगिकेवलिगुणस्थानचरमसमयादनन्तरसमय इत्यर्थः, 'अयोगिगुणस्थानकं' योगः-मनोवाक्कायव्यापाररूपो विद्यते-ऽस्येति योगी "**अतो-ऽनेकस्वरात्**" (सिद्धहेम० ७-२-६) इतिसूत्रेण इन्प्रत्ययः, न योगीत्ययोगी,तस्य गुणस्थानमित्ययोगिगुणस्थानम्, तत् 'लभते' प्राप्नोति । तदानीं चा-ऽन्यत्किं प्राप्नोति ? इत्यत आह-'**उवयाइ झाणं च**' इत्यादि, 'उपयाति' प्राप्नोति ध्यानं च 'व्यवच्छिन्नक्रियम्' व्यवच्छिन्नक्रियाऽप्रतिपाति चतुर्थशुक्लं 'अन्तर्मुहूर्तप्रमितां च' ह्रस्वाक्षरपञ्चकोच्चारणकालप्रमाणां च शैलेशीम्, चकारः समुच्चये । उक्तं च **भाष्यकृद्भिः**—

**"रुंभइ स कायजोगं संखाईएहिं चेव समएहिं ।**
**तो कयजोगनिरोहो सेलेसीभावणामेइ ॥१॥**
**तणुरोहारंभाओ झायइ सुहुमकिरियाणियट्टिं सो ।**
**वुच्छिन्नकिरियमप्पडिवाइं सेलेसिकालम्मि ॥२॥"** इति ।

एवमावश्यकचूर्णिकारैरपि निगदितम्-"**पच्छा समुच्छिन्नकिरियं झाणं अणुप्पविट्ठो जावतिएणं कालेणं अतुरियं अविलंवितं ईसोपंचरहस्सक्खरा 'क ख ग घ ङ' एते उच्चारिज्जंति, एवतिकालं सेलेसिं पडिवज्जदि ।**" इति ।

ननु किं नाम व्युच्छिन्नक्रियमप्रतिपाति ध्यानम् ? इति चेत्, उच्यते-व्युच्छिन्ना=व्युपरता क्रिया=सूक्ष्मकाययोगलक्षणा यस्मिन्, तत्, न प्रतिपतनशीलमित्यप्रतिपाति । उक्तं च **तत्त्वार्थवृत्तौ**—

**"कायिकी च यदेषाऽपि सूक्ष्मोपरमति क्रिया ।**
**अनिवर्ति तदप्युक्तं ध्यानं व्युपरतक्रियम् ॥१॥** इति ।

ननु मनसो-ऽभावेन योगा-ऽभावेन च प्रयत्नविशेषाऽभावादयोगिनो ध्यानं कथं भवितुमर्हति ? इति चेत्, उच्यते-पूर्वप्रयोगात् सिध्यत्ययोगिनो ध्यानम्, यथा कुलालचक्रं भ्रमणनिमित्तदण्डादेः क्रियानिवर्तने-ऽपि पूर्वा-ऽभ्यासाद् भ्राम्यति, तथा मनःप्रभृतिसर्वयोगोपरमे-ऽपि पूर्वविहितध्यानसंस्कारादयोगिनो ध्यानं भवतीत्यर्थः । (२) तथा जीवोपयोगरूपभावमनः-सत्त्वादयोगिनो ध्यानं भवितुमर्हति (३) तथा ध्यानकार्ये-कर्मनिर्जरणे हेतुत्वादयोगिनोध्यानमुपप-

यते, यथा पुत्रकार्यादपुत्रोऽपि पुत्रो भण्यत इति । किञ्च (४) ध्यैधातोरनेकार्थत्वेन 'ध्यै अयोगित्वे' इत्यभ्युपगमाद् (५) जिनागमवचनप्रामाण्याच्चा-ऽयोगिनो ध्यानं सिध्यति । उक्तं च **विशेषावश्यकभाष्ये**—

**"पुव्वप्पओगओ वि य कम्मविणिज्जरणहेउतो वा वि ।**
**सद्दत्थबहुत्ताओ तह जिणचंदागमाओ य ॥१॥**
**चित्ताभावे वि सया सुहुमोवरयकिरियाइ भण्णंति ।**
**जीवोवओगसब्भावओ भवत्थस्स झाणाइं ॥२॥"** इति ।

अत्र पूर्वप्रयोगादिति हेतुः कारणोपपत्तये, पूर्वसंस्काररूपहेत्वनपायात् । जीवोपयोगरूपभावमनःसद्भावादिति द्वितीयो हेतुर्लक्षणोपपत्तये, भावमनःस्थैर्यरूपलक्षणोपपत्तेः । ध्यानकार्य-कर्मनिर्जरणे हेतुत्वादिति हेतुर्व्यवहारोपपत्तये । अनेकार्थत्वादिति शब्दा-ऽर्थोपपत्तये, जिनागमवचनप्रामाण्यादिति च प्रमाणोपपत्तय इति ज्ञातव्यम् ।

अत्र सूक्ष्मग्रहणात् सूक्ष्मक्रिया-ऽनिवर्तिनो ग्रहणम्, उपरतग्रहणाद् व्युपरतक्रियाऽप्रतिपातिनो ग्रहणम् ।

व्युपरतक्रियाऽनिवर्तिध्याने वर्तमानस्य महात्मनो बन्ध-लेश्या-योगादयो न भवन्ति, सयोगिकेवलिचरमसमये व्यवच्छिन्नत्वात् , उक्तं च **शतकचूर्णौ**—

**"जोगाभावाओ पुण दुसमयठितो ण कम्मबन्धो त्ति ।**
**झाणप्पसंहारा तिभागसंकुचियनियदेहो ॥१॥**
**लेसाकरणणिरोहो जोगणिरोहो य तणुणिरोहेण ।**
**अह भणिओ विन्नेओ बन्धणिरोहो वि य तहेव ॥२॥**
**एसो अजोगिभावो जोगणिरोहेण पत्तगुणणामो ।**
**अप्पडिवायज्झाणो सव्वण्णू सव्वदंसी य ॥३॥"** इति ।

ननु यदि चित्ता-ऽभावेऽप्ययोगिनो ध्यानमिष्यते, तर्हि सिद्धस्य कथं नेष्यते ? इति चेत् , उच्यते--सिद्धानां प्रयत्नविशेषाभावात् कर्मनिर्जरादिप्रयोजनाभावाच्च न सिद्धानां ध्यानं भवितुमर्हति, उक्तं च **विशेषावश्यकभाष्ये**—

**"जइ अमणस्स वि झाणं केवलिणो  तं न सिद्धस्स ? ।**
**भण्णइ जं न पयत्तो तस्स जओ न य निरुद्धव्वं ॥१॥"**

तथा चाऽत्र तट्टीका—**"यद्यमनस्कस्या-ऽपि केवलिनो ध्यानमिष्यते, तर्हि सिद्धस्य किमिति नाभ्युपगम्यते ? भण्यते-ऽत्रोत्तरम्, यद्-यस्मात् तस्य सिद्धस्य कारणा-ऽभावेन प्रयत्नो नास्ति, न च योगलक्षणं निरोद्धव्यमस्ति, अतः प्रयत्नाभावात् प्रयोजनाभावाच्च न सिद्धस्य ध्यानमिति ।"** इति ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

इत्थं शैलेशीं प्राप्तः चतुर्थं व्यवच्छिन्नक्रिया-ऽप्रतिपातिशुक्लध्यानं ध्यायति ।उक्तं च

**तस्सेव य सेलेसीगयस्स सेलोव्व णिप्पकंपस्स ।**
**वोछिन्नकिरियमप्पडिवाइज्झाणं परमसुक्कं ॥१॥"** इति ।

ननु का नाम शैलेशी ? उच्यते-शिलाभिर्निर्वृत्ताः शैलाः=पर्वताः,शैलानामिशः शैलेशः=मेरुपर्वतः, तस्येयं शैलेशी, मेरुवद् निष्कम्पत्वात् स्थिरतेत्यर्थः । अथवा 'शील समाधौ' इति धात्वर्थदर्शनात् शीलं समाधानम्, तच्च निश्चयतः सर्वसंवरः, तस्य ईशः=स्वामी शीलेशः, सयोगिकेवलिनो योग-निमित्तककर्मादानोपलम्भात् निश्शेषतः संवरो नासीत्,अयोगिना भगवता तु योगस्या-पि निरुद्धत्वाद् भवति सकलसंवरस्तस्य महात्मनः । शैलेशस्येयमवस्था=शैलेशी । उक्तं च **श्रीमद्भाष्यकृद्भिः—**

**सेलेसो किल मेरू सेलेसी होइ जा तदचलया ।**
**होउं व असेलेसो सेलेसीहोइ थिरयाए ॥१॥**
**सीलं व समाहाणं निच्छयओ सव्वसंवरो सो य ।**
**तस्सेसो सीलेसो सीलेसी होइ तयवत्था ॥२॥"** इति

अथ शैलेश्याः कालो भण्यते—ना-ऽतिशीघ्रैर्ना-ऽतिस्थिरैः, किन्तु मध्यमरीत्या यावता कालेन 'अ इ उ ऋ लृ' इत्येतानि पञ्च ह्रस्वा-ऽक्षराण्युद्गीर्यन्ते, तावान् शैलेश्याः कालो बोद्धव्यः । उक्तं च **विशेषावश्यकभाष्ये—**

**"हस्सक्खराइं मज्झेण जेण कालेण पंच भण्णंति ।**
**अत्थइ सेलेसिगओ तत्तियमेत्तं तओ कालं ॥१॥"** इति ॥२६१॥

ननु शैलेशीप्राप्तो-ऽयोगिकेवली भगवान् किं करोति ? इत्यत आह—

पुव्वरइयकम्मं खवइ असंखगुणक्कमेण गयलेसो ।
दुचरिमसमये संठाण-अथिर-संघयणछक्कं तु ॥२६२॥
अगुरुलहुचउक्कं पणतणुसंघाया खगइ-सुरदुगं च ।
वीसा वण्णाई तह बंधणपन्नरसगं निमिणं ॥२६३॥
अंगोवंगतिगं तह पत्तेयतिगं सुसरमपज्जत्तं ।
सायं व असायं वा नीअं छिज्जन्ति सन्तत्तो ॥२६४॥

पूर्वरचितकर्म क्षपयत्यसंख्यगुणक्रमेण गतलेश्यः ।
द्विचरमसमये संस्थाना-ऽस्थिर-संहननषट्कं तु ॥२६२॥
अगुरुलघुचतुष्कं पञ्चतनुसंघातानि खगति-सुरद्विकं च ।
विंशतिर्वर्णादयस्तथा बन्धनपञ्चदशकं निर्माणम् ॥२६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अङ्गोपाङ्गत्रिकं तथा प्रत्येकत्रिकं सुस्वरमपर्याप्तम् ।
सातं वा-ऽसातं वा नीचं व्यवच्छिद्यन्ते सत्तातः ॥२६४॥ इति पदसंस्कारः ।

'पुव्वरइय०' इत्यादि, 'पूर्वरचितकर्म' पूर्वम्-आयोजिकाकरणादिकाले गुणश्रेणिं कुर्वता यदसंख्येयगुणक्रमेण रचितमायुर्वर्जवेदनीयादीनां कर्मदलम् , आयुस्तु गुणश्रेण्यभावेनाऽसंख्येयगुणक्रमेण दलिकरचनाऽभावात् , तत् पूर्वरचितकर्म, यदुक्तं **प्रज्ञापनावृत्तौ श्रीमद्हरिभद्रसूरिपादैः**–"**पुव्वरइयं च णं कम्मं' आउज्जो [ जीवा न भेदोपचारे ] काले चेव गुणसेढीं करेति, गुणप्पहाणा सेढी२, आउकम्मसमयमित्तकालं गुणसेढिं रएति, पढमसमए वेदणीयादिकम्मपदेसे थोवे रएति, बितियादिसु असंखिज्जगुणे२ रएति ।**" इति । 'गतलेश्यः' गता=अपगता लेश्या यस्य, स गतलेश्यः, अलेश्यो-ऽयोगिकेवली भगवानित्यर्थः, असङ्ख्यगुणक्रमेण क्षपयति, अयोगिप्रथमसमये स्थितिक्षयेणोदयवतीनां विपाकतो-ऽनुदयवतीनां च स्तिबुकसंक्रमेण संक्रम्य प्रदेशतो वेदनीयादिप्रकृतीनां पूर्वरचितकर्मदलं स्तोकं विनाशयति, ततो द्वितीयसमये-ऽसंख्येयगुणं क्षपयति, ततोऽपि तृतीयसमये-ऽसंख्येयगुणम् । एवमुत्तरोत्तरसमयेऽसंख्येयगुणक्रमेण दलं क्षपयतीत्यर्थः । यदवादिपुस्तत्रभवन्त **आर्य-श्यामाः प्रज्ञापनायाम्**–"**××× अजोगयं पाउणित्ता ईसिं हस्सपंचक्खरुच्चारणद्धाए असंखेज्जसमइयं अंतोमुहुत्तियं सेलेसिं पडिवज्जइ, पुव्वरइयगुणसेढीयं च णं कम्मं, तीसे सेलेसिमद्धाए असंखेज्जाहिं गुणसेढीहिं (असंखेज्जे) कम्मखंधे खवयति ।**" इति । तथैव **श्रीमन्तो भाष्यकृतो-ऽपि**—

"**तदसंखेज्जगुणाए गुणसेढीए रइयं पुरा कम्मं ।**
**समए समए खवियं कमसो सेलेसिकालेणं** ॥१॥" इति ।

एवं स्थितिघातादिरहितोऽयोगिकेवली भगवान् स्थितिक्षयेणोदयवतीनां प्रदेशाग्रं विपाकतोऽनुदयवतीनां पुनः प्रकृतीनां वेद्यमानप्रकृतिषु स्तिबुकसंक्रमेण संक्रम्य प्रतिसमयमसंख्येयगुणक्रमेण क्षपयन्नयोगिगुणस्थानकस्य द्विचरमसमयमुपगच्छति, तदानीं तस्य महात्मनः कतीनां प्रकृतीनां सत्ताविच्छेदो जायते ? इत्यत आह–'**दुचरिम०**' इत्यादि, 'द्विचरमसमये' द्वितीयश्चरमो यस्मात्=यत आरभ्या-ऽन्तिमसमयो द्वितीयो भवति, स द्विचरमसमयः, तस्मिन् , अयोगिगुणस्थानकस्य चरमसमयात् प्राक्तनसमय इत्यर्थः 'संस्थाना-ऽस्थिर-संहननषट्कं तु' षट्कशब्दस्य प्रत्येकं सम्बन्धात् संस्थानषटकं=समचतुस्र-न्यग्रोधपरिमण्डल-सादि-वामन-कुब्ज-हुण्डसंस्थानाख्यम् ,अस्थिरषट्कम्=अस्थिरोपलक्षितं षट्कम्=अस्थिरा-ऽशुभ-दुर्भग-दुःस्वरा-ऽनादेया-ऽयशःकीर्त्तिरूपम्, संहननषट्कं=वज्रर्षभनाराच-ऋषभनाराच-नाराचा-ऽर्धनाराच-कीलिका-सेवार्तसंहननरूपम् ,तुर्वाक्यभेदे, 'अगुरुलघुचतुष्कम्' अगुरुलघूपघातपराघातोच्छ्वासाख्यं '**पणतणुसंघाया**' त्ति प्राकृतत्वात् पुंस्त्वनिर्देशः, 'पञ्चतनुसंघातानि पञ्चशब्दस्य प्रत्येकमभियोजनात् पञ्चतनवः=औदारिक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैक्रिया-ऽऽहारक-तैजस-कार्मण-शरीररूपाः, पञ्चसंघातानि=औदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मण-संघातलक्षणानि 'खगतिसुरद्विकं च' द्विकशब्दस्य प्रत्येकं सम्बन्धात् खगतिद्विकं=प्रशस्त-विहायोगत्यप्रशस्तविहायोगतिरूपं सुरद्विकं=देवगति-देवानुपूर्वीलक्षणम् , चकारः समुच्चयार्थः, **'वीसा वण्णाई'** त्ति 'विंशतिर्वर्णादयः' कृष्ण-नील-लोहित-हारिद्र-शुक्लवर्ण-सुरभि-दुरभिगन्ध-तिक्त-कटु-कषायाऽऽम्ल-मधुररस-गुरु-लघु-मृदु-खर-शीतोष्णस्निग्धरूक्षस्पर्शाख्याः प्रकृतयः 'तथा' तथाशब्दः समुच्चये 'बन्धनपञ्चदशकं' बन्धनानां पञ्चदशकमिति बन्धनपञ्चदशकम्, पञ्चदशानां बन्धनामौदारिकौदारिकौदारिकतैजसौदारिककार्मणौदारिकतैजसकार्मण-वैक्रियवैक्रिय-वैक्रियतैजस-वैक्रियकार्मण-वैक्रियतैजसकार्मणा-ऽऽहारकाहारका - ऽऽहारकतैजसा-ऽऽहारककार्मणा-ऽऽहारकतैजसकार्मणतैजसतैजस-तैजसकार्मण-कार्मणकार्मणाख्यानां समुदाय इति यावत् , 'निर्माणं' निर्माण-नामकर्म **'अंगोवंगतिगं'** ति 'अङ्गोपाङ्गत्रिकम्' औदारिक-वैक्रिया-ऽऽहारका-ऽङ्गोपाङ्गरूपं **'पत्तेयतिगं'** ति 'प्रत्येकत्रिकं' प्रत्येकोपलक्षितत्रिकं=प्रत्येकनामकर्म स्थिरनामकर्म शुभनामकर्म चेत्यर्थः, 'सुस्वरं' सुस्वरनामकर्म 'अपर्याप्तम्' अपर्याप्तनामकर्म च **'सायं'** इत्यादि, 'सातं वा' सातवेदनीयं वा 'असातं वा' असातवेदनीयं वा, सातवेदनीयोदयेन शैलेशीं प्रतिपन्नस्या-ऽसातवेदनीयमसातवेदनीयोदयेन पुनः शैलेशीमधिगतस्य सातवेदनीयमित्यर्थः, 'नीचं' नीचैर्गोत्रं चेत्येताः सर्वसंख्यया द्व्यशीतिप्रकृतयः **'सन्तत्तो'** त्ति सत्तातः 'छिद्यन्ते' स्वरूप-सत्तामधिकृत्य क्षप्यमाणाः क्षपिता इत्यर्थः, चरमसमये स्तिबुकसंक्रमेणोदयवतीषु मूलप्रकृत्यभिन्नासु परप्रकृतिषु तासां संक्रमणात् । प्रत्यपादि च **कर्मस्तवे**—

> **"देवदुगपणसरीरं पंचसरीरस्स बंधणं चेव ।**
> **पंचेव संघाया संठाणा तह य छक्कं च ॥१॥**
> **तिन्नि य अंगोवंगा संघयणं तह य होइ छक्कं च**
> **पंचेव य वण्णरसा दो गंधा अट्ठ फासा य ॥२॥**
> **अगुरुलहुयचउक्कं विहायगइदुगथिराथिरं चेव ।**
> **सुहसुस्सरजुयला वि य पत्तेयं दूभगं अजसं ॥३॥"** इति ।

**श्रीकर्मस्तवकृद्भिर**ष्टचत्वारिंशदधिकशतप्रकृतीराश्रित्य सत्ताविच्छेदोऽभिहित इति तैर्बन्धन-पञ्चकस्यैव सत्ताविच्छेदो दर्शितः, अस्माभिस्त्वष्टापञ्चाशदुत्तरशतप्रकृतीरवलम्ब्य सत्ताविच्छेदः प्रतिपादित इति बन्धनपञ्चदशकस्य सत्ताविच्छेदः प्ररूपितः । इदमत्राऽवधेयम्—प्रागनुपार्जिता-ऽऽहारकसप्तकस्य जीवस्या-ऽऽहारकसप्तकस्य सत्ताविच्छेदो न द्रष्टव्यः, तस्य तत्सत्कर्माऽभावात् ।

तदनन्तरमयोगिगुणस्थानकचरमसमये त्रस-बादर-पर्याप्त-सुभगा-ऽऽदेय-यशःकीर्त्ति-मनुष्यगति-मनुष्यायुः-पञ्चेन्द्रियजाति-जिननामकर्मोच्चैर्गोत्रा-ऽन्यतरवेदनीयरूपाणां द्वादशप्रकृतीनां जघन्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थित्युदयो गुणितकर्मांशस्य च भगवतो मनुष्यायुर्वर्जशेषाणामेकादशानां प्रकृतीनामुत्कृष्टप्रदेशोदयो जायते ॥२६२-२६३-२६४॥

अथ चतुर्दशा-ऽयोगिगुणस्थानकचरमसमय उदयसत्त्वविच्छेदमस्पृशद्गतिं च बिभणिषुराह—

**चरिमम्मि णरतसतिगं पणिंदियुच्चजससुभगआइज्जं ।**
**सायमसायं व जिणं वा एगूणा य उदयत्तो ॥२६५॥**
**णरअणुपुव्वी सत्ताच्छेअं बिंति इयरे दुचरिमखणे ।**
**सिज्झइ खणेण समयप्पएसअंतरमफुसमाणो ॥२६६॥**

चरमे नरत्रसत्रिकं पञ्चेन्द्रियोच्चयशःसुभगादेयम ।
सातमसातं वा जिनं वैकोनाश्चोदयतः ॥२६५॥
नरानुपूर्वीसत्ताच्छेदं ब्रुवन्तीतरे द्विचरमक्षणे ।
सिध्यति क्षणेन समयप्रदेशान्तरमस्पृशन् ॥ २६६ ॥ इति पदसंस्कारः ।

**'चरिमम्मि'** इत्यादि, 'छिज्जन्ति सन्तत्तो' इतिपदद्वयं पूर्वतो-ऽनुवर्तते, 'चरमे' अयोगिकेवलिगुणस्थानकस्य चरमसमये 'नरत्रसत्रिकं' त्रिकशब्दस्य प्रत्येकं योजनात् नरत्रिकं= मनुष्यगति-मनुष्याऽऽनुपूर्वी-मनुष्याऽऽयुराख्यं त्रसत्रिकं=त्रस-बादर-पर्याप्तलक्षणं 'पञ्चेन्द्रियोच्च-यशस्सुभगा-ऽऽदेयम्' पञ्चेन्द्रियादयः कृतसमाहारद्वन्द्वसमासाः प्रथमया निर्दिष्टाः,पञ्चेन्द्रियजाति-रुच्चैर्गोत्रं यशःकीर्त्तिनामकर्म सुभगनामकर्मा-ऽऽदेयनामकर्म च'सातमसातं वा'वाकारो विकल्पार्थकः, सातोदयेन शैलेशीं प्रतिपन्नस्य सातम्, असातोदयेनाऽधिगतस्य त्वसातम् , एकतरस्य द्विचरमसमये व्यवच्छेदात् **'जिणं वा'** त्ति अत्राऽपि वाकारो विकल्पार्थकः, 'जिनं' जिननामकर्म तीर्थकृत आश्रित्य, सामान्यकेवलिनस्तु प्रतीत्य तन्नेति सर्वसङ्ख्यया तीर्थकृत आश्रित्यैतास्त्रयोदश प्रकृतयः सामान्यकेवलिनश्च प्रतीत्य द्वादश प्रकृतयः सत्तातः छिद्यन्ते-अपुनर्भावेन क्षीयन्ते । उक्तं च **विशेषावश्यकभाष्यकृद्भिः—**

**"मणुयगइजाइतसबायरं च पज्जत्तसुभयमाएज्जं ।**
**अन्नयरवेयणिज्जं नराउमुच्चं जसो नाम ॥१॥**
**संभवओ जिणनाम नराणुपुव्वी य चरिमसमयम्मि ।**
**सेसा जिणसंताओ दुचरिमसमयम्मि निट्ठंति ॥२॥"** इति ।

तथैव श्रीमन्मलयगिरिपादैरपि-**"चरमसमये च सातासाता-ऽन्यतरवेदनीय-मनुष्यगति-मनुष्यानुपूर्वी-मनुष्यायुः-पञ्चेन्द्रियजाति-त्रस-सुभगा-देय-यशःकीर्त्ति-पर्याप्त-बादर-तीर्थकरोच्चैर्गोत्ररूपाणां त्रयोदशप्रकृतीनां सत्ताव्यवच्छेदः ।"** इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्वौदारिकशरीरादिवद् मनुष्यानुपूर्वीनामकर्मा-ऽयोगिकेवलिद्विचरमसमय एव सर्वथा परिक्षपणीयम्, उदयाभावात्, चरमसमये तत्सत्ताविच्छेदः कथं घटां प्राञ्चति ? इति चेत्, उच्यते–आनुपूर्वीनामानि सर्वत्र स्वस्वगतिसहगतान्येव परिक्षीयन्ते, यथाऽनिवृत्तिबादरसम्पराये नरकानुपूर्वी-तिर्यगानुपूर्व्यौ स्वस्वगतिसहचरिते क्षीणे, तथैवेहाऽपि मनुष्यानुपूर्वी मनुष्यगत्या सह क्षयं गच्छति। मनुष्यगतिश्च चरमसमये क्षीयते, उदयवत्त्वात् तस्याः, तेन मनुष्यानुपूर्व्यपि चरमसमये क्षीयते, यदुक्तं **सप्ततिकाभाष्यवृत्तौ श्रीमेरुतुङ्गसूरिपादैः-"अन्ये त्वाचक्षते-आनुपूर्व्यो हि सर्वत्र स्वस्वगतिसहचरिता एव। अतो यथा नरकगति-तिर्यग्गती स्वस्वानुपूर्वीभ्यां सहा-ऽनिवृत्तिबादरसम्पराये क्षीयेते, अतोऽत्र त्रयोदशप्रकृतिक्षयो, द्विचरमसमये तु द्विसप्ततिक्षयः।"** इति।

अथ चरमसमय उदयविच्छेदं भणति–'एगूणा' इत्यादि, 'एकोनाः' अनुपदं या मनुष्यगत्यादय उक्ताः, ता एकया=मनुष्यानुपूर्वीलक्षणया प्रकृत्या ऊनाः–हीना उदयतो व्यवच्छिद्यन्ते, द्वादशप्रकृतय उदयतो-ऽपगच्छन्तीत्यर्थः, आनुपूर्वीनाम्नः क्षेत्रविपाकित्वेन भवा-ऽऽशान्तरालगतावेव तदुदयो भवति, तेन भवस्थस्या-ऽयोगिकेवलिनो मनुष्यानुपूर्व्या उदयो न संभवतीति द्वादश प्रकृतयो मनुष्यगति-मनुष्यायुः–पञ्चेन्द्रियजाति-त्रस-बादर-पर्याप्त-सुभगा-ऽऽदेय-यशःकीर्त्युच्चैर्गोत्रा-ऽन्यतरवेदनीयतीर्थकृत्कर्मरूपा अयोगिगुणस्थानकचरमसमय उदयतो व्यवच्छिद्यन्ते, एतावतीनां प्रकृतीनामुदयविच्छेदो जायत इत्यर्थः। उक्तं च श्री**कर्मस्तवे**—

**"अन्नयरवेयणीयं मणुयाऊ मणुयगई य बोद्धव्वा।**
**पंचिंदियजाई वि य तस-सुभगा-ऽऽएज्ज-पज्जत्तं ॥१॥**
**बायर जसकित्ती वि य तित्थयरं उच्चगोययं चेव।**
**एया बारस पयडी अजोगिचरिमंमि वोच्छिन्ना ॥२॥"** इति।

इदमत्रा-ऽवधेयम्–अतीर्थकृद्भिः सामान्यकेवलिभिस्तीर्थकृन्नामकर्मवर्जा अनन्तरोक्ता एकादश प्रकृतय उदयतो व्यवच्छिद्यन्ते।

अथ सत्ताविच्छेदे मतान्तरं दर्शयति–'**नरआणु०**' इत्यादि, तत्र 'द्विचरमक्षणे' अयोगिकेवलिगुणस्थानकद्विचरमसमये 'मनुजानुपूर्वीसत्ताच्छेदं' मनुष्यानुपूर्व्याः सत्ताविच्छेदम् 'इतरे' अन्ये आचार्या 'ब्रुवन्ति' वदन्ति, उदया-ऽभावात्। तेन तेषामाचार्याणां मतेना-ऽयोगिकेवलिगुणस्थानकद्विचरमसमये * त्रिसप्ततिप्रकृतीनां सत्ताविच्छेदो जायते, चरमसमये तु द्वादशप्रकृतीनाम्। उक्तं च **श्रीमलयगिरिपादैः पञ्चसंग्रहवृत्तौ–"अन्ये पुनराहुः–मनुष्यानुपूर्व्या द्विचरमसमये व्यवच्छेदः, उदयाभावात्। उदयवतीनां हि स्तिबुकसंक्रमाभावात् स्वस्वरूपेण**

* नामकर्मणस्त्र्यधिकशतभेदाँस्त्वाश्रित्य त्र्यशीतिः प्रकृतयः सत्तातो व्यवच्छेदं यान्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चरमसमये दलिकं दृश्यते एवेति युक्तस्तासां चरमसमये सत्ताऽव्यवच्छेदः। आनुपूर्वीनाम्नां तु चतुर्णामपि क्षेत्रविपाकितया भवापान्तरालगतावेवोदयः, तेन न भवस्थस्य तदुदयसम्भवः, तदसम्भवाच्चाऽयोग्यवस्थाद्विचरमसमये एव मनुष्यानुपूर्व्याः सत्ताऽव्यवच्छेदः इति तन्मतेन द्विचरमसमये त्रिसप्ततिप्रकृतीनां सत्ताऽव्यवच्छेदः,चरमसमये द्वादशानामिति।"** इदन्त्वत्रधेयम्-सामान्यकेवलिनोऽधिकृत्य चरमसमय एकादशप्रकृतीनां सत्ताविच्छेदस्तेषां मतेन भवति। तत्त्वं त्वत्र केवलिनो बहुश्रुता वा विदन्ति।

अथ क्षीणेष्वघातिकर्मसु यद्भवति, तद्वक्तुकाम आह–'**सिज्झइ**' इत्यादि, तत्र 'क्षणेन' एकवचननिर्देशाद् एकसमयेन समयप्रदेशान्तरमस्पृशन् 'सिध्यति' केवलज्ञानोपयोगेनोपयुक्त ऋजुश्रेण्या सिद्धिं गच्छति। उक्तं च **कषायप्राभृतचूर्णिकारैः–"सेलेसिं अद्धाए झीणाए सव्वकम्मविप्पमुक्को एगसमएण सिद्धिं गच्छइ।"** इति। तथैवाऽऽह भगवान् **भाष्यकारः–**

**"रिउसेढोपडिवन्नो समयपएसंतरं अफुसमाणो।**
**एगसमएण सिज्झइ अह सागारोवउत्तो सो॥१॥"**इति।

ऋजुश्रेण्या समयान्तरं स्वा-ऽवगाढप्रदेशान्तरञ्चा-ऽस्पृशन्नेव यावत्स्वाकाशप्रदेशेष्ववगाढः,तावतः प्रदेशानवगाहमानः केवलज्ञानोपयुक्तो लोकान्तं गच्छतीत्यर्थः। यदुक्त**मावश्यकचूर्णौ–"जथा उज्जुसेढिपत्तो जत्तिए जोवो अवगाहे, तावतियाए अवगाहणाए उड्ढं उज्जुगं गच्छति, ण वंकं, अफुसमाणगतो,बितियं समयं ण फुसति,अहवा जेसु अवगाढो जे य फुसति,उड्ढमपि गच्छमाणो ततिए चेव आगासपदेसे फुसेमाणो गच्छति, सरीरेऽपि ण ततो-ऽधिके परिपेरंतेण बहिं, एगसमएणं असरीरेणं अकुडिलेण वा उड्ढं गंता,न तिर्यग् अधो वा भ्रमति वा,सागारोवउत्ते सिज्झति।"** इति।

क्षीणेष्वघातिकर्मसु जीव-चरमभवशरीरयोर्वियोगः सिध्यमानस्य गतिर्लोकान्तप्राप्तिश्चेत्येतत्त्रयमेकसमयेनाऽचिन्त्यसामर्थ्याद् युगपद् भवति। यदुक्तं **श्रीतत्त्वार्थभाष्ये–"कर्मक्षये देहवियोग–सिध्यमानगति-लोकान्तप्राप्तयो ह्यस्य युगपदेकसमयेन भवन्ति।"** इति। **केचिदाहुः**–कर्मक्षयकालो देहवियोगादिसमकाल एव भवतीति। उक्तञ्च **सप्ततिकाचूर्णौ–"ततो कम्मविमोक्खसमए चेव उड्ढं गच्छति लोकान्तम्।"** इति। मतद्वयमपि तत्त्वार्थवृत्तौ सङ्गृहीतम्। अक्षराणि त्वेवम्–**तदनन्तरमिति कृत्स्नकर्मक्षयानन्तरं अनु सन्ततमेव मुक्तः सन्नूर्ध्वमेव गच्छति××××तस्य अचिन्त्यसामर्थ्याच्चैतत् सर्वं युगपद् भवति देहवियोगादि। केचिदाहुः कर्मक्षयकालश्च देहवियोगादिसमकाल एव भवतोति।"** इति। अयमत्र विवेकः-व्यवहारनयेन क्रियाकाल-निष्ठाकालयोर्भेदः, निश्चयनयापेक्षया त्वभेदः। तेन प्रथममतेन कर्मक्षयानन्तरं देहवियोगादि भवति, द्वितीयमतेन तु सर्वं युगपद् भवति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्वकर्मकस्य महात्मनः सिद्धिगमने को हेतुः ? सकर्मकस्यैव संसारे गमनादिक्रियादर्शनादिति चेत्, उच्यते-पूर्वप्रयोगादसङ्गत्वाद् बन्धच्छेदात् तथागतिपरिणामाच्च सिध्यतो महात्मनो गतिर्न विरुध्यते, यदुक्तं **वाचकमुख्यैः**-“**तदनन्तरमूर्ध्वं गच्छन्त्यालोकान्तात् । पूर्वप्रयोगाद् असङ्गत्वात् बन्धच्छेदात् तथागतिपरिणामाच्च ।**” इति ।

तथाहि-(१) यथा कुलालचक्रं चक्रभ्रमणहेतुकुलालदण्डादिव्यापारोपरमे-ऽपि पूर्वप्रयोगाद् भ्राम्यति, तथा योगनिरोधाऽभिमुखस्य क्रियया=योगेन यः प्रयोगो जनितः, स क्षीणे-ऽपि योगे गतिहेतुर्भवति, तेन पूर्वप्रयोगेणा-ऽकर्मणोऽपि सिध्यमानस्य गतिर्भवति । यथा च धनुषा पुरुषप्रयत्नेन प्रेरितस्येषोर्गतिकारणविरमे-ऽपि पूर्वप्रयोगाद् गतिर्जायते, तथैव कर्मविमुक्तस्य सिध्यमानस्य जीवस्य गतिर्जायते । उक्तं च **श्रीमद्भाष्यकृद्भिः**—

**“जह धणु पुरिसपयत्तेरिएसुणो भिण्णदेसगमणं तु ।**
**गइकारणविगमम्मि वि सिद्धं पुव्वप्पओगाओ॥१॥**
**जहवा कुलालचक्कं किरियाहेउविरमे वि सकिरियं ।**
**पुव्वप्पओगओ च्चिय तह किरिया मुच्चमाणस्स ॥२॥**” इति ।

(२) अथ युक्त्यन्तरमुपवर्ण्यते-असङ्गत्वाद् गुरुमृत्तिकालेपलिप्ता-ऽ-धोनिमग्नक्रमाऽपनीतमृत्तिकालेपजलमर्यादोर्ध्वगामितथाविधा-ऽलाबुवत् सिध्यमानस्य गतिर्भवति । इदमुक्तं भवति-यथा गुरुमृत्तिकालेपैरालिप्तमलाबु घनमृत्तिकालेपवेष्टनोत्पादितगौरवेन जले निमज्जति, तस्या-ऽद्भिर्लेपा-ऽपगमे च लेपसङ्गविनिर्मुक्तं जलस्योर्ध्वतलं यावत् स्वभावतो गच्छति । एवं जीवो-ऽप्यष्टविधकर्ममृत्तिकावेष्टितः, तत्सङ्गाच्च संसारसागरस्य भवजले निमज्जति, कर्मसङ्गाच्चा-ऽधस्तिर्यगूर्ध्वं च गच्छति, अष्टविधकर्ममृत्तिकालेपविगमे च सिध्यमानो महात्मा स्वभावत ऊर्ध्वं गच्छति, ऊर्ध्वगौरवधर्मत्वात् जीवानाम् । उक्तं च **आवश्यकनिर्युक्तिकारैः**—

**“जह ते सलाभकाले चेव तहा गइसभावयामिंति ।**
**परिणमइ तग्गइं वा लेवा-ऽवगमे जहालाबु ॥१॥**” इति । ❀

(३) अथ तृतीया युक्तिः प्रदर्श्यते-छिन्नबन्धनत्वात् सिध्यमानस्य जीवस्य गतिर्जायते, एरण्डफलवत् । इयमत्र भावना-बध्यतेऽनेनेति बन्धनम्-यथैरण्डफलस्या-ऽऽतपशुष्ककोशरूपबन्धनापगमे गतिर्भवति, तथैव सिध्यतो जीवस्य कर्मबन्धनोच्छेदे गतिः संजायते । उक्तं **चावश्यकनिर्युक्तीकारैः**—

---

❀ एवं मूलराधनाकारैरप्युक्तम्—
संगजहणेण वलहुदयाए उड्ढं पयादि सो जीवो ।
जध लाउगो अलेओ उप्पददि जले निबुड्डो वि ॥१॥” इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"एरण्डाइ फलं जह बन्धच्छेएरियं दुयं जाइ ।
तह कम्मबंधणच्छेयणेरिओ जाइ सिद्धो वि ॥१॥" इति ।

(४) अथ चतुर्थी युक्तिर्विविच्यते-कर्मविमुक्तो जीवः सकृदूर्ध्वं गच्छति, तथास्वाभाविकपरिणामाद्, अग्निधूमवत् । अयमस्य भावार्थः-यथा अग्निर्धूमश्च स्वभावत ऊर्ध्वं गच्छति, तथैव जीवो-ऽपि स्वभावत ऊर्ध्वं गच्छति, ऊर्ध्वगौरवधर्मत्वात् । न च जीवानामूर्ध्वगौरवधर्मत्वे संसारिणामधस्तिर्यग् च गतिः कुतो जायते ? इति वाच्यम्, तस्याः कर्मोपाधिजन्यत्वात् । तद्यथा-कर्मरहितानां जीवानामूर्ध्वं गतिर्भवति । कर्मसङ्गात्तु तिर्यगूर्ध्वमधश्च गतिरनियमेन भवति । यदुक्तं **तत्त्वार्थभाष्यकारैः**—

**तदनन्तरमेवोर्ध्वमालोकान्तात् स गच्छति ।
पूर्वप्रयोगाऽसङ्गत्वबन्धच्छेदोर्ध्वगौरवैः ॥१॥
कुलालचक्रे दोलाया-मिषौ वाऽपि यथेष्यते ।
पूर्वप्रयोगात् कर्मेह तथा सिद्धगतिः स्मृता ॥२॥
मृल्लेपसङ्गनिर्मोक्षाद्, यथा दृष्टाऽप्स्वलाबुनः ।
कर्मसङ्गविनिर्मोक्षात् तथा सिद्धगतिः स्मृता ॥३॥
एरण्डयन्त्रपेडासु बन्धच्छेदाद् यथा गतिः ।
कर्मबन्धनविच्छेदात् सिद्धस्यापि तथेष्यते ॥४॥
ऊर्ध्वगौरवधर्माणो जीवा इति जिनोत्तमैः ।
अधोगौरवधर्माणः पुद्गला इति चोदितम् ॥५॥
यथाऽधस्तिर्यगूर्ध्वं च लोष्ठवाय्वग्निवीतयः ।
स्वभावतः प्रवर्तन्ते, तथोर्ध्वं गतिरात्मनाम् ॥६॥
अतस्तु गतिवैकृत्यमेषां यदुपलभ्यते ।
कर्मणः प्रतिघाताच्च प्रयोगाच्च तदिष्यते ॥७॥
अधस्तिर्यगथोर्ध्वं च जीवानां कर्मजा गतिः ।
ऊर्ध्वमेव तु तद्धर्मा भवति क्षीणकर्मणाम् ॥८॥**" इति ।

ननु कर्मरहितानां जीवानां स्वभावत एव ऊर्ध्वं गतिर्भवति, तर्हि लोकान्तादूर्ध्वमलोके कुतो न गच्छन्ति कर्मविमुक्ता जीवाः ? इति चेत्, उच्यते-धर्मास्तिकायो हि गत्युपग्राहकः । लोकस्योर्ध्वं धर्मास्तिकाया-ऽभावेन गत्युपग्राहकाभावात् परतः सिध्यमानानां जीवानां गतिर्न भवति, अलाबुवत् । इदमुक्तं भवति-यथा-ऽलाबु मृत्तिकालेपा-ऽपगमादूर्ध्वं गच्छत् स्वयमेव जलमस्तकप्रविष्टं भवति, न परतो गच्छति, उपग्राहकजलद्रव्या-ऽभावात् । एवं सिध्यमानो जीवो-ऽपि लोकान्तादूर्ध्वं गत्युपग्राहकधर्मास्तिकायाऽभावाद् न याति, यदुक्तं **तत्त्वार्थभाष्ये**–

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

"ततोऽप्यूर्ध्वगतिस्तेषां कस्मान्नास्तीति चेन्मतिः।
धर्मास्तिकायस्याभावात्, स हि हेतुर्गतेः न परः ॥१॥" इति ॥२६५-२६६॥

अयोगिगुणस्थानके प्रतिपादितपदार्थानां यन्त्रकम्।

(१) अयोगिगुणस्थानकप्रथमसमय एव व्यवच्छिन्नक्रिया-ऽनिवृत्तिशुक्लध्यानं प्रतिपद्यते।
(२) अयोगिगुणस्थानकप्रथमसमय एव शैलेशीमुपगच्छति।
(३) शैलेश्याः कालोऽन्तर्मुहूर्तमात्रः, स च अइउऋलृ इत्येतदक्षरपञ्चकोच्चारणकालप्रमितो ज्ञेयः।
(४) प्रतिसमयमसंख्येयगुणक्रमेण दलिकं निर्जरयति।
(५) द्विचरमसमये संस्थानषट्का-ऽस्थिरषट्क-संहननषट्का-ऽगुरुलघुचतुष्क-पञ्चशरीर-पञ्चसंघातन-खगति-द्विक-देवद्विक-वर्णादिविंशतिक-पञ्चदशबन्धन-निर्माणाङ्गोपाङ्गत्रिक-प्रत्येक-स्थिर-सुस्वर-शुभा-ऽपर्याप्त-नीचैर्गोत्रा-ऽन्यतरवेदनीयरूपाणां द्व्यशीतिप्रकृतीनां (८२) सत्ताव्यवच्छेदः।
(६) चरमसमये मनुष्यत्रिक-त्रसत्रिक-पञ्चेन्द्रियजाति-सुभगा-ऽऽदेय-यशःकीर्त्ति-तीर्थङ्करनामोच्चैर्गोत्रा-ऽन्यतरवेदनीयाख्यानां त्रयोदशप्रकृतीनां (१३) सत्ताविच्छेदः।
(७) अन्येषां मतेन द्विचरमसमये मनुष्यानुपूर्वी सत्त्वतो व्यवच्छिद्यते, उदयाभावात्।
(८) तदनन्तरं समय-प्रदेशान्तरमस्पृशन्नेकसमयेन लोकान्तं गच्छति।
(९) एकस्मिन्नेव समये देहवियोग-सिध्यमानगति-लोकान्तप्राप्तयः। निश्चयनयापेक्षया तु कर्मक्षय-देहवियोगादि सर्वं युगपद् भवति।
१०) सिध्यमानस्य गतिः-पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च।

अथ सिद्धानामवस्थितिं निरूपयति—

**कम्मट्ठगक्खयत्तो लद्धा जीवेहि जेहि अट्ठगुणा।**
**ईसीपब्भाराए उड्ढं ते-ऽवट्ठिआ हुन्ति ॥२६७॥**

कर्मा-ऽष्टकक्षयाल्लब्धाः जीवैर्यैरष्टगुणाः।
ईषत्प्राग्भाराया ऊर्ध्वं ते-ऽवस्थिता भवन्ति ॥२६७॥ इति पदसंस्कारः।

**'कम्मट्ठ०'**इत्यादि, 'कर्माष्टकक्षयाद्' ज्ञानावरण-दर्शनावरण-वेदनीया-ऽऽयुर्नाम-गोत्रा-ऽन्तरायकर्मनाशाद् यैर्जीवैः 'लब्धाः' प्राप्ता 'अष्टगुणाः' अनन्तज्ञान-दर्शन-क्षायिकसम्यक्त्व-क्षायिकचारित्राव्याबाधसुखा-ऽक्षयस्थित्यमूर्तानन्तावगाहना-ऽनन्तवीर्याख्याः 'ते' लब्धाऽष्टगुणाः सिद्धा ईषत्प्राग्भाराया ऊर्ध्वमवस्थिताः 'सन्ति' वर्तन्ते, नेह संसारे प्रच्यवन्ते, कर्मबीजस्य दग्धत्वात्।

अथ विस्तरेण व्याख्यायते—मूलकर्मा-ऽपेक्षया मोहनीयकर्म सूक्ष्मसम्परायगुणस्थानकचरमसमये निःशेषतो क्षयमुपगतम्। क्षीणकषायगुणस्थानकचरमसमये ज्ञानावरण-दर्शनावरणा-ऽन्तरायकर्माणि क्षीणानि, अयोगिचरमसमये च नामागोत्र-वेदनीयरूपाणि चत्वारि कर्माणि युगपद् विनष्टानि।

उत्तरकर्माऽपेक्षया त्वनन्तानुबन्धिनश्चत्वारो मिथ्यात्व-मिश्र-सम्यक्त्वमोहनीयानि चेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहनीयकर्मणः सप्त प्रकृतयोऽविरतसम्यग्दृष्टि-देशविरत-प्रमत्ता-ऽप्रमत्तगुणस्थानकानामन्यतमे गुणस्थाने क्षपिताः । ततोऽनिवृत्तिबादरसम्परायगुणस्थानकस्य बहुषु संख्येयभागेषु गतेष्वप्रत्याख्यानावरणाः क्रोधादयश्चत्वारः प्रत्याख्यानावरणाश्च क्रोधादयश्चत्वारो नाशमापादिताः,ततो नरकगति-नरकानुपूर्वी-तिर्यग्गति-तिर्यगानुपूर्व्य एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियरूपा चतुर्जातय आतपमुद्योतं स्थावरं सूक्ष्मं साधारणं निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धयश्च विलयं प्रापिताः, ततो नपुंसकवेद उन्मूलितः,ततः क्रमेण स्त्रीवेदो हास्यषट्कं पुरुषवेदः संज्वलनः क्रोधो मानो माया चेति सर्वसंख्ययाऽनिवृत्तिबादरसम्परायगुणस्थानके षट्त्रिंशत्प्रकृतयो समूलकाषं कषिताः । ततः सूक्ष्मसम्परायगुणस्थानकचरमसमये संज्वलनलोभः परिक्षपितः । ततः क्षीणकषायगुणस्थानकस्य द्विचरमसमये निद्राप्रचलाख्यं निद्राद्विकं प्रलयं प्रापितम्, चरमसमये तु ज्ञानावरणपञ्चक-दर्शनावरणचतुष्का-ऽन्तरायपञ्चकरूपाश्चतुर्दश प्रकृतयो समूलकाषं कषिताः । अयोगिकेवलिनो द्विचरमसमये देवगतिरौदारिकादिशरीरपञ्चकमङ्गोपाङ्गत्रयमौदारिकौदारिकादिबन्धनपञ्चदशकमौदारिकादिसंघातपञ्चकं संहननषट्कं संस्थानषट्कं वर्णादिविंशतिकं देवानुपूर्वी प्रशस्तखगतिरप्रशस्तखगतिरगुरुलघूपघातं पराघातमुच्छ्वासं निर्माणं प्रत्येकं स्थिरं शुभं सुस्वरमपर्याप्तमस्थिरा-ऽशुभ-दुर्भग-दुःस्वरा-ऽनादेया-ऽयशःकीर्त्तिरूपं प्रकृतिषट्कमन्यतरं वेदनीयं नीचैर्गोत्रं चेति द्व्यशीतिः प्रकृतय उन्मूलिताः, तीर्थकरा-ऽयोगिकेवलिचरमसमये च नामकर्मणो मनुष्यगति-पञ्चेन्द्रियजाति-मनुष्यानुपूर्वी-त्रस-बादर-पर्याप्त-सुभगा-ऽऽदेय-यशःकीर्त्ति-तीर्थकरनामकर्माण्यन्यतरवेदनीयमुच्चैर्गोत्रं मनुष्यायुश्चेति सर्वसंख्यया त्रयोदशप्रकृतयो नाशमापादिताः, अतीर्थकरा-ऽयोगिकेवलिचरमसमये त्वेता एव द्वादश तीर्थकरनामकर्मवर्जाः ।

एवमष्टकर्मक्षयाद् अष्टौ गुणाः प्रादुर्भवन्ति ।

तत्र (१) ज्ञानावरणकर्मक्षयात् सिद्धानामनन्तं केवलज्ञानं भवति (२) दर्शनावरणकर्मक्षयात् सिद्धानामनन्तं केवलदर्शनं भवति । (३) दर्शनमोहनीयक्षयात् क्षायिकं सम्यक्त्वम् (४) चारित्रमोहनीयक्षयाच्च क्षायिकं चारित्रं जायते । यदवाचि **गुणस्थानकक्रमारोहे—**

**अनन्तं केवलज्ञानं ज्ञानावरणसंक्षयात् । अनन्तं दर्शनं चैव दर्शनावरणक्षयात्॥१॥**
**शुद्धसम्यक्त्वचारित्रे क्षायिके मोहनिग्रहात् । ××××××××× ॥२॥"** इति ।

अत्र बहु वक्तव्यमस्ति, तत्त्वध्यात्मतपरिक्षादिग्रन्थान्तरतोऽवसेयम् ।

(५) वेदनीयक्षयादनन्तमनुपममव्याबाधं शाश्वतं च सिद्धानां सुखं भवति, तथा चोक्तमागमे—

**"न वि अत्थि माणुसाणं तं सोक्खं न वि य सव्वदेवाणं ।**
**जं सिद्धाणं सोक्खं अव्वाबाहं उवगयाणं ॥१॥**
**सुरगणसुहं समत्तं सव्वद्धापिंडियं अणंतगुणं ।**
**न य पावइ मुत्तिसुहं णंताहि वि वग्गवग्गूहिं ॥२॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धस्स सुहो रासी सव्वद्धापिंडितो जइ हवेज्जा ।
सोऽणंतवग्गभइतो सव्वागासे न माइज्जा ॥३॥
जह नाम कोइ मिच्छो नगरगुणे बहुविहे वियाणंतो ।
न चएइ परिकहेउं उवमाइ तहिं असंतोए ॥४॥
जह सव्वकामगुणियं पुरिसो भोत्तूण भोअणं कोइ ।
तण्हा छुहा विमुक्को अच्छिज्ज जहाअमिअतत्तो ॥५॥
इअ सव्वकालतित्ता अउलं निव्वाणमुवगया सिद्धा ।
सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता ॥६॥" इति ।

(६) आयुःक्षयादक्षयस्थितिः (७) विघ्नक्षयादनन्तं वीर्यम् (८) नामगोत्रयोश्च क्षयाद् अमूर्ता-ऽनन्ताऽवगाहना । यदुक्तं गुणस्थानकक्रमारोहे–

"×××अनन्ते सुखवीर्ये च वेद्यविघ्नक्षयात् क्रमात् ॥१॥
आयुषः क्षीणभावत्वात् सिद्धानामक्षया स्थितिः ।
नामगोत्रक्षयादेवा-ऽमूर्ताऽनन्ताऽवगाहना ॥२॥" इति । अन्यत्राऽप्युक्तम्–
"तस्स वरनाण–दंसणवर-सुह-सम्मत्त-चरण-निच्चठिई ।
अवगाहणा अणंतामुत्ताणं खइयविरिअं च ॥१॥
नाणावरणाईणं कम्माणं अट्ठ जे ठिआ दोसा ।
तेसु गएसु पणासं एए अट्ठ वि गुणा जाया ॥२॥" इति ।

मोहनीयकर्मक्षयजन्यं गुणद्वयं क्षायिकसम्यक्त्वचारित्राख्यम्, नाम-गोत्रक्षयजन्यस्त्वेक एवाऽमूर्ता-ऽनन्ता-ऽवगाहनाख्य इत्यत्र परिभाषैव शरणम् । नन्ववगाहना कथमात्मनो गुणः ? तस्य व्योम-गुणत्वेन व्यवस्थितत्वात् । यदवादि वाचकमुख्यैः श्रीतत्त्वार्थसूत्रे"आकाशस्याऽवगाहः ।" इति । न च व्योम्नः सामान्यतो-ऽवगाहनागुणवत्त्वेऽप्यनन्तानामेकत्रा-ऽवगाहनाऽऽत्मनोऽसाविति वाच्यम् , अनन्तानामप्यमूर्तत्वेन प्रतिघाता-ऽभावेन व्योम्नैवैकत्राऽवगाहनादानादिति चेत् , न,प्रतिघातस्य नामकर्मोपनीतशरीरजनितत्वेन शरीरा-ऽभावप्रयुक्तप्रतिघाता-ऽभावेन निरुक्ता-ऽवगाह-नायाः सम्भवात् , तस्याश्चा-ऽऽत्मगुणत्वात् । न च तथापि तदवगाहनाया नामकर्मक्षयजन्यत्वमस्तु, न गोत्रक्षयजन्यत्वमिति वाच्यम् , नामगोत्रयोर्मिलितयोरेव तत्र तत्रोपन्यासबलेनैकस्मिन् गुणे नाम-गोत्ररूपकर्मद्वयक्षयजन्यत्वयोजनात् , गोत्रकर्मक्षयजन्यस्य विशेषव्यवहाराऽभावभाजो गुणस्य सत्त्वे-ऽपि प्राधान्येन नामकर्मक्षयजन्यस्या-ऽवगाहनागुणस्यैव वा गोत्रजन्यत्वस्वीकारात् ।

अष्टविधकर्मक्षयाद् यैः सिद्धैरेते केवलज्ञानादयो-ऽष्टौ गुणाः प्राप्ताः, ते ईषत्प्राग्भाराया ऊर्ध्वं स्थिताः सन्ति, न पुनरिह संसारे समागच्छन्ति, कर्मबीजस्या-ऽत्यन्तं दग्धत्वात् यदवादि तत्त्वार्थभाष्यकारैः—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाऽङ्कुरः ।
कर्मबीजे तथा दग्धे नारोहति भवाङ्कुरः ॥१॥" इति ।

नन्वीषत्प्राग्भारा किंस्वरूपा ? इति चेत्, उच्यते-सर्वार्थसिद्धवरविमानादूर्ध्वं लोकस्य मूर्धन्यायामविष्कम्भाभ्यां पञ्चचत्वारिंशद्योजनलक्षप्रमाणा ( ४५,००,००० ), उत्तानच्छत्राकृतिः परिधिगणितेनैकोनपञ्चाशदधिकद्विशतोत्तरत्रिंशत्सहस्राधिकद्विचत्वारिंशल्लक्षसहस्राधिकैककोटीयोजनप्रमिता (१,४२,३०, २४९), मध्यभागे योजनाऽष्टकबाहल्या-ऽऽयामविष्कम्भाभ्यां चा-ऽष्टयोजनप्रमाणा, ततो मध्यभागात् परतः सर्वासु दिक्षु विदिक्षु च क्रमशः प्रतियोजनमङ्गुलपृथक्त्वेन हीना हीनतरा प्रान्ते चा-ऽङ्गुलसंख्येयभागप्रमाणा सती मक्षिकापत्रादपि तनुतरा भवति, **औपपातिकसूत्रे** तु **"अंगुलस्स असंखेज्जभागं बाहल्लेणं पण्णत्ता"** इत्युक्तम् , एवं **प्रज्ञापनादिसूत्रेष्वपि** । इयञ्च पृथिवीकायिकैर्निर्वर्तिता मनोहरा सुरभिश्च । तथा **चोक्तमावश्यकनिर्युक्तौ**—

**"ईसीपब्भाराए सीआए जोअणम्मि लोगंतो ।**
**बारसहिं जोयणेहिं सिद्धी सव्वत्थसिद्धाओ ॥१॥**
**निम्मलदगरयवन्ना तुसारगोखीरहारसरिवन्ना ।**
**उत्ताणयछत्तयसंठिआ अ भणिआ जिणवरेहिं ॥२॥**
**एगा जोयणकोडी बायालीसं च सयसहस्साइं ।**
**तीसं चेव सहस्सा दो चेव सया अउणवन्ना ॥३॥**
**बहुमज्झदेसभाए अट्ठेव च जोयणाइ बाहल्लं ।**
**चरिमंतेसु अ तणुई अंगुलसंखिज्जई भागं ॥४॥**
**गंतूण जोयणं जोयणं तु परिहाइ अंगुलपुहुत्तं ।**
**तीसे वि अ पेरंते मच्छिअपत्ताउ तणुअयरा ॥५॥"**इति ।

एवंभूताया ईषत्प्राग्भारायाः पृथिव्या ऊर्ध्वं सिद्धाः स्थिताः, इदं तु सामान्येन सिद्धानामवस्थानं भणितम् , विशेषतः पुनरेवंभूताया ईषत्प्राग्भारायाः पृथिव्या उपरि यद्योजनम्, तस्य योजनस्य यः क्रोशः, तस्योपरितने षड्भागे स्वचरमभवसंस्थानस्य त्रिभागहीना-ऽवगाहनया सिद्धा अवतिष्ठन्ते । यदुक्त**मागमे**—

**ईसीपब्भाराए उवरिं खलु जोअणस्स जो कोसो ।**
**कोसस्स य छब्भाए सिद्धाणोगाहणा भणिआ ।"** इति ।

ननु प्रस्तुतगाथया कर्माष्टकप्रक्षयादनन्तज्ञानाद्यष्टगुणसंप्राप्तिलक्षणो मोक्षः प्रतिपाद्यते, स च विचार्यमाणो निरुक्तलक्षणो नोपपद्यते, किन्तु बुद्ध्यादिविशेषगुणोच्छेदरूप इत्याद्याहुर्नैयायिकादयः । तथाहि—**तदत्यन्तविमोक्षोऽपवर्गः** (गौ० १-१-२२) इति **गोतमसूत्रे** तत्सर्वनाम्ना सर्वेषामात्मविशेषगुणानां बोधनाद् नवानामात्मविशेषगुणानां बुद्ध्यादीनामत्यन्तोच्छेदो मोक्ष

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति सिध्यति, यदुक्तं **श्रीजयन्तभट्टैर्न्यायमञ्जर्याम्—"तदिति प्रक्रान्तस्य दुःखस्यावमर्शः न च मुख्यमेव दुःखं बाधनास्वभावमवमृश्यते, किन्तु तत्साधनं तदनुषक्तं च सर्वमेव, तेन दुःखेन वियोगोऽपवर्गः, अस्ति च प्रलयवेलायामात्मनो दुःखवियोगः, स त्वपवर्गो न भवति, सर्गसमये पुनरक्षीणकर्माशयाऽनुरूपशरीरादिसम्बन्धे सति दुःखसम्भवादतस्तद्व्यावृत्त्यर्थमत्यन्तग्रहणम् , आत्यन्तिकी दुःखव्यावृत्तिरपवर्गो न सावधिका। द्विविधदुःखावमर्शिना सर्वनाम्ना सर्वेषामात्मगुणानां दुःखवदवमर्शादत्यन्तग्रहणेन च सर्वात्मना तद्वियोगाऽभिधानान्नवानामात्मगुणानां बुद्धि-सुख-दुःखेच्छा–द्वेष-प्रयत्न-धर्मा-ऽधर्म-संस्काराणां निर्मूलोच्छेदोऽपवर्ग इत्युक्तं भवति।**

**यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः।**
**तावदात्यन्तिकी दुःखव्यावृत्तिर्नाऽवकल्पते ॥१॥**
**धर्माऽधर्मनिमित्तो हि सम्भवः सुखदुःखयोः।**
**मूलभूतौ च तावेव स्तम्भौ संसारसद्मनः ॥२॥**
**तदुच्छेदे तु तत्कार्यशरीराद्यनुपप्लवात्।**
**नात्मनः सुख-दुःखे स्त इत्यसौ मुक्त उच्यते ॥३॥**
**इच्छा-द्वेष–प्रयत्नादि भोगायतनबन्धनम्।**
**उच्छिन्नभोगायतनो नात्मा तैरपि युज्यते ॥४॥**
**प्राणस्य क्षुत्पिपासे द्वे लोभमोहौ च चेतसः।**
**शीता-ऽऽतपौ शरीरस्य षडूर्मिरहितः शिवः ॥५॥**

**तदेवं नवानामात्मगुणानां निर्मूलोच्छेदोऽपवर्ग इति यदुच्यते, तदेवेदमुक्तं भवति–तदत्यन्तवियोगोऽपवर्ग इति।"**

एवं **व्योमशिवाचार्यैरपि प्रशस्तपादभाष्यस्य व्योमवत्याख्यवृत्तौ प्रतिपादितम्—"नवानामात्मविशेषगुणानामत्यन्तोच्छित्तिर्मोक्ष इति।"**

प्रमाणयन्ति च नवानामात्मविशेषगुणानां सन्तानोऽत्यन्तमुच्छिद्यते, सन्तानत्वादिति, नाऽयं हेतुरसिद्धः, व्याप्यत्वेनाऽभिमतस्य सन्तानत्वस्य बुद्ध्यादिलक्षणे पक्षे प्रवर्तमानत्वात्। नाऽपि विरुद्धः, सपक्षे प्रदीपादावुपलम्भात्। नाऽप्यनैकान्तिकः, विपक्षे परमाण्वादावव‍ृत्तेः, नाऽपि कालात्ययापदिष्टः, विपरीतार्थोपस्थापकयोः प्रत्यक्षा-ऽऽगमयोरनुपलम्भात्। नाऽपि सत्प्रतिपक्षः, साध्याभावसाधकाऽनुमाना-ऽसम्भवात्।

आगमो-ऽप्यत्र **"न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति, अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः।"** इति सुखादेरभावबोधकः।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

न च सन्तानोच्छेदे कश्चिद् हेतुर्वाच्यः, निर्हेतुकविनाशस्य प्रतिषेधादिति वाच्यम्, तत्त्वज्ञानस्य मिथ्याज्ञानव्यवच्छेदक्रमेण निःश्रेयसहेतुत्वेन प्रतिपादनात्। उपलब्धश्च मिथ्याज्ञाननिवृत्तौ सम्यग्ज्ञानस्य सामर्थ्यं शुक्तिकादौ। न चोत्तरकालभाविना मिथ्याज्ञानेनाऽपि सम्यग्ज्ञानस्य निवृत्तिः सम्भवति, तत्सन्तानोच्छेदस्य विवक्षितत्वात्। यथा हि सम्यग्ज्ञानाद् मिथ्याज्ञानसन्तानोच्छेदः क्रियते, नैवं मिथ्याज्ञानात् सम्यग्ज्ञानसन्तानोच्छेदः, सम्यग्ज्ञानस्य यथार्थविषयत्वेन बलीयस्त्वाद्। निवृत्ते च मिथ्याज्ञाने तन्मूलका रागादयोऽपयन्ति, कारणाभावे कार्यस्याऽनुत्पादात्, रागाद्यपाये च तत्कार्यरूपा मनोवाक्कायप्रवृत्तिर्व्यावर्तते, तद्व्यावृत्तौ च धर्माऽधर्मयोरनुत्पत्तिः। आरब्धशरीरेन्द्रियविषयकार्ययोर्धर्माऽधर्मयोः सुखादिफलोपभोगात् प्रक्षयः, अनारब्ध-तत्कार्ययोश्च सञ्चितयोरपि तयोरुपभोगादेव प्रक्षय इति तत्त्वज्ञानस्य मिथ्याज्ञानव्यवच्छेदक्रमेण मोक्षहेतुत्वमस्ति। यदाहुर्न्यायभाष्यकाराः—**"यदा तु तत्त्वज्ञानान्मिथ्याज्ञान[१]मपैति, तदा मिथ्याज्ञानाऽपाये दोषा[२]अपयन्ति, दोषाऽपाये प्रवृत्ति[३]रपैति, प्रवृत्त्यपाये जन्मा[४]ऽपैति, जन्माऽपाये दुःख[५]मपैति, दुःखापाये च आत्यन्तिकोऽपवर्गः निःश्रेयसमिति।"**

एवमेव वैशेषिकदर्शनप्रशस्तपादभाष्येऽपि प्रतिपादितम्—**"ज्ञानपूर्वकात्तु कृतादसङ्कल्पितफलाद्विशुद्धे कूले जातस्य दुःखविगमोपायजिज्ञासोराचार्यमुपसङ्गम्योत्पन्नषट्पदार्थतत्त्वज्ञानास्याऽज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाद्यभावात् तज्जयोर्धर्माधर्मयोरनुत्पत्तौ पूर्वसञ्चितयोश्चोपभोगान्निरोधे सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्तते। तदा निरोधात् निर्बीजस्याऽऽत्मनः शरीरादिनिवृत्तिः, पुनः शरीराद्यनुत्पत्तौ [६]दग्धेन्धनवदुपशमो मोक्ष इति।"**

इहा-ऽऽरब्धशरीरादिधर्माधर्मवत् सञ्चितयोरपि धर्मा-ऽधर्मयोरुपभोगादेव प्रक्षयो भणितः, आगमश्चात्र **"नाऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि"**[७] इत्येवंरूप एतदर्थसंवादकः। अनुमानमप्यस्ति—पूर्वकर्माण्युपभोगादेव क्षीयन्ते, कर्मत्वात्, यद् यत् कर्म, तत् तद् उपभोगादेव क्षीयते, यथा-ऽऽरब्धशरीरं कर्म, तथा चैतत् कर्म। तस्मादुपभोगादेव क्षीयते कर्म। न चोपभोगात्

(१) देहादिष्वात्मबुद्धयादिकं मिथ्याज्ञानम् (२) मिथ्याज्ञानादनुकूलेषु रागः, प्रतिकूलेषु च द्वेषः, रागद्वेषाधिकाराच्चाऽसूयेर्ष्या–माया लोभादयो दोषाः (३) इह प्रवृत्तिसाधनौ धर्माऽधर्मौ प्रवृत्तिशब्देनाऽभिहितौ, यथाऽन्नसाधनाः प्राणाः "अन्नं वै प्राणिनः प्राणाः" इति। (४) शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावो जन्म।" (५) बाधनालक्षणं प्रतिकूलवेदनीयं दुःखम्। (६) यथा दग्धेन्धनस्याऽनलस्योपशमः= ज्वालादिभी रहितस्या-ऽवस्थानम्, तद्वदत्यन्तं विशेषगुणैर्वियुक्तस्या-ऽऽत्मनो-ऽवस्थानं मोक्ष इति।

(७) उद्धृतोऽयं श्लोकः प्रशस्तपादभाष्यव्योमवत्यादावपि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षये कर्मान्तरस्योत्पत्तेरवश्यंभावात् संसारानुच्छेदः । अयं भावः—"**मा हिंस्यात् सर्वभूतानि**" इति श्रुतिसद्भावात् प्राणिमात्रस्य वधो-ऽनिष्टः । उपभोगस्तु प्राण्युपमर्दनादिकं विना न संभवतीत्युपार्जितप्राणिवधादिनिमित्तककर्मफलोपभोगाय जन्मान्तरमावश्यकम् । तत्राऽप्युपभोगेन पुनः प्राणिवधादिनिमित्तककर्मोपार्जनं स्यात् , तत्फलोपभोगाय पुनर्जन्मान्तरमावश्यकमिति कथं संसारस्योच्छेदः स्यादिति वाच्यम् , [1]समाधिबलादुत्पन्नतत्त्वज्ञानस्याऽवगतकर्मसामर्थ्योत्पादितयुगपदशेषशरीरद्वाराऽवाप्ताऽशेषभोगस्य कर्मान्तरोत्पत्तिनिमित्तमिथ्याज्ञानजनिताऽनुसन्धानविकलस्य कर्मान्तराऽनुत्पत्त्या संसारच्छेदोपपत्तेः ।

एतदुक्तं भवति—समाधिबलाल्लब्धतत्त्वज्ञानो योगी निखिलनिजकर्मसामार्थ्यं ज्ञात्वा तदुपभोगयोग्यानि तेषु तेषूपपत्तिस्थानेषु तानि तानि सेन्द्रियाणि शरीरादीनि निर्माय सकलकर्मफलमनुभवति । न च तत्प्रवृत्तिः पुनर्जन्मने कल्पते, क्षीणक्लेशत्वात् , यदुक्तं **श्रीगोतमेन "न प्रवृत्तिः प्रतिसन्धानाय क्षीणक्लेशस्य ।"** (गो०४–१-६४) इति ।

न च मिथ्याज्ञानाभावे तत्त्वज्ञानिन उपभोगा-ऽभिलाषस्यैवाऽसम्भवात् कायव्यूहद्वारा सञ्चितयोर्धर्माधर्मयोरुपभोगो नोपपद्यत इति वाच्यम् , यत उपभोगं विना कर्मणां प्रक्षयाऽनुपपत्तितस्तत्त्वज्ञानिनस्तदुपभोगा-ऽभिलाषाभावेऽपि कर्मक्षयार्थित्वेन तस्य तत्र[2] प्रवृत्तिर्घटते, वैद्योपदेशेना-ऽऽतुरस्येवौषधाचरणे, यथैव ह्यातुरस्याऽनभिलषितकटुकक्काथाद्याचरणे व्याधिप्रक्षयार्थं प्रवृत्तिर्दृश्यते, तद्व्यतिरेकेण व्याधिप्रक्षयो-ऽनुपपन्नः, तथैवा-ऽत्राऽपि ।

ननु तत्त्वज्ञानादेव सञ्चितकर्मक्षयोऽस्तु, यदुक्तं **व्यासमुनिना भगवद्गीतायाम्**—

**"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ।**
**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥१॥"**

इति चेत् , न, तत्त्वज्ञानस्य साक्षात् कर्मविनाशे व्यापारा-ऽभावात् । तत्त्वज्ञानं हि निखिलशरीरोत्पत्तिद्वारेणोपभोगात् कर्मणां विनाशे व्याप्रियत इत्यग्निरिवोपचर्यत इति व्याख्येयं भगवद्गीतावचनम् , न तु साक्षात् । ततश्च '**नाऽभुक्तं कर्म**' इत्यादिना सह "**यथैधांसि**" इत्याद्यस्य न कश्चिद् विरोधः । न च तत्त्वज्ञानिनां कर्मविनाशस्तत्त्वज्ञानाद्भवतु, इतरेषान्तूपभोगादिति वाच्यम् , ज्ञानेन कर्मविनाशे प्रसिद्धोदाहरणा-ऽभावात् ।

**केचित्तु** विद्यमानान्यपि कर्माणि न जन्मान्तरशरीराण्यारभन्ते, मिथ्याज्ञानजनितसंस्कारस्य सहकारिणो विरहादित्याहुः, तदुक्तं **न्यायमञ्जर्यां श्रीजयन्तभट्टैः—"तदन्ये न मन्यन्ते, न सर्वात्मना कर्मणां दाहः, किन्तु स्वरूपेण सतामपि सहकारिवैकल्यात् स्वकार्य-**

१ उक्तं च प्रशस्तपादभाष्यव्योमवत्याम्—समाधिबलादुत्पन्नतत्त्वज्ञानो हि कर्मणाञ्च सामर्थ्यं विदित्वा युगपच्छरीराणि निर्मायोपभोग········ ।" इति । (२) कर्मफलोपभोगे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणोदासीनता तेषां भवति, भृष्टानामिव बीजानामङ्कुरकरणकौशलहानिः, यतः सामग्री कार्यस्य जनिका, न केवलं कारणमतो न कर्माण्येव केवलानि फलोपभोगयोग्यशरीरेन्द्रियादिजन्मनिमित्ततामुपयान्ति, किन्तु मिथ्याज्ञानेन दोषैश्च सहितानि, तदुक्तम्—'अविद्यातृष्णे धर्माधर्मौ च जन्मकारण"मिति तत्त्वविदश्च तत्त्ववित्त्वादेव नाऽविद्या मिथ्याज्ञानात्मिका भवति, दोषाणां तु प्रशमे दर्शित एव क्रमः, तदभावे भवन्तावपि धर्माऽधर्मौ न बन्धाय कल्पेते, न हि स्वकार्यमङ्कुरादि कुसूलवर्तीनि बीजानि जनयितुमुत्सहन्ते, भृष्टबीजानामपि स्वरूपशक्तिरपि तानवं गता, तद्वत्कर्मणां स्वरूपशक्तिशैथिल्यं मा भूत्, तथापि कुसूलवर्तिबीजवत् सहकारिवैधुर्यात् कार्या-ऽनारम्भः ।" इति ।

तन्न, अनुत्पादितकार्यस्य कर्मलक्षणस्य जन्यभावस्या-ऽप्रक्षयाद् नित्यत्वप्रसक्तेः, प्रतियोगिता-सम्बन्धेन ध्वंसत्वाऽवच्छिन्नं प्रति तादात्म्यसम्बन्धेन जन्यभावत्वेन हेतुत्वमिति कार्यकारणभाव-लोपापत्तेश्च ।

नन्वनागतयोर्धर्माऽधर्मयोरुत्पत्तिप्रतिषेधे सति तत्त्वज्ञानिनां नित्य-नैमित्तिकाऽनुष्ठानं किमर्थम्? इति चेत्, प्रत्यवायपरिहारार्थमिति ब्रूमः । न च मिथ्याज्ञाना-ऽभावे दुष्कर्मणोऽभावात् कस्य परिहारार्थं नित्यनैमित्तिकाऽनुष्ठानमिति वाच्यम्, यतो मिथ्याज्ञानाऽभावे [1]काम्यनिषिद्धाचरण-निमित्तस्यैव प्रत्यवायस्याऽभावः, न पुनर्नित्यनैमित्तिकादिविहिता-ऽननुष्ठाननिमित्तस्य, अकुर्वन् विहितं कर्म प्रत्यवायेन लिप्यत इत्यागमात् । तदुक्तञ्च—

> नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
> ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत् ॥१॥
> अभ्यासात् पक्वविज्ञानः[2]कैवल्यं लभते नरः ।
> केवलं काम्ये निषिद्धे च प्रवृत्तिप्रतिषेधतः ॥२॥

तथा च

> नित्य–नैमित्तिके कुर्यात् प्रत्यवायजिहासया ।
> मोक्षार्थी न प्रवर्त्तेत तत्र काम्य-निषिद्धयोः ॥१॥

न चेत्थं मिथ्याज्ञानध्वंसादिक्रमेण विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्त्यभ्युपगमे तादृशमुक्तेस्तत्त्वज्ञानकार्यत्वादनित्यत्वमिति वाच्यम्, यतः किं विशेषगुणोच्छेदस्याऽनित्यत्वमापाद्यते, तद्विशिष्टात्मनो वा? न तावत् प्रथमो विकल्पः, यतो विशेषगुणोच्छेदः प्रध्वंसरूपः । जन्यस्य भावस्यैव विनाशित्वं प्रसिद्धम्, न तु ध्वंसस्य । नाऽपि द्वितीयविकल्पः, यतस्तद्विशिष्टात्मनो

(१) काम्यं=यागः, निषिद्धं=विप्रवधादि ।
(२) कैवल्यं=सकलात्मविशेषगुणोच्छेदविशिष्टात्मस्वरूपं निःश्रेयसम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावत्वेऽपि नित्यत्वेन कार्यत्वाभावान्नाऽनित्यत्वम् । न च तथापि बुद्ध्यादिविनाशे तद्वत आत्मनोऽपि नाशः स्यादेवेति वाच्यम् , गुणगुणिनोस्तादात्म्याऽभावात् ।

**अत्र प्रतिविधीयते**—[1]यत्तावदुक्तम् '**नवानामात्मविशेषगुणानां सन्तानोऽत्यन्तमुच्छिद्यते, सन्तानत्वादित्यत्रा**-ऽऽत्मनः किं सर्वथा भिन्नानां बुद्ध्यादिविशेषगुणानां सन्तानस्योच्छेदः साध्यते, उता-ऽभिन्नानाम् , आहोस्वित् कथञ्चिद् भिन्नानाम् ?

तत्र प्रथमपक्षे तावदाश्रयाऽसिद्धो हेतुः, आत्मतोऽत्यन्तभिन्नानां बुद्ध्यादिविशेषगुणानामसत्कल्पत्वात् सन्तानस्य धर्मिणोऽसिद्धेः । तथा तेषां भवन्मते स्वसंवेदितत्वाऽनभ्युपगमात् ज्ञानान्तरग्राह्यत्वे चा-ऽनवस्थादिदोषप्रसङ्गात् , अज्ञातानाञ्च सत्त्वासिद्धेः पुनरप्याश्रयासिद्धः 'सन्तानत्वाद् ' इति हेतुः ।

ना-ऽपि द्वैतीयिकः पक्षः कक्षीकरणार्हः, आत्मनः सर्वथा-ऽभिन्नानां बुद्ध्यादिविशेषगुणानामुच्छेदसाधने तद्वत आत्मनोऽप्युच्छेदः स्यात् । ततश्च कस्याऽसौ मोक्षः ?

ना-ऽपि तार्तीयिकः पक्षः, कथञ्चिद्भेदस्य तु नैयायिक-वैशेषिकादिभिरनभ्युपगमात् , तदभ्युपगमेऽपि सर्वथा तदुच्छेदाऽसिद्धिः, कथञ्चिदनुच्छेदस्याऽप्येवं प्रसिद्धेः । तथा-ऽभ्युपगमे चा-ऽस्मन्मतमेवा-ऽङ्गीकृतं प्रेक्षावता । अभ्युपगम्यत एव हि स्याद्वादवादिभिर्गुणगुणिनोः कथञ्चिद्भेदः, तेन "**नट्ठम्मि य छउमत्थिए नाणे**" इत्यागमात् क्षायोपशमिकमत्यादिज्ञानानां विनाशेऽपि मोक्षावस्थायां क्षायिककेवलज्ञानस्या-ऽनुच्छेदः ।

किञ्च सन्तानत्वं हेतुत्वेनोपादीयमानं किं सामान्यरूपमभिप्रेतम् , उत विशेषरूपम् ? तत्र प्रथमपक्षे स्वरूपासिद्धो हेतुः, बुद्ध्यादिविशेषगुणेषु तेजोद्रव्यविशेषे च सत्तासामान्यव्यतिरेकेणाऽपरसामान्यस्याऽसम्भवात् । न च सन्तानत्वस्य सत्तारूपपरसामान्यरूपत्वे न तस्य स्वरूपासिद्धत्वमिति वाच्यम् , यतः सत्तासामान्यरूपत्वे सन्तानत्वस्य 'सत् सत्' इति प्रत्ययहेतुत्वमेव स्यात्, न पुनः 'सन्तानः सन्तानः' इति प्रत्ययहेतुत्वम् , अन्यथा द्रव्यगुणकर्मस्वरूपादेव 'सत् सत् ' इति प्रत्ययोपपत्तेः सत्ताकल्पनाया वैयर्थ्यम् ।

किञ्च सत्तासामान्यरूपत्वे गगनादिना व्यभिचारः, [2]अत्यन्तोच्छेदा-ऽभावेऽपि गगनादौ सत्तासामान्यरूपस्य सन्तानत्वस्य हेतोः सद्भावात् ।

अपि च सन्तानत्वसामान्यस्य बुद्ध्यादिषु वृत्तिमत्ता समवायेन भवतेष्यते, समवायस्य च **सम्मतितर्कादिवृत्तिग्रन्थेषु** न्यक्षेण निषिद्धत्वात् पुनरपि सन्तानत्वहेतोः स्वरूपासिद्धता ।

नाऽप्यपरसामान्यरूपं सन्तानत्वं सम्भवति, यतो विशेषगुणाश्रिता जातिः खलु सन्तानत्वं न साधर्म्यदृष्टान्ते तेजोद्रव्ये प्रदीपादावस्ति, गुणवृत्तित्वात् , तेन साधनविकलो दृष्टान्तः ।

(१) पृ० ५०८ पं० २५ ।    (२) साध्याभावे-ऽपि ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

अथ विशेषरूपं सन्तानत्वं हेतुः । तत्र विकल्पचतुष्कमवतरति-(१) किमुपादानोपादेयभूत-बुद्धयादिक्षणलक्षणप्रवाहरूपम् ?(२) उत कार्यकारणभावलक्षणप्रवाहरूपम् ? (३) आहोस्वित् स्वतन्त्रम् अपरापरक्षणोत्पत्तिमात्रम् ? (४) अथवा एकाश्रया-ऽपरापरक्षणोत्पत्तिमात्रम् ? इति ।

तत्र न तावदाद्यो विकल्पः, तादृशसन्तानत्वस्याऽन्यत्रा[१]-ऽप्रवृत्त्या-ऽसाधारणाऽनैकान्तिकत्वाद् अभ्युपगमविरोधप्रसङ्गाच्च । अभ्युपगमविरोधश्चेत्थम्-न खलु नैयायिक-वैशेषिकादिभिर्बुद्धयादिक्षणानामुपादानोपादेयभावः स्वीक्रियते, तस्य सौगतानां सम्मतत्वात् , नैयायिकादिभिस्तु समवायिकारणाऽऽत्मतो-ऽसमवायिकारणा-ऽऽत्म-मनःसंयोगतो-ऽदृष्टादेश्च निमित्तकारणादात्मगुणोत्पत्तिस्वीकारात् ।

एतेनैव द्वितीयपक्षोऽपि प्रतिविहितः, बुद्धयादिक्षणानां कार्यकारणभावस्य तैरनङ्गीकारात् । प्रलयप्रलीन-बुद्धयादेरप्यात्मन एव पुनर्बुद्धयाद्युत्पादाङ्गीकारात् ।

तृतीयपक्षेऽपि व्यभिचारः, अपरा-ऽपरेषामुत्पादुकानां घट-पट-कटादीनां सन्तानत्वेऽप्यत्यन्तमनुच्छेदात् ।

चतुर्थपक्षोऽपि न रमणीयः, यतस्तादृशं सन्तानत्वं नास्ति प्रदीप इति साधनविकलो दृष्टान्तः । परमाणुपाकजरूपादिभिश्च व्यभिचारी हेतुः, तथाविधसन्तानत्वस्य तत्र सद्भावेऽप्यत्यन्तोच्छेदाभावात् ।

अपि च सन्तानत्वमपि भविष्यति, अत्यन्तानुच्छेदश्चाऽपीति, विपर्यये हेतोर्बाधकप्रमाणाऽभावेन सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकः ।

विरुद्धश्चाऽयं सन्तानत्वहेतुः, शब्द-बुद्धि-प्रदीपादिष्वप्यत्यन्तानुच्छेदवत्येव सन्तानत्वस्य व्यवस्थानात् । न ह्येकान्तनित्येष्विवैकान्ता-ऽनित्येष्वप्यर्थक्रियाकारित्वलक्षणं सत्त्वं संभवति,तत्र तत्र स्याद्वादग्रन्थेषु प्रतिषिद्धत्वात् । साध्यवैकल्यं च दृष्टान्तस्य, प्रदीपादेरत्यन्तोच्छेदा-ऽभावात् , तैजसपरमाणूनां खलु भास्वररूपपरित्यागेनाऽन्धकाररूपतया-ऽवस्थानात् । न च प्रदीपादीनामुत्तरपरिणामस्या-ऽप्रत्यक्षत्वेन तेषामुच्छेदो विनिश्चेतुं शक्यः, अन्यथा परमाणूनां पारिमाण्डल्यगुणाधारतया प्रत्यक्षतो-ऽगृहीतानामसत्त्वं प्रसज्येत । अथ तेषां तद्रूपतया-ऽनुमानात् प्रतिपत्तेर्नाऽयं दोष इति चेत् , प्रकृतेऽप्यनुमानात् सा प्रतिपत्तिः किं नेष्यते । यथाहि स्थूलकार्यप्रतिपत्तिस्तदपरसूक्ष्मकारणमन्तरेणाऽसम्भविनी परमाणुसत्तामवबोधयति, तथा मध्यस्थितिदर्शनं पूर्वापरकोटिस्थितिमन्तरेणाऽसम्भवि तां साधयतीति ।

न च ध्वस्तस्या-ऽपि प्रदीपस्य विकारान्तरेणा-ऽवस्थाना-ऽभ्युपगमे प्रत्यक्षबाधेति वाच्यम् , [२]वारिस्थिते [३]तेजसि भास्वररूपा-ऽभ्युपगमेऽपि तद्बाधोपपत्तेः । अथोष्णस्पर्शस्य भास्वररूपाधिकरणतेजोद्रव्याऽभावेऽसम्भवादनुमानतस्तत्राऽनुद्भूतभास्वररूपस्य परिकल्पनम् ,तर्हि प्रदीपादेरनुपादनोत्प-

(१) दृष्टान्ते प्रदीपे (२) उष्णवारिस्थिते । (३) वह्नौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्तिवदन्त्यावस्थातोऽपरा-ऽपरपरिणामा-ऽऽधारत्वमन्तरेण सत्त्वकृतकत्वादेरनुपपत्तेरत्यन्ता-ऽनुच्छेदोऽपि परिकल्प्यताम्, अविशेषात् । प्रयोगश्चाऽयम्-पूर्वापरस्वभावपरिहारा-ऽङ्गीकारस्थितिलक्षणपरिणामवान् प्रदीपः, सत्त्वात् कृतकत्वाच्च, घटादिवद् । इत्थमनुमानतोऽपि प्रदीपादिसन्ताना-ऽनुच्छेदः किं न कल्प्यते, अन्यथा सन्तानचरमक्षणस्य क्षणान्तरा-ऽजनकत्वेना-ऽर्थक्रियाकारित्वविरहादसत्त्वे सिद्धे पूर्वपूर्वक्षणानामपि तथाभूतत्वप्रसङ्गाद् विवक्षितक्षणस्याऽप्यसत्त्वं स्यात् । ततश्च दृष्टान्तस्य प्रदीपस्य बुद्ध्यादिपक्षस्य चाऽसत्त्वप्रसङ्गात् कथमनुमानं प्रवर्तेत ? इत्थं शब्द-बुद्धि-प्रदीपादीनां सत्त्वसाधने नात्यन्तिक उच्छेदोऽभ्युपगन्तव्यः, अन्यथा विवक्षितक्षणेऽपि सत्त्वाभावः स्यात् । तदेवं सर्वत्रा-ऽत्यन्ताऽनुच्छेदवत्स्वेव बुद्धिप्रदीपादिषु सन्तानत्वस्य वृत्तेः कथं न तस्य विरुद्धत्वम् ?

सत्प्रतिपक्षश्चाऽयं सन्तानत्वहेतुः,तथाहि-बुद्ध्यादिसन्तानो नाऽत्यन्तोच्छेदवान् , सर्वप्रमाणा-ऽनुपलभ्यमानतथोच्छेदत्वात् । यो हि सर्वप्रमाणानुपलभ्यमानतथोच्छेदः,न स तत्त्वेना-ऽभ्युपगम्यः, यथा पार्थिवपरमाणुपाकजरूपादिसन्तानः ,तथा चाऽयम् , तस्मान्ना-ऽत्यन्तोच्छेदवानिति ।

न च नवानामात्मविशेषगुणानां सन्तानोऽत्यन्तमुच्छिद्यते, सन्तानत्वादित्यनुमानप्रमाणादेव सन्तानोच्छेदोपलब्धेः सर्वप्रमाणा-ऽनुपलभ्यमानतथोच्छेदत्वमसिद्धमिति वाच्यम् , अस्या-ऽनेकदोषदुष्टत्वेना-ऽननुमानत्वप्रतिपादनात् ।

कालात्ययापदिष्टश्चायं सन्तानत्वहेतुः, विपरीतार्थोपस्थापकोक्ताऽनुमानेन बाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वात् ।

किञ्च नवानामात्मविशेषगुणानां सन्तानो-ऽत्यन्तमुच्छिद्यते, सन्तानत्वादित्यनुमानात् किमिन्द्रियजानां बुद्ध्यादीनामुच्छेदः साध्यमानोऽस्ति ? उता-ऽतीन्द्रियाणाम् ?

तत्राद्यपक्षे सिद्धसाधनम् ,अस्माभिरपि तत्र बुद्ध्यादिगुणानामिन्द्रियजानामुच्छेदस्वीकारात् ।

द्वितीयपक्षोऽपि न निरवद्यः,अतीन्द्रियाणां तेषामत्यन्तोच्छेदे मुक्तौ कस्यचिदपि प्रवृत्त्यनुपपत्तेः । सर्वो हि मोक्षार्थी निरतिशयसुखज्ञानादिप्राप्त्यभिलाषेणैव प्रवर्तते, न पुनः सकलबुद्ध्यादिविशेषगुणोच्छेदाभिलाषेण, तादृशोच्छेदस्य केनचिदप्यनभिलषणीयत्वात् । न कोऽपि स्वात्मानं शिलाशकलकल्पमपगतसकलसंवेदनं जडं सम्पादयितुं प्रयतते । यदि मोक्षावस्थायां स्वात्मा पाषाण–देशीयो जडो भवेत् , तर्हि कृतं मोक्षेण, संसार एव वरमस्तु । अत एव भवदुपहासोऽपि श्रूयते—

**वरं वृन्दावने रम्ये शृगालैश्च सहोषितम् ।**
**न तु वैशेषिकीं मुक्तिं गोतमो गन्तुमिच्छति ॥१॥**" इति

अपि च उपहासं विदधता महाकविश्रीहर्षेणा-ऽपि नैषधमहाकाव्ये भणितम्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम् ।**
**गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः ॥१॥"** इति

'भवत्पठिता-ऽऽगमस्त्वन्यथा-ऽपि व्याख्यातुं शक्यते । तथाहि-सशरीरस्य=गतिचतुष्टयवर्तिन आत्मनः प्रिया-ऽप्रिययोः=परस्परा-ऽनुषक्तयोः सुख-दुःखयोः, अपहतिः=अभावो नास्ति, संसारिणां कदाचिदपि केवलं सुखं केवलं वा दुःखं नास्तीत्यर्थः, अशरीरं=गतिचतुष्टया-ऽन्यतमा-ऽवर्तिनं तु वावसन्तं=यङ्लुक्, अतिशयेन वसन्तं प्रियाप्रिये=परस्परानुषक्ते सुखदुःखे न स्पृशतः, आत्मस्वरूपत्वेन सदैव केवलसुखस्यैव सद्भावादिति ।

ननु परस्परा-ऽनुषक्तत्वं कुतो बुध्यते, न च द्वन्द्वसमासकरणात् तद् गम्यत इति वाच्यम्, यतो यथा धवखदिरौ छिन्द्धीत्यादौ छिदायाः प्रत्येकमन्वयो भवति, तथाऽत्रापि परस्परा-ऽननुषक्तयोः सुखदुःखयोर्ग्रहणं स्यादिति चेत्, उच्यते-एकसत्त्वेऽप्युभयं नास्तीति प्रतीतिबलात् घटवत्यपि भूतले घटपटौ न स्त इति वाक्याद् यथा घटपटोभयत्वावच्छिन्नप्रतियोगिताकाऽभावो बुध्यते, तथैव मुक्तौ सुखादिसत्त्वेऽपि तात्पर्यवशादुक्तश्रुत्या प्रियाऽप्रियोभयत्वावच्छिन्नप्रतियोगिताकाभावः प्रतिपाद्यते । तेन

**"सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम् ।**
**तं वै मोक्षं विजानीयात् दुष्प्रापमकृतात्मभिः ॥१॥ इति**

स्मृतिरप्युक्तार्थानुपातिनी सङ्गच्छते ।

यद्वा-ऽप्रियशब्दसान्निध्याद् भवदुदितागमस्थौ प्रियाऽप्रियशब्दौ वैषयिकसुख-दुःखप्रतिपादनपरौ व्याख्यायेते, ततोऽपि न काचिद् विप्रतिपत्तिः ।

किञ्च मुक्तौ बुद्ध्यादिविशेषगुणानामभावः किं कारणाऽभावादिष्यते ? उत विरुद्धत्वादिष्यते ? न तावत् प्रथमविकल्पः, न हि ज्ञानादिविशेषगुणत्वावच्छिन्नं प्रति शरीरादेर्निमित्तकारणत्वम्, ईश्वरज्ञानादिके व्यभिचारात्, किन्त्विन्द्रियजबुद्ध्यादिविशेषगुणत्वावच्छिन्नं प्रत्येव शरीरादेर्निमित्तकारणत्वमभ्युपगन्तव्यम्, न तु मोक्षावस्थाज्ञानसुखादिकत्वावच्छिन्नं प्रत्यपि । न च संसारावस्थाज्ञानसुखादिकस्य शरीरादिनिरूपितकार्यत्वम्, मोक्षावस्थाज्ञानसुखादिकस्य त्वन्यनिरूपितकार्यत्वमिति मोक्षावस्थाज्ञानसुखादिकं प्रति कारणान्तरकल्पने गौरवमिति वाच्यम्, **"मोक्षे सुखमनुत्तमम्"** इत्याद्यागमबलेन मुक्तौ ज्ञानसुखादीनां सिद्धौ तदुत्पत्तेरन्यथानुपपत्त्या कल्पिते कारणे कल्पनागौरवस्य प्रामाणिकत्वेन दूषणत्वविरहात् ।

ननु तथापि मुक्तावपि बुद्ध्यादिगुणानां जन्यभावत्वात् तेषां ध्वंसः स्यात्, ततश्च न

(१) पृ० ५०८ पं० ३० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषामनन्तत्वम्, यतः प्रतियोगितासम्बन्धेन ध्वंसत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन जन्यभावत्वेन कारणमिति कार्यकारणभाव इति चेत्, न, अभाववत् कस्यचिद् भावस्या-ऽप्यविनाशसम्भवाद् जन्यभावत्वेन नाशहेतुत्वे मानाभावाच्च। एतदुक्तं भवति-यथा जन्यस्य ध्वंसस्य विनाशा-ऽभावेन विनाश-जन्याभावयोः कार्यकारणभावो न सम्भवति, तथैवा-ऽऽगमसिद्धस्य मुक्ताऽवस्था-ज्ञानसुखादिकस्य विनाशाभावेन विनाश-जन्यभावयोरपि न कार्यकारणभावः। ननु यद्येवं नाश-जन्यभावयोः कार्यकारणभावविरहः, तर्हि यथा जन्यस्य कस्यचिद् घटाद्यात्मकभावस्य नाशो भवति, कस्यचिच्च मुक्तावस्थाज्ञानसुखादिकस्य न भवति, तथा-ऽजन्यस्याऽपि कस्यचिद् नाशः, कस्यचिच्च नेति चेत्, मैवम्, नाशकारणानां नाश्यनिष्ठतयैव हेतुत्वेन दोषा-ऽभावात्। अयं भावः–मुद्गरसंयोगादेः कारणतानियामकेन सम्बन्धविशेषेण स्वसमवायिसंयोगादिना नाश्ये घटादौ वृत्त्या घटादिनाशं प्रति मुद्गरसंयोगादेर्नाशकारणता, तेन ना-ऽजन्यस्य नाशा-ऽऽपत्तिः, नाशकारणविरहात्, एवमेव मुक्तावस्थायां न ज्ञानसुखादिनाशा-ऽऽपत्तिः। न च शरीराद्यभावस्य तादृशज्ञानसुखादिविनाशं प्रति हेतुता समस्तीति वाच्यम्, अभावस्य तुच्छत्वेन नाशकारणत्वा-ऽयोगात्।

अपि च प्रतियोगितासम्बन्धेन नाशं प्रति जन्यभावत्वेन हेतुत्वे स्वीकृते कारणता-ऽवच्छेदको जन्यत्वं न प्रागभावप्रतियोगित्वं ग्रहीतुं शक्यते, गुरुभूतत्वात्, किन्तु कालिकसम्बन्धेन घटत्वादिमत्त्वस्य कारणतावच्छेदकत्वकल्पनमुचितम्, लघुभूतत्वात्। एतदुक्तं भवति-कालिकसम्बन्धेन घटत्वादिमत्त्वस्य जन्यमात्रवृत्तिता **नैयायिकैः** स्वीक्रियते, कालाऽतिरिक्तनित्यपदार्थे तु वृत्तिः कालिकसम्बन्धेन ना-ऽभ्युपगम्यते **"नित्येषु कालिका-ऽयोगात्"** इति वचनात्। ततश्च प्रतियोगितासम्बन्धेन नाशं प्रति जन्यभावत्वं हेतुरित्यत्र प्रागभावप्रतियोगित्वा-ऽपेक्षया लघुत्वेन कालिकसम्बन्धेन घटत्वादिमत्त्वस्यैव कारणतावच्छेदकत्वकल्पनमुचितम्, तत्रा-ऽपि घटत्वादिमत्त्वस्यैवाऽवच्छेदकत्वं न पटत्वादिमत्त्वस्येति विनिगमाविरहात्, घटत्व-पटत्वादिमत्त्वादीनामवच्छेदकत्वं वाच्यम्। तथा च सत्यवच्छेदकानां नानात्वं स्यात्।

किञ्च जन्यभावत्वेन नाशहेतुत्वेऽपि मुक्तौ न सुखादिध्वंसः, यतो योग्यविभुविशेषगुणान् स्वोत्तरवर्तियोग्यविभुविशेषगुणा नाशयन्तीति **नैयायिक**सिद्धान्तसद्भावात् प्रतियोगितासम्बन्धेन योग्यात्मविशेषगुणनाशं प्रत्यैकाधिकरण्यावच्छिन्नस्वपूर्ववृत्तितासम्बन्धेन योग्यविशेषगुणत्वेन हेतुत्वमित्यपि नैयायिकमते कार्यकारणभावोऽस्ति, मुक्तौ तु योग्यविशेषगुणोत्पत्त्यभावाद् न पूर्वविशेषगुणानां नाशः स्यात्। ततश्च मुक्त्यवस्थायामप्यनन्तज्ञानादिकं निराबाधम्। अनन्तातीन्द्रियज्ञानसद्भावश्च यथा भवति, तथा **सयोगिकेवलि-गुणस्थानाधिकारे** आगमरीत्या दर्शितः। अनन्तातीन्द्रियसकलपदार्थविषयकज्ञानसाधकमनुमानप्रमाणमप्यस्ति। तद्यथा–ज्ञानतारतम्यं क्वचिद् विश्रान्तम्, तारतम्यशब्दवाच्यत्वात्, परिमाणवदिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ विरुद्धत्वाद् मुक्तौ ज्ञानाद्यभाव इष्यत इति चेत् , न, स्वरूपेण कस्यचित् विरोधा-ऽभावात् । प्रतिबन्धककर्मापायोपेतस्याऽऽत्मनः स्वरूपमेवाऽनन्तज्ञानादिविशिष्टत्वम् , न च स्वरूपेण सह विरोधो न्याय्यः । अभ्युपगते च विरोधे महेश्वरज्ञानादीनामप्यभावः प्रसज्येत, अविशेषात् ।

अन्यच्च प्रदीपनिर्वाणवादिनः **सौगताद्** भवतः को विशेषः, **सौगतेन** हि स्वरूपेणा-ऽऽ-त्मनोऽसत्त्वमभ्युपगतम् , यदुक्तं **सौन्दरनन्दमहाकाव्ये श्रीभदन्ताश्वघोषेण–**

**"यस्मिन्न जातिर्न जरा न मृत्युर्न व्याधयो ना-ऽप्रियसम्प्रयोगः ।**
**नेच्छाविपन्नप्रियविप्रयोगः क्षेमं पदं नैष्ठिकमच्युतं तत् ॥१॥**
**दीपो यथा निर्वृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काश्चिद्विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम् ॥२॥**
**एवं कृती निर्वृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काश्चिद्विदिशं न काञ्चित् क्लेशक्षयात् केवलमेति शान्तिम् ॥३॥"**
**इति ।**

भवता तु सतोऽप्यस्यात्मनो बुद्ध्यादिगुणविकलत्वमभ्युपगम्यते, बुद्ध्यादिगुणविकलतायाश्च प्रमाणाभावादसत्त्वम् । बुद्ध्यादिगुणविकलत्वं हि स्वरूपं केन प्रमाणेन प्रतीयते–किं प्रत्यक्षेणाऽनु-मानेन वा ? अथ प्रत्यक्षेण, तर्हि किमिन्द्रियप्रत्यक्षेण, उत योगिप्रत्यक्षेण । न तावदाद्येन, मोक्षे तस्या-ऽसम्भवात् । नाऽपि द्वितीयेन, योगिभिरात्मनोऽनन्तज्ञानादिमत्त्वेन प्रतीतेः ।

नाऽप्यनुमानतः प्रतीयते, यत इन्द्रियप्रत्यक्षाभावे भवन्मते-ऽनुमानस्या-ऽनुदयः **"तत्पूर्वकं त्रिविधमनुमानम्"** (गौ-१-१-५) इति **गौतमवचनात्** ।

[1]यदुक्तम् **'तत्त्वज्ञानस्य मिथ्याज्ञानव्यवच्छेदक्रमेण निःश्रेयसहेतुत्वेन प्रति-पादनात्'**'इत्यादि, तदुपपन्नम् , सकलबुद्ध्यादिगुणोच्छेदस्तु नोपपद्यते, तत्त्वज्ञानाद् विपर्ययज्ञान-व्यावृत्तिक्रमेण धर्मा-ऽधर्मयोस्तत्कार्यस्य शरीरादेरभावेऽप्यनन्तातीन्द्रियजसकलपदार्थविषयकसम्य-ग्ज्ञानप्रशमसुखादिसन्तानस्य व्यावृत्तेरभावात् ।

[2]यच्चोक्तम्-**"आरब्धशरीरेन्द्रियविषयकार्ययोर्धर्माधर्मयोः सुखादिफलोपभो-गात् प्रक्षयः"** इत्यादि , तदप्यपेशलम् , तदुपभोगसमयेऽपरकर्मनिमित्तस्या–ऽभिलाषपूर्वकस्य मनोवाक्कायव्यापारस्वरूपस्य सम्भवादविकलकारणस्य प्रचुरतरकर्मणः सद्भावात् कथमात्यन्तिकप्र-क्षयः स्यात् ।

[3]यच्चोपभोगात् सकलकर्मप्रक्षयेऽनुमानमुपन्यस्तम् , तदप्यसुन्दरम् , यतः कर्मत्वहेतुः सन्तानत्ववदसिद्ध्याद्यनेकदोषदुष्टः, तेन न प्रकृतसाध्यसाधकः ।

---

(१) पृ० ५०९ पं० २ । (२) पृ० ५०९ पं० ९ (३) पृ० ५०९ पं० २४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]यच्च "**समाधिबलादुत्पन्नतत्त्वज्ञानस्या०**" इत्यादि प्रोक्तम्, तदप्यसङ्गतम्, अभिलाषरूपरागाद्यभावे भवदभिप्रायेण ऋद्धिविशेषवता योगिना तत्त्वज्ञानादवगतकर्मसामर्थ्येन नानाशरीराणि विधाया-ऽङ्गनाद्युपभोगा-ऽसम्भवात्, तत्सम्भवे वा-ऽवश्यंभावी नृपत्यादेरिवाऽतिभागिनो योगिनोऽपि प्रचुरतरकर्मोत्पादः ।

[2]यच्च "**यत उपभोगं विना कर्मणां प्रक्षयाऽनुपपत्तिस्तत्त्वज्ञानिनस्तदुपभोगाऽभिलाषाभावेऽपि तत्र कर्मक्षयार्थित्वेन तस्य प्रवृत्तिर्घटते वैद्योपदेशेनाऽऽतुरस्येवौषधाचरणे**" इत्याद्युक्तम् तदप्यभिधानमात्रम्, आतुरोऽपि नीरुग्भावाभिलाषेणैव प्रवर्तत औषधाद्याचरणे । न च मुमुक्षोर्मुक्तिसुखाऽभिलाषेण प्रवर्तमानस्य सरागत्वं स्यादितिवाच्यम्, सूक्ष्मसम्पराये रागविगमस्य प्राक् प्रसाधितत्वात् । अतः कथं प्रोक्तदृष्टान्तादभिलाषरहितस्य तत्त्वज्ञानिनस्तत्त्वज्ञानमात्रात् कर्मक्षयार्थितया स्त्र्याद्युपभोगः साधयितुं शक्यः, दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यात् ।

[3]यच्चोक्तम् '**तत्त्वज्ञानस्य साक्षात् कर्मविनाशेऽव्यापाराभावात् । तत्त्वज्ञानं हि निखिलशरीरोत्पत्तिद्वारेणोपभोगात् कर्मणां विनाशे व्याप्रियते**" इत्यादि, तदप्यविचारिताऽभिधानम्, दृष्टविपरीतकल्पनाप्रसङ्गात्, मनुष्यादिशरीरादिसत्त्वे च शूकरादिशरीरा-ऽनुत्पत्तेः । इदमुक्तं भवति **वामदेवसौभरिप्रभृतीनां** कायव्यूहश्रवणात् तत्त्वज्ञानेन तत्तत्फलोपभोगोचितकायं निर्माय भोगेन कर्मक्षयो भवतीति परमतम्, एतच्चा-ऽयुक्तम्; नह्येकदैकस्य जीवस्यानेकान्यौदारिकादिशरीराणि दृष्टानि, कायव्यूहाभ्युपगमे तु दृष्टविपरीतानामेकदैव शूकर-खर-मृग-तुरगमनुजादिनानाशरीराणां कल्पनं प्रसज्यते । किञ्च तत्त्वज्ञानिनां तत्तच्छरीरफलोपभोगाय शूकर-तुरङ्ग-विहङ्ग-शृगाल-बिडाल-कुक्कुरादिशरीरपरिग्रहोपगम एकस्मिन् भवे भवसहस्रसाङ्कर्यं स्यात् । तथा केषाञ्चित् तत्त्वज्ञानिनां नरकादिदुःखजनकब्रह्महत्यादिप्रयोजकादृष्टस्य सद्भावे नारक-ब्रह्मघातकादिशरीरोपग्रहः स्यात् । न चाऽस्त्वेतद्, का विप्रतिपत्तिः ? इति वाच्यम्, ब्रह्मघातिनां तत्त्वज्ञानानुपपत्तेः । न च नरकादिदुःखजनक-ब्रह्महत्यादिप्रयोजकादृष्टस्याऽभावे सत्येव तत्त्वज्ञानोत्पत्तिरस्ति, ततश्च न तत्त्वज्ञानिनां नारक–ब्रह्मघातकादिशरीरपरिग्रह इति वाच्यम्, तुल्यन्यायेन शूकरतुरङ्गकुरङ्गशरीरोत्पादका-ऽदृष्टविरह एव तत्त्वज्ञानोत्पत्तिरिति वक्तुं शक्यत्वात् । न च "**नाऽभुक्तं क्षीयते कर्म**" इति स्मृत्या सह विरोधः स्यादिति वाच्यम्, "**व्याख्यानतो विशेषप्रतिपत्तिः**" इति न्यायेन प्रारब्धकर्मपरत्वेन व्याख्यानात् । तदेवं सकलकर्म न केवलं सुखदुःखादिफलोपभोगात् क्षीयते, न वा तत्त्वज्ञानात् । किन्तु प्रारब्धं कर्म सुखदुःखादिफलोपभोगाद् नश्यति, सञ्चितं तु मिथ्याज्ञाननिवृत्त्यादिक्रमेण पापक्रियानिवृत्तिलक्षणचारित्रोपबृंहितात् तत्त्वज्ञानात् प्रणश्यति, यतस्तादृशस्तत्त्वज्ञान-

---

(१) पृ० ५१० पं० ६ । (२) पृ० ५१० पं० १४ (३) पृ० ५१० पं० २१ ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

स्येवान् प्रभावः, यत्तस्मिन्नुदिते चिरकालसञ्चितान्यपि कर्माण्यपि सहसैव विलयं गच्छन्ति । तेन **'यथैधांसि"** इत्यादि, शैलेशीकरणसर्वसंवररूपचारित्रोपबृंहिततत्त्वज्ञानाग्नेः साक्षात् सञ्चितकर्मक्षये कारणतेति व्याख्येयम् , न तु परम्परया कायव्यूहद्वारा । एवञ्च–

**"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।**

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥१॥"** इति श्रुतिवचनमपि सङ्गच्छेत ।

किञ्च तादृशतत्त्वज्ञानस्य सञ्चितकर्मक्षये सामर्थ्यमुष्णस्पर्शदृष्टान्तेन बोध्यम् । तथाहि-तादृशतत्त्वज्ञानस्या-ऽऽगामिकर्माऽनुत्पादसामर्थ्यवत् सञ्चितकर्मप्रक्षयेऽपि सामर्थ्यं समस्त्येव, यथा भाविशीतस्पर्शाऽनुत्पत्तौ समर्थस्योष्णस्पर्शस्य पूर्वप्रवृत्तशीतस्पर्शनाशेऽपि सामर्थ्यं दृष्टम् ।

इदन्त्ववधेयम्–परिणामिजीवादिपदार्थसार्थविषयमेव ज्ञानं तत्त्वज्ञानम् , न त्वेकान्तनित्या-नित्यात्मादिविषयकम् , तस्य विपरीतार्थग्राहकत्वेन मिथ्यात्वव्यपदेशात् । मिथ्याज्ञानस्य तु मुक्तिहेतुत्वं परैरपि नेष्यते ।

[1]यच्चोक्तं—**"तत्त्वज्ञानिनां कर्मविनाशस्तत्त्वज्ञानाद्भवतु"** इति,तदुपपन्नम् , सम्यग्दर्शनचारित्रोपबृंहितसम्यग्ज्ञानस्य भूत-भाविकर्मसम्बन्धप्रतिघातकत्वेन मुक्तिं प्रत्यवन्ध्यकारणत्वात् ।

[2]यत्तु **"इतरेषान्तूपभोगाद्"** इत्यभिहितम् , तदनुपपन्नम् , उपभोगेन कर्मक्षयानुपपत्तेर्दर्शितत्वात् [२]।

[3]यत्तु तत्त्वज्ञानिनां नित्यनैमित्तिकानुष्ठानं प्रतिपादितम् , तदिष्टमेव **स्याद्वादवादिनाम्**, केवलज्ञानोत्पत्तेः प्राक् काम्यनिषिद्धानुष्ठानपरिहारेण नित्यनैमित्तिकयोर्ज्ञानावरणादिदुरितक्षयनिमित्तत्वाद् मोक्षप्राप्तिहेतुत्वाच्च । किन्तु केवलज्ञानलाभोत्तरकालं शैलेशीकरणावस्थायां सकलभवोपग्राहिकर्मनिर्जरस्वरूपायां सर्वक्रियाप्रतिषेध एव **स्याद्वादवादिभिरभ्युपगम्यते**; ततश्च नाऽदृष्टस्योत्पत्तिः, आत्यन्तिक्यास्तन्निमित्तप्रवृत्तिनिवृत्तेः ।

[4]यच्चोक्तम् **"न चेत्थं मिथ्याज्ञानध्वंसादिक्रमेण विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्त्यभ्युपगमे तादृशमुक्तेस्तत्त्वज्ञानकार्यत्वादनित्यत्वमिति वाच्य"**मित्यादि,तद् न युक्तम् , विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्तेः प्रतिविहितत्वात् , बुद्ध्यादीनामात्यन्तिकोच्छेदस्य प्रमाणबाधितत्वात् , आत्मनश्चैकान्तनित्यत्वविरहात् , बुद्ध्यादीनां च कथञ्चिदात्मना सह तादात्म्यात् ।

नन्वेवं यदि स्याद्वादवादिभिर्बुद्धि–सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माऽधर्म-संस्काराणां विशेषगुणानामुच्छेदो मोक्षो नेष्यते, तर्हि धर्मा-ऽधर्मादीनां तत्रा-ऽनुवृत्तिप्रसक्त्या संसार-मोक्षयो-

(१) पृ० ५१० पं० २४ । (२) पृ० ५१७ पं० २५ । (३) पृ० ५११ पं० १५ । (४) पृ० ५११ पं० २५ ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

रविशेषः स्यादिति चेत् , मैवम् , यद्यप्युक्तवर्चया सर्वात्मना बुद्धयादिविशेषगुणानामुच्छेदो मोक्षः प्रतिषिध्यते, तथापि कथञ्चित् तेषामुच्छेद इष्यत एव ।

तथाहि–बुद्धिशब्देन ज्ञानमुच्यते, तच्च पञ्चविधम् , मति-श्रुता-ऽवधि मनःपर्याय-केवल-भेदात् । तत्राद्यं ज्ञानचतुष्कं केवलज्ञानलाभकाले व्यवच्छिद्यते, क्षायोपशमिकत्वात् । यदुक्त**मावश्यकनिर्युक्तौ–"उप्पन्नंमि अणंते नट्ठम्मि अ छाउमत्थिए नाणे ।"** इति । केवलज्ञानं तु निखिलद्रव्यपर्यायसाक्षात्कारिस्वरूपं क्षायिकत्वेन निष्कलङ्कात्मस्वरूपत्वात् समस्त्येव ।

सुखं तु वैषयिकं तु तत्र नास्ति, तन्निमित्तस्य वेदनीयस्य समूलकाषं कषितत्वात् । यत्तु निरतिशयमक्षयमनपेक्षमनन्तं सुखम् , तत् तत्र प्रभूतं विद्यते ।

दुःखं तु न विद्यते,तस्या-ऽधर्ममूलत्वात् , तदुच्छेदाच्च तदुच्छेदोपपत्तेः । नन्वेवं सुखमपि न सम्भवति, तन्मूलस्य धर्मस्योच्छेदात् । न च धर्मस्योच्छेदोऽसिद्ध इति वाच्यम् **"पुण्य–पापक्षयो मोक्षः"** इत्यागमवचनेन तत्सिद्धेरिति चेत् , मैवम् , वैषयिकस्य सुखस्य धर्ममूलत्वादस्तु तदुच्छेदः, न पुनरनपेक्षस्या-ऽपि सुखस्योच्छेदः ।

इच्छाद्वेषयोस्तु समस्त्येवाऽभावः; तयोर्मोहभेदत्वात् , मोहस्य च समूलकाषं कषितत्वात् ।

प्रयत्नश्च क्रियाव्यापारगोचरो नास्ति, कृतकृत्यत्वात् । वीर्यान्तरायक्षयोपनतस्तु भवत्येव, दानादिलब्धिवद् ।

धर्मा-ऽधर्मयोस्तु पुण्यपापा-ऽपरपर्याययोरुच्छेदो भवत्येव, तदभावे मोक्षस्याऽसम्भवात् ।

संस्कारस्तु मतिज्ञानविशेषोऽस्ति; मतिज्ञानस्य च क्षीणकषायगुणस्थानके **"नट्ठम्मि अ छाउमत्थिए नाणे"** इति वचनाद् व्यवच्छित्तेः संस्कारोऽप्युच्छिद्यते ।

**केचिद् नैयायिक-वैशेषिकादयः** पुनः प्राहुः–समानकालीनसमानाधिकरणदुःखप्रागभावा-ऽसमानदेशो दुःखध्वंसो मोक्ष इति । तत्र च यद् यत् स्वसमानकालीनस्वसमानाधिकरणदुःखप्रागभावसमानदेशमिदानीन्तनदुःखध्वंसादि , तत्तद्भिन्नो दुःखध्वंसो मोक्ष इति वक्तव्यम् , अन्यथा चरमदुःखध्वंससमानकालीनसमानाधिकरणदुःखप्रागभावस्या-ऽप्रसिद्धिप्रसङ्गः । वस्तुतस्तु समानकालीनविशेषणस्या-ऽनावश्यकतया समानाधिकरणदुःखप्रागभावा-ऽसहवृत्तिदुःखध्वंसो मोक्ष इति निर्दुष्टं लक्षणम् । इह दुःखध्वंस इत्युक्तौ संसारिणामपि यत्किञ्चिद् दुःखादीनामात्मविशेषगुणानां ध्वंससद्भावात् संसारिणामपि मुक्तत्वव्यपदेशः स्यादित्यतिव्याप्तिवारणाय वृत्त्यन्तम् । तत्रा-ऽप्यसहवृत्तीत्येतावन्मात्रेऽभिहिते-ऽसम्भवः स्यात् , दुःखध्वंसस्य केनचिदत्यन्ताभावादिना सहवृत्तित्वात् । अभावाऽसहवृत्तीतिकथनेऽप्यसम्भवदोषस्तदवस्थ एव । प्रागभावा-ऽसहवृत्तीतिभणनेऽपि संयोगादि-प्रतियोगिकप्रागभावादिकमादाया-ऽसम्भवः, दुःखध्वंसकाले-ऽपि संयोगादय उत्पत्स्यन्त इति प्रतीतेः सर्वजनप्रसिद्धत्वेन संयोगादिप्रागभावसहवृत्तित्वाद् दुःखध्वंसस्येति प्रतियोगितया दुःखपदोपादानम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा महाप्रलयमभ्युपगच्छतां नैयायिकानां मतेन चरममुक्तजीवगतदुःखध्वंसस्य दुःखप्रागभावा-ऽसहवृत्तितायाः सत्त्वे-ऽपि द्विचरमादिमुक्तगतदुःखध्वंसे दुःखप्रागभाववृत्तितायाः सत्त्वादव्याप्तिः। तेन समानाधिकरणेति दुःखप्रागभावस्य विशेषणम्। सामानाधिकरण्यञ्च विशेष्यीभूतदुःखध्वंसनिरूपितं बोध्यम्।

प्रमाणयन्ति च प्राञ्चः—दुःखसन्ततिरत्यन्तमुच्छिद्यते, सन्ततित्वात्, प्रदीपसन्ततिवदिति। तदसत्, सन्तानत्वहेतोरनेकदोषदुष्टतया प्राक्प्रदर्शितत्वात्।

आत्मकाला-ऽन्यवृत्तिध्वंसप्रतियोग्यवृत्ति दुःखत्वं दुःखप्रागभावा-ऽनधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति, सत्कार्यमात्रवृत्तित्वात्, प्रदीपत्ववदिति **श्रीवर्धमानप्रभृतयः** प्राहुः।

अथादौ तावत् पक्षो विचार्यते—आत्मकालतोऽन्यो य आकाशादिः, तद्वृत्तिर्यः शब्दादिध्वंसः, तत्प्रतियोगिनो ये शब्दादयः, तत्रा-ऽवृत्ति दुःखत्वमिति पक्षः।

अथ पदकृत्यम्—दुःखत्वमित्युक्तौ शब्दादिवृत्तित्वेना-ऽर्थान्तरम्, तद्वारणाय पक्षविशेषणम्, बाधस्या-ऽस्फूर्तिदशायां तत्सामर्थ्यात्। बाधज्ञाने जाते तु व्यर्थं स्यात्, उक्तं च **श्रीपद्मनाभमिश्रेणाऽपि प्रशस्तपादभाष्यस्य सेतुव्याख्यायाम्-"ननु बाधादेव शब्दवृत्त्यर्थान्तरवारणे आत्मकालान्यवृत्तिध्वंसप्रतियोग्यवृत्तीति पक्षविशेषणं वर्द्धमानोपाध्यायैः किमुपात्तमिति चेन्न, बालान् प्रति बाधस्फुरणार्थं तदुपादानात्, बाधबोधवतां तस्य वैयर्थ्यात्, अन्यथा महानसादिवह्निरहितपर्वतो वह्निमान् धूमादित्यनुमानापत्तेः।" इति।** तत्राऽप्यवृत्तिदुःखत्वमित्येतावन्मात्रे भणित आश्रयासिद्धिः, दुःखत्वस्य दुःखवृत्तित्वात्। ध्वंसप्रतियोग्यवृत्तिदुःखत्वेत्युक्तावप्याश्रयासिद्धिस्तदवस्था, दुःखत्वस्य दुःखध्वंसप्रतियोगिवृत्तित्वात्। काला-ऽन्यवृत्तिध्वंसप्रतियोग्यवृत्तिदुःखत्वेत्युक्तावप्याश्रयासिद्धिर्न निवर्तते। तथाहि—काला-ऽन्यो य आत्मा, तद्वृत्तिर्यो दुःखध्वंसः, तत्प्रतियोगिवृत्तित्वाद् दुःखत्वस्याश्रयासिद्धिस्तदवस्था। आत्मा-ऽन्यवृत्तीत्याद्यभिधाने-ऽपि सैवाश्रया-ऽसिद्धिः, तद्यथा—आत्मा-ऽन्यो यः खण्डकालः, तद्वृत्तिर्यो दुःखध्वंसः, इदानीं दुःखं ध्वस्तमिति खण्डकाले दुःखध्वंसप्रतीतेः, तत्प्रतियोगिवृत्तित्वाद् दुःखत्वस्याऽऽश्रयासिद्धिर्न निवर्तते।

न चाऽऽत्मकालपदोपादाने-ऽप्यात्मकालतो-ऽन्या दिक् तदुपाधिः कालोपाधिरात्मोपाधिर्वा, तद्वृत्तिर्यो दुःखध्वंसः, तत्प्रतियोगिदुःखवृत्तित्वाद् दुःखत्वस्या-ऽऽश्रयासिद्धिस्तदवस्थैवेति वाच्यम्, उपलक्षणेन तद्ग्रहणात्। अयम्भावः—कालेत्युपलक्षणम्, तेन दिक् तदुपाधिः कालोपाधिश्च गृह्यन्ते। आत्मेत्युपलक्षणम्, तेन तदुपाधेः शरीरादेर्ग्रहणम्, तेन ना-ऽऽश्रयासिद्धिः।

अथ साध्यं विचार्यते—दुःखप्रागभावा-ऽनधिकरणं महाप्रलयः, तद्वृत्तिर्यो दुःखध्वंसः, तत्प्रतियोगिदुःखनिरूपितवृत्तिताऽस्ति दुःखत्वे, दुःखत्वस्य दुःखे वर्तमानत्वात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखप्रागभावा-ऽनधिकरणत्वञ्चेह दुःखप्रागभावा-ऽधिकरणभिन्नत्वम् , तेनात्मा दुःखप्रागभावा-ऽनधिकरणं न भवत्येव, अन्यो-ऽन्याभाववृत्तेः सामयिक्या अनङ्गीकारेण दुःखप्रागभावा-ऽधिकरणस्या-ऽऽत्मनो दुःखप्रागभावा-ऽनधिकरणत्वा-ऽसम्भवात् । एवञ्चात्मनो दुःखप्रागभावा-ऽनधिकरणत्व-विरहाद् न प्रत्येकमुक्त्या-ऽर्थान्तरम् ।

यद्यप्येवं व्याख्याते व्योमादिदुःखप्रागभावानधिकरणं भवत्येव, तथा-ऽपि तद्वृत्तिध्वंसप्रति-योगिवृत्तित्वं बाधितमेवेति पक्षधर्मतामाहात्म्येन कालविशेष एव गृह्यते, न त्वाकाशादिः स एव च सर्वमुक्तिकालः, स एव च महाप्रलयकालः ।

ननु दिगेव तथा कुतो न भवति, कालवद् दिशो-ऽपि सर्वा-ऽऽधारत्वेन चरमदुःखध्वंसा-ऽऽधारत्वसम्भवात् ? इति चेत्, न, दिग्द्रव्यस्यैकत्वेन दुःखप्रागभावाधिकरणस्य तद्भिन्नत्वाऽसम्भवात् ।

अथ दिगुपाधिः कोऽपि दुःखप्रागभावानधिकरण-दुःखध्वंसाधिकरणं भविष्यतीति चेत् , न, तादृशो दिगुपाधिः कोऽपि सृष्टिदशायां नास्ति । प्राच्यादय एव दिगुपाधयः, ते च दुःखप्राग-भावा-ऽधिकरणमेव, महाप्रलयदशायां तु प्रमाणाभाव एव दिगुपाधौ, प्राच्यादिव्यवहाराभावात् । प्रस्तुतप्राच्यादेस्तत्राऽङ्गीकरणे-ऽपि तस्य दुःखप्रागभावा-ऽधिकरणत्वमेव । अन्यप्राच्यादेस्तद्विल-क्षणस्य दिगुपाधेर्वा-ऽङ्गीकारे प्रमाणाभावः । तस्मात् काल एव गृह्यते । न च कालस्या-ऽप्येक-त्वेन दुःखप्रागभावा-ऽधिकरणत्वात् कथं तद्भिन्नत्वम् ? इति वाच्यम् , कालोपाधिविशेषस्य तथा-त्वात् । स च 'तदानीं महाप्रलयो भविष्यती'ति प्रतीतिबलात् चरमध्वंसरूपः स्वीकार्यः ।

अथ पदकृत्यम्—वृत्तिमदित्युक्तौ सिद्धसाधनम् , दुःखत्वस्य दुःखे विद्यमानत्वात् । प्रतियोगि-वृत्तीत्युक्तावपि सिद्धसाधनम् , दुःखा-ऽत्यन्ता-ऽभावप्रतियोगिनि दुःखे विद्यमानत्वाद् दुःखत्वस्य । दुःखध्वंसप्रतियोगिवृत्तीत्यभिधाने-ऽपि सिद्धसाधनं तदवस्थम्, यत्किञ्चिद्दुःखध्वंसस्य स्वीकृत-त्वेन दुःखध्वंसप्रतियोगिदुःखनिरूपितवृत्तिताया दुःखत्वे सत्त्वात् । प्रागभावानधिकरणवृत्तिध्वंसे-त्याद्युक्तौ दृष्टान्तासिद्धिः, प्रदीपा-ऽवयवानां प्रदीपप्रागभावा-ऽनधिकरणत्वविरहात् । दुःखप्राग-भावानधिकरणेत्याद्यभिधाने तु भवत्येव सङ्गतिः । यतः प्रदीपावयवा दुःखप्रागभावा-ऽनधिकरण-भूताः,तद्वृत्तिर्यः प्रदीपध्वंसः, तत्प्रतियोगिप्रदीपनिरूपितवृत्तितायाः प्रदीपत्वे सत्त्वात् । दुःखानधि-करणेत्याद्युक्तौ खण्डप्रलयकालेऽपि सर्वमुक्तिसिद्धिः स्यात् , अदृष्टाद्यतिरिक्तानां दुःखादीनां तत्र विरहात् । तेन दुःखप्रागभावानधिकरणेत्याद्युक्तम् , लभ्यते च खण्डप्रलये दुःखप्रागभावः, दुःखा-द्युत्पादकाऽदृष्टस्य सत्त्वात् । दुःखप्रागभावा-ऽनधिकरणवृत्त्यभावप्रतियोगिवृत्तीत्युक्तौ दुःखा-ऽन्योन्या-भावमादाय प्रकृता-ऽन्यसिद्धेः, तथाहि-दुःखप्रागभावा-ऽनधिकरणं व्योम, तद्वृत्तिर्यो दुःखान्यो-न्याभावः, तत्प्रतियोगि दुःखम् , तन्निरूपितवृत्तिता दुःखत्वे संसारावस्थायामपि समस्ति । तस्माद् दुःखप्रागभावा-ऽनधिकरणवृत्तिध्वंसप्रतियोगिवृत्तीति सूपपन्नम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ हेतोः पदकृत्यम्–वृत्तित्वेत्युक्ते आत्मत्वे व्यभिचारि,आत्मत्वस्याऽऽत्मनि वृत्तित्वात् । तद्यथा-हेतुः समस्त्यात्मत्वे,साध्यं तु नास्ति,आत्मत्वस्य तादृशध्वंसाप्रतियोगिवृत्तित्वात् । तेन कार्यपदोपादानम् । कार्यवृत्तित्वेत्यभिधाने–ऽनन्तत्वे व्यभिचारि, ध्वंसा-ऽप्रतियोगित्वरूपस्या-ऽनन्तत्वस्या-ऽकार्ये आत्मादाविव कार्यध्वंसे-ऽपि सत्त्वात् । अयम्भावः—ध्वंसस्या-ऽविनाशशालित्वादनन्तत्वं कार्यभूतध्वंसे वर्तत एव । तेना-ऽनन्तत्वे कार्यवृत्तित्वं हेतुः समस्ति, साध्यं तु तादृशध्वंसप्रतियोगिवृत्तित्वं नास्ति, अनन्तत्वस्य तादृशध्वंसा-ऽप्रतियोगिवृत्तित्वात् । मात्रपदोपादाने तु न व्यभिचारः । अनन्तत्वस्याऽऽत्मादौ नित्ये-ऽपि विद्यमानत्वेन कार्यमात्रवृत्तित्वविरहात् । न च दुःखत्वादीनां कालाख्यनित्यपदार्थवृत्तित्वात् कार्यमात्रवृत्तिताऽसिद्धेति वाच्यम् , असाधारणवृत्तेर्विवक्षितत्वात् । न च सुखत्व-धर्मत्वा-ऽधर्मत्व-द्वेषत्वादिषु व्यभिचार इति वाच्यम् , पक्षसमत्वात् । कार्यमात्रवृत्तित्वेत्युक्तौ ध्वंसत्वे व्यभिचारः, ध्वंसस्य कार्यत्वेन ध्वंसत्वे कार्यमात्रवृत्तिताऽस्ति, किन्तु तत्र साध्यं नास्ति, ध्वस्तस्य ध्वंसाभावेन ध्वंसत्वस्य तादृशध्वंसाप्रतियोगिवृत्तित्वात् । तद्व्यभिचारवारणाय सदिति कार्यस्य विशेषणम् ।

तदेवं सर्वमुक्तिसिद्धौ चैत्रदुःखत्वादिकं पक्षीकृत्य तत्तन्मुक्तिः साध्या, प्रयोगश्चेत्थम्–चैत्रदुःखत्वं चैत्रदुःखप्रागभावानधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति, सत्कार्यमात्रवृत्तित्वात् ।

अथोक्तानुमानमित्थं प्रतिविधातव्यम्–निरुक्तानुमानमसत्—(१) बाधात् (२) अप्रयोजकत्वात् (३) अनभिमतसिद्धिप्रसङ्गाच्च । (१) तथाहि–दुःखप्रागभावा–ऽनधिकरणवृत्तिर्यो दुःखध्वंसः, तस्य दुःखप्रागभावा-ऽनधिकरणे वृत्तिरभावीयविशेषणतासम्बन्धेनाऽभ्युपगम्यते यदि, तदा बाधः, दुःखध्वंसस्य तत्समवायिकारणे एव तेन सम्बन्धेन वृत्तेः, न तु महाप्रलयीयेति नैयायिकैरभ्युपगतत्वात् । यत्किञ्चित्सम्बन्धमात्रेण त्वभ्युपगमे तदभाववद्वृत्तितादिरूपव्यभिचारितादिसम्बन्धेन दुःखध्वंसस्या-ऽऽकाशादावपि वृत्तेर्न प्रकृतसिद्धिः ।

कालिक-दैशिकविशेषणतान्यतरसम्बन्धेन वृत्तित्वोक्तावपि कालोपाधिजन्यपदार्थवृत्तित्वेन न प्रकृतसिद्धिः । तथाहि-यथा कालिकसम्बन्धेनाऽष्टद्रव्यातिरिक्तस्य कालस्या-ऽधिकरणत्वं भवति, तथैव कालिकसम्बन्धेन स्वसमानकालीनजन्यपदार्थमात्रस्याऽप्यधिकरणत्वं नैयायिकैः स्वीक्रियते, यत इदानीं तदानीमित्यादिप्रतीतिविषयता-ऽष्टद्रव्यातिरिक्तकालस्य न जन्यभाववैशिष्ट्यमन्तरेणेति जन्यभावः कालावच्छेदकः । ततश्च जन्यभावस्याऽपि कालत्वमिति कालकृतविशेषणात्मकेन कालिकसम्बन्धेन स्वकालीनजन्यपदार्थमात्रस्या-ऽधिकरणत्वम् । तेन प्रस्तुताऽनुमाने कालिकसम्बन्धेन दुःखध्वंसस्य दुःखप्रागभावा-ऽनधिकरणे जन्यपदार्थे वृत्तेर्न प्रकृतसिद्धिः, सृष्टावपि तत्सत्त्वात्।

(२) न केवलं हेतुसाध्ययोः सहचारभूयोदर्शनमेव साध्यसिद्ध्यर्थमुपयुज्यते, किन्तु व्यभिचारशङ्कायामुपस्थितायां सत्यां तन्निवर्तकतर्कोऽपि । स तु इह नास्ति, कार्यकारणादिभावविरहात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा–व्यभिचारशङ्का पुनरित्थम्, अस्तु सत्कार्यमात्रवृत्तित्वम्, माऽस्तु दुःखप्रागभावाऽनधिकरण-वृत्तिध्वंसप्रतियोगिवृत्तित्वमिति, तस्यामुपस्थितायां न तद्बाधकः कोऽपि कार्यकारणभावादिमूलक-तर्को लभ्यते, वह्निधूमादिवत् हेतुसाध्ययोः कार्यकारणभावादिविरहात् ।

(२) अप्रयोजकत्वेऽपि सत्साध्यसाधकभावा-ऽभ्युपगमे त्वनभिमतसिद्धिप्रसङ्गः । अनभिमत-साध्यं प्रत्यपि निरुक्तहेतोरविशेषात् । तद्यथा,–आत्मकाला-ऽन्यवृत्तिप्रागभावप्रतियोग्यवृत्ति-दुःखत्वं दुःखध्वंसाऽनधिकरणवृत्तिप्रागभावप्रतियोगिवृत्ति, सत्कार्यमात्रवृत्तित्वात्,प्रदीपत्ववदित्य-नुमानेन यस्मात् पूर्वं न कस्यचिद् दुःखस्योत्पत्तिः, तादृशः कालः सिध्यति,एवं दुःखस्थाने सुखादिकं प्रक्षिप्याऽऽत्मकालान्यवृत्तिप्रागभावप्रतियोगिवृत्ति, सत्कार्यमात्रवृत्तित्वात्, प्रदीपत्ववदित्यनुमानेन यत्पूर्वं न कस्यचित् सुखादेरुत्पत्तिः तादृशकालः सिध्यति, ततश्च संसारस्य सादित्वं सिध्यति, तच्चा-ऽनभिमतम् ।

**प्राभाकरास्तु** प्राहुः–आत्यन्तिकदुःखप्रागभावो मोक्ष इति । न च यद्यात्यन्तिकदुः-खप्रागभावो मोक्ष इत्यभ्युपगम्यते, तर्हि दुःखप्रागभावस्यानादिकालतः प्रवृत्तत्वात् कृत्यसाध्यत्वे-नाऽपुरुषार्थत्वं प्रसज्यत इति वाच्यम्, यतो दुःखप्रागभावस्या–ऽनादित्वेऽपि प्रतियोगिजनका-ऽधर्मवि-नाशद्वारा तत्संरक्षणीयत्वरूपं कृतिसाध्यत्वं समस्ति । तथाहि—कृत्यधीनतत्त्वज्ञानेना-ऽधर्मनाशे सम्पन्ने तदुत्तरक्षणे दुःखसामग्रीविरहेण दुःखानुत्पत्तेर्दुःखप्रागभावपरिपालनं संपद्यते । तदेवं क्षेमस्वरूपजन्यता प्रागभावेऽपि समस्ति, तेन समस्त्येव प्रागभावस्य कृतिसाध्यत्वम्, लोकेऽपि यथा सुवर्णप्राप्तौ कृतिर्दृश्यते, तथा सुवर्णादिसंरक्षणेऽपि । ततश्च ना-ऽपुरुषार्थत्वापत्तिः ।

एतत्सर्वमप्यसारम्, यतो-ऽनादिः सान्तोऽभावः प्रागभावः, स च नियमेन स्वप्रतियोगि-नमुत्पादयति, स्वप्रतियोग्युत्पादे च पुनः संसारित्वापत्तिः । न च सहकारिणो विरहेण प्रागभावेन स्वप्रतियोगिदुःखं नोत्पाद्यत इति वाच्यम्, तथासति तादृक्प्रागभावस्य भाविकालेऽप्यन्तविरहेण तस्याऽत्यन्ताभावत्वप्रसङ्गः । अत्यन्ताभावस्य च नित्यत्वेन कृतिसाध्यत्वविरहाद् न पुरुषार्थत्वम् ।

किञ्चा-ऽऽत्यन्तिकदुःखप्रागभावो मोक्ष इति कथने कः प्रतियोगी ? न तावत् समानाधि-करणं भाविदुःखम्, मुक्तौ तस्याऽसत्त्वात् । भाविदुःखसद्भावे तु पुनरावृत्तिप्रसङ्गः । नाऽपि समाना-धिकरणमतीतं वर्तमानं वा दुःखं प्रतियोगितया वक्तुं शक्यते,तत्प्रतियोगिकप्रागभावस्य विनष्टत्वात् । नाऽपि व्यधिकरणं दुःखं प्रतियोगि, अन्यवृत्तिदुःखस्यान्यवृत्त्यत्यन्ताभावनिरूपितैव प्रतियोगिता, न त्वन्यवृत्तिप्रागभावनिरूपिता, प्रागभावस्य स्वप्रतियोगिसमवायिदेश एव वृत्तेरभ्युपगमात् । नाऽपि सामानाधिकरण्यवैयधिकरणविवक्षाशून्यं दुःखमात्रं प्रतियोगीति वक्तुं शक्यते, स्वपराऽ-वृत्तेर्दुःखस्याऽप्रामाणिकत्वात् ।

अपरञ्च मोक्षस्य तादृशात्यन्तिकदुःखप्रागभावरूपत्वकल्पने कदाप्यजन्यस्य दुःखस्यासत्त्वेन तत्प्रागभावस्याप्यलीकप्रतियोगिकत्वादसत्त्वम्, तथा च तद्रूपमोक्षस्याप्यसत्त्वापत्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु यद्येवमात्यन्तिकदुःखप्रागभावो न कृतिसाध्यः, तर्हि दुःखानुत्पादमुद्दिश्य प्रायश्चित्तादौ कथं प्रवृत्तिः, दुःखानुत्पादस्य दुःखप्रागभावस्वरूपत्वात् तस्य चाऽसाध्यत्वात् ? इति चेत् , कामम् , प्रायश्चित्तेन पापध्वंसद्वारा कियन्तं कालं दुःखप्रागभावाऽनुपालनमस्त्येव, किन्तु नैतावता तस्यालीक-प्रतियोगिकत्वम् , पापान्तरमासाद्य प्रागभावेन दुःखजननाद् । न हि भाविनि मरणे ज्ञातेऽपि प्रकृतरोगिने भेषजदानस्य वैफल्यम् । मोक्षे तु कदापि दुःखजननं न संभवति, ततश्चाऽत्यन्ता-भावत्वव्यपदेशप्रसङ्गः । दुःखोत्पत्तिसम्भवे च पुनः संसारावाप्तिः ।

**केचित् तु नैयायिका** आहुः–दुःखाऽत्यन्ताभावो मोक्ष इति । **दुःखेनाऽत्यन्तं विमुक्त-श्चरतीति** श्रुतेः । तदप्यतिमन्दम् ,अत्यन्ताभावस्य नित्यत्वेन कृतिसाध्यत्वविरहात् । न चा-ऽत्यन्ता-भावसम्बन्धः साध्यत इति वाच्यम् , उत्पत्तिमतो भावस्य नाशनियमेन तादृगुत्पत्तिमत्सम्बन्ध-निवृत्तौ मुक्तानामपि संसारित्वप्रसङ्गात् । न च दुःखसाधनध्वंस एव स्ववृत्तिदुःखा-ऽत्यन्ताभाव-सम्बन्धः, तन्निवृत्तिश्च न भवति, ध्वंसस्या-ऽविनाशित्वात् , ततश्च न पुनः संसारित्वप्रसङ्ग इति वाच्यम् , दुःखसाधनध्वंसात्मकसम्बन्धसम्बद्धदुःखात्यन्ताभावस्य मोक्षत्वकल्पना-ऽपेक्षया लाघवाद् विशिष्टदुःखसाधनध्वंसस्यैव मोक्षत्वकल्पनाया न्याय्यत्वात् ।

अथास्तु विशिष्टदुःखसाधनध्वंसो मोक्ष इत्यपि न युक्तिसङ्गतम् , यतो दत्तफलानां दुःख-साधनानामदृष्टानां निवृत्तिरयत्नसिद्धा । अदत्तफलानां तु निवृत्तिरनागतदुःखा-ऽनुत्पत्तिम-भिसन्धाय समीहिता , तेन दुःखानुत्पाद एव प्रयोजनम् , स च दुःखप्रागभावस्वरूपः, तस्य च मोक्षत्वानुपपत्तिः प्राग्दर्शितैव ।

अथ भवति दुःखध्वंसस्तोमो मोक्ष इत्याहुः **केचित्** । यत्किञ्चिद्दुःखध्वंसो-ऽस्मदादिसं-सारिणामप्यस्ति, तेन कथितः स्तोम इति । तन्न, यतः स्तोमः कथमपि मोक्षोपायत्वेनाभिमत-तत्त्वज्ञानादिना न साध्यः, समग्रसंसारकाले भिन्नभिन्नकालोत्पन्नतत्तद्दुःखध्वंसानां स्तोमान्तर्गत-त्वेन तत्तत्कालीनदुःखोपभोगादिभिरेव निष्पन्नत्वात् । तत्त्वज्ञानोत्तरमपि तस्य(=तत्त्वज्ञानस्य)दुःख-प्रयोजकदुरितविध्वंसकत्वेन दुःखानुत्पादसम्पादकत्वमेवेति कथं दुःखध्वंसस्तोमस्य साध्यत्वम् ?

अपि च तादृक्स्तोमस्य यावत्त्वसंख्यारूपत्वे तस्याऽपेक्षाबुद्धिजन्यत्वेन न मोक्षोपायत्वेना-भिमततत्त्वज्ञानादिसाध्यत्वम् । तत्तद्दुःखध्वंसस्वरूपत्वे तु दुःखस्य योग्यविभुविशेषगुणत्वेन तद्-ध्वंसस्य स्वतस्तृतीयक्षणनिष्पन्नत्वाद् न मोक्षोपायभूततत्त्वज्ञानसाध्यतेति कथमपि न मोक्षो दुःख-ध्वंसस्तोमरूपो घटां प्राञ्चति ।

**(इति नैयायिकाद्यभिमतमोक्षस्वरूपप्रतिविधानम् ।)**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौतातितास्त्वाहुः–नित्यनिरतिशयसुखाभिव्यक्तिर्मोक्ष इति । यदुक्तं [1]**विज्ञानमानन्दं ब्रह्म।**"इति । अयम्भावः-संसारावस्थायामविद्यासंसर्गस्य प्रतिबन्धकत्वात् परमानन्दस्वभावतायाः प्रतिपत्तिर्न भवति। यदाऽविद्याया विनिवृत्तिः,तदा परमानन्दस्वभावतायाः स्वरूपेणाऽभिव्यक्तिर्भवति,यथा रज्ज्वादिद्रव्यस्याविद्यातस्तत्त्वाग्रहणा-ऽन्यथाग्रहणाभ्यां स्वरूपं न प्रकाशते,किन्तु सर्पादिस्वरूपं प्रकाशते । अविद्याया निवृत्तौ तु तस्य स्वरूपं प्रकाशत एव । एवं ब्रह्मणोऽप्यनाद्यविद्यासंसर्गात् तत्त्वाग्रहणाऽन्यथाग्रहणाभ्याम् आनन्दस्वभावता न प्रकाशते, मुमुक्षुप्रयत्नेन तु यदाऽनाद्यविद्या विनिवर्तते, तदाऽऽनन्दस्वरूपप्रतिपत्तिर्भवति, सैव मोक्षः। दृश्यते च श्रुतिः–"**आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते** ।"इति। न चेह श्रुतौ 'ब्रह्मणः' इत्यस्य षष्ठ्यन्तत्वेन षष्ठ्या ज्ञाप्यते ब्रह्मणा सह भेदः, न त्वभेद इति वाच्यम् , 'राहोः शिरः' इत्यादिवदभेदेऽपि षष्ठीदर्शनात् ।

ननु नित्यसुखस्यात्माऽभिन्नत्वेनात्मनश्चाऽनुभूयमानत्वेन नित्यसुखस्य सदैवानुभवः प्रसज्येत, सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमादिति चेत् ,सत्यम् ,सुखमनुभूयत एव । न च तर्ह्यहं जानामीत्यनुव्यवसायवद् अहं सुखमित्यपि प्रत्ययः कुतो न भवति ? इति वाच्यम् , यतोऽविद्यादोषात् भ्रमादेवा-ऽनुभूयमानस्याऽपि सुखस्य सुखत्वेना-ऽननुभवनात् सुखवत्त्वेन वा दुःखवत्त्वेन वा प्रतीतेः , यथा भ्रमदशायां विशेष्यत्वेनाऽनुभूयमानाया अपि रज्ज्वा रज्जुत्वेना–ऽननुभवनात् सर्पत्वेन प्रतीतेः, योगाभ्यासेनाऽविद्यानिवृत्तितो-ऽपगते भ्रमे स्वरूपलाभात् सुखत्वेना-ऽनुभवो भवत्येव ।

प्रमाणश्चात्रा-ऽऽत्मा सुखस्वभावः, अत्यन्तप्रियबुद्धिविषयत्वात् , अनन्यपरतयोपादीयमानत्वाच्च, वैषयिकसुखवत् । यद् यद् एवंविधम् , तत् तत् सुखस्वभावम् , यथा वैषयिकं सुखम् , तथा चा-ऽऽत्मा, तस्मात् सुखस्वभाव आत्मा । न चा-ऽत्यन्तप्रियबुद्धिविषयत्वमसिद्धम् , सर्वजनैः स्त्री-धन-पुत्रादिसर्वपदार्थेभ्य आत्मनोऽत्यन्तप्रियत्वस्या-ऽनुभवात् । उक्तञ्च "[2]**बृहदारण्यके– "तदेतत्प्रेयः पुत्रात्प्रेयः, अन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा**···**आत्मानमेव प्रियमुपासीत ।**" इति । एवं **सर्ववेदान्तसिद्धान्तसंग्रहेऽप्युक्तम्**–

**"आत्मनः सुखरूपत्वादानन्दत्वं स्वलक्षणम् ।**
**परप्रेमास्पदत्वेन सुखरूपत्वमात्मनः ॥१॥**
**सुखहेतुषु सर्वेषां प्रीतिः सावधिरीक्ष्यते ।**
**कदापि नाऽवधिः प्रीतेः स्वात्मनि प्राणिनां क्वचित् ॥२॥**
**आत्मा-ऽतः परमप्रेमास्पदः सर्वशरीरिणाम् ।**
**यस्य शेषतया सर्वमुपादेयत्वमृच्छति ॥ ३ ॥**
**एष एव प्रियतमः पुत्रादपि धनादपि ।**
**अन्यस्मादपि सर्वस्मादात्माऽयं परमान्तरः ॥ ४ ॥**" इति

(१) बृहदारण्यके ३–९–२८ । (२) १–४–८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्यपरतयोपादीयमानत्वहेतुरपि नाऽसिद्धः, तथाहि–लोके स्त्रीपुत्रधनादिकमप्यात्मार्थमुपादीयते, आत्मा तु नाऽन्यार्थमुपादीयते । उक्तं च **सर्ववेदान्तसिद्धान्तसंग्रहेऽपि**—

**"प्रवृत्तिश्च निवृत्तिश्च यच्च यावच्च चेष्टितम् ।**
**आत्मार्थमेव ना-ऽन्यार्थं नातः प्रियतमं(मः)परः ॥१॥"** इति ।

तथाऽऽत्मा सुखस्वभावः, मुख्यप्रेयोबुद्धिविषयत्वाद् निरुपचरितप्रेयशब्दवाच्यत्वाद्वा, रागिणां वैषयिकसुखवत् ।

तथा मुमुक्षुप्रवृत्तिरिष्टार्थप्राप्त्यर्था, प्रेक्षापूर्वकारिप्रवृत्तित्वात् , कृषीवलादिप्रेक्षापूर्वकारिप्रवृत्तिवत् । एवञ्च शास्त्रीय उपदेश इष्टार्थप्राप्त्यर्थः, उपदेशत्वात् , अन्योपदेशवत् । प्रतिपादितं चैतत् **वात्स्यायनभाष्येऽपि "नोभयमनर्थकम्"** । ( अ० १ आ० १ सू० २२ ) इति मोक्षसुखा-ऽनभ्युपगमे तु तत्प्रवृत्त्युपदेशयोर्वैफल्यप्रसङ्गः ।

निरतिशयत्वञ्च सुखस्यानुमानतोऽपि सिद्धम् । तद्यथा–सुखतारतम्यं क्वचिद्विश्रान्तम् , तारतम्यशब्दवाच्यत्वात् , परिमाणतारतम्यवदिति । एवंविधैरनुमानैः सुखस्वभावताप्रतीतिः ।

**अत्र प्रतिविधीयते**–यत् तावत् **"विज्ञानमानन्दं ब्रह्मे"**त्याद्यागमवचनेनोक्तानुमानैश्चात्मनः सुखस्वभावत्वं प्रतिपाद्यते,तत्सुखं किमनित्यं समस्ति ? उत नित्यम् ? न तावत् प्रथमपक्षः, आत्मनस्तत्स्वभावत्वेन तस्या-ऽप्यनित्यत्वप्रसङ्गात् ।

अथ नित्यमिति चेत् , तत्र विकल्पद्वयमवतरति--नित्यसुखमात्मस्वरूपं किं स्वप्रकाशकम् ? उत तद्भिन्नप्रमाणान्तरप्रमेयम् ? न तावत् प्रथमविकल्पः, आत्मस्वरूपवत् स्वप्रकाशसुखानुभवस्यैव सदैव सत्त्वेन मुक्तसंसारिणोरविशेषप्रसङ्गात् । न चा-ऽनाद्यविद्यया-ऽऽच्छादितत्वात् स्वप्रकाशा-ऽऽनन्दसंवेदनं संसारिणां न भवति, योगाभ्यासेन त्वनाद्यविद्यानिवृत्तौ आच्छादकाभावात् स्वप्रकाशा-ऽऽनन्दसंवित्तिर्जायत एव । उक्तं च--**सिद्धान्तबिन्दावपि--"यद्यपि संसारदशायामविद्यावृतस्वभावत्वादात्मा परमानन्दरूपतया न प्रथते** (प्रकाशते), **तथापि तत्त्वविद्यया-ऽविद्यानिवृत्तौ स्वप्रकाशतया स्वयमेव परमानन्दस्वरूपतया प्रकाशते ।"**इति वाच्यम् , यत आच्छाद्यतेऽप्रकाशस्वभावं वस्तु, स्वप्रकाशं तु केनाच्छाद्यते । ननु सविता तत्प्रकाशश्च स्वप्रकाशः, आच्छाद्यते च मेघादिना, ततः कुत उच्यते–स्वप्रकाशं तु केना-ऽऽच्छाद्यते ? इति चेत् , उच्यते-नहि मेघादिना स्वप्रकाशः सविता तत्प्रकाशो वा-ऽऽव्रियते, आवृतत्वे हि दिवसरजन्योरविशेषः स्यात् , दृश्यते च विशेषः, तस्माद् न स्वप्रकाशो केनाचिदाव्रियते ।

अस्तु वा मेघादिना स्वप्रकाशस्य सवितुस्तत्प्रकाशस्य चा-ऽऽवरणम् , तयोर्व्यतिरिक्तत्वाद् मेघादेः, अविद्यायास्तु तुच्छरूपत्वात् न तस्या आवृत्तिलक्षणाऽर्थक्रियाकारित्वम् , यत् तुच्छ-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

रूपम् , न तद् अर्थक्रियाकारि, यथा मृगतृष्णिकाजलम् , तुच्छरूपा चा-ऽविद्या भवद्भिरिष्टा। तस्माद् न तया-ऽऽव्रियते सुखम् । उक्तश्चा-ऽन्यत्रा-ऽपि—

**"मेघा अपि रवेरन्ये स्वरूपेण च वास्तवाः ।**
**तत्त्वान्यत्वाद्यचिन्तया तु ना-ऽविद्या-ऽऽवरणक्षमा ॥१॥" इति ।**

नाऽपि द्वितीयविकल्पः, प्रत्यक्षादिप्रमाणबाधितत्वात् । तथाहि— न तावत् प्रत्यक्षप्रमाणेन मोक्षे नित्यसुखं व्यवस्थाप्यते, अस्मदादीन्द्रियजन्यप्रत्यक्षस्य तत्र व्यापाराभावात् ,योगिप्रत्यक्षं त्वेवं प्रवर्तते, उता-ऽन्यथेत्यद्यापि विवादास्पदम् ।

नापि नित्यसुखं व्यवस्थापयितुमुपन्यस्तानुमानप्रमाणानि समर्थानि,तेषां प्रतिविधास्यमानत्वात् ।

**"विज्ञानमानन्दं ब्रह्म"** इत्याद्यागमो-ऽपि न नित्यसुखं साधयितुमलम् , तस्यैव प्रामाण्या-ऽसम्भवात् । गुणवद्वक्तृणामेव वचनस्य हि प्रामाण्यम् , भवता तु स्वागमोऽपौरुषेयोऽभ्युपगम्यते । न चा-ऽपौरुषेयत्वेनैव प्रामाण्यमिति वाच्यम् , अपौरुषेयत्वस्य निर्युक्तिकत्वात् । तथाहि-वचनं खलु वक्त्रोच्चार्यमाणमेव । अथ वचनञ्च, अवक्तृकं चेति माता मे वन्ध्येतिवत् कथं न व्याहतम् ?

अस्तु वाऽऽगमस्य प्रामाण्यम् , किन्त्वसा आगमोऽन्यथाऽपि व्याख्यातुं शक्यते, अत्यन्तदुःखाभावे गौणार्थे सुखशब्दवृत्तित्वाऽभ्युपगमात् । तथाहि—लोके न केवलं मुख्य एव शब्दानां प्रयोगः, किन्तु गौणेऽपि । यथा ज्वरभारादिसंतप्ता जना ज्वराद्यपगमे सुखिनो वयं जाताः, तथा काष्ठादिपरिहारे सुखिनो वयं सम्पन्नाः । अभिहितश्च **न्यायवात्स्यायनभाष्ये-ऽपि—**
**"आत्यन्तिके च संसारदुःखाभावे सुखवचनाद् आगमेऽपि सत्यविरोधः । यद्यपि कश्चिदागमः स्याद् मुक्तस्यात्यन्तिकं सुखमिति । सुखशब्द आत्यन्तिके दुःखाभावे प्रयुक्त इत्येवमुपपद्यते। दृष्टो हि दुःखादेरभावे सुखशब्दप्रयोगो बहुलं लोके ।" इति । एवं श्रीव्योमाचार्यैरप्युक्तम्—"मुख्ये हि बाधकोपपत्तेः गौण इति । तथाहि—दुःखाभावेऽयमानन्दशब्दः प्रयुक्तो दृष्टः, सुखशब्दो दुःखाभावे, यथा भाराक्रान्तस्य वाहिकस्य तदपाय इति ।"**

एवमन्यत्रा-ऽप्युक्तम्—

**"चिरज्वरशिरोर्त्यादिव्याधिदुःखेन खेदिताः ।**
**सुखिनो वयमद्येति तदपाये प्रयुञ्जते ॥१॥" इति ।**

तथैव　**"तृषाशुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि,**
**क्षुधार्तः सन् शालीन् कवलयति शाकादिवलितान् ।**
**प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं,**
**प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः ॥१॥" इति ।**

तदेवं मुक्तात्मनि सुखं नैकान्तेनानित्यम् ,नाप्येकान्तेन नित्यम् ,किन्तु नित्यानित्यमेव । द्रव्यतो

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

नित्यं पर्यायतश्चाऽनित्यं सुखमात्मनि स्वीक्रियते स्याद्वादिभिः। ननु सुखस्य नित्यानित्यत्वे आत्मनस्तत्स्वभावत्वेन तस्याऽपि तथात्वप्रसङ्ग इति चेत् ,सत्यमेतत् ,किन्त्विष्टापत्तिरेषा, आत्मनस्तथात्वात् । आत्मन एकान्तनित्यत्वाभ्युपगमे तु वैषयिकभोगादेरप्यनुपपत्तिर्दर्शयिष्यते[1] ।

न च द्रव्यतः सुखस्य नित्यत्वे कथितयोर्द्वयोर्नित्यत्वपक्षसंभविनो[2] विकल्पयोरन्यतरस्याऽभ्युपगमे कथं न दोषप्रसक्तिः ? इति वाच्यम् ,यतः प्रथमविकल्पस्याऽभ्युपगमे कर्मणामावारकत्वेनाऽभिमतत्वाद् दोषाभावः। द्वितीयविकल्पस्त्वनभ्युपगममात्रादेव निरस्तः। अयम्भावः– प्रथमविकल्पे **नैयायिकादिभिर्भट्टसर्वज्ञादीन्** प्रत्येवा-ऽऽवारका-ऽविद्यायास्तुच्छत्वं वक्तुं शक्यते, **स्याद्वादिभिस्तु** ज्ञानावरणादिकर्मणामावारकत्वेनाऽभ्युपगमः,तानि च कर्माणि सुखत आत्मतश्चाऽर्थान्तराणि,ततश्च युज्यते तेषामावारकत्वं मेघादिवत्। द्वितीयविकल्पस्त्वनभ्युपगममात्रादेव निरस्तः।

अथ **नैयायिकादयः** शङ्कन्ते–ननु मोक्षावस्थायां नित्यानित्यसुखाभ्युपगमे तद्रागेण प्रवृत्तौ मोक्षाभावः प्रसज्यते, रागस्य बन्धहेतुत्वाद् । निरानन्ददुःखनिवृत्तेरभ्युपगमे तु रागाभावात् स्यादेव मोक्षः। न च निरानन्दनिर्विज्ञानमोक्षाऽभ्युपगमे प्रेक्षावतां तत्र प्रवृत्तिर्न स्यात् , तथाहि– ते सोपाधिक-सावधिक-परिमिता-ऽऽनन्दनिष्यन्दात् निर्विण्णाः स्वर्गादप्यधिकमनवधिकनिरतिशयनैसर्गिकानन्दतज्ज्ञानरूपप्रधानप्रयोजनपूर्त्यर्थमेव प्रवर्तन्ते। यदि च मोक्षावस्थायां न सुखं न च ज्ञानम् , तदाऽऽत्मा जडः पाषाणनिर्विशेष एव भवेत् , एवञ्च ते निर्णयेयुः––कृतमपवर्गेण, संसार एव वरमस्तु । यत्र तावदन्तराऽन्तरा दुःखकलुषितमपि कियदपि सुखमनुभुज्यते । चिन्तनीयं तावदिदम्–किमल्पसुखानुभवो भव्यः ? उत सर्वसुखोच्छेदः ? इति सुखरूपप्रयोजनविरहात् प्रेक्षावतां मोक्षे प्रवृत्तिरनुपपन्नेति वाच्यम्–यतो न प्रयोजनाऽनुवर्ति प्रमाणं भवितुमर्हति, यदि केभ्यश्चिद् निरानन्दो मोक्षो न रोचते, कामं मा रोचताम् , न त्वप्रमाणक आनन्दस्तत्र कल्पयितुं योग्यः। अपि च प्रेक्षावन्तो लाभातिरेककाङ्क्षिणः। ते खलु एवं विचारयन्ति-दुःखसंस्पर्शशून्यशाश्वतिकसुखसंभोगाऽसंभवाद् दुःखस्य चा-ऽवश्यहातव्यत्वादनयोः सुखदुःखयोरेकभाजनपतितविषमधुनोर्मधूत्पन्नसुखकणिकापेक्षविषप्रयोज्यतीव्रतरमरणादिदुःखजनकयोरिव विवेकहानस्य दुःशक्यत्वाद् उभेऽपि सुखदुःखे त्यज्येतामिति संसाराद् मोक्षः श्रेयान् , यतस्तत्र दुःखं सर्वथा न स्यात्। वरमियती कादाचित्की सुखकणिका परित्यक्ता, न तत्कृते दुःखभार इयान् व्यूढः। ततश्च स्थितमेतद्–निरानन्दमोक्षेऽपि न प्रेक्षावतां प्रवृत्तिर्विरुध्यत इति, सुखात्मकमोक्षाभ्युपगमे तु तद्रागेण तत्र प्रवृत्तौ कुतो मोक्षः ? इति ।

अत्रोच्यते-यो हि सांसारिकसुखविषयरागः, स एव रागो बन्धनात्मकः, तस्य वित्ताऽर्जनरक्षणादिप्रवृत्तिद्वारेण संसारहेतुत्वात् । अनन्ते च सुखे यद्यपि रागः, तथापि नासौ बन्धना-

(१) पृ० ५२५ पं० २७ (२) पृ० ५२७ पं० १७

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

त्मकः, इन्द्रियविषयार्जनादिनिवृत्तिहेतुत्वात् । स्पृहामात्रोऽप्यसावसज्ज्ञानुष्ठाने सति परां कोटिमारूढस्य निवर्तते,यदुक्तम्—"**मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः** ।" इति ।

अपि च न्यायमतेन दुःखनिवृत्त्यात्मकमोक्षे-ऽङ्गीकृते-ऽपि दुःखविषयकद्वेषेण मोक्षे प्रयतमानस्य मुमुक्षोर्मोक्षाभावः प्रसज्यते, रागवद् द्वेषस्यापि बन्धहेतुत्वात् ।

ननु रागद्वेषौ हि संसारकारणमित्यवबोधति मुमुक्षुः, ततश्च स कथं दुःखद्वेषं कुर्यात् ? द्वेषं विनैव तस्य मोक्षार्थप्रवृत्तिर्भवतीत्यर्थः । भवतु वा मोक्षस्य दुःखनिवृत्तिरूपत्वाद् दुःखनिवृत्तेश्च दुःखद्वेषमूलकत्वेन द्वेष आवश्यकः, तथापि न स बन्धहेतुः । द्वेषो हि स बन्धहेतुः, य उत्पन्नः सन् स्वविषये मनोवाक्कायैः शास्त्रविरुद्धां प्रवृत्तिं कारयति, शास्त्रविरुद्धार्थाचरणे चाऽधर्माद्युत्पत्तिद्वारेण शरीरादिग्रहणम्, तन्निबन्धनसुखदुःखे जायेते । अयं तु मुमुक्षोर्विषयेषु द्वेषः सकलप्रवृत्तिविरोधित्वाद् धर्माधर्माऽनुत्पत्तौ शरीराद्यभावप्रयोजकत्वाद् न केवलं बन्धनिरोधाय, किन्तु स्वात्मघाताय प्रवर्तत इति चेत्, न, यतो मोक्षसुखार्थकरणेऽपि समानमेव ।

[1]यच्चोक्तं "**दुःखसंस्पर्शशून्यशाश्वतिकसुखसम्भोगाऽसम्भवादि**"त्यत्र शाश्वतिकं नाम किमनाद्यनिधनम्? यद्वा-ऽऽदिमदपि प्रध्वंसवदपर्यवसानं सुखं विवक्षितम्? तत्र प्रथमविकल्पे तादृशसुखं तावत् प्रेक्षावतामुपादित्सागोचरो न भवति, नित्यसिद्धत्वेन विषयसिद्धेस्तदिच्छाप्रतिबन्धकत्वात् । द्वितीयविकल्पे दुःखसंस्पर्शशून्यं तादृशं सुखं संभवत्येव, आत्मनो मूलभूतस्वाभाविकसुखाऽभावे संसारावस्थायां सुखाभासस्यानुपपत्तेः । अपर्यवसानं च तत् विनाशकारणाभावात् । तस्य विनाशकारणं हि वेदनीयादिकर्म, विनाशश्चात्र तिरोभावो बोध्यः, वेदनीयादिकर्म च समूलकाषं कषितम्, मिथ्यात्वा-ऽविरति-कषाय-योगलक्षणानां च कर्मोत्पत्तिकारणानामभावाद् न पुनरपि कर्मनिर्मितिः । न च सादित्वाऽभ्युपगमे तदुत्पादककारणमावश्यकम्, इह तु कारणाभावः, तेन तादृशसुखोत्पत्तिरनुपपन्नेति वाच्यम्, सादित्वस्यात्राविर्भावरूपत्वात्, स्वाभाविकसुखस्य च तस्य सकलकर्मोपरमप्रयोज्यत्वात् ।

[2]यदपि"**सुखदुःखयोश्चैकभाजनपतितविषमधुनोर्मधूत्पन्नसुखकणिकापेक्षविषप्रयोज्यतीव्रतरमरणादिदुःखजनकयोरिव विवेकहानस्य दुःशक्यत्वाद् उभेऽपि सुखदुःखे त्यज्येता**"मित्युक्तम्, तदप्यसारम्, वैषयिकसुखस्य तादृशत्वात् । वैषयिकं सुखं हि मधुदिग्धधाराकरालमण्डलाग्रग्रासवद् दुःखरूपं भवति, अतो युक्ता मुमुक्षूणां तज्जिहासा, किन्तु सा-ऽऽत्यन्तिकसुखलिप्सूनामेव मुमुक्षूणां सम्भवति, न तु दुःखाभावकाङ्क्षिणाम् । येऽपि विषमधुनी एकत्र पात्रे संपृक्ते परित्यज्येते, तेऽपि जीवनादिसुखलिप्सयैव ।

किञ्च प्राणिनां संसारावस्थायां दुःखनिवृत्तेरिष्टत्वे-ऽपि सुखनिवृत्तिरनिष्टा, तथैव मोक्षा-

(१) पृ० ५२९ पं० २१ । (२) पृ० ५२९ पं० २२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्थायामपि दुःखनिवृत्तेरिष्टत्वे-ऽपि सुखनिवृत्तिरनिष्टा। ततो यदि त्वदभिमतो मोक्षः केवल-दुःखाभावरूपः स्यात्, तदा न प्रेक्षावतामिह प्रवृत्तिः स्यात्, सुखहानेरनिष्टत्वादनिष्टे चा-ऽप्रवृत्तेः।

न च यथा रागान्धतया पारदार्ये भाविनरकादिदुःखा-ऽनुबन्धित्वं न वेद्यते, तथा सुख-हानेरनिष्टत्वं विरागिभिर्न वेद्यते, ततश्च प्रवृत्तेरव्याघात इति वाच्यम्, वैषयिकसुखेऽनिष्टत्वप्रतिसन्धा-नेऽपि मुमुक्षूणां प्रशमप्रभवसुखेऽनिष्टत्वा-ऽप्रतिसन्धानात्। न च मोक्षावस्थायां दुःखाभाव एव परमसुखम्, न तद्व्यतिरिक्तम्, दुःखाभावेऽपि सुखशब्दप्रयोगादिति वाच्यम्, यतो-ऽदुःखितस्य भवदभिप्रायेण दुःखाभावात्मकसुखवतो-ऽपि जीवस्य विशिष्टमधुरशब्दादिविषयोपभोगेन सुखाति-शयस्यानुभविकत्वेन दुःखाभावे सुखत्वापादनं निर्युक्तिकम्। तथाहि—यत्राऽपि क्षुत्पिपासापीडितस्य जनस्या-ऽन्नपानादिप्राप्तौ तृप्तौ सत्यां क्षुत्पिपासादिदुःखं निवर्तते, तत्रापि शष्कुल्याद्यन्नविशेषा-ऽऽम्लमधुरादिपानविशेषैः सुखविशेषो जायत एव, दृश्यते च लौकिकानां जनानां सुखार्थमन्नपाना-दिविशेषोपादानम्। न चोचिता दृष्टविपरीतकल्पना। तथा सुखस्य भावरूपत्वाद् युज्यते तत्रा-ऽन्नपानादिविशेषसामग्र्याऽतिशया-ऽऽधानम्, दुःखाभावस्य तु तुच्छत्वेन न युज्यते तत्रा-ऽतिश-याधानम्।

**येऽपि प्राहुः**—यदापि पूर्वं दुःखं नास्ति, तदा-ऽप्यभिलाषस्य दुःखस्वभावत्वात् तन्निवर्ह-णस्वभावं सुखमिति, तेऽपि न सम्यक् प्रतिपन्नाः। तथाहि—अभिलाषाख्यदुःखनिवृत्तिरेव सुख-मिति तेषां मतमेवंरूपम्—यस्यैव यत्रा-ऽभिलाषः, स एव तद्विषयोपभोगेन सुखी, नान्य इति विषया अभिलाषं निवर्त्य तमेव सुखयन्ति। अन्यथा यदेकस्य सुखसाधनम्, तत् सर्वेषामप्य-विशेषेण स्यात्। न च तथा भवति। यदुक्तम्—

**"एकस्य विषयो यः स्यात् स्वाभिप्रायेण पुष्टिकृत्।**
**अन्यस्य द्वेष्यतामेति स एव मतिभेदतः ॥१॥" इति।**

एवमेकपुरुषे-ऽपि यदा कामनिवृत्त्या सुखित्वम्, तदापि यस्यैव विषयस्याभिलाषो निवृत्तः, स एव तस्य सुखसाधनम्, नान्यो विषयः। तस्मादभिलाषनिवृत्तिरेव सुखमिति। तदसङ्गतम्, निरभि-लाषस्यापि जनस्य विषयविशेषोपभोगे सति विशेषाह्लादोत्पत्तेर्दर्शनात्। न च तत्राऽकामस्या-ऽपि जीवस्य विशिष्टविषयसम्पर्केण कामा-ऽभिव्यक्तौ जातायां विषयोपभोगद्वारेण तन्निवृत्तिरेव सुखमिति वाच्यम्, यतो नाऽवश्यं विषयोपभोगोऽभिलाषनिवर्हणः। उक्तञ्च **महाभारते**—

**न जातु कामः कामानामुपभोगेन शाम्यति।**
**हविषा कृष्णवर्त्मेव भूय एवा-ऽभिवर्धते ॥**

**श्रीपतञ्जलिनाप्युक्तम्— "भोगाभ्यासमनुवर्धन्ते रागाः कौशलानि चेन्द्रियाणाम्।" इति।**

**पाराशर्यो-ऽप्याह—**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृष्णाखनिरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥१॥ इति

किञ्चा-ऽभिलाषनिवृत्तिरन्यथाऽपि=विषयेषु दोषदर्शनादितोऽपि सम्भवति । विषयेषु दोषाश्चेत्थं द्रष्टव्याः—

असौ तरलताराक्षी पीनोत्तुङ्गघनस्तनी ।
विलुप्यमाना कान्तारे विहगैरद्य दृश्यते ॥१॥
विभाति बहिरेवास्याः पद्मगन्धनिभं वपुः ।
अन्तर्मज्जास्थिविण्मूत्रमेदः कृमिकुलाकुलम् ॥२॥
अस्थीनि पित्तमुच्चाराः क्लिन्नान्यन्त्राणि शोणितम् ।
इति चर्मपिनद्धं सत्कामिनीति विधीयते ॥३॥
मेदोग्रन्थी स्तनौ नाम तौ स्वर्णकलशौ कथम् ।
विष्ठाहतौ नितम्बे च कोऽयं हेमशिलाभ्रमः ॥४॥
मूत्रासृग्द्वारमशुचि च्छिद्रं क्लेदि जुगुप्सितम् ।
तदेव हि रतिस्थानमहो पुंसां विडम्बना ॥५॥
प्रीतिर्यथा निजास्योत्थं लिहतः शोणितं शुनः ।
शुष्केऽस्थनि तथा पुंसः स्वधातुस्पन्दिनः स्त्रियाम् ॥६॥
व्यात्तानना विवृत्ताक्षी विवर्णा श्वासघुर्घुरा ।
कथमद्य न रागाय म्रियमाणा तपस्विनी ॥७॥
अहो व्रणे वराकोऽयमकाले तृषितः फणी ।
प्रसारितमुखोऽप्यास्ते शोणितं पातुमागतः ॥८॥
किमनेनापराद्धं नः स्वभावो वस्तुनः स्वयम् ।
स्पृश्यमानो दहत्यग्निरिति कोऽस्मै प्रकुप्यति ॥९॥
नानुकूलः प्रिये हेतुः प्रतिकूलो न विप्रिये ।
स्वकर्मफलमश्नामि कः सुहृत्कश्च मे रिपुः ॥१०॥" इति ।

विषयदोषदर्शनप्रयुक्ताभिलाषनिवृत्तिसुखं तु विषयोपभोगाधीनाभिलाषनिवृत्तिसुखापेक्षया-ऽतिविशिष्टतरम् । किन्तु भवन्मते तत्कथं संघटेत् ? यतो भवन्मतमनुसृत्य विषयेषु दोषदर्शनेन जायमानं सुखं विषयोपभोगोत्पन्नसुखेन तुल्यं स्यात् , सुखत्वेनभिमताभिलाषनिवृत्तेरभावरूपाया अविशेषात् । न चैकत्रा-ऽभिलाषातिरेकात् तन्निवृत्तौ सुखातिरेकाभिमानः, अन्यत्रा-ऽन्यथेति वाच्यम् , यतोऽभिलाषातिरेकेण प्रयस्यन्तं प्राप्तोऽर्थो न तथा प्रीणयति, यथाऽप्रार्थितः प्रयासाद्विनोपनतः । लोकव्यवहारोऽप्येवमेव, यत्नसहस्रेण प्राप्तः क्लेशप्राप्तोऽयमिति, न तेन तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखिनः, यथाऽप्रार्थितप्राप्तेन । तन्न दुःखाभावमात्रं सुखं वक्तुं युज्यते नाप्यभिलाषनिवृत्तिमात्रम्, किन्तु तद्व्यतिरेकेण स्वरूपतः सुखमस्तीति, तदेवं सिद्धो मोक्ष आनन्दस्वरूपः, तद्रागेण च तत्र प्रवृत्तिर्न बन्धाय कल्पते, वैषयिकसुखरागविरहात् ।

ननु नैयायिकमते दुःखेन निर्विण्णस्य मुमुक्षोरिच्छाविच्छेदाद् वैराग्यमपि जायते, ततश्च मोक्षः । परमानन्दलिप्सूनां स्याद्वादिनां मतेन तु मुमुक्षोरिच्छावत्त्वाद् वैराग्यव्याहतिः स्यात्, ततः कुतस्तेषां मोक्षः ? इति चेत्, न, दुःखद्वेषे सति प्रशान्तत्वव्याघातप्रसङ्गेन मोक्षाभावप्रसक्तेः । अयं भावः–न केवलं विरक्तानामेव मोक्षेऽधिकारः, किन्तु प्रशान्तानामपि । यथा सुखेच्छावत्त्वाद् मुमुक्षोर्वैराग्यव्याघातप्रसङ्ग उपपाद्यते, तथैव दुःखद्वेषमन्तरेण न मुमुक्षोर्दुःखनाशानुकूलः प्रयत्न इति द्वेषराहित्यलक्षणप्रशान्तत्वस्य व्याघातः प्रसज्यते । ततश्च प्रशान्तत्वव्याहत्या कुतो मोक्षः ? एतेन यत्तु **योगर्द्धिसाध्यनिरतिशयानन्दमयीं जीवन्मुक्तिमुद्दिश्य प्रवृत्तः कारणवशात् परममुक्तिमासादयतीति न युक्तम्, विरक्तानां मोक्षेऽधिकारादिति** तदपि निरस्तम् ।

किञ्च नेच्छाविच्छेदसामान्यं वैराग्यपदार्थः, येन निरतिशयानन्दलिप्सूनां वैराग्यहान्या मोक्षो न स्यात्, किन्तु वैषयिकसुखेच्छाविच्छेदस्य वैराग्यपदार्थत्वम् । यदि इच्छाविच्छेदसामान्यस्य वैराग्यपदार्थत्वम्, तदा नैयायिकानां मतेन चरमदुःखध्वंसरूपमुक्त्यामिच्छया प्रवृत्तिर्न स्यात् । किन्तु दुःखद्वेषादेव दुःखध्वंसानुकूलप्रयत्नः स्यात् । न च दुःखद्वेषाद् दुःखनाशानुकूलप्रयत्नो भवत्येवेति वाच्यम्, मूर्च्छा-मरणादौ प्रवृत्तिप्रसङ्गात् । न च जायत एव बहुतरदुःखजर्जरकलेवराणां मरणादौ प्रवृत्तिरिति वाच्यम्, तस्या अविवेकप्रवृत्तित्वात् । ननु पुरुषार्थत्वे विवेकाऽनुपयोग इति चेत्, सत्यमेव, पशुकल्पानां जनानां न विवेकोपयोगः, न तु प्रेक्षावताम्, प्रेक्षावन्तो हि यथावत् प्रयोजनं प्रमायैव प्रवर्तन्ते । तदुक्तम्–

**"दुःखाभावोऽपि नाऽवेद्यः पुरुषार्थतयेष्यते ।**
**न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः ॥१॥"** इति ।

अथ पुनर्नैयायिकादयः शङ्कन्ते–अस्तु कुतश्चिद् मोक्षे नित्यसुखम्, तस्य संवेदनं किं नित्यमस्ति, ? उताऽनित्यम् ? नित्यमिति चेत्, मुक्त-संसारिणोरविशेषप्रसङ्गः, सुख-तत्संवेदनयोरुभयोरपि नित्यत्वेन संसारावस्थायामपि तत्सत्त्वात् । अपि चेन्द्रियजन्यसुखेन नित्यसुखस्य साहचर्याऽनुभवप्रसङ्गाद् नित्याऽनित्यसुखद्वयोपलम्भः स्यात्, इन्द्रियजन्यदुःखेन च साहचर्याऽनुभवप्रसङ्गाद् सुख-दुःखयोर्युगपद् ग्रहणं स्यात्, नित्यसुखस्य सदैव सत्त्वात् । यदुक्तं न्यायवात्स्यायनभाष्ये–**"सुखवन्नित्यमिति चेत्, संसारस्थस्य मुक्तेनाऽविशेषः, यथा मुक्तः सुखेन तत्संवेदनेन च सन्नित्येनोपपन्नस्तथा संसारस्थोऽपि प्रसज्यत इति, उभयस्य नित्यत्वात् । अभ्यनुज्ञाने च धर्माधर्मफलेन साहचर्यं यौगपद्यं गृह्येत । यदिदमुत्पत्तिस्थानेषु धर्माधर्मफलं सुखं दुःखं वा संवेद्यते पर्यायेण, तस्य च नित्यसंवेदनस्य च सह-**

**भावो योगपद्यं गृह्येत, न सुखाभावो ना-ऽनभिव्यक्तिरस्ति, उभयस्य नित्यत्वात् ।" इति ।**

अथ वदेत् संसारावस्थायां नित्यसुखसंवेदनस्य प्रतिबद्धत्वाद् न मुक्तसंसारिणोरविशेषप्रसङ्गः, नवा सुखद्वयोपलम्भः, नाऽपि सुखदुःखयोर्युगपद्ग्रहणमिति चेत् , न, नित्यसुखनित्यसंवेदनं केन प्रतिबध्यते ? (१)किं शरीरादिना ?(२) अथवा वैषयिकसुखानुभवेन ?(३) उताऽविद्यया ? उतस्विद् बाह्यव्यासङ्गेन ?

(१) न तावत् प्रथमविकल्पः, शरीरादेर्भोगार्थत्वाद् भोगस्य च सुखदुःखसंवेदनादिरूपत्वाद् न तेन प्रतिबध्यते, न हि यद् यदर्थम् , तत् तस्यैव प्रतिबन्धकः । यदाहुर्न्यायवात्स्यायनभाष्यकाराः **"शरीरादिसम्बन्धः प्रतिबन्धहेतुरिति चेत् , न,शरीरादीनामुपभोगार्थत्वात् विपर्ययस्य चाऽननुमानात् । स्यान्मतम् , संसारावस्थस्य शरीरादिसम्बन्धो नित्यसुखसंवेदनहेतोः प्रतिबन्धकः, तेनाऽविशेषो नास्तीति, एतच्चाऽयुक्तम् , शरीरादय उपभोगार्थाः , ते भोगप्रतिबन्धं करिष्यन्तीत्यनुपपन्नम् ।" इति** । शरीरादेः सुखप्रतिबन्धकत्वाभ्युपगमे तु शरीरादिघातकस्य हिंसाफलं न स्यात् , लोके प्रतिबन्धकविघातकस्योपकारित्वेन प्रसिद्धेः ।

(२) अथ वैषयिकसुखा-ऽनुभवेनेत्यपि न युक्तम् , यतः सुखसंवेदनस्याऽनुत्पत्तिलक्षणो विनाशलक्षणो वा प्रतिबन्धो भवितुमर्हति, किन्तु न प्रकृतेऽन्यतरलक्षणः प्रतिबन्धः संभवति, सुख-तत्संवेदनयोरुभयोरपि नित्यत्वस्वीकारात् ।

(३) ना-ऽपि तृतीयविकल्पः,अविद्यायास्तुच्छत्वेन सुखज्ञानप्रतिबन्धलक्षणार्थक्रियाकारित्वविरहात् ।

(४) नाऽपि तुर्यो विकल्पः, यतो व्यासङ्गो नाम आत्मनो रूपादिविषयज्ञानोत्पत्तौ विषयान्तरे ज्ञाना-ऽनुत्पत्तिः, अथवेन्द्रियस्यैकस्मिन् विषये ज्ञानजनकत्वेन प्रवृत्तस्य विषयान्तरे ज्ञानाऽजनकत्वम् । न चा-ऽनयोरन्यतरो व्यासङ्गो युज्यते, सुखस्य तत्संवेदनस्य चोभयोर्नित्यत्वाऽभ्युपगमात् ।

तदेवं नित्यसुखसंवेदनस्य नित्यत्वे दुष्परिहार्या दोषाः ।

अथाऽस्तु नित्यसुखसंवेदनमनित्यमिति चेत् , तर्हि मोक्षावस्थायां तदुत्पत्तिकारणं वक्तव्यम् , अनित्यस्याऽनुत्पत्तिधर्मकत्वाऽनुपपत्तेः । न च योगजधर्मापेक्ष आत्ममनःसंयोगोऽसमवायिकारणमिति वाच्यम् , मुक्तौ योगजधर्मस्या-ऽसम्भवात् ।

अथाद्यं संवेदनं योगजधर्मादुत्पद्यते , तत उत्तरोत्तरं विज्ञानं पूर्वपूर्वत उत्पद्यत इत्यप्यसारम् , प्रमाणा-ऽभावात् । तथाहि–न हि शरीरसम्बन्धानपेक्षं किञ्चिदपि विज्ञानं ज्ञानोत्पत्तौ सहकारिकारणम् , शरीरसम्बन्धाऽपेक्षस्यैव ज्ञानस्य ज्ञानान्तरोत्पत्तिं प्रति सहकारित्वदर्शनात् ।

न च मुक्तौ नित्यशरीरादीनां कल्पनया-ऽनित्यसंवेदनोपपत्तिः स्यादिति वाच्यम् , यतः शरीरादीनां कार्यत्वेन न नित्यत्वम् , प्रमाणबाधितत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असदेतत् सर्वम् , अस्मदभिप्राया-ऽपरिज्ञानेन प्रलपितत्वात् , न हि स्याद्वादिभिरेकान्तेन नित्यं सुखसंवेदनं स्वीक्रियते, ना-ऽप्येकान्ततोऽनित्यम् , किन्तु सुखवद् नित्यानित्यमभ्युपगम्यते, अतो न कश्चन दोषः ।

द्रव्यतो नित्यं पर्यायतश्चा-ऽनित्यं सुखज्ञानादिकमात्मनि स्वीकुर्वतां स्याद्वादिनामयं विवेकः—सङ्ग्रहनयानुसारेण आत्मनः सुखज्ञानादिस्वभावः सेन्द्रियशरीराद्यपेक्षाकारणरूपावरणेन प्रच्छाद्यते गृहा-ऽवस्थितप्रकाश्यपदार्थप्रकाशकत्वस्वभावः प्रदीप इव तदावारकशरावादिना, सेन्द्रियशरीराद्यपेक्षाकारणरूपा-ऽऽवरणापगमे तु जीवस्य विशिष्टप्रकाश्यपदार्थप्रकाशकत्वस्वभावो–ऽयत्नसिद्धः,शरावाद्यपगमे प्रदीपस्येवेति । अत एव कथञ्चिद् नित्यत्वपक्षे न दोषः ।

न च शरीराद्यपेक्षाकारणविरहाद् मुक्तौ सुखज्ञानादिकं न सम्भवतीति वाच्यम् , यत आवृतसुखज्ञानादिकं प्रत्येव शरीरादीनां कारणता, न त्वनावृतसुखज्ञानादिकं प्रति । ततश्च मुक्तौ न सुखज्ञानादिकं विरुध्यते । यदि सेन्द्रियशरीरादिरूपाणामावारकाणामभावात् सुखज्ञानादीनामभावः प्रेर्यते, तर्हि तुल्ययुक्त्या प्रदीपावारकाणां शरावादीनामभावे प्रदीपोच्छेदप्रसङ्गः । ननु शरावादीनां प्रदीपं प्रति न जनकत्वमिति न शरावाद्यभावे प्रदीपस्याऽभावः, सुखज्ञानादिकं प्रति तु शरीरादीनां जनकत्वमिति स्यादेव शरीराद्यभावे सुखज्ञानाद्यभाव इति चेत्, उच्यते—यद्यपि शरावादीनां प्रदीपं प्रति न जनकता , तथाप्यावृतप्रदीपपरिणतिं प्रति न केनचित् निवारयितुं शक्या, यदि वा-ऽऽवृतप्रदीपपरिणतिं प्रति शरावादीनां जनकत्वं न स्यात् , तदा शरावादीनामावारकत्वमपि न भवेत् । तस्मात् प्रदीपं प्रति शरावादीनां जनकत्वविरहेऽप्यावृतप्रदीपपरिणतिं प्रति जनकताऽस्ति, एवं प्रकृतेऽप्यावृतसुखज्ञानादिकं प्रति शरीरादीनां कारणत्वमस्त्येव, न त्वनावृतसुखज्ञानादिकं प्रति । ततश्च न काचिदनुपपत्तिरिति । अपि चोपलभ्यते संसारावस्थायामपि वासीचन्दनकल्पानां समवृत्तीनां विशिष्टध्याना-ऽवस्थितानां सेन्द्रियशरीरादिव्यापाराऽजन्यः परमाह्लादरूपोऽनुभवः, तस्यैव भावनावशादुत्तरोत्तरावस्थामासादयतः परमकाष्ठागतिः संभाव्यत एव ।

ऋजुसूत्रादिनयानुसारेण त्वात्मनः स्वरूपभूतानन्दज्ञानादिस्वरूपता मोक्षावस्थायामुत्पद्यत एव, शुद्धनयैरुत्तरोत्तरविशुद्धपर्यायमात्राभ्युपगमाद् ,सुखज्ञानादीनां क्षणस्वरूपतायाः क्षणसत्तयाऽपि सिद्धेः, तस्याः क्षणतादात्म्यनियतत्वात् ,क्षणस्वरूपे तथादर्शनात् । यद्येकान्तनित्यस्या-ऽप्रच्युतानुत्पन्नस्थिरैकस्वभावता आत्मनो-ऽभ्युपगम्यते, तर्हि तस्य वैषयिकसुखदुःखोपभोगोऽपि नोपपद्यते, आत्मनि तादृशोपभोगस्वरूपस्य प्राक्तना ऽभोगस्वरूपतो भिन्नत्वात् । स च स्वरूपभेदोऽप्रच्युतानुत्पन्नस्थिरैकस्वभावात्मनि कथं सङ्गच्छेत ? एकस्वभावस्याऽन्यस्वभावस्वीकारेण स्वस्वभावपरित्यागप्रसक्तेः , सुखज्ञानादिकं चोत्तरसुखज्ञानाद्युत्पादनस्वभावम् , यच्च यदा यत्स्वभावम् , तत् तदा तदुत्पादने ना-ऽन्यापेक्षम् , यथाऽन्त्या बीजादिकारणसामग्र्यङ्कुरोत्पादने । तदुपाद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नस्वभावश्च पूर्वसुखज्ञानादिक्षणः । अत एव कथञ्चिदनित्यत्वपक्षे न कश्चिद् दोषः । न च संसारावस्थायां चरमज्ञानादिक्षणस्योत्तरसुखज्ञानाद्युत्पादनस्वभावता-ऽसिद्धेति वाच्यम् , यतोऽजनकत्वेन तस्याऽर्थक्रियाकारित्वविरहादवस्तुत्वापत्तेस्तज्जनकस्य द्विचरमसुखज्ञानादिक्षणस्या-ऽवस्तुत्वम् , ततश्च तज्जनकस्य त्रिचरमसुखज्ञानादिक्षणस्येत्येवं निखिलसन्तानस्या-ऽवस्तुत्वप्रसङ्गः ।

**"कृतश्चायं विवेको मुक्तिद्वात्रिंशिकायामपि—**

**ऋजुसूत्रादिभिर्ज्ञानसुखादिकपरम्परा ।**
**व्यङ्ग्यमावरणोच्छित्त्या सङ्ग्रहेणेष्यते सुखम् ॥ १ ॥" इति ।**

व्यवहारनयानुसारेण तु प्रयत्नसाध्यः कर्मक्षयो मोक्षः । कर्मक्षयश्चाऽस्मिन् ग्रन्थे विस्तरेण दर्शित एव ।

यच्चा-ऽनन्यत्वेन श्रुतौ श्रवणम् "**विज्ञानमानन्दं ब्रह्म**" इति । तदपि नास्मदभ्युपगमबाधकम् , समस्तज्ञेयव्यापिनो ज्ञानस्या-ऽवैषयिकस्य चा-ऽऽनन्दस्य स्वसंवेदितस्य मोक्षावस्थायां सकलकर्मरहितात्मस्वरूपब्रह्मा-ऽभेदेन कथञ्चिदभीष्टत्वात् ।

[1]यच्चोक्तम् "**मुमुक्षुप्रयत्नेन तु यदाऽनाद्यविद्या विनिवर्तते, तदा-ऽऽनन्दस्वरूपप्रतिपत्तिर्भवति, सैव मोक्षः**" इत्यभिहितम् , तत्तु युक्तमेव, अष्टविधपारमार्थिककर्मप्रवाहरूपाऽनाद्यविद्याविलयेना-ऽनन्तसुखज्ञानादिस्वरूपप्रतिपत्तिलक्षणमोक्षप्राप्तेरिष्टत्वात् । नवरं कर्मप्रवाहरूपा-ऽनाद्यविद्या परिणामिनी पौद्गलिकी आत्मतो व्यतिरिक्ता वस्तुस्वरूपा प्रतिपत्तव्या, न तु तुच्छरूपा । या च "**आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते**।" इति श्रुतिर्दर्शिता , साऽपि नाऽस्मत्पक्षबाधिका, अभिव्यक्तेः स्वसंविदिता-ऽऽनन्दस्वरूपतया तदवस्थायामात्मन उत्पत्तेरभ्युपगमात् ।

[3]ये पुनरेकान्तनित्यसुखसिद्ध्यर्थमनुमानप्रयोगाः प्रदर्शिताः, ते तु न युक्ताः, हेतोरनैकान्तिकत्वादिदोषा-ऽऽक्रान्तत्वात् । तथाहि—आत्मा सुखस्वभावः, अत्यन्तप्रियबुद्धिविषयत्वात् , अनन्यपरतयोपादीयमानत्वाच्चेत्यत्र अत्यन्तप्रियबुद्धिविषयत्वमनन्यपरतयोपादीयमानत्वञ्च यत्साधनमुपन्यस्तम् , तदनैकान्तिकम् , दुःखाभावेऽपि तस्य सद्भावात् ।

अत्यन्तप्रियबुद्धिविषयत्वञ्चा-ऽसिद्धम् , दुःखितायामप्रियबुद्धेरपि सद्भावात् ।

अनन्यपरतयोपादीयमानत्वमप्यसिद्धम् , सुखाद्यर्थमुपादानात् ।

एतेन [4]यदपि "**आत्मा सुखस्वभावः, वस्तुत्वे सति मुख्यप्रेयोबुद्धिविषयत्वाद् निरुपचरितप्रेयोबुद्धिविषयत्वाद्वा**" इत्युक्तम् , तदपि प्रत्युक्तम् , प्रागुक्ताशेषदोषानुषङ्गात् । मुख्यप्रेयोबुद्धिविषयत्वं निरुपचरितप्रेयः शब्दवाच्यत्वञ्चाऽसिद्धम् , दुःखितायां तदभावात् ।

विरुद्धञ्च हेतुद्वयम् , सुखस्वभावत्वविपरीताया दुःखाभावस्वभावताया एवा-ऽस्मात् सिद्धेः, तथाहि—अयमात्मा दुःखाभावस्वभावः, वस्तुत्वे सति मुख्यप्रेयोबुद्धिविषयत्वाद् निरुपचरितप्रेयःशब्दवाच्यत्वाद्वा रागिणां वैषयिकदुःखाभाववदिति ।

(१) पृ० ५२६ पं० ७ (२) पृ० ५२६ पं० ८। (३) पृ० ५२६—५२७ (४) पृ० ५२६ पं० १८।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]यदभिहितम्—"**मुमुक्षुप्रवृत्तिरिष्टार्थप्राप्त्यर्था, प्रेक्षापूर्वकारिप्रवृत्तित्वात्**" इत्यादि, तदप्यपेशलम्, प्रवृत्त्युपदेशयोरन्यथासिद्धत्वात्। भवेत् साध्यसिद्धिः, यदि प्रेक्षावतां प्रवृत्त्युपदेशयोरिष्टार्थप्राप्त्यर्थत्वं भवेत्, तयोस्त्वन्यथाऽपि दर्शनाद् न प्रकृतसाध्यसाधकत्वम्। तथाहि—न हि प्रेक्षावतां केवलं प्रवृत्त्युपदेशयोरिष्टप्राप्त्यर्थत्वम्, अपि त्वातुराणां चिकित्साशास्त्रार्था—ऽनुष्ठायिनामनिष्टप्रतिषेधाया-ऽपि प्रवृत्त्युपदेशौ दृश्येते, अतः कथमिष्टप्राप्त्यर्थता प्रवृत्त्युपदेशलक्षणहेतुद्वयेन सिद्ध्यति?

किञ्चा—ऽत्रेष्टशब्देन किमभिप्रेतप्रयोजनमभिधीयते? उत सुखम्? यदि प्रथमपक्षः, तर्हि कथमात्मनः सुखस्वभावत्वं सिध्येत्? साङ्ख्यादिमान्या—ऽपवर्गसिद्धिप्रसङ्गश्च, अन्यमताऽनुयायिनां साङ्ख्यादीनामपि मुमुक्षूणां प्रवृत्त्युपदेशयोस्तदिष्टाऽपवर्गलक्षणप्रयोजनसाधकत्वात्। न च प्रवृत्तेः प्रेक्षावत्त्वविशेषणोपादानाद् न साङ्ख्यादिमान्या-ऽपवर्गसिद्धिप्रसङ्ग इति वाच्यम्, प्रेक्षावदप्रेक्षावतोर्विवेकस्याऽशक्यत्वात्। तद्यथा-न हि भवन्मतानुयायिनः प्रेक्षावन्तो न सांख्यमतानुसारिण इति विवेकः कर्तुं शक्यः, प्रमाणबाधितैकान्तनित्यत्वादिस्वभावाङ्गीकारेण सर्वेषामप्यप्रेक्षावत्त्वसिद्धेः।

अथेष्टशब्देन सुखमभिधीयते, तर्हि साध्यविकलं दृष्टान्तम्, न हि कृषीवलादीनां कृष्यादिप्रवृत्तिः सुखार्था भवति, धान्यादिफलनिष्पत्त्यर्थत्वात्तस्याः।

[2]यच्च "**सुखतारतम्यं क्वचिद्विश्रान्तम्, तारतम्यशब्दवाच्यत्वा**"दित्युक्तम्, तदप्युक्तिमात्रम्, परत्वादिना व्यभिचारात्, परापरादिबुद्धिप्रकर्षसमधिगतो हि परत्वादिप्रकर्षस्तारतम्यवाच्यो न क्वचिद् विश्राम्यति।

किञ्च दुःखेऽप्येवं परमप्रकर्षः प्रसज्यते। तथाहि—दुःखतारतम्यं क्वचिद् विश्रान्तम्, तारतम्यशब्दवाच्यत्वात्, परिमाणतारतम्यवत्। न च दुःखपरमप्रकर्षो भवद्भिरपीष्ट इति दुःखपरमप्रकर्षेणापि व्यभिचारः।

साध्यतां वोक्तानुमानैर्मोक्षावस्थायां सुखम्, तत्र नित्यानित्यसुखस्य सत्त्वात्। न त्वेकान्तनित्यसुखम्, तस्य प्रमाणबाधितत्वात्।

**(इति तौतातिताभिमतमोक्षस्वरूपस्य प्रतिविधानम्।)**

ये पुनर्वेदान्तिन आहुः—अविद्यायां निवृत्तायां विज्ञानसुखात्मकः केवल आत्मा मोक्ष इति, ते-ऽपि निरस्ताः, ज्ञानसुखात्मकब्रह्मणो नित्यत्वे मुक्तसंसारिणोरविशेषापातात्, तादृशा-ऽऽत्मनश्च कृतिसाध्यत्वविरहात्। न च ज्ञानसुखात्मकब्रह्मणो नित्यत्वेन साध्यत्वविरहे-ऽप्यविद्यानिवृत्तिः कृतिसाध्येति वाच्यम्, अविद्याया असत्त्वेन नित्यनिवृत्तत्वात्, अनिर्वचनीयतायाश्चा-ऽनिर्वचनीयत्वात्। एतदुक्तं

(१) पृ० ५२७ पं० ८। (२) पृ० ५२७ पं० १२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति-अविद्या किं सद्रूपा स्वीक्रियते ? उता-ऽसद्रूपा ? न तावत् प्रथमपक्षः, ब्रह्मण इव तस्या अपि निवृत्तेरसम्भवात् ,तन्निवृत्त्यभ्युपगमे चा-ऽविशेषेण ब्रह्मणो-ऽपि निवृत्तिप्रसङ्गात् । यदि चा-ऽसत्त्वरूपा, तदा सा नित्यनिवृत्ता, न तन्निवृत्तिः कृतिसाध्या । नन्वविद्या न सद्रूपा, ना-ऽसद्रूपा, किन्त्वनिर्वचनीयेति चेत् , नैवम् , यया-ऽनिर्वचनीयतया-ऽविद्या तत्कार्याणि चा-ऽनिर्वचनीयानि भण्यन्ते, सा निर्वचनीया न वा ? प्रथमपक्षे सत्त्वेन निर्वचनीया चेत् , तर्ह्यद्वैतभङ्गः, ब्रह्मभिन्नायास्तस्या अपि सत्त्वोपगमात् । असत्त्वेन चेत् , तर्हि कथं तया खरविषाण-कल्पया-ऽविद्यया उपरञ्जनम् ?

अथाऽनिर्वचनीयता-ऽप्यनिर्वचनीयेति द्वितीयपक्षः समाश्रियते, तदा-ऽनिर्वचनीयताया निर्वक्तुमशक्यत्वेन स्वरूपतो-ऽपहारः ।

(इति वेदान्तिस्वीकृतमोक्षस्वरूपस्य प्रतिविधानम् ।)

**त्रिदण्डिनस्त्वाहुः**—आनन्दमयपरमात्मनि जीवात्मलयो मोक्ष इति । तत्र यदि परमात्मनि जीवात्मलयो नाम घ्राण-रसन-चक्षुः-श्रोत्र-स्पर्शाख्य-पञ्चज्ञानेन्द्रिय-वाक्पाणि-पाद-पायूपस्थ-लक्षणपञ्चकर्मेन्द्रिय-मनः--शब्द-स्पर्श-रूप--रस--गन्धतन्मात्रावस्थित--पृथिव्यप्-तेजो--वाय्वाकाशरूप-पञ्चभूतात्मकलिङ्गशरीरा-ऽपगमेन जीवात्मनः परमात्मत्वावाप्तिः, तर्हि सिद्धान्त एव, नामकर्म-क्षयेण **स्याद्वादिभिरपि** तत्स्वीकारात् । अथ यदि लयो नामोपाधिशरीरनाश औपाधिकजीवस्य नाश इति चेत् , न, जीवनाशस्य सर्वैः प्रेक्षावद्भिरकाम्यत्वेन तादृशमोक्षस्य पुरुषार्थत्वं न स्यात् । केषाञ्चिद् दुःखजर्जरितानां जीवनाशः काम्यत्वेन दृश्यत इति तु प्रेक्षावतां पर्षदि वक्तुं न युज्यते, अविवेकिनां तथाप्रवृत्तेः ।

किञ्च परमात्मनि परमब्रह्मस्फुल्लिङ्गकल्पजीवात्मलयो मोक्ष इत्यभ्युपगमे परमात्मन उपचय-प्रसङ्गः स्यात् , घृतादौ घृतान्तरप्रवेशवत् , अपि चोपचये सैव ब्रह्मसत्तेति वक्तुं न शक्यते, सत्तान्तरस्वीकारे च भवत्सिद्धान्तपरित्यागापत्तेः ।

(इति त्रिदण्डिमतानुयायिमोक्षस्वरूपखण्डनम् ।)

**सौगतास्तु** प्राहुः– निरुपप्लवा चित्तसन्ततिर्मोक्ष इति । उक्तञ्च

**चित्तमेव संसारो रागादिक्लेशवासितम् ।**
**तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते ॥१॥**" इति ।

अयं भावः–ज्ञानक्षणप्रवाहव्यतिरिक्तस्या-ऽऽत्मनोऽसम्भवात् कस्या-ऽनन्तज्ञानसुखादिस्व-भावत्वं संभवति ? मुक्तिस्त्वात्मदर्शिनो न भवत्येव, यतो य आत्मानं स्थिरत्वादिस्वरूपं पश्यति, तस्यात्मनि स्थिरत्वादिगुणदर्शनेन स्नेहो भवति, स्नेहाच्च सुखादिषु तृष्णाशीलः सन् सुखादिषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्साधनेषु च दोषानुपेक्ष्य शुचित्वादिगुणानारोपयति । गुणांश्च पश्यन् 'ममेद'मित्याद्यध्यवस्यन् सुखसाधनान्युपादत्ते, ततो यावदात्मदर्शनम्, तावत् संसार एव । यदुक्तं **प्रमाणवार्त्तिके श्रीधर्मकीर्त्तिना**–

**यः पश्यत्यात्मानं तत्राऽस्याहमिति शाश्वतः स्नेहः ॥ (१–२१९)**
**स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते ।**
**गुणदर्शी परितृष्यन् ममेति सुखसाधनान्युपादत्ते ॥ (१–२२०)**
**तेना-ऽऽत्माभिनिवेशो यावत् तावत् स संसारे ।**
**आत्मनि सति परसंज्ञा स्वपरविभागात् परिग्रहद्वेषौ ॥ (१–२२१)**
**अनयोः सम्प्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ।" इति ।**

तथा च तदीया **श्रीमनोरथनन्दिकृता वृत्तिः–"यः पश्यत्यात्मानं तत्राऽऽत्मनोऽस्य द्रष्टुरहमिति शाश्वतो-ऽनपायी स्नेहो भवति । स्नेहाद्=आत्मस्नेहात्सुखेषु तृष्यति=तृष्णावान् भवतीति, तृष्णा च सुखसाधनत्वेनाऽध्यवसितानां वस्तूनां दोषानशुचित्वादीन् तिरस्कुरुते=प्रच्छादयति दोषतिरस्करणात् । गुणदर्शी=शुचित्वेनेष्टगुणान् पश्यन् परितृष्यन् ममेति='ममेदं सुख'मिति गर्द्धमानस्तस्य=सुखस्य साधनानि गर्भगमनादीन्युपादत्ते । तेना-ऽऽत्मदर्शनमूलत्वेन जन्मादेरात्माभिनिवेश यावत्तावत् स=आत्मदर्शी संसार एव । न केवलं जन्मप्रबन्धस्तस्य दोषा अपि समस्ताः सन्तीत्याह–आत्मनि सति ततो-ऽन्यस्मिन् परसंज्ञा=परबुद्धिर्भवति। स्वपरविभागाच्च कारणात् स्वपरयोर्यथाक्रमं परिग्रहो-ऽभिष्वङ्गो द्वेषः=परित्यागस्तौ भवतः । अनयोरनुनयप्रतिषेधयोः सम्प्रतिबद्धाः सर्वे दोषा=रागमात्सर्येर्ष्यादयः प्रजायन्ते ।" इति ।**

नैरात्म्यभावनातस्तु निरुपप्लवचित्सन्ततिलक्षणो मोक्षो जायत एव ।

नन्ववच्छेदकतादिसम्बन्धेन ज्ञानं प्रति तादात्म्यादिना शरीरादेः कारणत्वाद् मुक्त्यवस्थायां शरीरादिनिमित्तकारणविरहे ज्ञानस्य सम्भव एव नास्तीति कुतश्चित्सन्ततेः सम्भवः ? इति चेत् मैवम्, यतो न ज्ञानं प्रति **नैयायिकादिवत्** शरीरादीनां कारणत्वमभ्युपगम्यते, किन्तु पूर्वपूर्वविज्ञानक्षणानामेवोत्तरोत्तरविज्ञानक्षणं प्रति कारणत्वम् । न च सुषुप्तौ ज्ञाना-ऽभावेन तदुत्तरं कारणविरहाद् ज्ञानसन्ततिर्व्यवच्छिद्येतेति वाच्यम्, तत्राऽपि ज्ञानस्य सत्त्वात् । न च सुषुप्तावस्थायां ज्ञानसद्भावे जाग्रदवस्थातो विशेषो न स्यात्, उभयत्राऽपि स्वसंवेद्यज्ञानस्य सद्भावा-ऽविशेषादिति वाच्यम्, यतः सुषुप्तौ [१]मिद्धेना-ऽभिभूतत्वं ज्ञानस्या-ऽस्ति, अतो विशेषोऽस्त्युभयोरवस्थयोः । न च तथा-ऽप्यभिभूतज्ञानक्षणतो रागद्वेषकलुषितज्ञानक्षणतश्च क्रमेण कथमनभिभूतज्ञानक्षणस्य रागद्वेषविनिर्मुक्तज्ञानक्षणस्य चोत्पत्तिः स्याद् ? इति वाच्यम्, पूर्वपूर्वज्ञानक्षणानां तत्तदतिशयवत्त्वेना-

(१) अतिजाड्येनातिनिद्रया वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽविशिष्टादपि विशिष्टोत्पत्तेः स्वीकारात् । ततश्चा-ऽविशिष्टात् सुषुप्तज्ञानक्षणतः सोपप्लवज्ञानक्षणतश्च क्रमेण विशिष्टं जाग्रज्ज्ञानं निरुपप्लवज्ञानं चोत्पद्यते ।

न च नैरात्म्यदर्शनभावनामुपगच्छतां सौगतानां निरन्वयविनश्वरचित्तसन्ततौ 'बद्धोऽहं मोक्ष्यामी'त्यादिकमुद्दिश्य यत्नो न स्यादिति वाच्यम्, अध्यवसायानुसारेणाऽपि यत्नात् ।

एतदुक्तं भवति—न केवलं यथावस्त्वेव यत्नः, अपि तु यथाऽध्यवसायमपि । यथा रज्जुमपि सर्पत्वेनाऽध्यवस्यतस्तत्परित्यागः, तथैव बद्धोऽहं मोक्ष्यामीत्यादिव्यापारः स्यादेव । तथाहि—निरन्वयचित्तसन्तत्यामुत्तरोत्तरक्षणानामत्यन्तनानात्वेऽपि दृढतरैकत्वाध्यारोपेणा-ऽऽत्माभिसन्धानात् तस्य मिथ्याऽध्यारोपस्य व्यवच्छेदार्थमसत्यपि निरंशादिस्वभावे मोक्तर्यात्मनि नैरात्म्याभ्यासस्वरूपो यत्नः कर्त्तव्यः । यदुक्तं **प्रमाणवार्तिके—**

**मिथ्याध्यारोपहानार्थं यत्नो-ऽसत्यपि मोक्तरि ॥**(१।१९४)

नैरात्म्यभावनालक्षणयत्नविरहे त्वात्माभिसन्धाना-ऽनिवृत्तेरिन्द्रियादिषूपभोगकारणत्वेन गृहीतेष्विन्द्रियादिष्वात्मीयबुद्धेर्निवारयितुमशक्यत्वात् स्नेहसद्भावेन वैराग्यस्याऽसम्भवात् कुतो मोक्षः ? यदुक्तं **प्रमाणवार्तिके—**

**उपभोगाश्रयत्वेन गृहीतेष्विन्द्रियादिषु ।**
**स्वत्वधीः केन वार्येत वैराग्यं तत्र तत्कुतः ॥१॥** (१।२२९।)

नन्विन्द्रियादिषु नोपभोगाश्रयत्वबुद्धिनिबन्धनस्वत्वबुद्धित आत्मीयस्नेहो जायते, येनाऽयं दोषो भवेत्, किन्तु तत्र गुणदर्शनत आत्मीयस्नेहः प्रभवति,अतस्तद्विरुद्धे दोषदर्शने स्नेहनिवृत्तितो वैराग्यमुपपद्यते । इन्द्रियादिषु च दोषदर्शनं स्वयमेव भाव्यम् । एवं वैराग्योपपत्तेर्मुक्तिरप्युपपन्नेति चेत्, न, यत उपभोगाश्रयत्वबुद्धिनिबन्धनस्वत्वबुद्धित एव स्नेहस्याऽऽविर्भावोऽभ्युपगन्तव्यः । यथा-ऽऽत्मीयचक्षुरादिषु काणत्वादिदोषदर्शने-ऽपि स्नेहस्याविर्भावः, परकीयेषु चक्षुरादिषु गुणदर्शनेऽपि स्नेहाभावः । आत्मीयेष्वप्यतीतेषु स्वदेहच्युतेषु चाऽङ्गावयवेषु गुणदर्शनेऽप्यात्मीयबुद्धिपरित्यागाद् न स्नेहो भवति । तस्मादुपभोगाश्रयत्वबुद्धिनिबन्धनस्वत्वबुद्धितः स्नेहो भवति । ततश्च वैराग्यव्याहतिः, तद्व्याहतेश्च कुतो मोक्षः ?

न च तद्भावनाऽभावेऽपि कायक्लेशलक्षणतपसः सकलकर्मप्रक्षयाद् मोक्षो भविष्यति, किं नैरात्म्यभावनया ? इति वाच्यम्, यतः कायक्लेशस्य कर्मफलत्वेन नारकादिकायसन्तापवत् तपस्त्वमनुपपन्नम् । किञ्च विचित्रशक्तिकं कर्म भवति,अन्यथा विचित्रसुखदुःखप्रदानाद्यनुपपत्तिः स्यात् । तच्च कथमेकस्मात् कायक्लेशमात्रात् क्षयं गच्छेत्, अतिप्रसङ्गात् ? यदुक्तं **प्रमाणवार्त्तिके—**

**फलवैचित्र्यदृष्टेश्च शक्तिभेदो-ऽनुमीयते ।**
**कर्मणां तापसंक्लेशात् नैकरूपात् ततः क्षयः ॥**"(२–२७५) इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च तपः कर्मशक्तीनां संकरेण क्षयकरणशीलमिति कृत्वैकरूपादपि तपसो विचित्रशक्तिकानां कर्मणां क्षय इति वाच्यम्, एवमभ्युपगमे स्वल्पक्लेशेनैवैकोपवासादिना-ऽप्यशेषस्य कर्मणः क्षयापत्तिः, अन्यथा शक्तिसाङ्कर्या-ऽनुपपत्तिः, अन्यत्रा-ऽप्युक्तम्—

**कर्मक्षयाद्धिमोक्षः स च तपसस्तच्च कायसन्तापः ।**
**कर्मफलत्वान्नारकदुःखमिव कथं तपस्तत् स्यात् ॥१॥**
**अन्यदपि चैकरूपं तच्चित्रक्षयनिमित्तमिह न स्यात् ।**
**तच्छक्तिसंकरक्षयकारीत्यपि वचनमात्रं तु ॥२॥**
**अक्लेशात् स्तोकेऽपि क्षीणे सर्वक्षयप्रसङ्गो यत् ।''** इति ।

तस्माद् नैरात्म्यभावनाप्रकर्षविशेषतो निरुपप्लवा चित्तसन्ततिर्मोक्ष इति स्थितम् ।

**अथ प्रतिविधीयते—** '[1]यत् तावदुक्तम्–'ज्ञानक्षणप्रवाह०' इत्यादि, तदविचारिताऽभिधानम्, ज्ञानक्षणप्रवाहव्यतिरिक्तं मौक्तिककणनिकरानुस्यूतैकसूत्रकल्पमन्वयिद्रव्यमात्मानमन्तरेण कृतनाशा-ऽकृता-ऽऽगमादिदोषप्रसङ्गात् स्मरणाद्यनुपपत्तेश्च ।

एतदुक्तं भवति—बौद्धास्तावज्ज्ञानक्षणपरम्परामात्रमेवात्मानं मन्यन्ते, न तु मुक्ताफलजाता-ऽनुस्यूतैकसूत्रकल्पमेकमन्वयि द्रव्यम् । अतस्तन्मते पूर्वज्ञानक्षणेन यत् सदनुष्ठानम्, असदनुष्ठानं वा कृतम्, तत्फलं न भुङ्क्ते पूर्वज्ञानक्षणः, तस्य निरन्वयविनष्टत्वात् । उत्तरक्षणेन च फलोपभोगस्वीकारे-ऽकृताऽऽगमः, तेन स्वयं तादृशानुष्ठानाकरणे-ऽपि तत्फलस्योपभोगात् ।

अथ संसारभङ्गदोषः–पूर्वकर्मानुसारेणैव जन्मान्तरं भवति । पूर्वज्ञानक्षणानां तु निरन्वयविनाशाद् न तेषां कश्चिदप्यभिसम्बन्ध उत्तरज्ञानक्षणैः सह । अतः केनोपभुज्यते पूर्वकर्माणि जन्मान्तरे ? तदुपभोगाऽभावे च किं जन्मान्तरम् ? तदभावे च संसारविलोपापत्तिः ।

मोक्षभङ्गदोषः–अपुनर्भावेन कर्मबन्धनाद् विमुक्तिर्मोक्षपदार्थः, स च बौद्धमते न घटते, आत्मन एवा-ऽभावात् । तथाहि–बौद्धमते-ऽन्वयिद्रव्यमात्मैव नास्ति, ततश्च कः प्रेत्य सुखीभवनाय यतिष्यते । संसारी ज्ञानक्षणः कथमपरज्ञानक्षणसुखाय घटिष्यते, ? न हि दुःखी देवदत्तो यज्ञदत्तसुखाय चेष्टमानो दृष्टः, क्षणस्य तु दुःखं स्वरसविनाशित्वात् तेनैव सार्धं ध्वस्तम् । न च सन्तानेन पूर्वोत्तरक्षणेषु सुख-दुःखाद्युपपत्तिरिति वाच्यम्, सन्तानस्या-ऽवास्तवत्वात्, वास्तवत्वे तु संज्ञान्तरेणा-ऽऽत्मन एवा-ऽभ्युपगमप्रसङ्गात् ।

अथ स्मृत्यनुपपत्तिः,–पूर्वबुद्ध्यनुभूते-ऽर्थे नोत्तरबुद्धीनां स्मृतिः सम्भवति, ततो-ऽन्यत्वात्, सन्तानान्तरबुद्धिवत् । न ह्यन्यदृष्टो-ऽर्थो-ऽन्येन स्मर्यते, अन्यथैकेन दृष्टो-ऽर्थः सर्वैः स्मर्येत । स्मरणा-ऽभावे च कौतस्कुती प्रत्यभिज्ञाप्रसूतिः, तस्याः स्मरणाऽनुभवयोरुभयोः सतोरेव सम्भवात् ।

---

(१) पृ० ५३८ पं० २७

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

पदार्थदर्शनप्रबोधितप्राक्तनसंस्कारस्य हीन्द्रियव्यापारवतः प्रमातुः 'स एवा-ऽयमि'त्याकारेण प्रत्यभिज्ञा समुत्पद्यते।

ननु स्यादयं दोषः, यद्यविशेषेणा-ऽन्यदृष्टं परः स्मरतीत्युच्येता-ऽस्माभिः। अस्मत्कथनं त्वेवम्—स्मरणक्षणस्याऽनुभवकारिक्षणेन सह कार्यकारणभावस्वीकारात् स्मृतिरुपपद्यते। तत्रैकसन्तानपतितानां क्षणानां तदुत्पत्तिसम्बन्धेन सम्बद्धानां पूर्वोत्तरक्षणयोर्हेतुहेतुमद्भावो निर्विवादः। तथा चानुभूतविज्ञानक्षणस्य स्वसन्तानेऽनुभवात्मकस्मृतिबीजाधायकत्वम्। अतो ना-ऽनुपपत्तिः स्मरणस्य, कालान्तरे स्मृत्यात्मककार्योत्पत्तेः। तदुक्तं **बोधिचर्यावतारपञ्जिकायाम्—"कार्यकारणभावप्रतिनियमादेव स्मृत्यभावो-ऽपि निरस्तः। एकस्यानुगमात्मनो-ऽभावात् न स्मर्ता कश्चिदिह विद्यते, किं तर्हि? स्मरणमेव केवलमारोपवशात् स्मर्यमाणवस्तुविषयम्। न च अत्र स्मर्तुरभावेऽपि कश्चिद् व्याघातः। अनुभूते हि वस्तूनि विज्ञानसंताने स्मृतिबीजाऽऽधानात् कालान्तरेण संततिपरिपाकहेतोः नाम कार्यमुत्पद्यते।'** इति चेत्, न, यतस्तादृशान्यत्वस्याऽपरान्यत्वाऽविशेषात्, भवन्मते कारणस्य निरन्वयनाशाच्च कार्यस्येतरस्य च कारणेन सह समानरूपेणात्यन्तासम्बद्धत्वम्। फलतः कार्यवदितरस्यापि स्मरणत्वापत्तिः, इतरवद् वा कार्यस्याऽपि स्मरणत्वानुपपत्तिस्तदवस्थैव।

अपि चानुभवक्षणस्य निरन्वयनाशात् तत्सन्ताने स्मृतिबीजाधानानुपपत्तिरेव, अन्यथा तत्सन्तान—तदितरसन्तानयोरनुभवक्षणासम्बद्धत्वाविशेषेणेतरसन्ताने कथं स्मृतिबीजाधानस्य नापत्तिः?

अपि च कार्यकारणभावात् स्मृतिरित्यत्र न कश्चिद् वादिप्रतिवादिप्रसिद्धो दृष्टान्तो-ऽस्ति।

ननु यथा रक्तकर्पासबीजे उप्ते फलं रक्तवर्णं लभ्यते, तथैव यस्मिन् सन्ताने वासनाऽधिवसति, तत्रैव कर्मवासनायाः फलं भवति। यदुक्तम्—

**"यस्मिन्नेव हि संताने आहिता कर्मवासना।**
**फलं तत्रैव संधत्ते कर्पासे रक्तता यथा॥१॥"** इति।

तदेवं सन्तानेऽनुभव-स्मरणयोरैकाधिकरण्यमिति चेत्, न, यत एतत् सर्वमप्यसुन्दरम्, साधनदूषणयोरसम्भवात्। तद्यथा—अन्वयाद्यसम्भवाद् न साधनम्, नहि 'यत्र यत्र कार्यकारणभावः, तत्र तत्र स्मृतिः, कर्पासे रक्ततावदि'त्यन्वयः सम्भवति, ना-ऽपि 'यत्र यत्र स्मृत्यभावः, तत्र तत्र न कार्यकारणभावः' इति व्यतिरेकः।

'यत्र यत्रा-ऽन्यत्वम्, तत्र तत्र न स्मृतिरि'त्यत्र चासिद्ध्याद्यनुद्भावनाद् न दूषणम्। न हि 'ततो-ऽन्यत्वात्' इति हेतोः कर्पासे रक्ततावादित्यनेन कश्चिद् दोषः प्रतिपाद्यते, भवन्मते कर्पासस्याऽपि क्षणिकत्वेन कालभेदेन तस्या-ऽन्यत्वात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च यद्यन्यत्वे-ऽपि कार्यकारणभावात् स्मृतेरुत्पत्तिरिष्यते, तदा शिष्या-ऽऽचार्यादिबुद्धीनामपि कार्यकारणभावसद्भावेन स्मृत्यादिप्रसङ्गः, न चैकसन्तानत्वे सतीति विशेषणाद् नोक्तप्रसङ्ग इति वाच्यम्, भेदा-ऽभेदपक्षाभ्यां तस्योपेक्षणात्। तथाहि—क्षणपरम्परातस्तस्या-ऽभेदे हि क्षणपरम्परैव सः। तथा च सन्तान इति न किञ्चिदतिरिक्तमुक्तं स्यात्। भेदे तु किं पारमार्थिको-ऽपारमार्थिको वा-ऽसौ भेदः? अपारमार्थिकत्वेऽस्य तदेव दूषणम्, अकिञ्चित्करत्वात्।

पारमार्थिकत्वे किं स्थिरो वा क्षणिको वा? क्षणिकत्वे सन्तानिनिर्विशेषो-ऽयम्। स्थिरश्चेत्, आत्मैव संज्ञान्तरेण प्रतिपन्न इति।

एवं स्मृतिर्न घटतेऽन्वयिद्रव्या-ऽऽत्माभावे।

अपि च स्मृत्यभावे निहितप्रत्युन्मार्गणप्रत्यर्पणादिव्यवहाराणां लोपः स्यात्।

[1]यच्चोक्तं "**मुक्तिस्त्वात्मदर्शिनो न भवत्येव, यतो य आत्मानं स्थिरत्वादिरूपं पश्यति**" इत्यादि, तत् सत्यम्, किन्त्वज्ञो जनो यः स्वं स्थिरं मन्यमानो दुःखानुषक्तं च साधनं स्थिरसुखसाधनत्वेन पश्यन् स्नेहात् सांसारिकेषु सुखसाधनेषु प्रवर्तते, अपथ्यादौ मूर्खाऽऽतुरवत्, तस्यैव मुक्तिर्न भवति, यस्तु हिताहितविवेकज्ञोऽतात्त्विक-तादात्विकसुखसाधनं स्त्र्यादिकं परित्यज्यात्मस्नेहात् तात्त्विका-ऽऽत्यन्तिकसुखसाधने मोक्षमार्गे प्रवर्तते, पथ्यादिषु चतुरातुरवत्, तस्य मुक्तिर्निष्प्रत्यूहैव। उक्तश्च

"**तदात्वसुखसंज्ञेषु भावेष्वज्ञोऽनुरज्यते।**
**हितमेवानुरुध्यन्ते प्रपरीक्ष्य परीक्षकाः ॥१॥**" इति।

[2]यच्च "**पूर्वपूर्वविज्ञानक्षणानामेवोत्तरोत्तरविज्ञानक्षणं प्रति कारणत्व**"मित्युक्तम्, तदप्यन्वयिद्रव्यस्वीकृत्यैवोपपन्नम्, अन्वयिद्रव्याऽस्वीकारे तु बन्धमोक्षादिव्यवस्थाऽपि नोपपद्यते। निरन्वये हि चित्तसन्ताने-ऽन्यो बद्धः, अन्यश्च मुच्यत इत्यापद्यते। अथ सन्तानैक्याद् बद्धस्यैव मुक्तिः? इति चेत्, न, यतो यदि सन्तानोऽक्षणिकपरमार्थसन्, तदा-ऽऽत्मैव सन्तानशब्देन प्रोक्तः, अथ संवृत्तिसन्, तदा सन्तानस्य परमार्थासत्त्वाद् 'अन्यो बद्धोऽन्यश्च मुच्यते' इति तदवस्थम्। ततश्च बद्धस्य मुक्त्यर्थः प्रयासो न स्यात्।

[3]यच्च "**पूर्वपूर्वज्ञानक्षणानां तत्तदतिशयवत्त्वेन**" इत्याद्युक्तम्, तदपि कथमुपपद्येत, यद्यतिशया-ऽऽधायकत्वेना-ऽवस्थितमन्वयिद्रव्यं न स्वीक्रियेत? न च सन्ताना-ऽपेक्षया-ऽतिशयो युक्त इति वाच्यम्, तस्यैवा-ऽवास्तवत्वात्।

[4]यच्च "**निरन्वयचित्तसन्तत्यामुत्तरोत्तरक्षणानामत्यन्तनानात्वे-ऽपि दृढतरै-**

(१) पृ० ५३८ पं० २८ (२) पृ० ५३९ पं० २४ (३) पृ० ५३९ पं० ३० (४) पृ० ५४० पं० ८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कत्वाध्यारोपेणात्माभिसन्धानात्**" इत्याद्युक्तम्, तदपि वचनमात्रम्। एवमभ्युपगते कुतो नैरात्म्यदर्शनम्? अथा-ऽस्ति शास्त्रसंस्कारजमिति चेत्, तर्हि नैकत्वाध्यवसायो-ऽस्खलद्रूपः, ततः कुतो मुक्त्यर्थं प्रवृत्तिः? किञ्चा-ऽसति पूर्वोत्तरज्ञानक्षणव्यापकेऽन्वयिनि द्रव्य आत्मनि स्वसंविदितैकत्वप्रत्ययस्य प्रत्यक्षस्या-ऽनुपपत्तिः स्यात्। अथाऽसत्यप्यात्मन्यारोपितैकत्वविषयः प्रत्ययः प्रादुर्भविष्यतीति चेत्, न, यतः स्वात्मनि 'यत् सत्, तत् क्षणिक'मित्यनुमानात् क्षणिकत्वं निश्चिन्वतः समारोपितैकत्वविषयकविकल्पस्वरूपप्रत्ययस्य निवृत्तिप्रसङ्गः, निश्चया-ऽऽरोपमनसोर्विरोधात्। निवर्तत एवा-ऽऽरोपितैकत्वमिति चेत्, तर्हि [1]सहजस्या-[2]ऽऽभिसंस्कारिकस्य चात्मदर्शनस्या-ऽभावात् तदैव तन्मूलरागादिनिवृत्तितो मोक्षः स्यात्। न चायमेकत्वविषयः प्रत्ययः प्रतिसंख्यानेन निवर्त्तयितुमशक्यत्वान्मानसो विकल्पः। तथाहि—अनुमानबलात् क्षणिकत्वं विकल्पयतोऽपि नैकत्वप्रत्ययो निवर्तते, प्रत्यक्षबुद्धित्वात्। शक्यन्ते तु प्रतिसंख्यानेन निवारयितुं कल्पनाः, न पुनः प्रत्यक्षबुद्धयः। ततो यथा-ऽश्वं विकल्पयतो-ऽपि गोदर्शनाद् न गोप्रत्ययात्मको विकल्पः, तथा क्षणिकत्वं विकल्पयतोऽप्येकत्वदर्शनाद् नैकत्वप्रत्ययात्मकविकल्पः। न चा-ऽयं प्रत्ययो भ्रान्तः, भ्रान्तत्वे तु सकलस्या-ऽपि प्रत्ययपक्षस्य भ्रान्तत्वप्रसङ्गः, बाह्या-ऽभ्यन्तरेषु भावेष्वेकत्वग्राहकत्वेनैवा-ऽशेषप्रत्यक्षाणां प्रवृत्तिप्रतीतेः। ततश्च प्रत्यक्षस्याऽभ्रान्तत्वविशेषणं यदुक्तम्, तदसंभाव्येव स्यात्। तदेवमेकत्वग्राहिणः स्वसंवेदनप्रत्यक्षस्या-ऽभ्रान्तस्य कथञ्चिदेकत्वमन्तरेण नोपपत्तिः तेन नैकत्वाभावः।

किञ्चा-ऽनुभूयमानस्या-ऽप्येकत्वस्या-ऽनेकत्वेन सह विरोधाभ्युपगमे ग्राह्यग्राहकसंवित्तिलक्षणविरुद्धरूपत्रयाध्यासितज्ञानस्यैकत्वविरोधः स्यात्, एकनीलाद्यर्थक्षणस्या-ऽपि चैकदा स्वपरकार्यजनकत्वाजनकत्वलक्षणविरुद्धधर्मद्वया-ऽध्यासितस्यैकत्वविरोधः प्रसज्येत।

[3]यच्च "**नैरात्म्याभ्यासादिरूपो यत्नः कर्त्तव्यः**" इत्युक्तम्, तदपि न सङ्गतम्, नहि नैरात्म्या-ऽभ्यासोऽपि कालान्तरा-ऽवस्थाय्यनुसन्धातारं विनोपपद्यते।

तथा यो हि निगडादिभिर्बद्धः, तस्यैव मोक्षकारणपरिज्ञाना-ऽनुष्ठानाऽभिसन्धिव्यापारे सति मोक्ष इत्यैकाधिकरण्ये सत्येव बन्धमोक्षव्यवस्था लोके प्रसिद्धा। इह त्वन्यः क्षणो बद्धः, अन्यस्य च मुक्तिकारणपरिज्ञानम्, इतरस्य चा-ऽनुष्ठाना-ऽभिसन्धिव्यापारश्चेति वैयधिकरण्यात् सर्वमयुक्तम्।

किञ्च सर्वो-ऽपि प्रेक्षापूर्वकारी 'किञ्चिदिदमतो मम स्यात्' इत्यनुसन्धानेनैव प्रवर्तते। इह च कस्तथाविधो मार्गा-ऽभ्यासे प्रवर्त्तमानो 'मोक्षो मम स्यादि' त्यनुसन्दध्यात्— किं क्षणः? सन्तानो वा? न तावत् प्रथमपक्षः, तस्यैकक्षणस्थायित्वेन निर्विकल्पतया चैतावतो व्यापारान्

(१) ग्राम्यजनसम्बन्धिनः। (२) पण्डितजनसम्बन्धिनः। (३) पृ० ५४० पं० ९।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

कर्तुमसमर्थत्वात् । नाऽपि द्वैतीयिकः पक्षः, तस्य सन्तानिव्यतिरिक्तस्य सौगतैरनभ्युपगमात् ।

किञ्चैकान्ता-ऽनित्यत्वे वस्तुनोऽर्थक्रियाकारित्वविरहाद् नैरात्म्यभावना मिथ्यारूपैव । मिथ्याज्ञानस्य च न सौगतैरप्यभ्युपगम्यते निःश्रेयसहेतुत्वम् ।

किञ्च निरन्वयविनश्वरत्वाभ्युपगमे मोक्षार्थः प्रयासो व्यर्थ एव स्यात्, तथाहि- रागाद्युपरमो हि भवन्मते मोक्षः, तत्र यद्युपरमो नाम रागादिक्षणविनाशः, तदा स निर्हेतुकतया-ऽयत्नसिद्धः, तेन तदर्थो-ऽनुष्ठानादिप्रयासो व्यर्थ एव स्यात् ।

अथ रागाद्युपरमो नाम भाविरागादिक्षणस्या-ऽनुत्पादः, स च साध्यो-ऽनुष्ठानादिनेति न वैयर्थ्यमनुष्ठानादीनामिति चेत्, न, उत्पादाभावो ह्यनुत्पादः, तस्याप्यभावरूपत्वात् कथमनुष्ठानादिनोत्पत्तिः ? एतेन सन्तानोच्छेदस्तदनुत्पादो वा मोक्ष इत्यपि प्रत्युक्तम्, क्षणोच्छेदा-ऽनुत्पादवत् सन्तानोच्छेदा-ऽनुत्पादयोरप्यभावरूपत्वेन कुतश्चिदुत्पत्तेरनुपपत्तेः ।

[1]यच्च "उपभोगाश्रयत्वेन गृहीते" इत्याद्युक्तम्, तदप्यविचारिताभिधानम्, हेयोपादेयतत्त्वज्ञा ह्यात्यन्तिकसुखसाधनमुपभोगाश्रयमात्मीयं चा-ऽभिमन्यन्ते, न तादात्विकसुखसाधनम्, ते हि विवेकिन एवं भावयन्ति– इदं राज्यादिकं न सुखाय भवति, यतो-ऽनेके लुण्टाकाः शत्रवो राज्यमाक्रामन्ति, तद्धारणचिन्ता चाहर्निशं भवति । तदेवं राज्यं नैहिकसुखाय भवति । नाऽपि राज्येन पारलौकिकं सुखं भवति, राज्योपभोगनिमित्तका-ऽशुभकर्मोपार्जनेन नरकगत्यादौ गमनात् । ना-ऽपि तरलताराक्षी कामिनी सुखाय भवति, यतः कामिन्याः प्रीतिः स्वपतिं प्रत्यपि मरुद्धूतध्वजाऽञ्चलवद् चपला । चपलत्वाच्च प्रीतेर्यस्मिंस्तस्या अनुरागः,स्वार्थव्याघाते तस्यैवोपघाताय यतते सा । अपि च दन्तच्छदच्छद्मना पिशितं वितन्य मत्स्यान् इव मनुष्यादीन् नरकादिदुर्गतिजाले पातयति । तेन स्त्रीरपि नैहिकपारलौकिकसुखाय भवति ।

मुक्तिरमणी तु रत्नत्रयसाध्या नित्यानन्दमयी, यत्र कदाचिदपि दुःखकणिका न भवतीति ।

एवं भावयतां तेषां राज्ययोषित्प्रमुखेषु दुःखहेतुषु सुखलेशसाधनत्वसद्भावे-ऽप्यन्यदात्यन्तिकसुखसाधनं रत्नत्रयं पश्यतां कुतस्तेष्वात्मीयबुद्धिः, यतस्ततो निवृत्तिर्न स्यात् ।

ननु तथापि लेशतः सुखहेतुत्वस्याऽपि तत्र सम्भवेन दुःखहेतुत्वे यावतां-ऽशेन सुखहेतुता, तावतां-ऽशेनेन्द्रियादीन् स्वोपकारकान् मन्यमानस्तेष्वात्मीयबुद्धिं न परित्यजतीति चेत्, न, तेषां सुखलेशसाधनत्वज्ञानेना-ऽन्यस्य चात्यन्तिकसुखसाधनस्य निर्विषाऽन्नस्येव दर्शनेन सुखलेशसाधनस्य विषयुक्तक्षीरादिवत् परित्यागात् ।

[2]यच्चोक्तम्—"काणत्वादिदोषदर्शनेऽपि" इत्यादि, तदप्यस्मदभिप्रायाऽनभि-

(१) पृ० ५४० पं० १५ (२) पृ० ५४० पं० २१ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानात् प्रलपितम्, यतो न सुरूपत्वादिगुणदर्शनेन स्नेहो भवतीत्यस्माभिरिष्यते, किन्तूपभोगाश्रयेषु तादात्विकसुखाख्यगुणदर्शनात् स्नेहो भवति। विवेकिनां चोपभोगाश्रयेषु दुःखहेतुत्वाख्यमात्यन्तिकं दोषं पश्यतां नोपभोगाश्रयेषु तादात्विकसुखाख्यस्य गुणस्य दर्शनमस्ति। तेन तन्निबन्धनस्नेहस्य व्यावृत्तेः कथं दोषदर्शनं स्नेहस्य बाधकं न स्यात्?

ननु तद्दोषं पश्यतां यद्यपि तत्कालेऽनुरागिणी मतिश्चलिता, तथापि तत्रासौ नैव सर्वथा विरक्तः, पुनस्तद्गुणलेशदर्शनेनाऽनुरागसम्भवात्। यदुक्तं **प्रमाणवार्तिके–**

**यद्यप्येकत्र दोषेण तत्क्षणं चलिता मतिः ॥** (१।२४१)

**विरक्तो नैव तत्राऽपि कामीव वनितान्तरे।"**

इति चेत्, न, अज्ञ एव ह्युपभोगाश्रयेषु तादात्विकदुःखहेतुत्वाख्यस्य दोषस्य दर्शनेन विरक्तः सन् तादात्विकसुखहेतुत्वाख्यस्य गुणस्य दर्शनात् पुनरनुरज्यते। हेयोपादेयतत्त्वज्ञस्तु दुःखहेतुत्वाख्यस्याऽऽत्यन्तिकदोषस्य दर्शनेन विरक्तो न तादात्विकसुखहेतुत्वाख्यस्य तादात्विकगुणस्य दर्शनात् पुनस्तत्रानुरज्यते, आत्यन्तिकसुखसाधनेषु तस्यात्यन्तिकसुखहेतुत्वाख्यगुणदर्शनसद्भावेन तादात्विकगुणदर्शनविरहात्।

ननूपभोगाश्रयेष्विन्द्रियादिषु दुःखहेतुत्वं पश्यन् विरज्यतेऽसौ, तर्ह्यात्मन्यपि विरज्यताम्, दुःखहेतुत्वस्य तत्राऽप्यविशेषात्। तत्रा-ऽविरागे त्वन्यत्रा-ऽपि न विरज्येत, विशेषा-ऽभावादिति चेत्, उच्यते–किमेतदज्ञमात्मानं प्रतीत्य भण्यते? उत प्रज्ञम्? यदि प्रथमपक्षः, तर्हि विरज्यत एव, हेयोपादेयतत्त्वज्ञानविकलानां दुःखहेतौ स्वात्मनि वैराग्यात् स्वात्मघातादौ प्रवृत्तेः। अथ द्वितीयः पक्षश्चेत्, तर्हि हेयोपादेयतत्त्वज्ञा न विरज्यन्ते, यतस्तैस्तत्र न दुःखहेतुत्वं प्रतिसन्धीयते, किन्त्वात्यन्तिकसुखहेतुत्वमभिसन्धीयते।

[1]यच्चोक्तं "**कायक्लेशस्य कर्मफलत्वेन**"इत्यादि, तदप्यचर्चिता-ऽभिधानम्, हिंसाद्विरतिरूपव्रतोपबृंहकस्य कायक्लेशस्य कर्मफलत्वे-ऽपि तपस्त्वा-ऽविरोधात्। व्रता-ऽविरोधी हि कायक्लेशः कर्मनिर्जराहेतुत्वात् तपो-ऽभिधीयते। न चैवं नारकादिकायक्लेशस्य तपस्त्वप्रसङ्ग इति वाच्यम्, तस्य हिंसाद्यावेशप्रधानतया तपस्त्वविरोधात्। अतः प्रेक्षावतां नारकक्लेशेन समानता मुमुक्षुकायक्लेशस्या-ऽऽपादयितुं न शक्या।

[2]यच्च शक्तिसङ्करपक्षे"**स्वल्पक्लेशेनैवं**०"इत्यादि प्रोक्तम्, तत् सत्यमेव, विचित्रकर्मफलदानसमर्थानां कर्मणां शक्तिसङ्करे सति सूक्ष्मसम्परायचरमसमये क्षीणमोहान्त्यसमये-ऽयोगिकेवलिचरमसमये चा-ऽक्लेशतः स्वल्पेनैव ध्यानरूपेण तपसा प्रक्षया-ऽभ्युपगमात्। किन्तु निरुक्तशक्तिसङ्करो बहुतरकायक्लेशसाध्य इति युक्तस्तदर्थोऽनेकविधोपवासादिकायक्लेशाद्यनुष्ठानप्रयासः, तमन्तरेण तत्सङ्करा-ऽनुपपत्तेः।

(१) पृ० ५४० पं० २६। (२) पृ० ५४१ पं० ३।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अपरे पुनराहुः**–प्रदीपनिर्वाणवत् सर्वथा ज्ञानसन्तानोच्छेदो मोक्ष इति । प्रमाणञ्चा-ऽत्र खड्गिनो निराश्रवं चित्तं नोपादेयक्षणमारभते; सहकारिरहितत्वात् ,तादृशदीपशिखावदिति । इह खड्गिशब्देन प्रत्येकबुद्धो ग्राह्यः ।

अथ प्रतिविधीयते–बौद्धमते विनाशस्य निर्हेतुकत्वस्वीकाराद् उक्तस्वरूपमोक्षा-ऽभ्युपगमे मोक्षोपायस्य वैयर्थ्यप्रसङ्गः ।

यच्च **"खड्गिनो निराश्रवम्"** इत्याद्यनुमानप्रमाणमुपन्यस्तम्, तदसङ्गतम् , बुद्धचित्तेन हेतोरनेकान्तात् । हितैषित्वा-ऽभावे सतीति विशेषणोपादानाद् न व्यभिचार इति चेत् , न,हितैषित्वा-ऽभावस्या-ऽसिद्धत्वात् । समानं हि हितैषित्वं खड्गि-सुगतयोरात्म-जगद्विषयम् । ननु जगद्विषयहितैषित्वाऽभावे सतीति विशेषणमुपादेयम् , खड्गिनि तु जगद्विषयहितैषित्वाभावोऽस्त्येव, तस्या-ऽऽत्ममात्रविषयहितैषित्वात् , ततश्च न व्यभिचार इति चेत् , मैवम् , यतः सुगतस्य कृत-कृत्येषु हितैषित्वाभावेन तस्या-ऽपि सकलजगद्विषयहितैषित्वविरहाद् न व्यभिचारस्य परिहारः । कृतकृत्येष्वपि हितैषित्वाऽभ्युपगमे तु कृतकृत्यत्वव्याघातप्रसङ्गः । न च देशतः कृतकृत्येषु सुग-तस्य हितैषित्वमस्ति,खड्गिनस्तु नेति वाच्यम्,खड्गिनोऽप्युत्तरेषु स्वचित्तेषु हितैषित्वस्योपलम्भात् । इत्थं खड्गिनो न हितैषित्वाभावः सिद्धः ।

नापि चरमत्वविशेषणं देयमिति वाच्यम् , तस्या-ऽप्यसिद्धत्वात् प्रमाणाऽभावाच्च । ननु निराश्रवं खड्गिचित्तं चरमम् , स्वोपादेया-ऽनारम्भकत्वात् , वर्त्तिस्नेहादिशून्यप्रदीपादिक्षणवदिति चेत् ,न,अन्योन्याश्रया-ऽऽपत्तेः । तथाहि–सिद्धे सति हि तस्य स्वोपादेया-ऽनारम्भकत्वे चरमत्वस्य सिद्धिः, चरमत्वसिद्धौ च स्वोपादेयानारम्भकत्वसिद्धिः ।

किञ्चाऽन्त्यचित्क्षणस्यार्थक्रियाकारित्वविरहेऽवस्तुत्वप्रसङ्गः, **'यत् सत् , तत् करोती'**ति स्वीकारात् । अन्त्यचित्क्षणस्या-ऽवस्तुत्वे च तज्जनकस्योपान्त्यचित्क्षणस्याऽप्यवस्तुत्वप्रसङ्गः, अवस्तु-जनकत्वात् , ततस्तज्जनकस्येत्येवं निःशेषचित्सन्तानस्या-ऽवस्तुत्वप्रसक्तिः ।

न च स्वसन्तानवर्तिचित्क्षणस्या-ऽजनकत्वे-ऽपि सन्तानान्तरवर्तियोगिज्ञानस्य जननाद् ना-ऽशेषस्य चित्सन्तानस्या-ऽवस्तुत्वप्रसक्तिरिति वाच्यम् ,रसादेरेककालस्य रूपादेरव्यभिचार्यनुमा-नाभावप्रसङ्गात् । एतदुक्तं भवति–यथा-ऽन्त्यचित्क्षणस्य सजातीयकार्या-ऽजनकत्वे-ऽपि विजातीय-योगिज्ञानजनकत्वमभ्युपगम्यते, तथैव रूपादेः सजातीयरूपाद्याख्यकार्या-ऽजनकत्वेऽपि विजातीय-रसादिलक्षणकार्यस्य जनकत्वमभ्युपगन्तव्यम् । ततश्च तमस्विन्यामाम्रफलरसा-ऽऽस्वादनाद् रूपानुमानमव्यभिचारि न स्यात् । तथा-ऽनभ्युपगमे तु न विरुध्यते-ऽव्यभिचार्यनुमानम् , एक-सामग्र्यधीनत्वेन रूपरसयोर्नियमेन रूपरसलक्षणकार्यद्वयजननात् । स्वीक्रियते च भवता रसा-ऽऽ-स्वादनादव्यभिचारि रूपानुमानम् । ततश्चैकसामग्र्यधीनत्वेन रूपरसयोर्नियमेन कार्यद्वया-ऽऽरम्भ-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

कत्वमुररीकर्तव्यम् ,तथा-ऽभ्युपगते च समानकारणसामग्रीजन्यत्वेना-ऽन्त्यचित्क्षण-योगिज्ञानक्षणयोरपि कार्यद्वया-ऽऽरम्भकत्वं कुतो न स्यात् ? स्यादेवेत्यर्थः । अपि च कथं सजातीयकार्ये-ऽनुपयोगिनश्चरमज्ञानक्षणस्य विजातीयकार्ये भवत्युपयोगः ? तस्माद् न ज्ञानसन्तानोच्छेदो मोक्षः,किन्त्वनन्तज्ञानादिस्वरूपः ।

**(इति सौगता-ऽभिमतमोक्षस्वरूपप्रतिविधानम् ।)**

**अन्ये पुनराहुः**–स्वातन्त्र्यं मोक्ष इति । तत्र यदि स्वातन्त्र्यं प्रभुता, तदा मदः । अथ चेत् कर्मनिवृत्तिः,तदा-ऽस्माकमेव सिद्धान्तः,व्यवहारनयेन कर्मक्षयस्य मोक्षत्वेन प्रतिपादितत्वात्[1] ।

**चार्वाकास्तु**–आत्महानं मोक्ष इत्याहुः, तन्न, यतो वीतरागजन्मा-ऽदर्शनन्यायेना-ऽऽत्मनो नित्यत्वं सिद्धम् , नित्यत्वेन च सिद्धस्या-ऽऽत्मनः सर्वथा हातुमशक्यत्वम् । पर्यायार्थतया त्वात्महानेऽप्यात्महानस्या-ऽनुद्देश्यत्वम् ।

**साङ्ख्यास्तु**–प्रकृतिपुरुषविवेकख्यातिबलेनोपरतायां प्रकृतौ पुरुषस्य स्वरूपेणा-ऽवस्थानं मोक्ष इति ब्रुवते ।

एतदुक्तं भवति-साङ्ख्यमते पञ्चविंशतिस्तत्त्वानि । यदुक्तं **साङ्ख्यकारिकायामीश्वरकृष्णैः**–

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**

**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥१"॥** इति ।

तत्र प्रीत्यप्रीतिविषादात्मकानां लाघवोपष्टम्भगौरवधर्माणां परस्परोपकारिणां त्रयाणां गुणानां सत्त्व-रजस्तमसां साम्यावस्था प्रकृतिः । यदुक्तं **श्रीकपिलेन सूत्रम्—"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः..."** इत्यादि (१–६१) । सत्त्वादिकं **त्वीश्वरकृष्णैः कारिकाया**मित्थं व्याख्यातम्—

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।**

**गुरु वरणकमेव तमः प्रदीपवच्चा-ऽर्थतो वृत्तिः ॥१॥"** इति ।

प्रकृतिश्च प्रधानमव्यक्तञ्चेत्यनर्थान्तरम् । सा चा-ऽनादिमध्यान्ता-ऽनवयवा साधारणा-ऽशब्दा-ऽस्पर्शा-ऽरूपा-ऽव्यया । एवंविधा च प्रकृतिः सर्वोत्पत्तिमतां निमित्तमस्ति । यदुक्तं **श्रीवाचस्पतिमिश्रेण साङ्ख्यतत्त्वकौमुद्याम्–"विश्वस्य कार्यसंघातस्य सा मूलम्, न त्वस्या मूलान्तरमस्ति,अनवस्थाप्रसङ्गात् । न चा-ऽनवस्थायां प्रमाणमस्तीति भावः ।"**इति ।

प्रकृतेर्बुद्धिरुत्पद्यते, सा च महदित्यपरपर्याया । यो-ऽयमध्यवसायो गवादिषु प्रतिपत्तिः–एवमेतद् , नाऽन्यथा, गौरेवाऽयम् , नाश्वः, स्थाणुरेवा-ऽयम् , न पुरुष इत्येषा बुद्धिः,तस्यास्त्वष्टौ रूपाणि । तत्र धर्म-ज्ञान-वैराग्यैश्वर्याख्यानि चत्वारि सात्त्विकानि, तत्प्रतिपक्षभूतानि त्वधर्मादीनि चत्वारि तामसानि ।

(१) पृ० ५३६ पं० ९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धेः कार्यो-ऽहङ्कारः । स चा-ऽभिमानात्मकः, अहं शब्दे, अहं स्पर्शे, अहं गन्धे, अहं रसे, अहमीश्वरः, असौ मया हतः, ससत्त्वो-ऽहं हनिष्यामीत्यादिप्रत्ययरूपः । अहङ्कारात् पञ्चतन्मात्राण्युभयं चेन्द्रियमिति कार्यद्वयमुत्पद्यते । तत्र पञ्चतन्मात्राणि शब्दतन्मात्रादीन्यविशेषरूपाणि सूक्ष्मपर्यायवाच्यानि । शब्दतन्मात्राच्छब्द उपलभ्यते, एवं स्पर्श-रूप-रस-गन्ध-तन्मात्रेभ्यः स्पर्शादय उपलभ्यन्ते ।

अथोभयेन्द्रियं बाह्या-ऽभ्यन्तरभेदेनैकादशविधम् । तत्र चक्षुः श्रोत्रं घ्राणं रसनं त्वगिति पञ्चज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थाः पञ्च कर्मेन्द्रियाणि । एकादशं च मनः ।

पञ्चतन्मात्रेभ्यः पञ्च महाभूतानि समुत्पद्यन्ते । तथाहि—शब्दतन्मात्रादाकाशं शब्दगुणम् , शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद् वायुः शब्दस्पर्शगुणः, शब्दस्पर्शतन्मात्रसहिताद् रूपतन्मात्रात् तेजः शब्दस्पर्शरूपगुणम् ,शब्द-स्पर्श-रूपतन्मात्रसहिताद् रसतन्मात्रादापः शब्द-स्पर्श-रूप-रसगुणाः, शब्द-स्पर्श-रूप-रसतन्मात्रसहिताद् गन्धतन्मात्रात् शब्द-स्पर्श-रूप-रस-गन्धगुणा पृथिवी जायते ।

पुरुषस्त्वमूर्तश्चेतनः साक्षादकर्ता-ऽभोक्ता निष्क्रियो निर्गुणो नित्यः, यदुक्तं **श्रीविज्ञानभिक्षुणा साङ्ख्यप्रवचनभाष्ये—"प्रकृतेः कार्यो महान् महत्तत्त्वम् ,महदादीनां स्वरूपं विशेषश्च वक्ष्यते, महतश्च कार्यो-ऽहङ्कारः । अहङ्कारस्य कार्यद्वयम् , तन्मात्राण्युभयमिन्द्रियञ्च । तत्रोभयमिन्द्रियं बाह्या-ऽभ्यन्तरभेदेनैकादशविधम् । तन्मात्राणां कार्याणि पञ्चस्थूलभूतानि । स्थूलशब्दात् तन्मात्राणां सूक्ष्मभूतत्वमभ्युपगतम् । पुरुषस्तु कार्यकारणविलक्षणः ।"** इति ।

प्रकृति-पुरुषयोः संयोगस्त्वन्धपङ्गुवत् । यदुक्तम् **ईश्वरकृष्णैः साङ्ख्यकारिकायाम्—"पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ।"** इति । पुरुषस्य च चैतन्यशक्तिर्विषयपरिच्छेदशून्या, अर्था-ऽध्यवसायस्य बुद्धिव्यापारत्वात् । बुद्धिस्तूभयमुखदर्पणाकारा, ततस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते, इन्द्रियद्वारेण च बुद्धौ सुख-दुःखादयो विषया प्रतिसङ्क्रामन्ति । ततः सुख्यहं दुःख्यहमित्युपचारः । आत्मा हि स्वं बुद्धितोऽव्यतिरिक्तं मन्यते । मुख्यतस्तु बुद्धेरेव विषयपरिच्छेदः । तथा चाहुः **सांख्यतत्त्वकौमुद्यां श्रीवाचस्पतिमिश्राः—"सर्वो व्यवहर्ता-ऽऽलोच्य मत्वा 'अहमत्रा-ऽधिकृतः' इत्यभिमत्य 'कर्तव्यमेतन्मया' इत्यध्यवस्यति,ततश्च प्रवर्तते इति लोकसिद्धम् । तत्र यो-ऽयं कर्तव्यमिति विनिश्चयश्चितिसन्निधाना-ऽऽपन्नचैतन्याया बुद्धेः सो-ऽध्यवसायः—बुद्धेरसाधारणो व्यापारः ।"** इति ।

अचेतना-ऽपि बुद्धिश्चिच्छक्तिसन्निधानाच्चैतन्यवतीव प्रतिभासते । यदुक्तं **साङ्ख्यकारिकायामीश्वरकृष्णैः—"तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।"** इति । अनुमानप्रमाणमप्यस्ति—अचेतना ज्ञानादयः, उत्पत्तिमत्त्वादिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदा तु "दुःखहेतुरियं प्रकृतिः, ना-ऽनया सह संसर्गो युक्तः" इति विवेकख्यातिर्भवति, तदा प्रकृतिर्निवर्तते,कृतकार्यत्वात् । यथा पारिषद्यान् नृत्यं दर्शयित्वा नृत्याद् नर्तकी निवर्तते । यदुक्तं **साङ्ख्यकारिकायाम्—"रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।**

**पुरुषस्य तथा-त्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥१॥"** इति ।

निवृत्तायां च प्रकृतौ च पुरुषस्य स्वरूपेणा-ऽवस्थानं मोक्ष इति । स्वरूपं च चेतनाशक्तिर-परिणामिन्यप्रतिसंक्रमा प्रतिदर्शितविषयाऽनन्ता च, अतस्तदात्मक एव मुक्तात्मा, न पुनरानन्दादि-स्वभावः, तस्य प्रकृतिकार्यत्वात् , तस्याश्च निवृत्तत्वात् । ननु पुरुषो निर्गुणोऽपरिणामी,कथं तस्य मोक्षः, मुचेर्बन्धनविश्लेषार्थत्वात् , सवासनक्लेशकर्माशयानां च बन्धनसमाम्नातानां पुरुषेऽपरिणा-मिन्यसम्भवात् ? अत एव न तस्य प्रेत्यभावा-ऽपरनामा संसारोऽप्यस्ति, निष्क्रियत्वादिति चेत् , न, यतः प्रकृतिरेव नानाश्रया सती बध्यते संसरति मुच्यते चेति, पुरुषे तु बन्ध-मोक्ष-संसारा उप-चर्यन्ते । यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते, जयपराजया-ऽऽश्रयेण भृत्यानां तद्भा-गित्वात् जय-पराजयफलस्य च शोकलाभादेः स्वामिनि सम्बन्धात् , तथा भोगापवर्गयोः प्रकृति-गतयोरपि विवेकाग्रहात् पुरुषे सम्बन्ध इति ।

अत्र प्रतिविधीयते—या खलु प्रकृत्यादिप्रक्रिया दर्शिता,सा-ऽनुपपन्नैव । अनुपपत्तिस्त्वग्रे दर्शयि-ष्यते । [1]यच्चोक्तम्—"**प्रकृति-पुरुषयोः संयोगस्त्वन्धपङ्गुवत् ।**" इति, तदयुक्तम् , यतस्तयोः संयोगः केन कृतः, किं प्रकृत्या ? आहोस्विद् आत्मना ? न तावत् प्रकृत्या, तस्याः सर्वगतत्वेन मुक्तात्मनो-ऽपि तत्संयोगप्रसङ्गात् । अथा-ऽऽत्मना, तर्हि स शुद्धचैतन्यस्वरूप आत्मा किमर्थं प्रकृतिमादत्ते ? अथा-ऽस्तु वा केनचित् कृतः संयोगः, किन्त्वसौ संयोगः किं सहेतुको निर्हेतुको वा ? यदि निर्हेतुकः, तदा मुक्तात्मनोऽपि तथाविधसंयोगो बलादापद्यते । अथ सहेतुक-श्चेत् ,तर्हि तादृशसंयोगहेतुः किं प्रकृतिरस्ति ? उता-ऽऽत्मा? सांख्यैरन्यस्य कस्यचिदप्यनभ्युपगमात् ।

आद्यपक्षे, सा प्रकृतिर्यथा संसार्यात्मनः प्रकृतिसंयोगे हेतुः, तथा मुक्तात्मनो-ऽपि स्यात् , कूटस्थनित्यशुद्धचैतन्यस्वरूपत्वेनोभयोरप्यविशेषात् , नियामका-ऽभावाच्च ।

अथ द्वितीयपक्षश्चेत् , तर्हि स आत्मा प्रकृत्यात्मनोः संयोगे हेतुत्वं प्रतिपद्यमानः किं स्वयं प्रकृतिसंयुक्तः सन् हेतुर्भवति ? उत तद्वियुक्तः ? आद्ये तस्या-ऽपि प्रकृतिसंयोगः कथम् ? इत्यन-वस्था । द्वितीये पुनः स प्रकृतिरहित आत्मा शुद्धचैतन्यस्वरूपः सन् किमर्थं प्रकृत्यात्मनोः संयोगे हेतुत्वं प्रतिपद्यत इति वक्तव्यम् , यदि निष्प्रयोजनम् , तर्हि मुक्तात्मनो-ऽपि प्रकृतिसंयोगप्रसङ्गः । यदि सप्रयोजनम् , तदुल्लेखनीयं 'किं तत् प्रयोजनम्' इति । ननु पुरुषस्य दिदृक्षासद्भावात् प्रयोजनरूपेण दर्शनमिति चेत् , न, मुक्तानामपि दिदृक्षास्वीकारप्रसङ्गेन दर्शनापत्त्या तेषामपि प्रकृतिसंयोगप्रसक्तेः ।

---

(१) पृ० ५४९ पं० १९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चानाद्यबद्धस्यैव पुरुषस्य दिदृक्षा भवति, बद्धमुक्तस्य तु बद्धावस्थायां दर्शनसंपादनेन दिदृक्षायाः स्वसत्वात् सा न मुक्तावस्थायां भवतीति न मुक्तानां दिदृक्षास्वीकारप्रसङ्गः, अतो नोक्तापत्तिरिति वाच्यम्, यतोऽनाद्यबद्धस्या-ऽपि पुरुषस्येन्द्रियादिरहितत्वेन न तस्य दिदृक्षा संभवति । अपि च नाऽदृष्टे वस्तुनि दिदृक्षा संभवति, इह तु भवता-ऽदृष्टायां प्रकृतौ दिदृक्षाऽभ्युपगम्यते, तच्चायुक्तम् ।

ननु 'द्रष्टुमिच्छा' दिदृक्षेति कृत्वा सहजैवेह दिदृक्षा, सा चेन्द्रियादिविरहे प्राग्दर्शनविरहे चाऽपि न विरुध्यत इति चेत्, मैवम्, यतो दिदृक्षायाः सहजत्वा-ऽभ्युपगमे आत्मनस्तन्निवृत्तिर्न स्यात्, आत्मनः स्वाभाविकगुणत्वेन तस्य स्वीकार्यत्वात् । नहि आत्मनः कश्चित् स्वाभाविकगुणो विनिवर्तते । अस्तु वा तन्निवृत्तिः, किन्तु तन्निवृत्त्यभ्युपगमे आत्मनो-ऽपि निवृत्तिप्रसङ्गः, अभिन्नत्वात् ।

ननु दिदृक्षानिवृत्तौ सत्यामप्यात्मनो न निवृत्तिः, भव्यत्ववदिति चेत्, मैवम्, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । तथाहि—भव्यत्वं न केवलजीवरूपम्, किन्तु कर्मबद्धजीवरूपम् । दिदृक्षा तु केवलजीवरूपा, अनादिकालतः पुरुषस्य महदादीनां सम्बन्धाभावे-ऽपि दिदृक्षास्वीकारात् । इत्थं दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याद् न युज्यते वक्तुम् 'भव्यत्ववदि' ति । अपि च महदाद्यभावे-ऽबद्धस्य यथा दिदृक्षा स्वीक्रियते, तथा बद्धमुक्तस्याऽपि स्वीकर्तव्या, उभयत्राऽपि महदाद्यभावस्याविशेषात् ।

नन्वेवंस्वभावैव दिदृक्षा, या महदादिविकारदर्शनादूर्ध्वं कैवल्यावस्थायां निवर्तत इति चेत्, न, यतः कैवल्यावस्थातः पूर्वं दिदृक्षायाः सद्भावः, पश्चाच्चाऽभावः इत्यत्र किं प्रमाणम् ?

किञ्च महादादिनिवृत्तौ सत्यां कैवल्यावस्थायां दिदृक्षाया निवृत्तेरभ्युपगमात् सा प्रकृतिस्वरूपा प्रकृतितुल्या वा स्यात्, पुरुषस्वरूपाऽभ्युपगमे दिदृक्षानिवृत्त्या पुरुषस्य कूटस्थनित्यत्वव्याघातप्रसङ्गात् । एवञ्च प्रकृतिवद् दिदृक्षा पुरुषतो व्यतिरिक्ता सिध्येत्, ततश्च पुरुषस्य दिदृक्षेति वक्तुं न युज्येत ।

किञ्च दिदृक्षा प्रकृतिस्वरूपाऽपि न सम्भवति, अबद्धस्य प्रकृतिविरहदशायामपि तदभ्युपगमात् । ना-ऽपि प्रकृतितुल्या काचिदतिरिक्ता, प्रकृति-पुरुषाभ्यामन्यस्य साङ्ख्यैरनभ्युपगमात् । तस्मादसत्कल्पा दिदृक्षेति पर्यवस्यति ।

अथा-ऽस्तु कल्पिता दिदृक्षेति चेत्, न, यतः कल्पितायां कथं प्रमाणप्रवृत्तिः ? तदेवं दिदृक्षाया अनुपपन्नत्वेन तत्प्रयोज्यस्य दर्शनस्याऽप्यनुपपत्तेर्न युज्यते पुरुषस्य प्रकृतिसंयोगे हेतुता ।

किञ्चायमात्मा प्रकृतिमुपाददानः पूर्वावस्थां किं जह्यान्नवा ? आद्यपक्षे आत्मनोऽनित्यत्वापत्तिः । द्वितीये तु तदुपादानमेव दुर्घटम्, नहि बाल्यावस्थामपरित्यजन् देवदत्तस्तरुणत्वं प्रतिपद्यते । तन्न साङ्ख्यमते प्रकृतिसंयोगो घटते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि **चा-ऽन्धपङ्गुवदिति** यो दृष्टान्तः प्रोक्तः, सोऽपि प्रकृतेऽसङ्गत एव, दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यात् । तथाहि–अन्धपङ्ग्वोश्चेतनत्वाद् 'इदमित्थमेवा-ऽस्मदिष्टं कार्यं सेत्स्यती'त्यवधार्या-ऽन्यो-ऽन्यापेक्षयोः तयोः प्रवृत्तियुक्ता, न तु प्रकृति-पुरुषयोः, प्रकृतेरचेतनत्वात् । एतेन प्रकृत्युपधानविलये स्वरूपेणा-ऽऽत्मनो-ऽवस्थानं मोक्ष इत्यपि निरस्तम् , यतः संयोगस्यानुपपन्नत्वाद् वियोगो दुर्घटः, संयोगपूर्वकत्वाद्वियोगस्य ।

[1]यच्चोक्तं**"पुरुषस्य च चैतन्यशक्तिर्विषयपरिच्छेदशून्या"**इति,तदप्यविचारिताभिधानम् , यतश्चिच्छक्तिर्विषयपरिच्छेदशून्या चेति परस्परविरुद्धं वचः । **'चितै संज्ञाने'** चेतनम् चित्यते वा-ऽनयेति भावे करणे वा क्विप्प्रत्ययः । यदि सा स्वपरपरिच्छेदात्मिका ना-ऽभ्युपगम्यते, तदा सा चिच्छक्तिरेव न स्यात् , घटवत् । न चा-ऽमूर्तायाश्चिच्छक्तेर्बुद्धौ प्रतिबिम्बोदयद्वारा विषयपरिच्छेदारोपो भवतीति वाच्यम् , प्रतिबिम्बस्य मूर्तधर्मत्वेनाऽमूर्तचिच्छक्तेराकाशवत् प्रतिबिम्बानुपपत्तेः।

अपि च कर्तृत्व-भोक्तृत्वादिधर्मविरहेण पुरुषस्य सुखदुःखभोगाश्रयत्वव्यवहारो नोपपद्येत । न चाऽऽरोपिततद्भोगसम्बन्धेन तथाव्यवहारोपपत्तिः स्यादिति वाच्यम् , आरोपितसम्बन्धार्थमपि तथाभोगानारोपापेक्षया तथाभोगारोपस्य वैलक्षण्यप्रयोजकत्वेन पुरुषस्य नूतनस्वरूपापन्नत्वस्यावश्यकत्वात् , अप्रच्युतप्राचीनरूपस्य च सतः पुरुषस्या-ऽऽरोपितस्यापि सुखदुःखादिभोगस्य व्यपदेशानर्हत्वात् । तत्प्रच्यवने तु प्राक्तनरूपत्यागेनोत्तररूपाध्यासितत्वेन परिणामान्तरापत्त्या कूटस्थनित्यत्वहानिः । न च यथा स्फटिकादीनां तथापरिणाममन्तरेणा-ऽपि जपाकुसुमादीनामुपधानेन स्फटिकाकादौ रक्तिमाद्यारोपो भवत्येव, तथैव पुरुषस्य परिणाममन्तरेणा-ऽपि सुखादिभोगशालिप्रकृत्युपधानेन भोगारोपो भविष्यतीति वाच्यम् , स्फटिकादावपि तथापरिणामेनैव रक्तिमारोपसमर्थनात् , अन्यथा कथमन्धोपलादौ नारोपः ? तथापरिणामा-ऽभ्युपगमे च बलादायातं चिच्छक्तेरारोपितकर्तृत्वादिधर्मविशिष्टपरिणामिनित्यत्वम् ।

[2]यच्च **"अचेतना-ऽपि"** इत्यादि प्रोक्तम् , तदप्ययुक्तम् ,न हि चैतन्यवति पुरुषे प्रतिसङ्क्रान्ते दर्पणस्य चैतन्या-ऽवाप्तिः,चैतन्या-ऽचैतन्ययोरपरावर्तिस्वभावत्वेन शक्रेणा-ऽप्यन्यथा कर्तुमशक्यत्वात् ।

किञ्च शरीरादेरप्येवं चेतनत्वप्रतीतिप्रसङ्गः,चेतनत्वसंसर्गस्याऽविशेषात् । न च शरीराद्यसम्भवी बुद्ध्यादेरात्मना संसर्गविशेषो-ऽस्तीति वाच्यम् ,यतः कथञ्चित्तादात्म्यं विना को-ऽन्यः संसर्गविशेषः ? आत्मा-ऽदृष्टकृतकत्वादिविशेषस्य च शरीरादावपि भावात् । अपि च **"अचेतना ऽपि चैतन्यवतीव प्रतिभासते"** इत्यत्रेव शब्देनाऽऽरोपो ध्वन्यते । न चा-ऽऽरोप उपपद्यते, तस्य बाधज्ञान-

(१) पृ० ५४९ पं० २० । (२) पृ० ५४९ पं० २९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवर्त्यत्वात्। तथाहि-साङ्ख्यमते विवेकख्यातिदशायां बाधज्ञानस्य सत्त्वेनारोपनिवृत्तिः स्यात्, तथा च सति तत्र प्रारब्धकर्माधीनसुखदुःखभोगे चैतन्यसंवेदनानुपपत्तिः स्यात्।

[1]यच्च **"अचेतना ज्ञानादय उत्पत्तिमत्त्वादि"**त्यनुमानप्रमाणमुपन्यस्तम्, तदप्यसुन्दरम्, यतो हेतोरनुभवेन सह व्यभिचारः, तस्य चेतनत्वेऽप्युत्पत्तिमत्त्वात्। न चा-ऽनुभवः कथमुत्पत्तिमान् ? इति वाच्यम्, परापेक्षत्वाद् युद्धादिवत्। न च परापेक्षत्वमसिद्धमिति वाच्यम् **"बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते।"** इति वचनोपलम्भात्। बुद्ध्यध्यवसितार्थानपेक्षत्वे त्वनुभवस्य, सर्वत्र सर्वदा पुंसो-ऽनुभवप्रसङ्गेन सर्वस्य सर्वदर्शित्वापत्तेस्तदुपाया-ऽनुष्ठानवैयर्थ्यप्रसङ्गः।

यदि पुनरनुभवसामान्यं नित्यमनुत्पत्तिमदेवेति मतम्, तदा ज्ञानादिसामान्यमपि नित्यत्वादनुत्पत्तिमद् भवेत्, ततश्चाऽसिद्ध उत्पत्तिमत्त्वादिति हेतुः।

अथ ज्ञानादिविशेषाणामुत्पत्तिमत्त्वात् प्रोक्तहेतुर्ना-ऽसिद्ध इति चेत्, न, यतस्तुल्यन्यायेनाऽनुभवविशेषाणामप्युत्पत्तिमत्त्वं सिद्ध्यति, ततश्चोत्पत्तिमत्त्वहेतुरनैकान्तिकः कथं न स्यात् ? स्यादेवेत्यर्थः। न चाऽनुभवस्य विशेषा न सन्तीति वाच्यम्, वस्तुत्वविरोधात्। तद्यथा-नाऽनुभवो वस्तु, विशेषकूटरहितत्वात्, खरविषाणवत्। न चोक्तहेतुरात्मना व्यभिचारी, तस्याऽपि सामान्यविशेषात्मकत्वात्।

अपि चोत्पत्तिमत्त्वहेतुः कालात्ययापदिष्टः, ज्ञानादीनां स्वसंवेदनप्रत्यक्षत्वेन चेतनत्वप्रसिद्धेः प्रत्यक्षबाधितपक्षा-ऽनन्तरं प्रयुक्तत्वात्। तदेवं नाऽचेतना ज्ञानादयः, स्वसंविदितत्वाद्, अनुभववत्। ततश्च चिच्छक्तेरेव विषयाध्यवसायो घटते, न तु तद्व्यतिरिक्ताया जडरूपाया अन्यस्याः कस्याश्चित्।

अत एव धर्माद्यष्टरूपताऽपि बुद्धेरित्यप्यभिधानमात्रमेव, धर्मादीनामात्मधर्मत्वात्।

[2]यच्च **"एवंविधा च प्रकृतिः सर्वोत्पत्तिमतां निमित्त"**मित्यादि प्रोक्तम्, तदुक्तवता भवता संज्ञान्तरेण कर्मैव प्रतिपन्नम्, तस्यैवैवंविधत्वादचेतनत्वाच्च।

[3]यच्च **"बुद्धेः कार्योऽहङ्कारः"** इत्यादि प्रोक्तम्, तदप्यसङ्गतम्, अहङ्कारस्याऽभिमानात्मकत्वेनाऽऽत्मधर्मस्या-ऽचेतनत उत्पादाऽयोगात्।

[4]यच्च **"वाक्-पाणि-पाद-पायूपस्थाः पञ्च कर्मेन्द्रियाणि"** इत्यभिहितम्, तदप्यपेशलम्, इतरा-ऽसाध्यकार्यकारित्वविरहात्। तद्यथा—परप्रतिपादना—ऽऽदान-विहरण—मलोत्सर्गादयोऽन्यैरपि शरीरा-ऽवयवैरङ्गुल्यादिभिः साधयितुं शक्यन्ते, ततश्च न केवलं वागादिभिः साध्यन्ते। तेन वागादीनामिन्द्रियत्वव्यपदेशो नोचितः। यदीतरा-ऽसाध्यकार्यकारित्वविरहेऽपि वागादीनामिन्द्रियत्वं परि-

(१) पृ० ५४९ पं० ३१ (२) पृ० ५४८ पं० २४। (३) पृ० ५४९ पं० २। (४) पृ० ५४९ पं० ८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्प्यते, तर्ह्यन्या-ऽङ्गोपाङ्गादीनामिन्द्रियत्वव्यपदेशः केन वार्यते ? अन्याऽङ्गोपाङ्गादीनामिन्द्रियत्वस्वीकारे त्विन्द्रियसंख्या प्रतिनियता न स्यात् ।

[1]यच्च व्योमादीनां शब्दादितन्मात्रजत्वं प्रतिपादितम् , तदपि न सङ्गतम् ,प्रतीतिविरोधात् ।

किञ्च भवता शब्दादितन्मात्रं व्योमादिकार्यस्य परिणामिकारणं स्वीक्रियते, आकाशस्य च गुणोऽपि शब्द एवोररीक्रियते । तच्चाऽयुक्तम् , नहि परिणामिकारणं स्वकार्यस्य गुणो भवितुमर्हति, ततः "**शब्दगुणमाकाश**"मिति वाङ्मात्रमेव ।

[2]यत्तु"**यदा तु दुःखहेतुरियं प्रकृतिः,नाऽनया सह संसर्गो युक्तः इति विवेकख्यातिर्भवति,तदा प्रकृतिर्निवर्तते**"इत्याद्युक्तम् ,तदप्ययुक्तिकाऽभिधानम् , तत्र हि केयं विवेकख्यातिर्नाम ? प्रकृति-पुरुषयोः स्वेन स्वेन रूपेणाऽवस्थितयोर्भेदेन प्रतिभासनमिति चेत् , सा कस्य, प्रकृतेः पुरुषस्य वा ? ततोऽन्यस्य सांख्यैरनभ्युपगमात् । न तावत् प्रकृतेः, विवेकख्यातेः 'प्रकृतेरहं पृथक्' इत्याकारकत्वेनैतादृशविवेकख्यातेः प्रकृतेरसंभवात् । नाप्यात्मनः, तस्य संवेदनधर्मरहितत्वात् । न च प्रकृतौ जायमानाऽपि सा पुरुषे समारोप्यत इति वाच्यम् , प्रकृतेस्तदसंभवस्योक्तत्वात् । अस्तु वा यस्य कस्यचिद् विवेकख्यातिः, किन्तु प्रकृतिर्यथा विवेकख्यातिजन्मतः प्राक् कृतेऽपि शब्दाद्युपलम्भे पुनस्तदर्थं प्रवर्तते,तथा विवेकख्यातौ जातायामपि पुनस्तदर्थं प्रवर्त्स्यति, प्रवृत्तिलक्षणस्य स्वभावस्याऽनपेतत्वात् ।

[3]यस्तु "**यथा पारिषद्यान् नृत्यं दर्शयित्वा नृत्याद् नर्तकी निवर्तते**"इति दृष्टान्त उपन्यस्तः,सोऽपि भवदिष्टविघातकारी, नर्तकी खलु यथा नृत्यं पारिषद्येभ्यो दर्शयित्वा निवृत्ताऽपि तत्कुतूहलात् पुनः प्रवर्तते,तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृत्ताऽपि पुनः कुतो न प्रवर्तेत ?

अथ वदेत्–प्रकृतिः कुलवधूवद् लज्जाशीलाऽस्ति । तथाहि-असूर्यम्पश्या हि कुलवधूस्त्रपा-ऽऽक्रान्ता प्रमादाद् विगलितशिरोञ्चला चेदालोक्यते परपुरुषेण, तदाऽसौ तथा प्रयतते, यथा प्रमत्तामेनां पुरुषान्तराणि न पुनः पश्यन्ति । एवं प्रकृतिरपि कुलवधूतोऽप्यधिका विवेकेन न पुनर्द्रक्ष्यत इति, तदयुक्तम् , स्वभावत्यागस्याऽसम्भवात् । एतदुक्तं भवति–दृष्टाऽपि प्रकृतिः संसारदशावद् मोक्षेऽप्यात्मनो भोगाय स्वभावतो वायुवत् प्रवर्तेत , प्रवृत्त्यात्मकस्वभावस्य नित्यत्वेन तदा-ऽपि सत्त्वात् । न खलु प्रवृत्तिस्वभावो वायुरन्येन दृष्टः सँस्तं प्रति निजस्वभावादुपरमति । ततश्च कुतो मोक्षः स्यात् ? तदा तत्स्वभावस्याऽसत्त्वे तु प्रकृतेर्नित्यैकरूपताहानिः, पूर्वस्वभावत्यागेनोत्तरस्वभावोपादानस्य नित्यैकरूपतायां विरोधात् । ननु प्रकृतेः परिणामिनित्यत्वा-ऽभ्युपगमे न विरोध इति चेत् , उच्यते–प्रकृतेः परिणामिनित्यत्वं यथाऽभ्युपगम्यते, तथा-ऽऽत्मनो-ऽपि परिणामिनित्यत्वं स्वीक्रियताम् , तस्याऽपि प्राक्तनसुखाद्युपभोक्तृत्वस्वभावपरित्यागेन मोक्षे तदभोक्तृत्व-

---

(१) पृ० ५४९ पं० ९ (२) पृ० ५५० पं० २ । (३) पृ० ५५० पं० ३ ।

स्वभावा-ऽभ्युपगमात् , अमुक्तत्वादिस्वभावपरिहारेण मुक्तत्वादिस्वभावोपादानाच्च । सिद्धे चात्मनः परिणामिनित्यत्वे सुखज्ञानादिपरिणामैः परिणामित्वं तस्याऽभ्युपगन्तव्यम् , अन्यथा मोक्षाभावः । ततश्च साङ्ख्यपरिकल्पितो मोक्षो न घटां प्राञ्चति । किन्तु यथोक्तोऽनन्तसुखज्ञानादिस्वरूपः ।

[1]यच्च "**प्रकृतिरेव नानाश्रया सती बध्यते संसरति मुच्यते च**" त्यादि प्रोक्तम् , तदप्यपेशलम् , यतो-ऽनादिभवपरम्परानुबद्धया प्रकृत्या सह पुरुषस्य यो विवेकाग्रहलक्षणोऽविष्वग्भावः, स एव बन्धपदार्थः, न तदन्यः कश्चित् । तस्मात् पुरुषस्य बन्धः । अथ च यस्य बन्धः, तस्यैव मोक्षः, बन्ध-मोक्षयोरैकाधिकरण्यात् । तस्मात् पुरुषस्यैव मोक्षः ॥२६७॥

**( इति साङ्ख्यस्वीकृतमोक्षस्वरूपप्रतिविधानम् )**

तदेवं प्रतिपादिताः सिद्धानामष्टौ गुणा अनन्तज्ञानादयः । सम्प्रति श्रेणिप्रतिपत्तौ मतद्वयं दिदर्शयिषुराह–

**एगभवे दो सेढी खलु कम्मग्गंथियाहिपायेणं ।**
**आगमअहिपायेणं पुण सेढी हवइ अण्णयरा ॥२६८॥**

एकभवे द्वे श्रेणी खलु कार्मग्रन्थिकाभिप्रायेण ।
आगमाभिप्रायेण पुनः श्रेणिर्भवत्यन्यतरा ॥२६८॥ इति पदसंस्कारः ।

'एगभवे' इत्यादि, 'एकभवे' एकस्मिन् भवे कार्मग्रन्थिकाभिप्रायेण खलु 'द्वे श्रेणी' उपशमश्रेणिः क्षपकश्रेणिश्च भवतः । आगमाभिप्रायेण पुनरेकस्मिन् भवे 'अन्यतरा' उपशमश्रेणि-क्षपकश्रेण्योरेकतरा श्रेणिर्भवति । अयं भावः-एकस्मिन् भव उत्कृष्टतो द्विरुपशमश्रेणिं प्रतिपद्यते जीव इति तूभयसम्मतम् । किन्तु **कार्मग्रन्थिका** आहुः–यस्मिन् भवे द्वौ वारा उपशमश्रेणिं यो जीवः प्रतिपद्यते, स एव तस्मिन् भवे द्वितीयवारमुपशमश्रेणिं क्षपकश्रेणिं वा न प्रतिपद्यते । यस्त्वेकवारमुपशमश्रेणिं समारोहति, तस्य भवेऽपि क्षपकश्रेणिस्तस्मिन् भव इति । यदुक्तं **सप्ततिकाचूर्णौ**–"**उक्कोसेणं एगभवे दो वाराओ उवसमसेढिं पडिवज्जति, जो दुवे वारे उवसमसेढिं पडिवज्जइ, तस्स णियमा तम्मि भवे खवगसेढी नत्थि । जो एक्कसिं उवसमसेढिं पडिवज्जइ, तस्स खवगसेढी होज्जा वा ।**" इति । **सैद्धान्तिकास्त्वाहुः**–यस्मिन् भवे सकृदप्युपशमश्रेणिं यो जीवः प्रतिपद्यते,तस्मिन् भवे स क्षपकश्रेणिं न प्रतिपद्यत इति । यदुक्तं **बृहत्कल्पभाष्ये**–

**"एवं अप्परिवडिए सम्मत्ते देवमणुयजम्मेसु ।**
**अन्नयरसेढिवज्जं एगभवेणं च सव्वाइं ॥१॥"** इति ।

तथैवाऽन्यत्राऽप्युक्तम्—

**"मोहोपशम एकस्मिन् भवे द्विः स्यादसन्ततम् ।**
**यस्मिन् भवे तूपशमः क्षयो मोहस्य तत्र न ॥१॥"** इति ॥२६८॥

(१) पृ० ५५० पं० ११

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रति शिष्यप्रशिष्यादिवंशे शास्त्रार्थस्याऽव्यवच्छेदायाऽन्तिममङ्गलं कुर्वन् स्वस्य चोपकारिणो गुरून् स्तुवन्नाह—

**कम्ममलविमुक्को सिरिवीरो जयइ सिरिपेमसूरीसो ।**
**जयए तह तस्सिस्सो पण्णासो भाणुविजयक्खो ॥२६१॥**

कर्ममलविमुक्तः श्रीवीरो जयति श्रीप्रेमसूरीशः ।
जयति तथा तच्छिष्यः पन्न्यासो भानुविजयाख्यः ॥२६१॥ इति पदसंस्कारः ।

**'कम्म'**० इत्यादि **'कर्ममलविमुक्तः'** कर्म=ज्ञानावरणादिकम् , तदेव मलं कर्ममलम् , तेन विमुक्तः=विरहितः, क्षपकश्रेणिसरसि शुक्लध्यानसलिलेन प्रक्षालितकर्ममल इत्यर्थः, **'श्रीवीरः'** तत्र **"राज् दीप्तौ"** विराजते=शोभते घनघातिकर्मसंघातविदारणाऽनन्तरप्राप्ताऽतुलकेवलश्रिया प्रकाशते वाऽनन्यमहातपस्तेजसेति वीरः, विपूर्वकराजृधातोर्णादिकडप्रत्ययो दीर्घत्वं च बाहुलकात् । यद्वा **"ईरिक् गति-कम्पनयोः"** वि=विशेषेण=अपुनर्भावेन ईर्ते=याति शिवं कम्पयत्यास्फोटयत्यपनयति कर्म वेति वीरः **"लिहादिभ्यः"** (सिद्धहेम० ५-१-५०) इत्यनेन सूत्रेण कर्तर्यच्प्रत्ययः । यद्वा **"ईरण् क्षेपे"** वि=कियत्क्षपितकर्मसाध्यपेक्षया विशेषत ईरयति=क्षिपति=तिरस्करोत्यशेषाणि कर्माणीति वीरः, कर्तर्यच्प्रत्ययः । यद्वा विदारयति कर्मारिसंघातमिति वीरः, पृषोदरादित्वाद् इष्टरूपनिष्पत्तिः, अथवाऽन्तरङ्गमोहमहीपतिमहाबलनिर्दलनार्थमनन्तं तपोवीर्यं व्यापारयतीति वीरः । यदुक्तम्—

**विदारयति यत्कर्म तपसा च विराजते ।**
**तपोवीर्ययुतस्तस्माद्वीर इति स्मृतः ॥१॥** इति ।

यद्वा **"शूरश्चारभटो वीरो विक्रान्तश्चाथ···।"**(श्लोकाङ्कः ३६५) इत्य**भिधानचिन्तामणिकोश**वचनात् वीरयति स्म कषायोपसर्गपरिषहादिशत्रुवर्गमभिभवति स्मेति वीरः,पूर्ववत् कर्तर्यच्प्रत्ययः,यद्वा वीरयति स्म रागादिशत्रून् प्रति पराक्रमयति स्मेति वीरः,अच्प्रत्ययः पूर्ववत् । अथवा ईरणम्=ईरः, **"भावाऽकर्त्रोः"** (सिद्धहेम० ५-३-१८) इत्यनेन भावे घञ्प्रत्ययः, ज्ञानमित्यर्थः, **"सर्वे गत्यर्था ज्ञानार्थाः"** इति वचनात् । ततो वि=विशिष्ट ईरो=ज्ञानं यस्य, स वीरः, आभिरुक्ताभिर्व्युत्पत्तिभिर्भगवतश्चरमजिनेश्वरस्य स्वार्थसम्पदं बोधितवान् । यद्वा ण्यन्तईर्धातुः,वि=विशेषेण ईरयति=मोक्षं प्रति भव्यप्राणिनो गमयतीति वीरः, कर्तर्यच्प्रत्ययः पूर्ववद् । यद्वा वि=विशिष्टा निखिलभुवनजनमनश्चमत्कारिणी ईः=लक्ष्मीः तां राति=भव्येभ्यः प्रयच्छतीति वीरः, **"रांक् दाने"**इति धातोः**"आतो डोऽह्वावामः"**(सिद्धहेम० ५-१-७६) इत्यनेन सूत्रेण कर्तरि डप्रत्ययः । आभ्यां द्वाभ्यां व्युत्पत्तिभ्यां भगवतः परार्थसम्पत्तिं ज्ञापितवान् । श्रिया=समस्तजगज्जन्तुजातचेतश्चमत्कारिपरमार्हन्त्यमहामाहात्म्यविस्तार्यशोकवृक्षाद्यष्टमहाप्रातिहार्यशोभया चतुस्त्रिंश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दतिशयशोभया वा लोकालोकाकल्पितभावकलापकलनैककुशलविमलकेवलज्ञानलक्ष्म्या वा युक्तो वीरः श्रीवीरः,जयति=इन्द्रिय-विषय-कषाय-परिषहोपसर्ग-घातिकर्मादिशत्रुगणपरिजयात् सर्वानप्यतिशेते ।

अथ स्वस्योपकारिणो गुरुवर्यान् स्तौति–'**सिरि०**' इत्यादि, 'श्रीप्रेमसूरीशः' श्रीमद्**विजयप्रेमसूरीश्वरो** 'जयति' इन्द्रियविषयादिरिपुपरिजयाद् अतिशेते। अयं भावः–चरमतीर्थपतेः **श्रीवर्धमानस्वामिनः** पट्टधरो गणभृत् श्री**सुधर्मस्वामी** जातः, तदनु पट्टधराः श्रीम**ज्जम्बूस्वामिप्रभवस्वामिप्रभृतयो** जाताः । ततः क्रमेण श्रीवीरात् त्रयःसप्ततितमः ( ७३ ) पट्टधरो न्यायाम्भोनिधिः प्रतिक्षिप्तलुम्पाकमतो विशुद्धचारित्रो **विजयानन्दसूरीश्वरो**ऽभूत् । तत्पट्टधरो निःस्पृहशिरोमणि-सच्चारित्रचूडामणि-श्रीम**द्विजयकमलसूरीश्वर** आसीत्, तत्पट्टधरः पाठकवर्य-श्रीमद्**वीरविजय**विनेयरत्न-परमगीतार्थऽशेषशेमुषीशालिकुलविद्रवमान-सकलागमरहस्यवेदि-भीमकान्तादिगुणगरिष्ठश्रीमद्**विजयदानसूरीश्वरो**ऽभूत् । तत्पट्टधरः सिद्धान्तमहोदधि–कर्मशास्त्रनिष्णात–**कर्मसिद्धि–संक्रमकरण––मार्गणा**द्वारादिग्रन्थरचयितृ–श्रीम**द्विजयप्रेमसूरीश्वरो** विषयकषायेन्द्रियादिशत्रुगणपरिजयाद् अतिशेते । युक्ता हि तेषां स्तवना, प्रव्रज्याप्रदानसम्यग्ज्ञानदानादितस्तेषामासन्नोपकारित्वात् ।

अथ स्वप्रगुरुं स्तौति 'तह'इत्यादि-'तथा'तथाशब्दः समुच्चये, 'तच्छिष्यः'तस्य=अनन्तरोक्त-श्रीम**द्विजयप्रेमसूरीश्वरस्य** 'शिष्यः' अन्तेवासी पन्न्यासो "भानुविजयाख्यः" तपस्तेजसा निर्जितभानुधामा **भानुविजयनामा** स्याद्वादनयप्रमाणविशारद-प्रवचनप्रभावक-तपोरत्न-पञ्च-सूत्र-ललितविस्तराद्यनेकग्रन्थविवेचको ' जयति ' आचाम्लवर्धमानतपआदिविप्रकृष्टतपश्चरणेन तर्कशास्त्राध्ययनाध्यापनादिना च नक्तंदिवं विषयेन्द्रियादिरिपुनिकरपरिजयाद् अतिशेते ।।२६९।।

सम्प्रति क्षपकश्रेणिग्रन्थपदार्थसंग्रहकारान् प्राह—

**इह खवणपयत्था संगहिया तस्सिस्ससुप्पसिस्सेहि ।**
**जयघोस-सुधम्माणंद-हेमचंद-गुणरयणेहि ।।२७०।।**

इह क्षपणपदार्थाः सङ्गृहीतास्तच्छिष्य-सुप्रशिष्यैः ।
जयघोष-सुधर्मानन्द-हेमचन्द्र-गुणरत्नैः ।।२७०।। इति पदसंस्कारः ।

'इह' इत्यादि,इह 'क्षपणपदार्थाः' प्रस्तुतत्वात् कर्मक्षपणापदार्थाः 'संगृहीताः' **कर्मप्रकृतिसप्ततिका-कषायप्राभृतादि-तच्चूर्णि-तद्वृत्ति-तट्टिप्पनकादिभ्यः** समाहृताः, कैः ? इत्याह-'**तस्सिस्स०**' इत्यादि, 'तच्छिष्य-सुप्रशिष्यैः' तस्य=पन्न्यासश्रीमद्**भानुविजयस्य,** शिष्याश्च सुप्रशिष्याश्च शिष्यसुप्रशिष्याः, तैः, 'जयघोष-सुधर्मानन्द-हेमचन्द्र-गुणरत्नैः' तत्पुरुषगर्भद्वन्द्वसमासत्वात् पदैकदेशेन च पदसमुदायस्य गम्यमानत्वाद् मुनिश्री**जयघोषविजयेन** शोभनेन **मुनिश्रीधर्मानन्दविजयेन मुनिश्रीहेमचन्द्रविजयेन मुनिगुणरत्नविजयेन** च मल्लक्षणेन ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अयम्भावः— स्याद्वादनयप्रमाणविशारदधर्मदेशनादक्ष–पन्न्यासश्रीमद्‌**भानुविजयगणिवराणां** शिष्यः प्रशान्तमूर्त्तिः स्वाध्यायरसिको **मुनिश्रीधर्मघोषविजयः**, तस्य शिष्यो दाक्षिण्यनिधिर्‌-जुस्वभाव आगमकर्मप्रकृत्यादिग्रन्थपटुर्वैयावृत्त्यादिना लब्धगच्छाधिपतिप्रसादो **मुनिश्रीजयघोषविजयः**। तथोक्तपन्न्यासवर्याणां शिष्यः कर्मप्रकृतिप्रभृतिद्रव्यानुयोगे गणितानुयोगे चाऽप्रतिमशेमुषीशाली शङ्कोत्थानतत्समाधानकुशलो **मुनिश्रीधर्मानन्दविजयः**। तथोक्तपन्न्यासवर्याणां प्रथमशिष्यः पन्न्यासपदालङ्कृतः सम्पादितगच्छप्रीतिः स्वाध्यायचरण-करणेष्वनन्यप्रेरकः श्रीमत्**पद्मविजयगण्**यासीत्, तच्छिष्यो देशनादक्षो गणितानुयोगेऽपि प्रत्युत्पन्नमतिः शान्तस्वभावो **मुनिश्रीहेमचन्द्रविजयः**। तथा स्याद्वादनयप्रमाणविशारदादिविशेषणविशिष्टोक्तपन्न्यासवर्याणां शिष्यो मदीयगुरुवर्यो भीमभवोदध्युद्धारको ज्येष्ठसहोदरचरोऽष्टमतपआदिविप्रकृष्टतपश्चारी मुनिमतल्लजो **जितेन्द्रविजयः**, तच्छिष्यो **गुणरत्नविजयो** मल्लक्षणः। एतैश्चतुर्भिर्मुनिभिः सुविहितगच्छनायकश्रीम**द्विजयप्रेमसूरीश्वर**राध्यापितैः **कर्मप्रकृति-सप्तनिका-कषायप्राभृतादिग्रन्थेभ्यः** कर्मक्षपणापदार्थाः संगृहीताः,न तु कपोलकल्पिताः। एतेन ग्रन्थस्य सर्वज्ञमूलकत्वं दर्शितम् ॥२७०॥

अथ पदार्थसंग्रहानन्तरं किम् ? इत्याह—

**तत्तो य खवगसेढी जिएन्दसिस्सगुणरयणविजयेणं ।**
**रइया एत्थ बहुसुया किवाअ खलियं विसोहन्तु ॥२७१॥**

ततश्च क्षपकश्रेणिर्जितेन्द्रशिष्यगुणरत्नविजयेन।
रचिता-ऽत्र बहुश्रुताः कृपायाः स्खलितं विशोधयन्तु ॥२७१॥ इति पदसंस्कारः।

**'तत्तो'** इत्यादि, 'ततः' कर्मक्षपणापदार्थसंग्रहणानन्तरं 'जितेन्द्रशिष्यगुणरत्नविजयेन' जितेन्द्रस्य=अनन्तरोक्तविशेषणविशिष्टस्य **मुनिराजश्रीजितेन्द्रविजय**नाम्नः पूज्यगुरोः शिष्येण= अन्तेवासिना गच्छाश्रिपचरणयुगलमुपासमानेन **गुणरत्नविजयेन** मल्लक्षणेन 'क्षपकश्रेणिः' प्रस्तुतग्रन्थस्वरूपा रचिता।

सम्प्रत्यात्मन औद्धत्यं परिहरन् बहुश्रुतेषु बहुमानं प्रकटयन् संशोधनविषये च प्रार्थनां विदधानः प्राह–**'एत्थ'** इत्यादि, 'अत्र' क्षपकश्रेण्याख्यग्रन्थे'बहुश्रुताः' आगमविदः 'कृपायाः' अत्र **'गम्ययपः कर्माधारे'** (सिद्धहेम० २-१-४५) इत्यनेन सूत्रेण कर्मणि पञ्चमी विभक्तिः, ममोपरि कृपां विधायेत्यर्थः, 'स्खलितं' कृतप्रयत्नस्याऽपि छद्मस्थस्याऽऽवरणादिसामर्थ्यादनाभोगकृतं स्खलनं 'परिशोधयन्तु' अपनयन्तु, यत्र स्खलनं स्यात्, तत्रेदं पदं न सम्यक्,इदं तु सम्यगित्यश्रुतानुसारिपदमपनीय श्रुतानुसारिपदं प्रक्षिपन्तु, न पुनस्तैरुपेक्षारूपोऽप्रसादः कर्तव्य इति भावः। ॥२७१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ प्रशस्तिः

नौमि श्रीवीरनाथं गणधरसुनुतं पादयुग्मं यदीयं
शक्रेन्द्रादिद्युनाथैः स्तुत इह भरते तीर्थनाथोऽन्तिमो यः ।
प्राप्ता भव्याश्च यस्यामृतसमवचसा बोधिरत्नं त्वनेके ,
प्रव्रज्यां यस्य पार्श्वे शिवसदनकलां चोररीकृत्य सिद्धाः ॥१॥ (स्रग्धरा)

आसीच्छ्रीवीरविभोः पट्टे गणभृत् सुधर्मनामा सः ।
तत्त्वादर्शि विशालं यद्दब्धं द्वादशाङ्गमद्भुतम् ॥२॥ (गीतिः)

तत्पट्टधरा जैनप्रवचनलक्ष्म्या विलासिनो ददताम् ।
श्रीजम्बूस्वामि-प्रभवप्रभु-शय्यम्भवाद्याः शम् ॥३॥ (विपुलार्या)

यद्विद्याच्छवितो भगः किमुत खं भीत्याऽधिगम्याऽटति, ।
शुभ्रो यद्यशउच्चयः किमुत खे पर्येति चन्द्रच्छलात् ।
कर्मारेर्हतये व्यधुः किमुत ये कर्मप्रकृत्यायुधं
दद्युस्ते शिवशर्मसूरिगुरवः कर्मप्रणाशे बलम् ॥ ४ ॥ (शार्दूलविक्रीडितम्)

दब्धः सप्ततिकाग्रन्थो यैर्भङ्गप्रतिपादकः ।
नित्यं मयि प्रसीदन्तु ते तद्ग्रन्थविधायिनः ॥५॥ (अनुष्टुप्)

संदर्भो निर्मितो यैर्गुणगणनिकरैः प्राभृतान्तः ★ कषायो
यत्कीर्तिज्योतिषेदं त्रिभुवनभवनं शुभ्ररूपं चकास्ति ।
बह्वज्ञानेन मूढान् भुवनभविजनान् ये प्रकाशं च निन्युः,
सत्सूरीन्द्रान् स्तुवे तान् गुणधरविबुधान् कर्ममर्मापहत्यै ॥६॥ (स्रग्धरा)

संक्षिप्य शतकादीन् ❀ यैर्निर्मितः पञ्चसंग्रहः ।
सर्वदा विजयन्तां ते, श्रीचन्द्रर्षिमहत्तराः ॥७॥ (अनुष्टुप्)

श्रुतपारगतः प्रज्ञाशाली मङ्गुप्रभुर्जयतु धीरः ।
श्रीनागहस्तिदेवो जयताच्छ्रीकर्ममर्मविज्ञश्च ॥ ८ ॥ (गीतिः)

दब्धा चूर्णिर्जिनमतबुधैर्यैर्जनानां हिताय ,
श्रेणिग्रन्थे जडमतिरहं चूर्णिमाश्रित्य येषाम् ।
जातः शक्तो बलविरहितो यष्टियोगात् यथा स्यात् ,
कर्मज्ञांस्तान् शमदमयुतांश्चूर्णिकारान् स्तुवेऽहं ॥ ९ ॥ (मन्दाक्रान्ता)

---

★ कषायप्राभृतग्रन्थः । ❀ शतक–सप्ततिका–कषायप्राभृत–सत्कर्म–कर्मप्रकृतिग्रन्थान् ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

कुशाग्रधीभिर्निरमायि यैर्ज्ञैः सुभव्यसन्दोहसरोजसूर्यैः ।
सुटिप्पनं श्रीशतकादिचूर्णेर्जयन्तु ते श्रीमुनिचन्द्रपादाः ॥१०॥ (उपेन्द्रवज्रा)

यैश्चारित्रेण तुल्यो न भवति ★कमनस्तस्य वै हंसगत्वाद्
येषां क्षान्त्या तु साम्यं व्रजति च न ❊विधुस्तस्य संग्रामकृत्त्वात् ।
यैः सच्छीलेन तुल्यो न भवति गिरिशो रागवत्त्वाद् भवान्यां
ते सूरीन्द्रा भवेयुः सुमलयगिरयः सुप्रसन्नाः सदैव ॥११॥ (स्रग्धरा)

विद्वन्मन्याः कुपक्षाः स्ववचनपटुतां दर्शयन्तो जगत्यां
यै रेवन्तप्रतापैः कलितिमिरहरैश्चक्रिरे कौशिकौघाः ।
यैः प्राप्तं प्राज्ञवर्यैः खलु विजयपदं कोविदानां सभायां
जीयासुस्ते यशोभाग्विजयपदयुताः पाठका वन्दनीयाः ॥१२॥ (स्रग्धरा)

वीराद्वह्नितुरङ्गमसम्मितपट्टे (७३)श्रुतोदधिर्धीरः ।
न्यायाम्भोधिर्जीयाच्छ्रीविजयानन्दसूरीशः ॥ १३ ॥ (पथ्यार्या)

तत्पट्टधरो जयतात् स श्रीमद्विजयकमलसूरीशः ।
मेरुरिव विबुधसेव्यो यो गम्भीरश्च जलधिरिव ॥१४॥ (पथ्यार्या)

तत्साम्राज्ये श्रीवीरविजयसंज्ञाः स्वशिष्यदानयुताः ।
पाठकवर्याः कामं रेजुः कुमतेभहर्यक्षाः ॥१५॥ (विपुलार्या)

सज्ज्ञानं दर्शनं सत् सुविमलचरणं चेति रत्नत्रयीयं
प्राप्ता भव्यैर्यतोऽब्धेरिव किल भपतिः श्रीः सुधा चा-ऽऽदितेयैः ❋ ।
शुद्धं मार्गं क्रियाख्यं प्रकटयति तु गौर्यस्य हेलेरिव स्म,
जीयात् सद्दानसूरिः स विजयकमलाचार्यसत्पट्टधारी ॥१६॥ (स्रग्धरा)

चारित्रांशवन्विते यच्छशधर उदिते तस्य पट्टाद्रिशृङ्गे ,
भव्यव्राताब्धिवेला विपुलशमयुता प्राज्यमुल्लासमाप्ता ।
यः पूज्यः प्रीतिपात्रं रविरिव समभूत् साधुकोकव्रजानां
विश्वे सिद्धान्तविज्ञो जयतु स सुगुरुः प्रेमसूरीशवर्यः ॥ १७ ॥ (स्रग्धरा)

श्री कर्मसिद्धिगुम्फः सुमार्गणाद्वारविवरणग्रन्थः ।
संक्रमकरणग्रन्थश्च विरचितास्तेन बुद्धिमता ॥ १८ ॥ (पथ्यार्या)

---

★ ब्रह्मा ❊ विष्णुः ❋ सुरैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्योपास्तिमवाप्य वै चरणयोर्लब्ध्वा यदीयां कृपां
भव्यानामुपकारिका क्षपकसच्छ्रेणिर्मया गुम्फिता ।
एषा येन विशोधिता सुगुरुणा स्वोपज्ञटीकायुता,
जीयात् कर्मकृतान्तवित् स **विजयश्रीप्रेमसूरीश्वरः** ॥२०॥ (शार्दूलविक्रीडितम्)

यद्यङ्गुल्याऽऽकाशो मेयः प्रसृतादिभिश्च पाथोधिः ।
स्यां च यदि सहस्रमुखस्तदा समर्थस्तदुपकृतीर्वक्तुम् ॥२१॥ (गीतिः)

बुद्धिः कर्कशतर्कतर्कणकलाढ्या विद्यते यस्य हि,
मुक्तिस्त्रीं तपसा सदा जिगमिषोः कायः कृशो यस्य च ।
सन्ति प्रव्रजिता अनेकतरुणाः श्रुत्वा च यद्देशनां
नः पायात् प्रगुरुः स **भानुविजयः** पन्न्यासवर्यो गणी ॥२२॥ (शार्दूलविक्रीडितम्)

तच्छिष्यो मम पूज्यो गुरुः सहोदरचरो तपश्चारी ।
भवजलधितारणतरीतुल्य**जितेन्द्रविजयो** जयतु ॥२३॥ (पथ्यार्या)

श्रीमत्सिद्धान्तमहोदधि**विजयप्रेमसूरि**वर्याणाम् ।
पूज्यानामादेशात् तदीयसत्प्रेरणातश्च ॥२४॥ (,,)

रचिता **जितेन्द्रविजया**न्तिषदा साधु**गुणरत्नविजयेन** ।
स्वोपज्ञवृत्तियुक्ता क्षपकश्रेणिर्भविहिताय ॥२५॥ (पथ्यार्या युग्मम)

संशोधितेयं **विजयोदयसूरीशै**र्विशारदैर्न्याये ।
आगम-कर्मप्रकृतिग्रन्थेषु तथा विपश्चिद्भिः ॥२६॥ ( ,, )
**मुनिवरजयघोषविजय-धर्मानन्द-मुनिहेमचन्द्रैश्च** ।
अन्यैश्च साधुवृषभैः परोपकारव्यसनभाग्भिः ॥२७॥ (युग्मम्)

छाद्मस्थ्याद् मतिमान्द्याद् वा यत्किञ्चिद् विरुद्धमागमतः ।
स्यादुक्तं तच्छोध्यं बहुश्रुतैर्मयि कृपां कृत्वा ॥२८॥ (पथ्यार्या)

मारुधरपिण्डवाडानगरस्थायिजनपङ्क्तिरत्नाभ्याम् ।
**श्रीहीराचन्द–श्राद्धवरअचलदास**तातकाभ्यां तु ॥२९॥ (गीतिः)

चारु**दिवाली-नन्दी**जननीकाभ्यां क्रमेण पुत्राभ्याम् ।
**श्रेष्ठिश्रेष्ठरतनचन्द्राख्य-श्रेष्ठिखुबचन्दनाम**[redacted]भ्याम् ॥३०॥ (गीतिः)

**नमि**[redacted]मन्दिरनिर्मापयितृभ्यामुद्यापनादिकारिभ्याम् ।
श्रीवृत्तियुतक्षपकश्रेणिमुद्रापिता स्ववित्तेन ॥३१॥ (गीतिः)

**तथाहि—**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मेन्धनं ज्वलितमाशु जिनेन येन ,
ध्यानानलेन समवापि शिवं च येन ।
यज्जापसिंहनदनेन पलायते च ,
कर्मद्विपोऽनवरतं स **नमिर्न** इष्टाम् ॥ १ ॥ (वसन्ततिलका)

**तद्विम्बदर्शनात्** सर्वो लोकः सम्यक्त्वमश्नुताम् ।
क्षपकश्रेणिमारुह्य सम्प्राप्नोतु शिवश्रियम् ॥ २ ॥ (अनुष्टुब् )

समस्ति श्रीमदर्बुदाचल-राणकपुरादिमहातीर्थपरिमण्डितश्रीमरुधराऽपरनाम**राजस्थान**-**देशे** श्रीविश्वानन्ददायकचरमशासनपति**श्रीवर्धमानप्रभु**प्रासादपरिभूषितं प्रकृष्टपुण्यभाक्प्राणि-परिवृतं **पिण्डवाडा**(पिण्डरवाटक)नामनगरम् । तत्राऽऽसीत् श्रेष्ठिश्रेष्ठ**समनाजो**नामाऽऽर्हतो धर्मकर्मरतः । तस्य धर्मोत्साही व्यवहारिहीरकः **हीराचन्द**नामा पुत्रः समजायत । तस्य **हीराचन्दाख्य**श्रेष्ठिनः सुपात्रदानादिना स्वकर्मतिमिरहरणदीपावलीव **दिवालि**नाम्नीभार्या शीलालङ्कारधारिणी विंशतिस्थानकतपो-वार्षिकतप-उपधानतपःप्रभृतिविकृष्टतपश्चारिणी सज्जनश्रेणिरत्नं **रतनचन्द**नामानं भरतजनताराणचन्द्रं **भरतचन्द्र**नामानममृतसुखाकाङ्क्षी **अमृतलाला**भिधं च त्रीणि पुत्ररत्नानि **धरमो**नाम्नीं च पुत्रीं प्रासूत । तत्राद्यस्य जिनधर्मपरायणा शीलादिविशिष्टगुणालङ्कारालङ्कृता गुरुजनोपासिका **धरमी**नाम्नी सधर्मिणी, यस्याः पञ्चमङ्गलमहाश्रुतस्कन्धोपचार-रूपोपधानतपःसमाप्तिः परमुपधानतपःकारितपस्विजनेषु बहुधनव्ययेन प्रथमतो मालारोपणं व्यधापि जिनधर्मानुरागरञ्जितेन तेन व्यवहारिणा । तस्य रतनचन्दाख्यस्य श्रेष्ठिनः पुत्री हेमकान्ति-**हेमलता** सम्प्रत्यपि नन्दति ।

इह च **पिण्डवाडा**नगरे **मनरूपजो**नामा ★मुत्तावंशीयोऽन्यो महेभ्यः समासीत् । तेन चतुः-षष्ट्यधिकैकोनविंशतितमवैक्रमाब्दे (१९६४) ध्वजारोपणप्रसङ्ग एकपञ्चाशदधिकसप्तशतरूप्यकाणि (७५१) श्रीसङ्घाय समर्प्य कुलपरम्परागतं जिनप्रासादस्योपरि ध्वजारोपणं व्यधत्त । तस्य च पुत्रः स्थैर्येऽचल इव **अचलदास**नामाऽजायत । **अचलदास**नाम्नश्च श्रेष्ठिनो धर्मकार्यनन्दिनी **नन्दी**-नाम्नी जाया भूरिसुभाग्याऽभवत् । यया पञ्चशताचाम्ल-वार्षिकतप-उपधानतपो-विंशतिस्थानकतपः-सिद्धचक्रसमाराधन-नवनवतिश्रीशत्रुञ्जयमहातीर्थयात्राद्यनेकधर्मकृत्यानि व्यदधत स्वजीवने । किञ्च षोडशाधिकद्विसहस्रतमवर्षे (२०१६)श्री**वर्धमानस्वामि**प्रतिष्ठाप्रसङ्गे ध्वजारोपणोत्सर्पणाऽवसरे ❀ 'ध्वजारोपणलाभविरह आजीवनं सहकारफलं नास्वादये' ति स्वदृढसंकल्पः प्रकटितो यया प्रशान्तस्व-भावाय सज्जनभगणचन्द्राय स्वपुत्राय **खुबचन्दा**भिधाय **धरमी-फुली-छोगी**त्येताभ्यश्च स्वपुत्री-भ्यः । तस्या **नन्दी**श्रमणोपासिकायाः पुत्रस्य श्रेष्ठि**खुबचन्द**नाम्नो दान-शील-तपःप्रभृतिविशिष्टगुण-

---

★ महेतावंशीयः ❀ 'उच्छामणी बखते' इति भाषायाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिभूषिता धर्मपरायणा **बदामी**नाम्नी गृहिणी कुलाचारचरणवर्या समस्त्यद्यापि । तथा दीनता-ग्रीष्महेमन्त इव **हेमन्तः** पुण्यपृथ्वीन्द्र इव **नरेन्द्र**श्च सुखयन्ती **दमयन्ती** धर्मवसुमती **हसुमती** च पुत्रपुत्र्यो विनयान्विता नन्दन्ति ।

एकदा पुण्यप्राप्तसमृद्धिशालिभ्यां श्रेष्ठि**खुबचन्द-रतनचन्द**नामभ्यां क्रमेण श्याल-भगिनीपतिभ्यामग्निरथविश्रामस्थाने ( स्टेशन ) **सिरोहीरोड**नामकेऽनेकयात्रिकाणामर्हद्दर्शन-विरहं संलक्ष्य सम्यग्दर्शनादिविशुद्धये भव्यं नव्यं जिनमन्दिरं निर्मापयितुं सङ्कल्पः कृतः । ततश्चतुर्दशाधिकविंशतिशततमवैक्रमाब्दे ( २०१४ )श्री**सिरोहीरोड**ाभिधेऽग्निरथविश्रामस्थाने रम्ये भूमिभागे जिनप्रासादनिर्मापणार्थं शिलारोपणं व्यधत्त ताभ्याम् । ततः क्रमेण सपादलक्ष-रूप्यकधनव्ययेन महामण्डपमण्डितं चारुशृङ्गालिकापरिवृतं तुङ्गतोरणराजिष्णु साक्षात्सिद्धालयोपमं श्रीजिनगेहं निर्माप्य तत्र वैराग्यवारांनिधिश्रीमद्**विजययशोदेवसूरिवर**-श्रीमद्**मानविजया**द्ये-कादशपन्न्यासवरा-ऽनेकस्थविर-बाल-युव-वृद्ध-शतातीतशिष्यप्रशिष्यमुनिव्रातपरिवृतैः प्रतिक्षिप्तलुम्पाक-मत-न्यायाम्भोधि श्रीमद्**विजयानन्दसूरीश्वर**पट्टवर निःस्पृहशिरोमणि-सच्चारित्रचूडामणि-श्रीम-द्**विजयकमलसूरीश्वर**पट्टधारि-पाठकवरश्रीमद्वीरविजयविनेयरत्न-सकलागमरहस्यज्ञ-परमगीता-र्थाऽशेषशेमुषीशालिकुलविद्रूयमान-श्रीमद्**विजयदानसूरीश्वर**पट्टधरैः स्वगुरुप्रदत्तसिद्धान्तमहो-दधिपदधारिभिर्गच्छाधिपतिभिः श्रीमद्**विजयप्रेमसूरीश्वरैः** प्रतिष्ठापितम् **अर्बुदाचल**तीर्थात्स-मानीतं प्रशमरसकन्दकल्पं श्रीनाथ**नमिनाथ**मूलनायकबिम्बं षोडशोत्तरविंशतिशततमविक्रमीयवर्षे (२०१६)माघवमासे शुक्लपक्षे चतुर्थ्यां तिथौ शुभे च मुहूर्ते महता महेन । तदानीमन्यान्यपि प्रतिष्ठा-पितानि दर्शनमात्राद् दुरितध्वंसीनि श्रेष्ठिरतनचन्द-खुबचन्दद्रव्यनिर्मापितानि चत्वारि **श्रीचन्द्रप्रभ-स्वाम्यादि**बिम्बानि । अपि च तद्दिने हर्षातिरेकेण चतुर्विधः सङ्घोऽनेकविधसामग्रीभिर्मिष्टान्नादिभिः सत्कारितः सन्मानितश्च विनयवचनप्रतिपत्त्या पुण्यभाग्भ्यां ताभ्याम् । तदनु तद्वर्षे तन्मास-तत्पक्षस्य षष्ठ्यां तिथ्यां श्री**पिण्डवाडा**नगरस्थद्विपञ्चाशद्देवकुलिकाकलितविश्वानन्ददायकजिनम-न्दिरे **श्रीवीरविभु**मूलनायकबिम्बस्य प्रतिष्ठावसर एकाधिकपञ्चसप्ततिसहस्ररूप्यकोत्सर्पणेन स्वमातृमनोरथपूरणायोत्तुङ्गप्रासादशिखरे ध्वजारोपणं कृतवान् सोत्साहस्तज्जिनगेहे निर्मापितैकदेव-कुलिको वदान्यः **खुबचन्द**नामा श्रेष्ठी ।

ततः सप्तदशाधिकविंशतिशततमे (२०१७)वैक्रमाब्दे श्री**पिण्डवाडा**नगरे वर्षावासं कृतवति गच्छाधिपतौ श्रीमद्**विजयप्रेमसूरीश्वर**प्रभौ वन्दनादिकार्यार्थमागतवन्तौ श्रेष्ठी**रतनचन्द-खुबचन्द**नामानौ । श्रुतश्च पूज्यगच्छाधिपतिश्रीमुखात् प्राचीनकर्मशास्त्राधारेण सरलसुबोधपद्धत्या बहुविस्तराभिनवकर्मशास्त्राणां निर्माणोदन्तः । ततः श्रुतभक्तिनिभृतचेतसौ तिमिकोशतङ्गतर-लकमलाव्ययेन सुवर्णगिरिवत् स्थिरां मोक्षश्रियं प्राप्तुकामौ तौ दशसहस्राणि रूप्यकाणि **क्षपक-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रेणिग्रन्थरत्नमुद्रणाद्यर्थं कर्मशास्त्रप्रकाशनप्रवणायै प्रकाशकसंस्थायै दातुं निश्चितवन्तौ । ततः कालान्तरे हृद्गदेन कालं गतेऽपि वदान्ये **रतनचन्दाख्ये** तदीयेन स्वीयेन च द्रव्येण पञ्च-शताचाम्लसिद्धचक्रतपआराधनादिनिमित्तकसाधर्मिकवात्सल्यशान्तिस्नात्रमहोत्सवपूर्वकोद्यापनादि-कानि पुण्यकार्याणि व्यदधत **खुबचन्दा**भिधेन श्रेष्ठिना विंशत्यधिकविंशतिशततमवैक्रमाब्दे (२०२०) **पिण्डवाडानगरे** वर्षावासं कृतवति गच्छाधिपतौ । एष चैकसप्तत्यधिकद्विशतमूलगाथाकः (२७१)अनुमानतः सपादसप्तदशसहस्रश्लोकप्रमाणया सयन्त्रचित्रकस्वोपज्ञवृत्त्या विभूषितः **क्षपक-श्रेणिग्रन्थस्तयो रतनचन्द–खुबचन्द**श्रेष्ठिपुङ्गवयोर्द्रव्यसाहाय्येन प्रकाश्यत इति कृतसुकृतौ तावन्ये च भव्यात्मानोऽस्याः पठनपाठनस्वाध्यायादिना क्रमेण शुक्लध्यानेन क्षपकश्रेणिमारुह्य निःश्रेय-समश्नुवतामिति ।

स्वोपज्ञवृत्तियुक्ता क्षपकश्रेणिरनुमानतः प्रमिता ।<br>
श्लोकैः सपादसप्तदशसहस्रैरस्त्यनुष्टुब्भिः ॥३२॥ (विपुलार्या)

शिशुचेष्टाप्येषा मम न भवति हास्यास्पदं कृतिनां<br>
यस्माद्धि यथाशक्ति शुभे यतनीयमिति ते प्राहुः ॥३३॥ (उपगीतिः)

यावद् घण्टायेतेऽर्केन्दू सुरगिरिगजे जयतु तावत् ।<br>
इभगजयुगनयनमिते २४८८ वीराब्दे निर्मिता वृत्तिः ॥३४॥ (पथ्यार्या)

स्वोपज्ञक्षपकश्रेणिवृत्तिरचनेन तु गुणरत्नेन ।<br>
कुशलं यदापि तेन क्षपकश्रेणिं जगत् समारुह्यात् ॥३५॥ (गीतिः)

इति समाप्ता प्रशस्तिः ।

तत्समाप्तौ च समाप्ता

श्रीमत्तपोगच्छगगनाङ्गणदिनमणि-सुविहितगच्छाधिपति-सिद्धान्तमहोदधि-सच्चारित्रचूडामणि-कर्मशास्त्रनिष्णात--प्रातःस्मरणीयाचार्यशिरोमणि–श्रीमद्विजयप्रेमसूरीश्वरान्तेवासि-स्याद्वादनयप्रमाणविशारद-पन्न्यासप्रवरश्रीमद्भानुविजयगणिवर्यशिष्यप्रशिष्य-श्रीमद्गच्छनायकप्राध्यापित-वाचंयममतल्लिका-**जयघोषविजय-धर्मानन्द-विजय-हेमचन्द्रविजय**-गुणरत्नविजयसंगृहीतकर्मक्षपणापदार्थकाया मुनिपुङ्गवजितेन्द्रविजयचरणारविन्दचञ्चरीकायमाणा-ऽन्तिषदा मुनि-गुणरत्नविजयेन विरचितायाः क्षपकश्रेणेः स्वोपज्ञवृत्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# परिशिष्ट

## [ INDEXES ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रथमं परिशिष्टम्

## —:: क्षपकश्रेणिमूलगाथाः ::—

पणमिअ सिरिपासजिणं सुरअसुरणरिंदवंदिअं णाहं ।
वुच्छामि खवगसेढिं सपरहिअट्ठं गुरुपसाया ॥ ॥

तत्थ य णव अहिगारा अहापवत्तकरणं तह हवेइ ।
करणमपुव्वं हवए सवेअअणियट्टिकरणं च ॥२॥

हयकण्ण-किट्टिकरण-तयणुहव-अवगयकसायअद्धा य ।
तह अत्थि सजोगिगुणट्ठाणमजोगिगुणठाणं च ॥३॥

अणचउगं दिट्ठितिगं च खविअ उज्जमइ सेसखवणाए
आढवइ अप्पमत्तो अहापवत्तकरणं समणो ॥४॥

परिणामट्ठाणाइं अणुसमयमसंखलोगमेत्ताणि ।
उड्ढमुहाऽणंतगुणा सोही तिरिया उ छट्ठाणा ॥५॥

करणस्स पढमसमये सव्वत्थोवा जहण्णिया सोही ॥
तो पढमसंखभागं जाव जहण्णा अणंतगुणा ॥६॥

तत्तो पढमे समये उक्कोसा होअए अणंतगुणा ।
तो उवरि पढमसमये होइ जहण्णा अणंतगुणा ॥७॥

एवं हेट्ठे उवरि य जाव जहण्णाऽत्थि चरिमसमयम्मि
तत्तो सेसुक्कोसा कमेण हुन्ते अणंतगुणा ॥८॥

मणवयणोरालाणं जोगे वट्टेइ अण्णयरे ।
सुअउवजोगे मइसुअचक्खुअचक्खूसु वा इगकसाये
॥ ९ ॥ (उद्गीतिः)

पुरिसाईणं देअे अण्णयरम्मि य विसुज्झयरसुक्काए ।
पयइठिइरसपअेसा पडुच्च णेयाणि बन्धुदयसंताइं
॥१०॥ (आर्यागीतिः)

सेकाले कुणइ अपुव्वकरणमे अम्मि होअइ विसोही ।
गोमुत्तिकमेण जहण्णा उक्कोसा अणन्तगुणा ॥११॥

बीयकरणपढमसमयओ ठिइघाओ सुहासुहाण तहा ।
गुणसंकमो असुहपयडीणं अणुभागघाओ य ॥१२॥

अण्णो य ठिइबंधो गुणसेढि त्ति अहिगारपंचतयं ।
जुगवं पयट्टइ तओ णाम अपुव्वकरणं अत्थि ॥१३॥

उक्कोसं ठिइखण्डं पि पल्लसंखेज्जभागमाणं खु ।
खंडइ अवरत्तो संखेज्जगुणं जाव तक्करणं ॥१४॥

असुहपयडीण दलिअं तु असंखगुणं पखिवइ अन्नासुं ।
बज्झंतीसु सपयडीसु अणुखणं स गुणसंकमो णेओ ।१५।
(गीतिः)

खंडइ अणंतभागा रसस्स णत्थि य सुहाण रसघाओ ।
एक्केक्कम्मि ठिइविघाये रसघाया सहस्साइं ॥१६॥

बंधो अंतोकोडाकोडी सत्ताउ संखगुणहीणो ।
पुण्णे ठिइबंधे अण्णो होज्जइ पल्लसंखभागोणो ॥१७॥
(गीतिः)

गुणसेढीए आयामो हवए करणदुगाऽहिओ गलिओ ।
खिवइ दलं कमसो घेत्तूण-ऽणुसमयं असंखगुणणाए
॥१८॥ (गीतिः)

उव्वट्टणाअ खु असंखगुणा ओवट्टणा तओ सत्ता ।
जं उक्किण्णस्स असंखंसो उव्वट्टणाअ होएइ ॥१९॥
(गीतिः)

पढमंसेऽपुव्वस्स उ बे णिद्दा सुरगइप्पभिइतीसा ।
छट्ठंसे हासरइभयदुगुच्छाऽन्ते य बंधत्तो ॥ २० ॥

वोच्छिज्जंति छ हासाई उदयत्तो य ठिइबंधो ।
पढमसमयओ चरिमसमयम्मि संखेज्जगुणहीणो
॥२१॥ (उपगीतिः)

जं ठिइसंतं अंतोकोडाकोडी अपुव्वआइखणे ।
तं संखेज्जगुणूणं अंते संखठिइघायेहिं ॥ २२ ॥

सेकाले अणियट्टिं णासेउं आढवेइ ठिइखंडं ।
तं हस्सत्तो संखेज्जभागअहियं तु उक्कोसं ॥ २३ ॥

पढमखणे देसोवसमणानिकायणनिहत्तिकरणाइं ।
वोच्छिन्नाइं अंतोलक्खं पढमो उ ठिइबधो ॥२४॥

जं ठिइसंतं अंतोकोडाकोडी अपुव्वपढमखणे ।
होज्जा तं अंतोकोडी अनियट्टिपढमखणम्मि ॥२५॥

पढमे ठिइखंडे पुण्णे तुल्लं हवइ संतकम्मं तु ।
सव्वेसिं जीवाणं ठिइखंडं च वि हवइ तुल्लं ॥२६॥

संखठिइबंधगमणे असण्णितुल्लो पहवइ ठिइबंधो ।
चउतिदुएगिंदियतुल्लो बंधो अंतरे य बहुबंधा ॥२७॥
(गीतिः)

ठिइबंधबहुसहस्सेसु गयेसुं होइ जं तु एक्केक्कं ।
तं भणिहामो णत्थि विसेसं णियमो कहिमु बंधं ।२८।

एग-दिवड्ढ-दु-पल्लाणि वीसगाणं च तीसगाणं च ।
मोहस्स य परिवाडीअ दुगस्स उ संखगुणहीणो ॥२९॥
संखेगतिभागुत्तरपल्लाइ खलु वीसगाईणं ।
ताउ परं तीसाणं तहेव संखेज्जगुणहीणो ॥ ३० ॥
मोहस्स पल्लमेत्तो सेसाणं पल्लसंखभागमिओ ।
ताउ परं सव्वेसिं कम्माणं संखगुणहीणो ॥ ३१ ॥
पुण्णे बंधेऽणुक्कमं तु वीसगाईण संखगुणो ।
तो वीसगाण जायइ पलियअसंखेज्जभागमिओ ॥३२॥
(उपगीतिः)

तो तीसगाण पल्लस्स असंखंसो तओ य मोहस्स ।
पल्लअसंखंसोऽन्तोलक्खं संतं च सत्तण्हं ॥ ३३ ॥
ताउ असंखगुणो एक्कपहारेणेइ तीसगाण अहो ।
मोहट्ठिइबंधो तो वीसगहेट्ठा कमा असंखगुणो ॥३४॥
(गीतिः

तो वेअणिज्जबंधो सेसाणं तीसगाण उवरिं तु ।
तो सेसतीसगाणं ठिइबंधो वीसगाण अहो ॥३५॥
ताहे वीसगबंधा तइयस्स विसेसअहिगो खु ।
एवंकमेण गच्छइ बंधो अह भणिमु ठिइसंतं ॥३६॥
(उपगीतिः)

तत्तो असण्णितुल्लं ठिइसंतं ताउ बंधव्व ।
ता णेयं जावंतप्पबहुत्तं खलु ण पाविज्ज ॥३७॥
(उपगीतिः)

चरिमप्पबहुत्ताउ असंखखणपबद्धुदीरणा होइ ।
तोऽट्ठकसाया खवए जहण्णठिइसंकमो चरिमे ॥३८॥
तो थावरतिरिनिरयायवदुगसाहारणेगविगलाइं ।
थीणद्धितिगं च खवइ तो बंधइ देसघाईणि ॥३९॥
दाणंतरायमणपज्जवाण तो लाभओहिदुगकम्माणं ।
तो सुअअचक्खुभोगाण तओ चक्खुस्स अहुवभोगमईणं
॥४०॥ (आर्यागीतिः)

तो वीरियस्स रसबंधो हवए देसघाई उ ।
तो तेरसपयडीण-ऽन्तरं कुणेइ ठिइबंधकालेण ॥४१॥
(उद्गीतिः)

भिन्नमुहुत्तं उदियाणं आवलिया पराण पढमठिई ।
संढत्थीण समाऽव्वा पुरिसाईण कमसो विसेसऽहिया
॥४२॥ (गीतिः

सुदयाणं पयडीणं पढमठिईए खिवेइ उक्किण्णं ।
दलिअं बज्झंतीण अबाहुवरिमबीयगठिईए ॥४३॥

मोहस्स संखवरिसा बंधो इगठाणिआ य बंधुदया ।
तस्सेव आणुपुव्वीसंकमणमसंकमो य लोहस्स॥४४॥
(गीतिः)

तह आवलिगासु छसुं उदीरणा संढवेअखवणा य ।
कयअंतराण सत्तऽहिगारा जुगवं पयट्टंते ॥४५॥
कयअंतराण मोहस्स बंधुदयसंकमा रसे होन्ति ।
कमसो अणंतगुणसेढीए अह ते दले भणिमो ॥४६॥
होन्ति पएसे कमसो बंधउदयसंकमा असंखगुणा ।
सेकाले सेकाले रसबंधुदया अणंतगुणहीणा ॥४७॥
(गीतिः)

रससंकमो उ खण्डे पुण्णे होज्जइ अणंतगुणहीणो ।
सेकाले सेकाले पएसबंधो चउविहो य ॥४८॥

सेकाले सेकाले पएसउदयो असंखगुणो ।
सेकाले सेकाले दलसंकमणं असंखगुणं ॥४९॥
(उपगीतिः)

संवइ बहुगो उदयो तत्तो बंधो-ऽत्थि ताउ अणुभागे ।
सेकाले उदयो तत्तो बंधो-ऽणंतगुणहीणो ॥५०॥

ठिइखंडेसु गयेसुं संढं सव्वं खवेइ तत्तो थिं ।
खवणद्धासंखंसे बंधो संखवरिसा तिघाईणं ॥५१॥
(गीतिः)

तत्तो ठिइखंडपुहुत्तेणं इत्थिं खवेइ णिस्सेसं ।
ताहे संतं मोहस्स संखवासपमिअं होइ ॥५२॥

सेकाले खवए सत्तणोकसायेऽप्पबहुअं च ।
मोहस्स ट्ठिइबंधो थोवो घाईण संखगुणो ॥५३॥
(उपगीतिः)

तो वीसाण असंखगुणो तो तइयस्स खलु विसेसहिओ ।
ठिइसंतं मोहस्सऽप्पं घाईणं असंखगुणं ॥५४॥

तो वीसाणअसंखगुणं तो तइयस्स खलु विसेसऽहिअं
खवणद्धासंखंसेऽघाईणं संखवासिगो बंधो ॥५५॥
(गीतिः)

खवणाद्धासंखंसेसुं संतं संखवासिअं घाईणं ।
आगालो पडिआगालो सेसे आलिगादुगे वोच्छिन्ना
॥५६॥ (आर्यागीतिः)

समयाहिअआवलिसेसाअ जहण्णा उदीरणा होइ ।
चरिमे समयूणदुआवलिबद्धं तहुदयट्ठिई सेसा ॥५७॥
( गीतिः )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरिसस्स अट्ठवरिसा सोलसवरिसाणि संजलणगाणं।
बंधो संतं घाइअघाईणं संख-ऽसंखवासाइं ॥५८॥
(गीतिः)

हयकण्णादोलोव्वट्टणउव्वट्टणकरणअद्धा।
हयकण्णकरणकालस्स तिन्नि णामाणि णेयाणि ।५९।
(उपगीतिः)

ठिइसंतं संखसहस्सवासमेत्तं तयाणि मोहस्स।
अंतोमुहुत्तऊणो सोलसवासपमिओ बंधो ॥ ६० ॥

रससंतं माणस्सप्पमइ विसेसाहिअक्कमेण खलु।
होज्जाइ कोहमायालोहाणं तव्व बंधो वि ॥ ६१ ॥

रसखंड कोहाईण कमेण विसेसअहिअमइ ।
घाइअ-ऽवसेसफड्डाइं लोहाईण ऽणंतगुणणाए ॥६२॥
(उद्गीतिः)

संजलणजहण्णगपुव्वफड्डगत्तो अणंतगुणहीणं ।
करए उक्कोसमपुव्वफड्डगं तं कयं न पुव्वं ति ॥६३॥
( गीतिः )

ताणि अपुव्वाणिगदुगुणहाणिफड्डाणऽसंखइमभागो।
एत्थ पुण भागहारो ओकड्ढणओ असंखगुणो ॥६४॥

सो पुण असंखभागो पल्लपढमवग्गमूलस्स ।
कमसो अपुव्वगाणाइवग्गणाऽत्थि य विसेसऽहिआ
॥६५॥ (उपगीतिः)

कोहाईण अपुव्वाणि फड्डगाइं अणुकमेण ।
कुणए विसेसअहियाइं पढमखणे य अस्सकण्णस्स
॥६६॥ ( उद्गीतिः )

अणुभागे चरिमअपुव्वाण हवइ पढमवग्गणा तुल्ला।
लोहाईण अणूए अविभागा खलु विसेसअहियकमा।
॥६७॥ (गीतिः)

देइ अपुव्वेसु विसेसूणकमेणं दलं तओ देइ।
पुव्वाईअ असंखगुणूणं सेसासु उण विसेसूणं ॥६८॥
(गीतिः)

दीसइ दलिअं पुव्वापुव्वेसुं फड्डगेसु गोपुच्छेणं।
पुव्वाईअ अपुव्वाइत्तो दीसइ असंखभागविहीणं
॥६९॥ (आर्यागीतिः)

पढमसमये अपुव्वाणि फड्डगाइं अणंतभागमिआइं।
हेट्ठाणि पराण उदिण्णाइं बंधो तहेवऽणंतगुणूणो
॥७०॥ (आर्यागीतिः)

अणुसमयमसंखगुणं दलिअं घेत्तूण पकुणेइ ।
पडिसमयमपुव्वाणि खलु असंखेज्जगुणहीणाइं
॥७१॥ (उपगीतिः)

तक्कालिएसु देइ अपुव्वेसु दलं विसेसूणं ।
तो पुव्विल्लअपुव्वाईअ असंखगुणहीणदलं ॥७२॥
(उपगीतिः)

तत्तो विसेसहीणक्कमेणं जा पुव्वअन्तिमगा ।
दीसइ दलिअं पुव्वापुव्वेसु विसेसहीणकमं ॥७३॥
(उपगीतिः)

इगखंडे पुण्णेऽप्पाबहुगं अट्ठारसपयाणं ।
कोहाईण अपुव्वाइं फड्डाइं विसेसअहियाइं ॥७४॥
(उद्गीतिः)

तत्तो एगदुगुणहाणिफड्डगाइं असंखगुणिआणि ।
तत्तो अणंतगुणिआ इगफड्डगवग्गणा होन्ति ॥७५॥
तत्तो य वग्गणा कोहअपुव्वगफड्डगाणऽणंतगुणा।
माणाईण अपुव्वगफड्डाणं वग्गणा विसेसऽहिआ॥७६॥
( गीतिः )

लोहस्स पुव्वफड्डाणि अणंतगुणाणि वग्गणा सि च।
एवं जाव अणंतगुणा कोहस्स खलु वग्गणा होंति ॥७७॥
(गीतिः)

चरिमे समये मोहस्स अट्ठवासपमिओ हवइ बंधो।
इयराण संखवाससहस्साइं भणिमु ठिइसंतं ॥ ७८ ॥

घाईण संखवाससहस्साणि पराण उण असंखसमा।
एवं हयकण्णकरणअद्धं खलु परिसमावेइ ॥७९॥
पुण्णे हयकण्णे आढवेइ किट्टिकरणं तम्मि ।
निव्वत्तइ पुव्वापुव्वफड्डगत्तो य किट्टीओ ॥ ८० ॥
(उपगीतिः)

जेट्ठा किट्टी उ अणंतगुणूणा पढमवग्गणाहिंतो।
किट्टीओ फड्डस्स अणंतिमभागपमिआ होंति ॥८१॥
एगेगस्स कसायस्स तिण्णि तिण्णि अइयाऽणंता।
संगहकिट्टी तिन्नि अवंतरकिट्टी अणंताओ ॥ ८२ ॥
(उपगीतिः)

कोहाईणं उदयेणं पडिवन्नस्स कमसो हि ।
बारस णव छ तिण्णि य संगहकिट्टीउ जायन्ते।
॥८३॥ (उपगीतिः)

एगेगाए संगहकिट्टीअ अवंतराअ उ अणंता ।
होंति य किट्टीओ पडिसमयमसंखगुणहीणाओ ॥८४॥

दलिअं तु पडिखणं उकिरइ असंखगुणिअं च किट्टीणं ।
अह किट्टीणं अणुभागप्पाबहुअं भणिज्जेइ ॥ ८५ ॥

लोहस्स पढमसंगहकिट्टीअ जहण्णगाअ खलु ।
थोवा रसाविभागा तत्तो बिइयाअऽणंतगुणिआऽत्थि ॥८६॥ (उद्गीतिः)

एवं जाव चरमकिट्टीए बीयपढमाअऽणंतगुणा ।
पुव्वव्व जाव अंतिमकिट्टीए ताउ तइयाए ॥८७॥

पढमाअऽणंतगुणिआ जावं चरिमाअ एवं च ।
मायाए तिण्हं किट्टीसुं णेया अणंतगुणणाए ॥८८॥ (उद्गीतिः)

तत्तो माणगकोहाणं तिण्ह रसाविभागा य ।
कमसो उ जाव कोहुकोसाए होज्जऽणंतगुणा ॥८९॥ (उपगीतिः)

अह संगहकिट्टीअंतराण तहऽवंतरंतराण खलु ।
भणिहामो अप्पाबहुअं जं अत्थि सुअअणुरूवं ॥९०॥

तत्थ य लोहपढमऽवंतरकिट्टीअंतराउ आढविऊणं ।
कोहचरिमऽवंतरकिट्टिअंतरं जावऽणंतगुणिअं णेअं ॥९१॥ (आर्यागीतिः)

तो लोहस्स पढमसंगहकिट्टीअंतरं अणंतगुणं ।
तो बीयअंतरमह तइयकिट्टीअंतरं अणंतगुणं ॥९२॥ (गीतिः)

अह लोहगमायाणंतरं अणंतगुणिअं तहेवियराणं ।
कोहचरिमाउ लोहअपुव्वाइमवग्गणान्तरं विण्णेयं ॥९३॥ (आर्यागीतिः)

अह संगहकिट्टीणं पएसअप्पाबहुत्तं तु ।
माणस्स पढमसंगहकिट्टीअ पएसगा थोवा ॥ ९४ ॥ (उपगीतिः)

तत्तो बीयाए उ विसेसऽहिया होन्ति माणस्स ।
तो तइआए अहिआ तो कोहस्स बिइयाअ अब्भहिआ ॥९५॥ (उद्गीतिः)

तो तइआए अहिआ तो मायाएऽहिआ कमा तीसु ।
तो लोहस्स कमेणं तीसु विसेसाहिआ तत्तो ॥९६॥

कोहस्स पढमसंगहकिट्टीए होंति संखगुणा ।
एवमवंतरकिट्टीणऽप्पाबहुअं मुणेयव्वं ॥९७॥ (उपगीतिः)

लोहजहण्णगकिट्टिपहुडिकोहुकोसकिट्टिअंतासु ।
सव्वासुं देइ दलं विसेसहीणक्कमेण खलु ॥९८॥

लोहस्स जहण्णगकिट्टित्तो कोहस्स जेट्ठकिट्टीए ।
दलिअं परंपराअ वि दिज्जेइ विसेसहीणं हि ॥९९॥

दलिअं तु दिस्समाणं लोहजहण्णाउ पहुडि कोहस्स ।
उक्कोसं किट्टिं जाव विसेसूणक्कमेणऽत्थि ॥१००॥

किट्टी कुणमाणो ओवट्टइ मोहस्स ठिइरसा णियमा ।
सो य न उव्वट्टइ ओवट्टइ उव्वट्टइ परो उ ॥१०१॥

बीयाइखणेसु असंखगुणकमेणं दलं तु घेत्तूणं ।
कुणइ अहो संगहकिट्टीण अपुव्वा असंखगुणहीणा ॥१०२॥ (गीतिः)

देइ अपुव्वंतत्तो पुव्वाईए असंखभागूणं ।
पुव्वंताउ अपुव्वाईअ असंखंसउत्तरं दलिअं ॥१०३॥ (गीतिः)

सेसासु विसेसूणं तेणं तेवीसउट्टकूडाणि ।
होन्ते दीसइ दलिअं सव्वत्थ अणंतभागूणं ॥१०४॥

नरतिरियइगपणिंदितसदुओरालियसरीरजोगेसु ।
मणवयजोगचउक्के नपुंचउकसायमग्गणासुं च ॥१०५॥ (गीतिः)

णाणाणाणदुगाविरइसामइअचक्खुदुगछलेसासु ।
भवमिच्छुवसमवेयगखाइअसम्मेसु सण्णिइयरासु ॥१०६॥ (गीतिः)

आहारम्मि य बद्धपएसा होअन्ति णियमत्तो ।
किट्टीकाराणं किट्टिवेअगाणं च संतम्मि ॥१०७॥ (उपगीतिः)

निरयसुरविगलपुढवीजलानलपवणवणस्सईसु तह ।
वेउव्वाहारगदुगकम्मणजोगित्थिपुरिसवेअेसु ॥१०८॥ (गीतिः)

ओहिविहंगमणेसु तह देसविरइपरिहारछेअेसु ।
ओहिगदंसणमिस्सासायणणाहारगेसु भयणाए ॥१०९॥ (गीतिः)

केवलदुगअभवियसुहुमअहक्खायेसु णियमत्तो ।
बद्धपएसा णत्थि य सते संभवअभावत्तो ॥११०॥ (उपगीतिः)

सायासायेसुं पज्जत्तापज्जत्तगेसुं च ।
एगिंदियाण य असंखिज्जेसु भवेसु णियमत्तो॥१११॥ (उपगीतिः)

एगुत्तरवुड्ढीए संखतसभवेसु बद्धदलमत्थि ।
संतम्मि सव्वलिंगेसु कम्मसिप्पगुरुठिइरसेसुं वा ॥११२॥ (गीतिः)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खवगाणं संते णियमत्तो कहियदलिअं तु वट्टेइ ।
सव्वठिईसु तह सव्वासु किट्टीसु णियमेणं ॥११३॥
किट्टीकरणे पुव्वापुव्वाइं फड्डगाणि अणुहवइ ।
पढमट्ठिईअ आवलिगासेसाए समत्तद्धा ॥११४॥
किट्टिकरणस्स चरिमे बंधो मोहस्स चउमासा ।
अंतोमुहुत्तअहिया पराण संखियसहस्सवासाइं
॥११५॥ (उद्गीतिः)
ठिइसंतं मोहस्सऽडवासा अंतोमुहुत्तअब्भहिआ ।
घाईण संखवरिससहस्साणि असंखवच्छराऽन्नाणं
॥११६॥ (गीतिः)
तत्तो य कोहपढमं ओकड्ढित्तु करेइ पढमठिइं ।
वेयइ बंधो मोहस्स उ चउमासा पराण पुव्वुत्तो
॥११७॥ (गीतिः)
वेइज्जमाणकिट्टीअ दलमसंखगुणणाअ पढमठिईए ।
चरिमणिसेगा बीयपढमे असंखगुणमुवरि उ विसे-
सूणं ॥११८॥ (आर्यागीतिः)
वेइज्जमाणकिट्टीए सव्वठिईसु होन्ति सव्वा किट्टी ।
नवरं उदये खलु मज्झिमात्थि सव्वा पराण बिइयठिईए
॥११९॥ (आर्यागीतिः)
ठिइसंतं मोहस्स वरिसट्ठगं देसघाइ रससंतं ।
णवरं समगूणावलिगाए कोहस्स सव्वघाइ भवे
॥१२०॥ (गीतिः)
कोहाइपढमसंगहकिट्टीए बहुअसंखभागमिआ ।
मज्झिमकिट्टी बज्झंते वेइज्जंति कोहपढमाए ॥१२१॥
(गीतिः)
कोहपढमाअ हेट्ठिमणुभया थोवा तओ हविज्जंति ।
अहिआ हेट्ठिमुदिण्णा तत्तो उवरिल्लअणुभया अहिआ
॥१२२॥ (गीतिः)
तत्तो उवरिमुदिण्णा विसेसअहिया हवन्ति तत्तो वि ।
होंति असंखेज्जगुणा उभयाउ अवन्तरा किट्टी ॥१२३॥
मोहस्सऽणुभागाण अणुसमयोवट्टणा गुरू किट्टी ।
गोमुत्तियाअ उदये बंधेऽणुखणं अणंतगुणहीणा ॥१२४॥
(गीतिः)
गोमुत्तीअ पडिखणं बंधे उदये अणंतगुणहीणा ।
हस्सा णासइ संगहकिट्टीणुवरिमअसंखंसं ॥१२५॥
संगहकिट्टीग दलं हेट्ठे संकामए ण उण उवरिं ।
संकामइ तास दलं तावं जाव सगहेट्ठिमा पढमा ॥१२६॥
(गीतिः)

जं संगहकिट्टिं अणुहवए तयणंतराअ इयरत्तो ।
संकामइ दलिअं संखगुणं अप्पबहुअं भणिमो ॥१२७॥
कोहबिइयतइयत्तो माणगपढमाअ माणगतिगत्तो ।
मायापढमाए मायाअ तिगत्तो य लोहपढमाए ॥१२८॥
(गीतिः)
लोहपढमाउ तब्बिइयाए ताउ च्चिअ तइयाए ।
